महामहोपाध्यायनागेशभट्टविरचितः

लघुशब्देन्दुशेखरः

व्याख्याकारः
आचार्य ब्रह्मदत्त द्विवेदी

महामहोपाध्यायश्रीनागेशभट्टविरचितः

लघुशब्देन्दुशेखरः

'राधिका' संस्कृत-हिन्दीव्याख्याद्वयोपेतः

[वैयाकरणसिद्धान्तकौमुदीसहितः]

(पञ्चसन्ध्यन्तो भागः)

व्याख्याकारः —

विद्यावाचस्पतिः

श्रीब्रह्मदत्तद्विवेदी

(राष्ट्रपतिसम्मानितः)

पाटलिपुत्रस्थरामनिरञ्जनदासमुरारका-

संस्कृतमहाविद्यालयस्य प्राचार्यचरः

सुशील प्रकाशन

मुरारका संस्कृत कालेज

चौक, पटना सिटी–८

प्रकाशकः—
©सुशील प्रकाशन
मुरारका संस्कृत कालेज
चौक, पटना सिटी-८

संस्करण १९८८
मूल्य—रु० —200/=

प्राप्तिस्थान—
सुशील प्रकाशन
मुरारका संस्कृत कालेज
चौक, पटना सिटी-८
एवं
वाराणसेय संस्कृत संस्थान
सी २७/६४ जगतगंज, वाराणसी-२

मुद्रक—
आनन्द प्रिंटिंग प्रेस
सी २७/१७० ए जगतगंज, वाराणसी-२

Mahamahopadhyaya Nagesha Bhatta's

LAGHU SHABDENDU SHEKHARA

WITH

"RADHIKA" Sanskrit-Hindi Commentary

by

Vidyavachaspati

Pt. Shri BRAHMADATTA DWIVEDI

Recipient of President Award.

Former Principal.

Ram Niranjan Das Murarka

Sanskrit College, Chowk, Patna City-8

Publisher

Sushil Prakashan

Chowk, Patna City-8

Published by—

© Sushil Prakashan

Murarka Sanskrit College,

Chowk, Patna City-8

Edition—1988

Price Rs.—200/=

Printer.

Anand Printing Press.

C 27/170 A, Jagatganj,

Varanasi-2

गोलोकवासिन्याः

अस्मत्सहधर्मचारिण्याः

श्रीमत्या राधिकादेव्याः


पुण्यस्मृतौ

सप्रणयं

समर्पयति

कालो नाकलयत् कुतः कथमिदं कार्यं मया दुष्कृतम्,
दैवेनापि न वारितं न च पुनर्देवैः समाराधितैः ।
लीना साऽसमये विहाय सुहृदं शश्वत्सुखे राधिका,
राजेन्द्रप्रतिबोधितः स्मृतिकृते टीकां समुट्टङ्कये ॥

—ब्रह्मदत्तद्विवेदी



स्व० श्रीमती राधिका देवी
धर्मपत्नी
स्व० पं० श्री ब्रह्मदत्त द्विवेदी

विनयाञ्जलिः

आचार्यकरुणापतित्रिपाठी
उत्तर प्रदेश संस्कृत अकादमी-अध्यक्षः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरश्च

तत्रभवतां प्रातःस्मरणीयानां परमवन्दनीयचरितानां पूज्यपादानां विविधविद्या-विचक्षणानां नानाशास्त्रपारङ्गतानां सर्वतन्त्रस्वतन्त्राणां महामहोपाध्यायेति विरुद-मण्डितानां श्रीहरिहरकृपालुद्विवेदिनां तनुजैर्व्याकरण-न्याय-पूर्वोत्तरमीमांसादिशास्त्रदर्शन-रहस्यवेत्तृभिराचार्यब्रह्मदत्तद्विवेदिभिर्लिखिता 'राधिका' नाम्नी व्याख्या व्याकृतिविद्या-बुभुत्सूनां कृते अतीवोपकारिणी भविष्यतीति मदीयो विश्वासः।

बहुभिः शाब्दिकैर्ग्रन्थोऽयं विविधविश्लेषणैः पुरा प्रत्यपादि। तथापि ग्रन्थस्यास्य मृदुतरविधिना गूढाशयप्रकाशनक्षमा काचित् व्याख्या चिरेण प्रतीक्ष्यमाणा आसीत्, यस्याः पूर्त्तिं प्रस्तुतेयं टीका करोति।

एतेनातिसंक्षिप्त-विनयभरित-प्रणामात्मकश्रद्धाञ्जलिं समर्पयन् स्वाशयं च प्रकाश-यन्नहं कामये यदयं ग्रन्थो वैयाकरणसुधीषु यथोचितं सम्मानं प्राप्नोतु।

आश्विनकृष्णसप्तमी, २०४५ वै०,
वाराणसी

निवेदकः
करुणापतित्रिपाठी

सम्मतिः

पं० श्रीकुबेरनाथशुक्लः

[वाराणसेय संस्कृत विश्वविद्यालयस्य कुलपतिचरः]

नागेशभट्टो वैयाकरणेषु मूर्धन्यं स्थानमलङ्करोति। नागेशभट्टप्रणीतो लघुशब्देन्दुशेखरः सर्वानपि व्याकरणग्रन्थानतिशेते। ग्रन्थस्यास्य भैरवमिश्रविरचिता चन्द्रकला, नागेशोक्तिप्रकाशिका अभिनवचन्द्रिकाप्रभृतयः प्राचीनाष्टीकाः सन्ति। अस्यां स्थितौ आचार्यब्रह्मदत्तद्विवेदिमहोदयेन रचिताया राधिकानाम्न्याः शेखरव्याख्यायाः गतार्थत्वादुपयोगिता सन्दिग्धेति नैव विभावनीयम्; अल्पधियामपि छात्राणां कृतेऽस्याः व्याख्याया नितरामपेक्षितत्वात्। प्राचीनटीकासु यत्सारवद्वस्तु तद् द्विवेदिमहोदयेन गृहीतमेव। स्वीययाऽलौकिकप्रतिभया किञ्चिदधिकमपि उल्लिखितं येन बाला अपि शेखरस्य गभीराशयं बोद्धुं प्रभवेयुः।

स्पष्टप्रतिपत्त्यर्थं स्थालीपुलाकन्यायेन किञ्चिदुपन्यस्यते। परिभाषाप्रकरणे भट्टोजिदीक्षितेन इको गुणवृद्धीति शास्त्रस्य 'गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इक इति षष्ठ्यन्तं पदमुपतिष्ठते' इत्यर्थोऽभिहितः। शब्देन्दुशेखरे 'परिभाषेयं व्याख्यानात्' इत्युक्तम्। टिप्पणके व्याख्यानादिति प्रतीकमादाय 'नापि तच्छेषो नापि तदपवादोऽन्यदेवेदं परिभाषान्तरमसम्बद्धमनया परिभाषया इति प्रकृतसूत्रस्यभाष्यादिति भावः' इत्युल्लिखितम्।

द्विवेदिमहोदयेन—"इदं न संज्ञासूत्रम्; गुणवृद्धिसंज्ञयोः सूत्रान्तरेणैव कृतत्वात्। नापि विधिसूत्रम्; 'ओर्गुणः' इत्यादिना पुनर्विधानस्य वैयर्थ्यात्। नापि नियमसूत्रम्; स्वार्थहानिपरार्थकल्पनादिदोषग्रस्तत्वात्। विधिप्रकरणे पठितव्ये इह पाठकरणाच्च। नाप्यतिदेशः; वतिप्रत्ययेन समानविभक्त्या चानिर्देशात्। नाप्यधिकारः; 'न धातुलोप' इत्यनेन सहैव पठितव्ये पृथग्योगकरणसामर्थ्यात्। इत्याह—व्याख्यानादिति। उक्तं व्याख्यानम् 'अन्यदेवेदं परिभाषान्तरमसम्बद्धमनया परिभाषया इति प्रकृतसूत्रस्थ भाष्यरूपव्याख्यानाद्वा उक्तार्थलाभः तथाचेयं परिभाषा" इत्युक्तम्।

उभयोस्समीक्षात्मकाध्ययनेनास्या राधिकाव्याख्यायाः समुपयोगिता प्रमाणीभवति। द्विवेदिमहोदयेन हिन्दीभाषयाऽनुवादोऽपि कृतः। एतेनास्या उपयोगिता नितान्तं सम्वृद्धा।

आचार्यब्रह्मदत्तद्विवेदिनेदमपूर्वं लोककल्याणकरं विशिष्टं कार्यं कृतम्। इयं तेषां कृतिरमरतामवाप्स्यस्तीति वयं मन्यामहे। पितुर्यशःशरीरमनुरक्षता तदात्मजेन डा० वाचस्पतिद्विवेदिना अस्य ग्रन्थरत्नस्य मुद्रापणाय प्रकाशनाय च महान् श्रमोऽकारि। एतदर्थं ते भृशं धन्यवादार्हाः।

भाषानुवादसहितेनानेन व्याख्यानेन व्याकरणाध्ययने प्रवृत्तानां छात्राणां, विदुषां, संस्कृतानुरागिणां च महाँल्लाभो भविष्यतीति सामोदं सम्मनुते।

विदुषामाश्रवः

कुबेरनाथशुक्लः

भूमिका

राष्ट्रपतिसम्मानित आचार्यश्रीरामप्रसादत्रिपाठी

[सं० सं० वि० विद्यालये व्याकरणविभागस्याचार्यचरः,]

संस्कृतवाङ्मये छन्दसां प्रथमं मुखस्थानीयमङ्गं व्याकरणमुच्यते। उक्तं हि वाक्यपदीयस्य ब्रह्मकाण्डेऽम्बाकर्त्रीटीकायाम्—

आपः पवित्रं परमं पृथिव्याम्, अपां पवित्रं परमं च मन्त्राः।
तेषां च साम्नग्र्यजुषां पवित्रं, महर्षयो व्याकरणं निराहुः॥

तच्च व्याकरणमद्यत्वे महामुनिपाणिनिविरचितमष्टाध्यायीरूपमेव। तस्याश्चाष्टाध्याय्या विषये प्रसिद्धा गभीरार्थवती लोकोक्तिरस्ति—

"अष्टाध्यायी जगन्माताऽमरकोशो जगत्पिता" इति।

अनन्ते खलु संस्कृतसंसारे साधुशब्दज्ञापनेन संस्कृतरुचीन् सज्जनान् साधुशब्दामृतं पाययन्ती, प्रतिशतं प्रायशोऽशीतिसंख्याकशब्दानामितोऽप्यधिकानां वा प्रदानेन तास्ता देशीयभाषाः पुत्रीरिव पोषयन्ती एषाऽऽष्टाध्यायी वस्तुतो जगन्मातैवेति नात्र मनागपि संशीतिलेशः।

पुरा अष्टाध्याय्याः पठनपाठनपरम्परा सूत्रक्रमानुसारिणैवासीत्, परन्तु प्रयोगसाधुत्वज्ञाने काठिन्यमालोच्य मध्यवर्तिभिः श्रीशेषकृष्णप्रभृतिभिर्विद्वद्वरैः प्रक्रियाग्रन्था विरचिताः। तत्रापि नातिसरलतामालक्ष्य शाब्दिकमूर्धन्येन श्रीभट्टोजिदीक्षितेन '**वैयाकरणसिद्धान्तकौमुदी**नामा प्रक्रियाप्रधानो ग्रन्थो व्यरचि। तत्र यद्यपि अष्टाध्यायीक्रमः साकल्येन सुरक्षितो न वर्तते, तथापि प्राचुर्येण तृतीयचतुर्थपञ्चमाध्यायेषु कृदन्त-स्त्रीप्रत्ययतद्धितप्रकरणेषु, षष्ठाध्याये स्वरप्रकरणे, सन्धिप्रकरणे च, द्वितीयाध्याये समासप्रकरणे च, प्रथमाध्याये संज्ञापरिभाषाप्रकरणे, कारकप्रकरणे च वस्तुतः यथासम्भवं सुरक्षित एव, अत्यल्प एव क्रमभङ्गः।

सूत्रार्थयोजनायां पूर्वसूत्रात् पदानुवृत्त्यर्थं तु क्रमस्मरणमत्यावश्यकमेव। प्रातःस्मरणीयाः स्वनामधन्या वैयाकरणकेसरिणो गुरुवराः श्रीहरिनारायणत्रिपाठिचरणाः ('तिवारी जी' इति नाम्ना प्रसिद्धाः) सिद्धान्तकौमुद्या अध्यापनेऽनुवृत्त्यादिकं विधाय पदच्छेदसमासादिप्रदर्शनपुरस्सरं सूत्रार्थं वर्णयित्वा लक्ष्याणां साधुत्वं बोधयन्ति स्म। अधुना तादृशप्रणाल्या सूत्रार्थमकृत्वा लक्ष्यमात्रसाधनं प्रधानं मन्वानाऽऽध्यापनपरिपाटी ह्रासातिशयमभिव्यनक्ति इति तु कालमाहात्म्यमेव।

प्रक्रियांशे प्राधान्यं भजमानाऽपि सिद्धान्तकौमुदी दार्शनिकसिद्धान्तानां वाक्यस्फोट–पदस्फोट–प्रकृतिस्फोट–प्रत्ययस्फोटप्रभृतीनां प्रकाशनेऽपि पश्चात्पदं नादधाति। तथा हि—

अवरोहक्रमेण सर्वतः प्रथमं सन्धिप्रकरणं वाक्योदाहरणगर्भं वाक्यस्फोटं चरमं सिद्धान्तं स्मारयति। वाक्येऽपि वाक्यार्थनिरूपिता शक्तिरभ्युपेयते एव वैयाकरणैः, अन्यथा कृत्तद्धितसमासाश्चेति सूत्रे समासग्रहणस्य नियामकत्वं भाष्योक्तं कथं संगच्छेत ! 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इत्यस्य संज्ञासूत्रस्य सार्थकताऽऽपि कथंकारं सम्पद्येत ! यतश्च 'वचोऽशब्दसंज्ञायाम्' इति सूत्राऽऽनुरोधेन वाक्यमिति शब्दस्य संज्ञा। तच्च शब्दात्मकं वाक्यम् स्वस्यार्थस्य रूपस्य च (आनुपूर्व्याश्च) संज्ञा (बोधकम्) इति स्वं रूपमिति सूत्रं बोधयति। वाक्यस्य लक्षणं तु—

सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता।

इत्यमरकोशसम्मतम्, 'पदसमूहो वाक्यमर्थसमाप्तौ समर्थम्' इति न्यायभाष्य-सम्मतम्, 'आख्यातं सविशेषणं वाक्यम्' इति महाभाष्यसम्मतं च तत्र विशेषतो विमर्शे कृते सति 'निराकाङ्क्षप्रतिपत्तिजनकत्वे सति पदसमूहत्वम्' इति लक्षणं पर्यवस्यति। यद्यपि वाक्यकाण्डे वाक्यपदीये एतद्विषये बहु विचारितमस्ति, तथापि सामान्यदृष्ट्या एतावदेवोक्त्वाऽग्रे गम्यते।

सन्धिप्रकरणानन्तरं वाक्यान्तर्गतस्य पदस्य सुबन्ततिङन्तान्यतरस्य स्मृतौ सुबन्ताख्ये पदे स्वादयः प्रत्ययाः, प्रातिपदिकरूपा प्रकृतिश्च स्मृतिपथं समागताः। तत्र कृत्तद्धितसमासभेदतः प्रातिपदिकानि त्रिविधानि, अव्युत्पन्नानि च डित्थादीनि। सुब्विधौ उद्देश्यभूतं प्रातिपदिकसामान्यं स्त्रीप्रत्ययं च षड्लिङ्गप्रकरणादौ निरूप्य समासरूपं तद्धितान्तरूपं च प्रातिपदिकं व्याख्याय कृदन्तरूपं प्रातिपदिकं व्याख्यातुं तद्विग्रहरूपेण तिङन्तप्रकरणमारब्धम्। इत्थं पूर्वार्द्धोत्तरार्द्धाभ्यां प्रकरणाभ्यां कौमुदीरचना सम्पन्ना-ऽभवत्।

अस्याः सिद्धान्तकौमुद्याः **प्रौढमनोरमा**नाम्नी व्याख्या स्वयमेव विरचिता श्रीमता भट्टोजिदीक्षितेन। तद्विषये प्रसिद्धिश्चैषा विद्यते—

न कौमुदी भाति मनोरमां विना,
न कौमुदी भाति मनोरमां विना।
न कौमुदी भाति मनोरमां विना॥ इति।

अपरा च तत्त्वबोधिनीटीका श्रीज्ञानेन्द्रस्वामिना विनिर्मिताऽऽस्ति, अस्याः परमं प्रामाणिकत्वं विद्वद्भिरङ्गीक्रियते। श्रीमता वासुदेवेनाभ्यङ्करोपाह्वेन निर्मिता बालमनोरमाख्याऽपि टीका चकास्ति, परन्तु शाब्दिकचक्रचूडामणिना श्रीमता नागेशभट्टेन विरचिता शेखराभिधाना व्याख्या तु खण्डनमण्डनगर्भतया ताः सर्वा अति-शय्य वर्तते। एषा च व्याख्या बृहच्छब्देन्दुशेखर-लघुशब्देन्दुशेखराभ्यां द्वैविध्यं भजमाना द्योतते।

अस्य च लघुशब्देन्दुशेखरस्यापि सन्ति बह्व्यष्टीकाः। तासु अभिनवचन्द्रिका, चिदस्थिमाला, ज्योत्स्ना, सदाशिवभट्टी, चन्द्रकला, वरवर्णिनीप्रभृतयः परां प्रसिद्धिं भजन्त्योऽनुभूयन्ते।

परन्तु तासामपि गहनतया दुरूहतां समालोच्य विविदिषूणां छात्राणां पण्डितानां च सरलतयाऽऽवबोधाय विद्वद्वरेण **श्रीब्रह्मदत्तद्विवेदि**महानुभावेन **राधिका** नामिका व्याख्या सरलया सरसया स्पृहणीयभाषया व्यरचि। एनां च व्याख्यां सम्पाद्य द्विवेदि-महोदयाः शिवसायुज्यमवापुरिति महतः खेदस्य विषयः।

अस्तु; अस्यां व्याख्यायां प्राचीनपरम्परायाः सुरक्षां कुर्वाणाः श्रीद्विवेदिमहोदयाः क्वचन क्वचन स्वीययुक्तायुक्तत्वसमीक्षणशीलया प्रतिभया तादृशं साधुविचारमपि उपस्था-पयामासु;, येनाद्यतने विद्वत्समाजे एका नवीना प्रेरणा गवेषणाप्रधाना समुपतिष्ठते। अथ चानेन महानुभावेन शेखरीयदुरवगाहविषयाणामवबोधाय भाष्यभूतया मातृभाषयाऽपि व्याख्या कृता वर्तते।

'पातञ्जले महाभाष्ये' इत्यस्य श्लोकांशस्य व्याचक्षाणेन द्विवेदिमहाभागेनोच्यते— न्यायादिशास्त्रान्तरीयं भाष्यं तु भाष्यमेव कथ्यते, परं पाणिनीयव्याकरणशास्त्रीयं तु महा-भाष्यपदेनाभिधीयते। यद्यपि अत्र भवता हेतुर्नोपन्यस्तः, अनुपन्यासे हेतोः प्रसिद्धिरेव, ग्रन्थगौरवभीतिरेव वा हेतुः। स चास्ति हेतुः 'महत्त्वं चास्येष्ट्यादिना' इत्यादिः। श्रीमतोद्द्योतकारेणेदमुक्तं यदिदं भाष्यं महाभाष्यम्, अस्य महत्त्वमिष्ट्यादिना, आदिपदे-नानेकेषां वचनानामुपसंख्यानानां च संग्रहः। अन्येषु भाष्येषु स्वरचनानन्तरं वार्त्तिकानां अत्र तु वार्त्तिकानां रचनोत्तरमस्य रचना इष्टयादिगर्भा। एतावता अन्तिमं प्रामाण्यमस्य भाष्यस्येति महत्त्वमस्य जागर्ति। इदं च भाष्यं महामुनिना पतञ्जलिना निर्मितमिति सर्वजनविदितमेवेति कृत्वा 'पातञ्जले' इति विशेषणपदं किमर्थमिति जिज्ञासायामुच्यते 'मङ्गलार्थमिति'।

नमस्कारात्मक-वस्तुनिर्देशात्मक-आशीर्वादात्मकेति त्रिविधमङ्गलमध्ये वस्तु-निर्देशात्मकमिदं मङ्गलम्। ईश्वरांशभूतो महामुनिः पतञ्जलिः, तस्य स्मरणात्मक-निर्देशोऽत्र कृतः। यद्यपि पातञ्जलपदेन न साक्षान्निर्देशः कृतस्तथापि मूलभूतप्रकृति-रूपेण पतञ्जलिपदं तत्र विराजते एव, तत्स्मरणपूर्वकमेव पातञ्जलपदमायाति। अतश्च परम्परया तन्नामकीर्तनं जातमेव। नहि केवलं मङ्गलार्थमेव, अपि तु 'योगशास्त्रपरमप्येतत्' इत्यपि सूचितमग्रिमव्याख्यानेन। यन्मते पातञ्जलमहाभाष्यमिति एकमेव पदं भाष्य-नामधेयपरम्, तन्मते नामैकदेशन्यायेन महाभाष्यपदम्। पातञ्जले इति सप्तम्यन्तं पृथक् पदं तु पूर्वोक्तरीत्योभयपरमिति बोध्यम्।

च-शब्दं विनाऽपि चार्थो गम्यते, यथा सिद्धान्तकौमुद्यां भ्वादिगणे 'अथाष्ट त्रिंशत् वर्गीयान्ताः परस्मैपदिनः, इत्युक्तं मूले। तत्र अष्टात्रिंशदिति समस्तं पदमनुक्त्वा अष्ट त्रिंशदिति व्यस्तं पदं चकारमन्तरैव प्रयुक्तम्।

यद्यपि—'योगेन चित्तस्य पदेन वाचाम्' इत्यत्रास्ति विवादः, तथापि ऋषीणां भेदेऽपि नास्ति हानिर्मङ्गलप्रयोजनतायाम्; योगशास्त्रकर्तरि अपि पतञ्जलिपदस्य वाचक-तया प्रसिद्धेः।

अथवा 'सतीं पार्वतीं दीव्यति' इति विग्रहे 'ङ्यापोः संज्ञाछन्दसोः' इति ह्रस्व-शङ्काया निरासः 'बाहुलकत्वेन ह्रस्वे कृते संज्ञात्वानवगमाच्च' इत्येवं सम्पादितः। तस्या-

यमभिप्रायो गम्यते—यद् ह्रस्वे कृते संज्ञात्वं प्रतीयते चेत्तदा ह्रस्वः, अन्यथा न ह्रस्वः। यथा रामनाथ-रामनगरादिशब्देषु 'पूर्वपदात् संज्ञायामगः' इति न णत्वम्। तत्र सति णत्वे संज्ञात्वभङ्गः स्यात्। कालिदासादौ तु ह्रस्वे सत्येव संज्ञात्वावगमः।

एवमेव शूर्पणखा-अक्षौहिणीशब्दादौ बोध्यम्। एतावता संज्ञाकारेण ह्रस्वसहितेन वा संज्ञात्वं प्रतीयते चेत्तदा णत्वं ह्रस्वो वा, न तु संज्ञापदमस्ति इति कृत्वा णत्वं कार्यमेव, ह्रस्वो वा विधातव्य एव।

'स्वनामलेखने दोषाभावः' इत्यत्र यद्यपि लेखनेऽपि सूक्ष्मोच्चारणं शङ्कितुं शक्यते, तथाऽपि वैखर्य्योच्चारणे दोषः, न तु सूक्ष्मे मानसोच्चारणे इत्यत्र तात्पर्यमवगन्तव्यम्। अत एव संकल्पादौ मानसोच्चारणं क्रियते एव सर्वैः। वस्तुतस्तु नाक्षत्रनाम्न एवोच्चारणे निषेधः; तस्यैव गोपनीयत्वेन स्मृतिषु विधानात्। अत एव भगवत्या सीतया बहुशो राम रामेति रामेति विलापः कृतः, भगवता रामेणाऽपि 'हा सीते !' इति करुणालापो विहितः।

'मुनित्रयम्' इति मूलप्रतीकमादाय टीकाकारेणोपपदविभक्तिकारकविभक्त्योर्लक्षणस्य निर्वचने परिष्कारशैल्या ईषत् कौशलं दर्शितम्! तत्र कारकाधिकारीया विभक्तिः कारकविभक्तिः, तद्भिन्ना सुब्विभक्तिरुपपदविभक्तिरित्यपि लघु लक्षणमवगन्तव्यम्।

अग्रे च द्वितीयाचतुर्थ्योः शङ्कायां नमःपदप्रयोज्यायां नमस्कारार्थनिष्ठविषयतायां कृधातुप्रयोज्यत्वस्यापि स्वीकृतया उभयप्राप्तिप्रदर्शनं यत्कृतं तदतीव समीचीनम्, प्राचीनपरम्परानुगुणम्। अग्रे चाजहत्स्वार्थवृत्तिपक्षेण नित्यसाकाङ्क्षस्थले नमःपदार्थैकदेशापकृष्टत्वादेरन्वयविचारो ग्रन्थगौरवभीत्या न विहितः।

अग्रे च—'रावणाय नमस्कुर्यात्', 'स्वयम्भुवे नमस्कृत्य' इत्यादिषु चतुर्थ्या उपपत्ति सप्रमाणं दर्शयता शेखरोक्त-समाधानस्य या संगतिः प्रदर्शिता, सा त्वतीव मनोहारिणी, प्रकृते 'स्वयम्भुवे नमस्कृत्य' इत्यत्रापि च कृद्योगा षष्ठी तु 'न लोकाव्यय' इति निषेधेन वारितप्रायैवेति न चर्चिता।

'परिभाव्येति' प्रतीकमुपादाय बहवः पक्षा उपस्थापिताः सन्ति। एवमेव विषयप्रयोजनाधिकारिनिरूपणे टीकाकर्तुः सयुक्तिकं वचनं धर्मशास्त्रस्य न्यायादिशास्त्रस्य च विशिष्टं पाण्डित्यं प्रकाशयति।

'एषां क्रमबोधकत्वेऽपि' इत्यादि शेखरग्रन्थविवेचनावसरे एषामित्यस्य 'अ इ उ इत्यादिवर्णानाम्' इत्यर्थः कृतः, तत्र अ इ उ इत्यादयो वर्णा येषु सूत्रेषु तेषामिति बहुव्रीहिसमासे टीकायास्तात्पर्यमवधातव्यम्। क्रमपदस्यार्श आद्यजन्ततया क्रमवत्परत्वेन संज्ञासूत्रत्वसमर्थनं सयुक्तिकं विहितम्।

'केचित्तु' इत्युक्त्वा साक्षात् शक्तिग्राहकत्वं संज्ञासूत्रत्वमिति 'साक्षाल्लक्ष्यसाधुत्वं बोधकत्वं विधिसूत्रत्वम्' इति च लक्षणं स्वीकृत्य अकारादिवर्णानामत्वावच्छिन्नः साधुरित्वावच्छिन्नः साधुरित्येवं साधुत्वबोधनात् विधिसूत्रत्वमेवैषामुक्तम्। तेषामयमाशयः—यदेकवाक्यतामात्रेणैषां संज्ञासूत्रत्वमस्ति, तर्हि परिभाषासूत्राणामपि विधिसूत्रैः सहैक-

वाक्यतया विधिसूत्रत्वं कथं न ? किं वा विधिसूत्राणां परिभाषासूत्रत्वं कुतो न ? अत एकवाक्यतारूपो हेतुर्न समीचीनतामावहति इति ।

पुनश्च—'अन्ये तु' मतमपि परम्परयाऽपि शक्तिग्राहकत्वेन संज्ञासूत्रत्वं प्रतिपादयन्नातीव समीचीनमिति सूचितं स्वयमेव टीकाकारेण 'अन्ये' 'तु' इति पदद्वयेन ।

विद्यापदार्थविचारः, संहिताप्रयुक्तसन्धिकार्याणां माहेश्वरसूत्रेषु अभावविचारः, एषु सूत्रेषु प्रतिवर्णं विभक्त्युत्पत्तिविचारः, कारप्रत्ययस्याभावविचारः, विशदयुक्तिभिः प्रतिपादितोऽस्ति । तत्र 'वर्णात् कारः' इति वार्त्तिकस्यार्थनिरूपणे वैशिष्ट्यमुद्रया परिष्कारशैली हृदयग्राहिणी वर्तते ।

चतुर्दशसूत्र्यामक्षरसमाम्नायपदप्रयोगस्य प्रामाणिकतासमर्थने युक्तिर्द्रष्टव्या । रप्रत्याहारविषयेऽभिनवचन्द्रिकाप्रभृतिकतिपयव्याख्याग्रन्थेषु शब्देन्दुशेखराद् विरुद्धं मतं रप्रत्याहारसमर्थनात्मकमुक्तमस्ति, परन्तु प्रकृतव्याख्यायां शेखरसमर्थनाय सारगर्भिता युक्तयः प्रतिपादिताः सन्ति, अतश्च 'उरण् रपरः' इति लकारघटितसूत्रपाठे एव भाष्यतात्पर्यमवगाहमानः शेखरग्रन्थः सयुक्तिकमुपस्थापितः । मध्ये हशादिप्रत्याहारे टग्रहणेऽपि तद्विषयकप्रयोगाणामनभिधानं प्रत्यपादि शेखरकृता, तत्तु प्रकृतव्याख्याकृता—

काश्मर्याः कृतमालमुद्गबलं को यष्टिकष्टीकते

इत्यादि कविप्रयोगं प्रदर्शयता न समर्थितम्, एतावता स्वीयं विवेकस्वातन्त्र्यमपि ध्वनितम् ।

अथ च रप्रत्याहारस्वीकारे 'लोपश्च बलवत्तरः' इत्यस्य भाष्योक्ततृतीयहेतोरव्यापकत्वापत्तिवर्णने सोपपत्तिकमरुचिप्रदर्शनम् । अग्रे च 'न च हेतोः साध्यापेक्षया अव्यापकत्वम्—अल्पदेशवृत्तित्वं न दोषावहम्, यथा वह्निमति अयःपिण्डे वह्निरूपस्य साध्यस्य सत्त्वेऽपि धूमरूपो हेतुर्नास्ति, तथापि न किञ्चिद् दूषणम्' इत्यादिना पूर्वपक्षं विधाय पक्षताऽवच्छेदकावच्छेदेन अनुमितौ हेतोः पक्षताऽऽवच्छेकव्यापकत्वमिष्यते, यदि च क्वचित् पक्षे हेतोरभावस्तदा पक्षस्य भागे हेतोरसिद्ध्या भागासिद्धिदोषपराहतो हेतुर्नानुमितिं जनयितुं प्रभविष्यति । लण्सूत्रघटकाकारे हल्प्रत्याहारसिद्धेः पूर्वं चकारस्येत्संज्ञाया अभावेन अच्प्रत्याहारासिद्ध्या 'उपदेशेऽच्'—इति सूत्राप्रवृत्त्या इत्संज्ञाया असत्त्वेन लोपशास्त्रीयोद्देश्यताऽवच्छेदकाक्रान्तत्वाभावेन तृतीयहेतोः पक्षैकदेशे लण्घटकाकारेऽगमनाद् भागासिद्धिरूपो दोषः' इत्येवं समाधाय—

'अनुबन्धाः, प्रत्याहारजन्यबोधविषयत्वाभाववन्तः, लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात्'—इत्यादिना ससमन्वयमनुमानाकारः सरसया सरलया पद्धत्या प्रदर्शितः ।

हकारादिष्विति प्रतीकमादाय हकारादिवर्णोत्तरमकारस्य पौनःपुन्येन पाठ उच्चारणे सौकर्य्याय कृतः, नान्यस्मै प्रयोजनायेत्यर्थ इति व्याख्यानेन सूचितम्, यद् 'हकारादिषु' इत्यत्र सप्तम्या औपश्लेषिकाधारोऽर्थः, तेन हकारादिवर्णसमभिव्याहृतोऽकार उच्चारणार्थः, उच्चारणमेव अर्थः प्रयोजनं यस्येत्यर्थ इति बोधः सम्पद्यते ।

हलन्त्यमिति सूत्रमुद्दिश्य व्याख्यानं कुर्वता शेखरकृता अन्योऽन्याश्रयदोष उद्भावितः। दशसूत्रावृत्त्या, उपदेशे इदन्त्यमित्यादिन्यासेन च वारितः। अमुं विषयमादाय महत्या सूक्ष्मेक्षिकया शेखराशयो विशदीकृतः श्रीद्विवेदिमहोदयेन। तत्र तद्ग्रहसापेक्षग्रहसापेक्षग्रहविषयत्वमिति ज्ञप्तौ अन्योऽन्याश्रयस्य लक्षणमस्ति, यथा तद्ग्रहणपदेन हल्प्रत्याहारग्रहः, तत्सापेक्षग्रहः लकारस्येत्त्वग्रहः, पुनः तत्सापेक्षग्रहो हल्प्रत्याहारग्रहस्तद्विषयत्वं हल्प्रत्याहारे—इति समन्वयः।

'उपदेशे इदन्त्यम्, अच्, अनुनासिकः' इति सूत्रत्रये तृतीयं सूत्रं नियामकमुक्तम्। तदीयोद्देश्यताऽवच्छेदकं रूपम् औपदेशिकानुनासिकाच्त्वम्, तद्व्यापकं रूपम् औपदेशिकाच्त्वम्, नियम्यशास्त्रम् उपदेशे इदन्त्यम्, अच्, इति सूत्रद्वयम्, तदीयोद्देश्यताऽवच्छेदकं रूपम् औपदेशिकान्त्यवर्णत्व—अच्त्व इत्येतदन्यतरत्, तद्व्याप्यमपि रूपम् औपदेशिकाच्त्वम्, एतद्रूपावच्छिन्नातिरिक्तत्वेन उक्तान्यतरावच्छिन्ने संकोचे कृते सति "औपदेशिकस्याच इत्संज्ञा चेत्तर्हि औपदेशिकानुनासिकस्यैवाचः' इति नियमाकारः पर्यवस्यति। गौरवदृष्ट्याऽन्योऽन्याश्रयलक्षणमयं नियमाकारश्च न दर्शित इत्यन्यत्।

अग्रे च हलित्येकदेशस्यावृत्तिं कुर्वाणस्य श्रीकैयटस्य व्याख्याने भाष्यविरोधं प्रदर्श्य भाष्योक्त एकशेषपक्ष उपन्यस्तः।

'भुक्तवन्तं प्रति मा भुक्थाः' इति न्यायस्वरूपे भुक्था इति परसवर्णङकाररहित एव पाठ' उचितः, माङि लुङिति सूत्रात्। अस्य न्यायस्य व्याख्यानं दृष्टान्तव्याजेन विधायात्र शास्त्रे दार्ष्टान्तिकता साधु संयोजिता। अग्रे चोपसंहरता विषयमिमं न्यायस्यास्यात्र शास्त्रे बुद्धिविपरिणामकरणेन विषयताया एव भाव इति साधु सिद्धान्तितम्।

'आदिरन्त्येन सहेता' इति सूत्रव्याख्यावसरे परस्मिन् सतीत्यादिना आदेर्लक्षणम्, पूर्वस्मिन् सतीत्यादिनाऽन्तस्य च लक्षणं कृतं शेखरकृता, तद्व्याख्यानं कुर्वता श्रीद्विवेदिमहानुभावेन सम्बन्धत्रितयेन स्वविशिष्टत्वमादित्वमित्यादिरूपया सरलपद्धत्याऽऽदिपदार्थस्यान्तपदार्थस्य च परिष्कृतं लक्षणं प्रदर्शितम्। तत्र घटयति = निर्माति समुदायम् इति घटकः अवयवः, समुदायस्तु घटितः इत्युच्यते। आदित्वादि-परिष्कारशरीरे ईदृशमेव घटकत्वं प्रविष्टमस्ति।

यत्तु—स्वव्यापकत्व-स्वव्याप्यत्वाभाववत्त्वोभयसम्बन्धेन समुदायविशिष्टत्वं घटकत्वम्, स्वव्याप्यत्व-स्वव्यापकत्वाभाववत्त्वोभयसम्बन्धेनावयवविशिष्टत्वम् समुदायत्वमित्युच्यते केनचित् क्वचित्; तत्तु व्याप्यताया व्यापकतायाश्च लक्षणं किम्? अवच्छेदकसम्बन्धश्च कः? इत्यादिजिज्ञासाया अवश्यम्भावेन जिज्ञासूनां कृते गुरुतरमिति कृत्वा माननीयेन प्रकृतव्याख्याकारेणोपेक्षितम्।

'अत्राद्यन्ताभ्यामवयवत्वेन बोधकाभ्यां स्वघटितः समुदाय आक्षिप्तः संज्ञी' इति शेखरग्रन्थस्य व्याख्यायां समन्वयसारल्यं समीचीनम्। अत्राऽवयवत्वप्रकारकज्ञानस्य अयमवयव इत्यादिरूपस्य, समुदायज्ञानम् अस्य समुदास्येत्यादिरूपम्, विनाऽनुपपद्यमानत्वेन आक्षेपकता, समुदायज्ञानबोधकसमुदायपदस्याक्षेपविषयता। उपपाद्याऽन्यथानु-

पपत्त्या उपपादककल्पनमर्थापत्तिरत्र समुदायपदाक्षेपे उपयुज्यते, पुनः समुदायस्येति पद-घटितवाक्येन शाब्दबोधः शक्तिज्ञानादिना निष्पाद्यते इत्यपि बोध्यम्।

एतेन समुदायस्यावयवं विनाऽनुपपत्तिर्भवतु नाम, अवयवस्य तु समुदायमन्तरो कथमनुपपत्तिरिति तस्याक्षेपकताऽऽपातरमणीया प्रतिभातीत्यपास्तम्।

'तत्र विद्यमानमन्त्यमित्यर्थः' इति शेखरग्रन्थं व्याचक्षाणेन श्रीद्विवेदिमहाभागे-नान्त्यपदार्थे विद्यमानत्वस्य विशेषणत्वं स्वीकृत्यैव समन्वयो व्यधायि, तत्तु शेखरग्रन्थस्य हार्द-प्रकाशनं सुष्ठुतमम्। एतेनोपलक्षणपरतया व्याख्यानं नातीव रमणीयमित्यभि-व्यज्यते।

हलन्त्यमिति सूत्रव्याख्याऽवसरे—'अत्र केचित् अनुबन्धा अनेकान्ताः अनवयवाः, परे तु एकान्ता एव' इति पक्षद्वयोपपादकग्रन्थद्वयव्याख्यायामनुमानस्वरूपस्य प्रदर्शनम्, तत्समन्वयप्रणाली, उपदेशशब्दस्य भावघञन्ततां करणघञन्ततां चादाय प्रवृत्तस्य शेखर-ग्रन्थस्य प्रकृतव्याख्यायां साम्प्रदायिकी समन्वयपद्धतिश्च सहृदयानां मनांसि आवर्जयति।

अन्यव्याख्याया अस्वीकारोऽपि भवता मधुरया शैल्या क्रियते, यथा 'हलन्त्यम्' इत्यस्य व्याख्याऽवसरे एव 'सर्वत्रानुबन्धसहितनिर्देशे विधौ 'गुप्तिज्किद्भ्यः' इत्यादौ नकारेत्संज्ञकः सो भवति'—इत्यादिशेखरव्याख्यायां 'नवीनास्तु—अनुवादस्थले' इत्या-दिना स्वाभिमतमुक्त्वा—'टिप्पणीकृतां प्रपञ्चेन व्याख्यानमाग्रहमूलकम्। उभयस्मिन्नपि पक्षे भाष्यस्यानुकूल्याय कल्पनाविशेषः कर्त्तव्यो भवति' इत्युक्तम्। अत्र दुराग्रहमूलक-मित्यनुक्त्वा आग्रहमूलकमिति वचनं माधुर्यं द्योतयति।

ऊकालोऽजिति सूत्रं व्याचक्षाणेन शेखरकृतोक्तम्—'तेन स्वोच्चारणकालसदृशो लक्ष्यते' इति। अमुं विषयं गृहीत्वा प्रकृतव्याख्याकारेणोक्तम्—'उकारोच्चारणकालसदृशः काल उकारस्य न सम्भवति; स्वस्यैव स्वेन सादृश्यस्य वक्तुमशक्यत्वात्' इति। ततश्च स्वयमेव समाहितम्—'सादृश्यं न भेदघटितमित्याश्रयणेनाभेदेऽपि सादृश्यव्यवहारः' इति।

अत्र 'नञिव युक्तमन्यसदृशाधिकरणे' इति परिभाषायामन्यपदोपादानमेव प्रमाणम्। अन्यथा सादृश्यस्य नियमेन भेदघटितत्वे तत एवान्यत्वे लब्धेऽन्यपदं व्यर्थं स्यात्। अत एव 'गगनं गगनाकारं सागरः सागरोपमः', 'त्वमिव त्वमसि जननि !' इत्या-दयः प्रयोगाः संगच्छन्ते।

वर्णग्रहणे जातिग्रहणस्य दुर्वारत्वादिति शेखरग्रन्थस्य व्याख्यायामुक्तन्यायस्य स्वरूपं फलमनित्यत्वादिकं च सप्रमाणं विशदं समालोचितम्।

'पूर्वत्रासिद्धम्' इति सूत्रव्याख्याने 'गोधुङ्मान्' इत्यत्र घत्वजश्त्वानुनासिकेषु भष्भा-वानापत्तिरिति शेखरग्रन्थस्य शास्त्रासिद्धत्वविषयकस्य च प्रकृतव्याख्या अतिशयेन सम्प्र-दायमनुरुन्धाना व्याख्यान्तरमतिशेते।

नाज्झलाविति सूत्रं व्याख्यातुं प्रवृत्तस्य शेखरकृतः—'एतेन 'नाज्झलौ' इत्येक सूत्रयितुमुचितमित्यपास्तम्'।

'हशि चेत्येव सिद्धे अतो रोः (६।१।११३) इत्याकारे व्यावृत्यर्थम्'। एतद्-वाक्यद्वयं राधिकाव्याख्यायां कीदृश्या सरलया पद्धतया निगूढभावाभिप्रायकं व्याख्यात-मस्ति।

'अणुदित् सवर्णस्य चाप्रत्ययः' इति सूत्रस्य व्याख्याने—'एदैतोरोदौतोश्च न मिथः सावर्ण्यम्; ऐ औजिति सूत्रारम्भसामर्थ्यात्' इति कौमुदीग्रन्थं व्याचक्षाणस्य शेखर-ग्रन्थस्य रहस्योद्घाटनं प्रस्तुतव्याख्यायां द्रष्टव्यम्।

तपरस्तत्कालस्येति सूत्रस्य विधायकत्वं नियामकत्वमिति वा ? संशयस्यापाकरण-प्रक्रिया, 'भूवादयो धातवः' इत्यत्र तन्त्रस्यैकशेषस्य वा उपपादनप्रकारः, 'नवेति विभाषा' 'स्वंरूपं शब्दस्याशब्दसंज्ञा' इत्यनयोः सूत्रयोभष्यिकृताकृतस्य प्रत्याख्यानस्यालोचने प्रवृत्तस्य शेखरग्रन्थस्य स्पष्टीकरणम्, 'विरामोऽवसानम्' इत्यत्र परिष्कृतस्यार्थस्य स्वरूप-प्रकाशनम्; अवसानावधिकस्य पौर्वापर्यस्य विचारः, सुप्तिङन्तं पदमिति सूत्रे 'निजौ चत्वार एकाचः' इति भाष्यं तु अभ्युपेत्यवादेन' इति शेखरवाक्यस्य विवेचनम्। 'हलोऽ-नन्तराः संयोगः' इत्यत्र 'यत्रापि बहूनां हलामव्यवधानेन सन्निधानम्, तत्रापि द्वयोर्द्वयोरेव संयोगसंज्ञा न बहूनाम्' इत्यंशस्य मर्मप्रकाशनं च प्रस्तुतव्याख्याकृता कियतीं सरलां पद्धतिमाश्रित्य कृतमिति विचारयन्तु विद्वांसः।

'इति संज्ञाप्रकरणम्' अस्याः पङ्क्तेर्व्याख्यानेऽव्याप्त्यतिव्याप्तिदोषनिकरनिरासे समीचीनः प्रकारः प्रदर्शितोऽस्ति॥

परिभाषाप्रकरणे—प्रथमसूत्रे 'इको गुणवृद्धी' इत्यत्र शेखरकृता लिखितम्—'परिभाषेयं व्याख्यानात्' इति। व्याख्यानं तत् किं केन कथं च कृतमिति नोल्लिखितम्।

प्रस्तुतव्याख्याकृता श्रीद्विवेदिमहोदयेन सोपपत्तिकं तद् व्याख्यानं विदुषां समक्ष-मानीतम्, तद् द्रष्टव्यम्।

अस्य सूत्रस्य परिष्कृतार्थनिर्धारणम्। 'आद्यन्तौ टकितौ' इत्यत्र सहविवक्षायां समुदायत्वावच्छिन्नस्य समुदायत्वावच्छिन्ने अन्वयं स्वीकृत्य द्वन्द्वसमासे एकशेषे च कृते सति पुनः क्रमिकान्वये वाचोयुक्तिप्रदर्शनम्, प्रकरणान्ते च ज्ञापकन्यायसिद्धपरिभाषावि-वरणं तल्लक्षणनिरूपणं च महत्या सूक्ष्मेक्षिकया सम्पादितम्।

व्याकरणग्रन्थेषु परिभाषाशब्दस्तु श्रूयते, किन्तु परिभाषाया निर्दुष्टं लक्षणं काऽपि न लक्ष्यते। भगवता पाणिनिना तु तस्या नामाऽपि नोच्चारितम्। एवं चेदं सत्यमस्ति, यत्परिभाषानिरूपणे शाब्दिकैः किञ्चित् काठिन्यमनुभूयते। तथापि परवर्तिन आचार्याः परिभाषापदार्थनिरूपणे लेखनीं व्यापारयामासुः।

तत्र कैश्चिदुच्यते—'अनियमनिवारको न्यायविशेषः' इति परिभाषा,। प्रसिद्धि-रप्यस्ति—'अनियमे नियमकारिणी परिभाषा' इति। यद्यपि नियमसूत्राणां 'धातोस्तन्नि-मित्तस्यैव' इत्यादीनामपि नियमकारित्वमस्ति, तथापि 'सिद्धे सति प्रमाणान्तरेण विधेयेऽवगते सति पुनरारभ्यमाणो विधिर्नियमाय कल्पते' इति कृत्वाऽस्ति विशेषः। अत्र तु प्रमाणान्तरेण सिद्धिर्नास्ति, अपि तु अनियमप्रसक्तिरस्ति। यथा—'इको यणचि'

इत्यत्र तस्मिन्निति परिभाषाप्रवृत्तिमन्तरा अच्समीपवर्तिनः पूर्वस्य परस्य व्यवहितस्य अव्यवहितस्य चेको यणः प्राप्तौ अनियमः प्रसक्तः, तत्र तस्मिन्निति परिभाषया 'अव्यवहितस्यैव पूर्वस्यैव' इति नियमः क्रियते। एवमेव 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण इगन्तस्यानिगन्तस्य चाङ्गस्य गुणे प्राप्तेऽनियमः प्रसक्तः, तत्र 'इको गुणवृद्धी' इत्यनेन इक इति षष्ठ्यन्तपदोपस्थापनेन इगन्तस्यैवेति नियमः सम्पाद्यते।

परिभाषाशब्दस्य व्युत्पत्तिलभ्योऽर्थ उक्तः—

परितो व्यापृतां भाषां, परिभाषां प्रचक्षते।
परितो भाष्यते या सा, परिभाषा प्रकीर्तिता॥ इति।

परितः प्रमिताक्षराऽपि सर्वं विषयं, प्राप्तवती गता प्रतिष्ठाम्।
न खलु प्रतिहन्यते कदाचित्, परिभाषेव गरीयसी यथाज्ञा॥ इति च।

परिभाषायाः परिभाषाऽपि तत्र तत्रोपलभ्यमानाऽनुभूयते—

१. आधुनिकसंकेतः परिभाषा' इति वैशेषिके, न्यायकोशे, गादाधर्य्यां च।

२. लक्ष्यधर्मिकसाधुत्वप्रकारकाप्रामाण्यज्ञानानास्कन्दितबोधोपयोगिबोधजनकत्वं परिभाषात्वमिति शाब्दिकाः।

३. संकेतग्राहकभिन्नत्वे सति विधिशास्त्रविशिष्टत्वं परिभाषात्वम्।

४. विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगिसाधुत्वप्रकारकशक्त्यविषयकबोधजनकत्वे सति अधिकारशास्त्रभिन्नत्वं परिभाषात्वम्—इति लघुजूटिकायां श्रीरघुनाथः।

५. 'संकेतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वे सति पाणिन्युच्चरितभिन्नत्वम्, परिभाषेन्दुशेखरीयव्याख्येयपरिभाषात्वम्—इति परिभाषेन्दुशखरे भूतिटीकाकाराः।

६. 'अधिकारशब्देन पारार्थ्यात् परिभाषाऽप्युच्यते' इति 'यथोद्देशं संज्ञापरिभाषम्' इति परिभाषाव्याख्यानावसरे परिभाषेन्दुशेखरे श्रीनागेशोक्त्या अधिकारशब्देन परिभाषाया अपि व्यवहारः। 'स्वदेशे लक्ष्यसंस्कारकशाब्दबोधाजनकत्वे सति उत्तरशास्त्रेण सहैकवाक्यतया बोधोपयोगित्वमिति लक्षणमधिकारशास्त्रस्य प्रसिद्धमस्ति, परिभाषाशास्त्रेऽपि तस्य संघटनात् परिभाषायामपि तद्व्यवहारः। एतेषु लक्षणेषु लक्षणद्वयं प्रकृतव्याख्यायां निर्दिष्टमस्ति, यच्च प्रकृतसन्दर्भेऽत्यन्तमुपयुज्यते।

यद्यपि संज्ञा-परिभाषाप्रकरणयोः ग्रन्थस्य भूमिकारूपत्वेन साम्यमेव, तथापि विधिसूत्रघटकानां तत्तत्पदानां शक्तिग्राहकत्वेन पदार्थबोधकत्वं संज्ञासूत्राणाम्, यथा 'वृद्धिरेचि', 'मृजेर्वृद्धिः' इत्यादिषु वृद्धिपदस्यार्थनिर्धारणं क्रियते वृद्धिरादैजित्यनेन संज्ञासूत्रेण, एतावता विधिशास्त्रीयशाब्दबोधे उपयोगित्वम्। परिभाषासूत्रं तु तत्तत्पदोपस्थापनद्वारा पदैकवाक्यतया वाक्यैकवाक्यतया वा विधिशास्त्रीयशाब्दबोधे साहाय्यं सम्पादयति।

यद्यपि सिद्धान्तकौमुद्यां श्रीभट्टोजिदीक्षितेन प्रकृतिभावप्रकरणं विहाय कस्याऽपि प्रकरणस्यादौ अथशब्देन प्रारम्भो न विहितः, परमन्ते इतिशब्दोल्लेखेन समाप्तिः सूच्यते।

अत्रेदं रहस्यं प्रतीयते, यल्लाघवप्रिया वैयाकरणा भवन्ति ! अथ च प्रारब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणमिति सिद्धान्तमादृत्य प्रारब्धस्य कार्यस्यान्तगमनमेव श्रेयस्करं भवति, न तु मध्ये एव तस्य त्यागेन समाप्त्यभावः।

आदिमे मङ्गलाचरणे स्वनामापि न संकीर्तितम्, अन्ते एव 'भट्टोजिदीक्षित-कृतिः सैषा सिद्धान्तकौमुदी' इत्येवं नामकीर्तनं कृतम्। 'फलानुमेयाः प्रारम्भाः' इति महाकविकथनमपि एतद् वृत्तं पोषयति।

अस्तु, तर्हि—'अथ प्रकृतिभावः' इत्येवमथशब्देनात्र प्रारम्भसूचना कथं कृता ? उच्यते; रहस्यद्वयमत्रान्तर्निहितमस्ति—

१. एकं तु 'प्रकृत्यान्तःपादमव्यपरे' इति सूत्रस्य 'नान्तःपादमव्यपरे' इदं पाठान्तरम्। तथाहि—'सर्वत्र विभाषा गोः' इति सूत्रे प्रकृत्यान्तःपादमिति सूत्रात् 'प्रकृत्या' इत्यनुवर्त्य एङन्तस्य गोशब्दस्य प्रकृतिभावः पदान्ते विधीयताम्, अथवा नान्तःपादमिति पाठपक्षे 'न पदमनुवर्त्य एङन्तस्य गोशब्दस्य यत्प्राप्तम्, तन्न' इत्यर्थेनार्थतः प्रकृतिभावो विधीयताम्, नास्ति कोऽपि विशेषः। परन्तु प्लुतप्रगृह्या इति सूत्रे प्रकृत्या इत्यस्यैवानुवृत्त्या इष्टं साधयितुं शक्यते। नेत्यनुवृत्तिपक्षे तु प्लुताः प्रगृह्याश्च न स्युरित्यर्थो भविष्यति, ततश्च महाननर्थः स्यात्; उद्देश्यस्यैव निषेधात्। अतश्च प्रकृत्या-पदघटित एव पाठो युक्तः। अतश्च मुख्यः प्रकृतिभावः प्लुतप्रगृह्या इत्यत एवारभ्यते। यदि तु अत्रापि प्लुतप्रगृह्या इति प्रथमान्तं षष्ठ्यन्ततया विपरिणमय्य प्लुतानां प्रगृह्याणां च यत्प्राप्तं तन्न, इत्याद्यर्थः स्वीक्रियते, तदापि फलतः प्रकृतिभावः पर्यवस्यत्येव। तदाऽपि उच्यते।

२. द्वितीयं रहस्यम्—'इन्द्रे च नित्यमिति पाठस्य प्राचां ग्रन्थे स्थितस्यासांगत्यं दर्शयितुम्—'अथ प्रकृतिभावः' इति कथनेन 'प्लुतप्रगृह्या अचि नित्यम्' इत्यस्य सर्वसमक्षमुपस्थापनम्। तथाहि 'इन्द्रे च' इत्यत्र नित्यमिति पदघटितः पाठो भाष्यविरुद्धः, भाष्यकृता हि अस्यारम्भसामर्थ्यान्नित्यता उक्ताऽस्ति, वैकल्पिकत्वे तु 'अवङ् स्फोटा-यनस्य' इत्येव सिद्धिः स्यात्। अपरं च—इन्द्रे चेत्यत्र नित्यमिति पाठेऽव्यवहितोत्तरसूत्रे प्लुतप्रगृह्या इत्यत्र नित्यमिति पदं कथं संगच्छेत् ?

२. अत एव—संज्ञासूत्रं पूर्वमुल्लिख्य विधिसूत्रलेखनं ग्रन्थकर्तुः स्वभावः। यथा—'अपृक्त एकाल्प्रत्ययः' इति संज्ञासूत्रम्, तदनु 'हल्ङ्याब्भ्यो दीर्घात्'—इत्यादि विधिसूत्रम्; 'अलोऽन्त्यात् पूर्व उपधा' इति संज्ञासूत्रम्, ततः 'सर्वनामस्थाने चासम्बुद्धौ' विधिसूत्रम्। परन्तु प्रकृतस्थले सा शैली परित्यक्ता, 'प्लुतप्रगृह्याः' इति विधिसूत्रं पूर्वमुल्लिखितम्, प्लुतसंज्ञाविधायकानां 'प्रत्यभिवादेऽशूद्रे' इत्यादिसंज्ञासूत्राणाम्, ईदूदेदित्यादिप्रगृह्यसंज्ञा-सूत्राणां चोल्लेखः पश्चाद् विहितः।

शेखरकृता तु अयं क्रमो नाद्रियते, प्रकरणस्यादौ अथशब्दः, अन्ते इतिशब्दश्च आरम्भस्य समाप्तेश्च सूचकतया निर्दिश्येते, आदौ मङ्गलाचरणे स्वनामोल्लेखोऽपि क्रियते; रुचीनां वैचित्र्यात्।

अच्सन्धिप्रकरणेऽचामज्भिः सह सन्धिर्मेलनमित्यर्थः। 'मिश्रं चानुपसर्गसन्धौ' इति सूत्रे सन्धिशब्द आयातः, तत्र तस्यार्थ उक्तः—पणबन्धेनैकार्थ्यं सन्धिः, तत्र पण-

बन्धः परिभाषणम्, 'यदि भवान्ममेदं कार्यं कुर्यात्, तर्हि अहमपि भवतस्तत्कार्यं करिष्यामि'—इत्येवं रूपम्। अस्यां स्थितौ द्वयोर्मध्ये एकस्य न्यूनता अधिकता, द्वयोरपि रूपान्तरताप्रयुक्ताधिकता, समता वा भवति।

यथा इको यणचीत्यत्रेकोऽज्भिः सह मेलनेऽर्धमात्रिकयण्रूपतया न्यूनता आगता, एचामज्भिः सह सन्धौ अयादिरूपेण सार्धैकमात्रतया न्यूनतैव। 'एङः पदान्तादति' इत्यत्रैकारस्याकारेण सह मेलने द्वयोः स्थाने पूर्वरूपसन्धौ न्यूनतैव। 'सर्वत्र विभाषा गोः' इत्यनेन ओकारस्यावङादेशेऽधिकता सञ्जाता। एवमेव 'अकः सवर्णे दीर्घः' इत्यनेन द्वयोर्ह्रस्वाकारयोः स्थाने द्विमात्रिके दीर्घे समता फलति, द्वयोर्दीर्घाकारयोः स्थाने एकस्य दीर्घस्यादेशेन चतुर्मात्रिकस्य द्विमात्रिकरूपेण न्यूनतैव सम्पद्यते। प्रकृतिभावसन्धौ तु द्वयोः स्वरूपं यथावत्तिष्ठत्येव—इति कृत्वा स्वरूपप्रयुक्ता समता। अनया रीत्या सर्वत्र द्रष्टव्यम्। शब्दतत्त्वविद्भिर्महर्षिभिः केन वर्णेन सह मेलने कस्य वर्णस्य द्वयोर्वा स्वरूपं कीदृशं भवति ? इति सम्यग् विचार्य नियमरूपाणि सूत्राणि रचितानि। अत्र स्वेच्छयास्माभिरयोगिभिः किमपि कर्तुं न शक्यते। साधुत्वज्ञानवत्त्वं तेषामेव।

इदं च शब्दनिष्ठं साधुत्वं पुण्यजनकतावच्छेदकमिति स्पष्टं महाभाष्यादौ। अत्रेदमवश्यं ध्येयम्—साधुत्वं द्विविधम्—एकं पूर्वसूत्रबोधितं साधुत्वमुत्तरसूत्रस्याभ्यनुज्ञायकम्, अपरं तु चरमशास्त्रबोधितम्, तदेव पुण्यजनकताऽवच्छेदकम्। अथ च शब्दानित्यत्वपक्षे यणादिकार्यविधायकं तत्तत्सूत्रं शब्दनित्यत्वपक्षे शब्दनिष्ठसाधुत्वज्ञापकं सूत्रम्। एतत्सर्वं साधुत्वविषयकं व्याख्यानं विस्तरतो द्रष्टव्यम् 'इको यणचि' इत्यस्य प्रकृतव्याख्यायाम्।

'स्थानिवदादेशोऽनल्विधौ' इति सूत्रं व्याख्यातवतः शेखरग्रन्थस्याशयप्रकाशनं प्राङ्नव्यमतभेदप्रदर्शनपुरस्सरं साम्प्रदायिकरीतिमनुसरतो व्याख्याकारस्य द्विवेदिमहोदयस्य प्रतिभाकौशलं साधु स्पष्टीकरोति।

एवमेव—अचः परस्मिन्नित्यस्य परिष्कृतोऽर्थः, तस्य लक्ष्ये संघटनम्, पुनश्च 'न पदान्तद्विर्वचन' इत्यत्र स्थानिवद्भावश्चतुर्विधः, तत्र परम्परया पदचरमावयवसाधकः स्थानिवद्भावो नानेन प्रतिषिध्यते, अन्यस्य त्रिविधस्य प्रतिषेधः—इत्यादिकवर्णनम्, 'अन्तादिवच्च' इत्यस्य परिष्कृतार्थस्वरूपनिरूपणम्, 'ऋति ऋ वा' इत्यादिवार्त्तिकद्वयविवेचनम्, ई चाक्रवर्मणस्येत्यत्रोभयत्रविभाषात्वस्योपपादनम्। 'ईदूतौ च सप्तम्यर्थे' इत्यत्रार्थग्रहणविषयकं विवेचनं प्रकृतव्याख्यायां विशेषतो मननीयमस्ति। इत्यच्सन्धिप्रकरणविचारः।

हल्सन्धिप्रकरणे—श्चुत्व-ष्टुत्व-जश्त्व-परसवर्ण-पूर्वसवर्णादिविविधकार्यविधायकानि सूत्राणि अष्टमाध्यायस्थानि त्रैपादिकानि, प्रकरणावसाने 'छे च' इत्यत आरभ्य 'पदान्ताद्वा' इत्यन्तानि षष्ठाध्यायस्थानि, तत्रास्ति संहितायामित्यस्याधिकारः। अच्सन्धौ तु सर्वाणि सूत्राणि षष्ठाध्यायस्थान्येव, अस्ति तत्र संहिताधिकारः।

अत्र केचन संशेरते—यथा श्चुत्व-ष्टुत्वादिविषये संहिताधिकारमन्तरैव संहितासन्धिशब्दयोः पर्यायतया सन्धिकार्यं सम्पन्नं भवति, तथैव अच्सन्धिविषयेऽपि स्यात्, संहिताधिकारस्य काऽवश्यकता ?

अत्रोच्यते—संहिताधिकारो यदि न स्यात्तर्हि अर्धमात्राधिककालव्यवाये सन्धिकार्यं कथं वारितं भवेत् ? सन्धिशब्देन तु मेलनमवश्यं लभ्यते, किन्तु अर्धमात्राधिककालस्य व्यवधाने सन्धिः (मेलनम्) न भवति—इति केनाचार्येण निर्दिष्टम् ! न केनाऽपि, तर्हि तदर्थं संहिताधिकारः कर्तव्य एव । यदि तु 'अर्धमात्राधिककालव्यवाये उपश्लेष एव न भवति'—इति स्वीक्रियते, तदा संहिताधिकारः, 'तस्मिन्निति निर्दिष्टे' इत्यत्र निर्दिष्टपदं च विफलमिति सिद्धान्तितं शेखरे एव तस्मिन्निति सूत्रव्याख्याने ।

ननु हल्सन्धिप्रकरणे 'स्तोः श्चुना' इत्यादौ संहिताधिकारः सप्तमीनिर्देशश्च नास्ति, तर्हि व्यवहिते कथं प्रवृत्त्यभावः ? इति चेत्; उच्यते, श्चुनेति तृतीयायाः साहित्यार्थकतया साहित्यं च संयोगकृतम्, न तु सामान्यतो योगकृतम् । तथापि परममूले 'शकारचवर्गाभ्यां योगे' इत्येवोक्तम्, तत्र शेखरकृता व्याख्यातम्—संयोग इति तदर्थः इत्यादि, तत्फलमपि चितमित्यादौ व्यवधाने सति प्रवृत्त्यभावरूपमुक्तम् । एवं च संहिताधिकाराभावेऽपि दोषाभावः । अग्रिमसूत्रेषु सप्तमीनिर्देशेनेष्टं साधितम् ।

सच्चिदिति प्रयोगे श्चुत्वस्यासिद्धत्वाज्जश्त्वेन दत्वे, तस्य चुत्वेन जकारे कृते चर्त्वमिति शेखरोक्तेस्तात्पर्यं प्रकृतव्याख्यायां द्रष्टव्यम् । यद्येतादृशी प्रक्रिया न क्रियते, तदा परिनिष्ठितत्वं न स्यात्, अप्रवृत्तनित्यविध्युद्देश्यताऽवच्छेदकधर्मानाक्रान्तत्वं हि परिनिष्ठितत्वमिति सिद्धान्तात् ।

'चतुर्मुखः' इत्यत्रानुनासिकादेशवारणप्रकारः, उदःस्थास्तम्भोरित्यत्र निर्दिश्यमानत्वविचारः, यथासंख्यमनुदेशः समानामित्यस्य सूत्रस्य परिष्कृतार्थविमर्शः, 'ङमो ह्रस्वादचि' इत्यत्र उत्तरपदत्वे चेति वार्त्तिके कार्यित्वनिवेशविवेचनम्—एतत्सर्वं प्रकृतव्याख्यायां सूक्ष्मेक्षिकया स्पष्टीकृतमस्ति । इति हल्सन्धिविचारः ।।

अनुस्वार-विसर्ग-जिह्वामूलीयोपध्मानीय-यमानामकारोपरि शर्षु च पाठस्योपसंख्यानं भगवता भाष्यकृता कृतम् । एवं च विसर्गस्य हल्त्वेन हल्सन्धिप्रकरणे एव विसर्गोद्देश्यककार्याणां वर्णनं कर्तव्यं स्यात्, किमर्थं पृथक् प्रकरणमिति चेत् ? ब्राह्मणवसिष्ठन्यायेनेत्यवगन्तव्यम् । यथा 'सर्वे ब्राह्मणा निमन्त्र्यन्ताम्, वसिष्ठोऽपि निमन्त्र्यताम्' इत्युक्तौ पूर्ववाक्येनैव वसिष्ठस्यापि ब्राह्मणत्वाद् निमन्त्रितत्वसिद्धौ उत्तरवाक्यं किमर्थमिति चेत्, वसिष्ठस्य ब्राह्मणेषु वैशिष्ट्यद्योतकतया प्रतिष्ठाधायकमित्यर्थकम् । तथैव विसर्गस्य हल्त्वेऽपि पृथक्प्रकरणोपन्यासेन तस्यातिशयो दद्योत्यते, स चातिशयः सत्वषत्व-जिह्वामूलीयो-पध्मानीय-विसर्गात्मक नानाविधादेशरूपेण तस्यावस्थानम् ।

यद्येवं तर्हि अनुस्वारसन्धिप्रकरणमपि नूतनं प्रक्रम्यताम्, विसर्गसन्धिप्रकरणवदिति केषांचिज्जिज्ञासा नूनं समुदियात् ? तत्रोच्यते—अनुस्वारमुद्दिश्य केवलं परसवर्णात्मकमेकमेव आदेशरूपं कार्यमुक्तमस्ति, न तु विसर्गवत्तस्य नानाकार्याणि । अतस्तादृशोऽतिशयोऽत्र नास्ति—इति पृथक्प्रकरणाभावः ।

ब्राह्मणवशिष्ठन्यायस्वरूपे ईषद्विचारः—

ननु सामान्यविशेषवाचकपदयोर्द्वन्द्वाभावस्य त्यदादीनि सर्वैर्नित्यमिति सूत्रे भाष्यकृता निराकृतत्वादत्र न्यायस्वरूपे ब्राह्मणवसिष्ठशब्दस्य कथं साधुता ? इति जिज्ञा-

सायामुच्यते—'ब्राह्मणेन सहितो वसिष्ठ' इत्येवं शाकपार्थिवादित्वेन मध्यमपदलोपिसमासे साधुत्वम् । अथवा ब्राह्मणपदमत्र न्याये वसिष्ठेतरब्राह्मणपरम्, वसिष्ठभेदविशिष्टं ब्राह्मणत्वं तत्प्रवृत्तिनिमित्तं लक्षणया मन्तव्यम्—इति कृत्वा इतरेतरयोगद्वन्द्वेऽपि न काचन विप्रतिपत्तिः ।

गोबलीवर्दन्यायशब्दे तु भगवता भाष्यकारेण गोबलीवर्दयोः इतरेतरयोगद्वन्द्वः आञ्जस्येन स्वीकृतः । तथा हि—सामान्यविशेषवाचिनोर्द्वन्द्वाभावे 'शूद्राभीरम्', 'गोबलीवर्दम्', 'तृणोपलम्' इति न सिध्यति । नैष दोषः; इह तावत् 'शूद्राभीरम्' इति आभीरजात्यन्तराणि । गोबलीवर्दमिति गाव उत्कालितपुँस्का वाहाय च विक्रयाय च, स्त्रिय एवावशिष्यन्ते । अयं भावः—गोशब्दस्य स्त्रीत्वविशिष्टगोत्वं पुंस्त्वविशिष्टगोत्वं च प्रवृत्तिनिमित्तमिति नानार्थकत्वम् । उत्कालितपुँस्का वाहाय च विक्रयाय च ये, ते बलीवर्दाः । केवलेन गोपदेन तु स्त्रीविशिष्टगोत्वाऽवच्छिन्नस्यैन प्रसिद्धत्वाद् बोधः, इति सामान्यविशेषभावो नास्ति इति द्वन्द्वस्य साधुत्वं निर्वहति ।

यदि च भवता गोपदेन बलीवर्दस्यापि ग्रहणं क्रियते, बलीवर्दपदोक्तिः प्राधान्याभिप्रायेण स्वीक्रियते, तदा तु स्पष्टं भाष्यविरुद्धकल्पना समागता । यदि तु पूर्ववदत्रापि मध्यमपदलोपी तत्पुरुषसमासः समाद्रियते, तदा पुँस्त्वविशिष्टगोत्वाऽवच्छिन्ने गोपदस्य शक्तिं मत्वा सामान्यविशेषवाचिनोः तत्पुरुषसमासः स्वीकर्तव्यः; न्यायाङ्गीकारे तादृशस्यैवार्थस्याभ्युपगमात् ।

'विसर्जनीयस्य सः' इति सूत्रे निमित्तकोटौ खरित्यस्य लाभः, 'शर्परे विसर्जनीयः' इत्यत्र 'शर्परे इति बहुव्रीहिः, विशेष्यश्चावध्यवधिमतोः साजात्याद् विसर्गाक्षिप्तः खरेव' इति शेखरग्रन्थस्य व्याख्यानं च सोपपत्तिकं द्रष्टव्यम् प्रकृतव्याख्यायाम् । इदुदुपधस्य चाप्रत्ययस्येत्यत्राप्रत्ययस्येत्यंशे नञर्थः पर्युदासो लाघवात् । तत्र प्रत्ययपदं प्रत्ययसंबन्धिपरम्, तेन प्रत्ययसम्बन्धिभिन्नस्येत्यर्थः सम्पद्यते—इत्यर्थकशेखरग्रन्थस्य व्याख्यानं प्रकृतव्याख्याद्वये स्फुटं प्रतिपादितमस्ति ।

तिरसोऽन्यतरस्यामित्यत्र गतिग्रहणानुवृत्त्यभावे, इसुसोः सामर्थ्येऽनित्यं समासेऽनुत्तरपदस्येत्यादिसूत्राणां परिष्कृतार्थविषये उदाहरणसमन्वय-प्रत्युदाहरणदानविषये च व्याख्याद्वयीयं सूक्ष्मेक्षया पर्यालोच्यताम् ॥ इति विसर्गसन्धिविचारः ॥

स्वादिसन्धिरपि यद्यपि हल्सन्धिविशेष एव, तथापि विसर्गसन्धिवत् अस्यापि पृथक् प्रकरणं ब्राह्मणवसिष्ठन्यायेनैवेति मन्तव्यम् ।

प्रथमैकवचनस्य सुविभक्तेरुद्देश्यतया इदं प्रकरणमारभ्यमाणमस्ति—इति कृत्वा स्वादिसन्धिप्रकरणमिति कथ्यते एतत् प्रकरणम् ।

'सु औ जसित्यत्र यदि सुस्थाने रुरेव विधीयताम्, सर्वत्रान्यत्र सोः स्थाने रुर्न कर्तव्यो भविष्यति—इति चेत् ? सत्यमुच्यते भवता, परं तु इदं निभाल्यताम्—यदि तत्र रुरेव विधीयते, तदा यशोऽत्र, पचतोऽत्र—इत्यादौ अतो रोरिति दृष्ट्या रुत्वस्यासिद्धत्वात् उत्वं न स्यात् । अतश्च तादृशस्य सोरुद्देश्यतया रुत्वोत्वादिकार्यविधानेन अस्य प्रकरणस्य नामनिर्दिष्टमाचार्येण—स्वादिसन्धिप्रकरणमिति ।

अत्र प्रकरणे पदस्येत्यधिकारः प्रचलति । सान्तस्य पदस्य सजुष्शब्दान्तस्य च पदस्यान्त्यालः स्थाने रुर्विधीयते ससजुषोरुरिति सूत्रेण ।

'अतो रोरप्लुतादप्लुते' इत्यस्य परममूलोक्तसूत्रस्याप्लुतादिति किम् ? इत्यंशमादाय 'एहि सुस्रोता ३ अत्र स्नाहि' इति वाक्ये प्रत्युदाहरणभूते सोः उत्वं वारयितुं कृतः प्रयत्नः, शेखरग्रन्थस्य, तदनुगामिव्याख्याद्वयस्य विचारः पाठकमहोदयैः सावधानेन मनसा पर्यालोचनीयः ।

पुनश्च 'भो भगो' इत्यादिसूत्रे 'अशि किम्, देवाः सन्ति' इत्यंशमाधृत्यानल्विधावित्यस्य 'अल्त्वव्याप्यधर्माऽवच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतधर्मेण साक्षादवच्छिन्नोद्देश्यताके विधौ कर्तव्ये आदेशो न स्थानिवदित्येवं परिष्कृतार्थसम्पादने महाभाष्यं प्रमाणयतः शेखरकारस्य तदनुगामिटीकाद्वयकारिद्विवेदिमहोदयस्य च युक्तिप्रत्युक्तिभिः प्रतिपादनकौशलं विचारणीयमस्ति । अग्रे च विप्रतिषेधे परं कार्यम्, ढ्रलोपे पूर्वस्य दीर्घोऽणः, सोऽचि लोपे चेत् पादपूरणमित्यादिविषयकं शेखरकारीयं प्रस्तुतव्याख्याकारीयं च व्याख्यानं सर्वथाऽस्ति सम्प्रदायरहस्यप्रकाशकम् । इति स्वादिसन्धिविचारः ।

किं बहूक्त्या, माननीयस्य श्रीद्विवेदिमहोदयस्य सर्वं व्याख्यानं सम्प्रदायानुरूपं शेखरग्रन्थिभेदकमिति विविदिषूणां विदुषां च कृते महते उपकाराय कल्पते इत्यस्य ग्रन्थस्य प्रकाशनं प्रचारं प्रसारं च सर्वदा कामयते—

वाराणसी,
शुचौ शुक्ले नवम्याम्,
सं० २०४५ वैक्रमे

रामप्रसादत्रिपाठी

प्रकाशकीयम्

विद्यावाचस्पतिभिः पूज्यतातपादैराचार्यब्रह्मदत्तद्विवेदिवर्यैः लघुशब्देन्दुशेखरस्य भाषाद्वयमण्डिता 'राधिका' नाम्नी व्याख्या व्यधायि। व्याख्येयं शेखररहस्यं प्रस्तुवन्ती शब्दविद्यायाश्च विश्लेषणविशेषमुपस्थापयन्ती परमपूज्यां राधिकाभिधानां जननीं चापि मेऽमरीकरोति। ग्रन्थमेनं प्रकाशयन्नहं सममेव हर्षविषादाभ्यां समाक्रान्त इव विशमं किञ्चिदनुभवामि।

वाराणसीवासक्रमे विद्वद्भिरनुरुध्यमानैरस्मत्पितृपादैः शेखरव्याख्यामेनां प्रस्तोतुं सङ्कोचेन स्वीकृतिरदायि। प्रायेण त एवं कथयन्तोऽस्माभिः श्रुताः—'किमस्ति लेख्यम्, महर्षिभिर्यद् भणितं ततो नवतरं किमन्यद् वक्तुं शक्यते ? किं वास्त्यवशिष्टं यत्तैर्न स्फुटीकृतम्'' इति। इदमासीत् विनयवैभवं पूज्यचरणानाम्। ग्रन्थ-ग्रन्थिविमोचने, प्रचलितेऽपि वस्तुनि नवतरतथ्योपस्थापने शिथिलप्रज्ञावतामपि छात्राणां बोधशक्तिसम्वर्द्धनेऽपूर्वं किमपि पाटवमासीत् तेषां महीयसाम्।

समधिगतेऽपि त्रिविधशास्त्रपाटवे शब्दविद्याविचारे तेषामासीत् काचित् विशिष्टा रुचिः। अतएव पूर्वं तैः व्याकरणस्य दार्शनिकं पक्षं प्राञ्जलेन विधिना मण्डयितुं वैयाकरणभूषणसारस्य संस्कृतहिन्दीभाषामयी व्याख्या प्रकाशिता। पुनश्च प्रक्रियापरं प्रज्ञावतामपि परीक्षकं लघुशब्देन्दुशेखरं व्याख्यातुं ते प्रावर्तन्त। व्याख्येयं कीदृशीति सुधियो विभावयिष्यन्ति। अहं तु प्रकाशयन्नेनं ग्रन्थं शोकाकुलितमानसो न किमपि व्याहर्तुं क्षमः। शास्त्राणि व्याहरन्तः, लौकिकमलौकिकं च निखिलं कार्यजातं सम्पादयन्तः, प्रतिदिनं प्रातरेव गङ्गास्नानाशुतोषविश्वनाथदर्शनादिकृत्यानि श्रद्धया विदधतः एतावत्या त्वरया अस्मान् सर्वान् आत्मीयनिवहान् परित्यज्य शिवसायुज्यमवाप्स्यन्तीति नासीत् विश्वासलेशः! संस्कृतजगतः प्रखरभास्करः सहसास्तङ्गतः! कालचक्रस्य कुटिलामेनां गतिं प्रेक्ष्य निबिड़े तमसि पतित इव न किमपि चिन्तयितुं प्रभवामि।

अद्य ममापि सैव स्थितिर्या कदाचित् मम पितामहवर्याणां स्वनामधन्यानां सर्वतन्त्रस्वतन्त्राणां महामहोपाध्यायश्रीहरिहरकृपालुद्विवेदिमहाभागानां शिवसायुज्याधिगमावसरे मे पितृचरणानां सञ्जातासीत्। महामनसां मदनमोहनमालवीयमहोदयानामनुरोधं स्वीकृत्य श्रीमद्भगवद्गीतायाः मधुसूदनीव्याख्यायाः हिन्दीभाषया भाष्यं पूज्यपितामहचरणैः कृतम्। परं तेषां जीवनकाले ग्रन्थोऽयं न प्रकाशमासादयत्। मुद्रणालय एव बहुकालं प्रकाशप्रक्रियामनुभवन्नासीत्। पूज्यपितृचरणैः तस्य ग्रन्थस्य सम्पादनं कृतम्। हिन्दीभाषया प्रणीते स्वप्रकाशकीये वक्तव्ये तैर्व्याहृतमिह तेनैव रूपेण प्रस्तौमि---

'स्वप्न में भी ऐसी धारणा नहीं थी कि श्रीमद्भगवद्गीता ऐसी महान् पुस्तक का प्राक्कथन मुझे लिखना होगा। मेरी लेखनी से इस अभाव की पूर्त्ति की जायगी—यह कौन जानता था! मधुसूदनी के अनुवाद के साथ इस रसास्वाद से पाठकों को वंचित रहना होगा—ऐसी आशा किसे थी? पर परमेश्वर की लीला अचिन्त्य और अपरिमेय है। उनकी अप्रतिहत इच्छा से कभी-कभी ऐसी भयङ्कर अघटित घटनाएँ घट जाती हैं कि उनकी दृष्ट सृष्टि में बहुत बड़ा अभाव होने के कारण उनकी भी ननु नच की व्याख्यायें होने लगती हैं। उनकी दृष्टि में कदाचित् इन घटनाओं का भी महत्त्व हो।''

मामकीनापि सम्प्रति सैव स्थितिः। तेषामेवैष प्रसादो यदहं तेषां वचांसि कथं-कथमपि प्रकाशपदवीं प्रापयामि। प्रकाशने विविधविघ्नैः पौनःपुन्येन प्रतिहन्यमानोऽपि दृढसङ्कल्पेन कार्यं कुर्वन्नहं यथासमयं सफलमनोरथोऽभवम्।

व्याख्याविषये तेषामभिमतमुपस्थापयामि—

"अध्ययनाध्यापने काठिन्यं विचिन्त्य पूर्वमेव निरणैषं यत् हिन्दीभाषया यद्यस्य विवरणं भवेत्तदाऽस्य विषयोऽन्तेवासिनां सुखेन हृदयङ्गमो भवेत्। ततश्च यथासमयं प्रोद्-बुद्धसंस्कारेण मया तथा विवरीतुमुपाक्रामि। हिन्दीभाषाविदामपि रसास्वाद आञ्जस्येन स्यादिति धिया हिन्दीभाष्यमारचय्य विषमस्थलग्रन्थग्रन्थिशैथिल्यमानायि"। (वैयाकरण भूषणसार—भूमिका) एतेन तेषामभिमतं स्फुटं प्रतीयते।

ग्रन्थस्यास्य प्रकाशने परमपूज्यानां महावैयाकरणानां पण्डितश्रीरामप्रसादत्रिपाठि-महाभागानां सुमहत् साहाय्यं मया समधिगतम्। ग्रीष्मकालस्य मध्याह्ने, समुपेक्ष्य सकलै-रपि असौविध्यसम्भारैः, तैः मया साकं पाण्डुग्रन्थप्रवाचने यथास्थानपङ्क्तीनां संयोजने अश्रान्तंश्रमः समनुष्ठितो महताऽनुग्रहेण। व्याख्यायास्तस्याः वैशिष्ट्यानि विश्लिष्य साधी-यसी भूमिकाऽपि व्यलेखि। तान् प्रति कया वाचा स्वकृतज्ञतां प्रकाशयेयमिति न संवेद्मि!

विश्रुतवैदुष्यैः स्वामिश्रीद्वारिकादासशास्त्रिमहाभागैरस्य ग्रन्थस्य प्रकाशनसङ्कल्पं गृहीत्वा पूर्णमनोयोगेन कार्यसम्पादनं कृतम्। पूज्यपितृचरणैरस्य ग्रन्थस्य सम्पादनाय तेऽनुरुद्धाः। प्रकाशनक्रमे अस्य ग्रन्थस्य प्रारम्भिकरूपं दृष्ट्वा पितृपादा अतीव प्रसन्न-मनसोऽभूवन्। श्रीस्वामिवर्याणां कृपया एव ग्रन्थस्यास्य प्रकाशनं पूर्णतां नीतमिति तान् प्रति सश्रद्धमाधमर्ण्यं बिभर्मि।

मम पितृचरणानामन्यतमः शिष्यः श्रीवर्द्धनठाकुरः (उपाचार्यः, मिथिलाविश्व-विद्यालयस्य) एवं कविता गुप्त, शोधच्छात्रा च महता श्रमेण सुन्दराक्षरैः प्रतिलिपिं सम्पाद्य प्रकाशने सौविध्यं व्यधत्ताम्। अतस्तयोरुपकारभावं स्मरामि।

ममानुजाभ्यां श्री काशीपतिद्विवेदि-श्रीविद्यापतिद्विवेदिभ्यां यथासमयमधैर्या-वसरेऽपि सोत्साहं साहाय्यस्वरः प्रादायीति सस्नेहं शुभाशीर्भिस्तौ योजयामि।

आनन्दमुद्रणालयव्यवस्थापकाः श्रीअमरेन्द्रोपाध्यायमहोदया अप्यस्मद्धन्यवाद-भाजो यैरिदं कार्यं व्यवस्थितेन विधिना सम्पादितम्।

अन्ते च भगवन्तमनाथनाथं श्रीविश्वनाथं मनसा स्मरामि, यस्य भगवतः प्रसादात् कार्यमिदं पूर्णतां प्राप्तम्। यतो भगवन्तं विश्वेश्वरं नमस्कृत्यैव तातपादाः व्याख्याकार्यं प्रारब्धवन्तः।

ममानवधानतया अक्षरयोजकानां प्रमादाद् वा जातास्त्रुटीः "सर्वथा व्यवहर्तव्ये कुतो ह्यवचनीयता" इति पद्यमनुसरन्तो भवन्तो गुणैकपक्षपातिनो निर्मत्सरा विद्वांसः क्षाम्यन्तु इति प्रार्थये—

भ्रातृद्वितीया, सं० २०४५
वाराणसी.

विदुषामाश्रवः
वाचस्पतिद्विवेदी

व्याख्याकर्तुः परिचयः

'राधिका' व्याख्याप्रणेतारो विद्यावाचस्पतय आचार्यश्रीब्रह्मदत्तद्विवेदिनः सारस्वतवैभवमूले वंशे १९६३तमे वैक्रमे कार्त्तिकशुक्लद्वितीयायां (१९०६तमे रिव्रष्टाब्दे) प्रयागमण्डले करछनाखण्डे पण्डितपुराभिधाने ग्रामे अजनिषत। तेषां पितृचरणा महामहोपाध्यायपण्डित-श्रीहरिहरकृपालुद्विवेदिमहाशयाः वाग्देवतावतारमूर्त्तयः संस्कृतस्य पाण्डित्यपरम्परायां निरुपमं यशोराशिमशिश्रियन्। आबालं लक्ष्मीसरस्वतीभ्यां समानस्नेहेन लालिता एते महाभागाः पितुरेव चरणयोः काणादम्, पाणिनीयम्, अथच साहित्यविद्यां सविधि समध्यगीषत। सर्वप्रथमं व्याकरणे १९२७ ई०, तदनन्तरं न्याये १९३० ई०, ततश्च साहित्ये १९३२तम इसवीयवर्षे आचार्यपरीक्षां समुत्तीर्य सर्वासु परीक्षासु प्रथमश्रेण्यां प्रथमं स्थानं चाधिगत्य बिहारोत्कलसंस्कृतसमितेः स्वर्णपदकनिबहान् व्यजैजीषत।

१९३२ ईसवीयवर्षतः विद्यावतां राजधान्यां पाटलिपुत्रनगर्यां मुरारकासंस्कृतमहाविद्यालये नितरां तरुणे वयस्येव प्राचार्यपदं व्यभूषयन्। तत एवैषां विद्वन्मूर्धन्यानां शिष्याणां माध्यमेन पाण्डित्यकीर्तिः निखिलेऽपि राष्ट्रे प्राचुर्येण प्रासरत्। एवमेते स्वपितृचरणानां कीर्त्तिमवर्धयन्।

१९५५तमेऽब्दे बिहारशासनं पाटलिपुत्रे स्थापिते संस्कृतमहाविद्यालये आचार्यद्विवेदिवर्यं सादरमामन्त्र्य नियोजितवान्। १९५५तमे वर्षे पाण्डित्यनिकषस्वरूपया धौतप्रतिष्ठया श्रीमता महाराजाधिराजेन मिथिलाया विशिष्टसम्मानेन सम्मानिताः।

१९७६तमे वर्षे दरभङ्गासंस्कृतविश्वविद्यालयस्य सम्मानितेन वाचस्पति (डी. लिट) इत्युपाधिना विभूषिताः।

१९७८तमे वर्षे वाराणस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालये अतिथिप्राध्यापकाः (Visiting professor) समजायन्त।

१९७९तमे वर्षे कलकत्ताविश्वविद्यालये पाणिनिमधिकृत्य इमे व्याख्यानार्थमामन्त्रिताः।

१९८१तमे वर्षे एभिः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य दीक्षान्तसमारोहावसरे 'शब्दाद्वैतविन्दुः' इति विषयमधिकृत्य समीक्षामयं व्याख्यानं प्रस्तुतम्।

१९८२तमे वर्षे भारतशासनस्य शास्त्रचूडामणियोजनायां श्रीगङ्गानाथ झा केन्द्रीयसंस्कृतविद्यापीठे अध्यापकान् अनुसन्धित्सूँश्च प्राध्यापिपन्।

१९८२तम ईसवीये वर्षे संस्कृतविद्योन्नयनपरम्परायां महत्त्वपूर्णयोगदानाय उत्तर-प्रदेशसंस्कृत-अकादमीसंस्थया विशिष्टसम्मानेन सम्मानिताः।

अथ च, १९८६तम इसवीयवर्षे संस्कृतविद्यानां समुन्नयने श्लाध्यश्रमा इमे आचार्यद्विवेदिमहाभागाः महामहिम-भारतराष्ट्रपतिमहोदयैः ससम्मानमभ्यर्चिताः।

एभिः स्वपितृचरणैः कृताया मधुसूदनीगीताभाष्यस्य हिन्दीव्याख्यायाः सम्पादनं कृतम्। ततो वैयाकरणभूषणसारस्य संस्कृतहिन्दीभाषामयं भाष्यं १९८५तम ईसवीयवर्षे विलिख्य प्रकाशपदवीमनैषुः। एषा च शब्दविद्यायां शेखरायमाणस्य लघुशब्देन्दुशेखरस्य प्रस्तुतसंस्कृतहिन्दीव्याख्या तेषां पाण्डित्यप्रकर्षं द्योतयति।

एवमिमे महामनीषिणो यावज्जीवं सारस्वतसाधनासु कालक्षेपं विधाय काशीं निवसन्तः १९८७तमे ईसवीयवर्षे अगस्तमासस्य पञ्चदशदिवसे शिवसायुज्यमवापुः।



विद्यावाचस्पति आचार्यब्रह्मदत्तद्विवेदी
भू० पू० प्राचार्य, रामनिरञ्जन दास मुरारका संस्कृत कालेज
चौक, पटनासिटी (बिहार)

व्याख्याकार का मन्तव्य

लघु शब्देन्दुशेखर व्याकरण का मूर्धन्य ग्रन्थ है। इसका अध्ययन अध्यापन सर्वत्र विश्वविद्यालयों संस्थान एवं अन्य प्रान्तीय परिषदों में होता है।

इस पर विशिष्ट विद्वानों की प्राचीन अनेक टीकायें हैं। किन्तु कठिन एवं संक्षिप्त होने के कारण वर्तमान समय में अध्ययन अध्यापन के उपयुक्त एक सरल विस्तृत टीका की आवश्यकता समझ कर सरल संस्कृत में ग्रन्थ के भावों को "राधिका" नाम की संस्कृत टीका से व्यक्त किया गया है। इसमें ग्रन्थ के पदों का अर्थ भी तदनुरूप शब्दान्तर के द्वारा स्पष्ट किया गया है।

इतने पर भी दुरूह ग्रन्थ का सम्यक् बोध न होने वालों के लिये हिन्दी में भावानुवाद के द्वारा विषय विवेचन सुगम बना दिया गया है।

पुस्तक में संस्कृत हिन्दी दोनों में सरल विवेचन होने से सभी प्रान्तों में समान रूप से स्पृहणीय होगी ऐसी आशा है।

व॰ द॰ द्विवेदी
१४।१०।८६
आश्विन शु॰ १२ सं॰ २०४३

[लघु शब्देन्दुशेखर व्याकरण का मूर्धन्य ग्रन्थ है। इसका अध्ययन अध्यापन सर्वत्र विश्वविद्यालयों संस्थान एवं अन्य प्रान्तीय परिषदों में होता है।

इस पर विशिष्ट विद्वानों की प्राचीन अनेक टीकायें हैं। किन्तु कठिन एवं संक्षिप्त होने के कारण वर्तमान समय में अध्ययन अध्यापन के उपयुक्त एक सरल विस्तृत टीका की आवश्यकता समझ कर सरल संस्कृत में ग्रन्थ के भावों को "राधिका" नाम की संस्कृत टीका से व्यक्त किया गया है। इसमें ग्रन्थ के पदों का अर्थ भी तदनुरूप शब्दान्तर के द्वारा स्पष्ट किया गया है।

इतने पर भी दुरूह ग्रन्थ का सम्यक् बोध न होने वालों के लिए हिन्दी में भावानुवाद के द्वारा विषय विवेचन सुगम बना दिया गया है।

पुस्तक संस्कृत हिन्दी दोनों में सरल विवेचन होने से सभी प्रान्तों में समान रूप से स्पृहणीय होगी ऐसी आशा है।]

विषयानुक्रमणिका

संज्ञाप्रकरणम्

सूत्राणि	पृष्ठाः	सूत्राणि	पृष्ठाः
मङ्गलाचरणविमर्शः	१	ऋत्वर्णयोः	१२८
माहेश्वर सूत्राणि	११	अणुदित् सवर्णस्य	१४५
र प्रत्याहार खण्डनम्	२७	तपरस्तत्कालस्य	१४७
अन्योन्याश्रय शङ्का	३३	वृद्धिरादैच्	१५३
हलन्त्यम्	३६	भूवादयो	१५९
आदिरन्त्येन	४०	प्रागीश्वरा	१६८
हलन्त्यम्	५३	प्रादयः	१६३
आद्योच्चारणम्	६६	उपसर्गाः	१६४
प्रतिज्ञानुनासिक्याः	८२	गतिश्च	१६५
ऊकालोऽच्	८४	न वेति	१६७
उच्चैरुदात्तः	८९	स्वं रूपं	१७३
तस्यादितः	९२	येन विधिः	१७९
मुखनासिकावचनः	९४	समासप्रत्ययविधौ	१८३
तुल्यास्यप्रयत्नम्	९८	विरामोऽवसानम्	१८४
अकुहेति	१०४	परः सन्निकर्षः	१८६
प्रयत्नो द्विधा	१११	सुप्तिङन्तं	१८९
पूर्वत्रासिद्धम्	११४	हलोऽनन्तराः	१९४
वाह्यप्रयत्नः इति	१२६	ह्रस्वं लघु	१९८

अथ परिभाषाप्रकरणम्

इको गुण०	२०१	तस्मादित्युत्तरस्य	२२५
अचश्च	२०८	अलोऽन्त्यस्य	२२९
आद्यन्तौ	२०९	ङिच्च	२३०
मिदचोन्त्यात्परः	२११	अनेकाल्शित्सर्वस्य	२३१
षष्ठी स्थाने योगा	२१३	स्वरितेनाधिकारः	२३४
स्थानेऽन्तरतमः	२१६	परनित्या	२३६
तस्मिन्निति	२१९	अकृतव्यूहाः	२३९

अथ अच्सन्धिप्रकरणम्

इको यणचि	२४०	स्थानिवदा देश	२४७
अनचि च	२४५	अचः परस्मिन्	२७८

सूत्राणि	पृष्ठाः	सूत्राणि	पृष्ठाः
न पदान्त	२७९	उरण् रपरः	३१९
झलां जश्झसि	२८६	झरो झरि सवर्णे	३२४
अदर्शनं लोपः	२८७	एत्येधत्यूठ्सु	३२७
संयोगान्तस्य	२८९	उपसर्गादृति धातौ	३३१
नादिन्याक्रोशे	२९१	अन्तादिवच्च	३३२
त्रिप्रभृतिषु	२९३	खरवसानयोः	३३८
सर्वत्र	२९४	एङि पररूपम्	३४३
अचो रहाभ्यां	२९४	अचोन्त्यादि टि	३४५
हलो यमां	२९५	ओमाङोश्च	३४९
एचोऽयवायावः	२९६	अव्यक्तानुकरणस्यात्	३५०
तस्य लोपः	२९७	नाम्रेडि तस्या०	३५१
वान्तो यि प्रत्यये	२९८	झलां जशोऽन्ते	३५३
धातोस्तन्निमित्तस्यैव	३०६	अकः सवर्णे दीर्घः	३५५
क्य्यस्तदर्थे	३०९	एङः पदान्तादति	३६०
लोपः शाकल्यस्य	३११	अवङ् स्फोटायनस्य	३६१
एकः पूर्वपरयोः	३१७	इन्द्रे च	३६४
आद्गुणः	३१८		

अथ प्रकृतिभावः

प्लुतप्रगृह्या	३६६	ईदूदेद्	३८६
इकोऽसवर्णे	३६७	निपात एकाज्	३८७
ऋत्यकः	३६९	ओत्	३९१
प्रत्यभिवादे	३७१	सम्बुद्धौ	३९२
दूराद्धूते च	३७५	उञः	३९३
हैहे प्रयोगे	३७६	ऊं	३९६
गुरोरनृतो	३७८	मय उञो	३९७
अप्लुतवदुपस्थिते	३८१	ईदूतौ च	३९९
ई चाक्रवर्मणस्य	३८४	अणोऽप्रगृह्यस्य	४०२

अथ हल्सन्धिप्रकरणम्

स्तोः श्चुना	४०६	झयो होन्यतरस्याम्	४१४
न पदान्ताट्	४०७	मोऽनुस्वारः	४१५
यरोऽनुनासिके	४०९	मो राजि समः	४१७
तोर्लिः	४१२	हे मपरे वा	४१८
उदः स्थास्तम्भोः	४१३	यथासंख्य	४१९

सूत्राणि	पृष्ठाः	सूत्राणि	पृष्ठाः
नपरे नः	४२१	पुमः खय्यम्परे	४३६
ङ्णोः कुक्	४२२	नॄन् पे	४३७
डः सि धुट्	४२४	कुप्वोः	४३८
नश्च	४२५	कानाम्रेडिते	४४०
शि तुक्	४२५	कस्कादिषु च	४४१
ङमो	४२६	संहितायाम्	४४२
समः सुटि	४३०	छे च	४४२
अत्रानुनासिकः	४३०	आङ्माङोश्च	४४३
अनुनासिकात्	४३१	दीर्घात्	४४३
विसर्जनीयस्य	४३३	पदान्ताद्वा	४४४

अथ विसर्गसन्धिप्रकरणम्

विसर्जनीयस्य सः	४४५	द्वि स्त्रिश्चतुरिति	४५१
वा शरि	४४५	इसुसोः सामर्थ्ये	४५४
सोऽपदादो	४४६	नित्यं समासे	४५७
इणः षः	४४७	अधः शिरसीपदे	४५९
नमस्पुरसोर्गत्योः	४४८	इदुदुपधस्य	४५९

अथ स्वादिसन्धिप्रकरणम्

ससजुषोरुः	४६०	उञि च पदे	४७४
अतो रोरप्लुताद्	४६१	हलि सर्वेषाम्	४७५
प्रथमयोः	४६१	रोऽसुपि	४७६
नादिचि	४६२	रो रि	४७८
हशि च	४६५	ढ्रलोपे	४७८
भो भगो	४६७	विप्रतिषेधे	४८१
व्योर्लघु	४७१	एततदोः	४८७
ओतो गार्ग्यस्य	४७३	सोऽचि लोपे	४८९

वैयाकरणसिद्धान्तकौमुदीसहितः

लघुशब्देन्दुशेखरः

[संस्कृत-हिन्दीव्याख्याद्वयोपेतः]

॥ श्रीविश्वेश्वराय नमः ॥

लघुशब्देन्दुशेखरः

पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः।
शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः ॥ १ ॥

राधिका व्याख्या

वन्देऽहं जगतामीशं शङ्करं शङ्करं विभुम्।
सुश्लिष्टशेखरग्रन्थिं शिथिलीकर्तुमुद्यतः ॥ १ ॥
सरस्वतीं जगद्वन्द्यां प्रणमामि प्रसीद मे।
नागेशवचसां व्यक्तौ स्खलनं न यथा भवेत् ॥ २ ॥
सर्वतन्त्रस्वतन्त्रात् श्रीपितुर्हरिहराद्[1] गुरोः।
न्यायद्वयं शब्दशास्त्रं यतोऽधीतं नमामि तम् ॥ ३ ॥

कालो नाकलयत् कुतः कथमिदं कार्यं मया दुष्कृतम्,
दैवेनापि न वारितं न च पुनर्देवैः समाराधितैः।
लीना साऽसमये विहाय सुहृदं शश्वत्सुखे 'राधिका'[2]
राजेन्द्र[3]प्रतिबोधितः स्मृतिकृते[4] टीकां समुट्टङ्कये ॥ ४ ॥
टीका नैव विधीयते नवनवोन्मेषाय प्रेक्षावताम्,
नैवार्थः प्रतिभाविशेषदयितच्छात्रप्रबोधाय वा।
किन्त्वेतद् विषयोपनीतविषयज्ञानार्थिमन्दात्मनाम्,
सारल्येन विबोधनाय रचनाऽसूयां वृथा मा कृथाः ॥ ५ ॥

मङ्गलं विघ्नविघाताय रचयति—**पातञ्जले इति**। पतञ्जलिना निर्मितं तस्मिन्। 'शेषे' इत्यण्। सर्वेषां शास्त्रान्तराणामाचार्यैः कृतं व्याख्यानं 'भाष्यम्' आख्यायते; यथा शारीरकभाष्यम्, श्रीभाष्यम्, न्यायभाष्यम्, प्रशस्तपादभाष्यम्, साङ्ख्यप्रवचनभाष्यम्, शाबरभाष्यमेवमादीनि। पाणिनीयव्याकरणसूत्राणां व्याख्यानभूतं तु 'महाभाष्यम्' इत्यभिधीयते। तथाच महाभाष्यपदोपादानेनैव भाष्यान्तराणां व्यावृत्तौ सिद्धायाम् अव्यावर्तकस्य पातञ्जलपदस्य प्रथममुपादानं मङ्गलार्थम्। 'यद् यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा' (भ० गी० १०-४१) इति गीतावचनेन ईश्वरांशवैशिष्ट्यबोधनात् तन्नामकीर्तनश्रवणमपि वक्तुः श्रोतुश्च कल्याणायेति मन्तव्यम्।

केचित्तु पातञ्जलमहाभाष्यमिति विशिष्टं नाम वदन्ति। नाम्नः एकदेशग्रहणेनापि व्यवहारदर्शनात् 'भाष्ये स्पष्टम्' इत्याद्युक्तीनां सङ्गतिर्बोध्या।

यस्याः प्रभावान्मम मातृभाषाबोधोऽस्ति तां मातरमानमामि।
भाषानुवादेऽपि कृतप्रयत्नः साफल्यमिच्छामि तव प्रसादात् ॥ १ ॥

पातञ्जल महाभाष्य, अथवा पातञ्जल = योगसूत्र तथा महाभाष्य में जिसने पूर्ण परिश्रम किया है, जिसके पिता श्री शिवभट्ट एवं माता श्री सती देवी हैं ॥ १ ॥

---

१. महामहोपाध्यायः पं० हरिहरकृपालुद्विवेदी। २. टीकाकर्तुः धर्मपत्नी।
३. एतन्नाम्ना शिष्येण। ४. तस्याः इति शेषः।

याचकानां कल्पतरोररिकक्षहुताशनात् ।
शृङ्गवेरपुराधीशाद् रामतो लब्धजीविकः ॥ २ ॥

यद्वा चकारं विनापि समुच्चयप्रतीतेः पातञ्जले = योगशास्त्रे[1] महाभाष्ये च कृतभूरिपरिश्रम इति न पातञ्जलपदोपादानवैयर्थ्यम् । **कृतेति** । कृतो भूरि = अधिकः परिश्रमो येन स तथोक्तः । कृताधिकश्रम इत्यर्थः । ननु परिश्रमसत्त्वे ऽपि सूक्ष्मातिसूक्ष्मतत्त्वानां विवेचनं कथम् ? अत आह—**धीमान् इति** । सूक्ष्मातिसूक्ष्मतत्त्वानुसन्धानप्रतिभाविशेषशाली । **शिवेति** । शिवभट्टस्य पुत्रः । **सतीति** । सतीदेव्याः = मातुः, गर्भात् समुत्पन्नः । एतेन स्वस्य सत्कुलप्रसूनत्वं ध्वन्यते । शिवसदृशो यस्य पिता पार्वतीसदृशी यस्य मातेति भावः ।

न च साधुकार्यकारित्वप्रवृत्तिनिमित्तकस्य सच्छब्दस्य 'सन् पुरुषः' इत्येवं पुंलिङ्गेऽपि प्रयोगदर्शनात् भाषितपुंस्कत्वेन सतीशब्दस्य देवीपदेन सह कर्मधारये 'पुंवत्कर्मधारयजातीयदेशीयेषु' इत्यनेन पुंवद्भावः सतीदेव्याः इत्यत्र कुतो नेति वाच्यम्; साधुकार्यकारित्वविशिष्टतद्व्यक्तित्वस्यात्र प्रवृत्तिनिमित्तत्वात् । तथाच तद्व्यक्तित्वस्य एतद्व्यक्तिमात्रवृत्तित्वेन पुंसि एतत्प्रवृत्तिनिमित्तकस्य सच्छब्दस्य प्रयोगाभावेन अभाषितपुंस्कत्वात् पुंवद्भावस्याप्रसक्तेः । अथवा सतीं पार्वतीं दीव्यति पातिव्रत्येन जेतुमिच्छतीति व्युत्पत्त्या 'कर्मण्यण्' इत्यणि कृते उपपदसमासे च उक्तप्रयोगस्य साधुत्वेन कर्मधारयाभावात् पुंवद्भावाप्राप्तेः । न च 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' इत्यनेन कालिदासादिवत् अत्र ह्रस्वः स्यादिति वाच्यम्; बाहुलकत्वेन ह्रस्वे कृते संज्ञात्वानवगमाच्च न ह्रस्वः ॥ १ ॥

'अन्नदाता भयत्राता' इत्यादिना परिगणितेषु पञ्चविधेषु पितृषु अन्नदातुः स्मरणात् तमपि निर्दिशति–**याचकानामिति** । याचकानां कृते कल्पतरुः = देवानां वृक्षविशेषः । एतेन राज्ञः औदार्यं प्रकाशितम् । अरयः = शत्रवः एव कक्षाः=शुष्कतृणानि काननं वा, तत्र हुताशनः = अग्निः, कक्षे शुष्ककानने हुताशनः कक्षहुताशनः, अरिषु कक्षहुताशनः अरिकक्षहुताशनः इति विग्रहो वा । उभयत्र न कश्चिद् वचनीयो विशेषः । एकत्र अरिषु सबलेषु दुर्बलेषु च शुष्कतृणत्वस्य काननत्वस्य वा आरोपेण प्रतापानलस्यासहनीयतैव प्रकाश्यते । परस्मिन् विग्रहेऽपि प्रचण्डप्रतापानलस्य असहनीयतैव ध्वन्यते । एतेन राज्ञोऽपराजेयता सूचिता । अत एव न वृत्तेर्भङ्गसम्भावना । शृङ्गवेर इति । शृङ्गवेरपुरस्य एतन्नामनगरस्य अधीशात् = स्वामिनः लब्धा जीविका येन स लब्धजीविकः = प्राप्तवृत्तिकः । ननु आत्मनाम गुरोर्नाम नामातिकृपणस्य चेत्यादिना स्वनामग्रहणस्य निषेधात् कथमिदं स्वनामग्रहणम् ? इति नाशङ्कनीयम्; स्वनाम्नः उच्चारणे निषेधेऽपि लेखने तदभावात् । अतएव स्मृतौ नोच्चारयेदित्यर्थकं 'गृह्णीयात्' इति प्रयुक्तम् । तथा च स्वनामलेखने दोषाभावः । फणिनाम् ईशं = सर्पाणामधीशम्, शेषांशत्वात् पतञ्जलिमित्यर्थः ॥ २ ॥

एवं याचकों के लिये कल्पतरु के समान, शत्रुओं के लिये शुष्क तृण के समूह में धधकती आग के समान, शृङ्गवेरपुर के अधीश्वर श्रीरामसिंह से जिसने जीविका प्राप्त की है ॥ २ ॥

---

१. योगसूत्राणां प्रणेता भगवान् पतञ्जलिरेव । अत एवोक्तम्—
'योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन' इत्यादि ।

नत्वा फणीशं नागेशस्तनुतेऽर्थप्रकाशकम् ।
मनोरमोमार्द्धदेहं लघुशब्देन्दुशेखरम् ॥ ३ ॥

ग्रन्थसमाप्तिग्रन्थप्रचारादिप्रतिबन्धकदुरितप्रशमाय समुचितऋषित्रयनमस्काररूपं

नत्वेति । नागेशः = एतन्नामा ग्रन्थकारः । नत्वा = नमस्कृत्य स्वनिष्ठापकृष्टत्वप्रकारकबोधानुकूलो व्यापारो नमस्कारः । 'स्व'पदेन नमस्कर्ता गृह्यते, तन्निष्ठो यः अपकृष्टत्वप्रकारको बोधः = 'अहम् नमस्कार्यापेक्षया अपकृष्टः' इत्याकारको बोधः, तादृशबोधानुकूलः = तादृशज्ञानजनको व्यापारः = करशिरःसंयोगरूपकरचरणसंयोगादिरूपः । येन व्यापारेण आत्मनः अपकर्षः नमस्कार्यापेक्षया प्रतीयेत स एव व्यापारो नमस्कारपदार्थ इति भावः । विस्तरस्तु विजयायां द्रष्टव्यः ।

मनोरमोमार्धदेहमिति । मनोरमा = सिद्धान्तकौमुदीटीका सैव रमणीयत्वेन उमा, सा अर्धदेहो यस्य तम् । अथवा मनोरमोमायाः अर्धं द्यति=खण्डयति सा मनोरमोमार्धदा[1], तादृशी ईहा चेष्टा यस्य तम् । अथवा मनोरमा एव उमा तस्या अर्धं देहयति वर्धयति इति विग्रहे दिहधातोः कर्मणि अणि साधुः । अनेन मनोरमोक्तार्थानां विस्तरेणाभिधानं सूच्यते । द्वितीयव्युत्पत्तौ पुरुषः स्त्रियाः उक्तिं स्वीकरोति नचापि मन्यते, एवमिहापि अंशविशेषं मन्यते अंशविशेषं च नानुमन्यते इति ध्वन्यते । लघवः शब्दा एव इन्दुः = चन्द्रः अर्थप्रकाशकत्वसाधर्म्यात् शब्दे चन्द्रत्वारोपः, स एव शेखरः प्रधानं यस्मिन् तं लघुशब्देन्दुशेखरम् = एतन्नामकं ग्रन्थविशेषम् । अर्थप्रकाशकम् = अधिकार्थबोधकम् ।

तन्त्रेण द्वितीयोऽप्यर्थः सम्भवति । मनोरमा = रमणीया या उमा = पार्वती सैव अर्धदेहोऽर्धशरीरं यस्य तम् । अर्धनारीश्वरत्वात् श्रीभगवतः शङ्करस्यार्धशरीरमूला पार्वतीति तात्पर्यम् । लघुशब्देति । शब्द इव इन्दुः शब्देन्दुः, लघुश्चासौ शब्देन्दुः एककलात्मकश्चन्द्रः शेखरे मस्तके, शिखरः = अलङ्कारभूतो वा यस्य तं फणीशं शिवं नत्वा इति ॥ ३ ॥

ग्रन्थेति । प्रारब्धस्य ग्रन्थस्य समाप्तिः = पर्यवसानम्, प्रचारः = प्रचलनम् । आदिपदेन परैरनुपहसनीयत्वमस्य संग्राह्यम् । पूर्वोक्तानामेषां प्रतिबन्धकानि यानि दुरितानि=

एवंभूत नागेश भट्ट फणीश पतञ्जलि को नमस्कार करके मनोरमा=सिद्धान्तकौमुदी की टीका रूपी उमा के अर्द्धांश खण्डनात्मक प्रवृत्तिशील अर्थबोधक लघुशब्देन्दुशेखर नामक ग्रन्थ की रचना करते हैं ।

अथवा तंत्र से लघु=कलात्मक शब्दरूपी इन्दु = चन्द्रमा, शेखर = शिरोभूषण रूप से धारण करने वाले भगवान् चन्द्रशेखर को नमस्कार करना यहाँ द्वितीय अर्थ विवक्षित है । मनोरमा = मनोहर जो उमा = पार्वती वे ही अर्द्ध देह = अर्द्ध शरीर जिसकी हैं—इस प्रकार इसका द्वितीय पक्ष में अर्थ है ।

शास्त्रान्तर के भाष्य महाभाष्य न होने के कारण महाभाष्य पद से गृहीत न होने से व्याकरण महाभाष्य का ही ग्रहण प्राप्त होता है । अतः 'पातञ्जल' पद के उपादान का प्रयोजनान्तर न होने से मङ्गलार्थक मानना चाहिये ॥ ३ ॥

---

१. **दोऽवखण्डने इत्यस्मात् आत्वे कृते आतोऽनुपसर्गे कः इत्यनेन कप्रत्यये धातुघटकाकारलोपे टापि एतस्य सिद्धिः ।**

वैयाकरणसिद्धान्तकौमुदी

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥

मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति—मुनित्रयमिति । कारकविभक्तेर्बलवत्त्वाद् द्वितीया ।

पापानि तेषां प्रशमनाय = शान्तये समुचितं योग्यम् । व्याकरणशास्त्रप्रवर्तकत्वाद् ऋषित्रय-प्रणामस्य समुचितत्वं ज्ञेयम् । पाणिनिकात्यायनपतञ्जलिरूपमुनित्रयस्य नमस्काररूपं = प्रणतिस्वरूपं मङ्गलम् आचरन् = कुर्वन् शिष्यशिक्षायै = शिष्या अप्येवं कुर्युरिति बोधनाय व्याख्यातृश्रोतृणां=सिद्धान्तकौमुद्या आशयं विवरीतुकामानां तदाकर्णयताञ्च । न च व्याख्यातारश्च श्रोतारश्चेति विग्रहे द्वन्द्वे समासे 'आनङ् ऋतो द्वन्द्वे' इत्यनेन आनङादेशः प्राप्नोतीति वाच्यम्; समासघटकपदयोरुभयोः विद्यासम्बन्धवाचिनोः योनिसम्बन्ध-वाचिनोरेव वा सत्त्वे आनङ्प्रसक्तेः । यथा 'मातापितरौ' इत्यादौ । अत्र तु श्रोतृपदस्य तथाविधत्वाभावात् न तस्य प्रसङ्गः । एवञ्च तेषामनुषङ्गतः = अन्यफलेच्छया प्रवृत्तस्य प्रयासं विनैव फलान्तरेण सम्बन्धः अनुषङ्गः । यथा आम्रफलेच्छया आम्रवृक्षं समारोपयतः प्रयासं विनैव फलेन सहच्छायागन्धादिसम्बन्धोऽनुषङ्गः, तदुपलब्धिश्च अनुषङ्गतो जाता । तथात्रापि निर्विघ्नग्रन्थसमाप्ति-प्रचारादिप्रतिबन्धकदुरितप्रशमनाय कृतं मङ्गलं व्याख्यातृणां श्रोतृणाञ्च अनुषङ्गतो मङ्गलायापि जायमानं निबध्नाति=ग्रन्थघटकीकरोति ।

मुनित्रयमिति । नन्वत्र नमःपदार्थेन सह मुनित्रयस्य योगस्य सत्त्वात् 'हरये नमः' इत्यादाविव 'नमः स्वस्तिस्वाहा' इत्यादिना मुनित्रयपदे चतुर्थी स्यादिति चेन्न; उपपद-विभक्तेः कारकविभक्तिर्बलीयसीति परिभाषया बलीयस्या कारकविभक्त्या बाधितत्वात् न उपपदविभक्तिश्चतुर्थी भवति; "स्वं रूपम्" इति सूत्रेण 'नमःस्वस्ती'त्यादौ स्वरूपभूतस्यैव नमःपदार्थत्वेन विवक्षितत्वात् समीपस्थपदनिमित्तिका विभक्तिः उपपदविभक्तिः । क्रिया-निष्ठविशेष्यतानिरूपितक्रियाकारकभावसम्बन्धावच्छिन्नप्रकारताप्रयोजिका विभक्तिश्च कारकविभक्तिरभिधीयते, धात्वर्थफलानिष्ठा या विशेष्यता तन्निरूपिता क्रियाकारकभावेन कर्मतासम्बन्धेन अवच्छिन्ना या तण्डुलदेवादिनिष्ठा प्रकारता तत्प्रयोजिका विभक्तिः द्वितीया कारकविभक्तिः । एवमन्यत्राप्यनुसन्धेयम् । तदाह **कारकविभक्तेर्बलवत्त्वादिति ।**

न च स्त्रीलिङ्गेन विभक्तिशब्देन सह सामानाधिकरण्यात् बलवती-शब्दात्परं भावेऽर्थे त्वप्रत्यये कृते पञ्चमीविभक्तौ बलवतीत्वादिति वक्तुमुचितमिति वाच्यम्; 'कृत्तद्धित-

---

ग्रन्थसमाप्ति, ग्रन्थ-प्रचार आदि में बाधक, पापप्रयुक्त विघ्न के विनाश के लिये योग्य मुनित्रय को नमस्कार रूप मङ्गल करते हुए अध्यापक श्रोता दोनों के आनुषङ्गिक कल्याण के लिये **मुनित्रयमित्यादि** पद्य का उल्लेख किया गया है । 'मुनित्रय' पद से 'नमः' पद के योग में 'नमः स्वस्ति' इत्यादि सूत्र से चतुर्थी विभक्ति की व्यावृत्ति का उपाय लिखते हैं—**कारकविभक्तेरिति** । उपपद विभक्ति से कारक विभक्ति बलवान् होती है । समीपोच्चारितपदनिमित्तक विभक्ति 'उपपद विभक्ति' तथा क्रियाकारकसम्बन्धमूलक विभक्ति 'कारक विभक्ति' कही जाती है ।

समासः सम्बन्धाभिधानं भावप्रत्ययेन' इति वार्त्तिकात् त्वप्रत्ययान्तेन बलवत्त्वशब्देन बलसम्बन्धस्यैव प्रतीतेः; बलसम्बन्धस्य स्त्रीषु पुंसु च साधारण्यात् ङीपमकृत्वाऽपि बलवच्छब्देन त्वप्रत्यये तादृशरूपनिष्पत्तौ बाधकाभावात्। अत एव गन्धवत्त्वं पृथिव्या लक्षणमुच्यते, अन्यथा विशेष्यानुरोधात् तत्रापि गन्धवतीत्वमिति वक्तुमुचितम्।

अथवा—यथा पूर्वं स्त्रीत्वाविवक्षया (लिङ्गसामान्यविवक्षया) कुक्कुटस्य अण्डपदेन सह समासं कृत्वा कुक्कुटाण्डमिति प्रयोगे निष्पन्ने कुक्कुटस्य अण्डासम्भवेन सामर्थ्यात् कुक्कुट्याः प्रतीतिः, समासोत्तरं पदार्थैकदेशत्वेन तत्र स्त्रीत्वविवक्षाया अभावेन ङीपः कर्तुमशक्यत्वात्; तथेहापि पूर्वं लिङ्गसामान्यविवक्षया त्वप्रत्यये कृते पश्चात् वृत्तस्य समासादिवृत्तिनिष्पन्नस्य विशेषणयोगो नेति नियमात् एकदेशे स्त्रीत्वान्वयस्यासम्भवात् ङीप् न भवति।

न च नमःपदार्थस्य मुनित्रयेण सह सम्बन्धे चतुर्थी कृधात्वर्थफलेऽन्वयविवक्षायां द्वितीया प्राप्नोतीति विषयभेदाद् द्वितीयाचतुर्थ्योः युगपत् प्राप्तिरेव नेति कथं तयोः परस्परं बाध्यबाधकभावश्चर्चितः इति वाच्यम्; नमःशब्दस्य निपातत्वेन द्योतकतया द्योतकवाचकानां यत्र समभिव्याहारः तत्र एकान्तरप्रयोज्यत्वस्य निश्चये हेत्वभावात् विषयतायामुभयप्रयोज्यत्वस्य स्वीकारात्। 'नमःस्वस्ति' इत्यस्य नमःपदप्रयोज्यविषयतानिरूपिता या विषयता तत्प्रयोजकत्वेन तात्पर्यविषयीभूतात् चतुर्थी—इत्यर्थसत्त्वेन कृधात्वर्थफले मुनित्रयस्यान्वयस्य विवक्षणेऽपि विषयतायामुभयपदप्रयोज्यत्ववशात् नमःपदप्रयोज्यविषयतया निरूपिता या विषयता तत्प्रयोजकत्वेनापि तात्पर्यभूतं मुनित्रयपदमस्त्येवेति चतुर्थी प्राप्तैव इत्याशयेन बाध्यबाधकभावविचारो नानौचितीमावहति।

केचित्तु 'नमःस्वस्ति' इति सूत्रे स्वस्तिसाहचर्यात् नमःपदं स्वरादिमात्रपठितमेव गृह्यते। तद्योगे एव सूत्रेणानेन चतुर्थीविधानात् प्रकृते नमस्कृत्येत्यत्र ल्यपः उत्पत्तये समासार्थं नमःपदस्य साक्षात्प्रभृतिगणेऽपि गतिसंज्ञार्थं पठितत्वेन स्वरादिगणमात्रपठितत्वाभावान्न मुनित्रयपदाच्चतुर्थी। नन्वेवं 'रावणाय नमस्कुर्यात्' इति भट्टिप्रयोगे चतुर्थी न स्यात्, 'नमस्पुरुषोर्गत्योः' इत्यनेन सत्वविधानार्थमपेक्षितायाः गतिसंज्ञायाः सिद्धये साक्षात्प्रभृतिगणे पाठस्यावश्यकतया स्वरादिगणमात्रपठितत्वाभावात् इति चेत्? न तत्र **जयमङ्गला**टीकानुसारेण सविसर्गस्यैव नमःकुर्यादिति पाठस्य सत्त्वेन साक्षात्प्रभृतिगणे तस्य पाठानङ्गीकारात्। नच स्वयम्भुवे नमस्कृत्येत्यत्र कथं चतुर्थी, तत्र 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति सूत्रेण ल्यपो विधानाय समासस्य आवश्यकतया 'कुगतिप्रादयः' इत्यनेन विहितसमासे गतेरपेक्षिततया तत्सम्पादनाय साक्षात्प्रभृतिगणे पाठस्यावश्यकत्वेन स्वरादिगणमात्रपठितत्वाभावात् चतुर्थी न स्यादिति नाशङ्कनीयम्; स्वयम्भुवमनुकूलयितुमित्येवं स्वीकृत्य 'क्रियार्थोपपदस्य च' इत्यनेन चतुर्थ्या उपपादनात् इति वदन्ति। 'नमोवरिवश्चित्रङः क्यच्' इति सूत्रे नमस्यति देवान् इत्यत्र चतुर्थीमाशङ्क्य उपपदविभक्तेरिति परिभाषया भाष्ये समाहितम्, तदनुरोधेन शेखरोक्तं समाधानमिति मन्तव्यम्।

परिभाव्येति। तच्छब्द बुद्धिविषयीकृत पदार्थ का बोधक माना गया है। अतः 'तदुक्तीः' इसमें तत् शब्द का प्राचीन अर्थ होने से 'प्राचीनों के अर्थों का तिरस्कार करके'—ऐसा अर्थ होता है, क्योंकि 'परिभाव्य' का तिरस्कार अर्थ में प्रयोग है। अथवा 'विचार्य' ऐसा भी परिभाव्य का

परिभाव्येति । **तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात् प्राचामुक्तीस्तिरस्कृत्येत्यर्थः । मुनित्रयोक्तीर्विचार्येत्यर्थो वा । 'परिभावस्तिरस्क्रिया' (अ० को० १ । ७ । २२) इति कोशात्तिरस्कारार्थकस्य धातोर्विचारार्थकत्वेऽपि न बाधकम्; धातूनामनेकार्थत्वात् । अत एव 'परौ भुवोऽवज्ञाने' (३ । ३ । ५५) इति सङ्गच्छते ।**

तदुक्तीः = तेषां प्राचीनानामुक्तीः वचनानि । तच्छब्दो बुद्धिस्थपदार्थं परामृशति । प्राचीनाः प्रकृते दीक्षितबुद्धिस्थत्वेन तत्पदेन ते एव परामृश्यन्ते । न च बुद्धिस्थानां पदार्थानां बहुत्वात् नानाधर्मावच्छिन्ननिरूपितशक्त्याश्रयणेन तत्पदस्य नानार्थतापत्तिरिति वाच्यम्; बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने तत्पदस्य शक्तेरभ्युपगमात्; बुद्धिविषयतावच्छेदकत्वस्य शक्यतावच्छेदकतावच्छेदकस्य धर्मस्य ऐक्यात् न नानार्थत्वप्रसङ्गः । तस्य चोपलक्षणत्वात् शाब्दबोधे मानमपि न । यो हि बुद्धिविषयः तस्मिन् बुद्धिविषयता वर्तते, तदवच्छेदकं = घटपटादौ बुद्धिविषये घटत्वपटत्वादिकं तत्र एकमवच्छेदकत्वं तेन उपलक्षिता धर्मास्त एव घटत्वपटत्वादिरूपाः, तदवच्छिन्ने घटघटादौ तत्पदस्य शक्तिरिति न नानार्थतापत्तिः ।

परिभाव्य = तिरस्कृत्य इत्यर्थः । न च परिपूर्वकात् भूधातोः घञ्प्रत्ययेन निष्पन्नस्य 'परिभावस्तिरस्क्रिया' इति कोशात् तिरस्कारार्थकत्वप्रतीतावपि णिजन्तेन भूधातुना प्रयोजकव्यापारस्यात्र अभिधानात् तिरस्कार्यं इत्येवं वक्तव्ये तिरस्कृत्य इत्यर्थाभिधानं न युक्तमिति वाच्यम्; घञन्तपरिभावशब्दात् 'तत्करोति तदाचष्टे' इत्यनेन णिचि परिभावयति तिरस्कारं करोतीत्यर्थे निष्पन्नस्य ल्यबन्तस्य परिभाव्येत्येतस्य फलितार्थबोधनपरतयाऽस्य योजयितुं शक्यत्वात् ।

अथवा तदुक्तीः परिभाव्य इत्यस्यार्थान्तरम् आवृत्त्या कल्पनीयम्; तत्पदस्य प्रक्रान्तपरामर्शित्वात् । तेन मुनित्रयं परामृश्यते । परिभाव्येत्यस्य विचार्य इत्यर्थः । तिरस्कारार्थकस्यापि धातोः विचारार्थे पर्यवसानं भवितुमर्हति, धातूनामनेकार्थत्वात् । नहि यस्मिन्नर्थे यो धातुर्निर्दिष्टः स एव तस्यार्थः; तथा सति 'परौ भुवोऽवज्ञाने' इति सूत्रे अवज्ञानपदोपादानस्य वैयर्थ्यं स्यात् । अनेन सूत्रेण अवज्ञाने वर्तमानात् परिपूर्वकभूधातोः घञ् प्रत्ययो विधीयते । परिपूर्वकभूधातुर्यदि तिस्काराऽर्थे नियतः, तदा व्यभिचारावारकत्वेन तद्विशेषणोपादानस्य नैष्फल्यात् धातूनामनेकार्थत्वं तेन कल्प्यते । तथा च अन्यार्थस्यापि सम्भावनया तत्र घञो वारणाय अवज्ञानग्रहणस्य सार्थक्यमुपपन्नम् । नच विचारार्थे परिभाव्येति शब्दस्य प्रयोगोऽप्रसिद्धः 'अस्यां वृणीष्व मनसा परिभाव्य कञ्चित् यं चित्तवृत्तिरनुधावति तावकीना(नै०च०, ११-८)इति महाकविश्रीहर्षस्य प्रयोगे एव प्रसिद्धत्वात् ।

अर्थ है । इस पक्ष में 'मुनित्रयोक्तीः' ऐसा अर्थ 'तदुक्तीः' का विवक्षित है । तत् शब्द पूर्ववत मुनित्रय का परामर्शक है । यद्यपि अमरकोष में 'अनादरः परिभवः परिभावस्तिरस्क्रिया' (अ०को० १-७-२२) इसके अनुसार 'परि' पूर्वक 'भू' धातु का तिरस्कार अर्थ प्रतीत होता है । तथापि 'धातु अनेकार्थक हैं'–इसके अनुसार विचारार्थक मानने में भी कोई बाधक नहीं है । यदि परिपूर्वक भू का तिरस्कार ही अर्थ निश्चित रहता तो 'परौ भुवोऽवज्ञाने' इस सूत्र में 'अवज्ञाने' ग्रहण करने की क्या आवश्यकता थी ! अवज्ञान = तिरस्कार अर्थ में इसका प्रयोग निश्चित होने से अर्थान्तर की सम्भावना ही नहीं थी । अतः इसके ग्रहण से यह प्रमाणित होता है कि धातु निश्चित अर्थ से भिन्न

एतेन स्वग्रन्थस्य प्राचीनग्रन्थैरगतार्थता समूलत्वञ्च ध्वनितम्।

भाविनोऽपि बुद्धचा विषयीकरणादियमिति निर्देशः।

सिद्धान्तप्रकाशकत्वेनातिदुरूहग्रन्थान्तरेभ्यः सिद्धान्तज्ञाने जायमानस्य क्लेशरूप-सन्तापस्य शामकत्वेन च कौमुदीसादृश्यम्।

न च कोशेन नाम्नोऽर्थस्य लिङ्गस्य च निर्णयेन धात्वर्थनिश्चयो नोचितः, अत एव 'अनादरः परिभवः परिभावस्तिरस्क्रिया' इत्येवं परिभवपरिभावयोरुभयोरुपादानं कृतम्; अन्यथा धातोरेव तिरस्कारार्थकत्वे उभयत्र भूधातोः प्रयोगेण अन्यतरोपादानेनापि द्वयो-रर्थावगतेः सम्भवात् परिभवपरिभावयोरुभयोरर्थनिर्देशो वृथा स्यात्। तथा च घञन्तस्य तिरस्कारार्थकत्वौचित्यात् भूधातोः तिरस्कारार्थकत्वकथनं न युक्तमिति वाच्यम्; पङ्क्तेः वक्ष्यमाणरीत्या योजनेन अनुपपत्त्यभावात्। तिरस्कारार्थकस्य = तिरस्कारार्थकत्वेन विवक्षितस्य धातोः विचारार्थकत्वे न किमपि बाधकम्। अत्र हेतुं निर्दिशति-कोशात्—**धातूनामनेकार्थत्वाच्च।** कोशेन परिभवपरिभावयोरेव तिरस्कारार्थकत्वं बोधितम्, न तु तद्भिन्नस्य परिभाव्य इत्यादेः। अनेकार्थत्वाच्च विचार्य इत्यर्थेऽपि तस्य प्रयोगो नानुपपन्नः।

एतेन इति। आवृत्त्या अर्थद्वयकरणेन। प्रथमार्थेन प्राचीनोक्तिखण्डनद्वारा नवी-नार्थप्रतिपादनेन प्राचीनग्रन्थैरस्यागतार्थता सूचिता। द्वितीयार्थेन मुनित्रयोक्तीनां तत्त्वाव-धारणपूर्वकं ग्रन्थप्रणयनमित्यस्य समूलत्वं ध्वनितम्। अगतार्थता समूलत्वञ्च ध्वनित-मिति मूले कृतः प्रयोग एवं समर्थनीयः—ध्वनिता च ध्वनितं च ध्वनितम् इति। 'नपुंसकमनपुंसकेन' इत्यादिना नपुंसकस्य शेषे एकवद्भावे च तस्य साधुत्वं बोध्यम्।

'इदमः सन्निकृष्टे' इत्याद्यभियुक्तोक्त्या इदंशब्दस्य सन्निकृष्टार्थबोधकतया कौमुदी-ग्रन्थस्य अद्यावधि अनिष्पत्तेः कथम् इदंपदेनाभिधानम् कौमुदीयमिति आशङ्कायामाह—**भाविनोऽपीति।** ग्रन्थस्येति बोध्यम्। सिद्धान्तकौमुद्याः बाह्यसत्ताविरहेऽपि बुद्धिसन्नि-विष्टायाः तस्याः अन्तःसत्तामाश्रित्य इयमिति निर्देशः।

सिद्धान्तेति। सिद्धान्तस्य[1] = निर्णीतार्थस्य प्रकाशकत्वेन बोधकत्वेन अतिदु-रूहाणि = दुर्बोधानि यानि ग्रन्थान्तराणि = अन्यपुस्तकानि महाभाष्यादीनि, तेभ्यो

अर्थ में भी प्रयुक्त होते हैं। 'परिभाव्य कञ्चित् यं चित्तवृत्तिरनुधावति तावकीना' (नै० का० ११-८) यह हर्ष का प्रयोग विचार अर्थ में किया गया उपपन्न होता है। प्राचीनों की उक्तियों के खण्डन द्वारा प्राचीन ग्रन्थों से इस ग्रन्थ की अगतार्थता एवं मुनित्रयों की उक्तियों के परिशीलन द्वारा इस ग्रन्थ की प्रामाणिकता ध्वनित होती है। 'इदम्' अर्थ का सन्निकृष्ट में प्रयोग किया जाता है, यथा—अयं देवदत्तः। यहाँ सिद्धान्तकौमुदी ग्रन्थ निर्माणाधीन होने से सन्निकृष्ट नहीं है, अतः '**कौमुदी इयं विरच्यते**' यहाँ इदम् का प्रयोग युक्तिसङ्गत नहीं है? इस शंका का समाधान करते हैं—**भाविनोऽपीति।** बाह्य रूप से भावी होने पर भी ग्रन्थ के पदार्थों के बुद्धिविषय के रूप में वर्तमान होने से उसी का '**इयम्**' इस शब्द से परामर्श किये जाने से उक्त दोष नहीं है।

'चन्द्रिका कौमुदी ज्योत्स्ना' (अ० को० १-३-१६) इस अमरकोष के अनुसार 'कौमुदी' का चन्द्रकिरण अर्थ है। जिस प्रकार चन्द्रमा की किरणों से लौकिक विषय का प्रकाश सन्ताप-

---

१. **वादिप्रतिवादिभ्यां निर्णीतोऽर्थः सिद्धान्तः—इति न्यायसूत्रम्।**

अनेन वैयाकरणसिद्धान्ता विषयाः, तज्ज्ञानं प्रयोजनम्, तज्जिज्ञासुरधिकारीत्यादि सूचितम्।

निर्णीतार्थबोधे सम्पादनीये जायमानस्य = अनुभूयमानस्य क्लेशरूपसन्तापस्य = दुःखस्य शामकत्वेन = निरोधकत्वेन कौमुद्या = चन्द्रिकया सह सिद्धान्तकौमुद्याः सादृश्यम् = साम्यम्। तथा च कौमुदीसादृश्यविशिष्टे कौमुदीपदं लाक्षणिकमित्युपमालङ्कारो ध्वन्यते।

न च 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' इत्यनेन वृद्धेः प्रतिषेधात् शम्धातोः ण्वुल्प्रत्यये निष्पन्नस्य शमकशब्दस्य त्वप्रत्यये शमकत्वमिति रूपेण भाव्यमिति वाच्यम्; चिणि ञिति कृति चैव वृद्धेः प्रतिषेधात् शमकशब्देन स्वार्थे अणि वृद्धौ तादृशरूपसिद्धौ बाधकाभावात्।

कार्यमात्रे प्रवृत्तिं प्रति बलवता अनिष्टेन असम्बद्धम्, ममेष्टस्य साधनं मदीयकृत्या = प्रयत्नेन साध्यमिति ज्ञानत्रयं प्रवर्तकम्। अत एव विषमिश्रितमिष्टान्नभोजने, जलताडने, सुमेरुशृङ्गानयने च न प्रवृत्तिः; तत्र क्रमेण बलवदनिष्टानुबन्धित्वस्य, निष्प्रयोजनत्वस्य, कृत्यसाध्यत्वस्य च ज्ञानस्य प्रवृत्तिप्रतिबन्धकस्य सत्त्वात्। प्रवृत्तौ निमित्तानामेषां ज्ञानमनुबन्धचतुष्टयज्ञानादेव जायते। ग्रन्थाध्ययने प्रवृत्तेः प्रयोजकं यद् ज्ञानं तद्विषयत्वम् अनुबन्धसामान्यलक्षणम्। अनुबन्धश्च विषयसम्बन्धाधिकारिप्रयोजनभेदात् चतुर्विधः। तत्र विषयनिर्देशेन इष्टसाधनत्वस्य कृतिसाध्यत्वस्य च ज्ञानं जायते। तत्र विषयः इष्टसाधनत्वप्रकारके कृतिसाध्यत्वप्रकारके च ज्ञाने भासते; विशिष्टबुद्धौ विशेष्यतावच्छेदकधर्मप्रकारकनिश्चयस्य हेतुत्वात्। यथा घटत्वविशिष्टघटबुद्धौ विशेष्यतावच्छेदको धर्मः घटत्वं तत्प्रकारकं ज्ञानं हेतुर्भवति। प्रयोजनज्ञानेनापि इष्टसाधनत्वं ज्ञायते। विषयेण सह ग्रन्थस्य कः सम्बन्धः—एतद्विषयकं ज्ञानमपि आवश्यकम्; अन्यथा असम्बद्धे इष्टसाधनता न प्रतीयेत। अतोऽनुबन्धनिर्देशस्यावश्यकत्वेन तदादौ निर्दिशति—**अनेन** इति। सिद्धान्तकौमुदीग्रन्थेन।

वैयाकरणसिद्धान्ता इति। वैयाकरणानां ये सिद्धान्ताः = प्रक्रियासम्बन्धिनो निर्णीतार्थाः, ते विषयाः = प्रतिपाद्या इत्यर्थः। वैयाकरणानां स्फोटादिसिद्धान्ताः नात्र विवक्षिताः, किन्तु प्रक्रियासिद्धान्ताः; यस्य ज्ञानं ग्रन्थाध्ययनप्रवृत्तिप्रयोजकं स विषय इति नियमात्। सिद्धान्तज्ञानञ्च प्रयोजनम्।

निवर्तन के साथ होता है, उसी प्रकार इस ग्रन्थ से सिद्धान्त का अर्थात् प्रक्रिया का ज्ञान एवं ग्रन्थान्तर से जायमान क्लेश की निवृत्ति होने से कौमुदी के साथ इस ग्रन्थ की तुलना की गयी है। अर्थात् कौमुदी के सादृश्य से ग्रन्थ में कौमुदी का प्रयोग लक्षणा से है।

अनेनेति। सिद्धान्तकौमुदी में वैयाकरणसिद्धान्त विषय है, वैयाकरणसिद्धान्त का ज्ञान प्रयोजन है, इसकी जिज्ञासा करने वाला व्यक्ति अधिकारी है—इस प्रकार सूचित होता है। प्रवृत्ति का प्रयोजक ज्ञान, सिद्धान्तज्ञान है अतः उस ज्ञान का विषय सिद्धान्त होने से वह विषय है। 'यमधिकृत्य प्रवर्तते तत्प्रयोजनम्'—इसके अनुसार वैयाकरणसिद्धान्त ज्ञानप्रयोजन उचित ही है। जिज्ञासु अधिकारी है—यह शेखरोक्ति भी अखण्डनीय है; क्योंकि असाधारण अधिकारी का निर्देश किया गया है। शास्त्रान्तराध्ययन में जिस साधारण अधिकार की चर्चा है उसका निषेध यहाँ

अथ संज्ञाप्रकरणम्

१. अइउण् । २. ऋऌक् । ३. एओङ् । ४. ऐऔच् । ५. हयवरट् ।

अइउण् (मा० सू० १) । **एषां क्रमबोधकत्वेऽपि 'आदिरन्त्येन' (१।१।७१) इत्य-**

यत्तु यदेव उद्देश्यं तदेव प्रयोजनं न भवतीति व्याहृतम्, तन्न मनोरमम्; तत्त्वज्ञानस्य उद्देश्यम् आत्यन्तिकदुःखनिवृत्तिः, तदेव च प्रयोजनमपि, मोक्षरूपत्वात् । तदुक्तम्—"तदत्यन्तविमोक्षोऽपवर्गः" (न्या० सू० १-१-११) इति ।

यदपि व्याकरणाध्ययनस्य प्रयोजनत्वेन भाष्ये उक्तानि रक्षोहागमलघ्वादीनि इह प्रयोजनत्वेन निर्देष्टव्यानि ? तदपि न, रक्षोहागमादि न व्याकरणस्य साक्षात् प्रयोजनम्, अपितु प्रयोजनप्रयोजनम् । शब्दानुशासनम् । असाधुशब्देभ्यो विविच्य साधुशब्दानामन्वाख्यानं व्याकरणस्य साक्षात् प्रयोजनम् । तथा च तस्य बोधाय यस्य कस्यापि ग्रन्थस्याध्ययने प्रवृत्तिर्न वारिता भवेत्; प्रयोजनप्रयोजनस्य रक्षोहागमादेः ग्रन्थान्तरेणापि सम्भवात् । अतः कौमुद्याः असाधारणः प्रतिपाद्यविषयः सिद्धान्तरूपा प्रक्रिया । एतस्याः प्रक्रियायाः आयासं विना ज्ञानं एतद्ग्रन्थाध्ययनप्रयोजनम्, अत्र किमनौचित्यम् ! सिद्धान्तज्ञानाय जिज्ञासुजनः कौमुदीमध्येतुं प्रवर्तेत । वैयाकरणसिद्धान्तं जिज्ञासमानोऽस्य ग्रन्थस्याध्ययने अधिकारीति शेखरोक्तिः साध्वी ।

ननु अधीतकाव्यकोशो द्विजोऽधिकारीति युक्तम् ? प्रक्रियाज्ञाने द्विजमात्रस्याधिकारो नान्यस्येत्यत्र मानाभावात् । यद्येवं न मन्येत तदा वाल्मीकीयरामायणे किष्किन्धाकाण्डे 'बहु व्याहरताऽनेन' (कि० का०, स० ३, श्लो० २९) इत्यादिश्लोकेन हनुमतो व्याकरणज्ञानप्रदर्शनमसङ्गतं स्यात् । नासौ द्विजः, किन्तु वानरदेहधारी देवो वा वक्तुं शक्यते । न च सिद्धान्तकौमुदीमात्रपठने द्विजानामेवाधिकारः, अन्यथा व्याकरणज्ञानं तु न वार्यते इति विचारासहम्; महाभाष्यं पत्रेषु लिखित्वा कश्चित् पिशाचः रक्षितवान्—इत्यस्याः कथायाः अपि प्रचलितत्वात् द्विजमात्रस्य अधिकारार्हत्वस्यानौचित्यात् । कृतिसाध्यत्वज्ञानाभावादेव अनधीतकाव्यकोशादीनामत्र प्रवृत्त्यसम्भवाद् विशेषाग्रहे—तत्तच्छास्त्रविषयजिज्ञासाया एव तत्तच्छास्त्रग्रन्थविशेषाध्ययने असाधारणहेतुत्वेन साधारणस्य शास्त्रान्तराध्ययनेऽपि कारणस्य द्विजपदस्यानुपादानं न्यूनतां नावहति इति वृथैव चिन्ताग्रासः । ब्राह्मणमग्रे कृत्वा अन्योऽपि पठितुमर्हतीति पक्षान्तरेणापि चिन्ता निरसनीया ।

किञ्च तन्निवेशो निर्मूल एव । सर्वत्र समर्थस्यैव प्रवृत्तिदर्शनात् । तद्धि नान्तरीयकतया प्रविष्टमेवेति न पृथक् वचनीयतामर्हति । मानवमात्रस्य गङ्गातरणे अधिकारसत्त्वेऽपि ज्वरितः तरणानभिज्ञो न उत्तितीर्षति; तेन किं तदधिकारे ! शब्दतः तद्विरहो निवेश्यते । तस्मात् यत् किञ्चिदेतत् ।

अइउण् इति ।

विवक्षित नहीं है । 'श्रावयेत् चतुरो वेदान्'—इसके अनुसार मुख्य द्विज को मानकर सभी अधिकारी हैं ।

शङ्का—संज्ञा, परिभाषा, विधि, नियम, अतिदेश तथा अधिकार —इस प्रकार परिगणित छः सूत्र-भेदों में 'अ इ उ ण्' इत्यादि चतुर्दश सूत्रों का किस में अन्तर्भाव है ?

६. लण् । ७. ञमङणनम् । ८. झभञ् । ९. घढधष् । १०. जबगडदश् ।

नेनैकवाक्यतया वृत्तिपरिच्छेदकत्वेनास्य सञ्ज्ञासूत्रत्वम्; क्रमस्य सञ्ज्ञाद्वारणैवोपयोगात् ।

"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते" ॥

इत्यभियुक्तोक्तिदिशा षड्विधेषु सूत्रेषु मध्ये 'अइउण्' इत्यादिमाहेश्वरसूत्राणां कस्मिन् सूत्रभेदे अन्तर्भावः ? इति शङ्कां समाधातुमाह—**एषामिति** । अ इ उ इत्यादिवर्णानामित्यर्थः । **क्रमेति** । क्रमशब्दो अर्शआद्यजन्तत्वेन क्रमवदर्थपरः । तथाच क्रमवतां वर्णानां बोधकत्वेऽपि ।

केचित्तु क्रमेण श्रावणप्रत्यक्षजनकत्वेऽपि क्रमे शक्तेरभावेन क्रमबोधकत्वासम्भवात् न च तत्र क्रमेण उपस्थितिजनकत्वं क्रमेण शक्तिज्ञानजनकत्वमिति बहुधा विकल्प्य मूलं दूषयितुं प्रायतन्त । तन्मुधैव; तादृशार्थस्याविवक्षणात् । क्रमपदस्य क्रमवत्परत्वेन पूर्वोक्तविकल्पानवकाशात् ।

आदिरन्त्येनेति । अनेन सूत्रेण सह 'अइउण्' इत्यादिमाहेश्वरसूत्राणाम् **एकवाक्यतया** । आद्यन्तपदयोरर्थनिर्णयस्य 'अइउण्' इत्यादिसूत्राधीनतया प्रामाणिकबोधोपकारकत्वसादृश्येन गौण एकवाक्यताशब्दप्रयोगः । एकवाक्यता च क्वचित् वाक्यैकवाक्यता, क्वचित् पदैकवाक्यता । उपजीव्योपजीवकभावापन्नबोधजनकत्वं वाक्यैकवाक्यता । यथा संज्ञासूत्राणां वाक्यार्थबोधः उपजीव्यः, संज्ञापदार्थज्ञानाधीनत्वेन विधिवाक्यार्थबोधः उपजीवकः । अतः उपजीव्योपजीवकभावापन्नबोधजनकत्वमिति । परस्परनिरूप्यनिरूपकभावापन्नविषयताप्रयोजकपदघटितत्वरूपा पदैकवाक्यता, यथा 'इको गुणवृद्धी' 'मिदेर्गुणः' इत्यनयोः पृथक् पृथग् वाक्यार्थबोधस्यापि सत्त्वेन न तयोरुपजीव्योपजीवकभावः । तत्र तु संज्ञापदार्थज्ञानस्य वाक्यार्थबोधे अपेक्षिततया संज्ञाशास्त्रबोधः कारणम् उपजीव्यम्, इह तु न तथा । परिभाषया विधिसूत्रे इक्पदोपस्थितया 'मिदेरवयवस्य इको गुणः' इत्येवं परस्परं विशेषणविशेष्यभावेन अन्वयात् निरूप्यनिरूपकभावो विषयतायां स्पष्टः । तत्प्रयोजकं पदम् इगादि; तद्घटितत्वात् । **वृत्तिपरिच्छेदकत्वेन** = अणादिपदनिष्ठशक्तिग्राहकत्वेन । **अस्य** अइउण् इत्यादिसूत्रस्य **संज्ञासूत्रत्वम्** क्रमिकवर्णबोधनस्य **संज्ञाद्वारैणैव उपयोगात्** ।

समाधान—'अ इ उ ण्' इति । क्रमशब्द अर्श आद्यजन्त होने से क्रमवान् का बोधक है । अ इ उ ण् इत्यादि सूत्र क्रमवान् वर्णों का बोधक होने पर भी 'आदिरन्त्येन सहेता' इस सूत्र के साथ एकवाक्यतापन्न होकर अणादिपदनिष्ठ शक्ति के निर्णायक होने से इनकी गणना संज्ञासूत्रों में की जाती है । शक्ति के निर्णायक को ही संज्ञासूत्र माना गया है । वर्णों के क्रमिक बोध की अणादि संज्ञा के द्वारा ही उपयोगिता होती है । एकवाक्यता का स्वरूप दिखाते हैं—**एकवाक्यता चेति** । आदि पद से अण् प्रत्याहार में अकार, इण् प्रत्याहार में इकार—इस प्रकार से ग्रहण होगा । अन्त्य इत्संज्ञक के सदृश अण् प्रत्याहार में अकार णकार इन दोनों आद्यन्त पदों से आक्षिप्त वर्णों का बोध अण् पद से होने के कारण इन वर्णों की अण् यह संज्ञा है । स्वौजसमौड्टित्यादि

एकवाक्यता च आदिरकारादिरन्त्येनेता तत्सदृशेन णकारादिना सहोच्चार्यमाण आद्यन्ताक्षिप्तानां सञ्ज्ञेति ।

'स्वौजस्' (पा० सू० ४।१।२) इत्यादीनामप्येतदेकवाक्यतया सुबादिसञ्ज्ञासूत्रत्वं स्वादिविधायकत्वं चेति बोध्यम् ।

एकवाक्यता चेति । आदिः = प्रथमो वर्ण अकारादिः, अन्त्येन = चरमेन वर्णेन इता = इत्संज्ञकसदृशेन णकारादिना सह = समम् उच्चार्यमाणः = निर्दिश्यमानः । आद्यन्ताक्षिप्तानाम् आद्यन्ताक्षरेण आक्षिप्तानां मध्यगानां संज्ञा । अयं भावः—'अइउण्' इत्यादिमाहेश्वरसूत्रघटकक्रमवद्वर्णबोधकत्वेऽपि शक्तिग्राहकत्वेन संज्ञासूत्रत्वमुपपन्नम्; शक्तिग्राहकस्यैव संज्ञासूत्रत्वाभ्युपगमात् । आदिरन्त्येन इत्येनेन सह इता = इत्सदृशेन सहोच्चार्यमाणः अकारादिः अर्थात् अण् आदिपदम् आक्षिप्तानां मध्यगानां बोधकमित्येवं रूपेण एकवाक्यतामापन्नम् शक्तिं नियमयति । एतावता संज्ञासूत्रत्वमेषाम् ।

केचित्तु—नेदं संज्ञासूत्रम्, साक्षात् शक्तिग्राहकस्य शास्त्रस्यैव संज्ञाशास्त्रत्वाभ्युपगमेन 'आदिरन्त्येन' इति सूत्रैकवाक्यतया शक्तिग्राहकत्वेन परम्परया शक्तिग्राहकत्वात् । एवं साक्षात् शास्त्रतात्पर्यस्य ग्राहकत्वं परिभाषात्वम् । साक्षादितरव्यावर्तकत्वं नियमत्वम् । साक्षात् साधुत्वसम्पादकत्वं विधित्वम् । साक्षात् सादृश्यग्राहकत्वमतिदेशत्वम् । साक्षादेकवाक्यतामात्रेण बोधोपयोगित्वमधिकारत्वम् इति बोध्यम् । तथा च एषां सूत्राणां तत्तद्वर्णत्वावच्छिन्नस्य तत्तद्वर्णस्य साधुत्वस्यानुशासनात् विधिसूत्रत्वमेव न्याय्यम्—इति वदन्ति ।

अन्ये तु 'इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः' इति 'इष्टान् शास्त्रे अभिमतान् वर्णान् भोत्स्यामहे' इति तद्व्याख्यानभूतेन भाष्येण च विरुद्धम्; वर्णानां साधुत्वार्थस्य तत्रानुक्तत्वात् । अत एव लकारप्रत्याख्यानम्; अन्यथा साधुत्वखण्डनं कथं युज्येत । एवमानुपूर्वीका श्रुतिरेव । अनुबन्धाश्च महेश्वरकृता इति सिद्धान्तेनापि प्रातिकूल्यम् । ब्रह्मोपदेशपरतया व्याख्याताया श्रुतेः साधुत्वानुशासनबोधनस्यायुक्तत्वात् । तस्मात् अन्यविधासु अनन्तर्भावे सति परम्परयापि शक्तिग्राहकत्वे संज्ञासूत्रत्वं मन्तव्यम् ।

स्वौजसिति । 'आदिरन्त्येन' इति सूत्रेण सह स्वौजसित्यादिसूत्रस्य एकवाक्यतया अन्त्येन पकारेण सह उच्चार्यमाणम् आदिः सुप् शब्दः मध्यगानां स्वस्य च बोधकः । तेन शक्तिग्राहकत्वेन संज्ञासूत्रत्वम् । सुबादीनां साक्षाद् विधायकत्वेन विधिसूत्रत्वमपि एतस्य ।

विधापदार्थश्चिन्त्यते— स्वसमभिव्याहृतपदार्थतावच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मबोधनं सः । यथा—स्वम् विधाशब्दः तत्समभिव्याहृतं पदं, सूत्रं तस्य योऽर्थः तत्र पदार्थता, तदवच्छेदकं सूत्रत्वं, तस्य सूत्रत्वस्य व्याप्याः मिथोविरुद्धाः (परस्परविरोधिनो) यावन्तो

सूत्र की आदिरन्त्येन इसके साथ आदि पद से सु अन्त्य से पकार का ग्रहण करने के लिये एकवाक्यता होने से सुप् पद की शक्ति का बोधक होने से इसको संज्ञासूत्र तथा सु औ जस् इत्यादि का विधायक होने से विधिसूत्र भी कह सकते हैं । वस्तुतः साक्षात् विधायक होने से यह विधिसूत्र ही है । जहाँ कोई गति नहीं हैं वहाँ एकवाक्यता द्वारा सूत्रभेद में अन्तर्भाव माना जाता है । अतः यह प्रसङ्गायात है ।

११. खफछठथचटतव् । १२. कपय् । १३. शषसर् । १४. हल् ॥

एषु संहिताया अविवक्षया न संहिताकार्यम् ।

धर्माः संज्ञासूत्रत्वविधिसूत्रत्वनियमसूत्रत्वादयः, तेषां ज्ञापनम् । तथा च स्वौजसित्यादेः संज्ञासूत्रत्वविधिसूत्रत्वयोरुभयोः स्वीकारेण सहावस्थानात् द्वयोः धर्मयोः परस्परं विरुद्धत्वाभावेन उक्तलक्षणस्य तत्रासङ्गमनात् न तदादाय सूत्रस्य षड्विधत्वमुपपद्यते इति नाशङ्कनीयम् । विधिसूत्रत्वत्व-संज्ञासूत्रत्वत्वयोर्भेदेन एकत्र समावेशाभावेन परस्परविरुद्धत्वात् पदार्थतावच्छेदकं यत् सूत्रत्वं तद्व्याप्यत्वाच्च विधापदार्थोपपत्तेः । उपधेयसङ्करेऽपि उपाधीनामसाङ्कर्यमुक्तं हेत्वाभासशिरोमणौ ।

एषु इति । अइउण् इत्यादिसूत्रेषु इत्यर्थः । अकारस्य इकारेण सह गुणादेशे कृते अयादेशः, एवम् ऋकारऌकारयोः दीर्घादेश इत्येवं रीत्या यथाप्राप्तं सन्धिकार्यं कुतो नेति शङ्कां समाधत्ते—**संहिताया इति** । 'परः सन्निकर्षः संहिता' इति सूत्रेण सङ्केतितायाः तस्याः अविवक्षणात् = वक्तुमिच्छाया अविषयत्वात् । 'तयोर्य्वावचि संहितायाम्'(८।२।१२८) इत्यारभ्य अध्यायसमाप्ति यावत् संहिताधिकारस्य स्वीकारात् । संहितायाः विवक्षाधीनत्वेन प्रकृते न तथाविधा इच्छा इति भावः । एकपदे, धातूपसर्गयोः, समासस्थले च संहिता नियमेन विवक्षणीया । तत्र संहिता न विवक्षाधीना । केवलं वाक्ये सा विवक्षाधीना । एकपदत्वञ्च पदत्वे सति पदत्वाभाववदुत्तरखण्डकसमुदायत्वं वाच्यम्, यथा—राजीयति । अस्य राजानमिच्छतीति विग्रहे क्यच्प्रत्ययेन निष्पन्नस्य समुदायस्य तिङन्तत्वेन पदत्वात् उत्तरखण्डस्य यति इत्यस्य च अपदत्वाद् एकपदत्वम् । पर्यगच्छत् पर्यभूषयत् इत्यादौ नियमेन धातूपसर्गयोः संहिता विवक्षा अत एव यणघटितः प्रयोग एव साधुः । 'वाप्यश्वः' इत्यादौ समासे नियमेन संहिताविवक्षा अत एव यणघटित एव प्रयोगः साधुः । न च 'अइउण्' इत्यादीनां सुबन्तत्वतिङन्तत्वयोरभावेन पदत्वाभावात् पदसमूहरूपवाक्यत्वस्यापि तत्र दुर्वचत्वादिति वाच्यम्, एकपदादिभिन्नस्य समुदायस्य इह वाक्यशब्देन विवक्षितत्वान्नानुपपत्तिः । अत एव 'गो इत्ययमाह' इत्यत्र गोशब्दस्य अपदत्वेन वाक्यघटकत्वाभावेऽपि संहिताया अविवक्षा सिद्धा ।

कश्चित्तु—इको यणचीत्यत्र 'ङमो ह्रस्वादचि'इत्यनेन ङमुटमाशङ्क्य सौत्रत्वान्नेति समाहितं शेखरकृता, तत्रापि संहिताया अविक्षया ङमुट् नेति कुतो न समाहितम्, तत्र वा यत्समाधानमुक्तं तदेवेहापि कुतो नोक्तमित्याक्षिपत् ! तन्न रोचते; उपायान्तरादूषकत्वेन भिन्नोपायकथनस्यौचित्यात् । एकस्य रोगस्य निवृत्तये अनेकविधा ओषधयो निर्दिष्टाः । न केनापि कस्यचिद् वैयर्थ्यम् । संहिताया अविवक्षणे सूत्रभेदापादनमपि न मनोरमम् । नहि संहिताया अविवक्षणे प्रयुक्तकालविलम्बमात्रात् सूत्रभेदो युक्तः; स्थान्यादेशनिमि-

---

शङ्का—अ इ उ ण् इसमें अकार का इकार के साथ पुनः उकार के साथ एवं ऋ ऌ ए ऐ इत्यादि में सन्धिकार्य होना चाहिये ?

समाधान—सन्धि में संहिता की विवक्षा कारण है । वर्णों की अत्यन्त सन्निधि को 'संहिता' कहते हैं । यहां संहिता की विवक्षा न होने से सन्धि नहीं हुई ।

अनुकरणत्वेन सौत्रत्वाच्च वर्णेभ्यो न विभक्त्युत्पत्तिः ।

त्तादीनां भेदस्यापि सूत्रस्य भेदे कारणत्वेन एकयोगेन प्रकृते तदभावात् । विभक्तेन अचीत्यनेन किं विधास्यते यत् पूर्वेण योगेन न प्राप्नोतीति चिन्तनीयम् ।

न च सन्धौ कृते वर्णानां स्वरूपस्य विकृतत्वेन इष्टरूपप्रतीतिर्न स्यादतः स्पष्टप्रतिपत्तये सन्धिर्न व्यधायि इति वाच्यम्; व्याख्यानत इष्टस्वरूपस्य प्रत्येतुं शक्यत्वात् । अत एव 'यस्येति च' इत्यत्र यपदेन इकारस्य अकारस्य च ग्रहणम् । एवमेव 'न लोकाव्यय' "लोपो व्योर्वलि:' इत्यादावपि व्याख्यानादेव इष्टरूपप्रतीतेरङ्गीकारात् । न च अइउ इत्यादिवर्णेभ्यः प्रत्येकं विभक्त्युत्पत्तिः कस्मान्न जाता ? इत्यत आह—**अनुकरणत्वेनेति** । अइउ इत्यादीनि चतुर्दशसूत्राणि श्रुतेः अनुकरणरूपत्वेन अनुकार्यानुकरणयोरभेदविवक्षापक्षे अनुकरणेन अनुकार्यस्य सादृश्यसम्बन्धेनैव उपस्थिततया शक्तिलक्षणान्यतरज्ञानाधीनोपस्थित्या अर्थविषयकबोधजनकस्यैव अर्थवत्सूत्रे अर्थवत्पदेन ग्रहणात् प्रकृते सादृश्यसम्बन्धेन उपस्थितस्य अनुकार्यस्य बोधकत्वेन अनुकरणस्य तथाविधार्थबोधकत्वाभावान्न प्रातिपदिकत्वम् । अतएव न विभक्तेः प्रसङ्गोऽपि । यत्र तु भेदविवक्षा तत्र अनुकार्यनिरूपितायाः शक्तेः अनुकरणे स्वीकारात् शक्त्या अर्थबोधकत्वेन अर्थवत्त्वात् प्रातिपदिकत्वं विभक्त्युत्पत्तिश्च सिध्यतः । अत एव 'भुवो वुग्' इत्यादिनिर्देशाः संगच्छन्ते ।

न चाभेदविवक्षापक्षे सादृश्येन अनुकार्यस्य उपस्थितत्वेन तस्य शाब्दबोधे भानं न स्यात्, तत्प्रकारकतद्विशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति तत्पदनिष्ठवृत्तिज्ञानाधीनतत्प्रकारकतद्विशेष्यकोपस्थितेः कारणत्वस्य स्वीकारात् । अत एव घटादिपदात् समवायेन सम्बन्धिनः उपस्थितस्य आकाशस्य न शाब्दबोधे भानम्, तस्य शक्त्यादिज्ञानेन अनुपस्थितत्वादिति वाच्यम्; सादृश्येनापि उपस्थितस्य शाब्दबोधे भानं व्युत्पत्तिवैचित्र्यादिति शब्दरत्नकृतैव समाहितत्वात् । अयं भावः—आश्रयता निरूपकताऽन्यतरसम्बन्धेन वृत्तिसम्बन्धिनो भानम् । शब्दस्य वृत्तेराश्रयतया अर्थस्य च वृत्तेर्निरूपकत्वेन सत्त्वात् शाब्दबोधे उभयोर्भानम् । अर्थवत्सूत्रे च आश्रयतासम्बन्धेन वृत्तिमत्पदोपस्थापितार्थबोधजनकस्यैव अर्थवत्पदेन ग्रहणान्नात्र विभक्त्युत्पत्तेः प्रसङ्गः ।

यद्वा—**सौत्रत्वात्** विभक्तिर्नोत्पद्यते । सूत्राणामिदं सौत्रम् । तथा च पाणिनीयसूत्राणां मूलम् उपकारकारकं वा छन्दः सौत्रं तत्त्वात् छन्दस्त्वाद् इत्यर्थः । अत एव सूत्रत्वादिति वक्तव्ये सौत्रत्वादिति अणन्तनिर्देशोऽपि न निष्फलः । चकारः समुच्चयार्थः । चकारं हेत्वर्थकं केचिद् वर्णयन्ति; तन्मुधैवेति सदाशिवभट्टाः । अनुकरणपक्षे यथा प्रातिपदिकसंज्ञाप्रतिबन्धद्वारा विभक्तेरनुत्पत्तिः, तथैव सौत्रत्वाश्रयणपक्षेऽपि कल्प्यताम् । तथा च–गुणे त्वन्याय्यकल्पना (अप्रधाने बाधकल्पना) इति न्यायोऽपि न प्रतिकूलः ।

शङ्का—इन सूत्रों में प्रत्येक वर्ण अर्थवान् हैं, इनको प्रातिपदिक संज्ञा होने से विभक्ति की उत्पत्ति क्यों नहीं हुई ?

समाधान—अनुकार्य और अनुकरण की अभेद विवक्षा करने से अनुकार्य का बोधक अनुकरणसादृश्य से माना जाता हैं । इसलिये अनुकार्यनिरूपित शक्ति अनुकरण में न होने से वृत्त्या अर्थबोधकत्व रूप अर्थवत्त्वाभाव के कारण प्रातिपदिक संज्ञा नहीं हुई, अतएव विभक्त्युत्पत्ति भी नहीं हुई ।

कारप्रत्ययोऽपि न; बाहुलकात् ।

ननु अइउण् इत्यादौ प्रत्येकस्माद् वर्णात् 'वर्णात्कारः' इत्यनेन कारप्रत्ययो भवति; अन्यत्र एकाक्षरबोधनाय कारप्रत्ययान्त एव प्रयुज्यते, यथा अकार इकार इत्यादि ? इति नाशङ्कनीयम् । 'रोगाख्यायां ण्वुल् बहुलम्' इति सूत्रात् बहुलग्रहणमत्रानुवर्तते ।

'कचित्प्रवृत्तिः कचिदप्रवृत्तिः कचिद् विभाषा कचिदन्यदेव' ।

इत्येवं चतुर्विधः स्वभावो बाहुलकस्य वर्णितः। तथा च प्रकृते अप्रवृत्तिस्वभावादेव कारप्रत्ययो न प्रवर्तते ।

प्रसङ्गात् 'वर्णात्कार' इत्यस्यार्थः विचार्यते—'वर्णवाचकात् कारप्रत्ययः' इत्यर्थाभ्युपगमे बिन्दुद्वयात्मकवर्णवाचकात् विसर्जनीयपदात् कारप्रत्ययः स्यात् । अत्र दोषवारणाय यदि यस्मात् कारप्रत्ययश्चिकीर्षितः (कर्तुमिष्टः) तद्घटको यो वर्णः तद्वृत्तिर्या वर्णत्वव्याप्या अत्वकत्वादिरूपा जातिः तदवच्छिन्ना विषयता तेषाम् अकारककारादीनां तद्विषयकबोधजनकत्वतात्पर्येण उच्चरितात् अ क इत्यादिपदात् कारप्रत्ययस्य विधानेन विसर्जनीयादिपदात् कारप्रत्ययस्यानुपपत्तेः। तथा हि—बिन्दुद्वयबोधतात्पर्येण विसर्जनीयपदस्य उच्चारणेऽपि विसर्जनीयपदघटकवर्णवृत्तिः वर्णत्वव्याप्या विसर्जनीयत्वजातिर्नास्ति, अनुनासिकपदे च अनुनासिकपदघटकनकारवृत्तिवर्णत्वव्याप्यम् अनुनासिकत्वमस्ति, परं तद् न जातिरपि तु गुणः—इत्येवं तद्घटकवर्णवृत्ति वर्णत्वव्याप्य जातेरभावात् तत्रापि न कारप्रत्ययः ।

न च अकारस्य बोधकत्वाद् अकारेण घटितत्वाच्च गुणपदस्य, वर्णस्यैव संज्ञा—इत्यस्मिन् पक्षे घिपदस्य इकारस्य बोधकत्वात् इकारेण घटितत्वात्, एवं नदीपदस्यापि ईकारस्य बोधकत्वात् ईकारेण घटितत्वाच्च तत्पदघटकवर्णवृत्तिवर्णत्वव्याप्या जातिः क्रमेण अत्वम् इत्वम् ईत्वञ्च तदवच्छिन्नविषयताकबोधतात्पर्येण उच्चरिताद् गुणपदाद् घिपदात् नदीपदाच्च कारप्रत्ययः स्यादिति वाच्यम्; वर्णत्वव्याप्यधर्मविशिष्टात् कारप्रत्ययः। वै० स्वावच्छिन्नविषयताकबोधतात्पर्यकत्वम् । स्वानाश्रयीभूतो य उच्चारणार्थकाजितरो वर्णः तदघटितत्वमेतदुभयसम्बन्धेन । यथा अकारवाचकाद् अशब्दात् कारप्रत्ययो भवति । तथाहि—वर्णत्वव्याप्यधर्मेण विशिष्टः ककारः । तत्र वै० स्वावच्छिन्नेन = वर्णत्वव्याप्यधर्मेण अत्वेन अवच्छिन्ना या विषयता तादृशविषयताकबोधतात्पर्येण उच्चरितत्वमस्ति । एवं वर्णत्वव्याप्यो धर्मः अत्वं तदनाश्रयीभूतः उच्चारणार्थकाजितरो यो वर्णः ककारादिः तेनाघटितत्वमपि इति, तस्मात् कारप्रत्ययो भवति ।

सनकादि सिद्धों के उद्धार के लिये अइउण् इत्यादि श्रुति अर्थसहित विवक्षित है । महर्षि पाणिनि को अर्थरहित शब्दमात्र का उपदेश प्राप्त हुआ है । अतः सौत्र होने से यह अर्थरहित शब्दमात्र का अनुकरण है । 'च' शब्द हेतु के अर्थ में है । सौत्र होने से यह अनुकरण है । विभक्त्युत्पत्ति न होने में यही एकमात्र हेतु दिया गया है ।

शङ्का—'वर्णात् कारः' इससे कार प्रत्यय प्रत्यक्षर के आगे क्यों नहीं किया गया ?

समाधान—'रोगाख्यायां ण्वुल् बहुलम्' इस सूत्र से बहुल पद की अनुवृत्ति होने से यहाँ 'कार' प्रत्यय नहीं हुआ । कहीं प्रवृत्त होना, कहीं न प्रवृत्त होना—इत्यादि 'बाहुलक' के स्वभाव हैं ।

भगवतो वासुदेवस्य वाचिनः अशब्दात् कारप्रत्ययवारणाय प्रथमः सम्बन्धः। तस्य अशब्दस्य वासुदेवतात्पर्येण उच्चरितत्वेन वर्णत्वव्याप्यधर्मावच्छिन्नबोधतात्पर्यकत्वाभावात् न दोषः। अनुस्वारविसर्गयोः कि-कू-घि-नदी-ह्रस्वादिपदेषु तद्वारणाय द्वितीयः सम्बन्धः। तैः यद्वर्णवृत्तिवर्णत्वव्याप्यधर्मावच्छिन्नविषयको बोधो विवक्षितः तद्वृत्तिवर्णत्वव्याप्यधर्मानाश्रयीभूतः उच्चारणार्थको योऽच् तदितरेण तत्तद्वर्णेन सकारवकारादिना घटितत्वेन अघटितत्वाभावान्न दोषः। 'हयवरट्'इत्यादौ उच्चारणार्थस्य अकारस्यैव पुनः पुनः निर्देशेन तद्भिन्नस्य इकारादिवर्णस्य उच्चारणार्थकत्वानभ्युपगमात् कि-कुशब्दयोरपि दोषः परिहृतः, तत्र इकारोकारयोरुच्चारणर्थकत्वस्य विरहात्।

अथवा वर्णविशिष्टात् कारप्रत्ययः। वै० स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविषयताप्रयोजकबोधतात्पर्येणोच्चरितत्वम् स्वेतरोच्चारणार्थकाकारातिरिक्तवर्णघटितत्वम् इत्युभयसम्बन्धेन। अकारककारादिरूपे लक्ष्ये स्वपदेन अकारः ककारो वा ग्राह्यः, तद्वृत्तिः=तन्निष्ठो यः श्रावणप्रत्यक्षविषयतावच्छेदको धर्मः=यो हि शब्दः तत्र श्रवणेन्द्रियेण प्रत्यक्षीभवति यथा अशब्दः कशब्दः, स श्रावणप्रत्यक्षस्य विषयः, तस्मिन् तादृशी विषयता वर्तते, तस्याः श्रावणप्रत्यक्षविषयतायाः अवच्छेदकस्तन्निष्ठो धर्मः अत्वकत्वादिरूपः तद्धर्मावच्छिन्नाकारककारादिनिष्ठविषयतायाः प्रयोजकतात्पर्येण उच्चरितत्वम् अकारककारयोः। एवं वाक्यार्थबोधाभावेन, तदप्रवृत्तौ =आद्गुण इत्याद्यप्रवृत्तौ वर्णसमाम्नाये अविकृतरूपाकारादिषु स्वस्माद् वर्णाद् इतरो य उच्चारणार्थकाद् अकाराद् अतिरिक्तो वर्णस्तेन अघटितत्वमपि तयोरिति कारप्रत्ययः सिद्धः। घिनदीपदयोः ह्रस्वानुनासिकपदयोः किकुपदयोश्च प्रथमसम्बन्धस्य सत्त्वेऽपि स्वेतरस्य उच्चारणार्थकाकारातिरिक्तेन तेन तेन वर्णेन घकारनकाराभ्यां क्वचिद् अकारककारसकारादिना घटितत्वेन अघटितत्वाभावेन द्वितीयसम्बन्धस्य विरहान्न दोषः। अकारातिरिक्तस्य उच्चारणार्थकत्वानङ्गीकारेण कि-कुशब्दयोः उच्चारणार्थकातिरिक्तेन इकारेण उकारेण च घटितत्वात् कारप्रत्यो नेति संक्षेपः।

'अइउण्' इत्यादिसूत्रेषु स्वरसन्धिस्तु न प्रवर्तते, 'वर्णोपदेशकाले अजादिसंज्ञानामनिष्पादात्' इत्युक्तं कैयटेन। एतस्य निराकरणं शब्दकौस्तुभे इत्थम्—पाणिन्यादेराचार्यस्य लक्ष्यैकचक्षुष्कतया सूत्रप्रणयनात् प्रागपि तदर्थबोधस्य कल्पयितुं शक्यत्वात्। अन्यथा सवर्णसंज्ञाविधानानन्तरं सावर्ण्यस्य ज्ञातुं शक्यतया सवर्णसंज्ञाविधायकं तुल्यास्यसूत्रघटकतुल्यास्यपदे 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घप्रवृत्त्या तथा निर्देशो न स्यादतः कैयटोक्ता एषा कल्पना न सम्भवति। एतद् दूषणं निराचिकीर्षुः रत्नकोशकारः उपजीव्यविरोधात् सन्धिर्नेत्यर्थकतया कैयटग्रन्थं व्याख्यातवान्। तदेतद्ग्रन्थस्य दूषणाय अनुवदति—

'वर्णात् कारः' इसका अर्थ इस प्रकार है—जिससे कार प्रत्यय करना हो जैसे 'क' 'ख' इत्यादि से, तद्घटक वर्णवृत्ति जो वर्णत्वव्याप्यजाति कत्व खत्वादि जाति, तदवच्छिन्न = कत्वावच्छिन्न, खत्वावच्छिन्न जो विषयता, तादृशविषयताक बोध तात्पर्य से उच्चरित यहाँ क और ख हैं उनसे कार प्रत्यय होता है। ककार खकार आदि से व्यञ्जन क, ख—आदि की प्रतीति होती है। अकारसहित ककार की प्रतीति कराने में कार प्रत्यय नहीं होता!

कैयटमतोपपादक रत्नाकरमत के निराकरणार्थ उपक्रम करते हैं—

यत्तु "उपजीव्यविरोधात् सन्धिर्न । तथा हि अजादिसञ्ज्ञाग्रहकाले 'आद् गुणः' (६।१।८७) इत्यादीनामनिष्पत्त्या तदप्रवृत्तावविकृतरूपाकारादिषु गृहीताजादिपदशक्तिः पश्चादचप्रत्याहारे ज्ञाते 'उपेन्द्रः' इवात्रापि तत्प्रवृत्तौ विरुद्धचेत, न हि सन्धिकार्ये कृतेऽविकृतरूपश्रवणं भवति" इति ?

तन्न; पुनरच्पदस्यार्थान्तरे शक्यग्रहेण तद्विरोधाभावात् । न च सन्धौ सन्देहः; व्याख्यानतो निर्णयसम्भवात् ।

यत्तु इति । आदिरन्त्येनेति सूत्रेण अविकृते अकारे इकारे उकारादौ च अजादिप्रत्याहारस्य गृहीता शक्तिः 'आद्गुणः' इत्यादेः सन्धिकार्ये कर्तव्ये स्वोपजीव्यस्य अविकृतत्वस्य विघातकत्वेन निमित्तमेव न भवतीति तदाशयः । उपजीव्यं तद्विरोधञ्चोपपादयितुमाह—**तथा हीति** । अजादिसंज्ञा = आदिरन्त्येन इत्यनेन बोधिता संज्ञा, तज्ज्ञानसमये अजादिपदार्थज्ञानाभावात् 'आद्गुणः' इत्यादीनामनिष्पत्त्या = अविकृतरूपेण अकारादौ गृहीता आदिरन्त्येनेति सूत्रेण बोधिता अजादिपदशक्तिः = पश्चात् 'आद्गुणः' इत्यस्य प्रवृत्तौ विकृते ग्रहणात् विरोधः = सन्धौ कृते अजादिपदशक्तिः अविकृतेषु विकृतेषु वेति सन्देहाद् विरोधः स्यात् । अथवा अविकृतरूपस्य अकारादेः अजादिपदशक्तिग्रहणे उपजीव्यत्वात् कारणत्वात् सन्धिना अविकृतत्वस्य नाशात् उपजीव्योपजीवकभावविरोधः । नहि गुणादिकार्ये कृते अविकृतरूपस्य श्रवणं भवति ।

तदेतद् दूषयति—**तन्नेति** । एतत्कथनं न युक्तम्, कुतः ? तदाह—पुनरिति । पूर्वम् आदिरन्त्येनेति सूत्रेण अकारादिचान्तसमुदायघटकवर्णेषु बोधितायाः शक्तेः अविकृतत्वमुपजीव्यमेव न भवतीति सन्धिकार्येण कथम् उपजीव्यविरोध आपाद्यते । शक्तिग्रहवेलायां विकृताविकृतत्वयोः नामैव न निर्दिश्यते इति कुतः तद्विरोधसम्भावना ! न च अकारादिषु शक्तिनिश्चयमुपजीव्य जायमानं सन्धिकार्यं सन्धौ पूर्वोक्तनिश्चयविरोधि संशयोत्पादकतया उपजीव्यविरोधात् न सन्धिकार्यप्रवृत्तिः?इत्याशङ्कायामाह—**व्याख्यानत इति** । सत्यपि सन्देहे भाष्यकारादिव्याख्यानेन निर्णेतुं शक्यत्वात् ।

यत्तु इति । उपजीव्य = कारण के विरोध से सन्धि नहीं हुई । इसी का स्पष्टीकरण **तथाहि** इससे ग्रन्थकार करते हैं ।

वर्णोपदेश के अनन्तर इत्संज्ञा और इसके बाद ही 'आदिरन्त्येन सहेता' इस सूत्र के द्वारा अच् अण् इत्यादि प्रत्याहारों का शक्तिग्रहण माना गया है । प्रत्याहार की सिद्धि के समय अजादि पदार्थ का ज्ञान न होने के कारण 'आद्गुणः' इत्यादि सूत्रों का वाक्यार्थबोध न होने से गुणादि संधिकार्य वहाँ नहीं होता । अतः अजादि प्रत्याहारों की शक्ति अ इ उ इत्यादि अविकृत रूप में ही गृहीत होने से अजादि प्रत्याहार का अर्थ-ज्ञान होने के बाद भी 'उपेन्द्रः' इसके समान उसमें सन्धिकार्य नहीं हो सकता । क्योंकि सन्धिकार्य होने से अजादि शक्तिग्रह के समय कारणीभूत जो अविकृत स्वरूप या उसका विनाश हो जाने से उपजीव्य का विरोध प्राप्त होता है जो अन्याय है ।

इसका खण्डन करते हैं—**तन्न इति** । अकारादिनिरूपित शक्ति अजादि पद में गृहीत हुई है । सन्धिकार्योत्तर भी अजादि पद उन्हीं वर्णों के बोधक हैं । वर्णान्तरनिरूपित शक्ति नहीं

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि ।

ननु चतुर्दशसूत्र्यामक्षरसमाम्नाय इति व्यवहारानुपपत्तिः; आम्नायसमाम्नायशब्दयोर्वेदे एव प्रसिद्धेः ? इत्यत आह—माहेश्वराणीति । **महेश्वरादागतानीत्यर्थः । महेश्वरप्रसादलब्धानीति फलितम् । एवञ्चैवमानुपूर्वीका श्रुतिरेवैषा । तत्प्रसादात्** पाणिनिना **लब्धा । श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वम् ।**

सन्धिवारणाय कश्चिदन्यः प्रयतते—अविकृताकारश्रवणमुपजीव्य=निमित्तीकृत्य आदिरन्त्येनेति सूत्रेण जायमानः शक्तिग्रहः कारणभूताविकृतत्वविरोधि सन्धिकार्यं नोत्पादयिष्यति; उपजीव्यविरोधस्य अन्याय्यत्वात् । इदमपि न विचारसहम्; अकारादिनिरूपिताजादिपदनिष्ठशक्तिग्रहं प्रति अविकृताकारादिश्रवणस्य न कारणता; अपि तु अकारादिजनकत्वेन आद्यवक्तृतात्पर्यविषयो यः समुदायः तद्विषयकज्ञानत्वेन कारणत्वमिति नोपजीव्यत्वं तस्य ।

'श्रुतिः स्त्री वेद आम्नायः' (अ०को० १-६-२) इत्यमरकोशात्, 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै०सू० २-३-१) इति जैमिनीयसूत्राच्च वेदे एव आम्नायशब्दस्य प्रयोगदर्शनात् आम्नाय-समाम्नायशब्दयोः प्रत्याहारबोधकेषु 'अइउण्' इत्यादिसूत्रेषु प्रयोगो नोचितः । 'चन्द्रोदये विताने च स्यादाम्नायोऽन्वये श्रुतौ' इति नानार्थकोशादन्यार्थकत्वेऽपि तदर्थे प्रयोगस्याप्रसिद्ध्या वेदार्थकत्वस्यैव प्रसिद्धेः । अतएव मूले आम्नाय-समाम्नायशब्दयोः वेदे एव प्रसिद्धत्वादित्येवमाह, न तु वेदार्थकत्वमेवेत्येवमुक्तवान् । तदेवाह—**ननु** इति । समाधानमाह—**माहेश्वराणीति** । महेश्वरादागतानि, 'तत आगतः' इत्यनेन अणि साधु । नन्विदं कथं सम्भवेदित्यत आह—**तत्प्रसादेति** । महेश्वरस्य भगवतः प्रसादेन प्राप्तानि एतानि चतुर्दशसूत्राणि । **एवञ्च**=महेश्वरप्रसादलब्धानीति व्याख्याने च । एवमानुपूर्वीका एषा=पूर्वोक्ता चतुर्दशसूत्री, श्रुतिः=वेदः । महेश्वरप्रसादात् लब्धवान् भगवान् पाणिनिरिति समुदायार्थः । तथा च अस्य श्रुतिरूपत्वेन आम्नायसमाम्नायशब्देन व्यवहारो नानुपपन्नः । **श्रुतिमूलकत्वात्** इति । भगवतः पाणिनेः सूत्राणां प्रायेण प्रत्याहारद्वारा प्रयोगसाधुत्वसम्पादकत्वेन प्रत्याहारस्य च वर्णसमाम्नायमूलकत्वेन श्रुतिमूलकत्वमस्य पाणिनीयव्याकरणस्य स्पष्टमेव ।

मानी गयी है । अतः पूर्व शक्ति से भिन्न शक्ति स्वीकार न होने से उपजीव्यविरोध नहीं है । अकारादि चान्त समुदाय घटक वर्ण निरूपित शक्ति अजादि पद में है, न कि अविकृत अकारादि चान्त समुदाय इत्यादि रूप से, इसलिये अविकृतत्व उपजीव्य नहीं है । यह निष्कर्ष है ।

शङ्का—सन्धि होने पर अणादि प्रत्याहारों में अक्षरों के स्वरूप निर्णय में सन्देह प्राप्त होगा ?

समाधान—विशिष्ट व्याख्याताओं के व्याख्यान से सन्देह का निवारण हो जायगा ।

शङ्का—ननु इति—आम्नाय या समाम्नाय ये दोनों शब्द वेद के ही वाचक प्रसिद्ध होने से चौदह सूत्रों में इन शब्दों का प्रयोग युक्त नहीं है ?

समाधान—आशुतोष महेश्वर के प्रसाद से ये चतुर्दश सूत्र प्राप्त हुये हैं । इस प्रकार की अनादि श्रुति है । महेश्वर-प्रसाद से भगवान पाणिनि ने प्राप्त किया है ।

प्रमाणम्—

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तम्……………'॥ (पा० शि० ५७)

इति शिक्षावचनम् ।

'लण्सूत्रे णकारविषयाचार्यप्रवृत्तिर्ज्ञापयति—व्याख्यानत इति' इत्यादावाचार्यपदेन महेश्वरः ।

अत एव अस्य वेदाङ्गत्वे न संशयः । 'अस्यैव वेदाङ्गत्वम्' इति मूले एवकारोऽप्यर्थको बोध्यः । यथा 'घटे एव प्रसिद्धः', 'अयमेव तदन्तविधिं ज्ञापयति' इत्यादौ एवकारस्य अप्यर्थकत्वम् । तथाऽत्रापि ।

केचित् विशेषणसङ्गतमेवकारं वर्णयन्तः पाणिनीयव्याकरणस्यैव वेदाङ्गत्वं मन्यन्ते । तत् तु वाग्विलासमात्रम् । 'अस्यैव' इत्यत्र उपादीयमानस्य एवकारस्य विशेषणसङ्गतत्वप्रतिपादनमपि भ्रममूलकम्; एवकारस्य विशेष्यसङ्गतत्वेन विशेषणसङ्गतत्वाभावात् । अन्यत्रपठितस्य एवकारस्य अन्यत्रसन्निवेशेन अर्थाभिधाने महती अनर्थपरम्परा उदियात् । श्रुतिमूलकत्वात् पाणिनीये व्याकरणे वेदाङ्गत्वशङ्काऽपि नास्तीत्याशयेन 'अस्यैव वेदाङ्गत्वम्' इत्युक्तम् ।

श्रुतिमूलकतया अस्यैव वेदाङ्गत्वमिति कल्पनायां तु ज्यौतिषादेः वेदाङ्गत्वानापत्तेः; तस्य श्रुतिमूलकत्वाभावात् । वेदोपयोगित्वेन वेदाङ्गत्वे स्वीक्रियमाणे व्याकरणान्तरस्य वेदाङ्गत्वं कथं दण्डवारितम्; व्याकरणान्तरानभ्युपगमे एतद्व्याकरणात् पूर्वं वेदस्य पञ्चाङ्गत्वापत्तेर्दुष्परिहरत्वात् । अष्टाध्यायीं नित्यां मत्वा समादधतस्तस्य वाचं 'वह्निरनुष्णः' इति वचनमिव कः सचेताः विश्वसेत्—इत्यलमप्रस्तुतार्थविवेचनेन ! टिप्पणीकारोऽपि अप्यर्थकमेवकारमनिर्दिश्य चिन्तां प्रकटितवान्, तन्मुधैव ।

अत्र = तत्प्रसादात् लब्धा श्रुतिरित्यर्थे प्रमाणमाह—**येनाक्षर** इति । येन भगवता पाणिनिना अक्षरसमाम्नायं = वर्णसमाम्नायं महेश्वरात् अधिगम्य लब्धा, कृत्स्नं = समग्रं व्याकरणं प्रोक्तम्=कथितम् । 'तस्मै पाणिनये नमः' 'इति शेषः । 'अधिगम्य महेश्वरात्'

पाणिनीय व्याकरण का निर्माण प्रत्याहार को मूल में रखकर किया गया है । प्रत्याहार की सिद्धि अ इ उ ण् इत्यादि सूत्र के आधार पर है । अतः श्रुतिमूलक यह व्याकरण है । इसलिये इसकी वेदाङ्गता भी निश्चित है । 'अस्यैव' यहाँ एव शब्द अपि के अर्थ में है । अन्यथा इस व्याकरण के पहले वेद षडङ्ग नहीं होगा । **अत्रेति** । अ इ उ ण् इत्यादि श्रुति है और महेश्वरप्रसाद से महर्षि पाणिनि को लब्ध हुई—इसमें 'येनाक्षरसमाम्नायमधिगम्य' (पा० शि० ५७) इत्यादि शिक्षावचन प्रमाण हैं ।

जिस आचार्य पाणिनि ने वर्णसमाम्नाय को भगवान् शङ्कर से प्राप्त कर सम्पूर्ण व्याकरण का प्रणयन किया, इससे उक्तार्थ स्पष्ट प्रमाणित होता है । लण्सूत्र में भाष्यकार ने कहा है—णकारविषयक आचार्यप्रवृत्ति ज्ञापन करती है—**व्याख्यानतो विशेषप्रतिपत्तिः** इत्यादि । यहाँ 'आचार्य' पद से महेश्वर का ग्रहण है; क्योंकि अनुबन्धों का सन्निवेश भगवान् शङ्कर के द्वारा किया गया है । इसका स्पष्टीकरण 'नृत्तावसाने' इत्यादि से आगे किया जायगा ।

अनुबन्धाश्च महेश्वरकृता एव—इत्यनुपदं स्फुटीभविष्यति ।

'अमङणनम्' (मा० सू० ७) इत्यत्र मकारप्रत्याख्यानपरं भाष्यं तु किमदृष्टार्थमेव तदुच्चारणमुत दृष्टार्थमपीत्येवं विचारपरम् । सर्वत्र प्रत्याख्यानमेवम्परमेव । अन्यथाऽङ्गानामपि पारायणे धर्मश्रवणेन तत्र पाणिनिन्यासप्रत्याख्यानस्याप्यसङ्गतिः स्यात् । तदुक्तम् 'इको यणचि' (६।१।७७) इति सूत्रे—

'सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्' इति ।

इत्यनेन स्पष्टमेव तत्प्रसादाल्लब्धमिदमिति सूचितम् । एवं सति प्रसक्तं भाष्यविरोधं परिहरति—**लण्** इति । लण्सूत्रे इत्यस्याग्रिमेण णकारेणाऽन्वयः । लण्सूत्रघटकणकारविषयिणी आचार्यप्रवृत्तिः । अत्राचार्यपदेन महेश्वरो गृह्यते इति न पाणिनीग्रहणशङ्कया पूर्वोक्तेन सह विरोधसम्भावना । इत्यादाविति अत्र आदिपदेन 'एषा हि आचार्यस्य शैली लक्ष्यते' इत्यादिभाष्यान्तरं ग्राह्यम् । **अनुबन्धाश्चेति** । अत्र चकारः त्वर्थे । अनुबन्धाः = इत्संज्ञायोग्याः । चतुर्दशसूत्रेषु अन्त्या वर्णाः । मतान्तरे लकाराकारश्च इत्यर्थः । **महेश्वरकृता** इति । एवशब्दोपादानेन अनादित्वमनुबन्धानां निरस्तम् । अनुपदम् = शीघ्रम् ।

अनुबन्धानां महेश्वरकृतत्वे तत्खण्डनं नोचितमित्यत आह—**अमङणनमिति** । अत्र सूत्रे मकारप्रत्याख्यानस्यायमाशयः—मकरोच्चारणं किमदृष्टमात्रप्रयोजनकम्, अथवा दृष्टादृष्टोभयप्रयोजनकम् ? इत्येवं विचारे भाष्यस्य तात्पर्यम्—यत्र अदृष्टमात्रप्रयोजनं सिद्ध्यति तत्र प्रत्याख्यानव्यवहारः । **इत्येवं विचारपरमिति** पूर्वोक्तविचारपूर्वकादृष्टार्थत्वबोधनपरम् । एवम्परमेव = अदृष्टार्थत्वप्रतिपादनपरमेव । अन्यथा = सर्वत्र प्रत्याख्यानस्य पूर्वोक्ततात्पर्यकत्वाभावे । अङ्गानां=वेदाङ्गानां पारायणे=पाठे तत्र तत्र = तस्मिन् तस्मिन् भाष्ये पाणिनिन्यासः = सूत्रम् तत्प्रत्याख्यानस्य = तन्निवेशकरणमित्यर्थः । तथा च दृष्टप्रयोजनस्य असत्त्वे प्रत्याख्यानवचनम् । नैतावता दृष्टप्रयोजनं वार्यते । अत एव 'सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्' इत्यनेन न विरोधः । सम्यगर्थः = समर्थः, तस्य भावः सामर्थ्यम्, स्वार्थे ष्यञ् । अर्थशब्दोऽत्र प्रयोजनवाची । सामर्थ्यस्य योगः = सम्बन्धः, तस्मात् । यद्वा योगस्य=सूत्रस्य सामर्थ्यं स्यादिति राजदन्तादित्वात् परनिपातः । प्रयोजनसद्भावात् अत्र = व्याकरणशास्त्रे यदनर्थकं = निष्प्रयोजनं स्यात् । तन्न पश्यामि =

शङ्का—अनुबन्ध णकारादिकों को महेश्वरकृत मानने पर 'अमङणनम्' इसमें अन्त्य मकार के भाष्योक्त प्रत्याख्यान की सङ्गति नहीं होगी ?

समाधान—भाष्योक्त मकार प्रत्याख्यान का आशय इस प्रकार है—दृष्ट अदृष्ट के भेद से प्रयोजन दो प्रकार के होते हैं । जहाँ किसी सूत्र या तद्घटक पद का दृष्ट प्रयोजन (किसी प्रयोग की सिद्धि) नहीं रहता वहाँ उसके प्रत्याख्यान से अदृष्टमात्र प्रयोजन का प्रतिपादन किया गया है । मकार प्रत्याख्यान का तात्पर्य अदृष्टमात्र प्रयोजन के प्रदर्शन में है । दृष्ट प्रयोजन इसका नहीं है । दृष्ट और अदृष्ट उभय प्रयोजन मकार का है ? अथवा अदृष्टमात्र फल हैं ?—इस आशय से भाष्योक्त विचार का आरम्भ है । प्रत्याख्यानस्थल में सर्वत्र इसी तात्पर्य से विचार किया गया है । ऐसा न मानने पर वेदाङ्गों के पारायण में भी धर्मोत्पत्ति के श्रवण से पाणिनीय सूत्रों का प्रत्याख्यान होने पर उन सूत्रों के पारायणजन्य धर्म की अनुत्पत्ति के कारण प्रत्याख्यान की असङ्गति दुर्वार हो जायगी ।

किञ्चिद् दृष्टादृष्टार्थवत्, किञ्चिच्छुद्धादृष्टार्थवत्, सर्वथाऽनर्थकं न किञ्चिदिति तदर्थः।

वृद्धिसूत्रस्थे—'वर्णेनाप्यनर्थकेन न भवितव्यम्' इति भाष्यग्रन्थेऽनर्थकत्वम्, बोध्यार्थकत्वम्, बोध्यार्थराहित्यरूपमिति न निष्प्रयोजनस्वरूपानर्थक्येन तत्र तत्र प्रत्याख्यानपरभाष्यासङ्गतिः।

जानामि। दृष्टप्रयोजनाभावेऽपि अदृष्टप्रयोजनस्य सत्त्वात् किमपि निःप्रयोजनं व्याकरणे नास्तीति भावः।

न चैवं दृष्टप्रयोजनाभावमात्रेण आनर्थक्यात् सूत्रेण ज्ञापनं प्रत्याख्यानं वा यदीष्टम्, तर्हि 'वर्णेनाऽप्यनर्थकेन न भवितव्यम्' इति भाष्येण विरोधः स्यात्, दृष्टप्रयोजनरूपार्थवत्त्वस्य बहुषु सूत्रेष्वसत्त्वादित्यत आह—**वृद्धिसूत्रस्थ** इति।

अयं भावः—'वृद्धिरादैच्' इति सूत्रे संज्ञाधिकाराभावे वृद्धिः संज्ञा, आदैच् संज्ञी-इत्येवं निर्णयाभावेन सन्देहे वाक्यार्थबोधाभावात् सूत्रस्यानर्थक्यं प्रसज्येत ? अस्तु आनर्थक्यम्, लोकेऽपि अर्थवन्ति अनर्थकानि च वाक्यानि दृश्यन्ते ? शङ्कामिमां निराचिकीर्षुर्भाष्यकार आह—**वर्णेनाप्यनर्थकेन न भवितव्यमित्यादि**। तथा च पूर्वोत्तरोभयस्मिन्नपि पक्षे 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरकोशदिशा अभिधेयवाची प्रकृतेऽर्थशब्दो न प्रयोजनवाची। एवञ्च अर्थरहितानि वचनानि यथा लोके तथाऽत्रापीति शङ्कायाः निरासाय भाष्यकृता एको वर्णोऽप्यनर्थकोऽत्र शास्त्रे नास्ति, सूत्रस्य तु आनर्थक्यस्य का चर्चेत्याशयेनोक्तम्। तथा च प्रत्याख्यानस्थलेऽपि बोध्यार्थराहित्यरूपमानर्थक्यं नास्तीति न क्वचिदपि बोध्यार्थराहित्यरूपमानर्थक्यमित्यभिप्रायकेण 'वर्णेनाप्यनर्थकेन न भवितव्यम्' इत्यनेन न विरोधः।

इसी अभिप्राय से 'इको यणचि' इस सूत्र के भाष्य में 'सामर्थ्ययोगात्' इत्यादि वचन लिखा गया है। सामर्थ्ययोगात् = सम्यक् प्रयोजन के सद्भाव से इस व्याकरण शास्त्र में कोई (पद या वाक्य) ऐसा नहीं है जो निष्प्रयोजन हो।

'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' (अ०को० ३-३-८६) के अनुसार 'अर्थ' शब्द प्रयोजनपरक है। अर्थात् कोई दृष्ट, अदृष्ट या उभय प्रयोजन वाले हैं, दृष्ट प्रयोजन न होने पर भी अदृष्ट प्रयोजन होने से सर्वथा निष्प्रयोजन कोई सूत्र या तद्घटक पद नहीं है।

शङ्का—'वृद्धिरादैच्' इस सूत्र के भाष्य में 'वर्णेनाप्यनर्थकेन = एक अक्षर भी ऐसा नहीं जो अनर्थक है' इस प्रकार लिखने पर भी कई सूत्रों का प्रत्याख्यान किया गया है। यहाँ परस्पर विरुद्ध उक्ति होने से भाष्य की असङ्गति प्राप्त होती है ?

समाधान—'वर्णों का आनर्थक्य नहीं है' इसका तात्पर्य वर्णों का बोध्यार्थराहित्य नहीं है।

'अर्थ' शब्द अभिधेय = वाच्यार्थ परक है। ऐसा कोई वर्ण नहीं जिसका कुछ अर्थ न हो। निष्प्रयोजनत्व = दृष्टप्रयोजनत्व रूप आनर्थक्य मानकर सूत्रों का यत्र तत्र प्रत्याख्यान होने से कोई विरोध नहीं है।

अत एव 'सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः' इति भाष्यमुपादायोक्तं भर्तृहरिणा—

"यथैवेदमव्युच्छिन्नं चन्द्रतारकादि, एवमस्याक्षरसमाम्नायस्य न कश्चिद् आधुनिकः कर्त्ताऽस्ति एवमेव वेदपारम्पर्येण स्मर्यमाणः" इति। आधुनिकः शरीरी। पुष्पितत्वं तन्मूलकशब्दशास्त्रद्वारेण। शब्दप्रयोगेणं च फलितत्वम्।

उक्तञ्चैतच्चतुर्दशसूत्रव्याख्यायां नन्दिकेश्वरकृतकाशिकायाम्—

"नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्त्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥

अत एवेति। वर्णसमाम्नायस्य श्रुतित्वादेव। सोऽयमित्यादिश्रुतिरूपो वर्णसमाम्नायः पुष्पितः = फलितः प्रतिमण्डितः = सुशोभितः ब्रह्मराशिः = वेदसमूहः। इदं भाष्यं गृहीत्वा भर्तृहरिणा उक्तम्—**यथैवेदम् इति**। येन रूपेण, इदमव्युच्छिन्नं शरीरिकर्तृकत्वेनापरिच्छिन्नमनश्वरं चन्द्रतारादिकम्, तथैव अस्याक्षरसमाम्नायस्य न कश्चित् आधुनिकः शरीरी कर्त्ता रचयिता अस्ति[1]। एवमेव = उक्तानुपूर्वीकमेव वेदपारम्पर्येण=परम्परैव पारम्पर्यम् वेदसम्बन्धि यत् पारम्पर्यं तेन, स्मर्यमाणः वर्णसमाम्नायः। वेदस्य ये अध्यापका अध्येतारश्च तैरध्याप्यमानत्वात् अधीयमानत्वाच्चास्यापि वेदत्वमिति भावः। पुष्पितत्वं वर्णसमाम्नायमूलकव्याकरणशास्त्रद्वारेण, फलितत्वञ्च शब्दप्रयोगेणेति बोध्यम्।

उक्तम् इति। नन्दिकेश्वरकृतायां काशिकायां चतुर्दशसूत्रव्यानभूतायामनुबन्धानां महेश्वरकृतत्वं स्पष्टमुक्तम्।

नृत्तावसाने इति। आत्मतत्त्वं वागाद्यगोचरमिति ज्ञापनाय ढक्कानिनादव्याजेन सनकादिसिद्धान् = एतन्नामकसिद्धविशेषान्, उद्धर्तुकामः = उद्दिधीर्षुः नटराजराजः विश्वरूपविलासवैचित्र्यचमत्कारप्रवीणत्वेन नटराजराजत्वेन प्रसिद्धिमुपगतो भगवान् शिवः नृत्तावसाने ताण्डवसमाप्तौ नवपञ्चवारम्=चतुर्दशवारं ढक्कां वाद्यविशेषं ननाद। अन्तर्भावितण्यर्थतया नादयामास। णिजर्थस्यान्तर्भावं विना धातोः सकर्मकत्वाभावेन ढक्कामिति कर्मनिर्देशोऽयुक्तः स्यादिति।

अत एव वर्णसमाम्नाय के श्रुति होने से ही 'वह यह अक्षरसमाम्नाय पुष्पित फलित तथा चन्द्र-तारकादि के समान प्रतिभामण्डित = सुशोभित ब्रह्मराशि है' इस भाष्य की व्याख्या भर्तृहरि ने इस प्रकार की है—जैसे चन्द्र तारका आदि मनुष्यकृत न होने से अपरिच्छिन्न हैं, उसी प्रकार इस वर्णसमाम्नाय का कोई आधुनिक देहधारी कर्त्ता=रचयिता नहीं है। वेद की परम्परा अर्थात् गुरुशिष्य की परम्परा से इसका स्मरण किया जाता है। वर्णसमाम्नाय के आधार पर व्याकरण की रचना होने से वर्णसमाम्नाय में पुष्पितत्व एवं साधु शब्द के प्रयोग से फलितत्व सिद्ध होता है।

'अनुबन्ध महेश्वर कृत है' इसमें प्रमाणोपन्यास करते हैं—**उक्तञ्चेति**। सनक आदि सिद्धगणों को ज्ञान द्वारा उद्धार की इच्छा से नटराज भगवान् शङ्कर द्वारा अपने ताण्डव नृत्य के बाद

---

१. वस्तुतस्तु चिरस्थायीत्यर्थः; महाप्रलये चन्द्रादेरपि विनाशात्। वर्णसमाम्नायोऽपि तथैव।

अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम् ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥" इति ।

धात्वर्थं धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थम् । अत एव 'अनुबन्धकरणार्थश्च वर्णानामुपदेशः' इत्युक्तं भाष्ये । अत्र करणशब्दप्रयोगेणानुबन्धानां सादित्वं सूचितम् । तत्करणञ्चोपदेशकर्तृकर्तृकमेव; प्रत्यासत्तेः । तेन तद्व्यतिरिक्तस्य सर्वस्यानादित्वं सूचितम् ।

अत्र सनकाद्युद्धरणेच्छयाऽस्य ब्रह्मोपदेशरूपत्वं सूचितम् । तच्च श्रुतित्वाभावे न सङ्गच्छते, 'श्रोतव्यः श्रुतिवाक्येभ्यः' इत्युक्तेः ।

तदेतद् ढक्कानिनादोद्भूतं शिवसूत्रजालं = महेश्वरप्रसादलब्धं वर्णात्मकसूत्रसमूहं विमर्शे = अहं नन्दिकेश्वरो विचारयामि । यद्यपि मृश्धातुः परस्मैपदी, विमृशामीति युक्तम्, तथापि आर्षत्वात् आत्मनेपदम् । अथवा नैतद् 'विमर्शे' इति क्रियापदं किन्तु सप्तम्यन्तम्, तथा च विमर्शे सति = विचारे सति, एतद्=ढक्कानिनादरूपं शिवसूत्रजालम् । बभूवेति शेषः । तथा च न परस्मैपदप्राप्तिशङ्कावकाशः ।

अत्र सर्वत्रेति । नादोत्पन्नेषु सर्वेषु सूत्रेषु । 'अन्त्यवर्णचतुर्दशः' इति पाठः । अन्त्या वर्णाश्चतुर्दश यत्र समुदाये स समुदायः । तथा चतुर्दशसूत्रेषु अन्तिमानि अक्षराणि अन्त्यानि चतुर्दश सन्ति । अतः चतुर्दशसूत्रीरूपः समुदायः ।

धात्वर्थम् = धातुमूलकव्याकरणशास्त्रस्यारम्भार्थम्, समुपादिष्टम्=सम्यक् उचितम् उप = तत्समीपे कृत्वा आसमन्तात् कल्पितम् । पाणिन्यादिमुनीनामिष्टस्य=अभिमतस्य व्याकरणस्य सिद्धये इदमन्त्यमक्षरमुपदिष्टमिति भावः ।

अत एव इति । अनुबन्धानां सादित्वादेव । अनुबन्धकरणार्थश्च = अनुबन्धानां = चतुर्दशसूत्र्याः अन्त्याक्षराणां करणार्थम् = संयोजनार्थम् । वर्णानाम् = अइउ इत्यादीनामुपदेशः = कथनम् । **अत्रेति** भाष्ये करणशब्दस्य प्रयोगेण=निर्देशेन अनुबन्धानां सादित्वम्= आदिमत्त्वं ज्ञापितम् । तत्करणञ्च = अनुबन्धानां कृतत्वञ्च, उपदेशकर्तृकर्तृत्वमेव = उपदेशकर्त्ता महेश्वरः स कर्त्ता निर्माता यस्य तत्, महेश्वरकर्तृकमेवेत्यर्थः । प्रत्यासत्तेः सामीप्यात् = महेश्वरस्यैव ढक्कानिनादद्वारेण वर्णसमाम्नायस्योपदेशकत्वेन श्रवणात् तस्य प्रकृतत्वादत एव सामीप्यम् ।

तेनेति । 'अनुबन्धकरणार्थश्च'इति भाष्येण तद्व्यतिरिक्तस्य = अनुबन्धातिरिक्तस्य सर्वस्य वर्णस्य अनादित्वम् = नित्यत्वं सूचितम् = ज्ञापितम् । **अत्रेति ।** काशिकायाम् ।

चौदह वार डमरू (ढक्का) का निनाद ही शिव-सूत्रके रूप में हुआ—ऐसा निश्चय विमर्शे सति = विचार करने पर होता है ।

मृश् धातु परस्मैपदी होने से 'विमर्शे' यह प्रयोग तिङन्त का नहीं है । अतः विमर्शे— विचारे सति—इस प्रकार का अर्थ किया गया है । यहाँ 'प्रतीमः' ऐसा अध्याहार है ।

यहाँ सभी माहेश्वर सूत्रों के अन्तिम चौदह वर्णों का धातुमूलक व्याकरणशास्त्र की रचना के लिये महर्षि पाणिनि आदि के इष्टसिद्धयर्थ उपदेश किया गया है । इसलिये भाष्यकार ने भी अनुबन्ध के संयोजन के लिये वर्णों का उपदेश है, ऐसा कहा है ।

करण शब्द का प्रयोग अनुबन्धों के सादित्व का सूचक है । अनुबन्धों का करण अन्य द्वारा न होकर जिसने वर्णसमाम्नाय का उपदेश किया है उसी के द्वारा उसका संयोजन भी

ऋक्तन्त्रव्याकरणे शाकटायनोऽपि—**'इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽऽचार्या ऊचुः—ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः, तं खल्विममक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयाद्, ब्रह्मराशिः' इति । ब्रह्मराशिरित्यस्य ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः । तत्त्वञ्च** नन्दिकेश्वरकृतकाशिकायां **स्पष्टम् ।**

सनकाद्युद्धरणेच्छया = सनकादीनाम् ऋषिविशेषाणाम्, उद्धारकामनया । उक्तस्येति शेषः । अस्य = ढक्कानादरूपस्य ब्रह्मोपदेशरूपत्वम् = मायातीतस्य सत्यज्ञानानन्दात्मकस्य ब्रह्मणो बोधकरूपत्वं कथितम् । **तच्च** = ब्रह्मोपदेशरूपत्वञ्च श्रुतित्वाभावे = अक्षरसमाम्नायस्य वेदत्वानभ्युपगमे, न संगच्छते=सङ्गतिर्न स्यात् । कुतः एवमित्याह—**श्रोतव्य** इति । श्रुतिवाक्येभ्यः वेदवचनेभ्यः = श्रोतव्यः = उपदेशो ग्राह्य इत्युक्तेः । श्रुतिवाक्येभ्य इत्यस्य श्रुतिसदृशेभ्यः परमाप्तवाक्येभ्यः इत्यर्थोऽभिप्रेतः । तेन आचार्यगीता-ब्रह्मसूत्रादिना ब्रह्मश्रवणे बाधकाभावः ।

यत्तु श्रुत्यर्थबोधकवाक्येभ्यः इति, तस्याः तात्पर्यार्थं मत्वा उक्तदोषं परिहरन्ति, तन्न; तथार्थाभ्युपगमे चलचित्रादौ श्रुत्यर्थप्रतिपादकवाच्यानामपि येन केनचित् प्रयुक्तानां ब्रह्मोपदेशकत्वापत्तेः । नचैवमिष्यते; विषसम्पृक्तान्नवत् तस्य सर्वथा तितिक्षूणां हेयत्वात् । न च गायिकानां वाराङ्गनानाम् अभिनयपात्राणां वा मन्त्रोपदेशकत्वं लोके श्रुतम्; ब्रह्मोपदेशकत्वं तु दूरे आस्ते !

उक्तार्थं द्रढीकर्तुं प्रमाणान्तरमाह = **ऋक्तन्त्रे**ति । एतन्नामके व्याकरणे शाकटायनाचार्य एवमाह = इदम् अक्षरच्छन्दः अक्षराणां बोधकं वेदरूपम्, वर्णशः=वर्णं वर्णं व्याप्य, वीप्सायां शस् । समनुक्रान्तम् = सम्यक् क्रमेण दर्शितम् । मयेति शेषः । यथा आचार्या उचुः=कथितवन्तः—'ब्रह्मा बृहस्पतये प्रोवाच,वृहस्पतिरिन्द्राय,इन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः तं खल्विममक्षरसमाम्नायम् इति, एतावत्पर्यन्तं स्पष्टार्थम् । आचक्षते = कथयन्ति । न भुक्त्वा = भोजनान्तरं न नक्तं = न रात्रौ प्रब्रूयात्= उच्चारयेत् । अनुच्चारणे हेतुमाह–**ब्रह्मराशिः**=ब्रह्मप्रतिपादको वर्णराशिः । अयं वेदराशिस्तु न वक्तुं शक्यते; समूहस्य वेदत्वेन एकैकस्य वर्णस्य वेदत्वाभावेन वेदराशित्वस्य वक्तुमशक्यत्वात् ।

प्रत्यासत्ति से युक्तियुक्त है । अतः इन अनुबन्धों के अतिरिक्त सभी की अनादिता सूचित होती है । सनकादि सिद्धों के उद्धारार्थ वर्णसमाम्नाय का उपदेश करने से इसकी ब्रह्मोपदेशरूपता सूचित होती है, क्योंकि श्रुतिवाक्यों से ही ब्रह्मज्ञान प्राप्त करना चाहिये'—इस वचन के अनुसार वर्णसमाम्नाय को श्रुति न स्वीकार करने पर इसकी ब्रह्मोपदेशरूपता असङ्गत हो जायगी ।

ऋक्तंत्र व्याकरण में शाकटायनाचार्य ने भी कहा है—यह अक्षर = नित्य छन्दः वेद वर्णश : = वर्णों में व्याप्त होकर दिखाया गया, जिस प्रकार आचार्यों ने कहा है—ब्रह्मा जी ने वृहस्पति को, वृहस्पति ने इन्द्र को, इन्द्र ने भरद्वाज को, भरद्वाज ने ऋषियों को और ऋषियों ने ब्राह्मणों को कहा । इसको अक्षरसमाम्नाय कहते हैं । इस ब्रह्मप्रतिपादक वर्णराशि को भोजन करने के बाद तथा रात्रि में नहीं बोलना चाहिये । इसकी ब्रह्मप्रतिपादकता नन्दिकेश्वरकृत काशिका में स्पष्ट की गयी है ।

अत एव 'वृत्तिसमवायार्थो वर्णानामुपदेशः कर्त्तव्यः' इति भाष्ये **उक्तम्**। पाणिने**र्लाघवेन शास्त्रप्रवृत्तिफलको यः समवायो वर्णानां क्रमेण सन्निवेशस्तदर्थं इति तदर्थः। स चाणादिप्रत्याहारद्वारा शास्त्रप्रवृत्त्यर्थः। एवञ्चायमुपदेशः** पाणिने**रन्यकृत इति स्पष्ट-**

शङ्का—'नारद इत्यबोधि' (शिशु० व० १-३) इति माघपद्ये यथा इति-निपातेन कर्मत्वस्योक्तत्वेन नारदपदोत्तरं द्वितोया न भवति, तथैवात्रापि 'इत्याचक्षते' इत्यत्र निपातरूपेण इतिशब्देनाभिधाने कर्मत्वस्योक्तत्वात् द्वितीया अक्षरसमाम्नायपदात् उत्पत्तुं नार्हति ?

समाधानम्—तं खल्विमम् अक्षरसमाम्नायं ब्रह्मराशिरिति हेतोर्न भुक्त्वा न नक्तं प्रब्रूयात् इति ऋषयो ब्राह्मणेभ्यः आचक्षते इति शाकटायनोऽप्याह—इत्येवमन्वयं कृत्वा समादधति **सदाशिवभट्टाः**। **ज्योत्स्नाकृतस्तु**–द्योतकसमुच्चये बाधकाभावात् कर्मद्योतकस्य इति-शब्दस्य सत्त्वेऽपि द्वितीया भवति। 'नारद इत्यबोधि' इत्यत्र निपातस्य वाचकतापक्षः समादृतः। वाचकानां समुच्चयो नोचितः, अतस्तत्र न द्वितीया। अत्र तु द्योतकतापक्षः स्वीकृतः। तेषां समुच्चयो दृश्यते। अत एव 'कीर्तयिष्यन्ति मनुजाः शताक्षीम्' इति, 'मां ततः वदन्त्यपर्णामिति,' 'तां पुराविदः' इत्यादौ इति-शब्दसत्त्वेऽपि द्वितीयायाः प्रयोगः साधु संगच्छते इति वदन्ति।

तत्त्वञ्चेति ब्रह्मप्रतिपादकत्वञ्च। नन्दिकेश्वरकृतायां काशिकायां स्पष्टम्। तत्र अः परमेश्वरो निर्गुणः इं मायामाश्रित्य उः व्यापकः सगुणः ण् आसीत् इत्याद्यर्थो निरूपितः।

अत एवेति। अनुबन्धानां पाणिनिभिन्नकर्तृकत्वादेव। वृत्तिसमवायार्थः=वृत्तिः शास्त्राणां प्रवृत्तिः तत्प्रयोजनको यः समवायः वर्णानां सन्निवेशः तदर्थः वर्णानामुपदेश उच्चारणमित्यर्थं व्याचष्टे **पाणिनेरित्यादिना**।

वर्णसमाम्नायस्य कथं शास्त्रं प्रवृत्त्यर्थत्वमत आह—**स चेति**। सः=वर्णानां समवायः अणादिप्रत्याहारद्वारा अक्षरसमाम्नाये सत्येव अणादिसंज्ञाभिर्लघुनोपायेन 'इको यणचि' इत्यादीनां प्रवृत्तिः सम्भवति। अतः तदर्थः।

एवञ्चेति। 'वर्णोपदेशः पाणिनेर्लाघवेन शास्त्रप्रवृत्तये कृतः' इत्युक्ते सति अयमुपदेशः=वर्णोपदेशः अन्येन भगवते पाणिनये=कृत इति स्पष्टम्। न च उपदेशपदमन्यत्र

अन्तिम वर्ण महेश्वरकृत ही हैं—इसमें प्रमाण देते हैं—**वृत्ति** इति।

वृत्ति = शास्त्रों की प्रवृत्ति अर्थात् लाघव से आचार्य पाणिनि की प्रवृत्ति एवं उसके लिये जो समवाय = वर्णों का क्रमिक सन्निवेश इसी प्रयोजन के लिये अ इ उ ण् इत्यादि वर्णों का उपदेश करना चाहिये।

स च इति। वर्णसमाम्नाय अणादि प्रत्याहार साधन द्वारा शास्त्रप्रवृत्ति में उपयोगी है। इस प्रकार आचार्य पाणिनि को इसका उपदेश अन्य के द्वारा प्राप्त होना निश्चित होता है। पाणिनीय शास्त्रप्रवृत्ति के लिये वर्णोपदेश है। इसके द्वारा आचार्य को अन्य से उपदेश प्राप्त हुआ है ऐसी स्पष्ट प्रतीति होती है।

यद्यपि आद्योच्चारणार्थक उपदेश पद का प्रयोग अनादि वर्णसमाम्नाय में असम्भव है; क्योंकि अनादि नित्य का उच्चारण नहीं हो सकता। तथापि मन्त्रोपदेश के समान उच्चारणमात्र

एषामन्त्या इतः । लण्सूत्रेऽकारश्च ।

मेवोक्तम् । मन्त्रोपदेश इतिवच्चात्रोपदेशपदप्रयोगः । अत एवास्य ज्ञाने सर्ववेद-पारायणजं पुण्यं फलमिति भाष्ये उक्तम् । व्याकरणमुपक्रम्य 'वेदानां वेदः' इति छन्दोग-श्रुतिरप्येतत्परैवेति दिक् ।

तत्प्रयोजनमाह—सञ्ज्ञार्थानीति । **एतच्चोपपादितम् । सञ्ज्ञाप्रणयनञ्च लाघवेन शास्त्रप्रवृत्त्यर्थमिति बोध्यम् ।**

सञ्ज्ञार्थत्वोपपत्तये आह—एषामिति ।

अकारश्चेति । **तेन रमत्याहारसिद्धिः । अनन्त्यत्वात् पृथगुक्तिः । इदं 'तुल्यास्य' (१ । १ । ९) सूत्रस्थकैयटानुरोधेन ।**

पाणिनीयाद्योच्चारणार्थकत्वेन गृहीतमत्रापि महेश्वरीयापूर्वोच्चारणार्थकं प्राप्नोति । तथा च महेश्वरनिर्मितत्वं वर्णानां प्राप्नोतीति कथमस्य वेदत्वमिति वाच्यम् । मन्त्रोपदेश इत्यत्र कृतेन उपदेशपदेन मन्त्रदातुर्यथा मन्त्रकर्तृत्वं न सिध्यति, केवलमसौ शिष्टान् अज्ञातं बोधयति; तथैवात्रापि अज्ञातार्थज्ञापकतामात्रेण उपदेशशब्दस्य प्रयोगः ।

अत एवेति । ब्रह्मप्रतिपादकत्वादेव । अस्य = वर्णसमाम्नायस्य, ज्ञाने सर्वेषां वेदानां पारायणे = पाठे भवतीति—भाष्ये उक्तम् । व्याकरणोपक्रमे वेदानां वेदः—इति छन्दोगश्रुतिरपि वर्णसमाम्नायमेवाधिकृत्य प्रवृत्ता एतत्परैव नान्यपरा इति ।

वर्णोपदेशप्रयोजनमाह—**संज्ञार्थानीति** । संज्ञायै इमानि इति चतुर्थीसमासं चिदस्थिमालाकृतो वदन्ति; परमस्मिन् पक्षे नपुंसकत्वं दुर्घटम् अर्थशब्दस्य नित्यं पुंस्त्वात् अजादिसंज्ञाफलकानीत्यर्थः । एतस्य एषां क्रमबोधकत्वेऽपीत्यादिना प्रागुपपाद-नात् । संज्ञाया विधानञ्च लाघवेन शास्त्रप्रवृत्त्यर्थमित्यपि प्राङ् निरूपितम् ।

अजादि प्रत्याहारसिद्धये आह—**एषामन्त्या इत** इति । इत्संज्ञका इत्यर्थः ।

'लण्'सूत्रघटकाकारोऽपि इत्संज्ञकः । तदाह—**लण्सूत्रेऽकारश्च** । लकारस्या-कारो न लण्सूत्रस्य अन्त्यो वर्णः, अतः 'एषामन्त्या इतः' इति नियमेन इत्संज्ञाया अप्राप्ते

अर्थ में यहाँ प्रयोग किया गया है । **अतएव** इति । ब्रह्मोपदेशक श्रुति होने से ही वर्णसमाम्नाय के ज्ञान से सकल वेद के पारायणजन्य पुण्य फल की प्राप्ति कही गयी है । इसीलिये व्याकरण के प्रसङ्ग में 'वेदों का वेद है'—इस प्रकार की छन्दोग श्रुति का तात्पर्य भी वर्णसमाम्नाय के सम्बन्ध द्वारा ही उपपन्न होता है ।

वर्णसमाम्नाय के उपदेश का प्रयोजन अणादि प्रत्याहारों की सिद्धि है । यही 'अणादि-संज्ञार्थानि' इससे कहा गया है । 'अइउण्' इत्यादि सूत्रों की क्रमवान् वर्णों के बोधक होने से 'आदिरन्त्येन' इस सूत्र के साथ एकवाक्यतापन्न होकर प्रत्याहार की शक्ति का ज्ञापन द्वारा विधि और निषेध सूत्रों की प्रवृत्ति में उपयोगिता का उपपादन पूर्व में किया जा चुका है ।

प्रत्याहारों की सिद्धि के लिये चतुर्दश सूत्रों के अन्त्य अक्षरों की इत्संज्ञा का प्रतिपादन करते हैं—**एषामिति** । 'एषामन्त्या इतः' इससे लण्-सूत्रघटक अकार की इत्संज्ञा का संग्रह न होने से वाक्यान्तर का उपन्यास करते हैं—**अकारश्चेति** । लकाराकार की इत्संज्ञा होने

परे त्वस्यानुनासिकत्वे "अतो ऌान्तस्य" (७ । २ । २) इति सूत्रे पाणिनिर्लकारं नोच्चारयेत्; प्रत्याहारेणैव निर्वाहात् ।

किञ्च, अस्येत्सञ्ज्ञकत्वे बहुषु यण्पदघटितसूत्रेष्वर्द्धमात्रालाघवानुरोधेन यप्रत्याहारेणैव व्यवहरेत् ।

पृथगेतदर्थं 'लण्सूत्रे अकारश्च' इत्यनेन इत्संज्ञाया बोधनेन र-प्रत्याहारः सिध्यति । अन्त्येन इता=रघटकेन इत्संज्ञकसदृशेन अकारेण सह उच्चार्यमाणः आदिरेफः स तयोः रेफस्य अकारस्य च, समुदायरूपः र इति आदिः वर्णस्य रेफस्य, मध्यगवर्णस्य लकारस्य च बोधको भवति । [1]रप्रत्याहारसिद्धेरेतस्य अकारस्येत्संज्ञकत्वे प्रयोजनमिति मतं सिद्धान्तकौमुदीकारस्य ।

शेखरकारास्तु र-प्रत्याहारं न मन्यन्ते । **कैयटेति** । पूर्वं यत्प्रतिपादितम् तत् कैयटमतानुसारेण । स्वमतस्यायमाशयः—यदि लण्सूत्रघटकोऽकारेऽनुनासिकः स्यात् तदा उक्तरीत्या 'अतो ऌान्तस्य' इत्यत्र रप्रत्याहारबोधकरशब्दोपादानेन रलयोर्बोधसम्भवात् पृथग् लकारोपादानं किमर्थं सूत्रे कृतमिति तत्सामर्थ्यात् निश्चीयते—नानुनासिकत्वेनेत्संज्ञकोऽकारः । अतो र-प्रत्याहाराभावात् रलयोरुपादानं सूत्रे चरितार्थम् । किञ्च, यदि पूर्वोक्तदिशा रप्रत्याहारः स्वीक्रियेत, तदा 'इको यणचि' इति सूत्रे यण्पदमपहाय यप्रत्याहारेण सूत्रकारो व्यवहरेत् ।

से र प्रत्याहार की निष्पत्ति होती है । 'तुल्यास्यप्रयत्नम्' इस सूत्र के कैयटानुरोध से लण्-सूत्रघटक अकार की इत्संज्ञा का कथन है । वस्तुतः लकाराकार की इत्संज्ञा आवश्यक नहीं है ।

परे तु इति । यदि लकाराकार अनुनासिक होता तो आचार्य पाणिनि 'अतो ऌान्तस्य' इस सूत्र में लकार का उच्चारण नहीं करते । लकाराकार से र प्रत्याहार की सिद्धि द्वारा र पद के निर्देश से र ल इस उभय का बोध हो जाने के कारण पृथक् लकार के उच्चारण की आवश्यकता नहीं है ।

अकार की इत्संज्ञा में दूषणान्तर भी देते हैं—किञ्च इति । यण् के उच्चारण करने की अपेक्षा लकाराकार से निष्पन्न या प्रत्याहार के व्यवहार में जहाँ अर्द्धमात्रिक णकार के अनुच्चारण से अर्द्धमात्रा का लाघव है, जैसे 'संयोगादेरातोधातोर्यण्वतः' यहाँ 'यवतः', 'यणादेः पूर्वस्य च गुणः' यहाँ 'यादेः' इस प्रकार का ही निर्देश लाघव होने से सूत्रकार को करना उचित था । 'इग्यणः सम्प्रसारणम्' यहाँ यस्य और 'यणो मयो द्वे' यहाँ भी अर्थद्वयप्रतीति के लिये यण् के निर्देश की अपेक्षा यस्मात्, यस्य—इन दोनों के निर्देश में लाघव नहीं है । अतः ग्रन्थकार ने 'सर्वत्र' न लिखकर 'बहुषु' ऐसा लिखा है । जहाँ 'य' प्रत्याहार के निर्देश में लाघव नहीं है उन स्थानों में णकार से प्रत्याहार के व्यवहार की छूट है—यह भाव है ।

'अकार अनुनासिक होने से इत्संज्ञक है' इसमें भाष्योक्त तृतीय हेतु की अव्यापकत्वापत्तिरूप दोष का उद्भावन करते हैं—

---

१. तुल्यास्यसूत्रे लपरत्वं वक्ष्यामीति भाष्यस्याशयं स्फुटीकर्तुं कैयटस्तत्र रप्रत्याहाररूपेण व्याख्यास्यामीति उक्तवान् ।

किञ्च, अनुबन्धानामच्प्रत्याहारे ग्रहणाभावे 'आचारादप्रधानत्वाल्लोपश्च बलवत्तरः' इति भाष्योक्तस्य तृतीयहेतोरव्यापकत्वापत्तिः। तव लोपस्य बलवत्त्वेऽपि हल्प्रत्याहारसिद्धेः प्रागचपदार्थनिष्पत्त्यभावेन 'उपदेशेऽजनुनासिक' (१। ३। २) इत्यस्य

तथा च उत्वे गुणे पूर्वरूपे च कृते इको योऽचोति सूत्रस्वरूपे णकारानुच्चारणेन अर्धमात्रायाः लाघवमिति कथं न ईदृगेव सूत्रं रचितम्। तेन रप्रत्याहारसाधकं लकाराकारस्यानुनासिकत्वं नेति ज्ञायते। बहुषु 'इको यणचि' 'इणो यण्' इत्यादिसूत्रेषु। यत्र तु 'इग्यणः,' 'यणो मयो' इत्यादौ यस्येति कथन्ते गौरवं तत्र यप्रत्याहारेण निर्दिशेत्। अत एव बहुषु उक्तं न सर्वत्रेति।

किञ्च अनुबन्धानामप्रत्याहारे ग्रहणाभावे हेतुत्रयं भगवता भाष्यकृता उक्तम्। **आचारात्, अप्रधानत्वात्, लोपश्च बलवत्तर** इति। आचारात्=अनुनासिक इत्यादौ ककारे परस्मिन् सति यणोऽकरणरूपात्, आचार्यस्य पाणिनेर्व्यवहारात्। अप्रधानत्वात् = अचाम् अक्षु हलां हल्षु च प्राधान्येन पाठात्।

अच्-प्रत्याहारे णकारककाराद्यनुबन्धानां पाठस्य अप्राधान्यात् न ग्रहणम्। अनुबन्धानां प्रत्याहारग्रहणे ग्रहणं न भवतीत्यत्र तृतीयो हेतुः—**लोपश्च बलवत्तरः** इति। पूर्वं वर्णानामुपदेशः, तदुत्तरकालम् इत्संज्ञा, तदुत्तरम् आदिरन्त्येनेति प्रत्याहारः—इति नियमात् प्रत्याहारसिद्धेः प्रागेव इत्संज्ञालोपाभ्याम् अनुबन्धानां निवृत्तेः अजादिपदशक्तिग्रहवेलायां तेषामनुबन्धानामसत्त्वात् तद्वर्णनिरूपितायाः शक्तेः 'आदिरन्त्येन' इति सूत्रेण बोधयितुमशक्यत्वाद् अजादिप्रत्याहारेण न तेषां ग्रहणमिति प्रतिपादितम्।

लण्-घटकाकारस्यानुनासिकत्वेन इत्संज्ञकत्वे तु हलादिप्रत्याहारे अनुबन्धभूतस्य लणोऽकारस्य ग्रहणाभावे 'लोपशास्त्रस्य वलवत्त्वादि'ति हेतोरप्रसक्तेः अनुबन्धमात्रस्य प्रत्याहारग्रहणेन ग्रहणाभावे भाष्योक्तस्य तस्य हेतुत्वं स्वल्पदेशवृत्तित्वरूपाव्यापकत्वं स्पृशति।

अकारानुबन्धे हेतौ अप्रसक्तिरित्थम्—हल् प्रत्याहारो यावन्न सिध्यति तावत् अच्-प्रत्याहारसिद्धये अपेक्षिताया चकारस्येत्संज्ञायाः 'हलन्त्यम्' इति सूत्रेण हल्-पदार्थाज्ञानात् कर्तुमशक्यतया हल्-प्रत्याहारसिद्धिः अच्-प्रत्याहारसिद्धेः पूर्वं कर्तव्या।

किञ्च इति। अजादि प्रत्यहार से अच्घटित अच्, इक्, इण् इत्यादि प्रत्याहार विवक्षित हैं। भाष्यकार ने अच्घटित प्रत्याहारों में इत्संज्ञक वर्णों के ग्रहण की आशङ्का का क्रमशः तीन युक्तियों से समाधान किया है। पहला हेतु है—

आचारात्—अर्थात् आचार्य पाणिनि के व्यवहार से यह कल्पना की जाती है कि इत्संज्ञक वर्णों का ग्रहण अजादि प्रत्याहार में नहीं होता है। अन्यथा अनुनासिक इसमें ककार को अच् मानकर उसके पूर्ववर्ती इकार को यणादेश अवश्य कर्तव्य था। वैसा नहीं देखने से उक्त कल्पना प्रामाणिक है।

दूसरा हेतु है—**अप्रधानत्वात्**। अच् वर्णों के मध्य में हल् वर्णों के बीच में अच् अक्षरों का निर्देश अप्रधान है। 'तुल्यजातीयान् तुल्यजातीयेषु उपदिशति—अचोऽक्ष् हलो हल्षु' इस भाष्य के अनुसार 'अच्प्रत्याहारवाच्यों में ग्रहणार्थत्वरूप प्राधान्य अचों में अच् का हलों में हल् का ही है। हल् का अच् में अच् का हल् में पाठ अप्रधान है' यह भाव है।

वाक्यार्थाभावेन लणित्यकारस्येत्सञ्ज्ञालोपयोरभावेन प्रत्याहारेषु जातिग्रहणपक्षस्यैव भाष्यकृता सिद्धान्तितत्वेन हल्प्रत्याहारे लणित्यकारप्रवेशे 'मामाँस्त्रायस्व' इत्यत्रानुनासिकपक्षेऽनुस्वारापत्तिर्दुर्वारा, 'सोऽस्ति' इत्यादौ सुलोपाद्यापत्तिश्च । अत एव—

तथा च तस्मिन् काले लण्घटकाकार इत्संज्ञामननुभवन् लोपशास्त्रस्यापि प्रवृत्त्युद्देश्यतां नावगाहते । इत्येवं रीत्या लोपश्च बलवत्तर इति हेतोरप्रसक्तिस्तत्र । हल् प्रत्याहारे अनुनासिकाकारस्य ग्रहणेऽपि अणुदित्सूत्रघटकस्य अण्पदस्य शक्तिग्रहकाले इत्संज्ञालोपाभ्यामकारस्य निवृत्तेः तस्यासन्निधानात् सवर्णग्रहणेन निरनुनासिकस्य ग्रहणं न स्यादित्यत आह—**प्रत्याहारेषु इति** । अण्-ग्रहणं प्रत्याख्याय जातिपक्षस्यैव भाष्ये समर्थितत्वात् निरनुनासिकस्यापि ग्रहणम् । तथा च अकारस्य सानुनासिकस्यापि हल्-प्रत्याहारग्रहणे मा माँस्त्रायस्व अन्धातोः क्विप् 'अनुनासिकस्य' इति दीर्घे सम्बोधने हे आन् इति । माम् आन् त्रायस्व (आचारिणस्तु अशब्दस्य द्वितीयाबहुवचने आन् त्रायस्वेत्यनेन सम्बन्धे 'नश्छव्यप्रशान्' इति रुत्वे अनुनासिके आँ इति रूपसत्त्वे 'त्रायस्व' पद-सम्बन्धेन मा माँस्त्रायस्वेति) इत्यत्र हल् प्रत्याहारे अकारस्यापि ग्रहणेन मकारस्य 'मोऽनुस्वारः' इत्यनेन अनुस्वारः स्यात् । जातिपक्षाश्रयणफलम् ह्रस्वाकारस्येव दीर्घाकारस्यापि हल्-प्रत्याहारे ग्रहणसिद्धिः । एवं सोऽस्तीत्यत्रापि अस्ति घटकाकारस्य हल्ग्रहणेन ग्रहणात् एतत्तदोरिति सूत्रेण सुलोपापत्तिः, अनुनासिकाकारेण निरनुनासिकस्यापि अकारस्य जातिपक्षाश्रयणेन ग्रहणात् ।

तीसरा हेतु दिया है—'**लोपश्च बलवत्तरः**' इति । इसका आशय इस प्रकार है—'पूर्वं वर्णानामुपदेशः, तदुत्तरकाला इत्संज्ञा, तदुत्तरम् आदिरन्त्येनेति प्रत्याहारः'—'इत्यादि भाष्य वचन से अजादि प्रत्याहारसिद्धि से पहले इत्संज्ञा होने से अजादि प्रत्याहार-शक्तिग्रह वेला में लोप होने के कारण इत्संज्ञक वर्णों का ग्रहण नहीं हुआ । यदि लण् सूत्र का अकार इत्संज्ञक माना जायगा तो हल् प्रत्याहारसिद्धि के पहले अच् के चकार की इत्संज्ञा न होने से अच् पदार्थ का शक्तिग्रह 'आदिरन्त्येन' इस सूत्र द्वारा सम्भव न होने के कारण 'उपदेशेऽजनुनासिक इत्' इस सूत्र के द्वारा अकार की इत्संज्ञा एवं 'तस्य लोपः' इससे लोप की प्रवृत्ति नहीं होगी ।

इस प्रकार इत्संज्ञायोग्यत्वरूपानुबन्धत्व लकाराकार में है, किन्तु लोपशास्त्रीयोद्देश्यता इत्संज्ञकत्व इसमें नहीं है । अतः सकलपक्ष में हेतु न रहने से हेतु की पक्षतावच्छेदक की अपेक्षा अव्यापकता होने से भागासिद्धि-दोषग्रस्त हेतु है ।

लोपशास्त्रीय की उद्देश्यता लकाराकार में हल् प्रत्याहार की शक्ति के बोध-समय में न होने से हल् प्रत्याहार की बोध्यता का निर्णय अकार में भी हो जाने से 'माम् + आंस्त्रायस्व' यहाँ मकार को 'मोऽनुस्वारः' इस सूत्र से सानुनासिक आँ को हल् मानकर अनुस्वार दुर्वार हो जायगा । अन् धातु से क्विप् 'अनुनासिकस्य' इससे दीर्घ, 'न ङिसम्बुद्धयोः' इससे नलोप का निषेध होने पर सम्बोधन में आन् इसका त्रायस्व के साथ सम्बन्ध करने पर 'नश्छव्यप्रशान्' इससे रुत्व एवं अनुनासिक होने पर उक्त रूप की सिद्धि होती है । अकार का हल्प्रत्याहार से ग्रहण होने पर भी मामां यहाँ आकार होने से ग्रहण नहीं होगा । इस शङ्का का निराकरण जातिपक्षाश्रयण द्वारा किया गया है । अनुनासिकत्व समानाधिकरण अत्वजातिमान् का अकार से ग्रहण होता है । अतः 'आ' भी गृहीत हो जायगा । ह्रस्वत्वसमानाधिकरण अत्वजातिमान् के ग्रहण मानने पर

'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।'

इत्यनेन प्रत्याहारे वर्णसमाम्नाये य एतेऽक्षु अज्बोधकसूत्रेषु प्रत्याहारार्था अनुबन्धाः क्रियन्ते तेषामज्ग्रहणेन ग्रहणं कस्मान्नेत्यर्थकेनाच्प्रत्याहारे शङ्का कृता, न हल्प्रत्याहारे। भाष्ये च 'अइउण्' (मा० सू० १) इत्यादिसूत्रचतुष्टयोपादानेनैवास्य प्रवृत्तिर्दर्शिता। तत्र प्राधान्यं प्रत्याहारेषु ग्रहणार्थत्वरूपम्, हल्षु च तथोपदेशस्तेषाम्, अक्षु तु

अत एव अकारस्य अनुनासिकत्वाभावेन अनित्संज्ञकत्वादेव प्रत्याहारे = वर्णसमाम्नाये अनुबन्धानाम् = इत्संज्ञकानाम्। अज्ग्रहणेषु गृह्यन्ते यानि ग्रहणानि तेषु कर्मणि ल्युट्। अच्संज्ञाग्राह्येषु अकारादिषु नेत्यर्थकेन वार्त्तिकेन य एते अज्बोधकेषु अ इ उ णादिसूत्रेषु प्रत्यहारार्थम् अनुबन्धा अजादिसंज्ञार्थमनुबध्यमानाणादयः क्रियन्ते, तेषाम् अनुबन्धानाम् अज्ग्रहणेन अजादिप्रत्याहारेण ग्रहणं कुतो न भवतीत्येवं **शङ्का अच्प्रत्याहारे** कृता; **न तु हल्प्रत्याहारे**। न चेदं वार्त्तिकमुपलक्षणतया शक्यते व्याख्यातुम्, कुतः? इत्याह—अ इ उ ण् **इत्यादिसूत्रचतुष्टयमुपादाय** वार्त्तिकमिदं प्रवृत्तमिति स्वयं भाष्यकृतैव व्याख्यातत्वेन उपलक्षणस्य कर्तुमशक्यत्वात्।

तत्रेति। वार्त्तिकघटकमध्यमहेतुस्वरूपे। अप्राधान्यघटकप्राधान्यञ्च = प्रत्याहारेषु ग्रहणार्थत्वरूपम् = प्रत्याहारेषु इत्यस्य प्रत्याहारग्राह्येषु वर्णेषु तुल्यजातीयान् तुल्यजातीयेषु उपदिशति अचो अक्षु हलो हल्ष्विति भाष्योक्तम्। हल्षु चेति हल्प्रत्याहारबोध्येषु हलामेव उपदेशः तथा = ग्रहणार्थत्वरूपः।

'सोऽस्ति' यहां भी 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि' इस सूत्र से अकार को हल् मान कर सस् के सकार का लोप हो जायगा। इस प्रकार विचार करने पर लण्घटक अकार की इत्संज्ञा नहीं होती—यह सिद्ध होता है।

इसका अनुमानाकार इस प्रकार है —

'अनुबन्ध प्रत्याहारजन्यबोधविषयत्वाभाव वाला हैं, लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्त होने से'। इसमें अनुबन्ध पक्ष है, प्रत्याहारजन्यबोधविषयत्वाभाव साध्य है, और लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्व हेतु है।

अत एव इति। अकार इत्संज्ञक नहीं है, इसीलिये भाष्यकार ने 'अचां ग्रहणम् अज्ग्रहणम्' अर्थात् अचों के ग्राहक अ इ उ ण् इत्यादि सूत्रों में प्रत्याहारेषु इसमें सप्तमी फल को निमित्त मानकर है। प्रत्याहार के लिये अनुबध्यमान णकारादिकों का ग्रहण क्यों नहीं होता? इसके द्वारा प्रत्याहार = वर्णसमाम्नाय में अज्बोधक अ इ उ ण् आदि सूत्रों में प्रत्याहारार्थ जो अनुबन्ध किये गये हैं उनका अच् ग्रहण से ग्रहण की आशङ्का अच् प्रत्याहार में ही की हल् प्रत्याहार में ऐसी आशङ्का नहीं की; क्योंकि हल्-प्रत्याहारबोधक सूत्रों में अनुबन्धरूप अच् कोई भी नहीं है। यदि लकाराकार में इत्संज्ञकत्वरूप अनुबन्धत्व होता तो यहां भी शङ्का आवश्यक थी।

शङ्का—वार्त्तिक द्वारा अच् प्रत्याहार से अनुबन्धों के ग्रहण की आशङ्का प्रत्याहारमात्र से अनुबन्धग्रहण आशङ्का का उपलक्षण है?

समाधान—'अ इ उ ण्' इत्यादि सूत्रचतुष्टयोपादान के अनन्तर ही वार्तिक से उक्त शङ्का का उत्थान किया गया है। हल्-प्रत्याहार में भी यदि शङ्का-समाधान इष्ट होता तो सम्पूर्ण

स्वराणामेव तथोपदेश इति प्राधान्यात् तेषामेव सञ्ज्ञित्वमिति भाष्ये **स्पष्टम्। न च हशादिप्रत्याहारे टग्रहणस्यापत्तिरिति वाच्यम्; हकारादिषु पुनःपुनरकारोच्चारणेन उच्चारणार्थवर्णरहितहलां तद्घटितप्रत्याहारे ग्रहणाभावस्य वक्तुं शक्यत्वात्; तद्विषयप्रयोगाणामनभिधानाच्च। तस्मादस्यानुनासिकत्वमप्रामाणिकम्। 'उरण् रपरः' (१।१।५१) इत्यत्र लग्रहणं कर्तव्यमेव। ऋऌवर्णयोः सावर्ण्यवदित्याहुः।**

अक्षु = अच्प्रत्याहारत्रोध्येषु च स्वराणामेवोपदेशो ग्रहणार्थतया इति तत्र तत्र तेषामेव = अचामेव, हलामेव च, प्राधान्यात्। संज्ञित्वम्=अजादिवाच्यत्वमिति भाष्ये स्पष्टम्। न च हल्षु हलां प्राधान्यात् हशादिप्रत्याहारे टकारादीनामपि मध्यपतितत्वात् हशादिप्रत्याहारबोध्यत्वापत्तिरिति वाच्यम्; **हकारादिषु** इति। हयव र इत्यादिप्रत्यक्षरम् अकारस्यैव वारंवारमुच्चारणेन उच्चारणे सौकर्याय निर्दिश्यमानवर्णे रहितानां हलां **तद्वर्णघटित** इति। तेन उच्चारणार्थवर्णेन घटिताः=सहिता हादिशब्दाः तद्बोधकप्रत्याहारे तेषाम् = अज्रहितहलां ग्रहणाभावस्य बोधनाच्च न दोष;।

हश्प्रत्याहारे ट्ग्रहणेऽपि समाधानमाह—**तद्विषयेति**। टविषयेत्यर्थः। टकारघटिततादृशप्रयोगाणामनभिधानात् प्रयोगाभाव इत्यर्थः। को यष्टिकष्टीकते इत्यादिप्रयोगाणां दर्शनात् प्रयोगाभावकथनं न युक्तिसहम्। उपसंहरति–**तस्मात्** पूर्वोक्तयुक्तिबलात् लकाराकारस्य अनुनासिकत्वकथनं न प्रमाणसिद्धम्, तवल्कार इत्यादौ लपरत्वविधानाय 'उरणरपरः' इति सूत्रे रपर इव लपरोऽपि वक्तव्य एव। यथा ऋकारस्य ऌकारस्य च स्थानिभेदात् सवर्णसंज्ञासूत्रानुसारेण अप्राप्ता 'ऋऌवर्णयोर्मिथः सावर्ण्यम्'इति वार्त्तिकेन कृता

प्रत्याहारों में मूलभूत हल् प्रत्याहार में ही शङ्का-समाधान का औचित्य था। अतः यहां शङ्का इष्ट नहीं है। इस प्रकार उपलक्षणतया वार्त्तिकोक्त शङ्का की योजना द्वारा कैयटमतस्थापन का प्रयास आयासमात्र ही समझना चाहिये।

प्रत्याहारेषु इति। प्रत्याहारग्राह्य अ इ उ इत्यादि वर्णों में ग्रहणार्थत्वरूप प्राधान्य है। हल् के बोधक सूत्रों में हल् का प्राधान्य से, अच्-बोधक सूत्रों में अच् का प्राधान्यन उपदेश है। अतः जिनका यहां प्राधान्येन उपदेश किया गया है, वहां वे ही अच् आदि पद से बोध्य होते हैं।

शङ्का – इस प्रकार अ इ उ ण् आदि सूत्रों चतुष्टय में उपान्त अनुबन्धों के ग्रहण की समस्या समाहित होने पर भी हश् आदि प्रत्याहारबोधक सूत्र ह य व रट् आदि सूत्रों में पठित अनुबन्धों का प्रत्याहार से ग्रहण की आशङ्का असमाहित ही रह जाती है?

समाधान—'हकारादि वर्णों के साथ बारम्बार अकार के उच्चारणसामर्थ्य से उच्चारणार्थक वर्ण से रहित हल् वर्णों का हल्घटित प्रत्याहार से बोध नहीं होता'—ऐसी कल्पना करने से उक्त दोष की व्यावृत्ति हो जायगी। अथवा तद्विषयक = तद्घटित शास्त्र विधेय घटित प्रयोगों का अभिधान हैं।

'रामो टीकते', 'को यष्टिकोटीकते'—इस प्रकार टकार को हश् के अन्तर्गत मानकर उत्वघटित प्रयोग का अभिधान है। इस प्रकार 'काश्मर्याः कृतमालमुद्गतदलं को यष्टिकष्टीकते' इस कविप्रयोग की असङ्गति नहीं हुई।

तद्वदेव वाचनिकं लपरत्वं कर्त्तव्यमेव, न तु रप्रत्याहारसाधनद्वारा व्याख्यातव्यमिति तात्पर्यम् ।

ननु र-प्रत्याहारेणैव रलयोर्बोधस्य सिद्धत्वात् 'अतो ल्रान्तस्य' इत्यत्र लकारोच्चारणस्य वैयर्थ्यापत्त्या लकाराकारो नानुनासिक इति न कल्प्यते; किन्तु लकारोच्चारणसामर्थ्यात् र-प्रत्याहारोऽनित्य इति कल्पनीयम् । तथा च–'रदाभ्याम्', 'रषाभ्याम्' इत्यादौ र-पदेन न रेफलकारोभयस्य ग्रहणम् । र-प्रत्याहारोऽनित्य इत्यस्य रेफलकारोभयनिरूपितशक्तिरनित्येति नाभिप्रायः; वैयाकरणमते शब्दस्य नित्यत्वेन तन्निष्ठायाः शक्तेरनित्यत्वेनानित्यत्वस्य शक्तेर्वक्तुमशक्यत्वात् । किन्तु अयमर्थः–र-प्रत्याहारः सर्वत्र रलोभयतात्पर्येण नोच्चारितम् इति न शक्तेरनित्यत्वप्रसङ्ग इति चेत्, न; यत्र सानुनासिकाकारघटितो र-पदं तत्रोभयबोधकम्, रदाभ्यामित्यादौ च अकारो नानुनासिक इति तत्र र-प्रत्याहारो न गृह्यते इति व्याख्यातुमशक्यत्वेन लकारग्रहणस्य वैयर्थ्येन शेखरोक्तं ज्ञापकं युक्तमेव ।

न च पर्यायवाचकशब्दानां प्रयोगे लाघवगौरवचर्चा नाद्रियते इति परिभाषानुसारेण यण् य इत्युभयोः शब्दयोः य व र ल इत्येषामक्षराणां बोधकत्वाविशेषेण पर्यायवाचकत्वात् तयोः अन्यतरस्यापि प्रयोगे लाघवगौरवयोर्विचाराभावात् कथमत्र लाघवमूलकतया यप्रत्याहारेण व्यवहारशङ्का दर्शिता शेखरे इति वाच्यम् ।

य व र ल-इत्येतच्चतुष्टयवर्णनिरूपिता शक्तिर्लाघवात् यपदे एव स्वीक्रियते, न यण्पदे इति सर्वत्र य-प्रत्यहारस्यैव व्यवहारेण यण्पदे तत्पर्यायता नास्तीत्युक्तपरिभाषाया अप्रवृत्तेः । लण्सूत्रघटकणकारस्तु न निराक्रियते, अणादिप्रत्याहारसिद्धये तस्य सत्त्वात् । अन्यथा 'अणुदित्' इत्यत्र आद्याकारस्य अन्तिमेन अनुबन्धात्मकाकारेण दीर्घे आ इति, इणो यत्र निर्देशः इ अ इत्यनयोः स्वरूपं यणि कृते य इति स्यात् । तथा च स्वरूपं किमात्मकमिति सन्देहः । व्याख्यानतो निर्णये महद् गौरवम् । एतेन 'लण्' सूत्रघटकणकारानुबन्धं परित्यज्य अकारानुबन्धेन य-प्रत्याहारमात्रस्य सिद्ध्या यण्प्रत्याहारस्याभावात् तस्य पर्यायत्वं नास्तीति केनचिदुक्तम्, तन्नातिरमणीयम् । वस्तुतः पूर्वोक्तसमाधानेऽपि ग्रन्थकर्तुर्नाभिनिवेशः । यदि यण्-प्रत्याहारो नाभिमतः स्यात्, तदा बहुत्र लाघवानुरोधेन इत्युक्ते स्वारस्यं भज्येत । सर्वत्रेति युक्तमुक्तं स्यात् । अत एवारुचेः पक्षान्तरमाह—**किञ्चेति** । तृतीयहेतोरव्यापकत्वापत्तिरिति ।

न च हेतोः साध्यापेक्षया अव्यापकत्वम् = अल्पदेशवृत्तित्वम् न दोषावहम्, यथा वह्निमति अयःपिण्डे वह्निरूपस्य साध्यस्य सत्त्वेऽपि धूमरूपो हेतुर्नास्ति, तथापि न किञ्चिद् दूषणम्, तत्र धूमहेतुका अनुमितिर्जायते एव इति वाच्यम्; अव्यापकस्य आपादनं न साध्यापेक्षया कृतं किन्तु पक्षतावच्छेदकावच्छेदेन । अर्थात् सर्वस्मिन् पक्षे अनुमितिश्चेदिष्टा तदा पक्षतावच्छेदकव्यापकत्वं (अर्थात् सकलपक्षवृत्तित्वं) हेतोरपेक्षते । यदि च कस्मिंश्चित्पक्षे हेतुर्न वर्तेत, तदा पक्षस्य भागे असिद्ध्या भागासिद्धिदोषेण ग्रस्तो हेतुर्नानुमितिं जनयेत् । 'लण्' सूत्रघटकाकारे हल्प्रत्याहारासिद्धेः पूर्वं चकारस्य इत्संज्ञायाः अभावेन अच्प्रत्याहारानिष्पत्त्या 'उपदेशेऽज्' इति सूत्राप्रवृत्त्या इत्संज्ञाया

हकारादिष्वकार उच्चारणार्थः ।

ननु 'हय' (मा० सू० ५) इत्यादावकारोच्चारणेन तस्य हल्त्वप्रसङ्गोऽत आह— हकारादिष्विति । 'न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति' इति 'उच्चैरुदात्तः'

अभावेन लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वाभावेन तृतीयहेतोरगमनात् भागासिद्धिरूपो दोषः ।

अनुमानाकारश्चेत्थम्—अनुबन्धाः (पक्षः) प्रत्याहारजन्यबोधविषयत्वाभाववन्तः (साध्यम्) लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात् (हेतुः) अनुबन्धाः इत्संज्ञा येषां सम्भाव्यते ते प्रत्याहारजन्यप्रत्याहारेण अजादिपदेन जायमानो यो बोधः तद्विषयत्वाभाववन्तः = तद्विषयताया अनाश्रयाः । लोपशास्त्रीयोद्देश्यता इति इत्संज्ञावति वर्णे इत्संज्ञके तदवच्छेदकत्वम् इत्संज्ञावति विशेषणे इत्संज्ञायां विशेषणस्यावच्छेदकत्वात्= तेन इत्संज्ञारूपेणाक्रान्तत्वात् इत्संज्ञकानां वर्णानामित्यर्थः । तस्मात् भाष्योक्ते तृतीयहेतौ भागासिद्धिदोषपरिहाराय लण्सूत्रघटकाकारो नानुनासिकः । अत एव नेत्संज्ञकोऽपि ।

न च अ इ उ ण्, ऋ ऌ क् इत्यादौ णकारककाराणामनुबन्धानाम् इत्संज्ञाविधानाय हल्-प्रत्याहारेण ग्रहणस्य एवमलादिप्रत्याहारेणापि बोधस्य दृष्टतया साध्यस्य बोधविषयत्वाभावरूपस्य अभावात्, हेतोश्च तस्य इत्संज्ञकत्वेन सत्त्वात् साध्याभाववति हेतोर्वृत्तित्वेन प्रकृतहेतुर्व्यभिचारीति नानुमितिः स्यादिति वाच्यम्; स्वेतरो यः स्वपदेन अ इ उ ण् इत्यादिघटकणकारः तद्भिन्नो यः स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नः = अत्रापि पूर्वोक्त एव स्वपदेन ग्राह्यः स्वनिष्ठश्रोत्रेन्द्रियेण जायमानं यद् ज्ञानम् णकारककारादिज्ञानम् तस्य ज्ञानस्य विषयतावच्छेदको यो धर्मः णकारत्वककारत्वादिः, तदवच्छिन्नणकाराद्यवबोधको यः प्रत्याहारः स न अल् हल् प्रत्याहारः; ञमङणनम्, कपय् इत्यादिघटकणकारककारादिबोधकत्वेनाबोधकत्वाभावात् । नायं प्रत्याहारो धर्तुं शक्यः, किन्तु तद्बोधकः प्रत्याहारः—अण् अजादिः तेन तेषामनुबन्धानामग्रहणान्न हेतोर्व्यभिचार इति ।

अनुबन्धपदेन इत्संज्ञायोग्यत्वरूपानुबन्धत्वं विवक्षितम् । तेन लणघटकाकारेऽच्पदार्थस्य प्रागनिष्पत्तेः इत्संज्ञाया अभावेन अनुबन्धत्वाभावेन पक्षानन्तर्भावात् कुतो हेतोरव्यापकत्वमिति शङ्का पराहता; इत्संज्ञायोग्यतायास्तदानीमपि सत्त्वादित्यलम् ।

ननु 'हयवरट्' इत्यादौ हकारादिवत् तद्वर्णघटकतया उच्चार्यमाणस्याकारस्यापि हल्प्रत्याहारे ग्रहणं प्राप्नोतीत्यत आह—**हकारादिषु** इति । हकारादिवर्णोत्तरमकारस्य पौनःपुन्येन पाठः उच्चारणे सौकर्याय कृतः, नान्यस्मै प्रयोजनायेत्यर्थः । 'उच्चैरुदात्तः' इति सूत्रे भाष्योक्ताद् अचं=स्वरं विना व्यञ्जनस्य वर्णस्य उच्चारणं न भवतीत्यतः एषा हि आचार्यस्य भगवतोऽनादिपुरुषस्य शैली = समाधानपूर्विका प्रवृत्तिः लक्ष्यते = आश्रीयते ।

इन पूर्वोक्त प्रमाणों से लण्घटक अकार की अनुनासिकत्वकल्पना प्रामाणिक नहीं है । 'उरण् रपरः' इस सूत्र में लपर-विधान के लिए लकार का ग्रहण करना ही चाहिये ! ऋ, ऌ की परस्पर सवर्ण संज्ञा विधान के लिये जिस प्रकार 'ऋ ऌ वर्णयोः' इस वार्त्तिक की आवश्यकता है, उसी प्रकार पृथक् लकार ग्रहण की भी आवश्यकता समझनी चाहिए ।

(१।२।२९) इति सूत्रस्थभाष्यात् 'एषा ह्याचार्यस्य शैली लक्ष्यते, यत्तुल्यजातीयाँस्तुल्यजातीयेषूपदिशति–अचोऽक्षु हलो हल्षु' इति 'प्रत्याहारेऽनुबन्धानाम्' इत्यत्र भाष्याच्चेति भावः।

स्यादेतत्। 'न विभक्तौ' (१।३।४) इत्यादेः सार्थक्याय 'हलन्त्यम्' (१।३।३) इत्यस्योपदेशेऽन्त्यं हल् इदित्यर्थस्यावश्यकत्वेन 'हलन्त्यम्' (१।३।३), 'आदिरन्त्येन'

तुल्यजातीयान् = स्वरजातीयान् स्वरजातीयेषु, व्यञ्जनजातीयान् व्यञ्जनजातीयेषु इत्यर्थकान् 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ग्रहणम्' इत्यत्रत्यभाष्याच्च हकारादिषु अकारस्य उच्चारणार्थत्वं गम्यते। तुल्यजातीयमत्र साजात्यं लोकप्रसिद्धेन स्वरत्वेन हल्त्वेन च वक्तव्यम्।

'हलन्त्यम्' इत्यत्र अन्योन्याश्रयं सम्भाव्य आवृत्त्या परिहर्तुं ग्रन्थमवतारयति–**स्यादेतदिति**। न च हल् इति सूत्रस्य अन्त्यमित् इत्यर्थे अन्योन्याश्रयो न भवतीत्यत आह—**न विभक्ताविति**। विभक्तिघटकानां तवर्गसकारमकाराणामित्संज्ञायाः निषेधकस्य 'न विभक्तौ तुस्माः' इति सूत्रस्य चारितार्थ्यं तावन्न सम्भवति यावत् तवर्गस्य सकारस्य मकारस्य च इत्संज्ञाविधानं केनापि न प्राप्नुयात्। प्राप्तस्यैव निषेधे सार्थक्यात्। तथा च हलन्त्यमिति सूत्रस्य पूर्वोक्तार्थाभ्युपगमे हल्सूत्रघटकलकारस्यैव इत्संज्ञा प्राप्ता इति तवर्गादीनामित्संज्ञानिषेधस्य कः प्रसङ्गः स्यात्। एवञ्च 'न विभक्तौ' 'उपदेशेऽजनुनासिकः' इत्यादेः सार्थक्याय 'उपदेशे अन्त्यस्य हलः इत्संज्ञा भवति' इत्यर्थपरतया 'हलन्त्यम्' इति सूत्रस्य व्याख्यानस्यौचित्यम्। हल्पदेन हल्प्रत्याहारवाच्यानां ग्रहणमित्यर्थः 'आदिरन्त्येन' इति सूत्राधीनः। हकारादिलान्तसमुदायघटकवर्णानां हल्पदेन

शङ्का—ननु इति। 'ह य व र ट्' इत्यादि सूत्रों में उच्चरित अकार का ग्रहण हशादि प्रत्याहार से क्यों नहीं होता। अकार उच्चारणमात्र प्रयोजन के लिये है। इसकी इत्संज्ञा, लोप से निवृत्ति नहीं होती। अतः अनुबन्ध नहीं होने से उक्तानुमान से अकार का हशादि प्रत्याहार से बोध की व्यावृत्ति सम्भव नहीं है ?

समाधान—हकारादिकों के अकार का हकारादि के अक्लेश से उच्चारण में सहायतासम्पादन के लिये प्रयुक्त होने से उनका प्रत्याहार से ग्रहण कर कार्यान्तर में उपयोग करना अनुचित है।

इसी को भाष्यवचन से प्रमाणित करते हैं—**न पुनरिति**। अच् स्वर के विना व्यञ्जन का उच्चारण नहीं होता। आचार्य की यह शैली लक्षित होती है कि तुल्यजातीयों का तुल्यजातीयों के मध्य में पाठ करते हैं। अच् को अच्प्रत्याहारबोधक सूत्रों में, हल् को हल्प्रत्याहारबोधक सूत्रों में पढ़ा है। प्रत्याहारेऽनुबन्धानाम्—इस वार्तिक पर यह भाष्य है। आचार्य पद से अनादि पुरुष, और शैली शब्द से समाधानपूर्वक प्रवृत्ति का ग्रहण है।

अन्योन्याश्रय दोष निराकरण के लिये 'हलन्त्यम्' इसकी आवृत्ति का उपक्रम करते हैं—**स्यादेतत् इति**।

शङ्का—'हलन्त्यम्' इस सूत्र का 'हल् इत्याकारक सूत्र के अन्त्य की इत्संज्ञा होती है' ऐसा अर्थ करने से अन्योन्याश्रय दोष नहीं हो सकता, अतः सूत्र की आवृत्ति व्यर्थ है ?

१. हलन्त्यम् । १ । ३ । ३ । 'हल्' (प्र०सू०१४) इति सूत्रेऽन्त्यमित्स्यात् ।

(१।१।७१) इत्यनयोः परस्परापेक्षत्वेनाऽन्योन्याश्रयाल्लकारे इत्संज्ञामबोधयित्वा हला-मित्संज्ञाबोधनं पाणिनेरयुक्तम् ।

बोधः प्रत्याहारसिद्धिं विना दुर्घटः । प्रत्याहारसिद्धौ च 'आदिरन्त्येन' इत्यस्य वाक्यार्थ-बोधोऽपेक्ष्यते ।

एतस्य वाक्यार्थबोधे 'हलन्त्यम्' इत्यनेन यावदित्संज्ञा न विधीयते तावत् इत्पदार्थः कः इति न ज्ञायते । वाक्यार्थबोधे पदार्थस्य ज्ञानमावश्यकं भवति—इति इत्पदार्थज्ञाना-धीनं हल्-पदार्थस्य ज्ञानम्, हल्-पदार्थज्ञानाधीनं ज्ञानमित्पदार्थस्य; अतः परस्परं ज्ञानम् परस्परज्ञानाधीनमिति अन्योन्याश्रयः । अन्योन्याश्रयाणि कार्याणि च न भवन्ति ।

न च 'ह् य व र ट्' इत्यारभ्य 'हल्' इति सूत्रपर्यन्तं (दश सूत्राणि) आवर्त्य शष-सर्' इत्यन्तं नवसूत्राणि उद्दिश्य दशमेनावर्त्तितेन 'हल्' इति सूत्रेण हल्संज्ञाऽपि विधीयते । एकैकस्यावर्तमानस्य क्रमवतां वर्णानां ज्ञाने उपयोगः, अन्यस्य च आवर्तमानस्य संज्ञासंज्ञि-भावे उपयोग इति तात्पर्यम् । एवञ्च इत्संज्ञाज्ञानं विनैव हल्पदार्थस्य ज्ञानात् नान्योन्या-श्रयशङ्केति वाच्यम् । दशसूत्र्या आवृत्तौ महद् गौरवं प्रसज्येत । अतो नेदं समाधानं युक्तम् ।

न च 'उपदेशेऽजनुनासिकः' 'हलन्त्यम्' इति सूत्रद्वयस्थाने 'उपदेशे इदन्त्यम्' 'अच्' 'अनुनासिकः' इति सूत्रत्रयी कर्तव्या । हल्ग्रहणं च न कर्तव्यम् । उपदेशावस्थायाम् अन्त्यम् इत्संज्ञकं भवति । अन्त्यं ल् हल् वा अज् वा भवतु न कश्चिद्दोषः, ततः अच् । पूर्वेणैव हल इव अचोऽपि इत्संज्ञायां सिद्धायां किमनेन सूत्रेणेति ।

तथा चेदमनन्त्यार्थं भविष्यति । यः अच् अन्ते नास्ति, तस्येत्वविधानार्थमिदं सूत्रम् । ततः 'अनुनासिक' इति सूत्रं किमर्थम् ? सर्वविधस्य अचः इत्संज्ञायाः पूर्वेणैव सिद्धे नियमार्थमेतद् भविष्यति—अचोऽनुवृत्त्या अच्चेदित् भवति, तर्हि अनुनासिक एवेति, निरनुनासिकस्यात्र इत्संज्ञा व्यावृत्ता भवतीति । तथा च हल्ग्रहणाभावेन अन्त्यत्वात् लकारस्य इत्त्वेन हल्प्रत्याहारसिद्ध्या ततः परमन्येषाञ्च प्रत्याहाराणां सिद्ध्या अन्योन्या-

समाधान—विभक्तिसम्बन्धी तवर्ग तथा सकार मकार की इत्संज्ञा के निषेध करने वाले 'न विभक्तौ तुस्माः' इस सूत्र की सफलता के लिये 'हलन्त्यम्' इस सूत्र का 'उपदेश अवस्था में अन्त्य हल् की इत्संज्ञा होती है'—इस प्रकार का अर्थ करना आवश्यक है । अन्यथा पूर्वोक्त अर्थ में विभक्तिस्थ तवर्ग सकारादि की इत्संज्ञा किसी से प्राप्त ही नहीं थी; ऐसी अवस्था में निषेधशास्त्रा-रम्भ व्यर्थ हो जायगा । अतः इस प्रकार के अर्थ की आवश्यकता होने से वाक्यार्थ ज्ञान के पहले वाक्यघटक पदों के अर्थों का ज्ञान अनिवार्य होने के कारण 'हलन्त्यम्' इस सूत्र के वाक्यार्थ-बोध के पहले अपेक्षित 'हल्' पद के अर्थबोध के लिये 'आदिरन्त्येन सहेता' इसकी अपेक्षा है । इसको अपने वाक्यार्थबोध में अपेक्षित इत् पद की अर्थ की जानकारी के लिये 'हलन्त्यम्' इसकी आकांक्षा है । इस प्रकार पदार्थज्ञान के लिये दोनों सूत्रों की परस्पर में अपेक्षा होने के कारण अन्योन्याश्रय दोष स्पष्ट है । ऐसी दशा में लकार की इत्संज्ञा के उपाय-कथन के बिना ही हल् वर्णों की इत्संज्ञा का प्रतिपादन असंगत है ।

न च 'हयवरट्' (मा० सू० ५) इत्यादेरावृत्त्या 'शषसर्' (मा० सू० १३) इत्यन्तं समुदायमुद्दिश्य 'हल्' (मा० सू० १४) इत्यनेन हल्संज्ञाऽपि विधेयेति वाच्यम्; दशसूत्राऽऽवृत्तौ गौरवात् ।

ननु 'उपदेशे इदन्त्यम्, अच्, अनुनासिकः' इति सूत्रत्रयमस्तु, अजित्यनन्त्यार्थम्, तृतीयेऽजित्यनुवृत्तिसामर्थ्यादच्चेदिद्भवति तर्ह्यनुनासिक एवेति नियमाश्रयणाद्भ्रभृतौ न दोषः । योगविभागसामर्थ्याच्चानन्तरस्येति न्यायं बाधित्वा व्यवहितस्यापि तेन नियमः । 'मिदचोऽन्त्यात्' (१।१।४७) इति ज्ञापकाच्च न विपरीतनियमः, एवञ्च हल्ग्रहणमपि व्यर्थमन्योन्याश्रयश्च न ।

न च पाणिनिसूत्रभेदे पारायणादावदृष्टहानिः, तथा च तत्र तत्र भाष्यम्— 'अपाणिनीयन्तु भवति'—इति वाच्यम्; कल्प्यमानन्यासस्य लघुत्वेऽस्यादोषत्वात् ।

श्रयाभावादिति । 'अनन्तरस्य विधिर्भवति प्रतिषेधो वा' इति न्यायेन अनन्तरोक्तस्य 'अच्' इति सूत्रस्यैव बाधे, 'उपदेशे इदन्त्यम्' इत्यनेन निरनुनासिकस्याचः इत्संज्ञा दुर्वारा स्यादिति नाशङ्कनीयम्; योगविभागकरणस्य वैयर्थ्यापत्तिभिया अनन्तरस्येति न्यायस्याप्रवृत्तेः । अन्यथा 'अच्' इति सूत्रेण सहैव 'अनुनासिक' इत्यपि सूत्रं पठेत् । तथा च 'उपदेशे इदन्त्यम्' 'अच्' इत्युभयोः सूत्रयोः 'अनुनासिकः' इति सूत्रेण नियमः । यदि कश्चिदेवं ब्रूयात्–अनुनासिकश्चेद् इत्स्यात् तदा अजेवेति विपरीतनियम इति, तत्तु 'मिदचोऽन्त्यात्परः' इति सूत्रस्य, मकरस्येत्संज्ञकस्य कुत्रापि नियमेन वारितत्वादसत्त्वेन उदाहरणासम्भवात् 'मिदचोऽन्त्यात्' इत्यस्य वैयर्थ्यापत्त्या वारणीयम् ।

तथा चायं निष्कर्षः—हल्-ग्रहणम्, अन्योन्याश्रयश्च न ।

न च योगविभागेन हल्ग्रहणं प्रत्याख्याय अन्योन्याश्रयपरिहारो नोचितः, तथा सति सूत्रभेदेन पारायणे अदृष्टहानिः स्यादिति शङ्कनीयम्; अस्य न्यासस्य लघुत्वेन अपाणिनीयत्वस्य अकिञ्चित्करत्वात् । 'सूत्रभेदं तमुपाचरन्ति' इत्यादिभाष्योक्तेः नेदृशः सूत्रभेदो दोषाय । सति सम्भवे दृष्टप्रयोजनपूर्वकत्वमदृष्टार्थकत्वं वेदाङ्गानां वक्तव्यम् । अत एव तत्रतत्र भाष्यकृता क्रियमाणं ज्ञापकं नोच्छिद्यते इति चेत् ? सत्यम्, योगविभागस्य नियमस्य, विपरीतनियमवारणाय कृतस्य ज्ञापकस्य च समाश्रयणे गौरवात् । तदपेक्षया 'हलन्त्यम्' इति सूत्रमावर्त्य अन्योन्याश्रयदोषपरिहारे लाघवम् । वर्णानामभिव्यक्तये तदुत्पादको यः कण्ठाद्यभिघातः तद्रूपमेव गौरवमादरणीयम्, ज्ञानोत्पादकस्य मनसो व्यापारस्य यद् गौरवं तन्नादरणीयम्—ईदृशी राजाज्ञा नास्ति ।

शङ्का—न चेति । 'हयवरट्' से आरंभ कर 'शषसर्' एतत्सूत्रपर्यन्त सूत्रों को उद्देश्य कर 'हल्' इस चौदहवें सूत्र की आवृत्ति द्वारा हल् संज्ञा का भी विधायक मान लेने से अन्योन्याश्रय दोष का परिहार हो जायगा । हयवरट् से शषसर् पर्यन्त पठित अक्षरों को हल् संज्ञा है । अतः 'आदिरन्त्येन' इसके विना ही 'संज्ञी' हल् पदार्थ का ज्ञान होने से परस्पर अपेक्षा नहीं है, इसी कारण अन्योन्याश्रय भी नहीं हुआ ?

समाधान—दश सूत्रों की आवृत्ति द्वारा अन्योन्याश्रय दोष के वारण में गौरव है । इस लिये 'हलन्त्यम्' इस एक सूत्र की आवृत्ति द्वारा उक्त दोष की व्यावृत्ति में लाघव है ।

'सूत्रभेदं तमुपाचरन्ति यत्र तदेवाऽन्यत् सूत्रं क्रियते भूयो वा ? यदि तदेवोपसंहृत्य क्रियते नासौ सूत्रभेदः' इति 'अच उपसर्गात्तः' (७।४।४७) सूत्रभाष्यात् । नासौ सूत्रभेद

अक्षरार्थस्तु 'न विभक्तौ' इत्यादेः 'न विभक्तौ तुस्माः' आदिपदेन 'उपदेशेऽजनुनासिकः' सार्थक्याय साफल्याय, आवश्यकत्वेन इदं परस्परापेक्षत्वे मिथः साकाङ्क्षत्वे हेतुप्रदर्शनम् । परस्परापेक्षत्वादेव च अन्योन्याश्रयो दोषः । लकारे इत्संज्ञामबोधयित्वा पूर्वं लकारस्य इत्संज्ञाविधानोपायमकृत्वा । हलामित्यादि । हल्प्रत्याहारघटकानां वर्णानां इत्संज्ञाविधानं आचार्यस्य पाणिनेरयुक्तम्=अन्याय्यम् । न च 'हयवर' इत्यादीनामर्थः पूर्वमुक्तप्रायः । नियमाश्रयणात् रुप्रभृतौ न दोषः । सर्वस्य अचः इत्संज्ञायां प्राप्तायां 'रु शब्दे' इति धातुघटकस्योकारस्यापि इत्संज्ञा स्यात् । अतः 'अच्चेन्न इद् भवति तर्हि अनुनासिक एव' इति 'अनुनासिक' इत्यनेन नियमान्न दोषः; अस्योकारस्य अनुनासिकत्वेन अनिर्देशात् । विसर्गस्थानिनः रोरुकारस्तु अनुनासिकः । अत एव तस्य इत्संज्ञा । अन्यत् स्पष्टार्थम् ।

उपाचरन्ति = कथयन्ति । तदेव = तदर्थकमेव, भूयो वा तदपेक्षया अधिकम् । यदि तदेवोपसंहृत्य=तदेव सूत्रं संक्षिप्य । नासौ सूत्रभेदः सूत्रस्य भिन्नरूपता । ननु तथापि भिन्नरूपता सूत्रस्य जातैवेत्यत आह—नासौ भेदः । दोषायेति शेषः । यथासम्भवं दृष्टं प्रयोजनं परिकल्प्य अदृष्टार्थकत्वं मन्तव्यम् । तदाशयः = नासौ सूत्रभेदः इत्यस्य भाष्यस्य तात्पर्यम् । अत एव इति । दृष्टद्वारेण अदृष्टार्थकत्वं सति सम्भवे इति सत्त्वादेव ।

शङ्का—'उपदेशऽजनुनासिक इत्' 'हलन्त्यम्' इन दो सूत्रों के स्थान में 'उपदेशे इदन्त्यम्' 'अच्' 'अनुनासिकः' इस प्रकार तीन सूत्र बनाये जाँय । 'उपदेश अवस्था में अन्त्य की इत्संज्ञा होती है' यह प्रथम योग का अर्थ है । इस सूत्र से अन्त्य अच् और हल् दोनों की इत्संज्ञा होगी । अनन्त्य अच् की इत्संज्ञा के लिये द्वितीय योग है । तृतीय योग नियमार्थक है–'अच् की यदि इत्संज्ञा हो तो अनुनासिक की ही हो', इससे अननुनासिक की इत्संज्ञा की व्यावृत्ति होती है । अत एव 'रु शब्दे' इसमें धातुघटक उकार की इत्संज्ञा नहीं हुई, क्योंकि इसमें उकार अनुनासिक नहीं है । तृतीय योग में अच् की अनुवृत्ति की गयी है । इसके सामर्थ्य से अव्यवहित अच् इस सूत्र के नियमन के साथ-साथ व्यवहित 'उपदेशे इदन्त्यम्' इस सूत्र का भी नियमन होता है । 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इस परिभाषा का अच् का अनुवृत्ति-सामर्थ्य से आश्रयण नहीं है । अनुनासिक की इत्संज्ञा यदि हो तो अच् की ही होती है—ऐसे विपरीत नियम की कल्पना नहीं हो सकती; क्योंकि इस प्रकार की कल्पना से मकार अनुनासिक है, उसकी इत्संज्ञा अच् न होने के कारण नहीं होगी । ऐसी दशा में मित् मकारेत्संज्ञक के असंभव होने से 'मिदचोऽन्त्यात्परः' इस सूत्र का उदाहरण न मिलने से वैयर्थ्य हो जायगा । अतः विपरीत नियम की कल्पना असङ्गत है । इस प्रकार सूत्रत्रय करने से अन्योन्याश्रय भी नहीं हुआ और हल् ग्रहण न करने से लाघव भी होता है । अतः सूत्रावृत्ति अनावश्यक है । यदि किसी को ऐसी आशङ्का हो कि पाणिनीय व्याकरण के वेदाङ्ग होने से वेदाङ्गपारायणजन्य अदृष्टोत्पत्ति इसके पारायण से भी मानी गयी है, भिन्न प्रकार का न्यास करने पर सूत्र से भेद होने के कारण पारायण में अदृष्ट की क्षति होगी, ऐसा मानकर ही भाष्यकार ने जहाँ तहाँ सूत्र से भेद करने पर अपाणिनीयत्व का उद्भावन किया है । तो इसका उत्तर इस प्रकार है—'उपदेशेऽच्' इत्यादि

इत्यस्य दोषाय इति शेषः। सति सम्भवे दृष्टद्वारैवाङ्गानामदृष्टार्थत्वमिति तदाशयः। अत एव तत्र तत्र ज्ञापकपरसकलभाष्योच्छेदो नेति चेन्न; योगविभागनियमज्ञापकाश्रयणेऽतिगौरवात्। न हि वर्णाभिव्यक्तिजनककण्ठाद्यभिघातगौरवमेवादर्त्तव्यम्, न तु ज्ञानजनकमनोव्यापारगौरवमिति राजाज्ञाऽस्ति। न च सह आ समन्ताद् एति गच्छतीति सहेता मध्यमो वर्ण इत्यर्थ इति, अतो नान्योन्याश्रय इति वाच्यम्; अन्योन्याश्रय-

कस्यचिन्मतं निराकर्तुम् उपक्रमते—**न चेति**। इण्धातोः तृच् आङ्उपसर्गेण सम्बन्धे 'ओमाङोश्च' इति पररूपे प्रथमैकवचने 'सहेता' इति सिद्धम्। सह समम् आ समन्तात् एति बुद्धिविषयं गच्छति इति मध्यगः=मध्यमो वर्णः इत्यर्थकः सहेताशब्दः; अतो नान्योन्याश्रयः। इत्संज्ञकार्थस्य अविवक्षितत्वात् इति तु न युक्तम्, अन्योन्याश्रयदोषस्य तत्परिहारोपायञ्च प्रतिपादयतो भाष्यकारस्य व्यर्थः प्रयासः स्यात्, उक्तरीत्या अन्योन्याश्रयाभावात्। तस्मात् कल्प्यते—कटोवीत्यत्र प्रश्लिष्यन् इधातोः, इङ् गतौ इत्यतश्च सहाङ्पूर्वकात् तृच् प्रत्ययो न भवति। 'इण् गतौ' (धा० पा० अ० ३५) इत्यतः तृच्प्रत्यये तु 'एत्येधत्यूठसु' इत्यनेन वृद्धिप्रसङ्गात् उक्तरूपस्य निष्पादात्। उक्तव्युत्पत्त्या मध्यमो वर्ण इत्यर्थाप्रतीतिश्च मध्ये उपपादनमध्ये। आङः समन्तादित्यर्थस्य अन्वयोऽपि न घटते। व्यर्थमेव

सूत्रत्रय का न्यास पूर्वसूत्रापेक्षया लघुभूत होने से 'अस्य' अर्थात् अपाणिनीयत्व दोष की आपत्ति नहीं है। सूत्र से भेद (अपाणिनीयत्व) उसको कहते हैं जहाँ तदेव तदर्थक अन्यसूत्र या उसकी अपेक्षा अधिक सूत्र को रचना की जाती है। और जिस स्थल में विशिष्ट को ही संक्षिप्त कर दिया जाता है वह सूत्रभेद नहीं है, अर्थात् पूर्व सूत्र के स्वरूप से भिन्न होने पर भी दोषकर नहीं है। जहाँ तक संभव हो सूत्रों का या सूत्रघटक पदों का दृष्टप्रयोजनपूर्वक ही अदृष्ट प्रयोजन होना चाहिये। सम्भव होने पर दृष्टार्थक अदृष्टार्थक—दोनों मानना चाहिये। जहाँ सम्भव नहीं है वहाँ शुद्ध अदृष्टार्थक ही है। उदाहरण के लिये प्रत्याख्यान स्थल। इससे परस्पर भाष्यविरोध-शङ्का का उद्भावन निरर्थक है। 'सति सम्भवे' इस विशेषण से दोनों भाष्यों में विरोध नहीं है। दृष्टार्थ के सम्भव होने से ही जहाँ तहाँ सूत्रों या उनके पदों द्वारा दृष्टार्थ की कल्पना की गयी है। अन्यथा अदृष्टार्थक मान कर उनकी चरितार्थता हो जाने से यत्र तत्र ज्ञापन का प्रदर्शन असंगत हो जायगा। इस प्रकार सूत्रत्रय की रचना द्वारा अन्योन्याश्रय दोष का परिहार हो जाने से सूत्रावृत्ति से अन्योन्याश्रय का परिहार गौरवग्रस्त होने से असङ्गत है ?

समाधान—'हलन्त्यम्' इस सूत्र की आवृत्ति-कल्पना की अपेक्षा योगविभाग तथा प्राप्तार्थ का बाध अप्राप्तार्थ की कल्पना आदि दोषयुक्त नियम के ज्ञापन में अत्यधिक गौरव है। वर्णों की अभिव्यक्ति करने वाले कण्ठ ताल्वादिकों का अभितः प्रयुक्त गौरव ही मान्य है, मानसिक व्यापार की गुरुता मान्य नहीं है—इस प्रकार की कोई राजाज्ञा नहीं है। अर्थात् सूत्रावृत्ति की अपेक्षा योगविभाग द्वारा सूत्रत्रय का निर्माण, एक से दूसरे के वैयर्थ्य-सन्देह का निवारण, दोनों प्रवृत्तिस्थल का विवेचन उसके अनन्तर तीसरे योग की सफलता को ध्यान में रखकर नियमार्थत्व का वर्णन विपरीत नियम की शङ्का के उच्छेद के लिये 'मिदचोऽन्त्यात्परः' इस सूत्र की शरण लेने आदि में अत्यधिक मानसिक वृत्ति का सर्जन होता है। आवृत्ति में केवल उसी को दो बार कण्ठादि के अभिघात से व्यक्त कर देना है इसमें लाघव है—'हल् सूत्र के अन्त्य लकार की इत्संज्ञा होती है' इससे अन्योन्याश्रय का भूत निरस्त हो जाता है।

२. आदिरन्त्येन सहेता । १ । १ । ७१ । **अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् । इति हल्संज्ञायाम् ।**

'हलन्त्यम्' (सू० १) । उपदेशेऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चारणम् । ततः 'अञ्' 'अच्' इत्यादिसंज्ञासिद्धौ ।

तत्परिहारादीन् वदता भाष्यकारेण 'कटी' (भ्वा० धा० ३२०) 'वी' (भ्वा० धा० १०४८) इत्यत्र प्रश्लिष्टात्, 'ईङ् गतौ' (दि० धा० ११४३) इत्यतश्च सह–आङ्पूर्वात् तृजभावबोधनात् । किञ्च योगमर्यादया तत उक्तार्थलाभः । आ समन्तादित्यस्यानन्वितार्थत्वं व्यर्थत्वञ्च । रूढौ तु न मानमतः सूत्रावृत्त्या तं परिहरति—हलन्त्यमिति ।

भाष्येऽप्यन्योन्याश्रयमाशङ्क्य 'हलन्त्यमित्संज्ञं भवति लकारश्चेद्भवतीति वक्तव्यम्' इत्युक्त्वा 'एकशेषनिर्देशाद्वा सिद्धम्—हल् च हल् च हल्, हलन्त्यमित्' इत्युक्तम् । तस्यायं भावः—कृतैकशेषेण हल्पदेन सम्बन्धसामान्यषष्ठ्या समासोऽन्त्यशब्दस्य च

तत् । तदर्थे तस्य रूढिरित्यत्र कोशादिकं न किञ्चित् प्रमाणम् । अतः उपायान्तराभावात् सूत्रावृत्तिमेव अन्योन्याश्रयदोषपरिहारोपायं मत्वा तमन्योन्याश्रयं परिहरति—**हलन्त्यमिति ।**

सम्पूर्णसूत्रस्यावृत्तिः अन्योन्याश्रयदोषपरिहाराय भाष्यकारस्यापि इष्टेत्याह—**भाष्येऽपीति** अन्योन्याश्रयदोषं सन्दिह्य हल् अन्त्यम् = चरममित्संज्ञं भवति, लकारश्च (अयमपि अन्त्य एव) इत्संज्ञको भवतीति वक्तव्यम् इति कथनानन्तरम् एकशेषनिर्देशाद्वा सिद्धम्' ।

एकशेषस्वरूपमाह—'हल् च हल् च हल् , हलन्त्यमित्' इति उक्तम् । एतस्य भाष्यस्य अभिप्रायमाह—**कृतैकशेषेण** = कृतः एकशेषो यस्मिन् तथाभूतेन पदेन हला ।

किसी प्राचीन के मत से—

पुनः शङ्का—'आदिरन्त्येन सहेता' इस सूत्र में सह + इता इस प्रकार विच्छेद कर इता = इत्संज्ञेन ऐसा अर्थ करने पर इत्पदार्थ ज्ञान के लिये 'हलन्त्यम्' इसकी अपेक्षा होती, किन्तु यहां सह आ पूर्वक इ धातु तृच् प्रत्यय करने पर प्रथमा के एकवचन में सह आ एता इस अवस्था में 'एङि पररूपम्' इससे पररूप होने पर सह एता इसको 'ओमाङोश्च' से पररूप करने पर 'सहेता' शब्द सिद्ध होता है । 'इण् गतौ' इससे तृच् प्रत्यय करने पर सहेता पद की सिद्धि नहीं होगी; 'एत्येधत्यूठ्सु' इस सूत्र से 'एङि पररूपम्' इसको बाधकर वृद्धि हो जायगी । 'इक् स्मरणे,' 'इङ् अध्ययने' इनसे भी इस रूप की निष्पत्ति नहीं हुई है, क्योंकि इन धातुओं के पूर्व में अधि उपसर्ग का सम्बन्ध अनिवार्य होता है । अन्त्य के साथ आदि वर्ण संज्ञा और सहेता मध्यम वर्ण संज्ञी समझना चाहिए । इस प्रकार अन्योन्याश्रय का परिहार हो सकता है ?

समाधान—अन्य वर्ण के सहित आदि वर्ण के साथ ही आ समन्तात् एति = बुद्धिविषय को प्राप्त होने वाला इस प्रकार के अवयवार्थ एवं रूढ़ि से सहेता = मध्यम वर्ण का बोधक है; क्योंकि आद्यन्तता मध्यम वर्णों के बिना नहीं हो सकती । यदि 'सहेता' का इस प्रकार अर्थ विवक्षित होता तो भाष्यकार अन्योन्याश्रय दोष एवं उसके परिहारार्थ आवृत्ति का प्रदर्शन न करते । किन्तु उस प्रकार का प्रदर्शन किया है, इससे यह कल्पना होती है कि 'कटी' धातु में इ

द्वन्द्वान्ते श्रूयमाणस्येवोभयत्रान्वयः। एवं च हल्सूत्रान्त्यं हल्रूपान्त्यं चेति बोधः। अन्त्ये 'राहोः शिरः' इतिवत् षष्ठीति। अत्रोच्चारयितुरेकशेषनिर्देशः, बोद्‌धुस्त्वावृत्त्या बोधः।

सम्बन्धसामान्येति। न च अवयवावयविभावे षष्ठी विधीयतामिति वाच्यम्; 'हल्' सूत्रस्यान्त्यमित्यर्थे अवयवावयविभावो मुख्यः सम्भवति। परञ्च हल्प्रत्याहारवाच्यस्य हल्-रूपस्य अन्त्यस्य चैक्यात् परस्परं भेदासिद्धेः। अतः सम्बन्धसामान्ये निरूप्यनिरूपक-भावे षष्ठी इति षष्ठ्यन्तस्य अन्त्येन सह समासः।

द्वन्द्वान्ते = द्वन्द्वसमीपे श्रूयमाणस्य = निर्दिश्यमानस्य यथा प्रत्येकं सम्बन्धः, तथे-हापि अन्त्यशब्दस्य उभयत्र = हल्सूत्रान्त्यम्, हल्रूपान्त्यञ्चेत्येवंरूपेण अन्वयः। एवञ्च = तथान्वये च, हल्सूत्रस्य अन्त्यमित्यर्थे विवक्षिते भेदे षष्ठी युज्यते। परं हल्रूपान्त्यम्—इत्यर्थे तु भेदाभावात् कथं षष्ठी ? इति शङ्कायामाह—**राहोरिति**। यथा राहुरेव शिरः. ततो भिन्नं केतुपदवाच्यम्। तथा च राहोः शिरोरूपत्वे द्वयोर्भेदाभावात् यथा भेद-मारोप्य षष्ठी, तथैवात्रापि भेदरूपारोपात् षष्ठी उपपादनीया।

ननु अस्य भाष्यस्य एकशेषप्रतिपादकस्य आवृत्तेः साधकतया कथमुपन्यासः ? इत्यत आह—**अत्रोच्चारयितुः** = उच्चारयिता वक्ता एकशेषेण निर्दिशति। **बोद्धा** = श्रोता तु तमर्थमावर्त्य जानाति इत्याशयेन वक्तृश्रोतॄणाम् बोधाय आवृत्तिरेव कर्तव्या।

धातु तथा गत्यर्थक इङ् धातु से तृच् प्रत्यय नहीं होता। 'सहेता' शब्द को केवल यौगिक मानने पर मध्यम वर्णों का बोध नहीं हो सकता। इसका प्रतिपादन **किञ्च** इससे ग्रन्थकार ने किया है। और इस अर्थ में 'आ' के अर्थ समन्तात् का अन्वय भी कहीं नहीं है। मध्यग वर्णों में 'सहेता' पद की रूढ़ि होने में कोई प्रमाण नहीं है। अतः उपायान्तराभाव के कारण प्रसक्त अन्योन्याश्रय दोष का परिहार परममूल में 'हलन्त्यम्' इस सूत्र की आवृत्ति के द्वारा करते है—**हलन्त्यमिति**।

भाष्यकार ने भी अन्योन्याश्रय का परिहार आवृत्ति द्वारा ही किया है। इसका प्रदर्शन करते है—**भाष्येऽपीति**। अन्योन्याश्रय की आशङ्का के बाद 'हलन्त्यमित्संज्ञम् भवति' इत्यादि वार्त्तिक कथनानन्तर 'एकशेषनिर्देशाद् वा सिद्धम्—हल् च हल् च हल् हलन्त्यम् इत्' ऐसा लिखा। उसका आशय यह है—किये गये एकशेष वाले हल् पद में सम्बन्धसामान्य की विवक्षा में निष्पन्न षष्ठी विभक्ति का अन्त्य के साथ समास होता है। द्वन्द्व के अन्त में श्रूयमाण पद के समान एक-शेष के अन्त में श्रूयमाण अन्त्य पद का दोनों हल् के साथ सम्बन्ध होने से 'हल्' इस सूत्र का अन्त्य तथा हल् रूप ग्रन्थ की इत्संज्ञा का विधान होता है। यद्यपि 'हल्रूप अन्त्य' इस अर्थ में सामाना-धिकरण्य होने से अभेद में षष्ठी नहीं हो सकती; तथापि 'राहोः शिरः' इत्यादि स्थलों में जिस प्रकार अभेद रहने पर भी भेद का आरोप कर षष्ठी की साधुता होती है, उसी प्रकार यहाँ भी आरोपित भेद में षष्ठी है। यहाँ उच्चारयिता एकशेष से प्रयोग करता है, किन्तु बोद्धा आवृत्ति द्वारा उसके अर्थ का बोध करता है। इस प्रकार सूत्रावृत्ति से ही अन्योन्याश्रय का परिहार श्रोतृगण को सिद्ध होता है।

कैयट ने एक हल् का 'हस्य ल्'—ऐसा समास कर हकार के समीपवर्ती लकार की इत्संज्ञा तथा हल् रूपान्त्य इत् संज्ञा का विधान कर उक्त दोष का परिहार किया है। यह मत भाष्यकार

'हसमीपो लकार इत् हलरूपान्त्यञ्च' इति कैयटोक्तव्याख्यायां तु हल् इत्संज्ञं भवति हलन्त्यं चेदिति वदेदित्यूह्यम् ।

नन्वेवमपि 'न विभक्तौ' (१ । ३ । ४) इति विभक्तिपदबोद्ध्यसुप्तिङ्बोधो 'हलन्त्यम्' (१।३।३) इति वाक्यार्थबोधोत्तरम्, तद्बोधश्चापवादवाक्यार्थबोधोत्तरम्—इत्यन्योन्याश्रयस्तदवस्थ एवेति चेत् ? न; अपवादवाक्यार्थबोधात् पूर्वं पदपदार्थोपस्थिता-

---

कैयटस्तु—केवलं हल्पदमावर्त्य हस्य ल् इति षष्ठीसमासं विधाय 'लकारसमीपे यो लकारः' इत्येकमर्थं स्वीचकार । अपरस्य तु हल्रूपान्त्यमित्यर्थः । तथा च नान्योन्याश्रयो दोष इति भाष्यं व्याख्यातवान् । तथा सति हल् इत्संज्ञो भवति, हलन्त्यश्चेद् भवतीत्येवं निर्दिशेत् । नैवं निर्देशः, अतः कैयटव्याख्यानं नोचितम् ।

ननु 'अपवादसूत्रस्य वाक्यार्थबोधानन्तरम् उत्सर्गसूत्रस्य वाक्यार्थबोधः' इति नियमेन 'न विभक्तौ तुस्माः' इति सूत्रस्य 'हलन्त्यम्', इति सूत्रनिषेधकत्वेन अपवादतया पूर्वं वाक्यार्थबोध आवश्यकः, स च न सम्भवति; अस्य सूत्रस्य विभक्तिज्ञानसापेक्षतया, विभक्तिज्ञानस्य च सुप्तिङ्ज्ञानाधीनता; 'विभक्तिश्च' इति सूत्रेण सुप्तिङोरेव विभक्तिसंज्ञाविधानात् । सुप्तिङोर्ज्ञानञ्च 'आदिरन्त्येन' इति वाक्यार्थबोधोत्तरमेव, तद्बोधश्च 'हलन्त्यम्' इति सूत्रबोधाधीन इति चक्रकं वाच्यम्, परस्परापेक्षत्वरूपदूषकताबीजस्योभयत्रापि सत्त्वात्, अन्योन्याश्रयो वा पूर्ववदेवास्तीति शङ्कते—**नन्वेवमपीति** । पूर्वोक्तान्योन्याश्रयस्य समाधानेऽपि । इदानीं दर्शितदिशा स तादृशो वा दोषः तदवस्थ एव इत्याशयः । समाधत्ते—**अपवाद** इति ।

अयमाशयः—प्रामाणिको वाक्यार्थबोधः उत्सर्गशास्त्रस्य, अपवादशास्त्रीयवाक्यार्थे निर्णीते एव भवति । संशयात्मकस्तु बोधः पदार्थोपस्थितौ जातायाम् अपवादशास्त्रीयवाक्यार्थालोचनात् पूर्वमपि उत्पद्यते ।

को अभिमत नहीं है । यदि ऐसा इष्ट होता तो उन्हें 'हल् इत्संज्ञक होता है तथा हलन्त्य इत्संज्ञक होता है' ऐसा लिखना चाहिये था । उन्होंने केवल 'हलन्त्यमित्' ऐसा ही लिखा है ।

प्रकारान्तर से अन्योन्याश्रय के सम्बन्ध में—

शङ्का—'न विभक्तौ तुस्माः' इस सूत्र के वाक्यार्थ के लिये विभक्तिज्ञान आवश्यक है । विभक्तिज्ञान के लिये सुप्तिङ् का ज्ञान अपेक्षित है । इसका ज्ञान 'हलन्त्यम्' इस से इत्संज्ञा होने पर प्रत्याहारसिद्धि द्वारा होगा । 'हलन्त्यम्' इसका वाक्यार्थबोध अपवाद (निषेधशास्त्र न विभक्तौ इस सूत्र) के वाक्यार्थबोध के अनन्तर होगा । इस का बोध विभक्तिज्ञान के बाद होगा ।

इस प्रकार अन्योन्याश्रय दोष अवस्थित है । यद्यपि यहां चक्रक दोष देना चाहिये, तथापि परस्परापेक्षरूप दोष समान होने से विशेष भेद का निर्देश नहीं किया ।

समाधान—निषेधरूप अपवादशास्त्रीय वाक्यार्थबोध के पहले ही सामान्य रूप से पद और पदार्थ की उपस्थिति होने पर उत्सर्ग शास्त्र का वाक्यार्थबोध होने में कोई बाधा नहीं है । भले ही यह ज्ञान अप्रमाण होने से आगे आस्कन्दित क्यों न हो जाय । 'नञ्' पद से अभाव की प्रतीति कराने में प्रतियोगिज्ञान की अनिवार्यता के समान प्रतियोगी के ज्ञान में अभाव ज्ञान की कारणता नहीं है । प्रत्युत प्रतियोगिज्ञान के विना निषेध-वाक्यार्थबोध हो असम्भव है ।

वुत्सर्गवाक्यार्थबोधे प्रतिबन्धकाभावात् । न ह्यभावज्ञाने प्रतियोगिज्ञानस्येव प्रतियोगिज्ञानेऽभावज्ञानस्य कारणता कस्यापि सम्मता । प्रतियोगिज्ञानं विना निषेधवाक्यार्थासम्भवाच्च ।

'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः' इत्यस्य त्वयं भावः—लक्षणैक-

---

सामान्यत उपदेशे अन्त्यं हलम् इत्संज्ञकं मन्वानः सुप्-तिङ्प्रत्याहारं साधयिष्यति । ततो 'न विभक्तौ' इत्यस्य वाक्यार्थबोधे निष्पन्ने विभक्तिस्थतवर्गसकारमकारभिन्नत्वेन अन्त्ये हलि संकोचात् पूर्वोक्तार्थेऽप्रामाण्यस्य ग्रहो जायते; पूर्वार्थस्य पूर्वं सन्दिग्धप्रामाण्यकत्वेऽपि दोषाभावात् ज्ञानस्य साशयिकत्वे विषयस्यापि सन्दिग्धत्वं भवति । एवञ्च संशयात्मकेन इत्पदशक्तिग्रहेण 'आदिरन्त्येन' इत्यस्य उपस्थित्या सुबादिप्रत्याहारस्य निष्पत्तिः; तावतैवेष्टसिद्धेः । इदमेवाह—**अपवादेति** । अपवादवाक्यार्थबोधात् पूर्वम्=अपवादशास्त्रीयवाक्यार्थज्ञानात् प्राक् पदपदार्थोपस्थितौ = पदस्य श्रोत्रेण पदार्थस्य शक्तिलक्षणान्यतरेण स्मृतौ—उत्सर्गशास्त्रस्य = सामान्यशास्त्रस्य वाक्यार्थबोधे प्रतिबन्धकाभावात् = वाक्यार्थज्ञानं न कश्चित् प्रतिबध्नीयात् । अभावज्ञाने = नञ्पदेन निषेधज्ञाने प्रतियोगिनः (यस्याभावः स प्रतियोगी) निषेध्यत्वेन विवक्षितस्य ज्ञानं यथा आवश्यकं न तथा प्रतियोगिनः पूर्वोक्तस्य ज्ञाने अभावस्य निषेधस्य ज्ञानमवश्यं कारणं = हेतुर्भवतीति कोऽपि सम्मनुते ।

शङ्का—यदि अपवादशास्त्र के वाक्यार्थबोध की अपेक्षा किये विना ही उत्सर्गशास्त्र का वाक्यार्थबोध होगा तो इष्ट स्थल के समान निषेधशास्त्र के विषय में भी उत्सर्गशास्त्रों की प्रवृत्ति होने पर 'भुक्तवन्तं प्रति मा भुंक्था, किं तेन कृतम्' इस न्याय के अनुसार निषेधशास्त्र व्यर्थ हो जायेगा, इसी आधार पर 'पूर्वं हि अपवादाः अभिनिविशन्ते पश्चादुत्सर्गाः' यह न्याय माना गया है । अतः उत्सर्ग-वाक्यार्थबोध के पूर्व अपवादशास्त्र का वाक्यार्थबोध आवश्यक होने से अन्योन्याश्रय दोष की स्थिति पूर्ववत् बनी हुई है ।

समाधान—पूर्वम् हि इति । वैयाकरणों की दो श्रेणी है–एक लक्षणैकचक्षुष्क की, जो सूत्र-वार्त्तिक-भाष्य वचन के द्वारा लक्ष्यों के साधुत्व का निर्णय करते हैं । दूसरी लक्ष्यैकचक्षुष्क की, जो लक्ष्य से साधुत्व का निर्णय करते हैं । मुनित्रय से अतिरिक्त प्रकृत में पहली श्रेणी में विवक्षित हैं । वे लोग उद्देश्यमात्र में सर्वत्र उत्सर्ग सूत्र के द्वारा संस्कारबुद्धि करने से 'यस्याभावः स प्रतियोगी' उत्सर्ग जिस का अभाव बोधित करता है वही यहां प्रतियोगी विवक्षित है । और अपवादशास्त्रों के विषयभेद की व्यवस्था न होने से भोजन करने के बाद भोजननिषेध के समान अपवादशास्त्र की निरर्थकता के कारण अपवादशास्त्र विषय की पर्यालोचना के अनन्तर अपवादशास्त्र विषय के संस्कारयोग्य लक्ष्यों का निर्णय कर अपवादशास्त्र के विषय से भिन्न तत्तत् लक्ष्यों के लिये उत्सर्गशास्त्र का प्रामाणिक वाक्यार्थबोध के द्वारा उन लक्ष्यों का संस्कार करते हैं । अन्यथा = अपवादशास्त्रों के विषयों से भिन्न तत् तत् विषय का वाक्यार्थबोध न मानने पर उत्सर्गशास्त्र और निषेधशास्त्र—दोनों के प्रामाण्य के लिये पर्याय से निषेध-स्थल में दोनों की प्रवृत्ति होने से आपत्ति स्पष्ट है ।

चक्षुष्कस्य उद्देश्यतावच्छेदकावच्छिन्ने सर्वत्रोत्सर्गकृतसंस्कारबुद्धावुत्सर्गापवादयोर्विषयव्यवस्थानापत्त्या 'भुक्तवन्तं प्रति मा भुंक्था' इति वाक्यस्येवापवादशास्त्रवैयर्थ्यापत्त्या चापवादशास्त्रपर्यालोचनेन तद्विषयलक्ष्यसंस्कारं निर्णीय तदविषयं तत्तल्लक्ष्यं तत्तद्विषयवाक्योपप्लवद्वारोत्सर्गेण संस्करोति, अन्यथा विकल्पापत्तिरिति ।

किञ्च, प्रतियोगिनः निषेध्यस्य ज्ञानं विना निषेधबोधकवाक्यस्यार्थ एव न प्रतीयेत । इत्पदार्थस्य ज्ञानाभावेनाप्रसिद्धतया अप्रसिद्धप्रतियोगिकाभावस्य नैयायिकैरप्यस्वीकारात् निषेधवाक्यार्थस्य असम्भव इति ग्रन्थाशयः । अधिकमन्यत्र स्पष्टम् ।

टिप्पण्यां चिन्त्यमित्युक्तम् ।

तथाहि—'अभावज्ञाने प्रतियोगिज्ञानस्य' इति शेखरपंक्तेरन्यथाऽऽशयं कल्पयित्वा चिन्त्यमित्युक्तम् । ततः आशयान्तरेण संयोजनमिति न शोभते । व्याख्यात्रा विमत्सरेण भवितव्यम् । नञ्पदवाच्यतावच्छेदकं यद् रूपं तेन रूपेण अभावबोधनं प्रतियोगिज्ञानं विना न जायते । तथा च नेत्युक्तौ किं नेति जिज्ञासा प्रतियोगिविषयिणी नियमेन जागर्ति ।

बहुषु जनेषु मध्ये यो देवदत्तं न परिचिनोति, स केनचित् 'देवदत्तोऽस्ति' इति पृष्टो नैव वक्तुं पारयेत्—अस्ति नास्तीति; एवञ्च नञा अभावबोधने प्रतियोगिज्ञानमपेक्षितमित्यत्र शेखरस्य तात्पर्यमिति काऽसङ्गतिः ।

प्रातिपदिकार्थसूत्रे पठितेन 'पूर्वं हि अपवादाः' इति न्यायेन उत्सर्गशास्त्रीयवाक्यार्थबोधात् पूर्वम् अपवादशास्त्रीयवाक्यार्थबोधस्य सूचनात् प्रागुक्तदिशा सुप्तिङोरनिष्पत्त्या अन्योन्याश्रयस्तदवस्थ एव ? इत्याह—**पूर्वं हि** इति । अयं भावः—लक्षणं पाणिनीयसूत्रम्, एकं प्रधानं चक्षुः = ज्ञापकं यस्य स लक्षणैकचक्षुष्कः तस्य मादृशस्येति यावत् । उद्देश्यतावच्छेदकावच्छिन्ने = उत्सर्गशास्त्रीये उद्देश्यमात्रे सर्वत्र = अपवादविषये = अपवादशास्त्रविषये च उत्सर्गकृतस्य = सामान्यशास्त्रविहितस्य संस्कारस्य = कार्यस्य, बुद्धौ = ज्ञाने उत्सर्गापवादशास्त्रयोः द्वयोः विषयव्यवस्थायाः लक्ष्यभेदनिश्चयस्य अनापत्या 'भुक्तवन्तं प्रति मा भुंक्थाः' इति न्यायस्य इव=यथा कृतभोजनं कमपि कश्चित् प्रतिषेधेत्—मा भोजनं कार्षीः इति, तत्र व्यर्थं तद् वचः, तथैव कार्ये जाते निषेधस्य वैयर्थ्यापत्त्या अपवादशास्त्रस्य वैयर्थ्यभिया च अपवादशास्त्रीयवाक्यार्थबोधस्य निश्चयेन तत्सूत्रीयलक्ष्यसंस्कारं प्रमाय तदविषयम् = अपवादशास्त्राविषयं तत्तल्लक्ष्यं = तत्तल्लक्ष्यविषयकं वाक्यमुपकल्प्य तद्द्वारा संस्करोति = साध्नोति । अन्यथा सर्वथा शास्त्रबाधे प्राप्ते विकल्पापत्तेः ।

अत्रायं निष्कर्षः—वाक्यार्थबोधः पूर्वं विधिशास्त्रस्य, पश्चात् निषेधशास्त्रस्य—अत्र न किञ्चिद् बाधकम् । परं लक्ष्ये प्रवृत्तिवेलायां 'प्रकल्प्य चापवादविषयम्' इति न्यायेन अपवादविषयं प्रकल्प्य = परित्यज्य शेषेषु लक्ष्येषु उत्सर्गविधिः प्रवर्तते इत्यर्थः । उत्सर्गसूत्रस्य प्रवृत्तिवेलायाम् अपवादविषयस्य परिहारं कृत्वैव तस्य प्रवृत्तिस्थलं निर्धारणीयम् ।

यद्यपि 'भुक्तवन्तं प्रति' इति न्यायो लुगादिना जातनिवृत्तेर्व्यभिचरितः, तथापि तत्राप्यनुत्पत्तिरेवेति न दोषः, न्यायानङ्गीकारेऽपि विकल्पापत्तेः सत्त्वाच्च। 'अभिनिविशन्ते' इत्यस्य बुद्ध्यारूढा भवन्तीत्यर्थः।

लक्ष्यैकचक्षुष्कस्तु तत्तच्छास्त्रपर्यालोचनं विनापि अपवादविषयं परित्यज्योत्सर्गेण

यद्यपीति। भुक्तवन्तं प्रति इति पूर्वोक्तो न्यायः व्याकरणशास्त्रे विभक्त्यादीनां जातानामुत्पन्नानां लुका निवृत्तेः = निवर्तनस्वीकारात् व्यभिचरितः = न प्रवृत्तः, तथापि तत्रापि = लुगादिस्थलेऽपि[1] विभक्त्यादेरनुत्पत्तिरेव स्वीक्रियते। तथा च उक्तरीत्या न्यायः तदन्यविषय इति न व्यभिचारदोष इति। भुक्तवन्तमिति न्यायानभ्युपगमेऽपि लुगादिना जातनिवृत्तौ सत्यां स्वादिविधायकसूत्रस्य प्रामाण्याय विभक्तेः श्रवणम्, लुगादिशास्त्राणां प्रामाण्यरक्षणाय च तद्बोधिता निवृत्तिरिष्टा—इति द्वयोः प्रामाण्याय विकल्पः आपद्येत।

कदाचित् लुक् कदाचित् श्रवणमिति। तस्मात् पूर्वम् अपवादशास्त्राणि अभिनिविशन्ते = बुद्ध्यारूढानि भवन्ति, तदनन्तरम् उत्सर्गशास्त्राणि लक्ष्याणि संस्कुर्वन्ति। लक्षणैकचक्षुष्कानाम् अस्मादृशानां कृते एष उपायः।

लक्ष्यैकचक्षुष्कस्तु इति। लक्ष्यमेकं प्रधानं चक्षुः ज्ञापकं यस्य स महर्षिपाणिन्यादिः, अपवादशास्त्रीयवाक्यार्थबोधमकृत्वापि अपवादस्थलं विहाय उत्सर्गशास्त्रेण लक्ष्यसाधुत्वं जानाति।

यद्यपि 'भुक्तवन्तम्' इस न्याय का सु अम् शप् आदि विभक्तियों की उत्पत्ति के अनन्तर लोप, लुक् के द्वारा निवृत्ति की जाने से व्यभिचार स्फुट है, तथापि न्याय को व्यभिचरित होने से बचाने के लिये लोप और लुक् के द्वारा उन स्थलों में भी उनकी अनुत्पत्ति का बोध न होने से जात की निवृत्ति नहीं हुई। 'भुक्तवन्तम्' इस न्याय का व्याकरण में आश्रयण न करने पर भी दोनों शास्त्रों के प्रामाण्य के लिये उत्सर्ग और अपवाद को विकल्प से प्रवृत्ति की आपत्ति बनी हुई है।

'पूर्वम् हि' इस न्याय के 'अभिनिविशन्ते'—इसका 'बुद्धि में आरूढ़ होना' ऐसा अर्थ है, 'प्रवृत्त होना' अर्थ नहीं है। अतः अपवादशास्त्र के विषय बुद्धि के विषय हो जाने से तद्भिन्नविषयक ही उत्सर्गशास्त्र का लक्ष्यसंस्कार वाक्यार्थबोध अलग अलग लक्ष्यों के लिये होता है—यह भाव है।

लक्ष्य के अनुसन्धान से ही उनके साधुत्व के निर्णय करने वाले लक्ष्यैकचक्षुष्क कहे जाते हैं। वे लोग अपवादशास्त्र का अनुसन्धान किये विना भी अपवादशास्त्र के प्रवृत्तिस्थलों को त्याग कर उत्सर्गशास्त्रों के द्वारा लक्ष्यसंस्कार का ज्ञान करते हैं। लक्ष्यैकचक्षुष्क को लक्ष्यसंस्कार ज्ञान के लिये सूत्रापेक्षा न होने पर भी शास्त्रप्रक्रियाज्ञानपूर्वक साधु शब्दों के प्रयोग में धर्मोत्पत्ति होने से शास्त्रस्मरण अपेक्षित होता है। इस अभिप्राय से लिखा है—'प्रकल्प्य च अपवादविषयम्' इत्यादि 'प्रकल्प्य' इसका 'परित्याग कर' ऐसा अर्थ है। भाव यह है कि 'पूर्वं हि अपवादाः' इस न्याय के अनुसार निषेधशास्त्र—'न विभक्तौ' इसकी प्रवृत्ति होनी चाहिये, किन्तु विभक्ति का ज्ञान सुप् तिङ् के अधीन और सुप् का ज्ञान 'हलन्त्यम्' इसके वाक्यार्थबोध के अधीन

---

१. आदिना लुबादीनां संग्रहः।

लक्ष्यसंस्कारज्ञानीते, तस्यापि शास्त्रप्रक्रियास्मरणपूर्वकप्रयोगे एव धर्मोत्पत्तेः। तदुक्तम्—'प्रकल्प्य चापवादविषयं तत उत्सर्गः प्रवर्तते' इति। प्रकल्प्य = परित्यज्य।

यत्तु 'प्रकल्प्य च' इत्यस्यायमर्थः—यथा 'न सम्प्रसारणे' (६।१।३७) इति

न च लक्ष्यैकचक्षुष्कः सूत्रमनपेक्ष्यैव साधुत्वं जानातीति कुतस्तस्य लक्षणापेक्षा? इत्यत आह—**तस्यापि इति**। लक्ष्यैकचक्षुष्कस्यापि शास्त्रप्रक्रिया = सूत्रसहितकार्यं स्मृत्वैव प्रयोगे = साधुशब्दनिर्देशे एव। एवकारेण सूत्रस्मरणपूर्वकप्रयोगाभावे धर्मोत्पत्तेरभावः सूचितः। तदुक्तम्—प्रकल्प्य चापवादविषयमिति। अपवादविषयं परित्यज्य ततः तदनन्तरम् उत्सर्गशास्त्रं प्रवर्तते इति न्यायस्याशयः।

वस्तुतः भावादेशस्थले 'इको यणचि' इति यणि इकारनिवृत्तौ तस्य स्थाने यकारस्य श्रवणेन शब्दानित्यत्वं प्राप्नोति, तस्य परिहाराय अजव्यवहितपूर्वस्येकः बुद्धौ प्राप्तायाम् तद्बुद्धिं परित्यज्य यकारबुद्धिः कर्तव्या इति वुद्धेरेव विपर्यासो भवति न वर्णस्येति नानित्यत्वप्रसङ्गः। तथैव लुग्लोपादिस्थलेऽपि न कस्यचित् अभावो बोध्यते, अपि तु बुद्धिरेव व्यावर्त्यते इति न भुक्तवन्तमिति न्यायस्यायं विषयः—इति लुका प्रत्ययस्यानुत्पत्तेरन्वाख्यानं नावश्यकम्।

कैयटोक्तमर्थं खण्डयितुमाह—**यत्तु इति**। प्रकल्प्य=अपवादविषयं सम्पाद्य। अयमर्थः=अर्थशब्दः प्रयोजनपरः। 'न सम्प्रसारणे सम्प्रसारणम्' इत्यनेन अपवादेन सम्प्रसारणस्य निषेधः तदा प्राप्नोति यदि युवन्शब्दस्य शसि वकारस्य पूर्वं सम्प्रसारणं विधाय पश्चात् यकारस्य सम्प्रसारणं प्राप्नुयात्। पूर्वयकारस्य सम्प्रसारणे कृते पश्चात् वकारस्य सम्प्रसारणं यदि प्राप्नुयात्, नानेन शक्यते प्रतिषेद्धुम्; परत्र सम्प्रसारणस्याभावात्।

और इसका वाक्यार्थबोध 'न विभक्तौ' इसके वाक्यार्थबोधानन्तर माना है। इस तरह अन्योन्याश्रय प्रकारान्तर से अवस्थित है।

समाधाता का तात्पर्य है—उक्त न्याय स्थित 'अभिनिविशन्ते' इस पद का प्रवृत्ति रूप अर्थ नहीं, किन्तु 'बुद्धि में विषयीभूत होते हैं'—ऐसा अर्थ है। लक्षणैकचक्षुष्क सामान्यतः 'न विभक्तौ' इसके पद-पदार्थ की उपस्थिति से वाक्यार्थबोध के अनन्तर इस निषेधसूत्र के विषय को बुद्धिस्थ कर उत्सर्गशास्त्र 'हलन्त्यम्' के निषेधशास्त्रविषयक प्रत्येक लक्ष्यसंस्कारक वाक्यार्थ की कल्पना होती है। अतः अन्योन्याश्रय नहीं है।

लक्ष्यैकचक्षुष्कों के लिये सूत्रानुसन्धान आवश्यक न होने पर भी धर्मोत्पत्ति में शास्त्रप्रक्रियास्मरणपूर्वक प्रयोग की ही कारणता होने से वे अपवादशास्त्र के विषय का परित्याग शास्त्र के अनुसन्धान के विना भी कर देते हैं। इस प्रकार उनके लक्ष्य से भिन्न लक्ष्यों का उत्सर्गशास्त्र के द्वारा संस्कार करते हैं। 'प्रकल्प्य चापवादविषयम्' इत्यादि न्यायानुसारी इनका मत है। 'प्रकल्प्य' इसका 'परित्याग कर' ऐसा अर्थ है। शास्त्रानुसन्धान के विना ही अपवाद विषय का परित्याग होने से अन्योन्याश्रय की शङ्का इस पक्ष में भी नहीं है।

खण्डनार्थ कैयट मत का प्रदर्शन करते हैं—**यत्तु इति**। इनके मत में 'प्रकल्प्य' इस पद का 'सम्पादन करके' ऐसा अर्थ है। इसका अर्थ अर्थात् प्रयोजन है 'न सम्प्रसारणे सम्प्रसारणम्' इस

वचनात् 'परस्य यणः पूर्वं सम्प्रसारणं पूर्वस्य तु तन्निमित्तः प्रतिषेधः' इति अभ्यस्तसंज्ञासूत्रे कैयटः। तन्न; 'न सम्प्रसारणे' (६।१।३७) इति सूत्रस्थभाष्यविरोधात्। तत्र हि 'एतदेव ज्ञापयति परस्य न पूर्वस्येति, यद्वा सम्प्रसारणाश्रयस्य प्रतिषेधः' इत्याद्युक्तम्। न हि न्यायेन सिद्धे एवमुक्तिरुचिता। तस्माद् न्यायस्य मदुक्त एव विषय इति बोद्धव्यम्।

अतः परिभाषया अनया अपवादविषयसम्पादनपूर्वकम् उत्सर्गसूत्रस्य प्रवृत्तिः कर्तव्या। इदमेवाह—**वचनात् परस्य** इति। उत्तरस्य यणः वकारस्य (युवन्शब्दे) पूर्वं सम्प्रसारणे पूर्वस्य यकारस्य तन्निमितः = सम्प्रसारणनिमित्तः प्रतिषेधः—इति 'उभे अभ्यस्तम्' इति सूत्रे कैयटेनोक्तम्। **तन्नेत्यादिना** निराकरोति। 'न सम्प्रसारणे' इति सूत्रभाष्यविरोधात्। तत्रेदमुक्तम्—यदि पूर्वस्य यणः सम्प्रसारणं पूर्वं स्यात् तदा 'न सम्प्रसारणे' इति सूत्रस्य वैयर्थ्यमेव स्यात्; उदाहरणाभावात्। तत्र = भाष्ये एतदेव = 'न सम्प्रसारणे' इति सूत्रमेव ज्ञापयति—परस्य, न पूर्वस्य यणः—सम्प्रसारणं प्रथमं भवतीति। **यद्वेति**। सम्प्रसारणाश्रयस्य = सम्प्रसारणं निमित्तीकृत्य जायमानस्य 'सम्प्रसारणाच्च' इति पूर्वरूपस्य प्रतिषेधः इष्यते। तेन यूनः इत्यादौ यकारस्य पूर्वं सम्प्रसारणे 'प्रथमयोः' इति कृतदीर्घोकारेण सह पूर्वरूपस्य प्राप्तस्यानेन प्रतिषेधात् यणादेशे यूनः इत्यस्य सिद्धिः।

'न सम्प्रसारणे सम्प्रसारणम्' इति सूत्रं विहाय 'सम्प्रसारणाच्च' इति सूत्रस्य स्थाने 'सम्प्रसारणादसम्प्रसारणे' इति न्यासो विहितः। परस्मिन् सम्प्रसारणे सति पूर्वरूपं न, किन्तु सम्प्रसारणभिन्नेऽचि परे पूर्वरूपस्य विधानात् न दोष इति भावः। **नहीति**। यदि यूनः इत्यत्र पूर्वं वकारस्य सम्प्रसारणं पश्चात् यकारस्य—इति प्रयोजनं परिभाषया 'पूर्वं हि अपवादा' इत्यनया सिद्ध्येत्, ततो भाष्यकारेण सूत्रारम्भसामर्थ्यात् न्यासान्तरेण वा किमर्थं समादधीत। अतःकैयटाभिमतः परिभाषार्थो न युक्तः, किन्तु प्रकल्प्य परित्यज्य इत्यादिरूपेण व्याख्यात एव परिभाषार्थो युक्तिसहः।

सूत्र से सम्प्रसारण का निषेध। 'यूनः' इस प्रयोग में 'युवन् अस्' इस अवस्था में 'श्वयुवमघोनाम्' इत्यादि सूत्र से यदि पहले यकार को सम्प्रसारण हो जाता है तो 'सम्प्रसारणपरत्व न होने से' 'न सम्प्रसारणे' इसकी प्रवृत्ति नहीं होगी। उक्त न्याय के मानने पर इसकी सहायता से पर यण् (वकार) को सम्प्रसारण पूर्व में होने से यकार को प्राप्त सम्प्रसारण का निषेध 'न सम्प्रसारणे' इससे हो जाता है; क्योंकि सम्प्रसारण पूर्व यण् के पर में है। अतः 'प्रकल्प्य' इसका 'सम्पाद्य' इस प्रकार अर्थ कर इसका उपयोग 'न सम्प्रसारणे' इस में करना चाहिये।

परन्तु यह पक्ष भाष्यविरोध के कारण युक्त नहीं है। भाष्य में 'यूनः' इसमें यकार को पूर्व में सम्प्रसारण करने की आशंका का निवारण 'न सम्प्रसारणे सम्प्रसारणम्' इस सूत्र के वैयर्थ्य के आपादन से किया है। यदि उक्त न्याय का यह विषय होता तो उसी से इस दोष की निवृत्ति हो जाती। फिर पूर्व यण् के पहले सम्प्रसारण होने पर, पर में सम्प्रसारण के न होने के कारण 'न सम्प्रसारणे' इसका उदाहरण असंभव है। अतएव सूत्र के वैयर्थ्य के भय से 'पर यण् को पहले सम्प्रसारण होता है'—ऐसी कल्पना क्यों की गयी ! अतः न्याय का मदुक्त ही अर्थ है।

यदपि 'अपवादवाक्यार्थं विना नोत्सर्गवाक्यार्थ इति तदर्थः' इति। तदपि न; उक्तयुक्तेः। 'न विभक्तौ तुस्माः' (१।३।४) इति शास्त्रे तुस्मपदार्थज्ञानमात्रेण पादीनामेव तद्विषयत्वाभावबुद्ध्या तेषु हलन्त्यसूत्रप्रवृत्त्या सुप्तिङ्रूपविभक्तिपदार्थज्ञानं सुलभमिति दिक्।

अत्राप्युपदेश इति सम्बद्ध्यते। तद्बललभ्यमर्थमाह—सूत्रे इति।

आदिरन्त्येन (१।१।७१)। **आदिरिति किम्? अन्त्यशब्देन पूर्वेषामाक्षेपा-**

यदपीति। अपवादवाक्यार्थं विना = अपवादशास्त्रीयवाक्यार्थबोधात् प्राक् न उत्सर्ग-वाक्यार्थः = उत्सर्गसूत्रस्य बोध एव न भवति। तदपि न। उक्तयुक्तेः = पदपदार्थोपस्थितौ आकाङ्क्षादिसत्त्वे वाक्यार्थबोधे बाधकाभावात्।

'न विभक्तौ' इति सूत्रघटकाः उद्देश्यविशेष्यभूता ये तु-स्म-पदार्थाः तेषां ज्ञान-मात्रेण (मात्रशब्देन वाक्यार्थबोधं) व्यवच्छिन्न तिबादीनां = सुबादिघटकानाम् एतस्य = न विभक्ताविति सूत्रस्य, विषयत्वाभावबुद्ध्या = विषयत्वाभावनिश्चयेन तेषु = पकारादिषु हलन्त्यमिति सूत्रप्रवृत्त्या सुप् तिङरूपा या विभक्तिस्तस्या अर्थज्ञानं सुलभम् = न विभक्ता-वित्यस्य वाक्यार्थबोधाभावेऽपि प्रतियोगिसमर्थकेन तु-स्मा-इति ज्ञानमात्रेण पादीनां तद्भिन्नत्वेन तन्निषेधाविषयत्वग्रहेण तत्रेत्संज्ञा सुलभेति भावः।

अत्रापि इति। आवृत्ते हलन्त्यमिति सूत्रे—अपिना अपरस्य द्वितीयस्य समुच्चयः, उपदेशशब्दस्य आद्योच्चारणार्थकतया परममूले व्यवस्थापितत्वात् आद्योच्चारणविषय-त्वस्य पाणिन्यादिकृते सूत्रे एव सम्भवात्। तदाह—तद्बलेन = उपदेशबलेन लभ्यमर्थमाह सूत्रे = हलित्याकारके सूत्रे इत्यर्थः। तेन 'हल् विलेखने' इति धातोर्लकारस्य नेत्त्वम्।

आदिरन्त्येनेति। अस्मिन् सूत्रे आदिपदोपादानाभावेऽपि अन्त्यत्वम् आदिं विना नोपपद्यते इति आदेराक्षेपादेव लाभे सिद्धे तद्ग्रहणं व्यर्थम्। न चाक्षेपलब्धस्य शाब्दबोधे भानं न स्यात्, शक्तिलक्षणान्यतरेणोपस्थितस्यैव बोधाभ्युपगमादिति वाच्यम्; क्वचित् तथानुपस्थितस्यापि व्युत्पत्तिवैचित्र्येण बोधाङ्गीकारात्। अतएव अनुकरणस्थले अभेद-पक्षे सादृश्यादुपस्थितस्यानुकार्यस्य भानं भवति? इति शङ्कायामाह—**अन्त्यशब्देनेति**। अन्त्यत्वस्य पूर्वं निरूपितत्वेन पूर्वत्वस्येक्प्रत्याहारे इकारे इव अकारेऽपि सत्त्वात् तस्य इक्प्रत्याहारे ग्रहणापत्तेर्वारणाय आदिपदम्। आदिपदे कृते तु इक्प्रत्याहारे इकार एवं आदिर्नाकार इति नोक्तदोषावकाशः। यदि आदिपदं न स्यात्, तदा अन्त्येन

मतान्तर का निराकरण करते हैं—**यदपि इति**। अपवादशास्त्र के वाक्यार्थबोध के विना उत्सर्गशास्त्र का वाक्यार्थबोध ही नहीं होता—यही उक्त न्यायद्वय का अर्थ है।

यह भी युक्तियुक्त नहीं है। साकाङ्क्ष पदों से पदार्थोपस्थित्यादि रहने पर शाब्दबोध होने में कोई बाधक नहीं है। 'न विभक्तौ तुस्माः' इस सूत्र से इत्संज्ञा होने पर सुप् तिङ् का बोध सुलभ है। आवृत्त 'हलन्त्यम्' इस सूत्र में भी उपदेश पद की अनुवृत्ति है। शेखरकार उपदेश को धातु-सूत्र-गणोणादिपरक मानकर लिखते हैं—तद्बलेति। उपदेश पद के सामर्थ्य से 'सूत्रे' ऐसा अर्थ परम मूल में किया गया है।

आदिरन्त्येन सहेता इति। इस सूत्र में आदि शब्द का उपादान न करने पर अन्त्य आदि के

दिगादिप्रत्याहारेऽकारादिग्रहणं मा भूदिति। एवमादिशब्देन परेषामाक्षेपादिणादि-प्रत्याहारेषु ञादीनां ग्रहणं मा भूदित्यन्त्येनेति। आदिः, अन्त्येन—इत्युभयोपादाने तु न दोषः; अयमादिरन्त्यो वेत्युक्तेऽवशिष्टमपि किञ्चिदस्तीति नियमेन प्रतीतेः। परस्मिन् सति

पूर्वेषां वर्णानामाक्षेपात् इगादिप्रत्याहारे ककाररूपात् अन्त्याक्षरात् पूर्वो यथा इकारस्तथा अकारोऽपि—इति ककारनिष्ठा या चरमावयवता = अन्त्यावयवता तन्निरूपकसमुदायः = अकारादारभ्य ककारपर्यन्तं तद्घटके वर्णे = तादृशसमुदायबोध्ये प्रत्येकस्मिन् वर्णे 'आदिरन्त्येन' इति सूत्रेण शक्तेर्बोधनेन इक्प्रत्याहारे अकारस्य बोधः स्यात् इति टिप्पणी-तात्पर्यम्।

एवमेव अन्त्यपदस्याकरणे—आदिपदेन इण्प्रत्याहारे इकारनिष्ठाद्यवयवतायाः निरूपको यः समुदायः स इकारमारभ्य लण्घटकणकारपर्यन्तमिव 'ञमङणनम्' इति घटकमकारपर्यन्तमपि भवितुमर्हति, तादृशसमुदायघटके तत्समुदायबोध्ये वा शक्तेरभ्युपगमे इणादिप्रत्याहारे ञकारादीनां ग्रहणं स्यात्। अतः उक्तम्—**आदिरन्त्येनेति**। तथा च आदिरन्त्येन—इत्युभयोपादानेन तदपेक्षया अवशिष्टं किञ्चिद् अस्तीति प्रतीयते। तत एव मध्यगानामिति लब्धम्; मध्ये केषाञ्चित् असत्त्वे आद्यन्तत्वस्यैवानुपपत्तेः।

परस्मिन् = अग्रे कस्यचित् सत्त्वे एव। यस्मात् = यदपेक्षया पूर्वः = प्रथमो नास्ति स आदिः। पूर्वस्मिन् सति यस्मात् परः = अग्रिमो नास्ति सोऽन्त्य इति। आदि-लक्षणे यस्मात् पूर्वो नास्तीत्यस्य स्वघटकपूर्वो नास्तीत्यर्थः। अतः 'घटपटौ' इत्यत्र पट-शब्दघटकात् पकारात् पूर्वं घटशब्दघटकस्याकारस्य सत्त्वेन, यस्मात् पूर्वो नास्तीत्यस्या-भावात् पकारस्य पटशब्दादित्वं न स्यादिति नाशङ्कनीयम्। घटशब्दघटकाकारो न पटशब्दघटकः, किन्तु घटशब्दघटकः—इति न तमादाय दोषः। एवमेव अन्त्यलक्षणे परो नास्तीत्यत्रापि स्वघटकः परो नास्तीत्यर्थः। तथा च 'घटपटौ' इत्यत्र घटशब्दस्याकारा-नन्तरं पटघटकपकारस्य सत्त्वेन परो नास्तीत्यस्याभावेन लक्षणं न समन्वेतीति शङ्का दूरं गता, पटघटकपकारस्य घटकत्वाभावात्।

तथा चेदं लक्षणं पर्यवसन्नम्—स्वघटकत्वम्, स्वघटकत्वाव्यवहितपूर्वत्वम्, स्वघट-काव्यवहितोत्तरत्वाभाववत्वम्—एतत् त्रितयसम्बन्धेन स्वविशिष्टत्वम् आदित्वम्।

स्वघटकत्वम्, स्वघटकाव्यवहितोत्तरत्वम्, स्वघटकाव्यवहितपूर्वत्वाभाववत्वम्—इत्येतत् त्रितयसम्बन्धेन स्वविशिष्टत्वम् अन्तत्वम्। समन्वयश्चेत्थम्—स्वशब्देन आद्यन्त-घटितः समुदायः इक् इति तद्घटकत्वम्, इकारस्य स्वघटको यः ककारः ततोऽव्यवहितः

बिना अनुपपन्न होने से जिस किसी आदि (पूर्व) का आक्षेप प्राप्त होगा, ऐसी दशा में इणादि प्रत्याहार में अकार के ग्रहण का प्रसङ्ग हो जायगा। इसी प्रकार सूत्र में अन्त्य पद का उपादान न करने पर आदि पद अन्त्य के बिना अनुपपन्न हो कर जिस किसी अन्त्य का आक्षेप प्राप्त होने के कारण इणादि प्रत्याहार में अकार का ग्रहण प्राप्त होगा। इस लिये सूत्र में आदि और अन्त्य इन दोनों पदों का ग्रहण किया गया है। लोक में यह आदि है अथवा अन्त्य है—ऐसा कहने पर मध्य में भी हैं ऐसी प्रतीति नियमतः होने से जिसके अनन्तर किसी के रहने पर ही और

यस्मात्पूर्वो नास्ति स आदिः, पूर्वस्मिन् सति यस्मात्परो नास्ति सोऽन्त्य इति अकारादि-ग्रहणे इकार-णकारादीनामाद्यन्तत्वस्यैवानापत्तेः ।

पूर्वत्वं = व्यवधानरहितपूर्वत्वमपि - इकारस्य एतदुभयसम्बन्धस्य मध्यमे वर्णेऽपि सम्भवात् । तृतीयं सम्बन्धमाह—स्वघटकः आद्यो वर्ण इकारः तदव्यवहितोत्तरत्वमेव मध्यमवर्णस्य, अतो न तत्र लक्षणसमन्वयः । आद्याक्षरे तु स्वघटकत्वेन अभिमता ये वर्णाः तेभ्योऽव्यवहितोत्तरत्वं नास्ति; यतः = एतस्मात् इकारात् पूर्वं यदि कश्चित् इकारघटको वर्णः स्यात्, तदा तद्वर्णस्याव्यवहितोत्तरत्वमिकारस्य सम्भाव्येत । नैवमस्ति; अतस्तदव्यवहितोत्तरत्वाभावात् समन्वयः सुलभः । अन्त्यलक्षणमपि = अन्तिमेन वर्णेन लण्घटकेन णकारेण इण्प्रत्याहारस्य सिद्धिः स्यात् । स्वघटकत्वं स्वघटकाव्यवहितोत्तरत्वमन्त्यस्य स्वघटकाव्यवहितपूर्वत्वाभावोऽपि अन्त्ये वर्णे इति समन्वयः ।

आद्यवयवतानिरूपकः समुदायः अन्त्याक्षरघटित एव ग्राह्य इति इण्प्रत्याहारे ञादीनां ग्रहणं न प्राप्नोति । अकारादिग्रहणे—इत्यत्र आदिना ञकारादिः । इक्, इण् इत्यादिप्रत्याहारेणेति भावः । इक्प्रत्याहारे अकारस्य, इण्प्रत्याहारे ञकारस्य ग्रहणे इकार-णकारयोः आद्यन्तत्वमेव न प्राप्नुयात् । इकारस्य समुदायघटकोत्तरत्वेन णकारस्य च समुदायघटकपूर्वत्वेन, आद्यन्तलक्षणस्य समन्वयाभावात् ।

अत्र = 'आदिरन्त्येन' इति सूत्रे **अवयवत्वेति** । अवयववाचकाभ्याम् । स्वघटितः = आद्यन्तघटितः समुदायः आक्षिप्यते । अइउण्, ऋऌक् इत्यादिघटितः समुदायः । एष एव संज्ञी = अजादिसंज्ञाबोध्यः । तस्य समुदायरूपस्य एकस्मिन् उदाहरणे स्थित्यभावात् सामर्थ्यात् प्रत्येकस्मिन् वर्णे संज्ञित्वं बोध्यते । बोध्यत्वदशायामन्त्याक्षरस्य न तत्कार्यम् = संज्ञित्वप्रयुक्तं कार्यं न; इत्संज्ञा-लोपयोः प्रवृत्त्या तस्य = अन्त्याक्षरस्य अपहारात् = निवृत्तेः ।

उसके पूर्व किसी के नहीं रहने पर आदित्व का, तथा पूर्व में किसी के रहने पर जिसके बाद दूसरे के न रहने पर अन्त्यत्व का व्यवहार माना गया है । इसलिये अण् आदि प्रत्याहारों में अकार के ग्रहण से इकार में आदित्व और आदि के ग्रहण से णकार में अन्त्यत्व की अनापत्ति = अप्राप्ति होने से उनका ग्रहण नहीं होता ।

आद्यावयवत्व रूप से बोधक आदि शब्द एवं अन्त्यावयवत्व रूप से बोधक अन्त्य पद से आद्यन्तघटित समुदाय का आक्षेप होता है । वही अणादि पद का संज्ञी है । उस समुदाय की एक लक्ष्य में स्थिति असम्भव होने से समुदायघटक प्रत्यक्षर संज्ञी बोध्य होता है । इत्संज्ञक अन्त्य वर्ण प्रत्याहारों से बोध्य होकर कार्य के अधिकारी नहीं होता; क्योंकि इत्संज्ञा और लोप के द्वारा अन्त्य वर्ण का अपहार हो जाता है । समुदायघटक आदि और अन्त्य वर्ण भी है । अतः अन्त्य वर्ण की इत्संज्ञा की सावृत्ति लोपापहार से हो जाने के कारण आदि वर्ण का ग्रहण प्रत्याहार से प्राप्त है । इसी फलित अर्थ का 'स्वस्य च' इससे भाष्य एवं परम मूल में कहा गया है । "स्वं रूपम्" इस सूत्र से स्व पद की अनुवृत्ति द्वारा 'स्वस्य च रूपस्य' ऐसा व्याख्यान किया गया है—इस प्रकार का किसी का कथन अग्राह्य है । इसकी अनुवृत्ति करने में कोई फल नहीं है । अनुवृत्ति के बिना ही पूर्वोक्त रीति से इस अर्थ का लाभ हो जाता है ।

अत्राद्यन्ताभ्यामवयवत्वेन बोधकाभ्यां स्वघटितः समुदाय आक्षिप्तः संज्ञी। तस्य चैकत्र लक्ष्ये प्रयोगाभावात् प्रत्येकं संज्ञित्वम्। अन्त्यस्य तु न तत्कार्यम्; तस्येत्संज्ञा-लोपाभ्यामपहारात्। एतत्फलितकथनमेव भाष्ये मूले च—स्वस्य च रूपस्य इति।

स्वमित्यनुवृत्तिपरत्वेन व्याख्यानं तु हेयमेव; अनुवृत्तौ फलाभावात्।

इतेति किम्? ञमङणनम्' (मा० सू० ७) इति णकारादिभिः प्रत्याहारो मा भूदिति।

समुदाये अजादिसंज्ञायाः फलाभावात् प्रत्येकस्मिन् वर्णे सा संज्ञा भवतीति स्वीकारात् आदेरप्यनयैव रीत्या प्रत्याहारे ग्रहणस्य उपपादनात् आदेः संग्रहाय 'स्वस्य च रूपस्य'-इत्युक्तिः भाष्ये, सिद्धान्तकौमुद्याश्च पूर्वोक्तयुक्तिमूलिकैवेति। 'स्वं रूपम्' इति सूत्रात् स्वपदमनुवर्त्त्य 'स्वस्य च' इति व्याख्यानं निष्प्रयोजनम्; उक्तरीत्या अनुवृत्तिं विनाऽपि निर्वाहादिति भावः।

ननु 'आदिरन्त्येन' इति सूत्रस्य चतुर्दशसूत्र्या सह एकवाक्यतया तत्तत्सूत्रान्त्यस्यैव ग्रहणेन इतेति निर्देशो व्यर्थः इति चेन्न, इद्ग्रहणाभावे चतुर्दशसूत्र्या सहैकवाक्यत्वेऽपि अन्त्यपदेन सूत्रान्त्यस्यैव ग्रहणे मानाभावेन विवक्षितसमुदायनिरूपितादित्वेन यथा इकारादीनां ग्रहणं भवति, न तु सूत्रादेः, तथा सति इणादिप्रत्याहारे अकारादेः ग्रहण-प्रसङ्गात्, तथैवेहापि अन्त्यपदेन विवक्षितसमुदायान्त्यत्वस्य 'ञमङणनम्' इति घटक-णकारादावपि सत्त्वेन तमादाय इणादिप्रत्याहारसिद्धौ दोषापत्तेः। तत्परिहाराय इतेति कथितम्। तस्मिन् कृते ञमङणनमिति घटको णकारो नेत्संज्ञक इति न तेन प्रत्याहारः। सहशब्दोपादानात् अन्त्यविशिष्टस्य आदेः=अन्त्याक्षरसहितस्यादेः, संज्ञावाचकत्वम्= बोधकत्वम्, न त्वादिमात्रस्य।

आदिमात्रस्य संज्ञारूपत्वम्, अन्त्यस्य द्योतकत्वम्। अत एव विशिष्टाद् विभक्ति-रिति केचित् वदन्ति। वस्तुतः समुदाय एव संज्ञा। अत एव विशिष्टाद् विभक्तिराङ्गस्येनो-पपद्यते। न च अन्त्यस्य वर्णस्य इत्संज्ञालोपेन च निवृत्तौ अन्त्येन सह आदिरित्य-सङ्गतमिति वाच्यम्। सूत्रेषु=वर्णसमाम्नायसूत्रेषु अन्त्यस्य इत्संज्ञकत्वेऽपि इणादि-शब्देषु 'इको यणचि' इत्यादिसूत्रघटकेषु तेषु इत्संज्ञाया अप्रवृत्तेः। न चात्र इत्संज्ञायाः अप्र-वृत्तौ प्रत्याहारः कथं सिद्ध्येत् इत्संज्ञकत्वाभावादिति नाशङ्कनीयम्; 'इता' इत्यनेन इत्स-दृशेन इत्यर्थस्य बोधनात्। तस्य इत्त्वाभावेऽपि इत्सादृश्यं तु अस्त्येव। व्यक्तिपक्षे प्रत्यु-च्चारणं शब्दानां भेदात् सादृश्यनिबन्धनमेव तद्रूपतामाश्रित्य शास्त्राणि प्रवर्तनीयानि। एवमेव अत्रापि बोध्यम्। यथा तदेवेदं कार्षापणं यन्मथुरायां गृहीतम्। नहि तदेव कार्षा-पणं तत् यत् परा वर्त्यते, किन्तु तत्सदृशम्, परमुच्यते तदेवेदमिति। तथैवात्रापि।

शङ्का—'आदिरन्त्येन' इस सूत्र में 'इता' इस तृतीयान्त पद की क्या आवश्यकता है?

समाधान—अण् प्रत्याहार ञमङणनम् इस सूत्रघटक णकार से यञ् प्रत्याहार उक्त सूत्र के ञकार से, इसी प्रकार अन्य प्रत्याहार इस सूत्र के अक्षरों से गृहीत न होने के लिये 'इता' ऐसा विशेषण दिया। इसके कहने पर ञमङणनम् इसके घटक ञ म ङ ण न ये वर्ण इत्संज्ञक नहीं है। अतः इनका ग्रहण अन्त्य पद से नहीं होता।

सहग्रहणाच्च समुदाय एव संज्ञेति समुदायादेव 'इकः' इत्यादौ विभक्त्युत्पत्तिः, नादिमात्रात्। न चान्त्यस्येत्संज्ञालोपाभ्यामपहारात् 'आदिरन्त्येन' (१ । १७१) इत्यसङ्गतम्; सूत्रेष्वित्संज्ञायामपि इगादिशब्देषु तदभावात्। अन्त्येनेत्यस्य इदन्त्यसदृशेनेत्यर्थात्, व्यक्तिपक्षे एवमेवौचित्यात्, सादृश्यमूलिकैव चात्र तत्त्वप्रत्यभिज्ञेत्याहुः।

'अचि श्नुधातु' (६ । ४ । ७७) इति सूत्रे इण इत्येव सिद्धे 'य्वोः' इति निर्देशादिण् परेणैवेति 'लण्' (मा० सू० ६) सूत्रे भाष्ये स्पष्टम्।

इण् प्रत्याहारः सर्वत्र परेण णकारेण गृह्यते। अन्यथा 'अचि श्नु' इत्यत्र लाघवात् 'य्वोः' इत्यस्य स्थाने यणा व्यवहरेत्। सूत्रकृता न तथा कृतं तेन ज्ञायते—इण्प्रत्याहारः पूर्वेण णकारेण नास्ति। परेण णकारेण इण्प्रत्याहारे तु इण्प्रत्याहारेण निर्देशे इकारोकारातिरिक्तानां बहूनां वर्णानां ग्रहणापत्तिरिति भिया इण्निर्देशमकृत्वा 'य्वोः' इति पठितम्। 'इणादिप्रत्याहारे ऋादीनां ग्रहणं मा भूत्' इत्युक्तं मूले। तत्र पूर्वेण णकारेण इण्प्रत्याहारे ऋकारग्रहणापत्तिमुपेक्ष्य ऋकारादिग्रहणापत्तेरेव वक्तव्यतया तथा कथं नोक्तमिति शङ्कानिराकरणाय सिंहावलोकनन्यायेन परेण णकारेण इण्प्रत्याहारं साधयितुमुपक्रमते—अचि श्नु इति। तथा च इण्प्रत्याहारे ऋकारग्रहणस्येष्टतया ऋादिषु तदापादनं युक्तमेव॥

सूत्र में सह पदोपादान का प्रयोजन है—'अन्त्य वर्ण सहित आदि वर्ण ही संज्ञा है केवल आदि अक्षर नहीं'। इसी अर्थ की प्रतीति के लिये सह पद का उपादान है। अत एव समुदाय ही बोधक होने से समुदाय अर्थवान् है। इसी कारण से समुदाय के उत्तर ही विभक्ति की उत्पत्ति होती है। जैसे "इकः" यहाँ आदि वर्ण इकारमात्र से विभक्ति उत्पन्न न हो कर इक् समुदाय से उत्पन्न होती है।

शङ्का—इत्संज्ञा लोप से अन्त्य वर्ण की निवृत्ति हो जाने से अन्त्य के साथ आदि की उपलब्धि सम्भव नहीं है ?

समाधान—माहेश्वर सूत्रों में अन्त्य की इत्संज्ञा के लोप से निवृत्ति होने पर भी प्रत्याहार इगादि में इनकी इत्संज्ञा तथा लोप नहीं होता। 'आदिरन्त्येन' इस सूत्र के इत् पद से इत्संज्ञक सदृश वर्ण का ग्रहण है। सादृश्य के कारण ही इत्संज्ञक शब्द से इनका व्यवहार होता है। जैसे "तदेवेदम् कार्षापणम् यन्मथुरायां गृहीतम्" यह वही पैसा है जो आप से मथुरा में लिया था। जो पैसा लिया था वह तो वहीं खर्च हो गया। उसके सदृश को ही तदेव इस से कहा गया है। इसी प्रकार यहाँ भी समझना चाहिये। व्यक्तिपक्ष में सभी व्यक्ति परस्पर भिन्न हैं। अतः इत्संज्ञक वर्णव्यक्ति से भिन्न प्रत्याहार का अन्त्य वर्ण है। इस लिये सादृश्य से ही व्यवहार है।

"अचि" श्नुधातुभ्रुवाम् इस सूत्र में इकार और उकार के बोध के लिये 'य्वोः' ऐसा निर्देश किया गया है। इस से यह कल्पना होती है कि इण् प्रत्याहार सर्वत्र 'अइउण्' इस सूत्र के णकार से न होकर लण् सूत्र के णकार से ही निष्पन्न होता है। अन्यथा 'य्वोः' इसके स्थान पर इणः ऐसा लघु निर्देश करना उचित होता। ऐसा लण्सूत्रस्थ भाष्य के अवलोकन से स्पष्ट होता है।[1]

---

१. 'अचि श्नु यहाँ से' 'भाष्ये स्पष्टम्' तक का शेखरग्रन्थ प्रक्षिप्त हैं; क्योंकि अणुदित् सूत्र में इसी प्रकार का विचार उपलब्ध होने से पुनरुक्त हो जाता है। और यहाँ यह विचार अप्रासङ्गिक भी है।

हलन्त्यम् (१।३।३)। अत्र पदद्वयम्, समासेऽन्त्यशब्दस्य पूर्वनिपातापत्तेः, कर्मधारययोग्यपदानां समासाभावस्य सूत्रकारशैलीसिद्धत्वाच्च।

यद्यपि सर्वोऽपि हल् तं तं समुदायं प्रत्यन्त्यो भवति, तथाप्यन्त्यपदोपदेशपदाभ्यां प्रत्यासत्त्याऽज्ञातस्वस्वरूपज्ञापकोच्चारणविषयसमुदायं प्रत्यन्त्य इह गृह्यते।

हलन्त्यम्। अत्र = अस्मिन् सूत्रे, पदद्वयम् = हल्, अन्त्यमिति पृथक्-पृथक् द्वे पदे। समासे = अनयोः पदयोः कर्मधारयसमासे, अन्त्यशब्दस्य अन्तेभवस्य यौगिकत्वेन विशेषणत्वात् हल्पदस्य च संज्ञावाचकत्वेन विशेष्यत्वात् विशेषणस्य पूर्वं निपातः स्यात्। न च पूर्वनिपातप्रकरणस्य असार्वत्रिकत्वान्नायं दोषः? इत्यत आह—**कर्मधारयेति**। कर्मधारयसमासोचितानां पदानां समासाकरणस्य सूत्रकृतः शैल्याः = रीतेः अनुकूलत्वात्। अत एव 'हलोऽनन्तराः' इत्यत्र अनन्तरपदेन न कर्मधारयः। अयमपि प्रायोवादः। 'निपात एकाजनाङ्' इति सूत्रे एकस्य अचा सह 'अपृक्त एकाल्' इति सूत्रे एकस्य अला सह समासस्य दर्शनात्।

यद्यपीति। सर्वोऽपि हल्वर्णो यं कमपि समुदायमाश्रित्य अन्त्यो भवत्येव। न चैवमन्त्यग्रहणस्य वैफल्यं स्यात्; आदेरक्षरस्य इत्त्वव्यावृत्त्या चारितार्थ्यस्य वक्तुं शक्यत्वात्; अत आह—**तथापीति**। अन्त्यपदेन उपात्तेन, अनुवृत्तेन उपदेशपदेन च। वस्तुतः 'षः प्रत्ययस्य' इत्यनेन आदेरित्संज्ञाविधानादिदं कल्प्यते यत् आदेर्नेत्संज्ञा। अन्यथा आदेरित्त्वविधानमनेन सूत्रेण कृतं व्यर्थमापद्येत। अन्त्यग्रहणं 'हलन्त्यम्' इतिसूत्रे नादेर्व्यावर्तकम् किन्तु अज्ञातस्य = अपूर्वज्ञानविषयस्य स्वस्वरूपस्य श्रावणप्रत्यक्षविषयस्य ज्ञापकं यदुच्चारणं तद्विषयसमुदायस्यान्त्यो ग्रहीतव्यः—इत्यर्थं बोधयितुं निर्दिष्टम्। अत एव स्वमते उपदेशपदाननुवृत्तौ प्रत्यासत्त्या इत्येवाग्रे उक्तम्। पूर्वमुपदेशपदसामर्थ्यप्रदर्शनं प्राचीनमतेन इति भावः।

प्रत्यासत्त्या = अन्त्यपदसान्निध्यात्, अज्ञातस्वस्वरूपस्य ज्ञापकम् = बोधकं यदुच्चारणं तद्विषयः। अत एव=तादृशसमुदायस्य ग्रहणादेव, 'इदमः स्थमुः' इति सूत्रे उकारोच्चारणस्य 'थम्' प्रत्ययघटकमकारस्य इत्संज्ञायाः परित्राणायैव कृतत्वात् सार्थक्यम्। अन्यथा उकारलोपानन्तरं यत् किञ्चित् समुदायस्य अन्त्यत्वेन मकारस्य लोपः कृतेऽपि उकारे न वार्यते इति तदुच्चारणं व्यर्थं स्यात्। अज्ञातार्थज्ञापकस्तत्स्वरूपभूतसमुदायस्यान्त्यपरत्वे तु मकारो न तादृशसमुदायस्य अन्त्यः, किन्तु उकार इति मकारस्येत्संज्ञावारणाय तस्य चारितार्थ्यात्।

हलन्त्यमिति। हल् और अन्त्यम् ये दोनों पृथक पद हैं। समास होने पर विशेषण होने से अन्त्य का पूर्वनिपात हो जायगा। दूसरा कारण भी देते हैं—कर्मधारय समास के योग्य पदों का परस्पर समास न करने की प्रायः सूत्रकार की रीति है। अतः समास नहीं है। प्रायोवाद मान लेने से इदितः, अशिति—इत्यादि स्थलों में किये गये आक्षेप का परिहार समझना चाहिये।

शङ्का—सभी हल् वर्ण किसी न किसी समुदाय का अन्त्य होने से सभी हल् की इत्संज्ञा प्राप्त होती है?

अत एव मकारेत्संज्ञापरित्राणार्थस्थमोरुकारश्चरितार्थः। समुदायोपदेश एव सर्वत्र ऋषितात्पर्येणावयवानां नान्तरीयकतया तेषामज्ञातस्वस्वरूपज्ञापकत्वाभावात्।

अज्ञातस्वस्वरूपज्ञापकोच्चारणविषयसमुदायमित्यस्याऽयमर्थः—स्ववृत्तिः = समुदायनिष्ठो यः श्रावणप्रत्यक्षविषयतावच्छेदको धर्मः = श्रोत्रेणेन्द्रियेण यत्प्रत्यक्षात्मकं ज्ञानं तदेव श्रावणप्रत्यक्षपदेन उच्यते। तस्य यो विषयः तस्मिन् विषयता तस्या अवच्छेदको धर्मः, तत्र श्रूयमाणपदवृत्तिधर्मो भवति। यदि घटः श्रूयते तदा तद्वृत्तिघटत्वं श्रावणप्रत्यक्षविषयतावच्छेदको धर्मः। यत्र तव्यत् प्रत्ययः श्रूयते तत्र तादृशो धर्मः तव्यत्त्वम्, तेन = तव्यत्त्वेन अवच्छिन्ना तव्यत्प्रत्ययस्य विधेयता, तव्यत्प्रत्ययो विधीयते विधेये विधेयतायाः स्वीकारात् तादृशविधेयतायाः प्रयोजकं पदं तव्यत् पदम्, तव्यत्पदेनैव तस्य प्रत्ययस्य विधानात् प्रयोजके प्रयोजकता। सा च प्रयोजके तव्यत्प्रत्यये। तादृशप्रयोजकतायाः पर्याप्त्यधिकरणपर्याप्तिसम्बन्धेन अधिकरणं तव्यत् इति समुदायः। एनं समुदायं प्रति अन्त्यम् इत् भवति स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिका या स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविधेयता प्रयोजकता तद्वान् समुदाय इति विवक्षितम्। तेन दघ्न इति समुदायेऽपि विधेयतायाः सत्त्वेन तद्घटकनकारस्याचिन्त्यत्वेन प्राप्ताया इत्संज्ञाया व्यावृत्तिः सिद्धा।

'प्रमाणे द्वयसच् दघ्नञ् मात्रचः' इति सूत्रेण दघ्नचोऽपि विधानात् दघ्नच्समुदाये, पर्याप्ता विधेयता प्रयोजकता अस्ति। अतः विधेयताप्रयोजकता पर्याप्तिसम्बन्धेन दघ्नच् इति समुदाये सम्बन्धभूतायाः पर्याप्तेः प्रतियोगिभूता प्रयोजकता। तथा च विधेयताप्रयोजकताप्रतियोगिकपर्याप्तेः अनुयोगिभूतदघ्नचो वृत्तेरनुयोगितावच्छेदकं तद्वृत्तिषट्त्वं षट्त्वसंख्यायाः दघ्नचि सत्त्वात्। एवमेव विधेयताप्रयोजकता प्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकं षट्त्वम्। स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मपदेनापि यदि दघ्नचो वृत्ति दघ्नच्त्वं गृह्यते, तदा दघ्नच्त्वं पर्याप्तिसम्बन्धेन दघ्नचि प्रत्यये। तथा च दघ्नच्त्व प्रतियोगिताकपर्याप्त्यनुयोगि दघ्नच् अनुयोगितावच्छेदकं तद्वृत्ति षट्त्वमेव, तथा च श्रावणप्रत्यक्षविषयतावच्छेदकधर्मप्रतियोगिक पर्याप्तेः यदनुयोगितावच्छेदकं षट्त्वं तदवच्छिन्ना या अनुयोगिता दघ्नच्वृत्तिः तादृशानुयोगितानिरूपकपर्याप्तिका एव श्रावणप्रत्यक्षविषयतावच्छेदकं दघ्नच्त्वं तदवच्छिन्ना या विधेयता तत्प्रयोजकता तद्वान् दघ्नजेव इति। दघ्नच्त्वावच्छिन्न विधेयताप्रयोजकतायां श्रावणप्रत्यक्षविषयतावच्छेदकं (दघ्नसमुदायस्य ग्रहणे) दघ्नशब्दत्वधर्मः तत्पर्याप्त्यनुयोगितावच्छेदको धर्मः चतुष्ट्वं

समाधान—सूत्रोपात्त अन्त्य पद एवं अनुवृत्त उपदेश पद के सम्बन्ध से अज्ञात स्वरूप का बोधक उच्चारण-विषय जो समुदाय उसी का अन्त्य यहाँ विवक्षित है। अज्ञात स्वरूप के ज्ञापक रूप में जो समुदाय उच्चारणविषय नहीं है उसका अन्त्य यहाँ गृहीत नहीं होता। ऐसा मानने पर ही 'इदमः स्थमुः' इस सूत्र में मकार की इत्संज्ञा-व्यावृत्ति के लिये किया गया उकार चरितार्थ होता है। अन्यथा उकार की इत्संज्ञा होने के बाद भी यत्किञ्चित् समुदाय का अन्त्य मकार के होने के कारण इत्संज्ञा की प्राप्ति बनी रहने से उसके वारण के लिये आश्रित उकारोच्चारण व्यर्थ हो जायगा।

उपदेशेऽन्त्य इति। **तत्र विद्यमानमन्त्यमित्यर्थः। तेन 'अइउण्' (मा० सू० १) इत्यादौ णादीनां हल्प्रत्याहारसिद्ध्युत्तरं तत्सिद्धिः। अन्यत्र त्वन्तरङ्गत्वात् प्राय**

तदवच्छिन्नानुयोगिताकपर्याप्तिकत्वस्याभावेन न तस्य समुदायपदेन संग्रहः इत्यादि टिप्पण्यां स्पष्टं सरलीकरणदृशेह विवेचितम्। ग्रन्थविस्तरभिया सर्वत्र न तथा विविच्यते।

अज्ञातज्ञापकस्वस्वरूपोच्चारणविषयता यथा समुदाये, एवं समुदायावयवेऽपि कुतो न? इत्यत आह—**समुदायोपदेश इति**। ऋषेः = पाणिन्यादेः सर्वत्र समुदायोपदेश एव तात्पर्यम्। अवयवानां तु नान्तरीयकतया = (अन्तरा = विना भवः अन्तरीयः गहादित्वाच्छप्रत्यये अन्तरीयशब्दात् स्वार्थे कः, नञा समासश्च) अविनाभावतया व्यापकतयेत्यर्थः। अवयवोच्चारणं विना समुदायोच्चारणमेव न सम्भवति, अतः अज्ञातस्वरूपज्ञापकतया तेषाम् = अवयवानामुच्चारणाभावात् न अवयवानामित्त्वप्रसङ्गः। ये हि अपूर्वार्थबोधनायैव उच्चार्यन्ते, तेषामेव अन्त्यस्य इत्संज्ञा। येषामुच्चारणं विना समुदायस्योच्चारणमेवासम्भवि, तेषामवयवानां नेत्त्वमिति फलितम्।

तत्रेति। तत्र = उपदेशे उपदेशशब्द आद्योच्चारणार्थकः लक्षणया आद्योच्चारणकालपरः। तथा च प्रधानीभूतायां भवनक्रियायामस्यान्वये आद्योच्चारणकाले इत्संज्ञाया भवनमिति लभ्यते। न चैवं सम्भवति। उच्चारणकालात् पूर्वं तस्या अनभिव्यक्ततया उच्चारणकाले इत्संज्ञाया अप्रवृत्तेः। अतएव भाष्ये पूर्वं वर्णानामुपदेशः, तदुत्तरकाला इत्संज्ञा' इत्युक्तं न तु उच्चारणकाले। अत आह—**तत्र विद्यमानम्**। भवतिक्रियायां नान्वयः, किन्तु अध्याहृतायां विद्यतिक्रियायामन्वयः। तथा च उपदेशकाले विद्यमानं यदन्त्यमित्यर्थः।

ईदृशार्थस्य विवक्षणे मनिन्प्रत्यये अन्त्यनकारस्य इकारस्य चेत्संज्ञाया अनन्तरम् उपदेशे विद्यमानमिदानीमन्त्यमपि पुनर्नकारस्येत्त्वं कुतो न? इत्यपि शङ्का पराहता। आद्ये वयसि देवदत्तो धनी इत्यत्र यथा प्रथमवयस्त्वावच्छेदेन देवदत्ते धर्मिणि धनसम्बन्धः प्रतीयते, एवमत्रापि = आद्योच्चारणकालावच्छेदेनान्त्यत्वं समुदाये धर्मिणि भासते, नतु कालान्तरावच्छेदकतापीति न दोषः।

फलान्तरमप्याह—**तेन** = उपदेश इत्यस्य भवनक्रियायामन्वयं विहाय विद्यति-

---

शङ्का—अवयवोपदेश के बिना समुदायोपदेश नहीं हो सकता, अतः अवयव को भी अज्ञातस्वस्वरूप ज्ञापक उच्चारण-विषय क्यों नहीं माना जायगा?

समाधान—समुदाय का उच्चारण अवयवोच्चारण के विना नहीं हो सकता। अतः अविनाभाव के कारण उनका उच्चारण है। अज्ञातस्वरूपज्ञापन में अवयव के उच्चारण का तात्पर्य नहीं है।

उपदेशेऽन्त्य इति। आद्योच्चारण काल में विद्यमान जो अन्त्य हल् ऐसा तात्पर्य है। ऐसा अर्थ करने पर 'अइउण्' इत्यादि सूत्रों के णकारादिकों का हल् प्रत्याहार की सिद्धि के अनन्तर इत्त्व सिद्ध होने पर भी कोई क्षति नहीं हुई। इसके अतिरिक्त स्थल में उच्चारण के अभिव्यक्त होने के अनन्तर ही अन्तरंग होने से इत्संज्ञा हो जाती है। लक्ष्य में अनुबन्धरहित की उपस्थिति

उच्चारणेनाभिव्यक्तस्य तदव्यवधानेनैवेत्संज्ञा। पदार्थोपस्थितिरनुबन्धविनिर्मुक्तस्यैव; 'उपदेशोत्तरकाला इत्संज्ञा' इति 'नाज्झलौ' (१।१।१०) इति सूत्रभाष्यात्।

'घुट्' इस्यादौ सानुबन्धाद्विभक्तिस्तु तेनैवानुबन्धविनिर्मुक्तोपस्थितेस्तस्यैवार्थवत्त्वात् सुलभा।

इत्संज्ञाकार्यं तु यत्र संज्ञा तत्राऽनर्थक्यात् तद्धुपस्थाप्य एव। स्पष्टञ्चेदं 'तित्स्वरितम्' (६।१।१८५) इत्यत्र कैयटे।

क्रियायामन्वयविवक्षणेन 'अइउण्' इत्युपदेशकाले हल्प्रत्याहारानिष्पत्तेरित्संज्ञाया अप्रवृत्तावपि न विरोधः। विद्यतिक्रियया सह उपदेशपदार्थासम्बन्धे उपदेशकाले इत्संज्ञाबोधनमसङ्गतं स्यात्; तदानीं हल्प्रत्याहारस्यासिद्धया सूत्रस्यैवाप्रवृत्तेः। एवञ्च यदा यत्र इत्संज्ञाप्राप्तिः, तदानीं तत्र इत्संज्ञा कर्त्तव्या। उपदेशकाले अन्त्यस्य विद्यमानत्वमपेक्षितम्, न तु तदानीमित्संज्ञाया भवनमित्याशयः। णादीनाम् = लकारभिन्नानामिति विवक्षितम्। 'हल्' इति सूत्रघटकलकारस्य आवृत्तेन 'हलन्त्यम्' इति सूत्रेण इत्संज्ञाविधानेन हल्प्रत्याहारसिद्धेः प्रागपि लकारे सत्त्वस्य सम्भवात्। अन्यत्र तु = लातिरिक्तणादिभिन्नस्थले अन्तरङ्गत्वात् = प्रथममुपस्थितत्वात् प्रायः = बहुत्र, 'जसः शी' इत्यादौ उच्चारणकालानन्तरमेव प्रत्ययज्ञानाभावात् 'लशक्व' इत्यनेन इत्त्वाप्रवृत्तेः सर्वत्र तथा वक्तुमशक्यत्वात्। प्रायेण उच्चारणानन्तरमभिव्यक्ते जाते तदव्यवधानेनैव उच्चारणाव्यवहितोत्तरमेवेत्संज्ञा। लक्ष्ये च अनुबन्धरहित एव उपतिष्ठते। पदार्थोपस्थितिरनुबन्धविनिर्मुक्तस्यैव मूलपाठे पदार्थोपस्थितिघटकपदार्थस्य एकदेशत्वात् अनुबन्धविनिर्मुक्तस्य तत्रान्वयो न युक्तः? इति नाशङ्कनीयम्। चैत्रस्य गुरुकुलमित्यत्र यथा गुरुत्वे चैत्रस्यान्वयः, तथात्रापि। अतएव उपदेशोत्तरकाला = आद्योच्चारणानन्तरमेवेत्संज्ञा इति भाष्ये उक्तम्। यद्यपि भाष्ये उत्तरकालमात्रमुक्तं न तु अव्यवहितोत्तरत्वमुक्तम्, तथापि अव्यवहितोत्तरः कालो विवक्षितः; तदधिककालव्यवधाने प्रमाणाभावात्।

नन्वेवं लोपेन अनुबन्धरहितस्यैव बोधकस्य बोध्योपस्थापकत्वेन अर्थवत्त्वात् घुडादिशब्देभ्यो विभक्तेरनुत्पत्तिः स्यात्, सानुबन्धकस्य अर्थवत्त्वाभावादित्यत आह— **घुडित्यादाविति**। 'ङः सि धुट्' इति सूत्रे अनुबन्धसहितात् विभक्तिरुत्पद्यते। कुतः? तेनैव= सानुबन्धपदेनैव अनुबन्धरहितस्य अर्थस्य ज्ञानं जायते इति बोधकत्वं सानुबन्धकस्यैवेति तस्यार्थवत्त्वात् प्रातिपदिकत्वं सुलभम्, ततश्च विभक्तिरपि सुलभा।

नन्वेवं स्वीकारे इत्संज्ञायाः बोधके विधानात् तत्प्रयुक्तं कार्यं लक्ष्ये जायमाने कार्ये न स्यात्, तत्रेत्संज्ञाविरहात्? इत्यत आह—**इत्संज्ञाकार्यं तु इति**। बोधके इत्संज्ञाप्रयुक्तस्य कार्यस्याप्रवृत्तेः बोध्ये लक्ष्यस्थे फलसत्त्वात् तत्रैव इत्त्वप्रयुक्तं कार्यं भविष्यति; बोधक-

---

होती है। अत एव 'उपदेशोत्तर काल में ही इत्संज्ञा होती है'—ऐसा भाष्य में लिखा है।

घुट् इत्यादि स्थलों में अनुबन्धसहित से ही अनुबन्धरहित की उपस्थिति होने के कारण अनुबन्धविशिष्ट ही अर्थवान् है; अतः उसी से विभक्ति उत्पन्न होती है। इत्त्वप्रयुक्त कार्य बोधक में फलाभाव से न होने के कारण बोध्य में माना जाता है।

वैयाकरणे चित्स्वरस्तु न; तस्यैचचकारसदृशत्वेऽपि तत्त्वाभावात् । विभक्त्यादिसंज्ञापि सूत्रान्तर्गतानामेवेति तत्रैव 'न विभक्तौ' (१ । ३ । ४) इत्यादीनां प्रवृत्तिः ।

अत एव 'इदम इश् (५ । ३ । ३) इत्यादावण्त्वात् सवर्णग्रहणं प्राप्तमप्रत्यय इत्यनेन निषिद्धचते' इति भाष्योक्तं सङ्गच्छते ।

वृत्तिधर्माणां बोध्ये आरोपादिति भावः । अयमर्थः कैयटे स्पष्टः । स चैवम्—'तित्स्वरितम्' इति सूत्रे 'तिति प्रत्ययग्रहणं कर्तव्यम्' इति वार्त्तिककृता उक्तम् । 'तित्स्वरितम्' इति सूत्रे, 'तित् तकारेत्संज्ञकः प्रत्यय एव गृह्यते, न प्रत्ययभिन्नः । अतएव 'किरतीत्यत्र न दोषः' इत्याशयेन वार्त्तिकं पूर्वं कृतम् । किरतीति प्रतीकमुपादाय कैयटेनोक्तम्—'इत्संज्ञा हि प्रत्यायके एव व्यवस्थितस्य प्रवर्तते; लोपद्वारा तस्य (इत्संज्ञकस्य) असत्त्वं प्रत्याय्ये (बोध्ये) प्रतिपाद्यते, पदार्थोपस्थितेः; अनुबन्धविनिर्मुक्तस्यैव पदार्थस्योपस्थितेः जायमानत्वात्' इत्यादि ।

न च बोधके फलाभावात् इत्संज्ञाकार्यं बोध्ये भवति, बोधकधर्माणां बोध्ये समारोपात् । तथा च करणशब्दो ल्युडन्ततया तित्स्वरेण आद्युदात्तः, आङ्शब्देन सह समासे 'समासस्यान्तोदात्तः' इति सूत्रं बाधित्वा 'गतिकारकोपपदात् कृत्' इत्यनेन पूर्वस्मिन्नेव स्वरे आद्युदात्ते स्थापिते पुनः विशब्देन सह समासे कृतेऽपि तेनैव सूत्रेण आद्युदात्ते एव स्थिरीकृते व्याकरणस्य विकारः इत्यर्थे 'अनुदात्तादेश्च' इत्यनेन विकारार्थे अञि आद्युदात्ते वैयाकरणे 'न य्वाभ्याम्' इति ऐजागमे एचः चित्त्वं बोध्ये ऐकारे आरोप्य 'चितः' इति सूत्रेण अन्तोदात्तत्वापत्तिरिति वाच्यम्; ऐचः चकारस्य इत्संज्ञकसदृशत्वेऽपि इत्संज्ञकत्वाभावात् । 'ऐ औ च्' इति वर्णसमाम्नायसूत्रविहितस्य ऐचः चकारस्य इत्संज्ञकत्वानभ्युपगमादिति भावः । चकारस्यापि इत्त्वस्वीकारे न दोषः । ऐजागमघटकचकारस्येत्त्वेन प्रत्याहारग्रहणफलकतया चारितार्थ्येन इत्संज्ञाकार्यस्य बोध्ये अनारोपेण दोषाभावात् ।

ननु अनुबन्धविनिर्मुक्तस्य लक्ष्ये उपस्थितिस्वीकारे जसादिविभक्तिघटकसकारादिरहितस्य अकारमात्रस्य उपस्थितेः, तस्यैव च विभक्तिसंज्ञायां 'न विभक्तौ' इत्यादेः वैयर्थ्यं स्पष्टमेव स्यात्; एतत्प्रवृत्तेः प्रागेव इत्संज्ञालोपाभ्यां तस्य अपहारात् । अत आह—सूत्रान्तर्गतानां विभक्तिसंज्ञा । तत्रैव इत्संज्ञानिषेधसूत्रं प्रवर्तते ।

अत एवेति । अर्थोपस्थितेरनुबन्धविनिर्मुक्तपदादेव 'इदम इश्' इत्यादौ इशादेशस्य अण्त्वात् सवर्णस्य ग्रहणं प्राप्नोति ? इत्याशङ्क्य 'अप्रत्ययः' इत्यनेन सवर्णग्रहणं

शङ्का—वैयाकरणः[१] इस प्रयोग में 'न य्वाभ्याम् पदान्ताभ्याम्' इस सूत्र से विहित ऐच् के चकार की इत्संज्ञा होने से 'चितः' इस सूत्र से अन्तोदात्त क्यों नहीं होता ?

समाधान—'ऐऔच्' सूत्रस्थ चकार की इत्संज्ञा होने पर भी यहाँ ऐच् के चकार की इत्संज्ञा नहीं होती । यह चकार इत् नहीं है, किन्तु इत्संज्ञक के समान है । अतः चित्स्वर की सम्भावना नहीं है ।

---

१. व्याकरणशब्दाद्विकारे 'अनुदात्तादेशश्च' इत्यनेन अञ्प्रत्यये आद्युदात्तवैयाकरणशब्दे 'चितः' इत्यनेन अन्तोदात्तत्वापत्तिः—इति सदाशिवभट्टाः ।

यत्तु 'अनेकाल्' (१ । १ । ५५) सूत्रे 'इशि शिद्ग्रहणाभावेऽपि शित्करणादेव सर्वादेशत्वम्' इति भाष्ये उक्तम्, तस्येत्संज्ञकशकारकरणाद् भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्वमित्यर्थं इति न तद्विरोधः ।

वारितं भाष्योक्तं सङ्गतम् । अन्यथा शकारविशिष्टस्य इकारस्य अण्रूपत्वाभावादेव सवर्णग्रहणाप्रसक्तेस्तद्वारणोपायप्रदर्शनं व्यर्थं स्यात् । अनुबन्धरहितस्य उपस्थितौ तु इकारमात्रस्य उपस्थितत्वात् तस्याण्त्वात् शङ्का-समाधाने युक्ततरे । 'अप्रत्यय' इति आदेशस्यापि उपलक्षणम् !

पुनरनुबन्धरहितस्य पदार्थस्य उपस्थितौ भाष्यविरोधमाशङ्कते—**यत्तु इति**। 'अनेकाल्' सूत्रे शिद्-ग्रहणं न कर्तव्यम्; इशाद्यादेशानामनेकाल्त्वमादायैव सर्वादेशत्वं सिद्धयेत् । यदि बोध्यानामादेशानाम् अनुबन्धरहितानाम् उपस्थितिरिति तवाभिमतम्, तदा अनेकाल्त्वमाश्रित्य सर्वादेशत्वप्रतिपादनं भाष्यकारस्य कथं सङ्गच्छेत् ।

समाधानस्यायमाशयः—तस्य भाष्यस्य इत्संज्ञकः शकारो यस्येति बहुव्रीहि-समासः । भूतपूर्वानेकाल्त्वमादाय = इश् इत्यत्र शकारोच्चारणसामर्थ्यात् बोधकवृत्त्यने-काल्त्वस्य इकारे आरोपात् अनेकाल्त्वेन सर्वादेशत्वशङ्का इति न तद्विरोधः । अनुबन्ध-रहिते बोध्ये अनेकाल्त्वाभावात् सर्वादेशत्वप्रतिपादनं भाष्ये कथं कृतमिति शङ्का । समाधिस्तु शकारोच्चारणसामर्थ्यात् बोधकानेकाल्त्वस्य बोध्ये आरोपः; बोध्यबोधक-योरभेदात् ।

'भूतपूर्वानेकल्त्वमादाय' इत्यस्य ग्रन्थस्य आशयत्रयं वर्णयन्ति । एकस्तु अनुबन्ध-घटितबोधकवृत्तिधर्माणां बोध्ये आरोपः उक्तः । अनेकाल्बोधकवृत्तिर्यो धर्मः इश्त्वरूप तदवच्छिन्ना विधेयता इकारनिष्ठा तदाश्रयत्वात् इकारः सर्वस्य स्थाने भवति । अथवा बोधकवृत्तेः अनेकाल्त्वस्य बोध्ये इकारे स्थानिवद्भावेन सत्त्वात् सर्वादेशत्वम् । इत्येवं प्रकारद्वयम् । न चाल्त्वस्य अल्त्वव्याप्यधर्मतया अल्त्वव्याप्यधर्मघटितत्वात् अनेकाल्त्वस्य स्थानिवद्भावेनातिदेशो न स्यादिति वाच्यम्; प्रदाय प्रस्थायेत्यादौ क्त्वावृत्तिकित्त्वस्य

'स्वौजस्' इत्यादि सूत्रान्तर्गत सु औ जस् इत्यादि की ही विभक्ति संज्ञा होती है और उसी अवस्था में 'न विभक्तौ तुस्माः' इससे तवर्ग सकार और मकार के इत्त्व का निषेध होता है । लक्ष्य में अनुबन्धरहित पदार्थ की उपस्थिति होने से ही 'इदम इश्' इस सूत्र से प्राप्त इशादेश अण् होने के कारण 'अणुदित्' इस सूत्र से सवर्ण ग्रहण की आशङ्का का 'अप्रत्यय' इससे निषेध द्वारा समाधान किया है । यदि अनुबन्धसहित की लक्ष्य में उपस्थिति होती तो इश् के अण्रूप न होने से सवर्ण ग्रहण की प्राप्ति ही नहीं थी, इसके लिये समाधानान्तर की क्या आवश्यकता थी !

शङ्का—यत्तु इति । यदि बोध में अनुबन्धरहित की उपस्थिति मानी जायगी तो 'अने-काल्शित् सर्वस्य' इस सूत्र में 'शित् ग्रहण के विना इशादि आदेश का अनेकाल् मान कर ही सर्वादेशत्व प्राप्त है'—यह भाष्योक्ति असङ्गत हो जायगी । आप के मत में आदेशावस्था में इश् का शकार रहता ही नहीं; क्योंकि अनुबन्धविनिर्मुक्त की उपस्थिति मानी गयी है । ऐसी दशा में बोध्य में अनेकाल्त्व नहीं है ?

अत्र केचित्—अनुबन्धा अनेकान्ताः, अनवयवाः। यो ह्येकान्तः स कदाचिन्नोपलभ्यत एव। अयं तु न तथा, तदर्थभूते विधेये कदाऽप्यदर्शनात्।

अल्त्वव्याप्यत्वेन स्थानिवद्भावाप्राप्त्या कित्त्वाभावादेव 'घुमास्था' इति इत्त्वाप्राप्त्या तद्वारणाय कृतस्य 'न ल्यपि' इत्यस्य सूत्रस्य वैयर्थ्यप्रसङ्गात्। तस्मात् इदं कल्प्यते—अल्त्वव्याप्यधर्मघटितधर्मः अनुबन्धघटितबोधकावृत्तिर्ग्राह्यः। अतः प्रकृते अल्त्वव्याप्यधर्मेण = अला घटितानेकाल्वृत्तिधर्मो न गृह्यते, अनुबन्धेन शकारेण घटितस्य बोधकस्येशः वृत्तिरेव अनेकाल्त्वं धर्मो न तु अवृत्तिरिति न स्थानिवद्भावाप्राप्तिशङ्का। लोपानुनासिकादेः सर्वादेशापत्तिभिया 'अनेकाल्बोधकबोध्यः सर्वस्य स्थाने भवति' इति नार्थो युक्त इत्यवधेयम्।

अत्र=अनुबन्धविषये, अवयत्व-अनवयवत्वयोः सन्देहे अनुबन्धानां बोधकानवयत्वं **केचित्** एवमाहुः—अनुबन्धाः = इत्संज्ञायोग्याः, अनेकान्ताः=अनवयवाः, बोधकानवयवाः इत्यर्थः। यो हि एकान्तः = अवयवः स कदाचित् = कस्मिंश्चित् काले तत्र = बोधके उपलभ्यते एव = ज्ञायते एव। अयन्तु = अनुबन्धत्वावच्छिन्नोऽनुबन्धो न तथा = नावयवः, तदर्थभूते विधेये=अवयवित्वेनाभिमतेऽर्थे विधेये कदाप्यदर्शनात् = सर्वदैव अनुपलम्भात्। 'अनुबन्धाः बोधकानवयवाः बोध्यावयवत्वेन उपलब्धिविषयत्वाभावात्' इत्यनुमानाकारः।

न च गुणशब्दघटकगकारादीनां बोध्ये अनुपलम्भेऽपि बोधकगुणशब्दावयवत्वं तेषामस्त्येव, तथा च विधेये अनुपलम्भमात्रेण बोधकानवयवत्वं न युक्तं हेतोर्व्यभिचरितत्वादिति वाच्यम्; एतद्वारणाय स्वघटितघटक स्वेतर श्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविधेयताप्रयोजकपदानवयवाः इति साध्यस्वरूपं वक्तव्यम्। एवञ्च गकारघटितं गुणपदं तद्घटकं व्यपदेशिद्भावेन गुणपदमेव, तद्वृत्ति=गुणवृत्ति, श्रावणप्रत्यक्षविषयतावच्छेदको धर्मः गुणत्वं श्रवणेन्द्रियेण जायमानस्य प्रत्यक्षात्मकज्ञानस्य विषयता श्रूयमाणपदनिष्ठैव भवितुमर्हति। तदवच्छेदकञ्च गुणत्वम्, न तेन अवच्छिन्नाकारादिविधेयता, किन्तु अकारैकारौकारान्यतमत्वेनावच्छिन्ना। एतच्च श्रावणप्रत्यक्षविषयताया अवच्छेदकं न भवतीति न दोषः। सन्घटके नकारे स्वं नकारः तद्घटितं सन् तद्घटकः स्वेतरो यावान् स इति तद्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदको धर्मः सत्वं तदवच्छिन्नविधेयतायाः प्रयोजकं सन्-पदं तन्निरूपितावयवत्वाभाववान् नकार इति।

समाधान—बोधक इश् में शकार का प्रयोजन न होने से इत्संज्ञक शकारोच्चारण सामर्थ्य से बोधकवृत्ति धर्म अनेकाल्त्व का बोध्य आदेश इ में आरोप है। अथवा 'साम्प्रतिकाभावे भूतपूर्वगतिः' इसके अनुसार भूतपूर्व अनेकाल्त्व के द्वारा सर्वादेशत्व की सिद्धि में भाष्य का तात्पर्य होने से कोई विरोध नहीं है।

अत्र केचित् इति। किसी के मत में अनुबन्ध बोधक[1] के अनेकान्त अर्थात् अनवयव हैं। क्योंकि जो अवयव होता है कभी उसकी उपलब्धि वहाँ देखी जाती है। जिस प्रकार शाखा वृक्ष की अवयव है तो छेदन से पूर्व वृक्ष में देखी जाती है, पर अनुबन्ध तथा = अवयव नहीं है। तदर्थभूत बोधकार्थभूत विच्छेद में अनुबन्ध भी दृष्टिगोचर नहीं होता।

---

१. यहाँ किसी का विधेयानवयवत्व अर्थ करना भ्रममूलक है।

'हलन्त्यम्' (१।३।३) इत्यत्रान्त्यशब्दः परसमीपबोधकः, 'चुटू' (१ । ३ । ७) इत्यादावादिशब्दः पूर्वसमीपबोधकः, 'अनेकाल् शित्' (१ । १ । ५५) इत्यादौ समीपे सामीप्यमूलकावयवत्वारोपेण बहुव्रीहिः ।

एवं साध्यस्वरूपे निरुक्तेऽपि स्वं सन्-घटको नकारः तद्घटिता अष्टाध्यायी, अथवा तद्घटितं सनि इति सप्तम्यन्तं पदं तद्घटकं 'गुप्तिजकिद्भ्यः सन्' इति तद्-वृत्ति = सम्पूर्णसूत्रवृत्ति श्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविधेयता नास्ति; समग्रस्य क्वचिदप्यविधानात् । एवं स्वं सनि इति पदं तद्घटकः स इति तद्वृत्तिः उक्तरूपावच्छिन्ना विधेयता नास्ति; इकारस्य 'सन्यतः' इति सूत्रेण विधाने सनीति सप्तम्यन्तपदस्य निमित्तत्वेनोपयोगात् लक्षणागमनात् अनवयवत्वस्य निर्णयात् ।

अतः स्वघटित पदाघटित विभक्त्यघटित स्वेतर यावद् वृत्ति श्रावणप्रत्यक्ष-विषयतावच्छेदकधर्मावच्छिन्नानवयवा इति साध्यस्वरूपं वक्तव्यम् । अष्टाध्याय्याः पद-घटितत्वेन सनीति विभक्त्यन्तस्य विभक्तिघटितत्वेन न ग्रहणम्, किन्तु तद्भिन्नमादाय समन्वयः । परिभाषेन्दुशेखरस्य विजयाटीकायां स्पष्टमधिकम् ।

अनुबन्धानामनवयत्वेन अन्त्यावयवत्वाभावात् तेषामित्संज्ञा न स्यादित्यत आह— **हलन्त्यमिति** । अत्र सूत्रे अन्त्यशब्दो लक्षणया परसमीपस्य बोधकः । एवमेव 'चुटू' इत्यादौ आदिशब्दः पूर्वसमीपबोधकः इत्यनवयवत्वेऽपि परसमीपस्थत्वात् पूर्वसमोपस्थत्वात् अन्त्यस्य आदेश्च इत्त्वं भवति । 'चुटू' इत्यादौ आदिपदेन 'आदिर्ञिटुडवः' 'षः प्रत्ययस्य' इति बोध्यम् ।

नन्वेवम् 'अनेकाल्शित्सर्वस्य' इत्यत्र शित्पदे शकार इत् यस्य इत्येवं बहुव्रीहिर्न स्यात्; सामीप्यस्य षष्ठ्यर्थत्वाभावात् । अत एव चित्रा गावो यस्येति विग्रहे निष्पन्नचित्र-गुशब्दात् चित्रगवीणां समीपवर्त्ती वृक्षादिर्न प्रतीयते । अवयवत्वस्य चानङ्गीकारादि-त्याह—**अनेकाल् इति** । समीपेऽवयवत्वारोपेण अवयवत्वं षष्ठ्यर्थमाश्रित्य बहुव्रीहिरुपपाद-नीयः । तथा च सर्वत्र समीपे अवयवत्वस्यारोपेण अन्त्यत्वमादित्वञ्चोपपादनीयम् । अन्त्य-शब्दस्य परसमीपस्य, आदिशब्दस्य पूर्वसमीपस्य बोधकत्वप्रतिपादनमनारोपाभिप्रायेणेति

णकारादि अनुबन्ध अन्त्यावयव न होने से उनकी इत्संज्ञा नहीं होगी । अतः अन्त्य शब्द को परसमीप में लक्षणा होने से पर के समीप होने के कारण इत्त्व हो जायगा । 'चुटु' इसमें आदि पद से पूर्व समीप का बोध होगा ।' 'अनेकाल्शित् सर्वस्य' इत्यादि में शित् आदि पदों में 'शकारः इत् यस्यावयवः' ऐसा नहीं कह सकते । शकार अवयव नहीं है यस्य समीपे ऐसा नहीं हो सकता । सामोप्य षष्ठी का अर्थ नहीं है । अन्य अषष्ठयर्थों का भी संभव नहीं है । अतः सामोप्य के कारण उसमें अवयवत्व का आरोप कर शित् कित् आदि स्थलों में बहुव्रीहि समास की उपपत्ति करनी चाहिये । इस प्रकार का अर्थ करने से ही इश् आदि स्थलों में इत्संज्ञा का अभाव नहीं हुआ । अवयव न होने पर भो पूर्व या पर के समीप होने से इत्त्व सुलभ है ।

अनुबन्ध बोधक के अनवयव हैं, इसी कारण 'उपदेशेऽजनुनासिक इत्' इस सूत्र में उपदेश का भाष्योक्त प्रयोजन सङ्गत होता है । उपदेश पद के अभाव में 'अभ्र आं अटितः' इस प्रयोग में 'आङोऽनुनासिकश्छन्दसि' इससे अनुनासिक होकर आं अनुनासिक की इत्संज्ञा हो जायगी ।

स्पष्टञ्चेदं 'उपदेशेऽजनुनासिकः' (१ । ३ । २) इति सूत्रे भाष्ये, 'मपर्यन्तस्य' (७ । २ । ९१) इति सूत्रे कैयटे च । तेन डा-णलादौ इशादौ च न दोषः । अत एव 'उपदेशेऽच्' (१ । ३ । २) इति सूत्रे उपदेशग्रहणं चरितार्थम् । तद्धि 'अभ्र आँ अटितः' इत्यादौ 'आदितश्च' (७ । २ । १६) इतीट्प्रतिषेधाभावाय । अनेकान्तत्वे हि तत्प्राप्तिरित्याहुः ।

नास्ति चिन्तायाः **अवसरः** । इदम् 'उपदेशेऽज्' इति सूत्रे भाष्ये 'उपदेशे किम् ? अभ्र आं अटितः' इत्यादिना अनुपदमेव स्पष्टीभविष्यति । 'मपर्यन्तस्य' इति सूत्रे कैयटे इति । तत्र हि अवयवशब्दस्य अवयववाचित्वेन प्रसिद्धत्वेऽपि । यत्र त्ववयवत्वासम्भवस्तत्र सामीप्यमेवार्थः प्रतिपाद्यते, यथा नद्यन्तं क्षेत्रमिति । अन्ये त्वाहुः—सर्वत्रैवान्तशब्दोऽवयववाची इकस्यचिन्मुख्यमवयवत्वं कस्यचित्सामीप्यादुपचरितमित्यभिप्रायेणेदं भाष्यम् । 'वुञ्छण्' ति सूत्रेण छण्, क प्रत्ययश्च विधीयेते । तत्र णकारानुबन्धः परसमीपत्वात् छगः अन्त्यः, कप्रत्यस्य च पूर्वसमीपत्वात् कप्रत्ययस्यादिरिति णित्वप्रयुक्तं कार्यं छस्यैव भवति, न तु कस्येति निर्णयः कथमिति न शङ्कनीयम् । भाष्यव्याख्यानात् पूर्वस्यैव अवयवत्वमारोपितम्, न परस्येति निश्चेतव्यम् ।

तेन = आरोपितावयवत्वनिबन्धनबहुव्रीहिसमासस्वीकारेण डाजादेशे णलि इशादेशे च न दोषः; सर्वत्र सामीप्यनिबन्धनारोपितावयवत्वस्य सत्त्वात् । अतएव = अनुबन्धानामनवयवत्वादेव । **चरितार्थमिति** । अत्र सूत्रे उपदेशपदाभावे आद्योच्चारणाविषयस्यापि अनुनासिकस्य अच इत्संज्ञा स्यात् । तथा च 'अभ्र आँ अटितः' इत्यत्र 'आङोऽनुनासिकश्छन्दसि' इत्यनेन आङः स्थाने सानुनासिकस्य आङो विधानेऽस्यापि अनुनासिकत्वात् अच्त्वाच्च इत्संज्ञायाम् 'आदितश्च' इति सूत्रेण आकारस्येत्संज्ञकत्वेन आदितः धातोः सम्भवात् इट्प्रतिषेधः स्यात् । आदित्-पदेन यस्य समीपे आकार इत्संज्ञकः अथवा सामीप्यमूलकारोपितावयवः स एव गृह्येत । 'आँ अटितः' अत्रापि अट्-धातुसमीपे आँ इत्यस्य इत्संज्ञकत्वेन आदितः अट् धातोः सत्त्वात् इडागमप्रतिषेधः स्यात् । अतः उपदेशपदं कृतम् । कृते च तस्मिन् 'प्रत्यक्षमाख्यानमुपदेशः' इति व्याख्यानेन 'अनुनासिकः' शब्देन अनुनासिकस्य विधानात् साक्षात् अनुनासिकमुच्चार्य तस्याविधानात् उपदेशाभावात् नेत्संज्ञा । अत एवेडागमप्रतिषेधोऽपि नेति भाष्यं सङ्गच्छते । अनुबन्धानामवयवत्वे तु 'आदितश्च' इत्यस्य अकार इत् यस्यावयवः एवंभूतस्य धातोरिटः प्रतिषेधात् 'अभ्र आं अटितः' इत्यत्र आङः इत्त्वेऽपि तस्य धातोरनवयवत्वेन आदितः धातोरभावेन सूत्राप्राप्त्या क्षतिविरहात् । विधेये कदाप्यनुपलम्भादिति हेतुना अनवयवत्वं साधयितुं न शक्यते, 'सखा' इत्यादौ आनङो नकारस्य विधेयेऽनुपलम्भेऽपि नकारस्य

इसके बाद 'आदितश्च' इससे जिस धातु के समीप आकार इत् है उसके इडागम का प्रतिषेध होता है । अनवयवत्व पक्ष में—समीप में ही अवयवत्व का आरोप होता है । इस प्रकार अट् धातु के इत् होने से इडागम का प्रतिषेध प्राप्त होगा । उपदेश ग्रहण करने पर उपदेशावस्था में अनुनासिक आ नहीं है । साक्षात् अनुनासिक का उच्चारण न होने के कारण इत्संज्ञा नहीं होगी ।

परे तु—एकान्ता एव; शास्त्रे तत्रोपलम्भादन्यत्रानुपलम्भाच्च। अनवयवो हि काकादिरेकजातीयसम्बन्धेन गृहवृक्षादिषूपलभ्यते, नैवमयम्।

आनङोऽनवयवत्वं न कश्चित् मन्यते। अतोऽनवयवत्वरूपसाध्याभाववति तत्र नकारे विधेयेऽदर्शनरूपस्य हेतोः सत्त्वात् हेतुर्व्यभिचारी। एवमनवयवत्वविरोधिनोऽवयवत्वस्य साधकहेतोर्मूलेऽग्रे वक्ष्यमाणत्वेन सत्प्रतिपक्षो द्वितीयो हेतुदोषः। एवमेव समीपारोपावयवत्वनिबन्धना इत्संज्ञा, इत्संज्ञाधीनो लोपः, लोपे च सति विधेयेऽदर्शनम्, विधेयादर्शनाधीनश्च अनवयत्वनिर्णयः–इति चक्रकापत्तिः। इत्येवमस्य पक्षस्य दोषग्रस्ततया हेयत्वात्।

न चानुवन्धानामवयत्वपक्षे 'नानुवन्धमनेकाल्त्वम्' 'नानुबन्धकृतमनेजन्तत्वम्', 'नानुवन्धकृतमसारूप्यम्' इति परिभाषात्रयं कर्तव्यम्। अनवयवत्वपक्षे तु अनुबन्धानां बोधकानवयवत्वात् 'अनुबन्धकृतमनेकाल्त्वम्' इत्यस्य प्रसङ्ग एव नास्ति। एवम् अनुबन्धकृतम् अनेजन्तत्वमपि न, तथाऽनुबन्धकृतः सारूप्याभावोऽपि न; अनुबन्धानां तदनवयवत्वात् इति लाघवम्।

शित्करणसामर्थ्यात् अनुबन्धघटितबोधकवृत्तयो येऽनुबन्धघटितातिरिक्ता आनुपूर्वीभिन्नाश्च ये धर्मास्तन्निमित्तककार्ये कर्तव्ये अनुबन्धा अविद्यमानवद्भवन्तीति कल्पनेन परिभाषाया अनावश्यकत्वेन गौरवानवकाशादनवयवत्वपक्षस्य दोषग्रस्ततया सिद्धान्तपक्षं साधयितुमुपक्रमते–**परे तु इति**। अनुबन्धा एकान्ता एव = बोधकावयवा एव। शास्त्रे तत्र = विधेयबोधके उपलम्भात् = दर्शनात्, अन्यत्र = बोधकातिरिक्ते अनुपलम्भाच्च = अदर्शनाच्च। अभावमुखेन अनुबन्धानामवयवत्वं द्रढयति। यो हि अनवयवो भवति यथा— वृक्षस्य काकादिरनवयवः, स काकादिः, हि = यतः एकजातीयसम्बन्धेन तेन सम्बन्धेन संयोगादिरूपेण, वृक्षे उपलभ्यमानः कालान्तरे तेनैव सम्बन्धेन गृहेऽपि उपलभ्यते। अर्थात् येन सम्बन्धेन काक एकत्र वृक्षे उपलभ्यते, तेनैव संयोगसम्बन्धेन गृहे स उपलभ्यते। एवम्भूतश्च काकः वृक्षादेरवयवो न भवति। तथैव यदि अनुबन्धो बोधके उपलभ्यमानो बोध्येऽपि उपलभ्येत, तदा काकादिवत् स्याद् अनवयवः। परन्तु अनुबन्धो बोधके केवलमुपलभ्यते न बोध्ये, न वा क्वचिदन्यत्र। तस्मात् काकादिवत् अनवयवो न, किन्तु तद्वैपरीत्येन बोधकावयवः स इति भावः।

अतः इडागम का प्रतिषेध भी नहीं प्राप्त होता है। यदि अनुबन्ध बोधकावयव होंगे तो 'आदितश्च' इस सूत्र का जिस धातु के अवयव आकार की इत्संज्ञा है उसी धातु की निष्ठा में इट् का निषेध होने से यहाँ इत्संज्ञा होने पर भी कोई दोष नहीं है, क्योंकि आँ अट् धातु का अवयव नहीं है। इस प्रकार उपदेश ग्रहण का भाष्योक्त प्रयोजन 'अभ्र आँ अटितः' नहीं हो सकता।

सिद्धान्त पक्ष का प्रतिपादन करते हैं—**परे तु इति**। अनुवन्ध बोधक अवयव है। तत्र = विधेय बोधक में ही उपलब्धि होती है। इससे अन्यत्र इनकी उपलब्धि नहीं होती। इससे उक्तार्थ का निश्चय होता है। जो अनवयव होता है जैसे काकादि, वह एकजातीय = समान संयोगादि सम्बन्ध से गृह वृक्षादि अनेक स्थानों में प्राप्त होता है। अनुबन्ध बोधक से अन्यत्र बोध्य आदि स्थानों में उपलब्ध नहीं होता। अतः काकादि के समान अनवयव नहीं, किन्तु अवयव है।

किञ्च अनवयवत्वे ण-श-क-प्रत्ययादौ णादेरित्त्वानापत्तिः; प्रत्यादित्वाभावात्। एवमन्त्यत्वाभावादिशादेः शस्येत्त्वानापत्तिः। उक्तार्थलाक्षणिकत्वे तु लक्षणैव दोषः।

किञ्च दघ्नचश्चकारवैयर्थ्यापत्त्याऽवयवत्वमेव न्याय्यम्। अत एव 'वुञ्छण्कठच्' (४।२।८०) इति सूत्रविहित-के णित्त्वप्रयुक्तवृद्धिर्न।

'तस्य लोपः' (१।३।१) इति भाष्ये 'एकान्तत्वमेव न्याय्यम्' इत्युक्तेश्च।

अवयवत्वे साधकान्तरमप्याह—**किञ्चेति**। अनवयवत्वे अनुबन्धानां ण श क प्रत्ययादौ प्रत्ययस्य आद्यवयवत्वाभावात् 'चुटू' इत्यादिसूत्रैरित्संज्ञा न स्यात्। आद्यन्तशब्दयोर्लक्षणया परसमीपबोधकत्वे जघन्यलक्षणायाः स्वीकार एव दोषः। न च 'उत्पत्तिकालावच्छेदेन निर्गुणं निष्क्रियं निर्गुणश्चोच्यते द्रव्यम्' इति सिद्धान्तात् पृथ्वी गन्धरहिता उत्पत्तिकाले गन्धोपलम्भाभावात् परन्त्वनयोरवयवावयविभावोऽस्तीति हेतोर्व्यभिचार इति वाच्यम्; द्रव्यगुणयोर्भेदाभावेनावयनावयविभावस्यैवासत्त्वान्न व्यभिचारः।

दूषणान्तरमपि वक्ति—**किञ्चेति**। 'प्रमाणे द्वयसज्दघ्नच्' इति सूत्रे द्वयसचश्चकारस्य परसमीपबोधकान्त्यपदेन ग्रहणे द्वयसचश्चित्त्वम्, पूर्वसमीपबोधकादिपदेन तस्य ग्रहणे दघ्नचोऽपि चित्त्वं तेनैव द्वयसचश्चकारेण सिद्धौ दघ्नचश्चकारोपादानं व्यर्थं स्यात्। अतः अनवयत्वपक्षो न युक्तः। अवयवत्वाभ्युपगमे तु अन्त्यशब्दः अन्त्यावयवपरः, आदिशब्दश्च आद्यवयवपरः; न परसमीप-पूर्वसमीपयोः क्रमेण बोधकौ तौ। द्वयसचश्चकारस्य द्वयसच एव अन्त्यावयवत्वम्, न तु दघ्नचः आद्याबयवत्वमिति दोषाभावात्। अत एव = एकान्तपक्षस्यैव युक्तत्वादेव। 'वुञ्छण्' इति सूत्रेण विहिते कप्रत्यये छणो णकारस्य पूर्वसमीपे वृत्तितया णित्त्वप्रयुक्ता वृद्धिः कस्य प्रत्ययस्य सत्त्वे न भवति। सिद्धान्तपक्षे तु णकारस्य छणोऽवयवत्वं न ककारस्योत्तरस्येति न तस्य णित्त्वसम्भावना। 'तस्य लोपः' इति सूत्रे भाष्ये एकान्तत्वम् = अवयवत्वमेव न्याय्यम् = उचितम्—इत्युक्तेश्च अनुबन्धानामवयवत्वमेव युक्तम्।

ननु अस्मिन् सिद्धान्तपक्षे 'उपदेशेऽच्' इति सूत्रे उपदेशग्रहणस्य 'अभ्र आं अटित' इति प्रयोजनप्रदर्शनमसङ्गतं स्यात्। अनुनासिकस्य आकारस्य इत्त्वेऽपि अट्धातोरनवयवत्वात् 'आदितश्च' इति सूत्राप्राप्तेरिति न शङ्कनीयम्। उपदेशग्रहणस्य सूत्रे स्पष्टार्थत्वात्

दूसरा दोष देते हैं—किंच इति। अनवयव मानने पर ण् श् क् आदि की इत्संज्ञा नहीं होगी। क्योंकि ये प्रत्ययों के आद्यवयव नहीं हैं। इसी प्रकार अन्त्यावयव न होने से इश् के शकार की इत्संज्ञा भी नहीं होगी। आदि को पूर्वसमीप में, अन्त्य को परसमीप में लक्षणा मानने पर ही लक्षणा दोष प्राप्त होगा।

अन्य दोष भी हैं—'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इस सूत्र में दघ्नच् प्रत्यय के चकार का वैयर्थ्य हो जायगा; क्योंकि अनवयवत्व पक्ष में चित् पद से समीपस्थ इत्संज्ञक चकार वाले के ग्रहण से द्वयसज् घटक चकार से ही दो के बीच में होने से द्वयसच् और दघ्नच्—दोनों चित् हो जायेंगे। अवयवपक्ष के मानने से ही 'वुञ्छणक' इत्यादि सूत्र से विहित क पूर्ववर्ती णकार से समीप होने पर भी णित् नहीं हुआ।

'उपदेशेऽज' (१ । ३ । २) इति सूत्रे उपदेशग्रहणं तु स्पष्टार्थमेवेत्याहुः ।

सर्वत्रानुबन्धसहितनिर्देशे विधौ 'गुप्तिज्किद्भ्यः' (३ । १ । ५) इत्यादौ 'नकारेत्संज्ञकः सो भवति' इत्यादिक्रमेण बोधः । अनुवादे 'सन्यतः' (७ । ४ । ७९) इत्यादौ च 'नकारेत्संज्ञके सशब्दे परे' इत्यादिक्रमेण बोधः ।

स्पष्टञ्चेदं निष्ठासंज्ञासूत्रे भाष्ये । अत एव 'आटश्च' (६ । १ । ९०) इत्यादेर्नासङ्गतिः । अन्यथा यत्राऽऽट्सूत्रे तत्र नाच्परः, नेष्यते च तत्र वृद्धिः, यत्र प्रयोगे इष्यते वृद्धिस्तत्र नाऽऽडिति तदसङ्गतिः स्पष्टैव ।

न तेन किञ्चिदन्यत् फलं कल्पनीयम् । **सर्वत्रेति** = सर्वस्मिन् अनुबन्धसहितो निर्देशो यत्रेत्येवं बहुव्रीहिः । विधौ = विधायकसूत्रे । जातावेकवचनम् । विधिषु इत्यर्थः । अनुवादे = यत्र क-सनादिप्रत्ययमनूद्य कार्यान्तरं विधीयते, यथा 'सन्यतः' इत्यनेन सनि परे अकारस्येकारो विधीयते । अत्र इकाररूपकार्यान्तरविधानाय सनः निमित्ततया उपादानं न तु विधानाय—इत्यनुवादस्तस्य । तत्र नकारेत्संज्ञके सशब्दे परे इत्यादिरूपेणार्थः ।

निष्ठासंज्ञासूत्रे—'क्तक्तवतू निष्ठा' इति सूत्रे भाष्ये एतत् स्पष्टम् । तथाहि—'निष्ठा संज्ञायां समासशब्दप्रतिषेधे लोनो गर्त इति । निष्ठासंज्ञायां 'समानशब्दानामप्रतिषेधः' । निष्ठा संज्ञा कस्मान्न भवति—'अनुबन्धोऽन्त्यत्वकरः' इति चेन्न; लोपात् । इति शङ्कायां 'यद्यपि लुप्यते जानाति त्वसौ सानुबन्धकस्येयं संज्ञा कृता'इत्युक्तम् । एतेन अनुबन्धलोपेऽपि विधिसूत्रे तत्तदनुबन्धोपादानात् तदुपलक्षिते कार्यं भवतीति स्पष्टं लक्ष्यते ।

अतएव = एतादृशबोधस्वीकारादेव । नद्यै, कुमार्यै इत्यत्र 'आण्नद्याः' इत्यत्र 'आटश्च' इत्यत आटोऽनुवृत्त्या आटः परस्य अचो वृद्धेर्विधानात् लक्ष्ये अनुबन्धरहितस्य उपस्थितेः, आटोऽभावात् वृद्धिर्न प्राप्नोति । यत्र 'आण् नद्याः' इति सूत्रे आट् श्रूयते तत्र परोऽज् नास्ति । 'आडजादीनाम्' इत्यत्र आटः परस्य अचः सत्त्वात् वृद्धिविधानाय सूत्रं सफलमित्यत आह--**नेष्यते चेति** । तत्र=सूत्रे च वृद्धिर्नेष्टा इत्येवं रूपेण 'आटश्च' इत्यस्य फलाभावाद् वैयर्थ्यप्रसङ्गः । टकारेत्संज्ञकस्य आकारस्य वृद्धिः—इत्यर्थे स्वीकृते तु लक्ष्ये सर्वत्र टकारोपलक्षितस्य आकारस्य सत्त्वेन सूत्रप्रवृत्तौ न वैयर्थ्यशङ्काकलङ्कः ।

'तस्य लोपः' इस सूत्र के भाष्य में अवयवत्व का ही औचित्य निर्दिष्ट किया है । 'उपदेशेऽजनुनासिक इत्' इसमें पूर्वोक्त रीति से अनवयवत्व पक्ष में प्रयोजन होने से इस पक्ष में उसके ग्रहण की आवश्यकता नहीं है ।

विधिसूत्र के वाक्यार्थबोध प्रकार का निर्देश करते हैं—**सर्वत्रेति** । सभी अनुबन्ध सहित विधिसूत्रस्थलों में नकारेत्संज्ञक स होता है—इत्यादि क्रम से बोध होता है । विधि से अतिरिक्त अनुवादस्थल में 'अतः' इत्यादि का 'नकारेत्संज्ञक स शब्द' ऐसा अर्थ विवक्षित है ।

इसीलिये 'आटश्च' इत्यादि सूत्रों की असङ्गति नहीं हुई । अन्यथा इस प्रकार का वोध न मानने पर जहाँ सूत्र में आट् पूर्वानुरूपी है वहां वृद्धि नहीं होती और जहां लक्ष्य में वृद्धि करनी है वहाँ टकार के न रहने के कारण आट् ऐसी आनुपूर्वी नहीं है । अतः सूत्र की असङ्गति दुर्निवार हो जायगी ।

अन्त्यङ्किम् ? वाचालः । हल्किम् ? 'चिरिणोति' इत्यादौ धातोरन्त्यस्य मा भूत् ।

नवीनास्तु—अनुवादस्थले 'सन्यतः' इत्यादौ नकारेत्संज्ञके सशब्दे इत्येवमर्थस्य लक्षणया स्वीकारेऽपि 'गुप्तिज्किद्भ्यः सन्' इत्यादौ नकारेत्संज्ञकः सो भवतीत्यादेरर्थस्य नोपयोगः; सन्त्वावच्छिन्नः स शब्दो भवतीत्यर्थेऽपि क्षतिविरहात् । न च लिहा इह, दाण्ड इह इत्यत्र लिहशब्दात् टाविभक्तौ लिहा इत्यस्य, दाण्डा इत्यत्र दण्डः प्रहरणमस्या इति विग्रहे तदस्य 'प्रहरणम्' इति णप्रत्यये टापि दाण्डेत्यस्य सिद्धिः । अत्र टकारेत्संज्ञकाकारात् परोऽच् इहघटकः इकार इति 'आटश्च'इति वृद्धिः प्राप्नोति । टिड्ढेत्यस्यापि णकारेत्संज्ञको योऽकारस्तदन्ताद् ङीपो विधानेन अण्घटकाकारस्य णप्रत्ययघटकाकारस्य चोभयस्य णकारेत्संज्ञकाकारत्वात् णोऽपि ङीप् प्राप्नोति इति वाच्यम् । इत्संज्ञकटकाराव्यवहितपूर्ववर्तिना आकारेण बोध्यात् अचि परे वृद्धेः 'आटश्च' इत्यनेन विधानात् टाविभक्तिघटकाकारः टाप्प्रत्ययघटकाकारश्च न इत्संज्ञकटकाराव्यवहितपूर्ववर्त्ती, अपितु टकाराव्यवहितोत्तरवर्तीति न वृद्धेः प्रसङ्गः । 'टिड्ढ' इत्यत्रापि इत्संज्ञकणकाराव्यवहितपूर्ववर्त्ती योऽकारस्तद्वोध्यान्तादेव ङीप् विवक्षितः । प्रकृते दाण्डा इत्यत्र णप्रत्ययेन णकाराव्यवहितपूर्ववर्ती अकारो न किन्तु तत्परवर्ती अकारः, तेन न दोषः । अतएव ङीपो णप्रत्यये अप्राप्तत्वेन 'ताच्छीलके णेऽपि' इति परिभाषया अतिदेशस्याङ्गीकारः । टिप्पणीकृतां प्रपञ्चेन व्याख्यानमाग्रहमूलकम् । उभयस्मिन्नपि पक्षे भाष्यस्यानुकूल्याय कल्पनाविशेषः कर्तव्यो भवति ।

'हलन्त्यम्' इति सूत्रे अन्त्यग्रहणं किमर्थम् ? हल्मात्रस्य इत्संज्ञाविधाने मध्यगतस्यापि हल इत्संज्ञा स्यात् । यथा 'आलजाटचौ बहुभाषिणि' इति सूत्रेण आलचि प्रत्यये निष्पन्ने वाचालशब्दे आलच्प्रत्ययघटकलकारस्यापि इत्त्वं स्यात् । अतः अन्त्यपदं कृतम्, लकारस्तु तत्र नान्त्य इति नेत्संज्ञा । न च फलाभावात् इत्संज्ञा न स्यात्; लोपरूपं फलं वक्तुमशक्यम्; तथा सति लकारोच्चारणस्यैव वैयर्थ्यापत्तेः । इत्संज्ञा-लोपाभ्यां तदपहारापेक्षया तदनुच्चारणस्यैव लघुत्वादिति वाच्यम् । उच्चारणवैयर्थ्यात् लोपो मास्तु, इत्संज्ञाया हि फलान्तरं 'लिति' इत्यनेन लित्स्वरो भविष्यतीति न फलाभावः । न च तेनाद्युदात्तत्वे अन्तोदात्तविधायकं चित्त्वं व्यर्थं स्यात् । तथा च उभयोः सार्थक्याय पर्यायतायाः कल्पनया चित्त्वस्यापि सार्थक्यात् ।

हल्ग्रहणस्य फलमाह—**चिरिणोतीति** । चिरिधातुघटकेकारस्य इत्त्वे 'इदितो नुम् धातोः' इत्यनेन नुमापत्तेः । अतो हल्ग्रहणं कर्तव्यम् ।

शङ्का—'हलन्त्यम्' इसमें अन्त्यग्रहण का क्या फल है ?

समाधान–वाचालः इस प्रयोग में 'आलजाटचौ बहुभाषिणि' इससे वाच् शब्द से उत्तर आलच् प्रत्यय होता है । यहाँ चकार के समान लकार की इत्संज्ञा होने से इस सूत्र से स्वर हो जायगा । अतः अन्त्यपदोपादान है । हल् ग्रहण का प्रयोजन है—'चिरिणोति' । यहां चिरि धातु के इकार की इत्संज्ञा होने से 'इदितो नुम् धातोः' इससे नुम हो जायेगा । इसीलिये सूत्र में हल्-ग्रहण किया गया ॥

आद्योच्चारणमिति। **आद्यमुच्चारणमित्यर्थः, भावे घञिति भावः। तच्च प्रत्यासत्त्यैतच्छास्त्रप्रवर्त्तकाचार्याणामेव। आद्यत्वं चाज्ञातस्वस्वरूपज्ञापकत्वम्। उपस्य आद्यर्थत्वाद्दिशेरुच्चारणक्रियत्वात्।**

अत एव 'एकाच उपदेशे' (७।२।१०) इति सूत्रे कैयटेनोक्तम्—'इत्संज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यते' इति। 'आदेचः' (६।१।४५) इति सूत्रेऽपि

आद्योच्चारणमिति। षष्ठीसमासाभावं दर्शयितुमाह—**आद्यमिति।** उपपूर्वकात् दिश-धातोः भावेऽर्थे घञ् प्रत्ययेन उपदेशनमित्यर्थे 'उपदेशः' इत्येवं निष्पद्यते। उपशब्दस्य आद्यार्थकत्वात् दिशधातोरुच्चारणार्थकत्वात् आद्योच्चारणमर्थः सम्पन्नः। आद्योच्चारणं च न यस्य कस्यापि, किन्तु पाणिनीयव्याकरणप्रवर्तकाचार्याणां पाणिनि-कात्यायन-पतञ्जलीनां विवक्षितम्।

उच्चारणे आद्यत्वञ्च—अज्ञातस्य स्वस्य स्वरूपस्य ज्ञापकत्वं=बोधकत्वम्। नवीनैरिदमेव एवमुच्यते—स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविषयताप्रयोजकताप्रकारकतात्पर्यीयविशेष्यता पर्याप्त्याधिकरणत्वम्। यथा—स्वं सन् तद्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदको धर्मः=श्रूयमाणपदनिष्ठो धर्मः सन्त्वरूपः, तदवच्छिन्नविषयतायाः प्रयोजकतापर्याप्त्या सनि अपर्याप्त्या तदेकदेशे सकारेऽपि सेऽपि च, परं लक्षणे प्रयोजकताप्रकारकतात्पर्यविशेष्यता पर्याप्तिसम्बन्धेन समुदाये सनि, न त्वेकदेशे। तत्र प्रयोजकतायाः पर्याप्तिसम्बन्धेन असत्वे न प्रयोजकताप्रकारकं तात्पर्यमपि तत्र नास्ति। अत एव तात्पर्यस्य विशेष्यताऽपि पर्याप्त्या एकदेशे नास्तीति बोध्यम्।

अत एव=उच्चारणार्थकत्वादेव। 'एकाच उपदेशे' इति सूत्रे स्पष्टोऽर्थः। न च आद्यत्वं नैतेन लब्धमित्यत आह—**आदेच इति सूत्रे** इति। येषां स्वरूपस्य ज्ञापनाय इत्यादिना पूर्वोक्तार्थः स्फुटीकृतः। तत्र='आदेच उपदेशेऽशिति' इति सूत्रे, 'प्रातिपदिकानाम् उद्देशः न उपदेशः, गुणैः प्रापणमुपद्देशः' इत्यनेन एतस्य स्वरूपस्य प्रतिपादनात्। प्रकृतसूत्रे=व्याख्येयत्वेन प्रक्रान्तोपदेशपदलाभावधिभूते 'उपदेशेऽच' इति सूत्रे इत्यर्थः। प्रत्यक्षमाख्यानमुपदेशः। उक्त एव='अज्ञातस्वस्वरूपज्ञापकत्वम्' इत्यनेन उक्त एवेत्यर्थः।

उच्चारणं बोधानुकूलशब्दप्रयोगः; बोधस्य ज्ञानस्य सविषयकत्वनियमात्। अर्थात् ज्ञानं किञ्चिद् विषयमवलम्ब्यैव भवति। तथा च किञ्चिद्विषयनिष्ठविषयतानिरूपको बोधः। आद्यत्वञ्च विषयतायां विवक्षितम्। तच्चेह बोधान्तरानिरूपितत्वरूपम् (अपूर्वज्ञाननिरूपितत्वरूपमिति यावत्)। तथा च बोधान्तरानिरूपितविषयतानिरूपकबोधानुकूलः शब्दप्रयोगः आद्योच्चारणम्।

आद्योच्चारणमिति। 'आद्य का उच्चारण' इस प्रकार का अर्थ षष्ठी समास द्वारा करने पर द्वितीयोच्चारण करने पर भी इत्संज्ञा हो जायगी। अतः सामानाधिकरण्येन अन्वय करते हैं—आद्य जो उच्चारण। उपदेशनम्=उपदेशः। इस प्रकार भाव में घञ् प्रत्यय है।

उच्चारण प्रकृत में पाणिनि कात्यायन पतञ्जलि इन—तीन मुनियों का विवक्षित है। उच्चारण में आद्यत्व का अज्ञात स्वस्वरूपज्ञापक ज्ञापकत्वरूप है। द्वितीय आदि उच्चारण ज्ञात

'येषां स्वरूपज्ञापनायापूर्वमुच्चारणं तेषामेवोपदेशव्यवहारः' इति । तत्र सूत्रे भाष्येऽपि 'उद्देशश्च प्रातिपदिकानां नोपदेशः' इति, प्रकृतसूत्रे भाष्येऽपि 'प्रत्यक्षमाख्यानमुपदेशः' इत्युक्तम् । तस्य चोक्त एवार्थः ।

परे तु—'उपदेश इति किमर्थम् ? अभ्र आँ अपः । कः पुनरुद्देशोपदेशयोर्विशेषः' इति भाष्ये उक्तम् । यदि 'प्रत्यक्षमाख्यानमुपदेशः', 'गुणैः प्रापणमुद्देशः', तर्हि 'ल्टः

प्रत्यक्षमाख्यानमिति । स्वावच्छिन्नविधेयताकशाब्दबोधानुकूलत्वम्, स्वप्रकारकप्रत्यक्षानुकूलत्वमित्युभय सम्बन्धेन धर्मविशिष्टो व्यापारः प्रत्यक्षमाख्यानम् । यथा कश्चित् कर्णं गृहीत्वा 'अयं ते गौः' 'अयं ते गौः' इति प्रतिपादयति । तत्र कर्णग्रहणव्यापारे स्वगोत्वं तदवच्छिन्ना या गोनिष्ठा विधेयता तादृशविधेयताको यो गोत्वप्रकारकगोविशेष्यकः शाब्दबोधः तदनुकूलत्वम्, गोत्वप्रकारकं यत् प्रत्यक्षं तदनुकूलत्वं चास्त्येवेति लक्षणसमन्वयादुपदिष्टो गौरिति व्यवहारः । यत्र तु 'सास्नादिमान् एवंवर्णविशिष्टो गौः' इत्येवं कमपि बोधयति, तत्र उच्चारणव्यापारे प्रथमसम्बन्धसत्त्वेऽपि गोत्वप्रकारकप्रत्यक्षानुकूलत्वं-सास्नादिमान् गौरित्युच्चारणव्यापारे नास्ति । सास्ना=गलकम्बल उच्यते । तादृशशब्द श्रवणरूपप्रत्यक्षेण तदर्थबोधो जायते, तदनन्तरं सास्नादियुक्तं पशुमन्विष्य जानाति—अयं मे गौः । अतः 'सास्नादिमान्' इत्यादिशब्दोच्चारणेन, गोत्वप्रकारकं गोविशेष्यकं परोक्षं ज्ञानं जायते, न प्रत्यक्षात्मकम्, सास्नादिदर्शनानन्तरं गोविषयकप्रत्यक्षस्य जायमानत्वात् इति भावः ।

एवं 'गुप्तिज्' इत्यादौ सन्प्रत्ययोच्चारणे सन्त्वावच्छिन्नश्रावणप्रत्यक्षविधेयताकशाब्दबोधानुकूलत्वं तथा स्वं सन्त्वं तत्प्रकारकप्रत्यक्षानुकूलत्वमपि सन्शब्दोच्चारणे सन्त्वप्रकारकं प्रत्यक्षं श्रोत्रेन्द्रियेण जायते इति तत्र सनि उपदेशव्यवहारः सङ्गच्छते—इत्यादि अवगन्तव्यम् ।

'उपदेशेऽजनुनासिकः' इत्यत्र उपदेशपदं भावघञन्तम् आद्योच्चारणार्थकं 'हलन्त्यम्' इत्युत्तरसूत्रेऽपि अनुवर्तते इति प्राचीनमतं प्रतिपाद्य उपदेशपदं करणघञन्तम्, तस्य च 'हलन्त्यम्' इति सूत्रे नानुवृत्तिरिति स्वमतं साधयितुमाह—**परे तु इति** । 'उपदेशेऽच्' इति सूत्रे उपदेशग्रहणं किमर्थम् ? 'अभ्र आं अपः' इत्यत्र 'आङोऽनुनासिकः' इति सूत्रेण कृते अनुनासिके इत्संज्ञा मा भूत्, अतः उपदेशपदम् । कृते अस्मिन्, नायमुपदेशः, किन्तु उद्देशः । किं पुनः उपदेशोद्देशयोर्विशेषः=भेदः ? यदि प्रत्यक्षमाख्यानम्=इन्द्रिय-

---

स्वरूपका ज्ञापक हैं । दिश् धातु का उच्चारण अर्थ है, उप शब्द का आद्य अर्थ है । इत्संज्ञाविधि में उच्चारणार्थक दिश् का ग्रहण है–ऐसा कैयट ने 'एकाच उपदेशे' इस सूत्र में लिखा है । 'आदेच उपदेशे' इस सूत्र के भाष्य में भी 'प्रातिपदिकों का उद्देश है, उपदेश नहीं हैं'—ऐसा कहा हैं । 'उपदेशेऽजनुनासिक' इस सूत्र के भाष्य में भी प्रत्यक्षकथन उपदेश, गुणप्रत्यक्षविषयतावच्छेदक धर्म ग्रहण के विना बोधन उद्देश है । इसका भी पूर्वोक्त अज्ञातस्वस्वरूपज्ञापकत्व ही अर्थ हैं ।

ग्रन्थकार स्वमत का प्रदर्शन करते हैं—**परे तु इति** । 'उपदेशेऽच्' इस सूत्र में उपदेश ग्रहण का फल 'अभ्र आँ अपः' इसमें इत्त्व की व्यावृत्ति है । इसके बाद उपदेश और उद्देश के भेद-कथन

सद्वा' (३।३।१४), निष्ठा' (३।२।१०२) इति विहितानां शतृ-शानच्-क्त-क्तवतूनामवयवस्येत्संज्ञानापत्तिः। तथा 'राजसूयसूर्यमृषोद्य' (३।१।११४), 'चित्याग्निचित्ये' (३।१।१३२) इत्यादिनिपातनानुमितक्यबादीनां पादेरित्त्वानापत्तिः।

गोचरार्थस्य आख्यानम् = कथनम् स उपदेशः, गुणैः = साधारणधर्मैः प्रापणम् = प्रतिपादनम् उद्देशः—इत्यभिप्रायो वर्ण्यते, तर्हि 'लटः सद्वा' इति सूत्रेण सत्पदेन विहितयोः शतृशानचोः 'निष्ठा' इति सूत्रेण निष्ठाशब्देन विहितयोः क्त-क्तवत्वोश्च साक्षात् शतृशानजादिरूपेणाख्यानाभावात् उपदेशपदार्थस्य विरहेण इत्संज्ञा न स्यात्। न च 'तौ सत्' इत्यत्र तत्पदेन शकार-ऋकारेत्संज्ञकस्य शतः, एवं शकार-चकारेत्संज्ञकस्य आनस्य च परामर्शात् तादृशोरेव सत्संज्ञायाः सद्भावात् 'लटः सद्वा' इत्यनेन तादृशस्यैवादेशस्य विधानान्न दोषः। अतो दूषणान्तरम्। क्त-क्तवत्वोः 'निष्ठा' इति सूत्रेण क्त-क्तवत्वोर्विधानात् साक्षादुच्चारणाभावेन उपदेशाभावात् इत्त्वाप्राप्तिरिति भावः।

ननु 'क्त-क्तवतू निष्ठा' इति सूत्रस्य परिभाषात्वं स्वीकृत्य यत्र निष्ठापदं तत्र क्त, क्तवतू—इति पदद्वयमुपतिष्ठते। तथा च 'निष्ठा' इति सूत्रे तयोरुपस्थित्या इत्संज्ञायां सिद्धायां दोषाभावादाह—**तथेति**। निपातानुमितक्यबादीनाम् = राजसूयशब्दः किञ्चिद्वचनवोधितसाधुताकः पाणिन्युच्चारितत्वात्। 'राजसूयशब्दो राजपूर्वकात् सुधातोः क्यबिति वचनबोधिते साधुताको वचनान्तराबोधितसाधुताकत्वे सति वचनबोधितसाधुताकत्वात्' इति परिशेषानुमानेन सिद्धवचनेन बोधितक्यबादीनामित्यर्थः। एतद्घटकपकारादेरित्संज्ञा न स्यात्; क्यब्विधायकस्य वचनस्य पाणिन्यादिमुनित्रयानुक्तत्वेन अनुमीयमानत्वात्। अत एव प्रत्यक्षमाख्यानं नास्तीति उपदेशाभावः सुवचः।

ननु राजसूयशब्दसाधकस्य अनुमीयमानवचनस्य घटकस्य क्यपोऽनुच्चारणेऽपि 'वदः सुपि क्यप् च' इति सूत्रे क्यपः उच्चारणात् तस्योपदेशात् सिद्धमिष्टमिति शङ्कायां-

---

प्रसङ्ग में इन्द्रियगोचर अर्थ से कथन 'उपदेश' और साधारण प्रसिद्ध धर्मों के द्वारा कथन 'उद्देश' है। इस प्रकार दोनों का विशेष भाष्यकार ने दिखाया। उदाहरण किसी ने गौ का कान पकड़कर बताया कि यह गौ है। और किसी ने कक्ष के समीप में चरती सास्नादिमान् गौ है। इसमें पहला उपदेश और दूसरा प्रसिद्ध धर्म द्वारा बोधन होने से उद्देश है।

यदि इद्धशार्थक उपदेश पद की 'हलन्त्यम्' इस सूत्र में अनुवृत्ति मानी जायगा तो 'तौ सत्' इस सूत्र से शतृ और शानच् की सत् संज्ञा तथा क्त और क्तवतु कीनिष्ठा संज्ञा होने से इनका विधान सत् और निष्ठा पदों से किया गया है। इस प्रकार सत् और निष्ठा पद से प्रत्यक्ष शतृ शानच्, क्त और क्तवतु का प्रत्यक्ष आख्यान नहीं है। अत एव इनके अनुबन्धों की इत्संज्ञा नहीं होगी।

दूषणान्तर भी है—'राजसूयसूर्य' इत्यादि सूत्र से राजपूर्वक सु आदि धातुओं से क्यप् प्रत्यय का निपातन होता है। यहां क्यप् का प्रत्यक्ष कथन न होने से उपदेशाभाव के कारण पकार की इत्संज्ञा नहीं होगी। इसी प्रकार 'चित्य' में अनुमित क्यप् के पकार की इत्संज्ञा प्राप्त नहीं होगी।

'वदः सुपि' (३ । १ । १०६) इत्यत्रोच्चारितस्तु नैतत्सम्बन्धी । अत एव 'तस्यापत्यमत इञ्' इति न्यासेऽन्यशब्दसम्बद्धापत्यार्थस्यानुक्तरूपशेषत्वमुक्तमाकरे । तस्मादत्र सूत्रे उपदेशशब्देनोद्देशस्यापि ग्रहणं वक्तव्यम् । एवम् 'अभ्र आँ अपः' इत्यादावपि प्राप्नोतीति तेषां संग्रहोऽस्य व्यावृत्तिर्येन भवति स विशेषः कः ?—इति प्रश्नः । तत्संग्रहार्थमेव लोक-

---

माह—'वदः सुपि' इत्यत्र उच्चारितः क्यप् प्रत्ययो नैतत्सम्बन्धी = राजपूर्वक सुधातूत्तरत्वविशिष्टस्य क्यपो बोधको न, किन्तु वदधातूत्तरत्वविशिष्टस्य क्यप एव बोधकः; प्रकृतिविशेषसम्बद्धत्वात् तस्य इति भावः । अत एव = एकसम्बन्धिनोऽन्यसम्बन्धित्वानभ्युपगमादेव । 'तस्यापत्यम्' 'अत इञ्' इति पृथक्-पृथक् सूत्रमकृत्वा एकमेव सूत्रं क्रियताम् । अकारान्तात् षष्ठयन्तात् अपत्येऽर्थे इञ्प्रत्ययो भवतीति सम्पूर्णस्य सूत्रस्यार्थः ।

यो हि अकारान्तो नास्ति, ततः शैषिकोऽण् भविष्यतीति शङ्कायाम् अपत्यार्थस्य उक्तत्वात् उक्तादन्यः शेषो भवतीति नियमेन अपत्यरूपस्यार्थस्य शेषत्वाभावात् तस्मिन्नर्थे शेषाधिकारे विहितोऽण् न स्यादित्युक्त्वा 'तस्यापत्यम्' इत्यादिसूत्रेण अदन्तबाह्वादिप्रकृतिकापत्यार्थस्य उक्तत्वेऽपि तदन्यसम्बन्ध्यपत्यार्थोऽनुक्त एव इति शैषिकेण अणा रूपसिद्धिः स्यात् इति योगविभागवैयर्थ्यमापाद्य 'वृद्धान्यस्य प्रयोजनम्' इत्यनेन समाहितम् । अनेन च स्पष्टमायाति—एकसम्बन्धिनः अन्यसम्बन्धिता न भवतीति । तस्मादत्र सूत्रे = 'उपदेशेऽच्' इति सूत्रे उपदेशपदेन उद्देशस्यापि = गुणैः प्रापितस्यापि ग्रहणम् = संग्रहः । एवम् = उपदेशपदेन उपदेशोद्देशयोरुभयोः संग्रहे, 'अभ्र आँ अपः' इत्यत्रापि इत्संज्ञा प्राप्नोति । इति हेतोः तेषां = शतृशानजादीनां राजसूयादिस्थले क्यबादीनां संग्रहः 'अभ्र आं' इत्यादेः व्यावृत्तिः = असंग्रहो यथा भवेत् तथा विशेषः = भेदो वक्तव्यः ।

तत्सङ्ग्रहार्थमेव = तेषां शतृशानजादीनां, क्यबादीनाञ्च सङ्ग्रहार्थम् = उपदेशपदेन

शङ्का—'वदः सुपि क्यप् च' इस सूत्र में उच्चरित क्यप् का ही, अनुमान के द्वारा उपस्थित किये जाने से, उपदेश क्यों नहीं है ?

समाधान—वद् धातु से सम्बद्ध क्यप् का उक्त सूत्र द्वारा विधान होने से राज पूर्वक सु धातु आदि सम्बन्धी क्यप् का उच्चारण नहीं है । अतः उपदेशाभावप्रयुक्त इत्संज्ञा की प्राप्ति नहीं है । इसीलिये 'तस्यापत्यमत इञ्' इस प्रकार का एक सूत्र करने पर उपगु आदि शब्दों से 'तस्येदम्' इसके द्वारा इदमर्थ अपत्य में अण् होगा । इसीसे औपगवः इत्यादि की सिद्धि हो जाने से पृथक्-पृथक् सूत्र क्यों किया गया ? यदि कहें कि अपत्य अर्थ में इञ् के विधान होने से अपत्यार्थ उक्त है । उक्त से अन्य 'शेष' कहा जाता है । अपत्यार्थ उक्त होने से शेष नहीं हैं । अतः शेषाधिकार में पठित 'तस्येदम्' इससे अण् नहीं हो सकता ? इसका समाधान किया गया है कि अदन्त तथा बाह्वादि के अर्थ सम्बन्धी अपत्यार्थ के उक्त होने पर भी उपग्वादि सम्बन्धी अपत्यार्थ अनुक्त ही है, उसी प्रकार यहां भी समझना चाहिये ।

इन सब दोषों को देखते हुए हलन्त्यसूत्र में उपदेश-पद से उद्देश का भी ग्रहण करना होगा । इसमें उपदेश-पद की 'उपदेशेऽच्' इस सूत्र में अनुवृत्ति होने से इस सूत्र में उपदेश पद से

व्यवहारेणापि तयोः सङ्कीर्णत्वमुपपाद्यैतद्व्यावृत्तये तत्संग्रहाय च 'उपदेशनेऽनुनासिकः' इति वक्तव्यम्। किं पुनरुपदेशनम्? 'शास्त्रम्' इत्युक्तं वार्त्तिककृता। तत्र शास्त्रपदेन प्रयोगशासनकरणभूता धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः 'हलन्त्यम्' (१। ३। ३) सूत्रे व्यवसितपदार्थत्वेन भाष्ये उक्ता गृह्यन्ते। एवञ्च तत्सङ्ग्रहः, 'अभ्र आँ' इत्येतद्व्यावृत्तिश्च सिद्धा। तस्य च वार्त्तिकस्य बाहुलकात् करणे घञा प्रत्याख्यानं भगवता कृतम्।

ग्रहणार्थमेव लोकव्यवहारेणापि = 'उद्दिष्टो मेऽनुवाकः', मार्गप्रश्ने—'अमुस्मिन्नवकाशे हस्तदक्षिणो ग्राह्यः' इति एवमादिगुणैः प्रापणे 'उपदिष्टो मे पन्थाः' इति व्यवहारेण तयोः उपदेशोद्देशव्यवहारयोः सङ्कीर्णत्वम् = साक्षादाख्यातेऽपि उद्दिष्टपदव्यवहारात् गुणैः प्रापितेऽपि उपदेशपदव्यवहारात् सङ्कीर्णत्वमुपपाद्य = समर्थ्य एतद्व्यावृत्तये='अभ्र आँ' इत्यस्यासङ्ग्रहाय, शतृशानजादीनां सङ्ग्रहाय च 'उपदेशेऽजनुनासिकः' इति सूत्रस्थाने 'उपदेशनेऽजनुनासिकः' इति सूत्रं कर्तव्यम्! उपदेशनं हि उपदिश्यते अनेनेति व्युत्पत्त्या ल्युट्-प्रत्ययेन निष्पन्नम्। तस्य शास्त्रमर्थः। शास्त्रपदेन प्रयोगाणां यैः शासनं भवति तेषां = व्यवसितानामन्त्यस्य ग्रहणम्। ते च प्रयोगशासने = प्रयोगस्य = प्रयुज्यमानस्य साध्वनुशासने करणभूताः न तु परिनिष्ठिताः। ते च धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः धातुत्वादिना परिच्छिन्नाः व्यवसितपदेनोक्ताः 'हलन्त्यम्' इति सूत्रे भाष्ये ग्रथिता गृह्यन्ते; तेन 'अभ्र आँ अपः' इत्यत्र नेत्संज्ञायाः प्रवृत्तिः। तस्य 'आँ' इत्यस्य परिनिष्ठितत्वात् प्रयोगशासने साधुत्वान्वाख्याने करणभूतत्वं न, अपितु परिनिष्ठितत्वमेव आँ इत्यादेशः स्वयमेव साधुर्भवति, नानेन। कश्चित् एतद्घटितोऽन्यः परिनिष्ठितः प्रयुज्यमानो भवति। अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वं परिनिष्ठितत्वम्। शब्दा गणिता गृह्यन्ते। 'उपदेशने' इति वार्त्तिकस्य उपदिश्यते अनेनेति करणे बाहुलकात् घञा सिद्धिं विधाय उपदेशनशब्दात् बोधयितुमिष्टस्य अर्थस्य करणघञन्तेन उपदेशपदेन सङ्ग्रहात् वार्त्तिकं प्रत्याख्यातवान्। एतेन भाष्येण भावघञन्तोपदेशशब्दस्य आद्योच्चारणार्थकस्य मूलकृतः उपपादनं निरुध्यते। अतो न तन्मतमादरणीयम्।

उद्देश का भी ग्रहण करना चाहिये। ऐसी अवस्था में 'अभ्र आँ अपः' इसमें उपदेश ग्रहण करने पर भी इत्संज्ञा प्राप्त होती है। यहां इत्संज्ञा की व्यावृत्ति शतृ शानच् आदि स्थलों में इत्संज्ञा का विधान हो सके—ऐसा विशेष (भेद) किया है। यह प्रश्न का आशय है।

'प्रत्यक्षमाख्यानम् उपदेशः' इसका निराकरण लोकव्यवहार की संकीर्णता के द्वारा भाष्यकार ने किया है। 'उद्दिष्टो मे अनुवाकः, उपदिष्टो मे पन्थाः' यहां अनुवाक जो कि प्रत्यक्ष आख्यात है वहां उद्दिष्ट का, और जहाँ वैसा नहीं है वहां उपदेश का प्रयोग देखने से पूर्वोक्त अर्थ निश्चित नहीं हैं। अतः 'उपदेशनेऽजनुनासिक इत्' इस प्रकार के न्यास से शतृशानच् आदि का संग्रह और 'अभ्र आँ अपः' इसमें इत्त्व की व्यावृत्ति की है।

उपदेशन-शब्द करण में ल्युट् करने से शास्त्र का बोधक है। शास्त्र से प्रयोग के शासनकरणभूत धातु, प्रातिपदिक, प्रत्यय, आगम, निपात तथा आदेश जो कि हलन्त्यसूत्र में व्यवसित पदार्थ से परिगणित किये गये हैं उनका ग्रहण होता है। उपदेश-पद का इस प्रकार का अर्थ मानने

किञ्च 'हलन्त्यम्' (१ । ३ । ३) सूत्रे भावघञन्तोपदेशपदानुवृत्तौ 'भवतष्ठक्छसौ' (४ । २ । ११५) इत्यादिविहितेष्वित्सञ्ज्ञानापत्तिः । परस्य सत्त्वेन कादेरन्त्यत्वाभावात् । यदि तूपदेशे प्रत्ययत्वादिविशिष्टान्त्य इत् इत्यर्थः—इत्युच्यते, तदोपदेश इति व्यर्थम्; अन्त्यपदसामर्थ्येनैव तल्लाभात् । अत एवात्र सूत्रे उपदेशग्रहणस्य 'अनुबन्धा

भावघञन्तोपदेशशब्दस्य हलन्त्यमित्यत्रानुवृत्तौ दोषमाह—**किञ्चेति** । तत्र तादृशोपदेशानुवृत्तौ 'भवतष्ठक्छसौ' इत्यादिसूत्रैः विहितानाम् अवयवभूतककारादेः इत्संज्ञा न स्यात् । उपदेशेऽन्त्यमिदित्यर्थे किंनिरूपितमन्त्यत्वं विवक्षितम् ? इति जिज्ञासायां प्रत्यासत्त्या उपदिश्यमानसमुदायनिरूपितमन्त्यत्वं वक्तव्यम् । तथा चोपदिश्यमानसमुदायः ठक्छस् इति, तस्यान्त्यः ककारो भवितुं नार्हति; तद्घटकच्छकारादीनां ककारपरवर्त्तितया सत्त्वेन यस्मात् परो नास्तीत्यन्त्यलक्षणस्य विरहात् । एवञ्च तत्र इत्संज्ञानापत्तिरूपो दोषः स्फुटः । यस्य कस्याऽपि अन्त्यत्वविवक्षणे अनन्त्यवर्णानामपि यत्किञ्चित्समुदायनिरूपितान्त्यत्वेन इत्त्वं प्रसज्येत ।

'उद्देशश्च प्रातिपदिकानां नोपदेशः' इति भाष्येण चित्रङ्घटकङकारस्येत्संज्ञा न स्यात्, चित्रङः प्रातिपदिकत्वेन ङकारस्योपदेशेऽन्त्यत्वाभावात् । तथा च 'नमोवरिवश्चित्रङः' इति क्यचि ङित्त्वाभावेन 'अनुदात्तङितः' इत्यनेनात्मनेपदमपि न स्यादिति प्राचीनमते दोषमन्ये उद्भावयन्ति ।

यदि तु इति । प्रत्ययत्वादिविशिष्टस्य समुदायस्य योऽन्त्य इत्यर्थो विवक्ष्येत, तदा 'हलन्त्यम्' इति सूत्रे उपदेशपदानुवृत्तिर्व्यर्था; फलाभावात् । अन्त्यग्रहणसामर्थ्यादेव यत् किञ्चित्समुदायान्त्यत्वस्य निरासेन प्रत्ययत्वादिविशिष्टान्त्यस्य लाभात् तदर्थमुपदेशपदं नानुवर्तनीयम् ।

नच श्वन्युवन् इत्यादिप्रातिपदिकान्त्यस्य नकारादेरित्संज्ञाया वारणाय उपदेशपदानुवृत्तिः सफला । तदनुवृत्तौ प्रातिपदिकानामज्ञातस्वस्वरूपज्ञापकत्वाभावान्नेत्संज्ञाप्रवृत्तिरित्यत आह—**अत एवेति** । उपदेशपदानुवृत्तेरनङ्गीकारादेव । 'उपदेशेऽच्' इति सूत्रे उप-

---

से 'अभ्र आँ अपः' इसमें इत्त्व की व्यावृत्ति शतृ शानच् और क्यप् इनके अन्त्य की इत्संज्ञा सिद्ध हो जाती है । भाष्यकार ने बाहुलक मानकर करण में घञ् प्रत्यय की निष्पत्ति द्वारा उपदेशन पदार्थ का संग्रह हो जाने से वार्त्तिक का प्रत्याख्यान किया है ।

दूषणान्तर भी है–किञ्च इति । हलन्त्यम् इसमें भाव में घञ् द्वारा सिद्ध उपदेश पद की अनुवृत्ति होने पर 'भवतष्ठक्छसौ' इस सूत्र से विहित ठक् के ककार की इत्संज्ञा नहीं होगी, क्योंकि पर वर्ण के रहने से ककार अन्त्य वर्ण नहीं होगा । सूत्र में ही इत्संज्ञा की प्रवृत्ति होती है । उस अवस्था में छस् प्रत्यय के रहते पर में वर्ण है ।

शङ्का—उपदेश में प्रत्ययत्वादिविशिष्ट के अन्त्य की इत्संज्ञा होती है—ऐसा अर्थ करने से प्रत्ययत्वविशिष्ट ठक् है, उसके अन्त्य ककार की इत्संज्ञा सिद्ध हो जाने से दोष नहीं है ?

समाधान—जिस किसी समुदाय के अन्त्य की इत्संज्ञा होने पर अन्त्य ग्रहण व्यर्थ हो जायगा । अतः प्रत्ययत्वादिविशिष्ट समुदाय के अन्त्य की इत्संज्ञा होने से 'उपदेश' पद व्यर्थ है ।

अत एव इति । 'हलन्त्यम्' सूत्र में उपदेश-पदानुवृत्ति निष्फल है, इसलिये 'उपदेशेऽच्' इस

अनेकान्ताः' इत्यस्थितपक्षे 'अभ्र आँ अटितः' इति प्रयोजनमुक्तम्, न तूत्तरार्थमित्युक्तम्। न च करणसाधनोपदेशशब्दानुवृत्त्या सिद्धे 'हलन्त्य (१ । ३ । ३) सूत्रे 'व्यवसितान्त्यमिति वक्तव्यम्। के पुनर्व्यवसिताः? धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः' इति-वार्त्तिकानुत्थानमिति वाच्यम्। समुदायद्वाराऽवयवस्याप्युपदेशकरणत्वात् तदन्त्यस्यापि लोपापत्तिरित्याशयात्।

देशग्रहणस्य फलम् अनुबन्धानामनवयवत्वमित्यस्थिते पक्षे (असिद्धान्तपक्षे) अभ्र आं अटित इत्यत्र इण्निषेधाभावरूपं फलं भाष्ये प्रदर्शितम् ननु 'हलन्त्यमि'ति सूत्रे अनुवृत्त्यर्थं तदावश्यकमिति ? असिद्धान्तपक्षे प्रयोजनप्रतिपादनापेक्षया उत्तरार्थतया तत्प्रयोजनप्रदर्शनस्योचितत्वात्। एतेन निश्चीयते-नोत्तरार्थमुपदेशपदम्। श्वन्नित्यादिप्रातिपदिकान्त्यनकारस्येत्त्वं 'प्रातिपदिकानां प्रतिषेधोऽकृत्तद्धितान्तानाम्' इत्यनेन, फलाभावाद् वा परिहरणीयम्! चित्रङ्कटकङकारस्येत्संज्ञायां तु फलमात्मनेपदमिति तत्रेत्संज्ञा।

ननु यस्य मते उपदेशशब्दो भावघञन्तस्तन्मते आद्योच्चारणं विद्यमानमन्त्यमित्यर्थाभ्युपगमे प्रत्यासत्त्या उच्चारणान्त्यमित्याश्रयितुमशक्यतया यत्किञ्चित् समुदायस्य ग्रहणे प्राप्ते तद्वारणाय व्यवसितान्त्यमिति[1] वार्तिकस्यारम्भो युज्यते। करणघञन्तोपदेशशब्दस्य स्वीकारे तु प्रयोगशासनकरणभूतानां धात्वादीनामुपदेशपदार्थतया एतादृशार्थकोपदेशपदस्य हलन्त्यमिति सूत्रेऽनुवृत्त्या धात्वादिनिरूपितान्त्यत्वस्यैव ग्रहणेन यत्किञ्चित्समुदायान्त्यस्येत्संज्ञाया व्यावृत्तौ व्यवसितान्त्यमिति वार्त्तिकस्य अनुत्थानम् = अनारम्भः स्यादिति नाशङ्कनीयम्। समुदायस्योपदेशे अवयवानामप्युपदेशो जायते एवेत्युपदेशकरणतायाः धात्ववयवेष्वपि सत्त्वेन तेषामपि इत्त्वापत्तेर्वारणाय वार्त्तिकारम्भस्य सार्थक्यात्। कृते च वार्त्तिके व्यवसितत्वपर्याप्त्यधिकरणसमुदायान्त्यमेव गृह्यते इति न दोषः। भाष्यकृता च अन्त्यग्रहणसामर्थ्येन पूर्वप्रदर्शितदिशा यत्किञ्चित् समुदायान्त्यवारणेन वार्त्तिकं प्रत्याख्यातम्।

सूत्रघटक अच् पद का प्रयोजन अनुबन्धों के असिद्धान्त (अनवयवत्व) पक्ष में 'अभ्र आँ अटितः' इसमें भाष्यकार ने दिखाना उचित समझा, किन्तु हलन्त्यसूत्र में अनुवृत्ति के लिये उत्तरार्ध नहीं कहा। इससे भी स्पष्ट है कि इसमें उपदेश का अनुवृत्ति नहीं है।

शङ्का—उपदेश शब्द करणसाधन भी नहीं है; क्यों कि 'हलन्त्यम्' इस सूत्र में करण घञन्त उपदेश-पदानुवृत्ति से जिस किसी के अन्त्य की इत्संज्ञा न होकर शासनकरणभूत धातु, प्रातिपदिक, प्रत्ययादि के अन्त्य का ही ग्रहण होगा। ऐसी अवस्था में इस सूत्र में व्यवसितान्त्य का ग्रहण करना चाहिये। व्यवसित कौन है ? इसका धातु प्रातिपदिक इत्यादि के द्वारा गणना—इत्यादि वार्त्तिककारके प्रयास व्यर्थ हो जायेंगे।

समाधान—समुदाय का शासन करण होने से उसके द्वारा अवयव भी शासन करण, अतएव उपदेश है। इनके अन्त्य की प्राप्त इत्संज्ञा एवं लोप के वारणार्थ वार्त्तिक आवश्यक है। भाष्यकार ने अन्त्य ग्रहण के सामर्थ्य से समुदायान्त्य का ही ग्रहण मानकर वार्त्तिक का प्रत्याख्यान किया है।

---

१. व्यवसितत्वं धातुत्वादिना धर्मेण परिच्छिन्नत्वम् = विशिष्टत्वम्। ते च मूल एवोक्ताः।

भाष्यकृता **चान्त्यग्रहणसामर्थ्येन प्रत्याख्यातम् । तत्रानुबन्धविशिष्टानां धातुत्वादि तु धातुत्वादियोग्यघटितत्वाद् बोध्यम् । निपातानां द्योतकत्वेन ब्राह्मणवसिष्ठन्यायेन च पृथग् ग्रहणम् । व्यवसितत्वञ्च धातुत्वादिना परिच्छिन्नत्वादिति** कैयटः ।

ननु 'न धातुलोपः' इति सूत्रे धातुग्रहणाभावे लूञ्धातावपि ञकारस्य लोपात् 'लविता' इत्यत्रापि गुणस्य निषेधः स्यात् । कृते तु धातुग्रहणे यत्र धातोरंशस्य लोपस्तत्रैव निषेधप्रवृत्तिः । अतः प्रकृते 'लविता' इत्यादौ ञकाररूपानुबन्धस्येत्संज्ञा-लोपाभ्यां निवृत्तौ ततो लूमात्रस्य धातुसंज्ञायां धात्वंशस्य लोपाभावात् 'न धातुलोपः' इत्यनेन न प्रतिषेध इत्याशयेन भाष्ये उक्तम्—'न धातुलोप इति सूत्रे धातुग्रहणं किमर्थम् ? लूञ लविता, पूञ् पविता, अनुबन्धलोपे कृते ततो धातुसंज्ञा' इति । तद् व्यवसितान्त्यस्य ग्रहणेऽनुपपन्नम्; धात्वादिसंज्ञां विना इत्संज्ञाप्रवृत्तेरसम्भवेन इत्संज्ञानन्तरं धातुसंज्ञायाः कर्तुमशक्यत्वात् । एतत्परिहरति—**तत्रेति** । व्यवसितपदार्थशरीरे धातुत्वादियोग्यघटितत्वेन = लूप्रभृति-घटितत्वेन, धात्वादीनां ग्रहणेन लूञित्यस्य सानुबन्धकस्य धातुसंज्ञकत्वाभावेऽपि धातुत्व-योग्यलूशब्देन घटितत्वात् धातुपदेन ग्रहणात् अनुबन्धलोपोत्तरं धातुसंज्ञायामपि न भाष्य-विरोधसम्भावना । 'धातुत्वादियोग्यघटितत्वात्' इत्यस्य धातुत्वादिबोधकत्वादिति निष्कृष्टो-ऽर्थः । लूञो लूधातुबोधकत्वमस्त्येव । अत एव 'घ्वसोः' इति सूत्रेण विहितस्य लोपस्य सर्वादेशत्वाय लोपश्चेत्यंशे लकारानन्तरं शकारं प्रश्लिष्य सर्वादेशत्वं शित्वात् साधितं भाष्ये । शकारस्यादेशत्वाभावेऽपि लोपरूपादेशबोधकतया पक्षेऽस्मिन् इत्संज्ञा सिध्यति । शकारस्येत्संज्ञानन्तरं जायमानलोपस्तु नादेशपदेन धर्तुं शक्यते; लोपात् पूर्वमेव इत्संज्ञा-प्रवृत्तिकाले आदेशतानिश्चयस्यापेक्षितत्वात् ।

नन्वेवमपि निपातानामर्थवताम् अर्थवत्सूत्रेण, अनर्थकानाञ्च 'कृत्तद्धित' इति सूत्र-स्थचकारेण प्रातिपदिकसंज्ञकत्वेन प्रातिपदिकपदेनैव निपातानामपि संग्रहात् पृथग्निपातोक्ति-र्व्यर्था ? इत्यत आह—**निपातानामिति** । द्योतकानामपि निपातानां शक्तिलक्षणान्यतरज्ञानो-

---

शङ्का—तत्रानुबन्धेति । 'न धातुलोप आर्धधातुके' इस सूत्र के भाष्य से लूञ् आदि सानु-बन्धक स्थल में अनुबन्ध के लोप के अनन्तर धातु संज्ञा का होना सिद्ध होता है । ऐसी दशा में अनुबन्धसहित में धातुत्वादि के न होने से धातु का अन्त्य ही नहीं होता, अतएव इत्संज्ञा की प्राप्ति नहीं होगी ?

समाधान—धातु आदि से यहां धातुत्वादि योग्य से घटित विवक्षित है । इस प्रकार धातुत्व के न होने पर धातुत्वयोग्य लू से घटित लूञ् को मान कर इत्संज्ञा हो जायगी ।

शङ्का—निपात भी प्रातिपदिक है । अतएव प्रातिपदिक से इसका भी संग्रह होने से पृथक निर्देश व्यर्थ है ?

समाधान—वाचकत्व-द्योतकत्व भेद से पृथक् निर्देश अथवा 'ब्राह्मण को वशिष्ट जी को बुलाओ' इस वाक्य में ब्राह्मण के अन्तर्गत वशिष्ठ जी के भी होने से ब्राह्मण शब्द से पृथक् उपात्त वशिष्ठपद आदरार्थक है, उसी प्रकार विशिष्टतासूचनार्थ निपातपदोपादान है ।

व्यवसितत्व परिच्छिन्नत्व रूप है । धातुत्वादि से परिच्छिन्न अर्थात् विशिष्ट । इस प्रकार

एवञ्चोदश्विदादिप्रातिपदिकान्त्यस्यापि लोपः प्राप्नोतीति 'प्रातिपदिकानां प्रतिषेधो वाच्योऽकृत्तद्धितान्तानाम्' इति वार्त्तिककृतोक्तम्, 'कुम्भकारः' इत्यादौ अपवादविषयपरिहारेणोत्सर्गप्रवृत्तेः पूर्वं प्रातिपदिकत्वे णादिलोपो न स्यादिति अकृदित्यादि। तच्च फलाभावान्नेत्संज्ञेत्यादिना भाष्ये प्रत्याख्यातम्।

पस्थित्या अर्थवत्त्वाभावेन नार्थवत्सूत्रेण प्रातिपदिकसंज्ञा, तथाऽपि 'कृत्तद्धित' इति सूत्रेणोक्तरीत्या प्रातिपदिकसंज्ञायाः सुवचत्वादत आह—**ब्राह्मणेति**। प्रपञ्चार्थमेव तदुपादानम्। ब्राह्मणवसिष्ठन्यायस्यायमभिप्रायः—'ब्राह्मणमानय' इत्युक्तावपि ब्राह्मणान्तर्गतत्वेन वसिष्ठ आनेतुं शक्यते, तथापि 'ब्राह्मणं वशिष्ठं' चानय' इति वाक्ये यथा ब्राह्मणपदात् पृथक् वशिष्ठपदं तथैवात्राऽपि बोध्यम्।

उत्तरसूत्रे उपदेशस्याननुवृत्तौ साधकान्तरमाह—**एवञ्चेति**। व्यवसितान्त्यग्रहणे सति उदश्विदित्यस्य प्रातिपदिकत्वात् तदन्त्यस्य तकारस्येत्संज्ञायां लोपेनापहारः स्यात्। अतः 'प्रातिपदिकानां प्रतिषेधः' इत्यादिवार्त्तिकं युक्तम्। 'उदश्वित्' इत्यव्युत्पन्नं प्रातिपदिकमिति कैयटः। एवञ्च कृदन्तत्व-तद्धितान्तत्वयोरभावाद् अकृत्तद्धितान्तत्वे प्रातिपदिकत्वेन इत्त्वनिषेधः सिद्धः।

उदश्विच्छब्दस्य[1] उदकेन श्वयति = वर्द्धते इति व्युत्पत्त्या श्विधातोः क्विप्प्रत्ययेन निष्पन्नत्वेऽपि नेत्संज्ञा। न श्रवणं यस्य तदश्रवणम्। अश्रवणञ्च कृत्तद्धितमिति अकृत्तद्धितं तदन्तानां प्रातिपदिकानामन्त्यस्य नेत्संज्ञेत्यर्थो वार्त्तिकस्य। तथा च तस्य क्विबन्तत्वेन कृदन्तत्वेऽपि क्विपः सर्वापहारिलोपेन श्रूयमाणत्वाभावेन अश्रूयमाणकृदन्तत्वात् प्रातिपदिकत्वाच्च प्रतिषेधः। 'कुम्भकारः' इत्यादावकारस्य श्रूयमाणत्वेन अश्रूयमाणकृदन्तत्वाभावान्न निषेधः।

नवीनास्तु—स्ववृत्तिः प्रातिपदिकवृत्तिश्च या आनुपूर्वी तादृशानुपूर्व्यवच्छिन्नविषयताकबोधप्रयोजकानां प्रातिपदिकानामित्संज्ञायाः प्रतिषेधः इत्यर्थं वार्त्तिकस्य मन्यन्ते। अत्रार्थे अकृत्तद्धितान्तानामिति तात्पर्यं ग्राहयति। उदश्विद्वृत्तिः तथा प्राति-

---

व्यवसितान्तर्गत प्रातिपदिक के भी होने से 'उदकेन श्वयति वर्द्धते' उदकपूर्वक श्वि धातु से क्विप् प्रत्यय द्वारा निष्पन्न तक्रवाची उदश्वित् शब्द के अन्त्य की इत्संज्ञा प्राप्त होती है। इसके वारण के लिये 'प्रातिपदिकानाम्' इत्यादि वार्त्तिक का आरम्भ है। श्रूयमाण कृदन्त-तद्धितान्तभिन्न प्रातिपदिक की इत्संज्ञा नहीं होती—ऐसा अपवाद विषय का परित्याग करके ही उत्सर्गशास्त्र की प्रवृत्ति मानी गयी है। अतः 'कुम्भकारः' इसमें कृ-धातूत्तर अण् प्रत्यय तथा प्रातिपदिक संज्ञा होने पर 'प्रातिपदिकानाम्' इस उक्त वार्त्तिक से णकार की इत्संज्ञा के निषेध-वारणार्थ वार्त्तिक में अकृत् आदि का प्रवेश है। अण् का श्रवण होने से श्रूयमाण कृदन्त प्रातिपदिक है। उदश्वित् भी कृदन्त है, किन्तु क्विप् का सर्वापहारी लोप होने से अश्रूयमाण कृदन्त है, अतः यहाँ प्रतिषेध होता है। प्रातिपदिक का इत्संज्ञा में प्रयोजन न होने से इत्संज्ञा की व्यावृत्ति सिद्ध होने के कारण उक्त वार्त्तिक का प्रत्याख्यान भाष्यकार ने किया है।

---

१. 'तक्रं ह्युदश्वित् मथितम्' इत्यमरः।

अत्राद्योच्चारणार्थकोपदेशपदानुवृत्तौ त्वस्य वार्त्तिकस्यानुत्थानमेव स्यात्। 'उद्देशश्च प्रातिपदिकानां नोपदेशः' इति 'आदेचः' (६ । १ । ४५) इति सूत्रभाष्ये उक्तेः। एतद्भाष्यैकवाक्यतया पस्पशाह्निकान्तस्थे 'अग्रहणप्रातिपदिकानामुपदेशः कर्त्तव्यः,

---

पदिकमपि उदश्वित्, अतः प्रातिपदिकवृत्तिश्च या उदश्वित्त्वरूपा आनुपूर्वी तादृशानुपूर्व्या उदश्वित्त्वेन अवच्छिन्ना या विषयता तादृग्विषयतानिरूपकबोधस्य प्रयोजकता उदश्वित्पदे, तस्य प्रातिपदिकस्य नेत्संज्ञा।

'कुम्भकार् अण्' इत्यत्र प्रातिपदिकवृत्तिः कुम्भकार् अण्त्वरूपा या आनुपूर्वी, तादृशानुपूर्व्यवच्छिन्नविषयताकबोधप्रयोजकतैव नास्ति; तादृशबोधस्याभावात्। चित्रङ्शब्दे तु चित्रत्वावच्छिन्नविषयताकबोधप्रयोजकतायाः सत्त्वेऽपि प्रातिपदिकवृत्तिचित्रङ्त्वरूपानुपूर्व्यवच्छिन्नविषयताप्रयोजकत्वं नास्तीति[1] नेत्संज्ञायाः प्रतिषेधः। अपवादविषयं विहाय उत्सर्गशास्त्रप्रवृत्तेर्वाच्यतया प्रातिपदिकानामिति वार्त्तिकप्रवृत्तेः सम्भावनामात्रेण इत्संज्ञाविधायकशास्त्रस्य प्रातिपदिकसंज्ञाविधानात् पूर्वं प्रवृत्तिः न स्यात्, अतः वार्त्तिके 'अकृत्तद्धितान्तानाम्' इत्युक्तम्। तथोक्तौ च कृदन्तत्वान्न वार्त्तिकप्रवृत्तिसम्भावना। तच्च = प्रातिपदिकानामिति वार्त्तिकम्। फलाभावात् = प्रयोजनाभावात् प्रत्याख्यातम्। इत्संज्ञायाः फलं न किञ्चित्। न च उदश्विदित्यत्र तकारेत्संज्ञायाः 'तित्स्वरितम्' इति स्वरविधानं फलमिति वाच्यम्; 'तिति प्रत्ययग्रहणम्' इति वार्त्तिकेन प्रत्ययस्यैव तकारेत्संज्ञकस्य ग्रहणात्। अत्र तु तकारेत्संज्ञकत्वं प्रातिपदिकस्य सम्भावितमिति सूत्राप्रवृत्त्या न तत्फलम्। यदि च 'हलन्त्यम्' इत्यत्र भावघञन्तोपदेशपदस्यानुवृत्तिः स्यात्, तदा 'उद्देशश्च प्रातिपदिकानां नोपदेशः' इति भाष्योक्तदिशा उपदेशाभावादेव प्रातिपदिकानामित्त्वाप्राप्तौ 'प्रातिपदिकानाम्' इति वार्त्तिकस्यारम्भ एव न स्यात्। तस्मात् भावघञन्तोपदेशपदस्य नानुवृत्तिरिति सिद्धम्।

भाष्ययोः परस्परं विरोधं परिहरति—**एतद्भाष्येति**। 'आदेच उपदेशे' इति सूत्रो-

---

'प्रातिपदिकों का उद्देश है, उपदेश नहीं है' इस 'आदेऽच उपदेशेऽशिति' सूत्र के भाष्य से आद्योच्चारण रूप उपदेश के न रहने से ही इत्त्व की व्यावृत्ति प्रातिपदिक से सिद्ध है, पुनः 'प्रातिपदिकानाम्' इसके आरम्भ की क्या आवश्यकता थी! अतः उच्चारणार्थक उपदेशपद की अनुवृत्ति 'हलन्त्यम्' इस सूत्र में नहीं है।

शङ्का—'प्रातिपदिकानां नोपदेशः' इस भाष्य का पस्पशाह्निक भाष्य में उक्त अग्रहण (गणादि में अपठित) 'प्रातिपदिकानामुपदेशः कर्त्तव्यः' इसके साथ विरोध है; क्योंकि यहाँ प्रातिपदिकों का भी उपदेश करना स्वीकार किया गया है।

समाधान—पूर्व भाष्य के साथ अविरोध के लिए मूलोक्त उपदेश शब्द = 'उपदेश इति शब्दो यस्मिन्' इस प्रकार बहुव्रीहि से 'उपदेशः कर्त्तव्यः' एतत्परक है। अतः 'इसका ग्रहण बोध करना चाहिए'—ऐसा अर्थ है, आद्योच्चारण अर्थ नहीं। प्रक्रिया से सिद्ध प्रातिपदिकों का ज्ञान अनुवादरूप ही होगा। इसका प्रयोजन सन्देह-निवृत्ति है।

---

१. चित्रत्वरूपानुपूर्व्यांश्चित्रङ्रूपप्रातिपदिकवृत्तित्वाभावात्।

मञ्चको मञ्चक इति मा भूत्' इति भाष्ये उपदेशशब्दः 'ग्रहणं कर्त्तव्यम्' इत्यर्थकः। तच्चानुवादरूपमेव सन्देहनिवर्त्तकमिति बोद्धव्यम्।

नन्वेवं 'तस्मिन्निति निर्दिष्टे' (१।१।६६) इति सूत्रे षष्ठीप्रकल्पकत्वं तस्येति पक्षे 'गुप्तिज्किद्भ्यः' (३।१।५) इत्यादावपि षष्ठीप्रकल्प्त्यापत्तिः। न च सनः सनेवादेशो भविष्यतीति बाधकाभाव इति वाच्यम्; 'उपदेशे इत्युच्यमाना इत्संज्ञा न प्रकल्पेत' इत्युक्तं भाष्ये, तद्विरुद्धचैतात्रोपदेशपदाननुवृत्तौ, इति चेत् ?

न; तस्यैकदेश्युक्तित्वेनासाधकत्वात्। तथा हि—तत्र 'ङमो ह्रस्वादचि'

कोद्देशश्च 'प्रातिपदिकानाम्' इत्यादिभाष्येण सह विरोधाभावायेत्यर्थः। अग्रहणप्रातिपदिकानाम् = गणादावपठितानां प्रातिपदिकानाम्। 'उपदेशः कर्त्तव्यः' इति भाष्ये उपदेशशब्दो नाद्योच्चारणार्थकः, किन्तु ग्रहणार्थकः। **शेखरे** 'उपदेशशब्दः' उपदेश इति शब्दो यस्मिन्निति बहुव्रीहिसमासपरः। अन्यथा उपदेशशब्दस्य ग्रहणं कर्तव्यमेतावत्पर्यन्तमर्थवर्णनप्रयुक्तं स्यात्। बहुव्रीहौ तु उपदेशः शब्दः 'उपदेशः कर्तव्यः' इति समुदाये घटकत्वेन वर्तते। तथा च उपदेशपदघटितस्य 'उपदेशः कर्तव्यः' इति समुदायस्य ग्रहणं कर्तव्यमित्यर्थो नासङ्गतः। तच्च = ग्रहणञ्च, सन्देहवारणायानुवादकमेव।

उपदेशपदाननुवृत्तौ पुनः भाष्यविरोधमाशङ्क्य परिहरति—**नन्वेवमिति**। अयमाशयः—'तस्मिन्निति' 'तस्मादित्युत्तरस्य' इति सूत्रद्वयस्य क्रमेण सप्तमीनिर्देशेन यत्र कार्यं तत्र सप्तम्यन्तार्थान्वय्यर्थकं पदं षष्ठ्यन्तं भवति, एवं पञ्चमीनिर्देशेन यत्र कार्यं तत्र पञ्चम्यन्तार्थान्वय्यर्थकं पदं षष्ठ्यन्तं बोध्यमित्यर्थस्य षष्ठीप्रकल्पकत्वपक्षे स्वीकारेण 'गुप्तिज्किद्भ्यः सन्' इत्यत्रापि पञ्चम्यर्थान्वयिनः सन्पदस्य षष्ठ्यन्तत्वापत्तौ आदेशान्तरस्यानिर्देशात् तस्य सनः स्थाने स एव सन् आदेशः स्यादिति न कश्चिद्दोषः। ततः परं सनः स्थाने सन्रूपादेशे उपदेशाभावादित्संज्ञा न प्राप्नुयादिति भाष्ये दोषः उपन्यस्तः। यस्तु सन् आद्योच्चारणविषयः स तु स्थानी सम्पन्नः, यस्तु सन् आदेशरूपः स तु कल्पितः; न पाणिन्याद्युच्चरित इत्युपदेशाभावः स्पष्टः। यदि चात्र आद्योच्चारणार्थकमुपदेशपदं नानुवर्तेत तदा उपदेशाभावेन इत्संज्ञाया वारणस्यासङ्गत्या भाष्यविरोधापत्तेः।

परिहारः—'ङमो ह्रस्वादचि' इति सूत्रे 'ङमो' इति पञ्चमी 'अचि' इति सप्तमी, पञ्चमीसप्तम्योरुभयोः निर्देशात् 'तस्मिन्' 'तस्मादिति' सूत्रद्वयस्य प्राप्त्या पूर्वस्य परस्य वा ङमुडिति शङ्किते, परत्वादनवकाशत्वाच्च पञ्चमीनिर्देशस्य बलवत्त्वाद् 'तस्मादित्युत्तरस्य' इत्यस्यैव प्रकृते षष्ठ्युपस्थापकत्वात् नानुपपत्तिरिति सिद्धान्तिना भाष्यकृतोक्तम्।

शङ्का—आद्योच्चारणार्थक भावसाधन उपदेश पद की अनुवृत्ति न मानने पर भाष्यविरोध का उद्भावन करते हैं—नन्वेम् इति। 'तस्मिन्' 'तस्मात्' इन दोनों सूत्रों का क्रम से सप्तमीनिर्देश से जहाँ कार्य होता है वहाँ सप्तम्यन्तार्थ के अन्वयी अर्थवाला पद, एवं पञ्चमीनिर्देश से जहाँ कार्य होता है वहाँ पञ्चम्यन्तार्थ के अन्वयी अर्थवाला पद षष्ठ्यन्त हो जाता है। यह षष्ठीप्रकल्पकत्व का अभिप्राय है। 'ङमो ह्रस्वादचि' इसमें पञ्चम्यन्त 'ङमः' इसके अर्थ में अन्वयी अर्थवाला सप्तम्यन्त 'अचि' यह पद षष्ठ्यन्त हो जाने से अच् को ङमुट् होता है। इस पक्ष में 'गुप्तिज्किद्भ्यः सन्' इस सूत्र के पञ्चम्यन्तार्थ के अन्वयी अर्थवाला सन पद षष्ठ्यन्त हो जायगा ?

(८।३।३२) इत्यादौ यत्र सप्तमी पञ्चमी चेत्युभयं निर्दिश्यते, तत्र किं पूर्वस्य कार्यम्? अथ परस्य?—इति सन्देहे 'परत्वानवकाशत्वाभ्यां पञ्चमीनिर्देशो बलवान्' इति सिद्धान्तिनोक्तम्।

तत एकदेशिना 'यथार्थं वा षष्ठीनिर्देशः कर्तव्यः' इति समाधानान्तरमुक्तम्। यथाविषयं प्रागुक्तेषु कार्यिणः षष्ठ्या निर्देष्टव्य इति तदर्थः। तेषु सप्तमीनिर्देशस्य क्वचित् पूर्वत्र क्वचिदुत्तरत्राऽऽवश्यकत्वेनोभयनिर्देशे गौरवेणैकदेश्युक्तिः।

एतत्समाधानानन्तरं यथार्थं वा षष्ठीनिर्देशः कर्तव्यः = वस्तुतः सूत्रे एव षष्ठी निर्दिष्टव्या। यथा 'ङमो ह्रस्वादचि' इत्यत्र 'अचि' इत्यस्य स्थाने 'अचः' इत्येवं पठितव्यम्। तथा च सप्तमीनिर्देशाभावात् 'तस्मिन्निति' परिभाषायाः प्राप्तिरेव नेति न दोषः। परमिदं भाष्योक्तं समाधानं न मनोग्राहि; 'इतोऽत् सर्वनामस्थाने' इति सूत्रघटकसर्वनामस्थानपदे सप्तमीनिर्देशस्य 'गोतो णित्' इति सूत्रे 'सर्वनामस्थानं णिद्वत्' इत्यर्थस्य विवक्षितत्वेनानावश्यकतया तस्मात् पूर्वत्र = पूर्वस्मिन् 'इतोऽत्सर्वनामस्थाने' इत्यत्रावश्यकत्वेन, एवं 'ङमो ह्रस्वादचि' इति सूत्रे अचीति सप्तमीनिर्देशस्य उत्तरत्र = 'उञि च पदे' इत्यत्रावश्यकतया षष्ठी-सप्तमीत्युभयनिर्देशे गौरवादेषा एकदेशिन उक्तिः।

अस्मिन्नेव प्रसङ्गे असिद्धान्तपक्षावलम्बिनोक्तम्—'तस्मिन्निति', 'तस्मादिति' सूत्रद्वयेऽपि 'षष्ठी स्थानेयोगा' इत्यतः षष्ठीपदमनुवर्त्य षष्ठीप्रकल्पत्वकपक्षः उत्थापितः। एतच्च पूर्वं निरूपितम्। षष्ठीपदानुवृत्तौ गौरवात्, सप्तमीपञ्चम्योरुभयस्य युगपत् प्रकल्पकत्ववारणाय परत्वानवकाशत्वयोरावश्यकत्वेन, द्वयोर्युगपत् षष्ठीप्रकल्पकत्वे 'एकः पूर्वपरयोः' इति सूत्रे 'पूर्वपरयोः' इति व्यर्थं स्यात्; 'आद् गुणः' इत्यादौ 'आत्' 'अचि' इत्यनयोर्युगपत् षष्ठीप्रकल्पतयैव पूर्वपरयोः गुणस्यासिद्धत्वात्। अतस्तत्सामर्थ्याद् युगपत् षष्ठीप्रकल्पकत्वं नेष्यते—इत्याद्युपायस्य गौरवग्रस्ततया भाष्यमिदमेकदेशि। एतदेक-

---

समाधान—आदेशान्तर का निर्देश न होने से सन् के स्थान में सन् ही आदेश होगा। इस स्थान्यादेशभाव से कोई क्षति नहीं है।

शङ्का—ऐसा होने पर आदेश का सन् पाणिन्यादि ऋषियों से आद्य उच्चरित नहीं है, किन्तु कल्पना से उपस्थित है। अतः उपदेश न होने के कारण इसके नकार की इत्संज्ञा नहीं होगी—इस भाष्योक्ति से उक्तार्थ के उपदेश पद की अनुवृत्ति न होने पर विरोध प्राप्त होगा?

समाधान—इस भाष्य के एकदेशी होने से इसका विरोध अकिञ्चित्कर है। एकदेशी सिद्ध करने के लिए पूर्वापर के प्रसङ्ग का निर्देश है। तथाहि—जिस सूत्र में सप्तमी और पञ्चमी—दोनों का निर्देश है वहाँ पूर्व या पर को कार्य होगा?—इस प्रकार के संशय का, परत्व और अनवकाशत्व के बल से पञ्चमीनिर्देश बलवान् है। अतः पर को ही कार्य होता है—ऐसा निर्णय किया।

इसके अनन्तर एकदेशी ने वस्तुतः 'ङमो ह्रस्वादचि' इसमें अचि के स्थान पर 'अचः' ऐसा पाठ करके समाधान किया। इसके एकदेशी होने का हेतु यह है। यथाविषय = यथाप्रदेश सूत्रों में कार्यी को षष्ठी से निर्देश करना चाहिये। उन सूत्रों में सप्तमीनिर्देश प्रयोजनान्तर के लिये है। जैसे—'ङमो ह्रस्वादचि' इसमें 'उञि च पदे' इस उत्तर सूत्र के लिये 'गोतो णित्' इसमें

ततः परेणैकदेशिना षष्ठीपदानुवृत्त्या 'तस्मिन्' (१ । १ । ६६) इत्यादेरेव षष्ठीप्रकल्पकत्वमाश्रित्य 'यथार्थं वा षष्ठी' इत्येकदेश्युक्तिः प्रत्याख्याता। षष्ठीपदानुवृत्तौ गौरवादुभयोः प्रकल्पकत्ववारणाय परत्वानवकाशत्वयोः 'एकः पूर्वपरयोः' (६ । १। ८४) इति पूर्वपरग्रहणस्य युगपत्प्रकल्पकत्वाभावे ज्ञापकस्य चावश्यकत्वाच्चेयमप्येकदेश्युक्तिः। ततः पूर्वेणैकदेशिना तत्पक्षे 'गुप्तिज्' (३ । १५) इत्यादौ दोषः शङ्कितः।

ततः षष्ठीप्रक्लृप्तिवादिनैकदेशिनोक्तम्—'स्यादेष दोषो यदीत्संज्ञा आदेशम् प्रतीक्षेत। तत्र खलु कृतायामित्संज्ञायां लोपे च कृते आदेशो भविष्यति। उपदेश इति हीत्संज्ञोच्यते' इति। एवञ्च त्वदुक्तिर्व्याहृतेत्याशयः।

देशिमतमनुसृत्य केनचिदेकदेशिनाशङ्कितम्—षष्ठीप्रकल्पकत्वपक्षे 'गुप्तिज्किद्भ्यः' इत्यादौ सनः सनादेशे उपदेशाभावादित्संज्ञा न स्यादिति। तथा च एकदेशिभाष्येण विरोधापादनमकिञ्चित्करम्, तस्य भाष्यस्य सिद्धान्तपक्षावलम्बितया सिद्धान्तार्थं प्रतिपादकत्वाभावात्। अस्य भाष्यस्य एकदेश्युक्तित्वे, अतः परं समाधानन्तरपरं भाष्यमप्येकदेशीति तात्पर्यम्।

अनुवृत्त 'सर्वनामस्थाने' इसकी सप्तमी 'इतोऽत्सर्वनामस्थाने' इसके लिये आवश्यक हैं; क्योंकि सर्वनामस्थान से पूर्व इकार को अकार होता है। दोनों विभक्तियों के 'घेर्ङिति' 'आण्नद्याः', 'ङिति' 'ङमो ह्रस्वादचः 'मय उञो वो वा अचि' इस प्रकार के निर्देश में गौरव होने से भाष्य एकदेशी है।

इसके अनन्तर सूत्र में वास्तविक षष्ठीनिर्देश करना चाहिये—इस असिद्धान्त पक्ष का 'षष्ठी स्थानेयोगा' इस सूत्र से षष्ठी पद की अनुवृत्ति द्वारा 'तस्मिन्' 'तस्मात्' इन सूत्रों को प्रकल्पक मानकर एकदेशी भाष्य में खण्डन किया गया। षष्ठीप्रकल्पकत्व पक्ष में षष्ठी पद की अनुवृत्ति में गौरव पर्याय से षष्ठीप्रकल्पकत्व के वारणार्थं परत्व और अनवकाशत्व का आश्रयण एवं युगपत् (एक समय में ही) उसके निवारण के लिये 'एकः पूर्वपरयोः' इसमें पूर्व-परग्रहण के ज्ञापकत्व के आश्रयण में गौरव है। अतः षष्ठीप्रकल्पकत्व पक्ष भी एकदेशी की उक्ति है। एक समय में पञ्चम्यन्त और सप्तम्यन्त पदों में षष्ठ्यन्तता यदि हो जाती तो 'आद् गुणः' इस सूत्र में 'आत्' और 'अचि' इन दोनों के षष्ठ्यन्त होने से दोनों गुणादेश के स्थानी अनायास ही सिद्ध हैं। इसके लिये 'पूर्वपरयोः' इसके द्वारा उभय की स्थानिता की सिद्धि का प्रयास व्यर्थ हो जायगा। पर एकदेशी से उद्भावित षष्ठीप्रकल्पकत्व पक्ष में पूर्व एकदेशी ने 'गुप्तिज्किद्भ्यः' इसमें सन् के सनादेश होने पर उपदेशाभाव के कारण इत्संज्ञा की अनुवृत्ति की शङ्का की है। अतः इस एकदेशी भाष्य से उपदेश की अनुवृत्ति प्रामाणिक नहीं है।

इसके अनन्तर षष्ठी-प्रकल्पकत्वपक्षावलम्बी एकदेशी ने पूर्वोक्त दोष का उद्धार इस प्रकार किया है। उपदेश के होने से इत्संज्ञा नहीं होगी—यह दोष तब दिया जा सकता था यदि इत्संज्ञा आदेश की प्रतीक्षा करती। यहाँ तो इत्संज्ञा और लोप के अनन्तर स को स आदेश होता है, क्योंकि इत्संज्ञा उपदेश अवस्था में ही की जाती है। अतः उक्त दोष नहीं है।

तदग्रे उपदेशपदाननुवृत्तिमभिप्रेत्य 'अथवा नानुत्पन्ने सनि प्रक्लृप्त्या भवितव्यम्। यदा चोत्पन्नः सन् तदा कृतसामर्थ्या पञ्चमीति प्रक्लृप्तिर्न भविष्यति' इति समाधानान्तरं कृतम्। तत्र 'परत्वविशिष्टस्य सन उत्पादने पञ्चम्या उपक्षयात् प्रवृत्त्यन्तराभावान्नास्ति प्रकल्पकत्वम्' इति तदर्थं कैयट आह।

ततः परेण एकदेशिना उक्तम्—षष्ठीप्रकल्पकत्वपक्षेऽपि दोषाभावः। इत्संज्ञा यदि कृते आदेशे प्रवर्तेत, तदा उपदेशाभावादित्संज्ञायाः अप्रवृत्तिः सम्भाव्येत। परन्तु न त्वेवम्। किन्तु इत्संज्ञालोपयोरनन्तरमादेशविधानेन पूर्वोक्तदोषाभावात्। उपदेशकालोत्तरमेव इत्संज्ञायाः विधानात् 'उपदेशाभावान्नेत्संज्ञा' इत्युक्तिर्व्याहता। एतत् सर्वमेकदेशिमतम्।

सिद्धान्तमाह—**अथ वेति**।

'हलन्त्यम्' इति सूत्रे उपदेशपदं नानुवर्तते इति मत्वा समाधानमिदम्। सन्प्रत्यये जाते सत्येव तस्य षष्ठ्यन्तत्वं कल्पयितुं शक्यते, न तु अनुत्पन्ने तस्मिन् सनि। सनः उत्पत्त्यनन्तरञ्च प्रकृत्यव्यवहितोत्तरत्वविशिष्टस्य सनः उत्पादने पञ्चमीविभक्तेः साफल्यात् षष्ठीप्रकल्पकत्वाभावेन सनः सनादेशो भवतु इति कल्पनायाः कर्तुमशक्यत्वात्। अर्थोऽयं कैयटेनाऽपि स्फुटीकृतः। तस्मादुपदेशपदस्यानुक्तौ न कश्चिद्दोषः। तथा च "उपदेशेऽजनुनासिकः' इति सूत्रस्थं भाष्यमेतत्सूत्रार्थस्य निर्णिनीषया प्रवृत्तम्, अतः एतद्भाष्यानुरोधेन उपदेशपदस्योत्तरत्रानुवृत्तिर्नोचिता। एवमेवाद्योच्चारणार्थत्वं च तस्य न सिध्यति। एवञ्च प्रसङ्गायातोपदेशपदानुवृत्तिसूचकस्यैकदेशिभाष्यस्यानुरोधो दुर्बलतया न त्वदभिमतार्थसाधकः।

अक्षरार्थस्तु—नन्वेवम् = उपदेशपदस्य भावसाधनतया उच्चारणार्थकत्वाभावे। अस्य वक्ष्यमाणेन 'विरुध्यते' इत्यनेनान्वयः। 'सूत्रे' इत्यस्य 'भाष्ये उक्तम्' इत्यनेन सहान्वयः। तस्य = 'तस्मिन्निति' 'तस्मादिति' सूत्रद्वयस्य। षष्ठीप्रकल्पकत्वम् = सप्तमीनिर्देशेन यत्र कार्यं तत्र सप्तम्यन्तार्थान्वय्यर्थकं पदं षष्ठ्यन्तम्, तथैव पञ्चमीनिर्देशेन यत्र कार्यं तत्र पञ्चम्यन्तार्थान्वय्यर्थकं पदं षष्ठ्यन्तमिति पक्षे। उपदेश इत्युच्यमाना = उपदेशपदमनुवर्त्य विधीयमाना। न प्रकल्पेत = न प्रवर्तेत। तत्र = सूत्रद्वये, यथाविषयम् = यथाप्रदेशम्, प्रागुक्तेषु = 'ङमो ह्रस्वादचि' इत्यादिषु, कार्यिणः = स्थानिनोऽजादयः, षष्ठ्या = षष्ठीविभक्त्यैव, तेषु = प्रागुक्तेषु सूत्रेषु, पूर्वत्र = 'गोतो णित्' इति सूत्रापेक्षया पूर्वस्मिन् 'इतोऽत्सर्वनामस्थाने' इत्यत्र, परत्र = 'उञि च पदे' इत्यत्र। तदादिपदे इत्यर्थलाभाय सामानाधिकरण्यमपेक्षितं सप्तम्यन्त एव सम्भवति।

इति हीति। हि = यतः। एवञ्च = तथोक्तौ च। अनुत्पन्ने सनि सनोऽसत्त्वादेव तत्र कार्यित्वबोधकयोग्या षष्ठी भवितुं नार्हति। उत्पन्ने च सनि प्रत्ययावधिसम्पादनतया चरितार्थायाः पञ्चम्याः षष्ठीप्रकल्पकता न सम्भवतीत्यर्थः।

इसके आगे भाष्यकार ने उपदेश पद की अनुवृत्ति को न मानकर समाधानान्तर किया। अथवा सन् प्रत्यय की अनुवृत्ति दशा में सन् के अभाव से षष्ठी किसमें होगी! और जब सन् उत्पन्न हो गया, तब पञ्चमी अव्यवहितोत्तर प्रत्यय विधान के लिए चरितार्थ हो जाने से षष्ठी की

एवं च प्रकृतसूत्रस्थस्य सूत्रार्थप्रतिपिपादयिषया प्रवृत्तस्य भाष्यवार्तिकस्यैकदेश्युक्तत्वद्भाष्यबलेन प्रौढिवादत्वकल्पनं नोचितम्, लक्ष्यासिद्धेश्च । 'अ इ उ ण्' (मा०

एकदेशिभाष्यानुसरणे दोषमप्याह—**लक्ष्यासिद्धेश्चेति**। 'भवतष्ठक्छसौ' इति सूत्रेण विहितस्य ठक्छस्रूपलक्ष्यस्य इत्त्वासिद्धिरिति भावः। उपदेशेऽन्त्यत्वाभावेन ककारस्येत्संज्ञानापत्तिर्दोषः। एवं शतृशानजादीनां सत्-पदेन विहितत्वात् इत्संज्ञानापत्तिः संग्रहणीया ।

ननु धातुप्रातिपदिकप्रत्ययादिरूपेषु व्यवसितेषु 'अ इ उ ण्' इत्यादिसूत्राणामनन्तर्भावात् एषामन्त्यानां णकारादीनां कथमित्संज्ञा ? इत्यत आह—**अ इ उ णिति**। **क्रमबोधकत्वेन** = क्रमवद्वर्णबोधकत्वेन अर्थवत्त्वात् प्रातिपदिकत्वेन प्रातिपदिकनिरूपितान्त्यत्वस्य णकारादौ सत्त्वेनेत्संज्ञाप्रवृत्तेः सुलभत्वात् । चित्रङः चित्ररूपप्रातिपादिकत्वेनेति चोः कोरपि चकारककारादिरूपप्रातिपदिबोधकत्वात् प्रातिपदिकत्वेनेति मूले निर्दिष्टम् । 'उपदेशोत्तरकालेत्संज्ञा' इति भाष्यवलात् इत्संज्ञोत्तरं प्रातिपदिकसंज्ञायाः प्रवृत्त्या पूर्वमेवानुबन्धविशिष्टस्य प्रातिपदिकपदेन निर्देशस्यासाङ्गत्यापत्तेरिति नव्याः ।

'लोपश्च' इत्यत्र शकारप्रश्लेषस्यानुबन्धानामेकान्तत्वपक्षे नोपपत्तिः । शकारस्य भावरूपतया अभावरूपलोपावयवत्वस्य वक्तुमशक्यत्वात् ? अत उपायान्तरमाह—**लोपोऽचीति**। 'लोपोऽची' इति सूत्रात् लोपपदे अनुवर्तमाने पुनः 'घ्वसोः' इति सूत्रे लोपग्रहणं सर्वादेशार्थं भविष्यतीति कल्पनया समाधेयम् । एवञ्चैतद्विरुद्धार्थप्रतिपादकः कैयटश्चिन्त्यः । 'आदेऽच उपदेशे' इति मूलपाठो न युक्तः । अत्र भावसाधनो न उपदेशशब्दः, किन्तु कर्मसाधनः । तस्मात् 'उपदेशेऽत्वतः' इति युक्तः पाठः—इत्यनुसन्धेयम् ।

सत्पदेन विहितानां शतृशानजादिषु राजसूयादिसाधनाय, अनुमितक्यबादौ च इत्त्वानापत्तिदोष आद्योच्चारणार्थके उपदेशब्देऽभ्युपगम्यमाने वज्रलेपायितः । तच्छब्देन 'तौ सत्' इत्यत्र अनुबन्धरहितानां शतृशानजादीनां परामर्शः—इति टिप्पणिकृतामुक्तिः आग्रहमूलैव । तच्छब्दस्य पूर्वपरामर्शितैव युक्ता[1] । बुद्धिस्थपरामर्शे बहूपप्लवः । एवं क्यजादौ अनुबन्धरहितस्य अनुमेयत्वकल्पनाऽपि बुद्धिविलासमात्रमिति मन्यन्ते बहवः ।

प्रक्लृप्ति नहीं कर सकती । परत्वविशिष्ट सन् की उत्पत्ति में ही पञ्चमी का सामर्थ्य क्षीण हो जाने से पुनः षष्ठीप्रकल्पकत्व में प्रमाणाभाव से षष्ठीप्रकल्पकत्व नहीं होगा । इस प्रकार भाष्य का अर्थ कैयट ने किया है । एवञ्च = पूर्वोक्त एकदेशी भाष्यों के आधार पर 'हलन्त्यम्' इस सूत्र के अर्थप्रतिपादन की इच्छा से प्रवृत्त 'उपदेशेऽजनुनासिक इत्' इस भाष्य वार्तिक की प्रौढ़िवादिता की कल्पना अनुचित है । और आद्योच्चारण अर्थ में 'भवतष्ठक्छसौ' इससे विहित ठक् के ककार की इत्संज्ञा का अभाव रूप दोष से लक्ष्य की असिद्धि भी हो जायगी ।

शङ्का—अइउण् इत्यादि के अन्त अनुबन्ध की इत्संज्ञा व्यवसित में सूत्र का परिगणन नहीं रहने से प्राप्त नहीं हैं ?

---

१. अतिदरिद्रदम्पत्योः वसनमिव एकेनाकृष्यमाणमपरं परिहरतीति न्यायोऽवतरति । 'तौ सत्' इति सूत्रस्य तथाऽर्थकल्पने 'शतृशानचौ सत्संज्ञकौ स्तः' इति सिद्धान्तकौमुदीविरोधः । ईदृशार्थाभ्युपगमे आद्योच्चारणार्थकत्वं न घटते—इत्युभयोः सङ्गतिर्दुर्लभा ।

सू० १) इत्यादीनामपि क्रमबोधकत्वेनार्थवत्त्वात् प्रातिपदिकत्वम्। चित्रङः 'चोः कुः' (८। २। ३०) इत्यादेरपि प्रातिपदिकत्वम्। 'लोपश्च' इत्यत्रापि शकारस्य स्वरूपेणार्थवत्त्वात् प्रातिपदिकत्वम्।

अनुबन्धानामेकान्तत्वे तु 'लोपो यि' (६। ४। ११८) इत्यतो लोपग्रहणेऽनुवर्त्तमाने पुनर्लोपग्रहणात् सर्वादेशत्वं बोद्धव्यम्।

'एकाच उपदेशे' (७। २। १०), इत्यत्रत्यः कैयटोऽपि **चिन्त्य एव। 'एकाच उपदेशे' (७। २। १०), 'आदेच उपदेशे' (६। १। ४५) इत्यादौ तु भावसाधन एवेति सुधियो विभावयन्त्वित्याहुः ॥**

धातुप्रत्ययादिषु लेखने उच्चारणे च अनुनासिकस्यादर्शनात् कथमनुनासिकत्वाननुनासिकत्वयोर्विवेकः ? इत्याशङ्कते—**ननु इति**। शास्त्रे = धात्वादिस्थले, तत्त्वज्ञानम् = अनुनासिकाननुनासिकत्वयोर्विवेकः। **प्रतिज्ञेति**। 'प्रतिज्ञायते इति प्रतिज्ञा' इत्यत्र कर्मणि 'आतश्चोपसर्गे' इत्यङ्। प्रतिज्ञा = प्रतिज्ञानविषयः, आनुनासिक्यम् = अनुनासिकत्वं येषामित्यर्थः। इष्टकार्यानुरोधेन वर्णोऽयमनुनासिक इति निश्चेतव्यम्।

ननु पूर्वं कर्मधारयसमासस्तदुत्तरं तद्धितप्रत्ययः—इत्येवमुभयविधवृत्तिस्वीकारे गौरवमित्येतन्मूलकेन 'न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इति न्यायेन प्रतिज्ञाविषयानुनासिक्यपदात् समस्तान्मतुपो विधानस्यायुक्तत्वेन 'प्रतिज्ञाविषयानुनासिक्यवन्तः' इति प्रयोगोऽसाधुरिति चेत् ? तस्य न्यायस्य ज्ञापकमूलकतया लाघवानादरे समस्तादपि मतुपो विधानस्य युक्तत्वात्। अत एव 'प्रत्ययस्थात्' इति सूत्रे भाष्ये 'असुब्वतः' इति प्रयोगः सङ्गच्छते। अन्यथा न सुप् यस्मिन्निति बहुव्रीहिणा 'असुपः' इत्येवं निर्देष्टुं शक्यतया मतुबन्तप्रयोगस्यासाङ्गत्यापत्तेः। तस्मात् साधुत्वमुभयस्य। लाघवादरे तु मत्वर्थीयः प्रत्ययो नेष्ट इत्येव पूर्वोक्तन्यायस्याशयः। अतएव 'विष्णवे शिवरूपिणे' इत्यादयः प्रयुज्यन्ते।

समाधान—क्रमवान् वर्णों का बोधक इन सूत्रों को माना गया है। अथर्वत्वनिबन्धन प्रातिपदिक संज्ञा होने से प्रातिपदिक को अन्त्य हैं। इसी प्रकार चित्रङ् तथा 'चोः कुः' इस सूत्र के घटक चु कु भी प्रातिपदिकसंज्ञक हैं। अतः प्रातिपदिक के अन्त्य होने से ङकार एवं उकार की इत्संज्ञा 'उपदेशोऽच्' इससे सुलभ है।

'ध्वसोरेद्धावभ्यासलोपश्च' इस सूत्रघटक 'लोपश्च' इसमें दा सकार निर्दिष्ट होने से शित्वात् 'देहि' इस प्रयोग में लोपादेश सम्पूर्ण अभ्यास को हुआ। अन्यथा अभ्यास के एकदेश का लोप हो जाता। अनुवन्ध के अनवयवत्व पक्ष में लोप के समीप में शकार इत् है। यहाँ भी प्रश्लिष्ट शकार अपने स्वरूप में बोधक होने से अर्थवान् है। अतएव प्रातिपदिक संज्ञा भी सुलभ है। अनुबन्धों के अवयवत्वपक्ष में 'शकारः इत् यस्यावयवः' इसके अनुसार लोप का अवयव शकार नहीं हो सकता; क्योंकि लोप के अभावरूप होने से भावरूप शकार उसका अवयव कैसे होगा ? अतः 'लोपो यि' इससे लोप पद की अनुवृत्ति से लोप का लाभ सिद्ध है। 'ध्वसोः' इस सूत्र में लोप पद का उपादान व्यर्थ होने से सर्वादेशत्व की कल्पना होती है।

'एकाच उपदेशेऽनुदात्तात्' इस सूत्र का कैयट एवं इसी के समानार्थक मनोरमा आदि ग्रन्थ

३. उपदेशेऽजनुनासिक इत् । १ । ३ । २ । **उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात् । प्रतिज्ञानुनासिक्याः पाणिनीयाः ।**

'लण्' (प्र० सू० ६) सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा ।

प्रत्याहारेष्वितां न ग्रहणम्; 'अनुनासिकः' इत्यादिनिर्देशात् । न ह्यत्र ककारे परेऽच्कार्यं दृश्यते ।

ननु शास्त्रेऽनुनासिकोच्चारणाभावात् तत्त्वज्ञानं दुर्लभम् ? अत आह—प्रतिज्ञेति । प्रतिज्ञाविषयानुनासिक्यवन्त इत्यर्थः । 'पाणिनीयाः' इत्यस्य पाणिनिप्रभृतिप्रोक्ता वर्णा इत्यर्थः । प्रतिज्ञा चायमेवमिति कथनम्, वर्णानां तत्त्वज्ञापको व्यवहारश्च । ताभ्यां तज्ज्ञानं सुलभमिति भावः । प्रतिज्ञातारश्च प्रत्यासत्त्यैतच्छास्त्रकर्त्तार एवेति दिक् ।

निर्देशादिति । तेषां तत्र ग्रहणे हि नासिकादौ यणापत्तिरिति भावः । न चेत्त्व-

---

पाणिनीया इति । अत्र पाणिनिपदं कात्यायन-पतञ्जलिपदस्याप्युपलक्षणम् । अत एव प्रभृतिपदोपादानम् । तैः प्रोक्ता वर्णा इत्यर्थः । **अयमेवमिति** । अदडादेशे अनुनासिकोपधत्वं क्रियते इत्यादिना प्रतिपादनम्, व्यवहारश्च = तत्र तत्राचार्याणां कार्यविशेषेण कृतः प्रयोगश्च । ताभ्याम् = प्रत्येकम् अयमेवमिति कथनेन, प्रयोगेण च । तज्ज्ञानम् = अनुनासिकत्वविवेकः सुलभः । प्रतिज्ञा च न यस्य कस्याऽपि, किन्तु पाणिनीयव्याकरणशास्त्रप्रवर्तकाचार्याणामेव ।

अजादिप्रत्याहारेषु मध्यगवर्णानामिव अन्त्याक्षराणामित्संज्ञकानां ग्रहणं कस्मान्न भवति ? इति शङ्कां समाधातुमाह—**निर्देशादिति** । तेषाम् = इताम्, तत्र = प्रत्याहारेषु, ग्रहणे अनुनासिकशब्दे ककारात्पूर्वस्येकारस्य यणादेशः स्यात् । 'ऋलृक्' सूत्रघटकककारस्यापि अच्प्रत्याहारे ग्रहणेन तस्यापि अच्त्वात् । न च तत्र 'मुखनासिकावचनोऽनुनासिक' इति सूत्रं कुर्वता सूत्रकृता यणादेशः कृत इति तन्निर्देशादिदं कल्प्यते—प्रत्याहारेषु इतां न ग्रहणमिति । तथा चेत्संज्ञकानां वर्णानां प्रत्याहारेषु ग्रहणाभावान्न यणा निर्देशः सूत्रकृता कृतः । न चान्यत्रापि तथा ।

भी वास्तविकता से दूर हैं । 'उपदेशेत्वतः' इत्यादि सूत्रों में उपदेशपद भावसाधन ही हैं । इसका विचार विद्वानों को करना चाहिए ।

शास्त्र में अनुनासिक का उच्चारणचिह्न उपलब्ध न होने से अनुनासिकत्व और अननुनासिकत्व का विवेक कठिन है । अतः लिखते हैं—प्रतिज्ञा इति । पाणिनि प्रभृति महर्षियों से कथित वर्णों में प्रतिज्ञा का विषय अनुनासिकत्व है । प्रतिज्ञा के दो स्वरूप दिखाये गये हैं । 'यह अनुनासिक है'—ऐसा सूत्रकारादिकों का कथन और 'इदितो नुम् धातोः' इत्यादि स्थानों में इदित् पद का इकार में व्यवहार—इन दो प्रकार की प्रतिज्ञा से अनुनासिकत्व का निश्चय होता है । प्रतिज्ञा मुनित्रय की ही ग्राह्य है ।

इत्संज्ञक वर्णों का 'अण्' 'अच्' आदि प्रत्याहारों में ग्रहण नहीं होता । अनुनासिक पदों में ककार के पूर्व इकार को यणादेश नहीं किया गया । इससे उक्तार्थ की सिद्धि होती है ।

विधानसामर्थ्याद् यणभावः सिद्धः; तस्यापि प्रत्याहारेष्वनुबन्धाग्रहणज्ञापनद्वारैव यणभावकल्पकत्वौचित्यात् । साक्षाच्छास्त्रबाधकल्पनापेक्षयाऽस्यार्थस्यौचित्यात् । 'निर्देशाद्' इत्यस्य तन्मूलभूतेत्त्वविधानसामर्थ्यादित्यर्थ इति तात्पर्यम् । आदिना 'तृषिमृषिकृशेः' (१।२।२५) 'एकः पूर्व' (६।१।८४) इत्यादिसङ्ग्रहः ।

नचात्र यणि 'प्रत्यस्थात्' इति सूत्रेण ककारात् पूर्वस्येत्त्वविधानं व्यर्थमापद्येत । सर्वत्र इत्त्वे कृते ककारात् पूर्वस्य तस्य यणा अपहारेण क्वचिदपि श्रूयमाणत्वभावेन तस्यानर्थक्यप्रसङ्गः स्पष्ट एव । तत्सामर्थ्येन यणादेशाभावकल्पनया दोषाभावादिति वाच्यम्; तस्यापि = इत्त्वविधानसामर्थ्यस्यापि । अस्मिन् पक्षे साक्षात् यण्विधायकसूत्रस्य बाधकल्पना भवति । एतदपेक्षया अनुबन्धानां प्रत्याहारे ग्रहणाभावद्वारा यणोऽभावकल्पने साक्षात् सूत्रबाधाभावेन इत्त्वविधानसामर्थ्यात् इतां प्रत्याहारे ग्रहणाभावज्ञापनस्यैव युक्तत्वात् । अस्मिन् कल्पे—अच्त्वाभावनिबन्धना यणोऽप्राप्तिरिति साक्षात् सूत्रस्य न बाध इत्याशयः । नचानुनासिकघटककारस्याच्त्वेऽपि 'इकोऽसवर्णे' इत्यनेन प्रकृतिभावे यणादेशाप्रसक्त्या इकारघटितानुनासिकपदनिर्देशस्य इत्त्वविधानस्य चोपपत्तेरितां प्रत्याहारेषु ग्रहणं नेति ज्ञापनासम्भव इति वाच्यम्; ककारस्याच्त्वे अजादित्वेन कप्रत्ययावच्छिन्नान्तर्गतत्वेन च 'यचि भम्' इत्यनेन भसंज्ञायां पदसंज्ञाया बाधेन पदान्तत्वाभावाद् 'इकोऽसवर्णे' इत्यस्याप्राप्तेः पदान्तस्यैव इकः प्रकृतिभावस्य तेन बोधनात् । न चैवमपि यणं बाधित्वा भत्वेन प्राप्ते 'यस्येति च' इत्यनेन लोप एव आपादनीयो न यणिति वाच्यम् । नासाशब्दात् कप्रत्यये कृते 'केऽणः' इति सूत्रेण अण्प्रत्याहारमाश्रित्य विधीयमानो ह्रस्वः, अण्प्रत्यहारग्रहणसामर्थ्यात्[1] परत्वाच्च 'यस्येति च' इति सूत्रं बाधित्वा प्रवर्तते । ततश्च 'सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव' इति परिभाषया पुनः 'यस्येति च' इति सूत्राप्रवृत्त्या यणादेशापादनस्यैव युक्तत्वात् ।

अथवा नासशब्दे अस्माद् धातोः ण्वुल्प्रत्येये टापि इत्त्वे सति निष्पन्ने नासिकाशब्दे 'यस्येति च' इत्यस्य प्राप्तिरेव नास्तीति युक्तं यणादेशापादनम् ।

नचैवमित्त्वविधानसामर्थ्यादिति वक्तव्ये निर्देशादिति परममूलोक्तं नोचितामित्यत आह—**तन्मूलेति** । तस्य = निर्देशस्य, मूलभूतमित्त्वम्, तद्विधानसामर्थ्यादत्र तात्पर्यम्, नतु

शङ्का—ककार के पूर्ववर्ती इकार के स्थान में सर्वत्र यणादेश होने से 'प्रत्ययस्थात्' इस सूत्र से ककार से पूर्व इत्त्वविधान ही व्यर्थ हो जाने के कारण यण् नहीं होगा । अतः उक्त निर्देश उक्तार्थ में प्रमाण नहीं हैं ।

समाधान—इत्त्वविधानसामर्थ्य से साक्षात् सूत्रबाधकल्पना की अपेक्षा उसके सामर्थ्य से अनुबन्धों के अग्रहण की कल्पना ही उचित है । परम मूल में 'निर्देशात्' इसका इत्त्व-विधान-सामर्थ्य में तात्पर्य है । आदि-पद से 'तृषिमृषिकृशेः' इत्यादि में ककार के पूर्व इकार को यणादेशाभाव का संग्रह है ।

---

१. के यदि सर्वत्र 'यस्येति च' इति लोपः स्यात्तदा पारिशेष्यात् ऊकारमात्रे ह्रस्वस्य लाभाद् अकारेकारसंग्रहाय अण्प्रत्याहाराश्रयणं विफलमित्येवं तत्सामर्थ्येन 'यस्येति च' इति बाधकल्पनात् ।

'आदिरन्त्येन' (सू० २) इत्येतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्ते ।

४. ऊकालोऽज्झ्रस्वदीर्घप्लुतः । १ । २ । २७ । **उश्च ऊश्च ऊ३श्च वः । वां**

ननु 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न' (का० वा०) इति वार्त्तिके प्रत्याहार-शब्दस्य वर्णसमाम्नाये प्रसिद्धेः प्रत्याहारेष्वितामित्यनुपपन्नम् ? अत आह—आदिरन्त्ये-नेतीति । **वार्त्तिके तादर्थ्यात्ताच्छब्द्यमिति भावः ॥**

ऊ३कालोऽच् । (१ । २ । २७) **कुक्कुटरुते** उकारे **एकद्वित्रिमात्रत्वप्रसिद्धेर-**

शाब्दिकोऽर्थः । अत एव मूले तात्पर्यमित्युक्तम् । 'प्रत्याहारेऽनुबन्धानाम्' इत्यादि-वार्त्तिके प्रत्याहारशब्देन वर्णसमाम्नायस्य चतुर्दशसूत्रीरूपस्य ग्रहणं प्रसिद्धम् । तथा च वर्णसमाम्नाये इत्संज्ञकानां ग्रहणस्य सत्त्वेन तदभावस्य वक्तुमशक्यत्वादतः प्रत्याहा-रेष्विति वार्त्तिके प्रत्याहारशब्देन न तादृशस्य ग्रहणम्, किन्तु अन्यादृशमित्याह—**आदिरन्त्येनेति** । आदिरन्त्येनेति सूत्रेण यस्य कृता संज्ञा तस्य प्रत्याहारपदेन भाष्यवार्ति-कादौ व्यवहारः । प्रत्याहारपदस्येदृशार्थकत्वे वर्णसमाम्नाये प्रत्याहारव्यवहारः कथम् ? इत्यत आह—**तादर्थ्यादिति** । यो हि यदर्थः सोऽपि तच्छब्देन व्यवह्रियते । यथा जला-पेक्षणे वृष्टौ सत्यां प्रसह्य कश्चिद् ब्रूते—अन्नं वर्षति देवः । वृष्ट्या अन्नस्याधिक्यमिति अन्नार्थत्वाद् वृष्टेः तत्रारोप्य अन्नपदस्य प्रयोगः, तथैवात्रापि प्रत्याहारार्थो वर्णसमाम्नाय इति प्रत्याहारशब्दप्रयोगस्तस्मिन् वार्त्तिके ॥

ऊ३कालोऽच् इति । 'अ इ उ ण्' इत्यत्र, लोके च अकारस्य प्राथम्येन व्यवहारात् 'आकालोऽच्' इत्येवं सूत्रे पठितव्ये ऊकालेति विपरीतक्रमेण निर्देशः कथम् ? इति शङ्कां निराकरोति—**कुक्कुटेति** । कुक्कुटानां रुते = शब्दे एका द्वे तिस्रो मात्राः क्रमेणानुभूयन्ते । प्रसिद्धमनुभूतस्थूलमाश्रित्य वर्णसमाम्नायक्रममुपेक्ष्य 'ऊकाल' इत्युक्तम् । एका च द्वे च तिस्रश्चेति विग्रहे द्वन्द्वसमासे कृते एकद्वित्रिशब्दस्य मात्राशब्देन सह बहुव्रीहौ, एक-द्वित्रिमात्रपदस्य सिद्धिः ।

यद्यपि 'प्रत्याहारे' इत्यादि वार्त्तिक में प्रत्याहार शब्द वर्णसमाम्नाय का बोधक है । अतः 'प्रत्याहारेषु इतां न ग्रहणम्' इसमें अण् अच् आदि का बोधक प्रत्याहार शब्द नहीं हो सकता । 'प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णाः यत्र'—इसके अनुसार 'आदिरन्त्येन' इस सूत्र से बोधित अणादि में प्रत्याहार का व्यवहार यहाँ इष्ट है । प्रत्याहार के लिए वर्णसमाम्नाय है । अतः उसमें भी प्रत्याहार का प्रयोग हो सकता है—इस तात्पर्य से वार्त्तिक में उक्तार्थक प्रत्याहार माना गया है ॥

ऊ३कालोऽच् इति । अकार का प्रथमोपदेश होने से 'आकालोऽच्' इस प्रकार सूत्र करना था । किन्तु मुर्गा के शब्द में उकार के द्वारा एक दो तथा तीन मात्रायें लोक में प्रसिद्ध हैं । अतः सूत्र में प्रसिद्ध शब्द का ही आश्रयण किया गया । ऊ इसमें पहले एकमात्रिक उकार, उसके अनन्तर द्विमात्रिक, उसके अनन्तर तीन मात्रा वाले ऊकार का उच्चारण है । इस प्रकार के

कारादयो नोक्ताः। ऊ इति एकद्वित्रिमात्राणां क्रमेण प्रश्लेषनिर्देशः; व्याख्यानात्। तेन स्वोच्चारणकालसदृशो लक्ष्यते। स कालो यस्येति बहुव्रीहिः। तत्फलितमाह—उश्च ऊश्च ऊ३श्चेति।

न च 'एकादितो नवान्तसंख्यावाचकशब्दानां द्वन्द्वो न भवत्यनभिधानात्' इति 'सरूपाणाम्' इति सूत्रे शेखरे वक्ष्यमाणतया कथमत्र द्वन्द्वस्य साधुत्वम्? इति नाशङ्कनीयम्; संख्यायाः सङ्कलनतात्पर्येण द्वन्द्वस्यासाधुत्वमित्यर्थस्य विवक्षितत्वेनादोषात्। अत एव नवतात्पर्येण द्विसप्तेति प्रयोगस्य न साधुत्वम्। प्रकृते च एकद्वित्रिशब्दानां सङ्कलितसंख्यातात्पर्येण प्रयोगाभावान्न तादृशप्रयोगस्यानुपपत्तिः।

केचित्तु एका, द्वे, तिस्रो **मात्रा** यस्येति विग्रहे मध्ये द्वन्द्वं विनैव बहुव्रीहिमिच्छन्ति। तथा चैतन्मतेऽपि न दोषः। अभेदेन परस्परमन्वयिनां समानाधिकरणो बहुव्रीहिः। प्रकृते समासघटकानामेकादीनां परस्परं नान्वयः; किन्तु मात्रापदार्थेन सह सम्बन्ध इति द्वन्द्वं विना बहुव्रीहिरयुक्त इति प्रतिभाति। एकद्वित्रिमात्रशब्दे 'अल्पीयस्याः संख्यायाः', 'द्वन्द्वेऽपि' इति वार्त्तिकानुसारेण अल्पीयस्याः संख्यायाः पूर्वनिपातो बोध्यः।

ऊकालेत्यत्र पूर्वम् एकमात्रस्य, ततो द्विमात्रस्य, पश्चात् त्रिमात्रस्येति क्रमेण प्रश्लेषेण निर्देशः, न व्युत्क्रमेण (भिन्नक्रमेण)। अत्र प्रमाणमाह—**व्याख्यानादिति**। आरम्भे ऊ३कारस्य प्लुतस्य प्रश्लेषे तस्यैव क्रमप्राप्तह्रस्वसंज्ञायाः विधानात् 'विभाषा पृष्टप्रतिवचने हेः' इत्यनेन हेः प्लुतविधानेऽपि ऊ ३ इत्यस्य ह्रस्वसंज्ञाविधानेन ह्रस्वेकारस्यैव निष्पन्नत्वात् तादृशस्य चेकारस्य पूर्वत एव सत्त्वात् तस्य विधानं व्यर्थं स्यात्। एवं ह्रस्वोकारात् प्राग् दीर्घस्य ऊकारस्य पाठे 'अतो दीर्घो यञि' इति सूत्रस्य वैयर्थ्यं स्यात्। अस्मिन् प्रश्लेषक्रमे ह्रस्वस्य उकारस्य दीर्घसंज्ञायां दीर्घपदेन ह्रस्वस्यैव विधानेन तादृशस्याकारस्य 'भवामि' इत्यादौ दीर्घात् पूर्वमपि सिद्धत्वात् तद्विधानस्य निष्फलत्वापत्तेः। अतो दीर्घस्य ऊकारस्य न पूर्वं प्रश्लेष इत्यादि व्याख्यानं बोध्यम्।

वस्तुतोऽत्र सूत्रे उकारत्रयस्य प्रश्लेषेण निर्देशे प्रमाणं व्याख्यानमुक्तं शेखरकृता। व्याख्यानञ्च ह्रस्वदीर्घप्लुतसंज्ञात्रयविधानरूपम्। प्रश्लेषाभावे एकस्योकारस्य संज्ञात्रयविधानमयुक्तं स्यात्; अनेकसंज्ञाकरणस्य भाष्ये निराकृतत्वात्। संज्ञाया ज्ञापकार्थत्वात् इति।

क्रमेण प्रश्लेषेण निर्देशे प्रमाणन्तु—उकारत्रयाणां द्वन्द्वसमासे जाते एकमात्रस्य

क्रमिक निर्देश में व्याख्यान ही शरण है। विपरीत क्रम से उच्चारण होने पर ह्रस्वादि संज्ञाओं में वैपरीत्य का प्रसंग हो जायगा। उ शब्द उकारोच्चारणकालसदृश में, दो मात्रावाला ऊ शब्द ऊकारोच्चारणकालसदृश में एवं तीन मात्रा वाले ऊ ३ का ऊ३कारोच्चारण कालसदृश में लक्षण होने से उकारोच्चारणकाल के सदृश काल जिसका है उसकी ह्रस्वसंज्ञा होती है।

इसी प्रकार दीर्घ और प्लुत संज्ञा के लिए भी अर्थकल्पना कर लेनी चाहिए। लक्षणा मानने से 'वः[1] कालो यस्य' इस प्रकार समानाधिकरण बहुव्रीहि होता है। वाँ काल इव इत्यादि मूलोक्त फलितार्थ कथन है।

---

१. **एक मात्रा दो मात्रा तथा तीन मात्रा वाले उकार को दीर्घ होने के बाद जस् विभक्ति में यण् होने पर 'वः' और इसी प्रकार षष्ठी आम् विभक्ति में 'वाम्' यह रूप है।**

काल इव कालो यस्य सोऽच्क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः यात् । स प्रत्येक-मुदात्तादिभेदेन त्रिधा ।

ननु उकालो ह्रस्व इतिवाक्येऽण्त्वात् सवर्णग्रहणे द्वित्रिमात्रयोरपि ह्रस्वसंज्ञायां 'प्रदाय, प्रलूय' इत्यादौ 'ह्रस्वस्य' (६ । १ । ७१) इति तुक् स्यादिति चेत् ? न; ऊ

प्रथमं प्रयोगे तस्य घिसंज्ञकत्वात् 'द्वन्द्वे घि' इति पूर्वनिपातः उपपद्यते । ततः परं प्लुतस्य निर्देशे 'प्लुतः प्रगृह्या' इति प्रकृतिभावो दीर्घे परस्मिन् अचि सति प्रसज्येत । अतो ह्रस्वोकारात् परं दीर्घ एव ऊकारो निर्देष्टव्यः । ततः परं प्लुतः प्रश्लिष्यते—इति क्रमेण प्रश्लेषः सिध्यति । तेन = ऊपदेन । लक्ष्यते = लक्षणया बोध्यते । स कालो यस्येत्यत्र जातावेकवचनम् ।

उश्च ऊश्चेति । न च उकारोच्चारणकालसदृशः कालः उकारोच्चारणकालस्य नास्ति, स्वस्यैव स्वेन सादृश्यस्य वक्तुमशक्यत्वादिति वाच्यम्; 'सादृश्यं न भेदघटितम्' इत्याश्रयणेन अभेदेऽपि सादृश्यव्यवहार उपपद्यते । अत एव 'रामरावणयोर्युद्धं रामरावणायोरिव' इत्यपि उपपन्नम् ।

दीर्घप्लुतयोरपि ह्रस्वसंज्ञा प्राप्नोति इत्याशङ्कते—**ननु इति ।** उकाल इति वाक्ये= प्रथमवाक्ये । द्वितीयवाक्यादौ तु दीर्घोकारादीनां वर्णसमाम्नाये पाठाभावेनानण्वात् 'अणुदित्' सूत्राप्रवृत्त्या सवर्णग्रहणाप्रसक्तेः । उकारोच्चारणकालेति प्रथमवाक्यनिर्दिष्टस्य उकारस्य सवर्णग्राहकत्वाद् दीर्घप्लुतयोरपि उशब्देन ग्रहणात् तयोरपि ह्रस्वसंज्ञायां प्रदाय, प्रलूयेत्यादावपि ह्रस्वत्वनिबन्धनः 'ह्रस्वस्य पिति कृति तुक्' इत्यनेन तुक् स्यात् ! न च दीर्घसंज्ञया ह्रस्वसंज्ञायाः बाधः स्यादिति वाच्यम्; आकडारीयत्वाभावेन संज्ञयोः समावेशे बाधकाभावात् । आकडारीयसंज्ञानामेव 'आकडारादेका संज्ञा' इति सूत्रेण नियमनात् । तथा च उपस्थितेषु उकारत्रयेषु शब्दसाम्यात् ह्रस्वादिसंज्ञाः प्रविशेयुरिति पूर्वोक्तस्थले तुगापत्तिः ? इति परिहरति—**ऊ अजिति ।** ऊ अजित्यत्र 'इको-

---

शङ्का—'उकारोच्चारणकालसदृश काल' इस वाक्य का घटक उकार अण्बोध्य होने से 'अणुदित्' सूत्र के द्वारा सवर्ण का बोधक होगा । इस प्रकार द्विमात्र त्रिमात्र को भी प्रथम वाक्य से दीर्घ और प्लुत संज्ञा प्राप्त होगी । द्वितीय तृतीय वाक्य घटक ऊकार एवं ऊ३कार में सवर्ण ग्रहण की प्रसक्ति द्वारा दीर्घ ऊकार को प्लुतादि संज्ञा, प्लुत को दीर्घादि संज्ञा का प्रसङ्ग नहीं है; क्योंकि 'अणुदित्' सूत्र में अण् पद से वर्णसमाम्नाय में पठित वर्णों का ही ग्रहण होता है । यह 'न स्वस्मिन्, न स्वाङ्गे' इसके द्वारा आगे स्पष्ट किया गया है । पूर्वोक्त रीति से दो मात्रा वाले अच् की भी ह्रस्वसंज्ञा होने पर 'प्रदाय, प्रलूय' में भी 'ह्रस्वस्य पिति कृति तुक्' इससे तुगागम होना चाहिये; क्योंकि आकार ह्रस्व भी है ?

समाधान—'ऊ' शब्द में अच्त्व नियत होने से अच् विशेषण का उपादान सूत्र में लक्षणा होगी । सादृश्यान्तर के न होने से कालकृत सादृश्य लिया जायगा । उकारसदृश व्यञ्जन-द्वय भी हो सकता है, अतः अच् की आवश्यकता होने पर भी कालग्रहण व्यर्थ है । सादृश्यकाल से ग्रहण किया जाने से गतार्थ है । यही सूत्र में अधिक काल पद का उपादान यह सूचित करता

अजित्येवाऽज्ग्रहणसामर्थ्याद् ऊसदृशोऽजित्यर्थे सादृश्यस्य व्याख्यानात् कालकृतस्यैव ग्रहणमिति सिद्धे अधिककालग्रहणमुच्चारितसम्बन्धिकालसदृशकालस्यैव संज्ञा, न तु तेन गृहीतसम्बन्धिकालसदृशकालस्यापीत्यर्थेनादोषात् । तदुक्तं भाष्ये—'यावत्तपरकरणं तावदत्र कालग्रहणम्' इति ।

सवर्णे' इत्यनेन ह्रस्वसमुच्चितः प्रकृतिभावः स्पष्टार्थप्रतिपादनाय न कृतः । ह्रस्वोकार-पाठे समाहारद्वन्द्वः, भिन्ने च पदे उअजिति । उकारादीनां सर्वत्रैव अज्रूपतया सत्त्वेन अज्रूपताया व्यभिचारात् अव्यभिचारवारकस्यैव विशेषणस्य सार्थक्यात् प्रकृते ऊरूपो योऽजित्येवमन्वये अचो विशेषणतया उपादानस्य वैयर्थ्यात्, सामर्थ्याद् ऊपदस्य ऊसदृशे लक्षणा कल्प्यते । ऊसदृशस्य अच इव अज्भिन्नस्यापि सम्भवेन अज्भिन्नव्यावृत्तये अच्-विशेषणमावश्यकम् । तथा च सादृश्यस्य कालकृतस्य ग्रहणात् स्वसदृशकालोऽजित्यर्थे लब्धे, सूत्रे कालग्रहणम् व्यर्थम् । कालपदोपादानेऽपि 'अणुदित्' सूत्रेण ऊकारस्य सवर्ण-ग्राहकतया ह्रस्वदीर्घप्लुतानां त्रयाणां संग्राहकत्वम् । अकृतेऽपि तस्मिन् तेषामच्सामान्यो-पादानेन ग्रहणमिति विशेषाभावात् कालग्रहणस्य वैफल्यम् । अतः उच्चरितवर्णसम्ब-न्धिकालसदृश एव कालो गृह्यते । न तु उच्चरितवर्णेन गृहीतो यो वर्णो दीर्घादिस्तत्कालो-ऽपीति तत्सामर्थ्येन कल्प्यते । तथा च दीर्घोकारस्य ह्रस्वोकारेण गृहीततया ह्रस्व-संज्ञाया आपादनम्, नतु उकाल इति ह्रस्वघटितवाक्ये दीर्घोकारस्योच्चारणम्, येन तदापादनं युज्येत । एतत्तात्पर्यमादायैव 'यावत्तपरकरणं तावत् कालग्रहणम्' इति भाष्ये उक्तम् । यावत् फलं तपरकरणस्य तपरसूत्रप्रवृत्तिद्वारा भवति, तावत् फलं कालग्रहण-स्यापीत्यर्थः । ऊअजित्यर्थे = लब्धे इति शेषः । सिद्धे = निष्पन्ने । तेन = उच्चारितवर्णेन । **गृहीतेति** । गृहीतवर्णसम्बन्धीत्यर्थः ।

न च 'ऊकालः' इति सूत्रे 'उकालो ह्रस्वः' इति प्रथमवाक्ये ककारादिचिह्नभावेन 'अयमुकारो वर्णसमाम्नायस्थः' इति प्रत्यभिज्ञाया विरहात् अनण्त्वेन सवर्णग्रहणाप्रसक्त्या दीर्घोकारादिग्रहणवारणोपायचिन्तनं वृथेति वाच्यम् । व्यासज्यवृत्तिधर्मानवच्छिन्ना कालघटितधर्मानवच्छिन्ना च या अण्वृत्तिविषयता तादृशविषयताप्रयोजकं पदं स्वबो-ध्यान् सवर्णान् गृह्णातीत्यर्थः अणुदित्सूत्रस्य स्वीक्रियते । अनेकवृत्तिधर्मः व्यासज्यवृत्ति-रुच्यते । तथाच अत्वम् इत्यादि एकवृत्तिधर्मः । एवञ्च व्यासज्यवृत्तिधर्मानवच्छिन्ना तथा कालघटितधर्मेणानवच्छिन्ना अत्वेत्वादिधर्मावच्छिन्ना विषयता तत्प्रयोजकं पदम् अच् पदं तद् 'इको यणचि' इत्यादौ स्वबोध्यान् सवर्णान् ग्रहीष्यति । 'अतो भिस ऐस्' इत्यत्र अत्पदस्य समकालाकारबोधकत्वेन कालघटितधर्मावच्छिन्नविषयतायाः सत्त्वान्न तत्र सवर्णग्रहणम् । प्रकृते च उकालो ह्रस्व इतिघटकोकारस्य तथात्वात् सवर्णग्रहणे प्रसक्ते कालग्रहणेन व्यावृत्तेरौचित्यात् ।

है कि वाक्य में उच्चरित वर्णसम्बन्धी जो काल उसके सदृश ही काल का ग्रहण है । उच्चरित उकार से गृहीत उकारसम्बन्धी काल के सदृश काल का ग्रहण नहीं है । 'जो तपरकरण से व्यावृत्ति होती है वही यहाँ कालग्रहण करने से होती है'—इस प्रकार की भाष्योक्ति भी इसमें प्रमाण है ।

न चाजिति वर्णग्रहणे जातिग्रहणस्य दुर्वारत्वात् 'तितउच्छत्रम्' इत्यत्र 'दीर्घात्' (६।१।७५) 'पदान्ताद्वा' (६।१।७६) इति तुगापत्तिरिति वाच्यम्। ज्ञापकसिद्धत्वेन तस्यासार्वत्रिकत्वात्, अन्तरङ्गत्वेन ह्रस्वत्वनिमित्तनित्यतुक एव प्राप्तेश्च। अज्ग्रहणं 'प्रतक्ष्य' इत्यादौ 'ह्रस्वस्य' (६।१।७१) इति तुग्व्यावृत्त्यर्थम्।

ननु 'यादृशवर्णत्वव्याप्यजात्यवच्छिन्नस्य ग्रहणं यत्र विवक्ष्यते तत्र तादृशजात्यवच्छिन्नारब्धसमुदायेन जातिरतिदिश्यते' इत्यर्थिका परिभाषा स्वीकृता। तथाच तितउच्छत्रमित्येतद्घटके अकारे उकारे च प्रत्येकम् एकैकमात्रायाः सत्त्वेन अ उ इति समुदाये अनायासेन द्वैमात्रिकत्वस्य सद्भावात् उक्तपरिभाषया च वर्णत्वव्याप्यजातिरच्त्वं तदवच्छिन्नारब्धसमुदाये अ उ इति वर्णद्वयात्मके अच्त्वजातेरतिदेशेन अच्त्वात् च तस्य वर्णद्वयात्मकसमुदायस्य दीर्घसंज्ञायां 'दीर्घात् पदान्ताद् वा' इत्यनेन दीर्घात् पदान्तात् परस्य छत्रघटकस्य छकारस्य तुगापत्तिरिति शङ्कते—**नचाजिति**। 'ज्ञापकसिद्धं न सर्वत्र' इति परिभाषया 'वर्णग्रहणे जातिग्रहणम्' इत्यस्या असार्वत्रिकत्वबोधनात् अप्रवृत्त्या अ उ इति वर्णद्वयात्मकसमुदाये अच्त्वाभावाद् दीर्घसंज्ञाया अप्रवृत्तेः।

अथवा 'वर्णग्रहणे जातिग्रहणम्' इत्यस्याः फलाभावेन अनङ्गीकारान्न दोषः। दम्भधातोः सनि द्वित्वे 'दम्भ इच्च' इति इत्वे 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपे 'हलन्ताच्च' इति सनः कित्वे 'अनिदिताम्' इति नलोपे भष्भावे चर्त्वे च धीप्सतीति सिध्यति। अत्र इक्समीपात् हलः परस्य विधीयमानं कित्वं न प्राप्नोति। इकारात् परं, सनः पूर्वं च मकारभकाररूपं हल्द्वयं तच्च न हल्रूपम्; हल्त्वस्य प्रत्येकस्मिन् पर्याप्तत्वात्। तथासति नलोपो न स्यात्। 'वर्णग्रहणे' इति परिभाषासत्त्वे तु हल्त्वावच्छिन्नारब्धसमुदाये मकारात्मके हल्समुदाये हल्त्वजातेरतिदेशेन एकस्मादेव हलः परत्वात् सनः कित्वेन नलोपस्य सिद्धिः परिभाषाफलम्। परमेतत्फलमन्यथाऽपि सिद्धम्। तथाहि[1]—'इको झल्' हलन्ताच्च' इति सूत्रद्वयस्य स्थाने 'इग्वतो झल्' इति न्यासेन इकारवतो दिम्भेत्यस्मात् परस्य सनः कित्वविधानं सुलभमिति न दोषः। न चैवं रीत्या 'यियक्षते' इत्यत्रापि कित्वं स्यात्, तस्याऽपि इग्वतः सत्त्वादिति वाच्यम्, 'वचिस्वपियजादीनाम्' इति सूत्रस्य वच्यादिभ्यो विहिते कितीत्यर्थस्य स्वीकारात्, कित्वे सत्यपि वच्यादिभ्यो विहितत्वाभावात् सम्प्रसारणाप्राप्त्या क्षतिविरहात्।

परिहारान्तरमप्याह—**अन्तरङ्गेति**। तितउघटकम् अ इ इत्येतन्निमित्तमाश्रित्य

शङ्का—'तितउच्छत्रम्' इसमें अउ इसके उच्चारण का काल दो मात्रा वाले उकार के उच्चारण-काल के समान है। तथा जहाँ यादृशवर्णत्वव्याप्य जाति से विशिष्ट वर्ण का ग्रहण होता है वहाँ उसी प्रकार के वर्णत्वव्याप्यजाति से विशिष्ट वर्णों के द्वारा आरब्ध समुदाय में उस जाति का अतिदेश होता है ऐसा 'वर्णग्रहणे जातिग्रहणम्' इसका अर्थ किया गया है। इसके अनुसार 'अउ' इस समुदाय में अत्व जाति का अतिदेश होने से अच्त्व जातिमान् भी है। अतः द्वितीय वाक्य से दीर्घ संज्ञा होने से 'पदान्ताद्वा' इससे तुक् का आगम विकल्प से होना चाहिये?

समाधान—'निपात एकाजनाङ्' इस सूत्र में 'एक' ग्रहण के बिना भी अच् समुदाय के

---

१. अत्रत्या अभिनवचन्द्रिका असंलग्नतया अशुद्धा।

५. उच्चैरुदात्तः । १ । २ । २९ । **ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे**

उच्चैरुदात्तः (१ । २ । २९) । **नात्र श्रुतिकृतमुच्चैस्त्वम्, उपांशुप्रयोगेऽव्याप्तेः,**

प्रवर्तमानस्य 'पदान्ताद् वा' इति सूत्रस्यापेक्षया अ उ इत्येतदन्तर्गतस्य उकारमात्रस्य 'छे च' इत्यत्र निमित्ततया तदन्तर्भूतनिमित्तकत्वरूपान्तरङ्गत्वस्य 'छे च' इत्यत्र सत्त्वेन एतद्दृष्ट्या 'पदान्ताद् वा' इत्यस्य बहिरङ्गत्वेन सिद्धत्वात् नित्यतुक एव प्रवृत्त्या तस्य च नित्यतुक इष्टत्वेन दोषाभावादिति । न च प्राप्तविभाषास्थले विभाषाशास्त्रस्य निषेधमुखेन प्रवृत्तेः स्वीकारात् प्रकृते नित्यतुकं प्रतिषिध्य पश्चात् 'पदान्ताद् वा' इत्यनेन विकल्पतुको विधानप्रसङ्गात् न नित्यस्य तुकः प्रवृत्तिरिति वाच्यम्; 'अनन्तरस्य विधिर्भवति प्रतिषेधो वा' इति न्यायेन 'दीर्घात्' इति विभक्तसूत्रेण विहितस्यैव तुकः प्रतिषेधेन 'छे च' इति विहितस्य तुको निषेद्धुमशक्यत्वात् ।

यदपि कश्चित् 'कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते' इति परिभाषया कार्यानुभवकर्तृत्वविशिष्टस्य कार्यिणः (स्थानिनः) निमित्तत्वेन अनाश्रयणात् अउ इति समुदायस्य विकल्पतुकः कार्यितया निमित्तत्वेन अनाश्रयणात् अन्तरङ्गबहिरङ्गत्वचिन्तने अन्तर्भूतनिमित्तकत्वरूपान्तरङ्गत्वादेर्निरूपयितुमशक्यतया नित्यतुकोऽन्तरङ्गतया आपादनं नोचितमिति ? तन्न । तत्र आदेशापहृतस्यैव स्थानिनो निमित्तत्वेन ग्रहणं न इत्यर्थस्य स्वीकारेण प्रकृते तुका स्थानिनोऽनपहारात् न परिभाषायाः प्रवृत्तिः ।

सूत्रेऽज्ग्रहणस्य प्रयोजनमाह—**प्रतक्ष्य इति** । अत्र तुको व्यावृत्तिस्तत्फलम् । अन्यथा 'क्ष्' इति संयुक्ताक्षरस्य मात्राकालिकत्वेन ह्रस्वसंज्ञायां तुकः प्रसङ्गात् । कृते तु अचि 'क्ष्' इति नाच्, अतो न ह्रस्वसंज्ञेति न दोषः ॥

उच्चैरुदात्त इति । अत्र = सूत्रे, श्रुतिकृतम् = श्रवणप्रयुक्तम्, उच्चैस्त्वं न गृह्यते, उपांशु प्रयोगे = सूक्ष्मोच्चारितप्रयोगे, अव्याप्तेः = उदात्तलक्षणभूतसंज्ञायाः लक्ष्ये अगमनरूपदोषात् । यस्य कर्णौ झटिति शब्दग्रहणे न निपुणौ तस्य पुरुषस्याग्रे उच्चैरपि क्रिय-

---

अच् न होने से उसकी प्रगृह्यसंज्ञा की व्यावृत्ति सिद्ध ही है । उसके व्यावृत्त्यर्थ एक-ग्रहण व्यर्थ होकर 'वर्णग्रहण'—इसका ज्ञापन करता है । ज्ञापक के द्वारा जो नियम बनता है वह सार्वत्रिक नहीं होता । अतः वर्णग्रहण परिभाषा की प्रकृत मे प्रवृत्ति न होने से अच्-समुदाय में अच्त्व नहीं है । इसीलिये 'तितउच्छत्रम्' एतद्घटक अउ के समुदाय को दीर्घसंज्ञा नहीं हुई । दीर्घसंज्ञानिमित्तक तुक् की अपेक्षा एकवर्णापेक्ष ह्रस्व तदपेक्ष 'छे च' इससे विहित तुक् अन्तरङ्ग है । अतः नित्य तुक् अन्तरङ्ग होने से पहले ही प्राप्त है ।

सूत्र में अच् ग्रहण का प्रयोजन 'प्रतक्ष्य' है । क्ष् के संयोग से क्ष का निर्माण हुआ है । व्यञ्जनद्वय के उच्चारण का काल एक मात्रा वाले उकार के उच्चारण काले के सदृश होने से व्यञ्जनद्वयात्मक क्ष को भी ह्रस्व संज्ञा हो जायगी । इस प्रकार 'ह्रस्वस्यापिति' इससे तुक् की आपत्ति होने से अच् ग्रहण किया । क्ष् अच् नहीं है ।

उच्चैरुदात्त इति । इस सूत्र में उच्चैस्त्व सुनने में विवक्षित नहीं है । ऐसा मानने पर उपांशु = सूक्ष्मोच्चारित प्रयोगों में उदात्त आदि की व्यवस्था नहीं हो सकेगी; क्योंकि वहाँ

श्रुतिप्रकर्षस्याव्यवस्थितत्वाच्च; किन्तु स्थानकृतम्। उच्चैरित्यधिकरणशक्तिप्रधानम्। अधिकरणत्वञ्चोच्चारणं प्रति, तच्च ताल्वादीनां सभागत्वे एवेत्याशयेनाह—ताल्वादीति। **इदं प्राचामनुरोधेन।**

वर्णसमाम्नायेऽकारस्य प्राथम्यात् कण्ठादीति वक्तुमुचितम्। एवमन्यत्रापि बोद्धव्यम्।

माण: शब्दो मन्दतया श्रूयते, यश्च रोगातः पुरुषः तस्य समीपे नीचैरपि उच्चार्यमाणः शब्दः उच्चैस्त्वेन प्रतीयते–इत्येवं श्रुतिप्रकर्षस्य=श्रवणप्रयुक्तोच्चैस्त्वस्य श्रोत्रभेदेन अव्यवस्थितत्वात् = अनियतत्वात्। अतस्तादृशमुच्चैस्त्वं विहाय स्थानकृतं तदिह विवक्षितम्।

अधिकरणशक्तिप्रधानमित्यस्य ऊर्ध्वाधिकरणत्वमित्यर्थः। उच्चारणक्रियां प्रति अधिकरणत्वं ग्राह्यम्। तथा च कण्ठताल्वादिस्थानाधिकरणत्कोर्ध्वभागावच्छिन्नोच्चारणकर्मीभूतोऽच् उदात्तसंज्ञां लभते। उच्चारणक्रियायाम् ऊर्ध्वभागावच्छिन्नता च कण्ठताल्वादिस्थानानां सभागत्वे एव सम्भवति। एतन्मूलकमेव 'ताल्वादिषु सभागेषु' इत्युक्तं परमलघुमञ्जूषाकृता। तदाह—**तच्चेति**। ऊर्ध्वप्रदेशेन उच्चारणं चेत्यर्थः। ऊर्ध्वभागप्रतिहतेन वायुना व्यञ्जितः अच् उदात्तः। अधोभागप्रतिहतेन वायुना व्यञ्जितोऽच् अनुदात्तः। ऊर्ध्वभागे आहत्य अधोभागे आहतेन वायुना अभिव्यञ्जितोऽच् स्वरितो बोध्यः।

वर्णसमाम्नाये प्रथमम् अकारस्य पाठात् तदनुरोधेन तत्स्थानस्य कण्ठस्य पूर्वमुपादानसंज्ञस्यौचित्येन कण्ठादिषु सभागेषु—इत्यनुक्त्वा 'ताल्वादिषु' इत्युक्तिरसङ्गता? अत आह–**प्राचामिति**। 'अनुक्षरन्ति ककुदं सूर्म्यं सुषिरामिव' इति पस्पशाह्निकभाष्योक्तायाम् ऋचि 'सप्तसिन्धुरूपा विभक्तयः काकुदं तालुस्थानमनुक्षरन्ति'—इति प्रतिपादनेन तालुस्थानस्य कण्ठादिस्थानापेक्षया प्राधान्यस्यावगमात्। अन्यथा तत्र कण्ठादिस्थानमुपेक्ष्य तालुस्थानस्योक्तिः निर्बीजा स्यात्। तदेवं तालुस्थानस्य प्राधान्यं मन्यमानानां प्राचां प्रक्रियाकृतां मतेन इदम्। एवमेव 'तुल्यास्य' सूत्रेऽपि कण्ठादिस्थानमिति वक्तव्ये 'ताल्वादिस्थानम्' इत्युक्तिरपि प्राचामनुरोधेन।

लोके उदात्तानुदात्तस्वरितत्वधर्मा आच एव प्रसिद्धाः तत्रैव गृहीता न हलि, एव हलः स्वरो यत्र प्राप्नुयात् तत्र व्यञ्जनस्याविद्यमानवद्भावः—इत्येतदर्थिकया 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति परिभाषया हलोऽविद्यमानवद्भावेन उदात्तत्वादीनां हल्वृत्तित्वाभावः सिद्ध एव। हल्वर्णानां स्थानित्वे एव स्वरविधायकैः सूत्रैः हलां स्थाने आन्तर-

---

तो मन्द स्वर से उच्चारण है। इसी प्रकार थोड़ा भी शब्दोच्चारण रोगी को सुनने में महान् प्रतीत होता है। अतः स्थानों का ऊर्ध्व भाग विवक्षित है। 'उच्चैः' यह अधिकरणशक्तिप्रधान अव्यय है। उच्चारण क्रिया के प्रति अधिकरणत्व इष्ट है। ताल्वादि स्थान के मध्य भाग, ऊर्ध्व भागादि की कल्पना तभी सम्भव है जब वे स्थान सभाग हों। अतः लिखा गया—**सभागेषु** इति।

वर्णसमाम्नाय में अकार का पाठ पहले होने से तदनुसार 'कण्ठादि' लिखना चाहिये। ताल्वादि का लेख प्राचीनों के अनुसार है। इसी प्रकार 'तुल्यास्य' आदि स्थल में भी ताल्वादि स्थान आदि का उल्लेख प्राचीनानुरोध से ही है।

निष्पन्नोऽजुदात्तसंज्ञः स्यात् । आ ये ॥

६. नीचैरनुदात्तः । १ । २ । ३० । स्पष्टम् । अर्वाङ् ॥

७. समाहारः स्वरितः । १ । २ । ३१ । उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् ॥

प्रयत्नप्रेरितो वायुर्यदोर्ध्वभागे प्रतिहतोऽचं व्यञ्जयति तदा स उदात्त इति भावः।

अजिति । 'ऊकाल' (१ । २ । २७) इत्यतस्तदनुवर्त्तते । उदात्तत्वादीनामज्धर्मताया एव लोकप्रसिद्धत्वेन हल्स्वरप्राप्तौ व्यञ्जनस्याविद्यमानत्वाच्चेदं स्वरूपकथनपरं बोध्यम् ।

आ ये इति । यच्छब्दः 'फिषोऽन्त' (फि० सू० १) इत्यन्तोदात्तः, जस् सुप्त्वादनुदात्तः, एकादेश उदात्तेन' (८ । २ । ५) इत्येकार उदात्तः ।

अर्वाङिति । अभिमुखवाच्यव्युत्पन्नं 'फिषोऽन्त' (फि० सू० १) इत्यन्तोदात्तम् । आद्यस्य शेषनिघातेनानुदात्तत्वम् । अर्वन्तमञ्चतीत्यर्थे कृदुत्तरपदप्रकृतिस्वरेण वाऽन्तोदात्तत्वम् ।

तम्याद् हलो विधीयेरन् । स एव तु न सम्भवति; हलः स्थानिनोऽविद्यमानत्वात् । अतोऽत्र सूत्रे अच्पदानुवृत्तेर्न प्रयोजनम् । अत आह—स्वरूपेति । इदमनुवर्तमानम् अच्पदं सिद्धमेवार्थमनुवदतीति भावः ।

आ ये इति । आ इति निपातत्वात् 'निपाता आद्युदात्ताः' इत्यनेनाद्युदात्तः । 'ये' इत्यत्र एकारः 'एकादेश उदात्तेनोदात्तः' इत्यनेन उदात्तः । शेषनिघातेन = 'अनुदात्तं पदमेकवर्जम्' इति सूत्रेण । कृदुत्तरप्रकृतिस्वरेण = 'गतिकारकोपपदात् कृत्' इति विहितेन । एकस्मिन् धर्मिणि परस्परविरुद्धयोः उदात्तत्वानुदात्तत्वधर्मयोरवस्थानासम्भवेन उदात्तानुदात्तरूप एको धर्मी दुर्लभः । तथा च उदात्तानुदात्तरूपधर्मिणोः समाहारमेलनमपि न सम्भवति । इत्यत आह—वर्णधर्मौ इति । पूर्वत्र उदात्तानुदात्तपदयोः धर्मिपरत्वेऽपि इहानुवृत्तयोस्तयोः लक्षणया धर्मपरत्वादिति भावः । समाहारशब्दे अधिकरणे घञ् । एवञ्च उदात्तत्वानुदात्तत्वे यत्र समाह्रियेते स स्वरितसंज्ञो बोध्यः । इतरेतरयोगद्वन्द्वेऽपि समस्यमानपदार्थयोः प्रकारत्वे तद्वृत्तिधर्मयोरपि प्रकारत्वेन तयोः समूहे त्वप्रत्ययेन उदात्तानुदात्तत्वे इति परममूले उक्तम् ।

ननु उदात्तानुदात्तपदयोरुदात्तत्वानुदात्तत्वयोर्लक्षणायां ततो द्वन्द्वे ततः त्वप्रत्यये उदात्तत्वमनुदात्तत्वञ्च प्रतीयेयाताम् । एवञ्च उदात्तत्वानुदात्तत्ववृत्तिः कश्चिदन्यो धर्मः उदात्तानुदात्तत्वपदेन बोधितो भवेत् ? इति नाशङ्कनीयम्; इतरेतरयोगद्वन्द्वेऽपि

प्रयत्न से प्रेरित वायु जब ऊर्ध्व भाग में टकरा कर अच् को अभिव्यक्त करता है तब उसको 'उदात्त' कहा जाता है । 'ऊकालोऽच्' इससे अच् पद की यहाँ अनुवृत्ति है । वस्तुतः उदात्तत्वादि धर्म की अज्वृत्तिता ही लोक में प्रसिद्ध है । एवं स्वर के कर्तव्य में व्यञ्जन के

८. तस्यादित उदात्तमर्धह्रस्वम् । १ । २ । ३२ । **ह्रस्वग्रहणम-**

एकस्मिन्नच्युदात्तानुदात्तयोर्धर्मिणोर्मेलनविरोधादाह—वर्णधर्माविति । **बाहुल-कादधिकरणे घञ् । अर्शआद्यजित्यन्ये ।**

इयं त्रिसूत्री स्पष्टार्था; लोकवेदयोरुदात्तादिव्यवहारस्य प्रसिद्धत्वात् ।

ह्रस्वग्रहणमिति । **ह्रस्वपदघटितग्रहणमित्यर्थः** । अतन्त्रमिति । **स्वशास्त्रसङ्केतित-रूपेण बोधकमित्यर्थः । किन्त्वर्धमात्रारूपार्थबोधकमिति भावः । एवञ्च दीर्घादिष्वप्यर्ध-मात्रैवोदात्ता ।**

उदात्तत्वानुदात्तत्वधर्मयोः समूहस्य विवक्षितत्वेन तदुत्तरं त्वप्रत्ययेन समूहिनो विशेषणस्य पूर्वोक्तधर्मद्वयस्यैव बोधनं भवतीत्याशयात् । 'द्वन्द्वान्ते द्वन्द्वादौ वा श्रूयमाणं प्रत्येकमभि-सम्बध्यते' इति न्यायेन द्वन्द्वोत्तरं कृतरूपत्वप्रत्ययस्य प्रत्येकं सम्बन्धादिति परममूलोक्तं युक्तमेव ।

न च समाहारशब्दे अधिकरणव्युत्पत्तौ 'करणाधिकरणयोश्च' इति विहितेन ल्युटा घञो बाधः स्यादिति घञ् दुर्लभः ? इत्यत आह—**बाहुलकात् इति** । अन्ये तु भाव-घञन्तसमाहारशब्दाद् 'अर्श आदिभ्योऽच्' इत्यनेन अचि साधुरिति ।

उदात्तानुदात्तस्वरितानां लोके वेदे च प्रसिद्धत्वात् तत एव व्याकरणेऽपि व्यव-हारस्य सिद्धया त्रिसूत्री = 'उच्चैरुदात्तः', 'नीचैरनुदात्तः', 'समाहारः स्वरितः' इति सूत्रत्रयं स्पष्टार्थेति । स्पष्टमर्थं बोधयितुमारब्धम् ।

'तस्यादित उदात्तमर्धह्रस्वम्' इति सूत्रे अर्धह्रस्वपदे अर्धश्चासौ ह्रस्वश्चेति कर्म-धारये दीर्घस्वरितस्थले एव अर्धभागरूपह्रस्वस्य उदात्तत्वं स्यात्—ह्रस्वस्य अर्धमिति, 'अर्धं नपुंसकम्' इत्यनेन एकदेशिसमासे विवक्षिते तु ह्रस्वस्वरितस्थले एव तस्यार्धभाग उदात्तो भवेदिति शङ्कां निराकर्तुं परममूले 'ह्रस्वग्रहणमतन्त्रम्' इत्याह । एतदेव व्याचष्टे—**ह्रस्वपदेति** । ह्रस्वग्रहणपदे ह्रस्वस्य ग्रहणम् = उपादानं यत्रेति व्यधिकरणबहु-व्रीहिसमासेन ह्रस्वपदघटितस्य अर्धह्रस्वपदतस्य ग्रहणम् । तद् अतन्त्रम् = पाणिनीय-व्याकरणे यो मात्राकालिकाज्रूपोऽर्थः सङ्केतितो ह्रस्वशब्दस्य, तद्घटितं अर्धह्रस्वपदं तद्वृत्तिधर्मेण रूपेण अविवक्षितम् । अबोधकमित्यर्थः । अथवा—रूप्यते बोध्यते इति रूपोऽर्थः । स्वशास्त्रसङ्केतितः = मात्राकालिकाच्, तद्रूपः = अर्थो यस्मिन् मात्रा-कालिकाजर्धरूपेऽर्थे तेन अबोधकं तस्याबोधकम् । तथा च अर्धमात्रारूपोऽर्थः अर्धह्रस्व-शब्देन विवक्षितः । एवञ्च दीर्घस्वरिते प्लुतस्वरिते च अर्धमात्रैव उदात्तः, शेषो भागः अनुदात्तः सिध्यतीति भावः ।

वेदे तु यथाप्रयोगं क्वचित् प्रातिशाख्यानुसारेण, क्वचित् एतत्सूत्रानुसारेण स्वरिते उदात्तव्यवस्था बोध्या । अर्धह्रस्वपदस्य अर्धमात्रार्थबोधकत्वादेव 'तस्यादित'

अविद्यमानवद्भाव का बोधन किया है । इससे भी अच् को ही उदात्तादि प्राप्त होने से सूत्रार्थ में अच् का सन्निवेश पूर्वोक्त रीति से लब्ध अर्थ का कथनमात्र है, किसी अपूर्व अर्थ का बोधक नहीं । किसी दोष के निराकरणार्थ इसका उपादान नहीं है । शेष सुगम है ।

ह्रस्वग्रहणम् इति । 'तस्यादित उदात्तम्' इस सूत्र में अर्द्धह्रस्व पद से ह्रस्व का आधा

तन्त्रम्। स्वरितस्यादितोऽर्धमुदात्तं बोध्यम्। उत्तरार्धं तु परिशेषादनुदात्तम्।

तस्य चोदात्तस्वरितपरत्वे श्रवणं स्पष्टम्।

अन्यत्र तूदात्तश्रुतिः प्रातिशाख्ये प्रसिद्धा।

इत आरभ्य नवसूत्र्या 'अ अ' (८।४।६८) इत्यतः प्रागुत्कर्षेणास्य त्रिपाद्यामपि प्रवृत्तिः। सर्वञ्चेदं भाष्ये स्पष्टम्।

'अर्धमुदात्तम्' इति वृत्तिस्तु सत्या, सत्यभामा इतिवद् व्याख्येया।

उत्तरार्धमित्यस्य चार्धमात्रातोऽवशिष्ट उत्तरो भाग इत्यर्थः। वेदे तु यथाप्रयोगं प्रातिशाख्यादस्माच्च व्यवस्था।

तस्य चेति। अनुदात्तस्येत्यर्थः। उदात्तेति। उदात्तस्वरितयोः परत्वे सतीत्यर्थः। तयोः परत्वञ्चोपस्थितानुदात्तापेक्षयैव। अन्यत्र—उदात्तस्वरितयोः परत्वाभावे।

प्रातिशाख्ये इति। लोके त्वनुदात्त एवेति भावः।

इति सूत्रे 'तस्य' इति पदोपादानं सफलम्, अन्यथा दीर्घस्वरितादौ सूत्रस्याप्रवृत्त्या उदात्तादित्रयाणां संग्रहाय कृतस्य तस्येति पदास्यानर्थक्यं प्रसज्येत; स्वरितपदानुवृत्त्यैव इष्टार्थलाभात्। 'अ अ' इति सूत्रात् पूर्वं 'तस्यादित उदात्तमर्धह्रस्वम्', 'एकश्रुतिदूरात् सम्बुद्धौ' 'यज्ञकर्मण्यजपन्यूङ्खसामसु', 'उच्चैस्तरां वावषट्कारः', 'विभाषाच्छन्दसि', 'न सुब्रह्मण्यायां स्वरितस्य तूदात्तः', 'देवब्रह्मणोरनुदात्तः', 'स्वरितात् संहितायामनुदात्तानाम्', 'उदात्तस्वरितपरस्य सन्नतरः'—इत्येतानि नव सूत्राणि उत्कृष्य अष्टाध्याय्यां पठितव्यानि। एतादृशपाठाभ्युपगमेन एषां नवानां त्रिपाद्यामपि प्रवृत्तिः सिध्यति। यथास्थानं पाठे तु एतेषां सपादसप्ताध्यायीस्थत्वेन त्रैपादिकस्वरितादीनामसिद्धत्वात् अप्रवृत्त्यापत्तेः। 'अ अ' इत्यतः प्राक्पाठे तु एषां परत्रिपादीस्थत्वेन केषामपि एतेषां दृष्ट्या असिद्धत्वाभावान्न दोषः।

अर्धमात्रेति वक्तव्ये अर्धमुदात्तमित्युक्तिः दीर्घस्वरितादौ अर्धभाग एव उदात्त इति बोधयतीत्यत आह—**अर्धमिति**। सत्यभामेति सम्पूर्णनाम्नि प्रयोक्तव्ये सत्या, कदाचित् भामा इति नाम्न एकदेशः प्रयुज्यते यथा, तथेहापि अर्धमात्रेति वक्तव्ये लाघवात् तदेकदेशस्य 'अर्ध' इत्यस्योपादानमिति न विरोधः। एवमेव उत्तरार्धमित्यस्यापि उत्तरोऽर्धभाग इति नार्थः, किन्तु अवशिष्टो भाग इत्यर्थो बोध्यः।

अर्थात् 'अर्द्ध मात्रा'—इस प्रकार की प्रतीति होने के कारण दीर्घ और प्लुत में भी अर्द्ध मात्रा ही उदात्त होगी। अतः ह्रस्वग्रहण अविवक्षितार्थ मानकर दीर्घ और प्लुत मे भी आधा-आधा भाग ही उदात्त परममूलकार के मत में माना गया है। शेखरकार 'स्वशास्त्रसङ्केतित रूप है अर्थात् मात्राकालिक अच्त्ववदर्थ में ह्रस्व पद की विवक्षा नहीं है। किन्तु अर्द्ध मात्रा में अर्द्ध ह्रस्व पद की लक्षणा है। अतः दीर्घादि स्थलों में भी अर्द्धमात्रा ही उदात्त है'—ऐसा मानते हैं।

इस सूत्र से आरम्भ कर नवें सूत्र तक का 'अ अ' इससे पहले पाठ कर इन सभी सूत्रों की त्रिपादी में भी प्रवृत्ति मानी गयी है। 'अर्द्ध ह्रस्व शब्द अर्ध मात्रा में रूढ़ है' ऐसा भाष्य में भी लिखा है। 'अर्धमुदात्त' ऐसा सिद्धान्तकौमुदी में सत्यभामा के स्थान पर सत्या या भामा

'क्व१ वोऽश्वाः', 'रथानां न येऽ२राः', 'शतचक्रं योऽ२ह्यः' इत्यादिष्वनुदात्तश्रुतिः। 'अग्निमीळे पुरोहितम्' इत्यादावुदात्तश्रुतिः ॥

स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा ॥

९. मुखनासिकावचनोऽनुनासिकः। १। १। ८। मुखसहितनासिक-

ह्रस्वस्वरितमुदाहरति—क्वेति। 'किमोऽत्' (५। ३। १२) इत्यत्, 'क्वाति' (७। २। १०५) इति क्वादेशे 'तित्स्वरितम्' (६। १। १८५) इति स्वरितः।

दीर्घं तमुदाहरति—रथानामिति। येऽरा इति। 'स्वरितो वाऽनुदात्ते पदादौ' (८। २। ६) इत्येकारः स्वरितः। 'नोदात्तस्वरितोदयम्' (८। ४। ६७) इति निषेधस्तु 'उदात्तादनुदात्तस्य स्वरितः' (८। ४। ६६) इत्यस्यैव; 'अनन्तरस्य' इति न्यायात्।

स्वरितपरमुदाहरति— शतचक्रमिति। अहेरित्यर्थेऽह्यः। वृत्रस्येत्यर्थः। 'छन्दसि

गुणाभाव इति। 'घेर्ङिति' इत्यनेनेति शेषः। अह्यः इति। षष्ठ्यन्तमिदम्।

मुखनासिका इति। मुखञ्च नासिका चेति द्वन्द्वे प्राण्यङ्गत्वात् 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इत्यनेन एकवद्भावे नपुंसकह्रस्वे च कृते मुखनासिकमिति निर्देशः स्यादतः आह—मुखसहितेति। मध्यमपदलोपिसमासे आश्रीयमाणे मध्यमपदत्वात् सहितस्य लोपे मुखनासिकाशब्दः सिद्धः। 'वचन' इत्यत्र बाहुलकात् कर्मणि ल्युट्। तया मुखनासिकया वचनः। अधिकरणकारकस्यापि स्थाल्यादेः करणत्वेन विवक्षायां स्थाल्या पच्यते तण्डुल इत्यादिवदत्रापि करणत्वेन विवक्षितत्वात् तृतीयान्तस्य मुखनासिकापदस्य वचनपदेन सह 'कृत्यैरधिकार्थवचने' इति सूत्रपठितेन 'साधनं कृता' इति वार्त्तिकेन समासे 'मुखनासिकावचन' इति सिध्यति। यद्यपि 'कर्तृकरणे कृता बहुलम्' इति सूत्रेणापि समासः कर्तुं शक्यते, तथापि पादहारक इत्यत्र कर्मणि ण्वुलप्रत्ययान्तेन हारकशब्देन सह पादाभ्यामिति पञ्चम्यन्तस्य एवं सप्तम्यन्तस्य च कृदन्तेन सह समासविधानाय वार्त्तिकारम्भस्य साफल्यं दर्शयितुं वार्त्तिकेन समासोऽभिहितः।

मुखसहिता नासिकेति मुखद्वितीया नासिकेत्यस्योपलक्षणम्; मध्यमपदलोपिसमासस्य नित्यत्वेन येन सह समास इष्टः; तेन समं विग्रहप्रदर्शनेन समासाभावस्य

जिस प्रकार एकदेश से पुकारा जाता है उसी प्रकार यहाँ भी अर्द्ध मात्रा के स्थान पर अर्द्धम् इस एकदेश का प्रयोग किया है। 'उत्तरार्धम्' इस पद की भी 'मात्रा से अवशिष्ट' इस प्रकार की व्याख्या करनी चाहिये। वेद में प्रयोगानुसार प्रातिशाख्य एवं 'तस्यादित' इस सूत्र—इन दोनों के द्वारा व्यवस्था होती है।

तस्येति। अनुदात्त का उदात्त और स्वरित के पर में रहने पर श्रवण होता है। उनमें परत्व उपस्थित अनुदात्त की अपेक्षा से लिया जाता है। अन्यत्र इति। आगे उदात्त और स्वरित के रहने पर उदात्त का श्रवण होता है। लोक में अनुदात्त की श्रुति होती है।

ह्रस्व स्वरित का उदाहरण है—क्वेति। अग्रिम विषय सुगम हैं अनुवाद अपेक्षित नहीं है ॥

मुखनासिका इति। कर्म में ल्युट् होने से 'वचन' का उच्यमान अर्थ है। 'मुखेन सहिता

योच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् ॥

वा वचनं प्राङ् णौ चङ्युपधायाः' इति वचनाद् गुणाभावः । 'उदात्तस्वरितयोः' (८ । २ । ३) इति स्वरितः । 'उदात्तयणो हल्पूर्वात्' (६ । १ । १७४) इति तु न; छान्दसत्वात् । यच्छब्दः 'फिषः' (फि० सू० १) इत्यन्तोदात्तः, तदेकादेशश्च वा स्वरितः ।

स इति । उदात्तादिह्रस्वादिसंज्ञक इत्यर्थः ॥

मुखनासिका० (१ । १ । ८) । उच्यतेऽसौ वचनः । बाहुलकात् कर्मणि ल्युट् । मुखसहिता नासिकेति विग्रहः । तया वचन इति 'साधनं कृता' (भा० इ०) इति समासः, तदाह—मुखसहितेत्यादि ।

प्रतीतेः दुष्टत्वात् । तथाच मुखसहिता नासिकेति समासस्य मुखद्वितीया नासिकेति विग्रह उचितः । अथवा मुखशब्दस्यैव मुखसहिते लक्षणेति मध्यमपदलोपिसमासो नावश्यकः । 'नासिकावचनः' एतावदेव सूत्रमस्तु, किं मुखग्रहणेन ? इत्याह—मुखेति । तावति सूत्रे केवलं नासिकया उच्चार्यमाणानां यमानुस्वाराणामेव अनुनासिकसंज्ञा प्राप्नोति; 'अनुस्वार-यमानाञ्च नासिका स्थानमिष्यते' इति शिक्षावचनेन तेषां नासिकास्थानस्य निश्चयात् । तथाच अभ्र आं इत्यत्र 'आङोऽनुनासिक' इत्यनेन अनुनासिकपदात् अनुस्वारस्योक्करोत्या विधानात् अनुनासिकरूपस्य श्रवणं न स्यात्, अतो मुखग्रहणम् । अनुस्वारस्य नासिका-मात्रं स्थानमिति नास्य प्रवृत्तिः ।

न च ये प्रासादे वसन्ति तेषां 'प्रासादवासिनमानय' इत्युक्ते आनयनम्, ये भूमौ वसन्ति तेषां 'भूमिवासिनमानय' इत्युक्तौ आनयनं भवति, ये च भूमौ प्रसादे च उभयत्र वसन्ति तेषां प्रासादवासिपदेन भूमिवासिपदेन च ग्रहणं दृष्टम्; तथैवात्रापि मुखनासिका-भ्यामुच्चार्यमाणो वर्णोऽपि नासिकया उच्चार्यमाणो भवितुमर्हतीति यमानुस्वाराणामेव अनुनासिकसंज्ञायाः आपादनं मूलोक्तं कथं सगच्छतामिति वाच्यम्; तादृशन्यायस्यात्र अनादरेण तदुक्तेः सामञ्जस्यात् । टिप्पण्यां न्यायमबुध्वेतिपदप्रयोगोऽनौचित्यमावहति ।

सूत्रे नासिकाग्रहणाभावे मुखेनोच्चार्यमाणानां ककारादीनामनुनासिकसंज्ञायां शक्तेत्यादौ 'अनुदात्तोपदेश' इत्यादिना ककारस्यापि अनुनासिकत्वेन लोपः स्यादतो नासिकाग्रहणम् । 'शक्त इत्यादौ' इति पाठः । 'शक्तेत्यादौ' इतिपाठे तु शक्धातोः क्तः प्रत्यये टापि, अथवा क्तप्रत्ययान्तस्य सम्बोधने तद्रूपं बोध्यम् ।

नासिका' इसमें मध्यमपदलोपी समास है । 'मुख सहित नासिका से उच्चार्यमाण वर्ण' इस प्रकार का अर्थ है । तथा 'वचनः' इसमें 'साधनं कृता' इससे भाष्यवार्तिक से समास है । सूत्र में मुख ग्रहण के न करने से 'अनुस्वार और यम इनका नासिका स्थान है' इस प्रातिशाख्य के अनुसार साक्षात् निर्दिष्ट नासिका स्थान वाले अनुस्वार और यम की ही अनुनासिक संज्ञा होगी । तथा च 'अभ्र आँ अपः' इसमें अनुनासिक पद से अनुस्वार के विधान की आपत्ति हो जायगी । सूत्र में नासिका पद के न रहने पर मुख से उच्चरित ककार की भी अनुनासिक संज्ञा होने से 'शक्ता' इस प्रयाग में 'अनुदात्तोपदेश' इसके द्वारा ककार का लोप प्राप्त हो जायगा ।

तदित्थम् । अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः । लृवर्णस्य द्वादश; तस्य दीर्घाभावात् । एचामपि द्वादश; तेषां ह्रस्वाभावात् ।

मुखेति किम् ? यमानुस्वाराणामेव प्रसज्येत । एवञ्च 'आङोऽनुनासिकः' (६ । १ । १२६) इत्यत्रानुस्वारः स्यात् । नासिकेति किम् ? 'शक्ता' इत्यादौ 'अनुदात्तोपदेश' (६ । ४ । ३७) इत्यादिना कलोपो मा भूत् ।

अष्टादशेति । **यद्यपीदं न व्यक्तिपक्षे, व्यक्तीनामानन्त्यात्; तथाप्यष्टादशधर्मवत्त्वमकारजातीयादेरित्यर्थः । ह्रस्वत्वादीनां तत्तत्समानाधिकरणोदात्तत्वानुनासिकत्वादीनाञ्च भेदमाश्रित्येदं बोद्धव्यम् । एवमग्रेऽपि ।**

व्यक्तिपक्षे व्यक्तीनामानन्त्यात् अकारादीनामष्टादशविधत्वं कथम् ? इत्याशङ्कते— **यद्यपीति** । तद्वृत्तिधर्माणां जातिरूपाणामष्टादशविधत्वमादाय तथोक्तिरिति नानौचित्यम् । जातिपक्षेऽपि व्यक्तिपक्षे इव जातिभिरेवाष्टादशविधत्वस्योपपादनीयतया पक्षद्वयेऽपि समाधानं तुल्यम् इति यद्यपीत्यादिना पक्षविशेषे व्यक्तिपक्षमाश्रित्य प्रवृत्तो ग्रन्थश्चिन्त्य इति कस्यचित् चिन्ता मुधैव । जातिपक्षे जातेः प्राधान्यात् 'प्राधान्येन व्यपदेशा भवन्ति' इति नियमेन जातिनिबन्धनोऽष्टादशविधत्वव्यवहारः सुगमः । व्यक्तिपक्षे तु व्यक्तेः प्राधान्यात् व्यक्तिनिबन्धनोऽष्टादशविधत्वव्यवहारः 'अणुरपि विशेषोऽध्यवसायकरः' इत्यभियुक्तोक्त्या कथम् ? इति शङ्काया आञ्जस्येन उपपाद्यमानायाः ग्रन्थेन समाहितत्वादिति चिन्तनीयम् ।

न च स्वसमभिव्याहृतपदार्थतावच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मबोधनं विधापदार्थः । यथा नवविधं द्रव्यमत्र स्वसमभिव्याहृतं पदं द्रव्यपदं तदर्थो द्रव्यं तत्र या पदार्थता तदवच्छेदकं द्रव्यत्वं तद्व्याप्योऽल्पदेशवृत्तिः मिथो विरुद्धो यावान् धर्मः—पृथिवीत्वं जलत्वं तेजस्त्वमित्यादिः, तेषां बोधनं जायते । घटत्वपटत्वधर्माधिकबोधने विवक्षिते एकादशविधत्वं द्रव्यस्य स्यादतो मिथोविरुद्धेति निवेशः । तथा च घटत्वपटत्वयोः पृथिवीत्वेन सममेकत्र घटादौ समावेशात् घटत्वपृथिवीत्वयोः परस्परं विरोधाभावात् न तमादाय एकादशविधत्वं वक्तुं शक्यम् ।

एवम् 'अकारोऽष्टादशविधः' इत्यत्रापि स्वसमभिव्याहृतं पदम् अकारपदम्, तदर्थः अकारस्तदर्थतावच्छेदकमकारत्वं तद्व्याप्यं परस्परविरुद्धो यावान् धर्मः—उदात्तत्वम् अनुदात्तत्वं स्वरितत्वं ह्रस्वत्वं दीर्घत्वं प्लुतत्वम् अनुनासित्वं निरनुनासिकञ्चेति अष्टसंख्याक एव, तथा च कथमष्टादशविधत्वमित्यत आह—**तत्समानेति** ।उदात्तत्वसमानाधिकरणानुनासिकत्वसमानाधिकरणह्रस्वत्वम्, उदात्तत्वसमानाधिकरणानुनासिकत्व-

---

अष्टादश इति । यद्यपि व्यक्तिपक्ष में प्रत्येक व्यक्ति परस्पर भिन्न होने से व्यक्ति अनन्त हैं, अतः उन अकारादि व्यक्तियों का अष्टादश भेद कथन युक्त नहीं है; तथापि 'अत्वादिजातिमान् अकार अष्टादशधर्मवान् है'—इसमें ग्रन्थ का तात्पर्य है ।

ऌवर्णस्येति। विवृतस्येत्यर्थः। तेन 'ऌति ऌ वा' (का० वा०) इति विधेयस्ये-षत्पृष्टस्य दीर्घत्वेऽपि न क्षतिः।

दीर्घाभावादिति। अत एव 'तुल्यास्य' (१।१।९) सूत्रे भाष्ये 'ऌति सवर्णे' (का० वा०) इत्यनेन पक्षे द्विलकारकाभावे 'अकः सवर्णे' (६।१।१०१) इति दीर्घत्वे 'होतॄकारः' इति ऋकारघटितप्रयोगः सङ्गच्छते।

समानाधिकरणदीर्घत्वम्, उदात्तत्वसमानाधिकरणानुनासिकत्वसमानाधिकरणप्लुतत्वम्। एवम् अनुदात्तत्वसमानाधिकरणानुनासिकत्वसमानाधिकरणह्रस्वत्वम्, एवमेव दीर्घत्वं प्लुतत्वञ्च। तथा स्वरितत्वसमानाधिकरणानुनासिकत्वसमानाधिकरणह्रस्वत्वम्, एवमेव दीर्घत्वं प्लुतत्वञ्चेति नवभेदाः सङ्कलनया जाताः। एषु नवसु भेदेषु अनुनासिकत्व-समानाधिकरणस्थाने निरनुनासिकत्वसमानाधिकरणेति प्रक्षेपे नव भेदाः। उभयोः सङ्कलनायाम् अष्टादश धर्मा मिथोविरोधिनः, अत्वधर्मेण व्याप्याश्च—इति एषां बोधनं युक्तमिति अष्टादशविधत्वं नानुपपन्नम्।

एवमग्रेऽपि = 'ऌवर्णो द्वादश' इत्यत्रापि इत्थमेवानुसन्धेयम्। उदात्तत्वसमाना-धिकरणानुनासिकत्वसमानाधिकरणह्रस्वत्वम्, उदात्तत्वसमानाधिकरणानुनासित्वसमा-नाधिकरणप्लुतत्वम्; एवम् अनुदात्तत्वसमानाधिकरणानुनासिकत्वसमानाधिकरणह्रस्व-त्वम्, तत्समानाधिकरणप्लुतत्वम्; एवमेव स्वरितत्वसमानाधिकरणानुनासिकत्व-समानाधिकरणह्रस्वत्वम्, तथैव तत्समानाधिकरणप्लुतत्वमिति षड् धर्माः। इत्थं षट्स्वपि अनुनासिकपदमपहाय निरनुनासिकपदं प्रक्षिप्य षड् भेदाः कल्पनीयाः। सङ्कलनया द्वादश भेदाः भवन्ति। ऌकारस्य दीर्घाभावादस्य षड् भेदा न भवन्ति। दीर्घस्य उदात्ता-त्वादिघटितास्त्रयो भेदा अनुनासिकत्वसमानाधिकरणाः, तथैव निरनुनासिकत्वसमाना-धिकरणा उदात्तत्वादिघटितभेदाः—इत्येवं षण्णां धर्माणामभावात् विवृतस्य ऌकारस्य द्वादश भेदा एव। अतो द्वादशविधत्वं तस्य युक्तमुक्तम्। 'ऌति ऌ वा' इति वार्त्तिकेन विधीय-

---

ह्रस्वत्व, दीर्घत्व, प्लुतत्व, उदात्तत्व, अनुदात्तत्व, स्वरितत्व, अनुनासिकत्व के भेद से धर्म का सात प्रकार का ही भेद होने के कारण अष्टादश भेद की अनुपपत्ति पूर्ववत् बनी हुई है? इसलिए लिखते हैं—ह्रस्वत्वेति। उदात्तत्वसमानाधिकरण अनुनासिकत्वसमानाधिकरण ह्रस्वत्व, अनुदात्तत्वसमानाधिकरण अनुनासिकत्वसमानाधिकरण ह्रस्वत्व, स्वरितत्वसमानाधिकरण अनुनासिकत्वसमानाधिकरण ह्रस्वत्व, एवं उदात्तत्वसमानाधिकरण अनुनासिकत्वसमानाधिकरण दीर्घत्वादि, इस प्रकार ह्रस्वत्व-दीर्घत्वादि के अनेक भेद होने से अठारह भेदों का उपपादन कर लेना चाहिये।

विवृत प्रयत्न वाले ऌकार के बारह भेद कहे गये हैं। अतः 'ऌति ऌ वा' इस वार्त्तिक से विधेय ईषत्स्पृष्ट ऌकार के दीर्घ होने पर भी क्षति नहीं है; क्योंकि इसके भेद की गणना का वहाँ प्रसङ्ग नहीं है। दीर्घाभावात् इति। अत एव वार्त्तिक की अप्रवृत्ति के पक्ष में 'अकः सवर्णे' इससे दीर्घ होने पर 'होतॄकारः' ऐसा ऋकारघटित प्रयोग 'तुल्यास्य' सूत्र में किया गया सङ्गत होता है।

१०. तुल्यास्यप्रयत्नं सवर्णम् । १ । १ । ९ । ताल्वादिस्थानम्,

ह्रस्वाभावादिति । इदम् 'एओङ्' (मा० सू० ३) इत्यादौ भाष्ये स्पष्टम् ।

गानरोदनादौ चतुर्मात्राऽर्धमात्रादीनामुपलम्भेऽपि शास्त्रीयकार्ये उपयोगाभावाल्लोके प्रयोगेष्वप्रयोगाच्च नोक्ताः । अत एवानुदात्ततरस्यानुक्तिः । एकश्रुतेः स्वरान्तरत्वे इदमुपलक्षणम्; तस्या लोकेऽपि सत्त्वात् ॥

तुल्यास्य० । (१ । १ । ९) । तुल्यावास्यप्रयत्नौ यस्येत्यर्थः । आस्ये भवमास्यम्;

मानस्तु ऌकारो दीर्घोऽपि भवतीत्याशयेन विवृतस्येत्युक्तम् । वार्त्तिकविधेयस्तु ईषत्स्पृष्ट इति तस्य दीर्घस्याऽपि स्वीकारे क्षत्यभावात् । अतएव=ऌकारो दीर्घो नेति स्वीकारादेव ।

एओङ् इत्यादौ इति । अत्रादिपदेन ऐऔजित्यस्य संग्रहः । इत्थं हि तत्र भाष्यम्—'ननु च एङः सस्थानतरौ अर्धं एकारः, अर्धं ओकारः । न तौ स्तः । यदि हि तौ स्यातां तावेवायमुपदिशेत्' इति । एतेन अर्ध एकारोऽर्धं ओकारश्च न स्तः—इति स्पष्टं प्रतीयते । गानरोदनादौ चतुर्मात्रस्यार्धमात्रस्य चोपलम्भेऽपि तत्र शास्त्रीयकार्याभावात् लोके प्रयोगाभावाच्च तन्नेह निर्दिष्टम् ॥

तुल्यास्य इति । आस्ये=मुखे भवम् आस्यम्, आस्यञ्च प्रयत्नश्चास्यप्रयत्नौ, तुल्यौ=समानौ आस्यप्रयत्नौ यस्य तदिति समानाधिकरणो बहुव्रीहिः । तेन तुल्यः आस्ये प्रयत्नो यस्येति व्यधिकरणबहुव्रीहेर्निरासात् स्थानसाम्याभावेऽपि प्रयत्नसाम्यमात्रेण न सवर्णसंज्ञा । न च तुल्यञ्च तुल्यश्चेत्येकशेषे 'नपुंसकमनपुंसकेन' इति सूत्रेण नपुंसकस्यानपुंसकेन सहैकशेषविधाने नपुंसकस्य शेषः स्यादतः 'तुल्यौ' इत्येवं निर्देशो नोचित इति वाच्यम्; यत्र प्रवृत्तिनिमित्तं[1] नाना तत्रैव एकशेषस्वीकारात् । तथा च प्रवृत्तिनिमित्तनिष्ठनानाप्रकारतानिरूपितनानाविशेष्यताकबोधजनकत्वरूपशब्दतन्त्रविषये एव तस्य प्रवृत्तिः । प्रकृते च तुल्यत्वस्यैकस्यैव प्रवृत्तिनिमित्तत्वेन तुल्यत्वनिष्ठा या प्रकारता तन्निरूपिता या आस्यनिरूपिता प्रयत्ननिरूपिता च नानाविशेष्यता तादृशविशेष्यतानिरूपकबोधजनकत्वरूपाऽर्थतन्त्रस्य सम्भवेन एकशेषाप्रवृत्तेः । अर्थ[2]तन्त्रेणैव

'एच्' के बारह भेद हैं; क्योंकि इसका ह्रस्वात्मक भेद नहीं होता । यद्यपि गाने और रोने में चार मात्रा अर्धमात्रा आदि वाला एच् मिलता है तथापि उसका शास्त्रीय कार्यों में उपयोग तथा लोकप्रयोग न देखा जाने से यहाँ निर्देश नहीं किया गया ।

पूर्वोक्त कारणों से ही अनुदात्ततर का निर्देश नहीं किया गया है । एकश्रुति को स्वरान्तर मानने पर उदात्तादि-भेदनिर्देश उपलक्षण है । अतः उसका भी संग्रह होता है; क्योंकि उसकी प्रतीति लोक में भी होती है ॥

'तुल्यास्यप्रयत्नं सवर्णम्' इति । जिसका स्थान और प्रयत्न समान है, वह तुल्यास्य-

---

१. वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितीयप्रकारताश्रयत्वं प्रवृत्तिनिमित्तत्वम् । यथा घटपदस्य वाच्यं घटत्वं घटपदवाच्ये घटरूपार्थे वृत्ति अपि, घटपदजन्या या उपस्थितिस्तत्प्रकारतायाः आश्रयश्चेति । तस्य प्रयोगे यन्निमित्तमिति शब्दार्थः ।

२. सकृदुच्चरितत्वे सति अनेकार्थप्रत्यायकत्वं तन्त्रत्वमिति सरलार्थः ।

व्याख्यानात् । तच्च वर्णोपयोगित्वात् स्थानमेव, प्रयत्नस्य पृथगुपादानात् । प्रकृष्टो यत्न आभ्यन्तरः । तस्य वर्णोत्पत्त्यव्यवहितप्राग्भावित्वरूपप्रकर्षवत्त्वात् । जनकत्वं षष्ठ्यर्थः । तत्तत्कार्यगतभेदं स्थानेष्वारोप्य भेदघटिततुल्यत्वस्य निर्वाहः ।

वस्तुतः सादृश्यं न भेदघटितमिति भाष्यसम्मतमिति न कश्चिद्दोषः । स्पष्टञ्चेदं भाष्ये । तदाह—ताल्वादीति ।

एकेन तुल्यशब्देन उभयोस्तुल्ययोर्बोधादनेकशब्दस्य प्रयोग एव न प्राप्नोतीति कथमेकशेषसम्भावना ! 'प्रत्यर्थं शब्दाभिनिवेशः' इति भाष्ये अर्थशब्दः प्रवृत्तिनिमित्तपरः । तथाच प्रवृत्तिनिमित्तभेदे एव अनेकशब्दप्रयोगस्येष्टतया प्रकृते अनेकशब्दस्य प्रयोग एव नास्तीति ।

आस्य इति । आस्यशब्दो नात्र मुखवाची, किन्तु आस्ये भवमिति विग्रहे 'शरीरावयवाद् यत्' इति सूत्रेण निष्पन्नो यत्-प्रत्ययस्तदन्तः आस्यभवकण्ठादिस्थानस्य वाची ।

प्रमाणमाह—**व्याख्यानादिति** । आस्यग्रहणरूपमेव व्याख्यानम् । अन्यथा आस्यपदस्य मुखपरत्वे सर्वेषां वर्णानाम् उच्चारणे मुखसाहाय्यस्य तुल्यतया आस्यपदोपादानस्य नैरर्थक्यापत्तेः । तच्च = आस्यभवञ्च कण्ठादिस्थानमेव, नतु वायुसंयोगादि । तथा सति आस्यपदेन वायुसंयोगादिग्रहणमिव आस्यभवत्वेन प्रयत्नस्यापि ग्रहणसम्भवात् प्रयत्नपदस्य पृथगुपादानं व्यर्थं स्यात् ।

प्रयत्नशब्दे प्रपदोपादाने फलमाह—**प्रकृष्ट इति** । प्रकृष्टो यत्न इत्येवं विवक्षणेन यत्ने प्रकर्षबोधनार्थं प्रशब्दोपादानम् । यत्ने च प्रकृष्टत्वं वर्णोत्पत्तेरव्यवहिते प्राक्काले = व्यवधानरहितपूर्वकाले, भावित्वं = स्थितिशीलत्वम् । एतादृशः प्रकर्षः आभ्यन्तरे प्रयत्ने एव । अतः स एवात्र प्रयत्नपदेन गृह्यते । **जनकत्वमिति** । तुल्यौ आस्यप्रयत्नौ यस्येत्यत्र षष्ठ्यर्थो जनकत्वम् । यस्य जनकौ आस्यप्रयत्नौ तुल्यौ इति भावः । इदं शब्दानामनित्यत्वपक्षे, नित्यत्वपक्षे तु व्यञ्जकत्वमर्थः । तुल्यौ यन्निरूपितजनकतावन्तौ व्यञ्जकत्ववन्तौ वा आस्यप्रयत्नौ इति विग्रहार्थः ।

न च दैत्यारिरित्यत्र द्वयोरकारयोः उच्चारणभेदेन भिन्नत्वेऽपि उच्चारणस्थानं तु एकमेवेति द्वयोर्वर्णयोरेकस्थानकत्वेन तुल्यत्वस्य मिथो भिन्नव्यक्तिनिष्ठतया कथमेकस्यैव स्थानस्य एकेन अपरस्य तुल्यत्वं वक्तुं शक्यम् ? इति शङ्कायामाह—**तत्तदिति** । तेषां तेषां कार्याणाम् = उच्चारितानां वर्णानां भेदं तत्तत्स्थानेषु आरोप्य एकस्यापि स्थानस्य भिन्नत्वेन तुल्यत्वस्य व्यवहारः । वस्तुतः सादृश्यं भेदे एव न, अपि तु अभिन्नेऽपि भवतीति पूर्वं प्रतिपादितम्, तद्रीत्या अभिन्नेऽपि स्थाने तुल्यत्वं निर्वहतीति न कोऽपि दोषः ।

प्रयत्न है । सूत्र में 'आस्य' पद से 'मुख' अर्थ विवक्षित नहीं है । किन्तु 'आस्ये भवम्' इस व्युत्पत्ति से निष्पन्न यत्प्रत्ययान्त 'आस्य' पद मुखस्थित कण्ठ तालु आदि स्थान का बोधक है । इसमें प्रमाण 'सभी वर्णों का मुख सर्वत्र समान होने से मुखपदोपादान की निरर्थकता प्राप्त होती है'—एतद्रूप व्याख्यान है । आस्यभव अन्य भी मुखस्थ कफ लाला आदि भी हैं, उनका ग्रहण 'आस्य' पद से नहीं है । क्योंकि वे वर्णोपयोगी नहीं है । प्रयत्न के वर्णोपयोगी होने पर भी उसका सूत्र में पृथक् निर्देश व्यर्थ हो जाने से 'आस्य' पद से ग्रहण नहीं हुआ ।

आभ्यन्तरप्रयत्नश्च—इत्येतद् द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ।

शिक्षायां कण्ठादीनां कण्ठत्वादिनैव स्थानतोक्त्या तद्रूपेणैवाऽऽस्यशब्देन ग्रहणमिति तद्भागभेदमादाय नोदात्तादिषु सावर्ण्यभङ्ग इति बोद्धव्यम् । यस्यैतद् द्वयं येन यदीयेनैतद्द्वयेन तुल्यमित्यर्थः ।

'यजुष्येकेषाम्' (८ । ३ । १०४) इति निर्देशाद् यावदास्यभवतुल्यत्वं ग्राह्यम् । अत एवैचोः सावर्ण्यमाशङ्क्य 'नैतौ तुल्यस्थानौ' इति भाष्ये समाहितम् ।

अत एव वलयोर्न सावर्ण्यम् । तेन 'तद्वानासाम्' (४ । ४ । १२५) इत्यादौ 'तोर्लि' (८ । ४ । ६०) इति न ।

नन्वेमपि आस्यभवार्थबोधकेन आस्यशब्देन कण्ठताल्वादिस्थानानां यथा ग्रहणं कण्ठताल्वादिस्थानविशेषाणाम् ऊर्ध्वाधोमध्यभागानां ग्रहणेन तत्तद्भागभेदेन उच्चारितानाम् उदात्तानुदात्तादीनां वर्णानां तुल्यस्थानत्वाभावात् परस्परं सवर्णसंज्ञा न प्राप्नोति ? इत्याशङ्कायामाह—**शिक्षायामिति** । 'कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू' इति शिक्षावचने कण्ठताल्वादीनां कण्ठत्वेन तालुत्वेनैव च स्थानिता प्रदर्शिता अतोऽन्तरङ्गत्वाद् उपस्थितेन कण्ठत्वादिनैव स्थानिनः साम्यं विवक्षितम् इति ऊर्ध्वादिभागभेदेनोदात्तादीनामकारादीनां तुल्यास्यत्वाभावेन परस्परं सवर्णसंज्ञायां अनापत्तिः दूरं पराहता । तुल्यशब्दस्य साकांक्षत्वात् यस्य येनेति लभ्यते । तदेवाह—**यस्यैतद् द्वयमित्यादि** । यस्य वर्णस्य उत्पादकं व्यञ्जकं वा स्थानप्रयत्नोभयं तुल्यमित्यर्थः । येन इत्यस्य वर्णेन इति नार्थः, वर्णेन तुल्यत्वस्याभावात् । अतो व्याचष्टे—**यदीयेन इति** । यज्जनकेन स्थानप्रयत्नेन इत्यर्थः ।

तुल्यास्यसूत्रे लक्ष्य सम्भावितानां सर्वेषां स्थानानां साम्यम् ? अथवा यस्य कस्यचिदेकस्यापि स्थानस्य साम्यं विवक्षितम् ? इति सन्देहं वारयितुमाह—**यजुष्येकेषामिति** । यजुषि एकेषामिति सन्धिरहितायां दशायाम् प्राप्तस्य यणादेशस्य दध्यत्रेत्यादौ चारितार्थ्यात् तं बाधित्वा 'अकः सवर्णे' इति दीर्घः स्यात्, इकारस्य तालुस्थानजन्यत्वम्, एकारस्य च कण्ठतालूभयस्थानजन्यत्वेऽपि तालुस्थानजन्यत्वरूपेण साम्यमादाय परस्परं सवर्णसंज्ञायां दीर्घः स्यात् । तथाच सूत्रे कृतयणो निर्देशोऽनुपपन्नः स्यात् । अतो यावदास्यभवानां तुल्यत्वं यावतां स्थानानां साम्यं विवक्षितम् । तथा च एकारस्य कण्ठस्थानमधिकमिति हेतोः इकारेण सह यावत्स्थानसाम्याभावात् सवर्णसंज्ञाया अप्राप्त्या न दीर्घस्य प्रसङ्गः । तस्मात् एतन्निर्देशात् यावत्स्थानसाम्यं गृह्यते ।

अत एव=यावत्स्थानसाम्यस्य विवक्षणादेव, 'नैतौ तुल्यस्थानौ' इति भाष्यस्य सङ्गतिः; वकारस्य ओष्ठस्थानस्याधिक्यात् दन्तमात्रस्थानिकलकारेण सह सवर्णसंज्ञा न । तथा च 'तद्वानासाम्' इत्यादिस्थले 'तोर्लि' इति सूत्रेण परसवर्णो न । अत एव च भाष्यकृता प्रयत्नशब्देन आभ्यन्तरस्य बाह्यस्य चोभयविधस्य ग्रहणे यत्किञ्चित्प्रयत्न-

---

प्रयत्न से यहाँ आभ्यन्तर लिया गया है, क्योंकि प्रकृष्ट यत्न को 'प्रयत्न' कहते हैं । प्रयत्न में प्रकृष्टता = वर्णोत्पत्ति से अव्यवहित पूर्व में उत्पत्ति । आभ्यन्तर प्रयत्न वर्णोच्चारण से प्राग्वर्ती है, बाह्य प्रयत्न वर्णोच्चारण के अनन्तर भावी है । 'तुल्यौ आस्यप्रयत्नौ यस्य'—इस वाक्यघटक

अत एव प्रयत्नशब्देन यत्नमात्रग्रहणमिति पक्षे यत्किञ्चित्प्रयत्नभेदे यत्किञ्चित्प्रयत्नैक्यमादाय सवर्णसञ्ज्ञेत्यर्थो 'झरो झरि सवर्णे' (८ । ४ । ६५) इति सवर्णग्रहणेन ज्ञापकेन साधितो भाष्ये । तेन स्थानांशे यावत्स्थानसाम्ये इत्येव स्वारसिकोऽर्थ इति

भेदे सति यत्किञ्चित्प्रयत्नैक्ये सवर्णसंज्ञा इत्यस्मिन्नर्थे 'झरो झरि सवर्णे' इति सूत्रस्थं सवर्णग्रहणं ज्ञापकमित्युक्तम् । तथाहि—यावत्प्रयत्नसाम्ये एव सवर्णसंज्ञायां सूत्रे सवर्णग्रहणे कृतेऽपि शिण्ढीत्यत्र डकार-ढकारयोः यावत्प्रयत्नसाम्याभावेन लोपाप्राप्त्या 'झरो झरि' इत्येव सूत्रं लाघवात् कर्तव्यम् । यथासङ्ख्यसूत्रानुरोधेन झर्-प्रत्याहारघटकवर्णस्य तत्समानजातीये एव परस्मिन् झरि सति लोपस्य सिद्धया व्यावर्त्यस्य अधिकसंग्रहस्य चाभावेन सवर्णग्रहणस्य वैयर्थ्यम् । सवर्णग्रहणं विभिन्नरूपेणावगम्यमानेऽपि झरि लोपरूपाय फलाय, तत् तु प्रयत्नभेदात् वक्तुं न शक्यते । ततो ज्ञायते—यावत्प्रयत्नसाम्यं न विवक्षितम् । यत् किञ्चित् प्रयत्नैक्येऽपि सवर्णसंज्ञायां शिण्ढीत्यत्र ढकारे परस्मिन् सति डकारस्य लोपार्थं सवर्णपदोपादानमावश्यकम् । तदभावे यथासंख्यसूत्रानुसारेण लोपे डकारस्य ढकारे परस्मिन् सति लोपो न स्यात् । अल्पप्राणमहाप्राणरूपबाह्यप्रयत्नभेदो न तयोर्बोध्यः ।

यदि स्थानांशे यत् किञ्चित् स्थानसाम्यं विवक्षितं स्यात् तदा तदनुसारेण प्रयत्नांशेऽपि यत्किञ्चित्प्रयत्नैक्यस्य लाभात् सवर्णग्रहणसामर्थ्येन तस्य साधनं निष्प्रयोजनम्—इत्याशयेन आह—**तेन इति**। 'यावत्स्थानसाम्ये' इत्यस्यानन्तरं 'सवर्णसंज्ञा' इति योजनीयम् ।

षष्ठी का 'जनकत्व' अर्थ है । 'यज्जनकौ आस्यप्रयत्नौ तुल्यौ'—इस प्रकार अर्थ होने से बाह्य प्रयत्न में वर्णों की जनकता न होने से उसकी व्यावृत्ति स्पष्ट हो जाती है ।

शङ्का—तत्तत् वर्णों के उच्चारण में प्रयत्नभेद स्पष्ट होने पर भी दैत्य + अरिः इसके अकारद्वय के भिन्न-भिन्न कण्ठ स्थान होने में प्रमाण नहीं है । अतः भिन्न 'सिंहो माणवकः' इत्यादि में सादृश्य का व्यवहार होने से दोनों अकारों के एक ही कण्ठस्थान में तुल्यत्व का व्यवहार नहीं हो सकता ?

समाधान—एक ही कण्ठस्थान से दोनों अकारों का उच्चारण होने पर भी कार्य अकार में भिन्नता अनुभवसिद्ध है । उसी भिन्नता के कारण स्थान में आरोप करने से तुल्यत्व का व्यवहार होता है । वस्तुतः सादृश्य अतिरिक्त पदार्थ एवं अखण्डोपाधिरूप है । इस मत में भेदघटित न होने से कोई दोष नहीं है ।

शङ्का—कण्ठ तालु आदि के ऊर्ध्वभाग, मध्य भाग, अधोभाग आदि के द्वारा उदात्त, अनुदात्त तथा स्वरित अकारादि की निष्पत्ति होने से उदात्त की अनुदात्त के साथ सवर्णसंज्ञा नहीं होगी, क्योंकि स्थानगत भागों का भेद होने से तुल्यता नहीं है ?

समाधान—शिक्षा में जिस रूप से कण्ठत्वेन तालुत्वेन कण्ठतालु आदि की स्थानता कही गई है, उसी रूप से स्थान की तुल्यता सूत्र में विवक्षित है । अतः भाग के भेद होने पर भी सवर्ण संज्ञा का प्रतिबन्ध नहीं होगा ।

यस्यैतद् इति । जिसका स्थान और प्रयत्न जिसके स्थान और प्रयत्न से समान है । ऐसा अर्थ है ।

प्रतीयते। न च यावदास्यभवतुल्यत्वविवक्षणे प्रयत्नग्रहणं व्यर्थं प्रयत्नस्याप्यास्यभवत्वात्

यावदास्यभवतुल्यत्वञ्च स्वजनकयावत्स्थानजन्यत्वम्, स्वाजनकस्थानाजन्यत्वम्—इत्युभयसम्बन्धेन स्वविशिष्टत्वम्। यथा स्वपदेन अकारः, तज्जनकं यावत्स्थानं कण्ठः, तेन जन्यत्वम्, तथा स्वपदेन अकारः तस्याजनकं स्थानं ताल्वादि, तेन अजन्यता च अकारे इति लक्षणसमन्वयः। अकारस्य सावर्ण्यम् एकारेण सह न सम्भवति। प्रथमसम्बन्धस्य सत्त्वेऽपि स्वपदेन अकारः, तस्याजनकं स्थानं तालु, तेन अजन्यता एकारस्य नास्ति; अस्य तालुस्थानजन्यत्वस्यापि सत्त्वादिति द्वितीयसम्बन्धाभावात् न दोषः।

अथवा स्वविशिष्टः सवर्णसंज्ञो भवति। वै० स्वनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्न-व्याप्यतानिरूपितावच्छेदकत्वसम्बन्धावच्छिन्नव्यापकतावत्त्वम्, स्वनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नव्यापकतानिरूपितावच्छेदकत्वसम्बन्धावच्छिन्नव्याप्यतावत्त्वम्—एतदुभयसम्बन्धेन। समन्वयश्च—शब्दानामाकाशवृत्तितया कण्ठताल्वादिर्न शब्दानामधिकरणं समवायेन, किन्तु तत्तत्स्थानावच्छेदेन आकाशमधिकरणमिति हेतोः अवच्छेदकतासम्बन्धेन अकारादीनां कण्ठादिषु सत्त्वं बोध्यम्। तद्वन्निष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मवत्त्वम् व्याप्यत्वं यथा वह्निव्याप्यो धूमः। अत्र तद्वान्=वह्निमान् अयःपिण्डादिः तन्निष्ठो योऽत्यन्ताभावः स धूमो नास्ति इति प्रतीतिसिद्धाभावः तादृशाभावप्रतियोगितावच्छेदको धर्मः धूमत्वं तद्वत्त्वम् धूमस्येति वह्न्यपेक्षया तस्य व्याप्यत्वम्। व्यापकत्वञ्च तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्। यथा तद्वान्=धूमवान् पर्वतादिः, तन्निष्ठोऽत्यन्ताभावः वह्निर्नास्ति इत्येवं वक्तुं न शक्यते तत्र वह्नेरपि सत्त्वात्; किन्तु घटो नास्ति तादृशाभावप्रतियोगितावच्छेदकत्वं घटत्वस्यानवच्छेदकत्वं वह्नित्वस्य तद्धर्मवत्वात् सिद्धम्। एवञ्च प्रकृते तालुनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नव्याप्यतानिरूपिता या अवच्छेदकत्वसम्बन्धावच्छिन्ना व्यापकता तस्या इकारे असत्त्वेन प्रथमसम्बन्धाभावात् न इकारस्य सावर्ण्यम् एकारेण। अवच्छेदकतासम्बन्धेन एकारस्य कण्ठस्थानेऽपि सत्त्वेन तेन सम्बन्धेन एकारः कण्ठे तन्निष्ठो योऽत्यन्ताभावः स तेन सम्बन्धेन इकाराभावः तादृशाभावीयप्रतियोगितावच्छेदकमेव इकारत्वं न त्वनवच्छेदकमिति व्यापकता इकारे नास्तीति प्रथमसम्बन्धा-

---

यावदास्यभवतुल्यत्वम् इति। किसी स्थान की समानता मात्र से सवर्ण संज्ञा मानने पर इकार और एकार का तालु स्थान समान होने से सावर्ण्य की प्रसक्ति होने के कारण 'अकः सवर्णे' इससे दीर्घ प्राप्त होगा। एवञ्च 'यजुष्येकेषाम्' इसमें यण् का निर्देश असङ्गत हो जायगा। अतः यावत् स्थान के साम्य की विवक्षा है। अर्थात् सभी स्थानों की समानता होनी चाहिये। एकार का स्थान कण्ठ भी है, इकार का केवल तालु स्थान है। इसलिये सभी स्थानों की समानता न होने से परस्पर में सवर्ण संज्ञा नहीं हुई। अतएव एकार ऐकार की, ओकार औकार के साथ सवर्ण संज्ञा की आशङ्का का 'इनका स्थान समान नहीं है' इसके द्वारा भाष्यकार ने समाधान किया। 'सभी स्थान समान नहीं हैं' इसी अर्थ में इसका तात्पर्य है। इसीलिये दन्तस्थान मात्र की समानता से वकार लकार की सवर्ण संज्ञा नहीं हुई। वकार का ओष्ठ स्थान अधिक है। अतएव 'तद्वान्' इसमें 'तोर्लि' इससे वकार को लकार समझ कर परसवर्ण नहीं हुआ।

इति वाच्यम्; ह्रस्वदीर्घयोः सावर्ण्यानापत्तेः। तयोर्जनकानामास्यभवानां वायुसंयोगानामतुल्यत्वात्। तस्मादास्यभवानां कण्ठादीनामेव ग्रहणमिति बोधनाय तत्सार्थक्यात्।

आस्येति किम्? तर्प्ता। 'झरो झरि' (८।४।६५) इति लोपो मा भूत्।

प्रयत्नेति किम्? वाक्श्चोतति।

प्रेति किम्? शचयोः श्वासाघोषविवाराख्यबाह्यप्रयत्नसाम्येन तत्रैव दोषात्।

भावः। तालुनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नव्याप्यतानिरूपितव्यापकता एकारे अस्ति। तथाहि—अवच्छेदकतासम्बन्धेन तद्वति तालुस्थाने एकारो नास्तीति वक्तुमशक्यतया अन्यः कश्चिद् वर्णो नास्ति तत्प्रतियोगितावच्छेदकं तदेव अनवच्छेदकमेकारत्वमिति अत्र व्यापकत्वं सुघटम्, अतः सावर्ण्यवारणाय द्वितीयंवैशिष्ट्यमुपात्तम्। स्वनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नव्यापकतानिरूपितव्याप्यताया एकारे अभावात्। एवमेकारः तन्निष्ठो योऽवच्छेदकत्वसम्बन्धः तेन अधिकरणं कण्ठः स एव तद्वान् तद्वृत्तिर्योऽत्यन्ताभावः स अवच्छेदकतासम्बन्धेन एकारो नास्तीति वक्तुं न शक्यते; किन्तु इकारो नास्ति तादृशाभावप्रतियोगितावच्छेदकत्वमेव इकारत्वस्य नानवच्छेदकत्वमिति व्यापकत्वाभावात् तन्निरूपितव्याप्यताया एकारे असत्त्वेन द्वितीयसम्बन्धाभावात् न एकारस्य सावर्ण्यम् इकारे प्रसक्तम्।

न च तद्धितान्तेन आस्यपदेन यावदास्यभवानां ग्रहणेन प्रयत्नस्याऽपि तेनैव संग्रहात् पृथक् प्रयत्नपदोपादानं व्यर्थम्? इति शङ्कते—**नचेति**। सर्वेषाम् आस्यभवानां ग्रहणे वायुसंयोगस्यापि मुखवृत्तित्वेन वर्णोत्पादकतया तस्यापि आस्यपदेन ग्रहणाद् ह्रस्वदीर्घयोः

यावत्स्थानसाम्य की विवक्षा रहने पर ही अग्रिम भाष्य सङ्गत होता है। प्रयत्न शब्द से बाह्य तथा आभ्यन्तर दोनों का ग्रहण मानने पर यत् किञ्चित् प्रयत्नैक्य के रहने पर भी सवर्ण संज्ञा में 'झरो झरि सवर्णे' इसके सवर्णग्रहण को ज्ञापक दिया। सभी प्रयत्न की एकता ली जाने पर स्व का सावर्ण्य स्व में ही मिलने से यथासंख्य से निर्वाह हो जाने के कारण सवर्णग्रहण के वैयर्थ्य से यत्किञ्चित् प्रयत्नैक्य में भी सवर्ण संज्ञा का ज्ञापन द्वारा उपपादन भाष्यकार ने किया है। स्थानांश में भी यदि यत्किञ्चित् स्थानैक्य विवक्षित होता तो उसी दृष्टान्त से प्रयत्नांश में निर्वाह हो जाता, ज्ञापकानुसरण की क्या आवश्यकता थी! या इसी प्रकार की चर्चा स्थानांश में भी करनी थी। अतः यह सिद्ध होता है कि यावत्स्थानसाम्य ही विवक्षित है।

शङ्का—सभी आस्यभव की समानता विवक्षित होने पर आभ्यन्तर प्रयत्न का भी आस्यभव से संग्रह हो जाने से पृथक् प्रयत्न का उपादान अनावश्यक है; क्योंकि आभ्यन्तर प्रयत्न आस्य में उत्पन्न है?

समाधान—प्रयत्न ग्रहण के सामर्थ्य से आस्यभवार्थक आस्य पद कण्ठत्वादि रूप से कण्ठादि स्थान का संग्राहक है, न कि सकल आस्यभव का। ऐसा मानने पर ह्रस्वाकार का दीर्घाकार के साथ सावर्ण्य नहीं होगा। दोनों के जनक वायुसंयोग में न्यूनाधिक भाव स्पष्ट है। तत्तत् स्थानों के साथ वायु का संयोग होने पर ही ह्रस्वाकारादि वर्ण की उत्पत्ति या अभिव्यक्ति होती है। अतः वायुसंयोग भी आस्यभव है।

अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा।

कस्य किं स्थानम्? इत्याशङ्कायामाह—अकुहेति। यद्यपि सर्ववर्णोच्चारणे कण्ठव्यापार आवश्यकः, तथापि चकाराद्युच्चारणे तात्वादिव्यापारोऽपि, तथाऽकारादीनामुच्चारणे तु नेति भावः। कचयोस्तु न सावर्ण्यम्? यावत्स्थानसाम्याभावात्, भिन्नस्थानकथनवैयर्थ्यापत्तेश्च।

अचोः उच्चारणे वायुसंयोगानामतुल्यत्वात् परस्परं सावर्ण्यं तयोर्न स्यात्। अतः आस्यभवानां कण्ठादीनामेव ग्रहणमिति बोधयितुं प्रयत्नपदोपादानं सूत्रे कृतम्। अन्यथा आस्यशब्देन प्रयत्नस्याऽपि संग्रहेण तदुपादानस्य नैरर्थक्यं स्यात्।

वर्णानां स्थानं निरूपयितुमुपक्रमते—अकुहेति। यद्यपि सर्वेषां वर्णानामुच्चारणे कण्ठव्यापार आवश्यक इति सर्वेषां कण्ठस्थानं प्राप्तम्, तथापि अकुहादिभ्योऽतिरिक्तानामुच्चारणे तात्वादिव्यापारोऽपि अपेक्ष्यते; अकुहादीनामुच्चारणे तु न तात्वादिव्यापारोऽपेक्षितः—इति तात्पर्येण अकारादीनामेव कण्ठस्थानता प्रतिपादिता।

व्यापारोऽपि इति। अपिना कण्ठव्यापारः। तथा = आवश्यकः। एवञ्च अकुहेत्यादीनां कण्ठ एव स्थानम्, अन्येषां तु स्थानद्वयम्।

अत्रायं निष्कर्षः—पाणिनीयशिक्षायां यस्य यस्य वर्णस्य यद्यत् स्थानमुक्तम् तत्तदेवात्र आस्यपदेन गृह्यते। ञमङणनानाञ्च पाणिनीयशिक्षायां नासिकास्थानं नोक्तम्। न वा चकारादीनां कण्ठस्थानितोक्ता। अतः ककारोच्चारणे कस्य व्यापारः? इत्यपेक्षायां कृतः स्थाननिर्णयो न शास्त्रप्रक्रियोपयोगी; किन्तु शिक्षोक्तं स्थानमेव। तेन ङकारस्य नासिकास्थानस्यान्यत्रोक्तावपि उक्तशिक्षायामनुक्तत्वात् पूर्वोक्तयावत्स्थानसाम्यस्योपपत्तेः सावर्ण्यं कङयोर्भवत्येव। एतेन सर्वेषां वर्णानामुच्चारणे उरो मूर्धादिव्यापारस्यावश्यकत्वेन उरःस्थत्व-मूर्धन्यत्वापादनम्, इकारस्य कण्ठतालूभयस्थानिकत्वेन तादृशोभयस्थानिकेन एकारेण सह सावर्ण्यस्य प्रसञ्जनञ्च कस्यचित् पराहतम्। पाणिनिशिक्षायामनयोः स्थानरूपत्वेन निर्देशाभावाद् इकारादीनामपि कण्ठस्थानमित्येवं प्रतिपादनाभावादिति। विस्तरस्तु विषम्यां टीकायां द्रष्टव्यः।

आस्यग्रहण के अभाव में प्रयत्नैक्य से सवर्णसंज्ञा का विधान होने के कारण 'तर्प्' में 'झरो झरि' इससे पकार का लोप हो जायगा; क्योंकि दोनों का प्रयत्न एक है। प्रयत्नग्रहण न करने पर स्थानैक्यमात्र से 'वाक्श्चोतति' में श्च् को सवर्णसंज्ञा हो जायगी। अतः 'झरो झरि' इससे लोप प्राप्त होगा। प्रयत्न में प्रशब्द के न रहने पर बाह्य प्रयत्न के साम्य होने पर भी सावर्ण्य की प्रसक्ति होगी। इससे भी पूर्वोक्त ही दोष होगा।

कस्य किम् इति। किस वर्ण का क्या स्थान है? इस प्रकार की आकांक्षा-शान्ति के लिये लिखा है—**अकुहेति।** यद्यपि सभी वर्णों के उच्चारण में कण्ठ-व्यापार आवश्यक होता है, तथापि चकारादि वर्णों के उच्चारण में कण्ठ से अतिरिक्त ताल्वादि व्यापार भी आवश्यक है। अकार, कवर्ग, हकार, विसर्ग के उच्चारण में कण्ठमात्र का ही व्यापार है। इसके बोधनार्थ 'अकुह' इत्यादि का कथन है। कण्ठ स्थान की समानता से ककार चकार की सवर्ण संज्ञा का आपादन नहीं करना

लृतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकानुस्वारस्य । इति स्थानानि ॥

अत्र कण्ठपदं कण्ठस्थानतत्समीपजिह्वामूलस्थानोभयपरम् । तेन 'कण्ठ्यावहौ' (पा० शि० १७), 'जिह्वामूले तु कुः प्रोक्तः' (पा० शि० १८) इति शिक्षया न विरोधः । जिह्वामूलीयपदस्य च वर्णविशेषे रूढिरिति न व्यवहारातिप्रसङ्गः । अत एवायोगवाहेषु जिह्वामूलीयगणनं भाष्ये । तत्तद्वर्णोत्पत्तेः प्राक् तत्तत्स्थानादौ जिह्वास्पर्शाद्यनुभवेन तत्तद्वर्णानां तत्तत्स्थानत्वनिर्णयेऽपि 'अकुह' इत्यादिकथनं साधारणधर्मबोधनायानुवादकम्, न त्वेतदेव कण्ठादिस्थानविधायकमिति भ्रमितव्यम् ।

विसर्जनीयपदेनात्र साहचर्यादकाराश्रयस्य ग्रहणम् । अत एव—

'अयोगवाहा विज्ञेया आश्रयस्थानभागिनः' । (२२)

इति शिक्षया न विरोधः ।

दन्ता इति दन्दसंयुक्तदेशा इत्यर्थः । अतो भग्नदन्तस्याप्युच्चारणं भवत्येव ।

उश्च पश्च ध्मायेते अनेन, तत्र भव इति योगेनोपध्मानीयस्यौष्ठ्यत्वमित्याह—उपूपेति । रूढत्वाच्च न व्यवहारातिप्रसङ्गः । नासिका चेति । चेन स्वस्ववर्गानुकूलं ताल्वादि गृह्यते । अत एवैषां प्रातिशाख्ये 'नासिकायां भवः' इत्यर्थक-नासिक्यशब्देन व्यवहारः ।

'जिह्वामूले तु कुः प्रोक्तः' इति शिक्षया कवर्गमात्रस्य उच्चारणे जिह्वामूले व्यापारस्यापेक्षणात् कवर्गमात्रं जिह्वामूलीयपदेन गृह्येतेत्यत आह—रूढिरिति । 'रूढिर्योगमपहरति' इति न्यायेन जिह्वामूलीयपदं वर्णविशेषे रूढम्, नत्विदं जिह्वामूले भवमित्येवं यौगिकम् । तस्मान्न तथा व्यवहारः कवर्गमात्रे । अतएव = रूढिस्वीकारादेव । यदि जिह्वामूलीयशब्दस्य यौगिकत्वेन जिह्वामूलोद्भवमात्राणां संग्राहकत्वमिष्येत, तदा तेषां वर्णसमाम्नाये पाठस्य सत्त्वात् पुनरयोगवाहेषु जिह्वामूलीयपदेन गणनमसङ्गतं स्यात् । न योगः = वर्णसमाम्नाये पाठो येषां ते अयोगाः, वाहयन्ति = लक्ष्यं साधयन्तीति वाहाः, अयोगाश्च ते वाहा इति व्युत्पत्त्या वर्णसमाम्नाये अपठितानामेव अयोगवाहमध्ये पाठात् । तथा च जिह्वामूलीयस्य वर्णविशेषस्यैव अयोगवाहमध्ये पठितव्यतया विशेषरूपेणैव निर्देशो युक्तः, न सामान्यरूपेण निर्देश उचितः; अन्येषां तेषां वर्णसमाम्नाये पाठात् ।

चाहिये । चकार का तालु स्थान अधिक होने से यावत्स्थान की समानता नहीं है । चकारादि के भिन्न भिन्न स्थानों का निर्देश भी व्यर्थ हो जायगा ।

यहां 'कण्ठ' पद कण्ठस्थान और तत्समीप जिह्वामूलस्थान—इस प्रकार उभयतात्पर्येण प्रयुक्त है । अतः 'अकार हकार का कण्ठ स्थान तथा कवर्ग का जिह्वामूल स्थान है'—इस शिक्षा वचन के साथ विरोध नहीं हुआ ।

रूढ़ि बलवती होने से जिह्वामूलीय पद यौगिक नहीं है, किन्तु ककार से पूर्ववर्त्ती अर्धचन्द्र सदृश में रूढ़ है । इसीलिये अयोगवाहों के मध्य में जिह्वामूलीय पद से गणना भाष्य में की

यत्तु—

'अनुस्वारयमानां च नासिकास्थानमिष्यते' । (पा० शि० २२)

इति शिक्षोक्तेरेषां नासिकाकरणम् ?

किञ्च, स्थानत्वे कङयोः सावर्ण्यानापत्तिः; यावत्स्थानैक्याभावात् । यत्किञ्चित्स्था-नैक्येन तत्त्वे तु ञमामपि परस्परं सावर्ण्यापत्तिरिति ?

तन्न; कण्ठादीनामपि करणत्वस्यैव 'अस्यन्त्यनेन वर्णान्' इति भाष्यात् प्रतीतेः । स्थानत्वव्यवहारस्तु वर्णाभिव्यक्तिजनकताल्वादौ वर्णजनकवायुसंयोगाधारे

खण्डनकृदादीनामुक्तिं खण्डयति—यत्तु इति । 'अनुस्वारयमानाम्' इत्युक्तशिक्षा-वचने ञमङणनानां निर्देशाभावादेषां नासिका न स्थानं किन्तु करणम् । एवमपि नासि-कास्थानत्वे शिक्षायाः नासिकास्थानत्वस्यानुक्त्या न्यूनत्वापत्तिः स्यात् । किञ्च, ञमादीनां नासिकास्थानत्वे नासिकास्थानस्याधिक्यात् यावत्स्थानसाम्याभावात् ककार-ङकारयोरेवं ञकार-चकारयोः परस्परं सावर्ण्यं न स्यात् । यत् किञ्चित् स्थानसाम्येऽपि सवर्णसंज्ञायां तु ञकारस्य मकारेण सह सावर्ण्यं प्रसज्येत; नासिकास्थानस्योभयोः सत्त्वेन स्थानसाम्यात् । अतो नासिकाकरणमेव ? तन्न; 'अस्यन्ति अनेन वर्णान्' इति भाष्येण सर्वेषां कण्ठताल्वा-दिस्थानानां वर्णान् प्रति करणत्वस्यैव लाभात् नासिकाया एव भवदुक्तं करणत्वं न शोभते । अकुहेत्यादिनाऽपूर्वं कादीनां कण्ठादिस्थानित्वे बोधिते पश्चात् तुल्यस्थानत्व-ज्ञानात् सवर्णपदबोध्यत्वनिर्णये 'अणुदित्' सूत्रेण कुशब्दस्य सवर्णग्राहकत्वं बोध्यते इति कथमत्र कुशब्देन पञ्चानां ग्रहणम् ? अत आह—तत्तदिति । न चैवं स्थानत्वेन व्यवहारः कथम् ? अत आह—स्थानत्वेति । वर्णानामभिव्यक्तेर्जनकं यत् कण्ठताल्वादि, तदेव वर्णजनकानां वायुसंयोगानामाधारभूतम्, तस्मिन् कण्ठताल्वादौ यद् वर्णाभिव्यक्ति-जनकवायुसंयोगाधिकरणत्वम्, तदेव तत्तत्स्थाने समारोप्य वर्णाधिकरणत्वेन सम्भाव्य-वर्णानां स्थानमिति व्यवहरन्ति ।

गयी है । अन्यथा ककारादि का पाठ वर्णसमाम्नाय में होने से ⌣ इस रूप से गणना उचित थी । जिह्वामूलीय इस सामान्य शब्द का गणना में प्रयोग आवश्यक नहीं था । 'अकुह' इत्यादि अज्ञात कण्ठादिस्थान का बोधक होने से 'अणुदित्' सूत्र के द्वारा कु शब्द से कवर्ग का बोध नहीं होगा ? इस शङ्का के निवारणार्थं लिखते हैं—तत्तद् इति । उन उन वर्णों की उत्पत्ति के पहले तत्तत् स्थानों में जिह्वा के स्पर्शानुभव से ही उन उन स्थानों का निर्णय होने से अकुह इत्यादि का कथन साधारण धर्मबोधन के लिये अनुवादक हैं । ये वचन कण्ठादि स्थान के अपूर्व बोधन द्वारा विधायक नहीं है । अकारोत्तर विसर्ग का ही यहाँ विसर्जनीय पद से ग्रहण है । उसी का कण्ठ स्थान है । अतएव जिस अच् के उत्तर जो विसर्ग है उसका स्थान विसर्ग के पूर्ववर्त्ती अच् के स्थान के सदृश होता है—इत्यर्थक प्रातिशाख्य से विरोध नहीं हुआ ।

दन्ता इति । दन्त से दन्तसंयुक्त देश का ग्रहण है । इसीलिये दन्तविहीन पुरुष के द्वारा भी उच्चारण सम्पन्न होता है । उपध्मानीय शब्द रूढ़ होने से योगार्थ द्वारा उकार पकार का बोधक नहीं है ।

वर्णाधारत्वाऽऽरोपेण। तत्तत्स्थानजिह्वाग्रादिसम्बन्धेन वर्णोत्पत्त्या जिह्वाग्रादौ तत्सम्बन्धजनकप्रयत्नविशेषे स्पृष्टतादौ च करणत्वव्यवहारः। वर्णाभिव्यक्त्यनन्तरभावी सावर्ण्यानुपयुक्तश्च कण्ठविवरादिनिष्ठविकासादेरास्यबहिर्देशावच्छिन्नकार्यस्य जनको यत्नो गुणशब्देनोच्यते।

केचित्तु कण्ठाद्यवच्छिन्नवर्णानामभिव्यक्त्या अवच्छेदकत्वसम्बन्धेन आधारतायाः कण्ठादौ सत्त्वान्नारोपस्योपयोगः; परमवच्छेदकतासम्बन्धेन आधाराधेयभावो न प्रसिद्ध इति मूले तथोपादानम्।

व्यवहारान्तरमपि निर्णयति–तेषु तेषु स्थानेषु जिह्वाग्रमध्यान्त्यभागानां संस्पर्शेन वर्णानामुत्पत्त्या जिह्वाग्रमध्यान्त भागानामेषु मुख्यः, तत्सम्बन्धजनके प्रयत्नविशेषे च गौणः करणत्वव्यवहारः। अथवा 'जिह्वाग्रादौ' इत्यत्र सप्तम्यर्थो वृत्तित्वं स्पृष्टतायामन्वेति। तथा च जिह्वाग्रादिवृत्तिस्पृष्टतेति लभ्यते। जिह्वाग्रादौ प्रयत्नविशेषव्यवहारः 'व्योर्लघुप्रयत्नतरः' इति सूत्रे लघुतरः प्रयत्नो जिह्वाग्रादिर्यस्योच्चारणे इत्यत्र जिह्वाग्रादौ प्रयत्नव्यवहारः कृतः। लघुतरत्वञ्चात्र शैथिल्यम्।

नचैवं कण्ठादौ यथा करणत्वव्यवहारेऽपि स्थानत्वव्यवहारो न हीयते, तथा नासिकायां करणत्वव्यवहारेऽपि स्थानत्वं नापगच्छतीति नासिकास्थानं सिध्यति। तथा च, नासिकास्थानस्याधिक्यात् ककार-ङकारयोः सावर्ण्य न स्यादिति वाच्यम्; सूत्रस्थास्यपदस्य तद्धितान्तत्वानभ्युपगमे 'आस्ये तुल्यदेशप्रयत्नम्' इति वार्तिककृतोक्तेः, आस्योपादानस्य प्रयोजने पृष्टे 'प्रयत्नविशेषणम् आस्यपदोपादनम्' इति सार्थक्यं प्रतिपाद्य 'यथा तृतीयास्तथा पञ्चमाः, आनुनासिक्यमेषामधिको गुणः' इति भाष्यकृतोक्तम्। तत्र आस्यपदेन व्यावर्त्यानां सावर्ण्यानुपयुक्तानां गणनाप्रसङ्गे आनुनासिक्यस्योपादानेन गुणशब्देन कथनाच्च तस्य=आनुनासिक्यस्य बाह्यप्रयत्नोक्त्या 'तुल्यास्यम्' इति सूत्रे नासिकाया आस्यपदेन नासिकास्थप्रयत्नस्य च ग्रहणाभावस्य बोधनेन समानस्थानिकत्वात् सवर्णसंज्ञा सिद्धा। यदि नासिकाया आस्यपदेन ग्रहणमिष्येत, तदा सावर्ण्यानुपयोगिनां मध्ये एतत्प्रदर्शनस्यानौचित्यम्। एवं नासिकास्थप्रयत्नस्य आस्यपदव्यावर्त्यत्वेन कथनस्यासङ्गत्या च नासिकाया आस्यपदेन न ग्रहणमिति तात्पर्यम्।

'नासिका च' इसमें उक्त चकार स्व स्व वर्ग के अनुकूल ताल्वादि स्थान का समुच्चायक है। प्रातिशाख्य मे नासिका स्थान का निर्देश नहीं है। इसका परिहार करते हैं—अतएव इति। प्रातिशाख्य का 'नासिका में उत्पन्न' इस अर्थ के बोधक नासिक्य शब्द से ञमङणन इसका व्यवहार किया गया है।

खण्डनार्थ किसी प्राचीन का मत प्रस्तुत करते हैं—यत्तु इति। 'अनुस्वारयमानाञ्च' इत्यादि शिक्षावचन से उक्त वर्णों का नासिका करण है। नासिका के स्थान न होने से ही ककार ङकार की परस्पर सवर्णसंज्ञा सिद्ध होती है। अन्यथा ङकार का नासिकास्थान अधिक होने से यावत्स्थानसाम्य नहीं हैं। जिस किसी स्थान की समानता से उक्त संज्ञा होने पर ञकार और मकार की सवर्ण संज्ञा की आपत्ति हो जायगी ?

अकारादिनिष्ठानुनासिक्यस्य 'भेदकत्वाद् गुणस्य' इत्यादौ गुणत्वेन व्यवहारस्तु कण्ठाद्यवच्छिन्नवायुसंयोगेनोत्पन्नेषु नासावच्छिन्नवायुसंयोगेन तद्रूपधर्मोत्पत्त्या। एवञ्च नासिकायास्तत्र गुणजनकत्वादनुनासिकाकारादीनां नासिकास्थानं नोक्तं मूले।

'एकोऽयमात्मोदकन्नाम तस्य गुणभेदादन्यत्वं भवति—अन्यदिदं शीतम्, अन्यदिदमुष्णम्' इति दृष्टान्तपरभाष्येण तथैव प्रतीतेः।

नासिकास्थप्रयत्नस्य गुणत्वात् गुणा अभेदका इति पक्षमाश्रित्य तस्य न ग्रहणमिति बोध्यम्। येषां मते नासिका आस्याद् बहिर्भूता, तेषां मते कङ्योः सावर्ण्यं सुलभम्। 'आस्ये स्थानं यस्य तुल्यम्' इत्यर्थेन नासिकास्थानस्य बहिर्भूततया तस्याधिक्येऽपि क्षतिविरहात्। पक्षोऽयं विस्तरेण **उद्द्योते** निरूपित इत्यलं विस्तरेण।

अक्षरार्थस्तु—अकारादिवृत्तितः आनुनासिक्यस्य गुणशब्देन 'भेदकत्वाद् गुणस्य' इत्यादौ गुणत्वेन व्यवहारः। तथोपपादयति—**कण्ठाद्यवच्छिन्नेति**। कण्ठावच्छेदेन जायमानो यो वायुसंयोगस्तेन उत्पन्नेषु अकारादिषु पश्चात् नासिकावच्छेदेन जायमानवायुसंयोगेन तद्रूपस्य आनुनासिक्यरूपधर्मस्य उत्पत्त्या षट्त्वादिधर्मवत् गुणपदेन व्यवहारो भवति। एवञ्च ईदृशरीत्या व्यवहारस्योपपादनात् नासिकाया अकारादिषु जातेषु गुणजनकत्वात् सानुनासिकाकारादीनां स्थानत्वेन नासिकायाः निर्देशो न कृतो मूलकृता। तथा च नासिकायास्तत्र आनुनासिक्यरूपं गुणजनकत्वम्, न तु गुणिनोऽकारस्यापि।

भाष्यान्तरमपि प्रमाणयति—**एकोऽयमिति**। यथा एकमेव द्रव्यं जलं उष्णत्वशीतत्वरूपगुणभेदात् 'इदमुष्णम्', 'इदं शीतं जलम्' इति भेदावगाहिनी प्रतीतिः सर्वजनसिद्धा, तथैवात्रापि एकस्या एव अकारव्यक्तेः अनुनासिकत्वादिभेदेन भिन्नत्वं बोध्यम्' इत्यनेनापि भाष्येण आनुनासिक्यस्य गुणत्वं सिद्धम्। न चैवम् वर्णोत्पत्तेः प्राग्भाविनाम् उदात्तत्वादीनां गुणत्वव्यवहारो भाष्यकृत्कृतोऽसङ्गतः स्यात् इति वाच्यम्; सवर्णसंज्ञायाम् अनुपयोगित्वम् आन्तरतम्यपरीक्षोपयोगित्वञ्च सादृश्यमाश्रित्य गौणः गुणशब्दप्रयोगस्तत्र। ञ म ङ ण ना नान्तु अनुनासिकत्वगुणरहितस्य स्वरूपस्य अनुपलम्भात् उभयावच्छेदेन = कण्ठादिस्थानावच्छेदेन नासिकावच्छेदेन च वायुसंयोगे तदुत्तरमेव तेषां वर्णानां निष्पादनात् अन्यतरस्य स्थानत्वे नियामकाभावात् उभे अपि स्थाने भवतः। पाणिनीयशिक्षायां ञमादीनां नासिकास्थानत्वं स्पष्टतया अनुक्तमपि चेन संगृह्यते। अतएव = ङकारादीनां नासिकास्थानत्वादेव। **अकार इत्यादीति**। आदिपदेन तालव्य इकारादीनां संग्रहः। अत एव = तेषामनुनासिकत्वादेव। अग्रे सर्वं सुस्पष्टम्।

यह कथन ठीक नहीं है। 'अस्यन्ति अनेन वर्णान्' ऐसा भाष्य की करणव्युत्पत्ति से 'जिसके द्वारा वर्णों का निस्सारण होता है' इस प्रकार की प्रतीति के कारण कण्ठ तालु आदि भी स्थान नहीं हैं, किन्तु करण हैं। इसमें स्थानता का व्यवहार वर्णाभिव्यक्तिजनक वायुसंयोग के आधारभूत, वर्णों की अभिव्यक्ति के जनक कण्ठ ताल्वादि में वर्णाधारता के आरोप द्वारा होता है। इस वर्णाधारता का आरोप जिस प्रकार कण्ठादि में होने से कण्ठादि स्थान कहे जाते हैं, उसी प्रकार वर्णाधारत्व का नासिका में भी आरोप होने से इसमें भी स्थानत्व का व्यवहार होगा।

आत्माऽत्र द्रव्यम्। उदात्तत्वादीनां गुणत्वव्यवहारस्तु सावर्ण्यानुपयुक्तत्वाऽऽन्तरतम्यपरीक्षोपयोगित्वरूपसादृश्येनेति बोद्धव्यम्।

ङादीनान्तु तद्गुणरहितस्वरूपानुपलम्भेन उभयावच्छेदेन वायुसंयोगोत्तरमेव स्वरूपोत्पत्त्या विनिगमनाविरहेणोभयोः स्थानत्वम्। 'अनुस्वारयमानाञ्च' (पा० शि० २२) इति शिक्षायां चेन ङादीनामपि सङ्ग्रह इति युक्तम्। अत एव 'कण्ठ्योऽकारः' इत्याद्युक्त्वा 'नासिक्यान्नासिक्ययमानुस्वारानिति स्थानानि' इत्युक्तं प्रातिशाख्ये। 'नासिक्याः ङञणनमाः' इति तद्व्याख्यातारः। कङयोः सावर्ण्यन्तु भवत्येव।

'आस्ये तुल्यदेशप्रयत्नम्' (का० वा०) इति वार्त्तिके 'किमास्योपादाने प्रयोजनम्?' इति प्रश्ने 'प्रयत्नविशेषणमास्योपादानम्' इत्युक्त्वा तद्व्यावर्त्यत्वेन बाह्यप्रयत्नान् प्रदर्श्य 'यथा तृतीयास्तथा पञ्चमाः, आनुनासिक्यमेषामधिको गुणः' इति

तत्तत् स्थानों में जिह्वाग्रभागादि के सम्बन्ध से वर्णोत्पत्ति के कारण जिह्वाग्रादि एवं तादृश सम्बन्धजनक आभ्यन्तर प्रयत्न स्पृष्टता आदि में कारणत्व का व्यवहार होता है।

बाह्य प्रयत्न के सम्बन्ध में लिखते हैं—**वर्णाभिव्यक्त्यनन्तर** इति। वर्णों की अभिव्यक्ति के अनन्तर होने वाला, सवर्ण संज्ञा में अनुपयोगी तथा अन्तरतम के विचार में उपयोगी, एवं कण्ठविवर के विकास आदि जो कि मुख प्रदेश से बहिर्भूत है, उस कार्य का जनक यत्न=बाह्य प्रयत्न को गुण शब्द से कहते हैं। गुण भेदक है। यहाँ गुण शब्द से अकार आदि वृत्ति अनुनासिकत्व का व्यवहार इसलिये किया गया है कि कण्ठाद्यवच्छिन्न वायुसंयोग से उत्पन्न अकारादि वर्णों में नासागत वायुसंयोग से अनुनासिकत्व की उत्पत्ति होने से शब्दरूप द्रव्य में अनन्तरभावी अनुनासिकत्व गुण उत्पन्न होता है। अतः इसको 'गुण' से व्यवहार किया गया। अत एव अकारादि वर्णों में नासिका के द्वारा अनुनासिकत्व गुण की (न कि गुणी की) उत्पत्ति होने से सानुनासिक अकारादि का स्थान परम मूल में पृथक् निर्दिष्ट नहीं किया। एक ही जलरूपी द्रव्य की उष्णत्व-शीतत्व रूप गुण के भेद से भिन्न भिन्न प्रतीति होती है—यह शीत है, यह गर्म है। गुण में भेदकत्व-प्रतिपादक इस दृष्टान्तभाष्य से उक्तार्थ की ही सिद्धि होती है। उदात्तत्वादि में गुणत्व व्यवहार सावर्ण्यानुपयोगित्व, आन्तरतम्य, परीक्षोपयोगित्व रूप सादृश्य से किया गया है। प्रकृत में ङञ इत्यादि का स्वरूप अनुनासिकत्व धर्म से विहीन अकारादि के समान उपलब्ध न होने से मुख और नासिका—उभयगत वायुसंयोग से इनके स्वरूप की उत्पत्ति होती है। अतः अन्यतरसाधक प्रमाण के अभाव से दोनों ही इनके स्थान हैं। 'अनुस्वारयमानाञ्च' इस प्रातिशाख्य में चकार से ङकार आदि वर्णों का संग्रह है। अतः इनका नासिकास्थान प्रातिशाख्यसम्मत है। अत एव 'अकार कण्ठस्थानी है' इत्यादि कथनानन्तर 'नासिक्यान्नासिक्ययमानुस्वारान् इति स्थानानि' ऐसा प्रातिशाख्य में उल्लेख है।

नासिक्य शब्द से ञ म ङ ण न इनका ग्रहण विवक्षित है। इस सन्दर्भ से नासिका का स्थान होना निश्चित हो गया। ऐसी अवस्था में क ङ की परस्पर सवर्ण संज्ञा नहीं होगी; क्योंकि ङकार का नासिका स्थान अधिक है?—यह शङ्का बद्धमूल होकर स्थित है।

भाष्येण तस्य बाह्यप्रयत्नत्वोक्त्याऽत्र सूत्रे नासिकाया आस्यशब्देन, तत्रत्यप्रयत्नस्य च प्रयत्नशब्देनाग्रहणबोधनात्, नासिका आस्यबाह्येति वदतां मते तद्ग्रहणाभावाच्च।

अत एव बाह्यप्रयत्नानुपक्रम्य—

'अमोऽनुनासिका न ह्रौ, नादिनो हझषः स्मृताः।
ईषन्नादा यणश्चैव, श्वासिनस्तु खफादयः'॥ (पा० शि० ३९)
'ईषच्छ्वासाँश्चरो विद्यात्' इत्युक्तं शिक्षायाम्। (पा० शि० ४०)

नादेति संवारघोषयोरुपलक्षणम्, श्वासेति विवाराघोषयोः। न ह्रावित्युपलक्षणम् ऐचः सर्वस्य, प्लुतऌकारस्य च, अनुनासिकस्यादर्शनादित्यलम्।

'एदैतोः' इत्यादौ लोकानुभवसिद्धार्थानुवादके तपरशास्त्राप्रवृत्त्या प्लुतानामपि तत्स्थानत्वं बोध्यम्। तथा च पाणिनीयशिक्षा—

'कण्ठ्यावहाविचुयशास्तालव्याः, ओष्ठजावुपू।
स्युर्मूर्धन्या ऋटुरषा दन्त्याः ऌतुलसाः स्मृताः'॥ (१७)
'जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः।
एऐ तु कण्ठ्यतालव्या ओऔ कण्ठोष्ठजौ स्मृतौ'॥ (१८)
'अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च'॥ (१३)
'हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम्।
उरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्॥' (१६) इति।

समाधान—तुल्यास्य सूत्र में, 'आस्ये तुल्यदेशप्रयत्नम्' इस प्रकार के न्यासघटक आस्य-पदोपादान का प्रयोजन पूछने पर आस्य पद केवल प्रयत्न का विशेषण है। इस कारण से प्रयत्न शब्द से असंगृहीत बाह्य प्रयत्नों का प्रदर्शन करने के अनन्तर 'जिस प्रकार तृतीय है उसी प्रकार पञ्चम है, केवल अनुनासिकत्व गुण अधिक है' इस प्रकार की भाष्योक्ति से अनुनासिकत्व में बाह्य प्रयत्नत्व का उपक्रम और गुण शब्द के द्वारा कथन से यह सिद्ध होता है कि नासिका और नासिकास्थ प्रयत्न का 'आस्य' पद से ग्रहण नहीं होता। ककार ङकार की सवर्णसंज्ञा में नासिका स्थान की अतुल्यता बाधक थी। किन्तु उसका स्थान मान लेने पर भी 'तुल्यास्य' सूत्र के आस्य पद से नासिका का ग्रहण न होने से उसकी अतुल्यता कुछ नहीं कर सकती।

नासिका को मुख से बहिर्भूत मानने वाले के यहाँ शङ्का ही नहीं है; क्योंकि नासिका आस्यभव[1] नहीं है। अत एव बाह्य प्रयत्नों का उपक्रम कर 'अमोऽनुनासिका' इत्यादि शिक्षा वचन है; अन्यथा अनुनासिक का बाह्य प्रयत्नों के उपक्रम में निर्देश असङ्गत हो जायगा।

एदैतोः इति। लोकानुभवसिद्ध अर्थ का इस वचन के द्वारा अनुवाद है। अतः अनुवादक में 'तपर' सूत्र की प्रवृत्ति न होने से प्लुत का भी संग्रह होता है। पाणिनीयशिक्षा मूल में पठित है, उसका अर्थ सुगम है।

---

१. यदि नासिका आस्यभव से गृहीत होती तो तन्निष्ठ प्रयत्न की व्यावर्त्य रूप से बाह्य प्रयत्न में गणना नहीं होती, अतः आस्यबाह्य नासिका है।

प्रयत्नो द्विधा । आभ्यन्तरो बाह्यश्च । आद्यश्चतुर्धा स्पृष्टेषत्स्पृष्ट-

---

यत्तु—'दन्तोष्ठादि समुदितं स्थानम्' इति ? तन्न; शिक्षायाम् 'दन्त्योष्ठ्यः' 'कण्ठ्यतालव्यौ' इत्यादौ 'तत्र भवः' (४ । ३ । ५३) इत्यधिकारविहितयतः प्रत्येकमनुत्पत्त्यापत्तेः ।

'दन्तोष्ठ्यम्' इत्यादि त्वसङ्गतमेव; स्वाङ्गसमुदायस्य स्वाङ्गत्वाभाववच्छरीरावयवसमुदायस्य शरीरावयवत्वाभावात् । एतेन 'दन्तोष्ठरूपमतिरिक्तं स्थानम्' इत्यपास्तम्, 'अष्टौ स्थानानि' (पा० शि० १३) इति प्रतिज्ञाविरोधाच्चेति दिक् ।

सूत्रे प्रशब्देन विलक्षणार्थबोधेऽपि लोके यत्नप्रयत्नयोः पर्यायतेति ध्वनयन्नाह—प्रयत्नो द्विधेति । क्वचिद् 'यत्न' इत्येव पाठः । चतुर्धेति । यत्तु—

'स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम् ।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च' ॥ (२१)

यत्तु दन्तोष्ठादीति । दन्तोष्ठं समुदितं स्थानमिति तु न युक्तम्, शिक्षायां दन्तोष्ठ्य-कण्ठ्य-तालव्य-शब्दपाठेन 'तत्र भवः' इत्यधिकारे विहितस्य 'शरीरावयवात्' इति यत्प्रत्ययस्य समुदायस्य स्थानत्वेन प्रत्येकस्मिन् स्थानत्वाभावात् एकैकस्मात् अनुत्पत्तिः स्यात् । दन्तोष्ठ्यमित्यादिपाठस्तु अयुक्त एव; यथैके कस्य स्वाङ्गत्वेऽपि स्वाङ्गसमुदायस्य स्वाङ्गसमुदायवाचकस्य न स्वाङ्गत्वम् = स्वाङ्गवाचकत्वपर्यासिता, तथा शरीरावयवसमुदायस्य न शरीरावयवत्वमिति रीत्या समुदायात् यत्प्रत्ययस्य अनुत्पादेन तादृशरूपासिद्धेः । एतेन=दन्तोष्ठ्यमित्यस्यानिष्पादेन, दन्तोष्ठ्यमतिरिक्तं स्थानमिति वदन्तः परास्ताः । लोके यत्नप्रयत्नयोः पर्यायतया प्रयोगात् 'प्रयत्नो द्विधा' इत्युक्तम् । नङ्प्रत्ययान्तस्य पुंस्त्वात् 'प्रयत्नः' इत्येव पाठो युक्तः । केचित्तु 'जानीयात्' इत्यध्याहृत्य प्रयत्नमिति पाठं युक्तं मन्यन्ते । एवं रीत्या अपपाठस्य समर्थने 'द्विधा भेदः प्रयत्नस्य' इत्यादिपदान्तराध्याहारेण अनुपयोगिनां पदविन्यासानां समर्थनस्य कर्तुं शक्यत्वात् । न प्रयोगसमर्थने ग्रन्थकारस्य तात्पर्यम् । नङन्तस्य पुंस्त्वप्रतिपादने तात्पर्यात् ।

दन्त्योष्ठ दोनों मिलकर स्थान है—यह पक्ष ठीक नहीं; शिक्षा में दन्त्योष्ठ्य इत्यादि में प्रत्येक से भावार्थ में यत् प्रत्यय दीखते हैं, समुदाय को स्थान मानने पर प्रत्येक से यत् प्रत्यय असाधु हो जायगा । 'दन्त्योष्ठ्यम्' ऐसा पाठ असङ्गत है । जिस प्रकार स्वाङ्गसमुदाय स्वाङ्ग नहीं होता, उसी प्रकार शरीरावयवसमुदाय भी शरीरावयव नहीं होगा । अतः समुदाय के शरीरावयव न होने से 'शरीरावयवाद् यत्' इससे यत् प्रत्यय नहीं होगा । 'दन्त्योष्ठ्यम्' इसमें प्रत्येक से यत् प्रत्यय होने से दन्त्योष्ठ्य एक अलग स्थान है—यह कथन असङ्गत है । 'आठ स्थान हैं'—इस शिक्षा की उक्ति से विरोध भी प्राप्त होगा । क्योंकि इसके अतिरिक्त स्थान मानने पर स्थान का एक भेद अधिक हो जाने से आठ स्थान होने की प्रतिज्ञा की विसङ्गति हो जायगी ।

तुल्यास्य' इस सूत्र में प्र शब्द के उपादान से आभ्यन्तर प्रयत्न की ही प्रतीति होने पर भी लोक में यत्न और प्रयत्न इन दोनों की पर्यायता है ।

शङ्का—'स्वर और ऊष्मा का विवृत, ए तथा ओ का विवृततर एवं ऐ औ का विवृततम

विवृत-संवृतभेदात् । तत्र स्पृष्टं प्रयतनं स्पर्शानाम् । ईषत्स्पृष्टमन्तःस्थानाम् । विवृतमूष्मणां स्वराणां च ।

ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायां तु विवृतमेव ।

इति शिक्षावाक्याद् विवृततर-विवृततमयोः प्रतीत्या 'नाज्झलौ' (१ । १ । १०) इति सूत्रभाष्यादूष्मणामीषद्विवृतत्वस्य च प्रतीत्या चतुर्धेत्यसङ्गतमिति, तन्न; 'नाज्झलौ' (१ । १ । १०) इति सूत्रेण विवृतत्वव्याप्यानामेषां सवर्णसंज्ञानुपयुक्तत्वबोधनमित्याशयात् ।

भाष्यमते तु सन्तु सप्त प्रयत्नाः । एवञ्चैदैतोरोदौतोश्च न सावर्ण्यप्रसक्तिः; प्रयत्नभेदादिति बोद्धव्यम् ।

'नाज्झलौ' (१ । १ । १०) इति सूत्रमपि प्रयत्नभेदप्राप्तसावर्ण्याभावानुवादकं सत् तस्यैव बोधकम् । अत एव भाष्ये 'तन्न वक्तव्यम्' इति नोक्तम् ।

स्पृष्टादीनामाभ्यन्तरत्वं त्वोष्ठप्रभृतिकाकलकपर्यन्तरूपास्यान्तर्गततत्तत्स्थानेषु जिह्वाग्रादीनां स्पर्शेषत्स्पर्श-दूरावस्थान-समीपावस्थानरूपाभ्यन्तरकार्यकारित्वाद्, वर्णोत्पत्त्यव्यवहितप्राग्भावित्वाच्च बोध्यम् ।

तत्र बहूनामेकस्थानत्वेऽपि कस्यचिदुच्चारणे सम्यक्स्पर्शः, कस्यचिदीषदिति शिक्षाकारोक्तिमनुभवं चानुसृत्य विवेक्तव्यम् । प्रयतनमिति नपुंसके भावे ल्युट् । प्रयत्नमित्यपपाठः; नङन्तस्य पुंस्त्वात् । तथा च शिक्षा—'स्वराणामूष्मणाञ्च' (पा० शि० २१) इत्याद्यनन्तरम्—

'अचोऽस्पृष्टाः यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः ।
शेषाः स्पृष्टा हलः प्रोक्ता........' (पा० शि० ३८) इति ।

प्रयत्न है'—इस शिक्षावचन, तथा 'ऊष्मा के ईषद्विवृत प्रयत्न है' इस 'नांज्झलौ' सूत्रस्थ भाष्य के अनुसार प्रयत्न के सप्तविध होने से चतुर्विध का निर्देश असङ्गत है ?

समाधान—प्रयत्नभेद से अच् की हल् के साथ सवर्ण संज्ञा व्यावृत्त हो ही जाती, पुनः इसके लिये 'नाज्झलौ' इसका आरम्भ व्यर्थ होने से 'विवृतत्व व्याप्य विवृततर विवृततम तथा ईषद् विवृत सवर्ण संज्ञा के उपयुक्त नहीं'—इस प्रकार की कल्पना करने से असङ्गति का परिहार करना चाहिये । भाष्यमत में प्रयत्नों के सात भेद हैं । अतः एकार का ऐकार के साथ प्रयत्न-भेद होने से सवर्णसंज्ञा की प्राप्ति नहीं है । इस पक्ष में प्रयत्नभेद से सिद्ध सावर्ण्याभाव का सूत्र अनुवादक है । सिद्धार्थ का सूत्र से अनुवाद है । इसी कारण इसका 'तन्न वक्तव्यम्' इस प्रकार निराकरण भाष्यकार ने नहीं किया ।

स्पृष्ट ईषत्स्पृष्ट इत्यादि आभ्यन्तर प्रयत्न इसलिये कहे जाते हैं कि ओष्ठ प्रभृति से काकलक पर्यन्त देश आस्य पद से ग्राह्य हैं । उसके अन्तर्गत तत्तत् स्थानों में जिह्वाग्रादि का स्पर्श थोड़ा स्पर्श, दूरावस्थान और समीप स्थिति रूप आभ्यन्तर कार्यों के उत्पादक एवं वर्णोत्पत्ति के पूर्ववर्ती हैं । एक ही स्थान में रहने पर भी किसी के उच्चारण में पूर्ण स्पर्श, किसी में थोड़ा स्पर्श—इसका निर्णय शिक्षाकार की उक्ति एवं स्वानुभव के द्वारा करना चाहिये ।

प्रयतनम् इसमें भाव में ल्युट् है । प्रयत्नः नङ् प्रत्ययान्त होने से पुँल्लिङ्ग है । अतः

अचोऽस्पृष्टाः स्पर्शाभावरूपविवृतत्ववन्तः । यणस्त्वीषदिति । अनेन तेषामीषत्स्पृष्टत्वमीषद्विवृतत्वञ्च बोधितम् । नेम इत्यर्धे । तेन शलामीषद्विवृतत्वम्, यणपेक्षयाऽधिकविवृतत्वं चेति बोद्धव्यम् ।

अत्र शिक्षोक्तव्याप्यधर्मवतां व्यापकधर्ममादाय न सावर्ण्यमिति यणां चवर्गादिभिर्न सावर्ण्यम् । तेन 'अञ्चितः' इत्यादौ न यादिः परसवर्णः ।

विवृत्वतमेवेति । **प्रक्रियादशायां विवृतत्वं प्रतिज्ञेयमित्यर्थः । तेन दण्डाढकादौ दीर्घसिद्धिः । अन्यथा संवृतस्य ह्रस्वाकारस्य विवृतेन दीर्घेण सावर्ण्याभावात् स न स्यादिति भावः । दीर्घाकारस्य विवृततरत्वन्तु पाणिनिशिक्षाऽनुक्तत्वान्नैतच्छास्त्रप्रक्रियोपयोगीति दिक् ॥**

तस्य=ह्रस्वाकारस्य । आद्याकारस्य विवृतत्वात् द्वितीयस्य च तस्य संवृतत्वात् प्रयत्नभेदेन सावर्ण्याभावात् 'अ अ' इति सूत्रे दीर्घो नेति कश्चित् । वस्तुतो वर्णसमाम्नाये विवृतस्य अकारस्य पाठेन संवृताकारस्य अच्त्वाभावादेव न दीर्घप्रसङ्गः । अत एव 'आद् गुणः' इत्यनेन गुणोऽपि न । 'प्रयत्नभेदाद्दीर्घाभावः' इति मूलपंक्तेरयमाशयः—अच्च दीर्घश्चेति अद्दीर्घौ, तयोरभावः अद्दीर्घाभावः, प्रयत्नभेदेन अद्दीर्घाभावः—इत्येवं तृतीयासमासे प्रयत्नभेदाद्दीर्घाभाव इति । अत्-पदेन अकारो गृह्यते; द्वयोरकारस्य स्थाने गुणेन अकारस्यैव प्राप्तेः । जातिपक्षे अज्मात्रस्य ग्रहणेन संवृतस्याप्यकारस्य अच्त्वात् 'अ अ' इति सूत्रे सन्धेर्वारणं संहिताया अविवक्षया बोध्यम् । एकस्मिन् सूत्रे संहिताया अविक्षायां सूत्रभेदः स्यात्—इति मते 'अ अ' इति सूत्रे अस्य स्थाने आदेशस्य विवक्षितत्वेन 'अस्य अ' इति षष्ठीसमासो विधेयः । तथाच समासे संहिताया नित्यत्वेन तदविवक्षायाः कर्तुमशक्यतया 'सुपां सुलुग्' इति सूत्रेण ङसः स्थाने सुरूपादेव तस्य रुत्वे यत्वे लोपे च तेषामसिद्धत्वात् सन्धिकार्यं नेति **सदाशिवभट्टाः** ।

'प्रयत्नम्' ऐसा पाठ अशुद्ध है । कादि वर्णों के स्पृष्ट प्रयत्न होने में प्रमाणोपन्यास करते हैं—**अचोऽस्पृष्टा इति** । अच् वर्ण अस्पृष्ट अर्थात् स्पर्शाभावरूप विवृतत्ववान् है । यण् में ईषत् स्पृष्टत्व और ईषद् विवृतत्व का बोधन है । नेम शब्द का आधा अर्थ है । शल् का ईषद् विवृत और यण् की अपेक्षा अधिक विवृत है ।

शङ्का—यकार चकार दोनों का ईषत्स्पृष्ट प्रयत्न होने से स्पृष्टत्वप्रयत्नव्यापक धर्म है । अतः स्थान-प्रयत्न की समानता होने के कारण परस्पर सवर्णसंज्ञा क्यों नहीं हुई ?

समाधान—शिक्षा में प्रयत्नभेदकथनसामर्थ्य से व्याप्य धर्म वालों की व्यापक धर्म के साम्य द्वारा सवर्णसंज्ञा नहीं होती । इसलिये अञ्चितः इसमें परसवर्ण यकार नहीं हुआ ।

विवृतमेव इति । प्रयोग में अकार के संवृत होने पर भी प्रक्रियादशा में ह्रस्वाकार को विवृत ही समझना चाहिये । क्योंकि 'अ अ' यह त्रिपादी का अन्तिम सूत्र है । अतः सब सूत्रों की दृष्टि में असिद्ध होने स संवृत नहीं है । इसी कारण दण्ड + आढ़कम् इत्यादि स्थलों में दोनों के विवृत होने से सवर्णसंज्ञा द्वारा दीर्घ सिद्ध हुआ । अकारों के संवृत रहने पर विवृत अकार के साथ सपर्णसंज्ञा प्रयत्नभेद से नहीं होगी । अत एव दीर्घ भी नहीं होगा ।

अकार प्रयोगदशा में संवृत है—इसमें प्रमाण 'अ अ' यह सूत्र है । यहाँ पहला विवृत, द्वितीय

एतच्च सूत्रकारेण ज्ञापितम् । तथाहि—

११. अ अ इति । ८ । ४ । ६८ । **विवृतमनूद्य संवृतोऽनेन विधीयते । अस्य चाष्टाध्यायीं सम्पूर्णां प्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव ।**

तथा च सूत्रम्—

१२. पूर्वत्रासिद्धम् । ८ । २ । १ । **अधिकारोऽयम् ।**

तस्य प्रयोगे संवृतत्वे मानमाह—अ अ (८ । ४ । ६८) । प्रयत्नभेदाद्दीर्घाभावः । अत्रोद्देश्ये सवर्णग्रहणं जातिनिर्देशो वा न; व्याख्यानात् ।

अत्र = 'अ अ' इति सूत्रे । उद्देश्ये = प्रथमाकारे । व्यक्तिपक्षे अणुदित्सूत्रेण सवर्णानां ग्रहणे जातिपक्षाश्रयणे अत्वावच्छिन्नाकारमात्रस्य वा ग्रहणे दीर्घप्लुतयोरपि संवृतत्वमापद्येत ? इति शङ्कायामाह—**सवर्णग्रहणमिति ।** अत्र प्रमाणमाह—**व्याख्यानादिति ।** अस्य सूत्रस्य अष्टाध्याय्यामन्ते पठितत्वेन सर्वापेक्षया परत्रिपादीस्थत्वेन यथोद्देशपक्षे सिद्धत्वात् संवृतत्वाप्राप्तेः । कार्यकाले तु तपरनिर्देशेन 'अद् अ' इति सूत्रं भाष्यकृता कृतम् । 'तः परो यस्मात्' इत्यर्थेन न अकारेण दीर्घ-प्लुतयोर्ग्रहणम् । तात्परोऽपि तपरः, तथाच विधेयेन अकारेण उदात्तानुनासिकादीनां ग्रहणमपि सिद्धम्—इति **चिदस्थिमालाकृतः ।**

अथवा 'तुल्यास्य' इत्यादि निर्देशरूपं व्याख्यानमत्र बोध्यम् । प्रथमाकारेण दीर्घादीनामपि ग्रहणे दीर्घाकारस्यापि 'अ अ' इत्यनेन संवृतत्वापत्तौ ह्रस्वाकारश्रवणं प्रसज्येत, तथाच निर्देशासङ्गतिः स्यादिति ।

संवृत होने से दोनों अकारों का प्रयत्नभेद है । अतः सूत्र में दीर्घ नहीं किया गया है । प्रथम अकार जो कि उद्देश्य है उससे सवर्णमात्र का अथवा जातिपक्ष का आश्रयण कर अत्वजाति से अवच्छिन्नमात्र का ग्रहण नहीं होता है । 'सुपि च' इस सूत्र का दीर्घविधानरूप व्याख्यान इसमें प्रमाण है । अन्यथा रामाभ्याम् इत्यादि स्थल में इस सूत्र से आकार विवृत को संवृत अ रूप विधान हो जाने से दीर्घादेश व्यर्थ हो जाता है ।

पूर्वत्रासिद्धम् इति । इस सूत्र का पाठ आठवें अध्याय के द्वितीय पाद के आरम्भ में है । इस सूत्र से पूर्व सात अध्याय तथा आठवें अध्याय का एक पाद अवशिष्ट है । अतः सपादसप्ताध्यायी पूर्व हुई । पूर्व की दृष्टि में अवशिष्ट त्रिपादी के असिद्धत्व का सूत्र से विधान है । त्रिपादी शास्त्रों में पूर्व त्रिपादीशास्त्र की दृष्टि में पर त्रिपादीशास्त्र की असिद्धता नहीं हो सकती । इसलिये इस सूत्र को अधिकार मानते हैं । अधिकार होने से प्रत्येक अग्रिम त्रिपादी सूत्र में इसकी उपस्थिति के द्वारा 'इदञ्च पूर्वत्रासिद्धम्' इस प्रकार वाक्यभेद से अन्वय होता है । ऐसा करने से पूर्व की अपेक्षा परत्रिपादी की असिद्धता का लाभ हो जाता है । अधिकार मानने से गोधुङ्मान्' इसकी सिद्धि हुई । गोदुह् के हकार का घत्व करने के बाद परत्व से भष्भाव और अन्तरङ्गत्व होने से अनुनासिक को बाधकर जश्त्व होगा, उसके अनन्तर झषन्त न रहने से भष्भाव नहीं सकेगा । अधिकारत्वपक्ष में जश्त्व, अनुनासिक—दोनों के भष्भावसूत्र की दृष्टि में असिद्ध हो जाने भष्भाव की निष्पत्ति हो जाती है ।

तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात् ॥

अधिकारत्वे फलमाह—त्रिपाद्यामपीति। अन्यथा 'गोधुङ्मान्' इत्यत्र घत्व-जश्त्वानुनासिकेषु भष्भावानापत्तिरिति भावः। वस्तुतो घत्वे कृते 'झयः' (८।२।१०) इति वत्वापत्तिर्दोषः। न च ततः परत्वाज्जश्त्वानुनासिकत्वयोस्तदप्राप्तिरिति वाच्यम्;

'पूर्वत्रासिद्धम्' इत्यस्य अधिकारत्वे फलमाह—**त्रिपाद्यामिति**। अयं भावः—गोदुह् प्रातिपदिकात् मतुप्प्रत्यये घत्व-जश्त्वयोः प्राप्तौ पदान्ते घत्वस्य जश्त्वापवादत्वात् पूर्वं घत्वे कृते ततो नित्यत्वाद् अनुनासिके ङकारे जाते झषन्तत्वाभावाद् भष्भावो न स्यात्। त्रिपाद्यां पूर्वं प्रति परमसिद्धमित्यर्थस्य अधिकारलब्धस्य स्वीकारे तु 'एकाचो वशो भष्' (८।२।३७) इति भष्भावसूत्रदृष्ट्या जश्त्वानुनासिकत्वयोः परत्रिपादीस्थत्वेन असिद्धत्वाद् भष्भावे अनुनासिकस्यासिद्धत्वात् पूर्वं जश्त्वे ततोऽनुनासिके गोधुङ्मान् इति सिध्यति। 'झयः' (८।२।१०) इत्येतद्दृष्ट्या 'यरोऽनुनासिके' (८।४।४५) इत्यस्य जश्त्वस्य, 'दादेर्धातोः' (८।२।३२) इति विहितघत्वस्य चासिद्धया झयन्तत्वविरहात् वत्वं न भवति। अधिकारसूत्रत्वे सत्येव 'त्रिपाद्यामपि पूर्वं प्रति परं त्रिपादीस्थसूत्रमसिद्धम्' इत्यर्थस्य लाभेन पूर्वत्रिपादीस्थसूत्रदृष्ट्या परस्य त्रैपादिकस्यासिद्धत्वेन उक्तरूपस्य सिद्धिः। अन्यथा 'पूर्वत्रासिद्धम्' इति सूत्रमष्टाध्यय्यां यत्र पठितं ततः पूर्वस्मिन् सूत्रे कर्तव्ये ततः परस्यासिद्धत्वमित्येवार्थः स्यात्, न तु त्रिपाद्यामित्याद्यपि।

'पूर्वत्रासिद्धम्' इति सूत्रमष्टाध्याय्याम् अष्टमाध्यायस्य द्वितीयपादे प्रथमं सूत्रम्। अस्मात् पूर्वं सप्त अध्यायाः एकः पादश्च। सप्तानामध्यायानां समाहारः सप्ताध्यायीति 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इत्यनेन स्त्रीत्वातिदेशे 'द्विगोः' इति ङीपि सिध्यति। पादेन सहिता सप्ताध्यायी सपादसप्ताध्यायी। त्रयाणां पादानां समाहारः त्रिपादी। अस्यापि पूर्ववदेव सिद्धिः। पाणिनिव्याकरणे अष्टौ अध्यायाः। पूर्वत्वं परत्वञ्च सापेक्षत्वात् किञ्चिदपेक्ष्य भवति। तादृशापेक्षायां तत्सूत्रापेक्षया पूर्वत्वमिति प्रत्यासत्त्या लभ्यते। ततश्चेदं फलितम्—सपाद-सप्ताध्यायीस्थ सूत्रापेक्षया त्रिपादीस्थानां परेषां सूत्राणामसिद्धत्वम् इति सूत्रार्थविवेकः। अधिकारत्वे फलं भष्भावसिद्धिरूपं न, किन्तु गोधुङ्मानित्यत्र वत्वाभावः फलं बोध्यम्। तत्र घत्वे कृते निरवकाशत्वात् जश्त्वानुनासिकाभ्यां पूर्वं 'झयः' इत्यनेन वत्वमापद्येत। यद्यपि 'तडित्वान्' इत्यादौ 'तसौ मत्वर्थे' इति भसंज्ञायां पदान्तत्वाभावेन जश्त्वानुनासिकयोरप्राप्तिस्थले 'झयः' इत्यस्य चारितार्थ्यादनवकाशत्वं नास्ति, तथापि तावन्मात्रफलकत्वे 'झयः' इति सूत्रे झय्-रूपप्रत्याहाराश्रयणस्य वैयर्थ्यं स्यात्। तत्सामर्थ्यात् जश्त्वम्, अन्तरङ्गत्वाच्चानुनासिकं प्रबाध्य वत्वं स्यादिति तद्व्यावृत्तिरेवास्य अधिकारत्वे फलम्।

झय्-प्रत्याहाराश्रयणसामर्थ्येन अन्तरङ्गत्वाच्च प्राप्तस्य वत्वस्य परत्वेन बाधस्य शङ्का नोचिता। परममुमाशयम् अजानानः शङ्कते— **न चेति**। ततः = 'झयः' इत्यतः। जश्त्वे अनुनासिके च कृते वत्वस्य प्राप्तिरेव नेति भावः।

'विप्रतिषेधे परम्' (१ । ४ । २) इत्यस्य यथोद्देशत्वेन त्रिपाद्यामप्रवृत्तेः । 'पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य' इत्यनेन तस्या यथोद्देशत्वस्यैव बोधनात् । अन्यथा परस्यासिद्धत्वे 'विप्रतिषेध'(१ । ४ । २)सूत्रस्य सिद्धत्वात् परिभाषान्तराणामिवास्यापि कार्यकालपक्षे तेनाकर्षणापत्तेः ।

अत एव भाष्ये वत्वमेवापादितम् । अधिकारत्वादेव 'श्चुत्वं धुटि सिद्धं वाच्यम्' (का० वा०) इत्यादि चरितार्थम् ।

विप्रतिषेधसूत्रस्य सपादसप्ताध्यायीस्थत्वेन एतद्दृष्ट्या त्रिपाद्या असिद्धत्वेन तत्र त्रिपादीस्थे सूत्रे विरोधे सति त्वदपेक्षया पूर्वं सूत्रं दुर्बलमित्यर्थस्य बोधकतासम्भवेन न परेण त्रिपादीसूत्रेण पूर्वस्य बाधः । अतएव पूर्वत्रासिद्धे त्रिपाद्यां नास्ति विप्रतिषेधः=विप्रतिषेधमूलको बाध्यबाधकभावः; उत्तरस्य = परस्य अभावात्=असत्त्वादिति वार्त्तिककृतोक्तम् । अनेन अस्याः='विप्रतिषेधे'ति परिभाषायाः यथोद्देशत्वम् एव, न कार्यकालत्वम्—इति निश्चीयते । अन्यथा = तादृशानिश्चये कार्यकालपक्षे परस्य सूत्रस्य 'विप्रतिषेध'सूत्रदृष्ट्या असिद्धत्वेऽपि विप्रतिषेधसूत्रस्य परशास्त्रदृष्ट्या असिद्धत्वाभावेन परसूत्रेण विप्रतिषेधसूत्रस्याकर्षणसम्भवात् । तथा च परसूत्रं विप्रतिषेधसूत्रं समाकृष्य परस्य पूर्वापेक्षया प्राबल्यं बोधयिष्यतीति किमनुपपन्नम् ! तस्मात् 'कार्यकालवक्षः विप्रतिषेधसूत्रे नाश्रीयते' इति कल्पना ज्यायसी । अतएव भाष्यकृता वत्वापादनमेव कृतम् । अधिकारत्वे एव 'श्चुत्वं धुटि' इति वार्त्तिकमपि चरितार्थम् । अन्यथा श्चुत्व-धुटोः द्वयोरपि त्रिपादीस्थत्वेन असिद्धत्वाप्राप्त्या धुटि कर्तव्ये श्चुत्वस्य सिद्धत्वविधानं विफलं स्यात् । अधिकारत्वे तु असिद्धत्ववारणाय वार्त्तिकं सफलं सिद्धम् ।

वस्तुतः षत्व के अनन्तर 'झयः' इस सूत्र से वत्वापत्ति दोष है ।

शङ्का—'झयः' इसकी अपेक्षा जश्त्व और अनुनासिकविधायक शास्त्रों में परत्व होने से वत्व का बाध हो जायगा ?

समाधान—'पूर्वत्रासिद्धे नास्ति विप्रतिषेधः' इत्यादि भाष्योक्त वार्त्तिक के अनुसार विप्रतिषेधसूत्र में यथोद्देशपक्ष ही माना गया है । अतः त्रैपादिक शास्त्रों में विप्रतिषेधसूत्र की उपस्थिति नहीं होगी । यदि इसमें कार्यकालपक्ष का आश्रयण किया जायगा तो 'अभावात् उत्तरस्य' इस अंश की असङ्गति हो जायगी । कार्यकालपक्ष में विप्रतिषेध परिभाषासूत्र की दृष्टि में त्रैपादिक सूत्रों के असिद्ध होने पर भी त्रैपादिक सूत्रों की दृष्टि में विप्रतिषेधपरिभाषासूत्र असिद्ध नहीं है । ऐसी अवस्था में परिभाषान्तरों के समान इसका भी परसूत्र से आकर्षण होना चाहिए । अत एव भाष्य में वत्व का ही आपादन किया है । श्चुत्व करते समय धुडागम की सिद्धता होती है । इसका आरम्भ—'षट्श्चोतन्ति' इसमें श्चुत्व की असिद्धता के कारण दन्त्य सकार की स्थिति मानकर 'डः सि धुट्' इससे प्राप्त धुट् की व्यावृत्ति के लिये किया गया है । अधिकारत्वाभावपक्ष में त्रिपादी शास्त्रों की परस्पर असिद्धता प्राप्त न होने से उक्त वार्त्तिक का आरम्भ व्यर्थ हो जायगा ।

इस प्रकार 'पूर्वत्रा सिद्धम्' इसकी जिस सूत्र में अनुवृत्ति होती है वही सूत्र असिद्ध होता

एवञ्च यत्रानुवृत्तिस्तस्यासिद्धत्वम् ।

पूर्वत्वञ्च क्वचित् सपादसप्ताध्याय्याः क्वचित्सूत्रान्तरसहितायाः । तत्रायमर्थः— 'हो ढः' (८ । २ । ३१) इत्यादावस्योपस्थितौ वाक्यभेदेनान्वयः—हस्य ढो भवति, इदञ्च शास्त्रं पूर्वत्रासिद्धमिति ।

एवञ्च = अधिकारसूत्रत्वे च । अस्य स्वतन्त्रविधित्वे 'सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा' इत्येवार्थो लभ्येत । परसाकाङ्क्षपूर्वत्वावच्छिन्नसकलशास्त्रबोधक-पूर्वशब्दग्रहणलिङ्गेन अस्य परिभाषात्वस्वीकारोऽपि न सम्भवति, त्रिपाद्यां पूर्वं प्रति परस्यासिद्धत्वप्रतिपादनासम्भवात् । सपादसप्ताध्याय्या एव पूर्वशब्देन तदानीं ग्रहणात् । नापि अतिदेशविधिः, स्थानिवदित्यादाविव 'वति'-निर्देशाभावात् । 'विनाऽपि वतिप्रत्यय-मतिदेशो गम्यते' इति भाष्यात् अतिदेशप्रतीतिकल्पने तु मनोरथाद्यसिद्धिप्रसङ्गः स्यात् । लोपे कृते असिद्धत्वातिदेशः, न लोपात् प्राक् । ततश्च नष्टे स्थानिनि स्थानिवद्भावपि रेफ-स्यासत्त्वेन 'रो रि' इति लोपो न स्यादिति अग्रे वक्ष्यमाणत्वात् । तस्मात् अधिकार-विधिरेवायमिति निष्कर्षः ।

अस्याधिकारत्वे त्रैपादिके सूत्रे उपस्थित्या इदञ्च 'पूर्वत्रासिद्धम्' (अर्थात् पूर्वस्मिन् कर्तव्ये त्वमसिद्धं भव) इत्यर्थो बोध्यते । तथा चास्मादेवाधिकाराद् असिद्धत्वस्य प्रतिपादनात् स्वदेशे 'पूर्वत्रासिद्धम्' इत्यस्य वाक्यार्थबोधो नावश्यकः, इत्यत उक्तम्—**सपादसप्तेति ।** स्वदेशे वाक्यार्थबोधे फलाभावेऽपि पदार्थोपस्थितौ प्रतिबन्धकविरहे वाक्यार्थबोधो भवत्येव । एवञ्च क्वचित् 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रदृष्ट्या कस्याऽपि त्रैपादिकस्यासिद्धत्वं फलाभावान्न बोध्यते । तत्र सपादसप्ताध्याय्या एव पूर्वत्वेन ग्रहणात् स्वदेशे न वाक्यार्थस्योपयोगोऽपि । क्वचित् अन्यत्र त्रिपादीस्थे सूत्रे अस्योपस्थितौ त्रिपादीसूत्रान्तरेण सहितायाः सपादसप्ताध्याय्याः पूर्वशब्देन ग्रहणम् । यथा भूधातोः शतृप्रत्ययेन निष्पन्ने 'भवन्' इत्यत्र सोः संयोगान्तलोपे नलोपस्य त्रैपादि-कत्वात् 'सर्वनामस्थाने' इति दीर्घस्य सापादिकत्वेन उभयोर्दृष्ट्या संयोगान्तलोपस्या-सिद्धत्वात् दीर्घनलोपौ न भवतः ।

है । प्रथम त्रिपादीसूत्र में अनुवृत्त पूर्वशब्द से सपादसप्ताध्यायीस्थ सूत्रों का संग्रह है; क्योंकि उससे पूर्व वही है । त्रिपादी के द्वितीय तृतीयादि सूत्रों में उपस्थित पूर्व-शब्द पूर्व त्रिपादी सूत्रों के साथ सपादसप्ताध्यायीस्थ सूत्रों का संग्राहक है । 'हो ढ़ः' इसमें 'पूर्वत्रासिद्धम्' इसका अधिकार है । वाक्यभेद से अन्वय होने के कारण हकार को ढ़कार होता है और यह सूत्र के पूर्व कर्त्तव्य में असिद्ध होता है—इस प्रकार का बोध होता है । वाक्यभेद से अन्वय मानने पर ही 'न मुने' इसके द्वारा मुत्वविधायक शास्त्र के असिद्धत्व का प्रतिषेध उपपन्न होता है । अन्यथा असिद्धत्व-विशिष्ट मुत्व का विधान करने पर 'न मुने' इसके द्वारा नाभाव के कर्त्तव्य में असिद्धत्वविशिष्ट मुत्व का ही निषेध हो जायगा ।

शङ्का—'पूर्वत्र' इसमें पूर्व शब्द से सपादसप्ताध्यायीस्थ सूत्रमात्र का ग्रहण होने पर एक-प्रयोग में तादृश सकल सूत्रों की प्राप्ति न होने से असिद्धता नहीं होगी, एवं परशास्त्र की सर्वत्र असिद्धता मानने पर उत्सर्गशास्त्र की दृष्टि से पर अपवाद की असिद्धता भी हो जायगी ?

अत एव 'न मुने' (८।२।३) इत्यादिभिस्तन्निषेध उपपद्यते। पूर्वत्रेति सङ्ग्राहकमेव। शृङ्गग्राहिकयैव तु तत्तच्छास्त्रं प्रति तस्यासिद्धत्वं प्रतिपाद्यते। तेनापवादस्य यं प्रत्यपवादत्वं तत्रासिद्धत्वाभावेऽप्यन्यत्रासिद्धत्वं भवत्येव।

अस्य सूत्रस्योपस्थितौ पूर्वशब्देन कस्यचित् सूत्रविशेषस्य ग्रहणे मानाभावात् उपस्थितत्वाविशेषात् सर्वसूत्रग्रहणे वाक्यैकवाक्यतया अन्वयो भवति। यथा 'हो ढः' इत्यस्य 'हस्य ढो भवति, इदञ्च पूर्वत्रासिद्धम्' इति। अर्थात् पूर्वस्मिन् कर्तव्ये त्वमसिद्धं भवेत्यर्थः। न च हस्य असिद्धत्वविशिष्टो ढो भवतीत्येवंरूपेण पदैकवाक्यतयैव किन्नान्वयः स्वीकृतः? इत्यत आह—**अत एवेति**। वाक्यैकवाक्यतयाऽन्वयस्वीकारादेव। असिद्धत्वरूपविधेयभेदात् वाक्यभेदः, अतोऽनयोर्वाक्यैकवाक्यता।

पदैकवाक्यतया अन्वये 'अदसोः' इत्यनेन असिद्धत्वविशिष्टमुत्वस्य विधानेन 'न मुने' इत्यनेन सूत्रेणापि असिद्धत्वविशिष्टमुत्वस्यैव प्रतिषेधात् 'अमुना' इत्यत्र मुभावो न स्यात्। असिद्धत्वस्य अप्राधान्यात् तन्मात्रे निषेधान्वयस्य कर्तुमशक्यत्वात्। तदर्थं वाक्यैकवाक्यता कल्प्यते। तथा च असिद्धत्वस्य प्राधान्यात् तस्यात्र निषेधकत्वम् 'न मुने' इत्यस्य उपपन्नम्। तन्निषेधः = असिद्धत्वनिषेधः।

नन्वेवम् अपवादशास्त्रस्य सर्वत्रासिद्धत्वे उत्सर्गसूत्रदृष्ट्याऽपि असिद्धत्वं स्यात्। अथ अपवादे पूर्वत्रेत्यस्याप्रवृत्तिः कल्प्यते, तदा शास्त्रान्तरापेक्षयाऽपि असिद्धत्वाभावस्यापत्तेः? अत आह—**पूर्वत्रेति**। संग्राहकम्=उपस्थितानां तत्तद्विशेषपूर्वसूत्राणां पूर्वत्वेन अनुगमकम्। **शृङ्गग्राहिकयैव इति**। शृङ्गं गृहीत्वा गृहीत्वा यथा 'इयं मे गौः' 'इयं मे गौः' इति बोध्यते; तथैवात्रापि पूर्वत्वोपलक्षितधर्मावच्छिन्नं नामग्राहित्रिपादीस्थं तच्छास्त्रमनूद्य तस्य=यत्रानुवृत्तिस्तस्य असिद्धत्वं प्रतिपाद्यते इतिभावः। तथाच उत्सर्गसूत्रातिरिक्तस्य पूर्वशब्दः संग्राहक इत्याशयेनाह—**तेनापवादस्येति**। 'हो ढः' इत्यस्य पूर्वत्रिपादीस्थत्वेन एतद्दृष्ट्या 'दादेर्घातोर्घः' इत्यस्यासिद्धत्वे 'दादेः' इत्यादेः वैयर्थ्या-

---

समाधान—सूत्र में पूर्व शब्द तत्तत् विशेष सूत्रों का संग्राहक है। पूर्वत्व रूप से उपस्थित पूर्वसूत्रों का अनुगम कर शृङ्गग्राहिकया तत्तत् शास्त्र के प्रति तत्तत् विशेष शास्त्रों की असिद्धता का इससे प्रतिपादन किया जाता है। इसलिये जिस शास्त्र के प्रति जो शास्त्र अपवाद है उसके प्रति असिद्धत्व न होने से शास्त्रान्तर के प्रति असिद्धत्व के प्रतिपादन से उसी के प्रति असिद्धता होगी।

असिद्धम्—इति। 'सिद्धं च' इस वार्त्तिक में 'सिद्ध' शब्द निष्पन्न अर्थ में प्रयुक्त होने से यहाँ भी सिद्ध का निष्पन्न और असिद्ध का अनिष्पन्न = अप्रवृत्त अर्थ है।

यद्यपि लोक में अनाहार्य[२] ज्ञान ही प्रवर्तक या निवर्तक देखा जाता है, तथापि शास्त्र में तत्तत् सूत्रों के प्रामाण्य से आहार्य ज्ञान भी प्रवर्तक और निवर्तक माना जाता है। जैसे अग्नी ३ इति

---

१. **'का का मे गौः?' इति पृष्टे शृङ्गं गृहीत्वा गृहीत्वा बोधयति—'इयं ते गौः, इयं ते गौः'। प्रत्येक गो-व्यक्ति का निर्देश सींग पकड़कर करता है, न कि दूर से बता कर।**

२. **बाधकालिकेच्छाजन्यं ज्ञानमाहार्यम्। तद्भिन्नमनाहार्यम्। शुक्ति में रजत के बाधज्ञान के रहते जो स्वेच्छा से रजतबुद्धि है वह 'आहार्य' है।**

असिद्धमिति । सिद्धम् = निष्पन्नम्, प्रवृत्तम्; 'सिद्धञ्च प्रत्ययविधौ' इत्यादौ तथा दर्शनात् । तद्भिन्नमसिद्धम् = अनिष्पन्नम्, अप्रवृत्तम् ।

यद्यपि लोकेऽनाहार्यज्ञानस्यैव प्रवर्त्तकत्वं निवर्त्तकत्वञ्च दृष्टम्, तथाऽपीह शास्त्रप्रामाण्यादाहार्यारोपोऽपि शास्त्रप्रवृत्तावप्रवृत्तौ च नियामक इति बोध्यम् ।

अत्र कार्यासिद्धत्वे 'अमू' इत्याद्यसिद्धिः । 'अद अ औ' इति स्थिते परत्वान्मुत्वे

पत्त्या ढत्वं प्रति असिद्धत्वाभावेऽपि 'झयः' इति सूत्रं प्रति असिद्धत्वं षत्वस्य भवत्येव । अतएव वत्वं न । **असिद्धमिति** । 'सिद्धे शब्दार्थसम्बन्धे' इति वार्त्तिके सिद्धशब्दस्य नित्यवाचित्वेन व्यवस्थितत्वादत्रापि तथा सम्भावनायामाह—**सिद्धम् = निष्पन्नमिति** । तद्भिन्नमसिद्धम् = अनिष्पन्नम् ।

शङ्कते—**यद्यपीति** । लोके अनाहार्यज्ञानस्य, यथार्थज्ञानस्य च प्रवर्तकत्वं निवर्तकत्वञ्च दृष्टम् । बाधे सत्यपि इच्छया विषयसद्भावं विनाऽपि यद् ज्ञानं जायते तदाहार्यं तद्भिन्नमनाहार्यम् । शास्त्रे तु 'पूर्वत्रासिद्धम्' इति सूत्रस्य प्रामाण्यात् बाधे सत्यपि इच्छामात्रेण जायमानज्ञानरूपस्याहार्यस्य ज्ञानस्याऽपि शास्त्राणां प्रवर्तकत्वं निवर्तकत्वञ्च स्वीक्रियते । अतएव अग्नी३ इति अत्र प्लुते कृते प्लुतस्यासिद्धत्वात् 'ईदूदेद् द्विवचनम्' इति प्रगृह्यसंज्ञा सिध्यति । अन्यथा सूत्रे तपरनिर्देशाद् दीर्घस्यैव ईकारस्य प्रगृह्यस्य विधानात् प्लुते न स्यात् । सत्यपि प्लुते सूत्रद्वारा सूत्रकारस्य इच्छामात्रेण प्लुताभावं मत्वा प्रगृह्यसंज्ञा विधीयते । अप्रवृत्तेरुदाहरणम्—'हर अव' इति । अत्रायादेशे 'लोपः शाकल्यस्य' इति यकारस्य लोपे लोपस्य कृतस्यापि अकृतत्वं असिद्धत्वं 'पूर्वत्रासिद्धम्' इत्यनेन बुद्ध्वा यकारेण व्यवधानात् गुणादेशो न भवति । असिद्धत्वबोधनेन वस्तुतो न यकारेण व्यवधानम्, किन्तु तत्र यकारसत्त्वविषयिणी आहार्यबुद्धिरेव सूत्रप्रामाण्यात् स्वीक्रियते । तथा च शास्त्रे आहार्यबुद्धिरपि प्रवृत्तिनिवृत्त्योर्नियामिकेति फलितम् ।

'पूर्वत्रासिद्धम्' इति सूत्रे शास्त्रासिद्धत्वकार्यासिद्धत्वयोः कतरः पक्षो युक्तः ? इति विवेचयितुमुपक्रमते—**अत्रेति** । अस्मिन्सूत्रे इत्यर्थः । यदा सूत्रदृष्ट्या शास्त्रस्य = सूत्रस्यासिद्धत्वं बोध्यते तदा शास्त्रासिद्धत्वपक्षः । यदा तु शास्त्रविहितकार्यं प्रति शास्त्रविहितकार्यस्यासिद्धत्वं प्रतिपाद्यते तदा कार्यासिद्धत्वपक्षः—इति विवेकः । तथा च कार्यासिद्धत्वपक्षस्वीकारे अमू इत्यत्र अदस्-शब्दात् औ विभक्तौ अत्वे कृते अद अ औ इत्यवस्थायां परत्वेन पूर्वं मुत्वे पररूपदृष्ट्या मुत्वस्यानेनासिद्धत्वेऽपि देवदत्तहन्तृहतन्यायेन स्थानिनोऽ-

---

इस में प्लुत असिद्ध होने से दीर्घबुद्धि प्रगृह्यसंज्ञा की प्रवर्तक है । 'हर इह' यहाँ अयूलोप को असिद्ध मान कर यकार के व्यवधान से 'आद् गुणः' इससे प्राप्त गुण की निवृत्ति हुई । अतः शास्त्र में आहार्य ज्ञान से भी प्रवृत्ति-निवृत्ति होती है ।

अत्र इति । 'पूर्वत्रासिद्धम्' इसमें शास्त्रासिद्धत्व, कार्यासिद्धत्व के भेद से दो पक्ष हैं । शास्त्रासिद्धत्व पक्ष सिद्धान्तपक्ष है । कार्यासिद्धत्व पक्ष में 'अमू' इसकी सिद्धि नहीं होगी । 'अद् अ औ' इस अवस्था में 'अतो गुणे' इस की दृष्टि में मुत्व कार्य की असिद्धि के लिये पररूप से पहले परत्वात् उत्व मत्व का होना आवश्यक है । किसी अधिष्ठान = आधार में किसी वस्तु का

तस्य सपादसप्ताध्यायीस्थकार्यदृष्ट्याऽसिद्धत्वेऽपि देवदत्तहन्तृहतन्यायेनाकाराभावेन पररूपाद्यनापत्तिः। अतिदेशस्याऽऽरोपरूपत्वान्निरधिष्ठानारोपासम्भवेन कार्यप्रवृत्तेरत्र पक्षे आवश्यकत्वात्।

कारस्य अवस्थानाभावात् परेण अकारेण सह पररूपं न स्यात्। तथाच अकारश्रवणापत्तिः। न्यायस्यायमर्थः—देवदत्तस्य हन्ता केनचिद् हतः, परं नैतावता हतस्य देवदत्तस्य उज्जीवनं भवति। देवदत्तो हतः, तस्य हन्ताऽपि केनचिद् हत इति द्वयोर्हननेन किमेकोऽपि जीवनमलभतेति! एवञ्च अनेन न्यायेन मुत्वापहृतस्याकारस्य पररूपसूत्रदृष्ट्या मुत्वस्यासिद्धत्वस्य 'पूर्वत्र' इत्यनेन प्रतिपादनेन अकारापहारकस्य मुत्वस्य निवृत्तावपि (अपहारेऽपि) निवृत्तस्य अकारस्य किं सद्भावो भवितुमर्हति! एवञ्च पररूपानापत्तिः पक्षेऽस्मिन् दोषः। न च अद्‌घटकप्रथमाकारस्य त्यदाद्यत्वेन सिद्धेनाकारेण परवर्तिना सह पररूप प्राप्नोत्येव, मध्यपठितयोः दकाराकारयोः मुत्वेन निवृत्त्या मुत्वस्य चासिद्धत्वात् व्यवधानस्याभावादिति वाच्यम्; इष्टस्य पररूपस्य अनापत्तौ ग्रन्थतात्पर्यात्[1]। नहि आद्याकारस्य 'त्यदादीनामः' इति विहिताकारेण सह पररूपे 'अमू' इति इष्टं रूपं सिध्येत्; विभक्तेः श्रवणप्रसङ्गात्। न च मुत्वस्यासिद्धत्वेऽपि मुत्वाधिकरणसार्धमात्राकालव्यवधानस्य सत्त्वात् स्वाभाविकार्द्धमात्राकालातिरिक्तकालव्यवायात् संहितैव नास्तीति मुत्वानन्तरं कथमपि पररूपं तद् प्राप्नोतीति वाच्यम्; तदधिकरणसार्धमात्राकाले अर्धमात्राकालत्वस्यापि अतिदेशेन वक्तव्यत्वात्। अत एव 'इमं मे गङ्गे यमुने' इत्यत्र 'गङ्गे' इत्यस्याविद्यमानवद्भावेऽपि ने-शब्दात् परत्वमाश्रित्य 'तिङ्ङतिङः' इति निघातः प्रवर्तते। अन्यथा 'गङ्गे' इत्येतत्पदाधिकरणकालव्यवाये निघातो न स्यात्। 'अतिङः' इति पञ्चम्यन्ततया अव्यवहितत्वांशलाभेन अर्धमात्राकालव्यवाये एव तत्प्रवृत्तेः। मुत्वविधानात् प्राक् मुत्वस्यासिद्धत्वं पररूपं प्रति वक्तुमशक्यम्। असिद्धत्वस्य निष्पत्त्यभावरूपतया मुत्वस्य निष्पत्त्यभावेन क्व निष्पत्त्यभावस्य आरोपः स्यात्! आरोपः कस्मिंश्चिदधिष्ठाने भवति। शुक्तिकायां सत्यां रजतमारोप्यते। अत एव सर्वाधिष्ठानतया कल्प्यमाने ब्रह्मणि जगतोऽध्यासः, न शून्ये इति वदन्ति अद्वैतवेदान्तिनः। तस्मात् असिद्धत्वारोपाय मुत्वकार्यस्य प्रवृत्तिः प्रथमं कर्तव्या। तदनन्तरम् असिद्धत्वारोपेऽपि देवदत्तहन्तृहतन्यायेन उक्तरीत्या अकाराभावेन पररूपानापत्त्या 'अमू' इत्यस्यासिद्धिप्रसङ्गात्। शास्त्रासिद्धत्वपक्षे तु शास्त्रदृष्ट्या मुत्वविधायकशास्त्रस्यैवासिद्ध्या पूर्वं पररूपे वृद्धौ च पश्चात् उत्वे मत्वे च उक्तरूपस्य सिद्धिः।

आरोप होता है। जैसे शुक्ति के अधिष्ठान में रजत या ब्रह्म में जगत् का आरोप है। शून्य में आरोप नहीं होता। अतः असिद्धत्व के आरोप के लिये उत्व मत्व का पूर्व में होना आवश्यक है। क्योंकि उसी में आरोप विवक्षित है। इस प्रकार कार्य होने के अनन्तर उसमें असिद्धत्वारोप होने पर कार्य की अभावमात्रबुद्धि से विनष्ट स्थानी का सद्भाव नहीं हो सकता। इसके समर्थन में

---

१. न्यायानुपन्यासेऽपि पररूपानापत्तिरूपो दोषोऽस्त्येव। मुत्वस्यासिद्धत्वेन अकारबुद्धया उकारस्यैव पररूपे इष्टपररूपस्याभावात् अमौ इति रूपं स्यात्।

शास्त्रासिद्धत्वे तु यत्राप्यन्तरङ्गत्वात् त्रैपादिकं प्रवृत्तम्, तत्रापि तत्तच्छास्त्रे एवाभावारोपेण तन्निवृत्तिबुद्धेरभाव आदेशबुद्धयभावः, लक्ष्ये जातत्वबुद्धयभावश्च । जायमानं कार्यं त्वादेशे एव स्थानिबुद्धया प्रवर्त्तते । 'न हि रजतभ्रमप्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयति' इति न दोषः । यत्र तु सहप्रसङ्गस्तत्राप्रवृत्तिरेव; अभावारोपात् ।

ननु यत्र त्रैपादिकस्य शास्त्रस्य निमित्तं पूर्वमेवास्ति, तत्र तस्य सूत्रस्य पूर्वं प्रवृत्तौ बाधकाभावात् तत्प्रवृत्त्यनन्तरमेव सापादिकस्य पूर्वत्रैपादिकस्य वा प्रवृत्तिर्वाच्या। तथा च कार्यस्यासिद्धत्वमेवाश्रयणीयं न तु शास्त्रस्य, तदानीं तेषां प्रवृत्तेरेवाभावात् असिद्धत्वस्य दुर्वचत्वात् । तथा च अत्र अकामेनापि भवता कार्यासिद्धत्वमेवाश्रयणीयमिति सर्वत्र एकरूपं कार्यासिद्धत्वमेव स्वीकार्यम् ? इत्याशङ्कायामाह—**शास्त्राऽसिद्धत्वे तु इति** । तु शब्दः कार्यासिद्धत्ववैलक्षण्यसूचनाय । अन्तरङ्गत्वात् = तन्निमित्तस्यैव प्रथमं सत्त्वात् । तस्मिन् स्थले तस्य तस्य सूत्रस्य प्रवृत्तिरेव न जाता । तन्निवृत्तिबुद्धेः = स्थानिनिवृत्तिबुद्धेः । अभावः = विरहः । तथा च प्रवर्तमानं कार्यं पूर्वजाते आदेशे एव, तत्रैव स्थानिबुद्धिर्भवति । यथा चाकचिक्यदोषवशात् शुक्तिखण्डं पश्यन् पुरुषः रजतमिति जानाति; परं रजतरूपेण भासमानं तद् न रजतं किन्तु शुक्तिशकलमेव, शुक्तिमेव विषयीकुर्वन्ती दृष्टिः दोषवशात् तत्रैव विषयान्तरमवगाहते; तथाऽत्रापि आदेशे स्थानिबुद्धया जायमानं कार्यं वस्तुतः स्थानिन्येव जायते ।

अन्तरङ्गत्वादित्यनेन अन्तरङ्गपरिभाषाप्रवृत्तौ निमित्तस्य न ग्रहणम्; किन्तु पूर्वं तन्निमित्तस्यैव सत्त्वमित्येतावन्मात्रेण अन्तरङ्गत्वमुक्तम् । एतेन त्रिपाद्यां स्वमते अन्तरङ्गपरिभाषाया अप्रवृत्तेरिदं चिन्त्यमिति केचित्, तदपास्तम् । केचित् तु अन्तरङ्गत्वात् यत्र पूर्वं त्रैपादिकं प्रवर्तते तादृशमुदाहरणमेव नोपलभ्यते, तस्मात् उदाहरणाभावेन एतन्निरूपणं नावश्यकम् । न च ऊढमाख्यदिति औजढदित्यत्र पूर्वं त्रैपादिके ढत्वादौ कृते पश्चात् प्राप्तेन द्वित्वेन तेषामसिद्धत्वात् हृतशब्दस्य द्वित्वे औजढदित्यस्य सिद्धिरेव फलमिति वाच्यम्; तत्र ढत्वादीनामसिद्धत्वात् णिचि लुङि चङि च कृते द्वित्वदृष्टया ढत्वादीनामसिद्धत्वाद् द्वित्वस्य प्रवृत्तेः सत्त्वादिति नास्ति तादृशमुदाहरणमिति वदन्ति । यत्र पूर्वपरशास्त्रयोः सहैव प्राप्तिः, तत्र तु परस्य त्रैपादिकस्य अप्राप्तिरेव । पूर्वत्रेति सूत्रेण निष्पन्नत्वाभावारोपेण अप्रवृत्तिरेव बोधिता भवति ।

देवदत्तहन्तृहतन्याय का उल्लेख किया है । देवदत्त के मारने वालों को मारने से भी देवदत्त को जीवनदान नहीं प्राप्त होता, उसी प्रकार आदेश के स्थानी की निवृत्ति हो जाने पर, आदेश के निवृत्त होने पर भी स्थानी का सद्भाव सम्भव नहीं है । अतः इस पक्ष में पररूपानापत्ति दोष है । शास्त्रासिद्धत्वपक्ष में कार्यप्रवृत्ति आवश्यक न होने से शास्त्र की ही असिद्धता होती है । अतः पररूपानन्तर उत्व मत्व होने से अमू इसकी सिद्धि हो जाती है ।

जहाँ निमित्त के प्रथम होने से पूर्व में ही त्रैपादिक शास्त्र प्रवृत्त हो गया, वहाँ भी उस शास्त्र में ही अभाव का आरोप करने से स्थानी की निवृत्तिबुद्धि का, लक्ष्य में आदेशबुद्धि का, एवं लक्ष्य में जातत्वबुद्धि का अभाव समझना चाहिये । जायमान कार्य आदेश के स्थान में ही

न च 'पूर्वत्र न' इत्येव सूत्रमस्त्वति वाच्यम्; पूर्वशास्त्रप्राप्तौ निषेध इत्यर्थे

केचित्तु इत्यादिना कृतं शास्त्रासिद्धत्वसमर्थनं नादरणीयम्; भाष्यागृहीतत्वात्। अतएव शेखरकृता एष पक्षो नाश्रित इति सदाशिवभट्टाः। भाष्यानुक्तकल्पनया अर्थोन्मेषे बहूपप्लव आपद्येत।

एवमेव 'पूर्वत्र' इत्येव सूत्रमस्तु, 'आमन्त्रितं पूर्वमविद्यमानवत्' इत्यतः अविद्यमानवत्पदमनुवर्त्य अविद्यमानवद्भावो विधीयतामित्यपि टिप्पणीकृतामुक्तिर्न युक्ता; शास्त्रासिद्धत्वपक्षस्य भाष्यानुगृहीतत्वात्। अस्मिन् पक्षे शास्त्रे अविद्यमानेऽपि कार्यस्य अविद्यमानत्वं न भवति। अत एव कुलाले अविद्यमानेऽपि घटो न निवर्तते। तथा च गोमान् इत्यादौ संयोगान्तलोपस्य विद्यमानत्वान्नलोपो दुर्वारः स्यात्। तस्मात् नायं न्यासो युक्त इति प्रतिभाति।

पूर्वत्रासिद्धमित्यस्य स्थाने 'पूर्वत्र न' इत्येव सूत्रं किं न कृतमिति शङ्कते—**न चेति**। पूर्वत्र जातस्य तत्कालप्राप्तस्य च निषेध इत्यर्थाभ्युपगमेन सर्वस्य सिद्धिरिति भावः। परसूत्रस्य प्राप्तिवेलायां पूर्वस्य सूत्रस्य प्राप्तेरभावेन निषेधासम्भवात् कृते च परस्मिन् सूत्रे तदनन्तरं सत्वादिके पूर्वत्रैपादिके वा कर्तव्ये जातस्य कार्यस्य सत्ता निषेद्धुं न शक्यते; भुक्तवन्तमिति न्यायविरोधात् भोजनं कृतवन्तं पुरुषं प्रति यदि कश्चिदेवं ब्रूयात्–भोजनं त्वया न कर्तव्यमिति, तेन निषेधेन किं फलं स्यात्; भोजनस्य जातत्वात्। भोजनात् प्रागेव तन्निषेधस्य साफल्यं न तु भोजनानन्तरम्, तथैवात्रापि कार्योत्पत्तेः प्रागेव निषेधे प्रयोजनम्, जाते कार्ये निषेधस्य वैयर्थ्यमेव। तथा च 'राजाश्व' इत्यत्र राजन् अश्व इत्यवस्थायां कस्यचिदपि पूर्वशास्त्रस्य सापादिकस्य त्रैपादिकस्य वा अप्राप्त्या पूर्वत्र नेति निषेधशास्त्राप्रवृत्तौ पूर्वं नकारस्य लोपे जाते भुक्तवन्तमिति न्यायेन पुनः तदप्रवृत्तौ = निषेधशास्त्राप्रवृत्तौ राजाश्व इत्यस्य सिद्धौ 'नलोपः सुप्स्वर' इत्यादिसूत्रारम्भोऽनर्थकः स्यात्। न चास्तु सूत्रानर्थक्यम्, किन्नश्छिन्नमिति ? राजभ्यामित्यादावपि नलोपानन्तरं भुक्तवन्तमिति न्यायेन एतदप्रवृत्तौ = निषेधाऽप्रवृत्तौ 'सुपि च' इति दीर्घापत्तिः।

स्थानी समझ कर होगा; क्योंकि रजत के भ्रम से प्रयुक्त दृष्टि शुक्ति को ग्रहण नहीं करती— ऐसा नहीं होता। जिस स्थान में दोनों सूत्रों की सहप्रवृत्ति है वहाँ अभावारोप से परशास्त्र की अप्रवृत्ति होती है।

शङ्का—लाघव होने से 'पूर्वत्र न' ऐसा सूत्र क्यों नहीं किया ?

समाधान—पूर्व और पर शास्त्रों की प्रवृत्ति में पर शास्त्र का निषेध प्रतीत होने से 'नलोपः सुप्स्वर' इत्यादि सूत्र की असङ्गति हो जायगी। 'सुब्विधि, स्वरविधि आदि के विधानों में ही नलोप की असिद्धता होती है, अन्य कार्य के विधान में नहीं'—इस प्रकार नियमार्थक सूत्र है। 'राजन् अश्व' इस दशा में किसी पूर्व शास्त्र की प्राप्ति न होने से 'पूर्वत्र न' इससे निषेध अप्राप्त है, नलोपोत्तर राजा + अश्व इस दशा में 'अकः सवर्णे' इसके कर्त्तव्य में 'भुक्तवन्तं प्रति मा भुंक्थाः' कृतभोजन को भोजनप्रतिषेध के समान नलोप के बाद 'पूर्वत्र न' इससे निषेध की अप्रवृत्ति होने से नियमशास्त्र की उपयोगिता नहीं होगी। राजभ्याम् यहाँ नलोपोत्तर निषेध की अप्राप्ति से दीर्घादेश हो जायगा। इस दोष के वारणार्थ यदि पूर्व शास्त्र के विषय की

बाह्यप्रयत्नस्त्वेकादशधा—विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति ।

'नलोपः सुप्' (८।८।२) इति सूत्रासङ्गतेः । तद्धि नियमार्थम् । त्वद्रीत्या 'राजन् अश्वः' इत्यस्यां दशायां कस्यापि पूर्वशास्त्रस्याप्राप्त्यैतन्निषेधाप्रवृत्तौ नलोपे जाते 'भुक्तवन्तम्' इति न्यायेनैतदप्रवृत्तौ राजाश्वे दीर्घसिद्ध्या नियमानुपयोगात्, 'राजभ्याम्' इत्यादावपि दीर्घापत्तेश्च । 'पूर्वशास्त्रविषयसम्भावनायाम्' इत्यर्थे 'राजभ्याम्' इत्यादौ नलोपे सुब्विधिदीर्घविषयसम्भावनया सर्वथा नलोपानापत्तेरिति दिक् ।

बाह्यप्रयत्न इति । **काकलकाधस्तात् गलविवरसङ्कोचविकासश्वासोत्पत्तिध्वनिविशेषरूपनादतद्विशेषरूपघोषाल्पघोषप्राणाल्पत्वमहत्त्वरूपकार्यकरत्वमेषाम् । तथाहि—**

'आत्मा बुद्ध्या समेत्यर्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ (पा० शि० ६)
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णान् जनयते'..................इति शिक्षायामुक्तम् । (पा० शि० ९)

आत्मा अन्तःकरणं संस्काररूपेण स्वगतानर्थान् बुद्ध्या स्ववृत्त्या समेत्य एकबुद्धिविषयान् कृत्वा तद्बोधनेच्छया मनो युक्तं करोति, तदिच्छावन्मनः कायाग्नि जाठरमग्निमभिहन्ति । स कायाग्निः । सोदीर्णः स मारुत उदीर्णः ऊर्ध्वं प्रेरित इत्यादिस्तदर्थः ।

न च पूर्वसूत्रस्य प्राप्तिसम्भावनायां परस्य प्रवृत्तिर्नेति कल्प्यते इति वाच्यम्; तथा सति राजभ्यामित्यादौ दीर्घविधिसम्भावनायाः सत्त्वेन नलोपस्यैव अभावेन रूपस्य तस्याऽसिद्धिप्रसङ्गात् इति मनसि निधायाह—**पूर्वशास्त्रप्रवृत्तौ इति ।**

ननु केषाञ्चित् प्रयत्नानां कथं बाह्यत्वम् ? अत आह—**काकलकादिति** । अधस्तादिति कथनेन गलविवरविकासादीनाम् आस्यबाह्यत्वं सूचितम् । बाह्यकारित्वेन वर्णाभिव्यक्त्यनन्तरभावि बाह्यविवारादिप्रयत्नानां बाह्यप्रयत्नत्वम् ।

आत्मेति । सांख्यरीतिमनुसृत्येदमुक्तम् । आत्मपदेन अन्तःकरणं कर्तृत्वेन विव-

---

सम्भावना में निषेधप्राप्ति मानें तो 'राजभ्याम्' इत्यादि में नलोपोत्तर 'सुपि च' इसकी प्रवृत्ति की सम्भावना में नलोप का निषेध हो जाने पर उक्त प्रयोग की असिद्धि हो जायगी ।

बाह्यप्रयत्न इति । काकलक से नीचे गलविवर का विकास, सङ्कोच, श्वासोत्पत्ति, ध्वनिविशेष रूप घोष अघोष अल्पघोष, प्राणवायु के अल्पत्व तथा महत्त्व रूप कार्य के करने से इनकी गणना बाह्य प्रयत्नों में है ।

मूलोक्त शिक्षा का अर्थ इस प्रकार है—सांख्य रीति से बुद्धि और मन अन्तःकरण के परिणामभूत हैं, पुरुष निर्लिप्त है । अतः अन्तःकरण कर्ता है । शिक्षावचन में आत्मा उक्त अर्थ का बोधक है । वह संस्काररूप से स्थित विषयों को बुद्धिरूप वृत्ति द्वारा एकबुद्धि का विषयभूत बनाकर अर्थबोध कराने की इच्छा से युक्त मन को करता है । वह इच्छायुक्त मन शरीर की जठराग्नि को आहत करता है । वह आहत अग्नि वायु को प्रेरित करती है । ऊर्ध्वं प्रेरित वायु' इत्यादि अर्थ है ।

खयां यमाः खयः ≍क≍पौ विसर्गः शर एव च ।
एते श्वासाऽनुप्रदाना अघोषाश्च विवृण्वते ॥
कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः ।
अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः ॥

एवञ्च शब्दप्रयोगेच्छयोत्पन्नयत्नाभिहताग्निना नाभिप्रदेशात् प्रेरितो वायुर्वेगान्मूर्धपर्यन्तङ्गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्य उक्तयत्नसहायेन तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति । ततो यत्नविशेषेण गलविवरविकासादीन् करोति ।

तत्र ये तत्तत्स्थानाभिघातका यत्नास्ते आस्यान्तर्गततत्तत्कार्यकारित्वादाभ्यन्तरा इत्युच्यन्ते । गलविवरविकासादिकराश्चास्यर्बहिर्भूतदेशे कार्यकरत्वाद् बाह्या इति ।

मात्राकालिकत्वादिरूपह्रस्वत्वादिकं तु वाय्वल्पत्वमहत्त्वकृतमिति नाभिप्रदेशात् प्रेरकयत्न एव कश्चिद्विलक्षणोऽल्पं वायुं प्रेरयति, कश्चिदधिकमिति तस्य वायुप्रेरणारूपं कार्यमास्यबाह्यदेशमिति तदपि बाह्यमेव ।

क्षितम् । तत्परिणामभूतं मनः कर्म । विवक्षापदेन मनसो वृत्तिविशेषरूपा इच्छा करणमत्र ।

युंक्ते अन्तर्भाविण्यर्थतया योजयति । युक्तं करोतीत्यर्थः । सोदीर्ण इति । उदुपसर्गात् ऋ गतावित्यस्माद् धातोः क्तप्रत्यये उदीर्णः । 'सोऽचि लोपे चेत्' इति सूत्रेण सः इत्येतत्सम्बन्धिविसर्गस्य लोपे सोदीर्ण इति । अन्यत् सर्वं सुगमम् । वायुप्रेरणारूपं कार्यम् आस्यात् बहिर्देशे जातम्, अतो ह्रस्वादीनां बाह्यप्रयत्नेषु अन्तर्भावः । तदपि = हल्त्वादिकमपि । अतएव ह्रस्वत्वादेरपि बाह्यत्वादेव ।

फलितार्थ कहते हैं—एवञ्च इति । शब्दप्रयोग की इच्छा से उत्पन्न यत्न से अभिहत अग्नि, नाभि प्रदेश से वायु को प्रेरित करता है । वह वायु मूर्धा तक जाकर वहां से निवृत होकर मुख में प्रविष्ट होता है । वहा उक्त स्पृष्ट आदि यत्न की सहायता से उन-उन स्थानों में जिह्वा के अग्रभागादि का स्पर्श करता हुआ तत्तत् स्थानों को अभिहत कर वर्णों का अभिव्यञ्जक होता है । उसके अनन्तर यत्न के साहाय्य से गलविवर के विकासादि कार्य को करता है । उनमें जो यत्न तत्स्थानों के अभिघातक है वे मुख के अन्तर्गत कार्य करने के कारण आभ्यन्तर यत्न से कहे जाते हैं । गलविवर का विकासादि मुख से बाहर किया जाता है, अतः उसके करने वाले यत्न 'बाह्य' कहे जाते है ।

ह्रस्वादि का मात्राकालिकत्वरूप वायु की अल्पता और अधिकता के कारण है । नाभिप्रदेश से उत्थित विलक्षण कोई यत्नविशेष अल्प वायु को, कोई अधिक वायु की प्रेरणा करता है । इसलिये यत्न का वायुप्रेरणारूप कार्य मुख से बहिर्भूत होने से ह्रस्वत्वादि भी बाह्य हैं ।

अतएव 'अ इ उण्' इसके भाष्य में आस्य के प्रयत्नविशेषण होने से ह्रस्वत्वादि जनक यत्न का 'तुल्यास्य' सूत्र में यत्न से ग्रहण नहीं होता'—ऐसा कहा है ।

यद्यपि 'परः सन्निकर्षः' इस सूत्र में भाष्यकार ने एक ही यत्न को सभी वर्णों का जनक एवं नाशक कहा है; तथापि कार्यगत भेद का यत्न में आरोप होने से अनेकत्व व्यवहार की सङ्गति होती है ।

वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः। पलिक्क्नीः; चख्ख्नतुः, अग्ग्निः, घ्घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशा एव यमाः।

अत एव 'अइउण्' (मा० सू० १) सूत्रे भाष्ये 'ह्रस्वत्वादिजनकयत्नस्यास्यविशेषणेन सवर्णसूत्रेऽग्रहणम्' इत्युक्तम्। यद्यप्येक एव यत्नः सर्वकार्यजनको वर्णनाशकश्चेति 'परः सन्निकर्षः' (१।४।१०९) इति सूत्रे भाष्ये उक्तम्, तथापि तत्तत्कार्येणोपाधिना एकस्मिन्नपि भेदमारोप्य तथा व्यवहार इति बोद्धव्यम्, उदात्तादिजनकयत्नस्याभ्यन्तरकार्यकरत्वेऽपि उदात्तादिशब्दैर्बिना बोधितानां तेषां 'अनङुदात्त' इत्यनेनाविवक्षाबोधनात्। सवर्णसंज्ञानुपयुक्तत्वान्तरतम्यपरीक्षोपयुक्तत्वरूपसादृश्येन बाह्येषु गणनम्। इदं ह्रस्वत्वादेरानुनासिक्यस्य चोपलक्षणम्।

'आस्ये तुल्यदेशप्रयत्नम्' इति पक्षे आस्ये इत्यस्य देशप्रयत्नोभयोर्विशेषणत्वेन ह्रस्वत्वादिजनकयत्नस्य बाह्यत्वात् तदपि = ह्रस्वादिकमपि बाह्यम्। अत्र मानमाह— अत एव इति। ह्रस्वत्वादेर्बाह्यत्वादेव। सवर्णसूत्रे = सवर्णसंज्ञाविधायकसूत्रे 'सवर्णसंज्ञायां नोपयोगः' इति भाष्ये उक्तम्। यद्यपि उच्चारितेषु वर्णेषु जायमाना ह्रस्वत्वदीर्घत्वादयो नानाधर्मा एकेनैव यत्नेन भवन्ति। तथा च भाष्यम्—'येनैव प्रयत्नेन एको वर्ण उच्चार्यते विच्छिन्ने वर्णे=तेनैव यत्नेन सह विनष्टे, उपसंहृत्य = पूर्वयत्नं परित्यज्य तमन्यमुपादाय यत्नान्तरं कृत्वा द्वितीयः प्रयुज्यते' इत्युक्तम्। अनेन भाष्येण वर्णान्तरोच्चारणे यत्नान्तरोपादानं कथितम्। न तु ह्रस्वत्वदीर्घत्वादावपि प्रयत्नान्तरम् उक्तम्। युगपदेकप्रयत्नस्योत्पत्तिर्बोधिता। एवञ्च एकस्यैव प्रयत्नस्य कायाग्नेः अभिघातकत्वं ह्रस्वादिस्पर्शजनकत्वम् इति भाष्याशयः। तथा च प्रयत्नभेदे भाष्यविरोध आपद्यते, तथापि कार्यगतभेदस्य एकस्मिन्नपि यत्ने आरोपात् प्रयत्नस्यापि भेदो व्यवहृतः।

ननु उदात्तादीनां बाह्यप्रयत्नेषु गणनमयुक्तम्, तेषामाभ्यन्तरत्वस्य सिद्धेः ? इत्याशयेनाह—**उदात्तादि** इति। तेषाम् = उदात्तादीनाम्, इत्यनेन = सूत्रस्थोदात्त-

---

शङ्का—उदात्त आदि के जनक यत्न मुख के अन्तर्गत कार्यकारी होने पर भी इनको बाह्य प्रयत्न में गणना का क्या कारण है ?

समाधान—'अस्थिदधि' इस सूत्र में अनङ्घटक अकार को उदात्त पढ़ने से इष्टसिद्धि हो जाती, साक्षात् उदात्त शब्द से उदात्त विधान क्यों किया ? उससे यह ज्ञापित होता है कि उदात्तादि शब्द के विना उच्चारणमात्र से बोधित उदात्तादि की विवक्षा नहीं होती। इस ज्ञापन से उदात्तत्वादि गुण अभेदक हैं। अतः इन का सवर्णसंज्ञा में उपयोग नहीं है। सवर्णसंज्ञानुपयुक्तत्व आन्तरतम्यपरीक्षोपयुक्तत्व रूप सादृश्य से उदात्तादि की वाह्य में गणना की गयी है। विवार संवार इत्यादि कथन ह्रस्वत्व और अनुनासिकत्व का उपलक्षण है। इनकी भी वाह्य में ही गणना है।

'अनुप्रदान' शब्द वाह्य प्रयत्न में रूढ़ है। **विवृण्वते इति**। वर्णों की अभिव्यक्ति के बाद जायमान कण्ठ विवर की विकासक्रिया के कर्त्ता वर्णों को मानकर तथाविध प्रयोग है। इनका

तत्र वर्णानां प्रथमद्वितीयाः खयः, तथा तेषामेव यमाः, जिह्वामूलीयोपध्मानीयौ, विसर्गः, शषसाश्चेत्येते विवारः श्वासोऽघोषश्च । अन्येषां तु संवारो नादो घोषश्च । वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः । अन्ये (द्वितीयचतुर्थौ शलश्च) महाप्राणा इत्यर्थः ।

बाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायामनुपयुक्ताः, तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्त इति बोध्यम् ।

शर इति । शषसाः । अनुप्रदानम् = बाह्यप्रयत्नः । विवृण्वते इति । तदभिव्यक्त्युत्तरं जायमाने कण्ठविवरविकासे तेषां कर्तृत्वविवक्षा बोध्या । विवार एषां प्रयत्न इति भावः ।

अन्ये त्विति । वर्गतृतीयचतुर्थपञ्चमास्तद्यमा हकारानुस्वारौ यरलवा इत्यर्थः । नादभागिनः तत्प्रयत्नकाः । यद्यपि खयादिषु घोषाघोषान्यतरप्रयत्नमात्रेणापि प्रक्रियांशनिर्वाहः, तथापि शिक्षानुरोधेनान्येषामुक्तिः । अल्पासवः = अल्पप्राणाः । यत एतदुच्चारणोत्तरं प्राणानामल्पत्वमिव भवति ।

वर्गेष्विति । विद्यमानानामिति शेषः । चतुर्णामिति । निर्धारणे षष्ठी । अन्यतमादिति शेषः । पूर्वसदृश इति । सादृश्यं यत्नकृतम् । अत एवायोगवाहेषु यमानां गणनं भाष्ये, 'चत्वारश्च यमाः स्मृताः' (पा० शि० ४) इति पाणिनिशिक्षा च सङ्गच्छते ।

अयञ्च वेदे एव; तदाह—प्रातिशाख्ये इति । अन्येषामिति । अचाम्, उक्तान्यहलाञ्चेत्यर्थः । यरलवाश्चेति । चेनाचामपि ग्रहणम् । 'सुपां सुलुक्' (७ । १ । ३९) इति सूत्रे 'इकारस्यान्तर्यतो दकारः' इति भाष्यात् । घोषसंवारनादाल्पप्राणत्वमचाम् । अन्यथा तदौ पर्यायेण स्याताम् । अल्पप्राणत्वानङ्गीकारे दधौ पर्यायेण स्याताम् । अचां घोषत्वं 'परः सन्निकर्षः' (१ । ४ । १०९) इति सूत्रे भाष्येऽपि स्पष्टम् । अन्य इति । द्वितीयचतुर्थौ तद्यमौ, शषसहा अयोगवाहाश्चेत्यर्थः ।

जिह्वामूलीययमादीनां स्थानबाह्यप्रयत्नकथनं तु स्वरूपनिर्णयाय, न तु सावर्ण्यान्तरतम्यपरीक्षादावुपयोगीति बोध्यम् ।

ग्रहणेन । 'अस्थिदधि' इति सूत्रे अनङोऽकारस्यैव उदात्तत्वेन निर्देशे कर्तव्ये उदात्तशब्देन उदात्तत्वविधानस्य वैयर्थ्यात् उदात्तादिशब्दं विहाय उपायान्तरेण बोधितानाम् उदात्तादीनाम् अविवक्षणात् = कार्यानुपयोगित्वात् अभेदकत्वं कल्प्यते । तथा च उदात्तत्वादिधर्माणां भेदकत्वं सवर्णसंज्ञायामनुपयुक्तत्वेन आन्तरतम्यपरीक्षामात्रोपयोगित्वाद् 'उदात्ता-

---

विवार प्रयत्न है । अन्य शब्द से वर्ग के तृतीय चतुर्थ पञ्चम वर्ण प्रथम द्वितीय सम्बन्धी यम हकार अनुस्वार य र ल तथा वकार का ग्रहण है । नादप्रयत्नकाः=नाद प्रयत्न वाले हैं । यद्यपि खय् प्रत्याहारघटक वर्णों के किसी एक प्रयत्ननिर्देश से भी प्रक्रियांश में आवश्यक तारतम्य परीक्षा का निर्वाह हो जाता, तथापि शिक्षा के अनुरोध से सभी प्रयत्नों का उल्लेख है । इनकी उच्चारण से प्राणों की अल्पता सी प्रतीति होने के कारण इनको अल्पप्राण कहते है । वर्ग में विद्यमान चारों

कादयो मावसानाः स्पर्शाः। यरलवा अन्तस्थाः। शषसहा ऊष्माणः। अचः स्वराः। ≍क≍ प इति कपाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयोपध्मानीयौ। अं अः इत्यचः परावनुस्वारविसर्गौ।

इति (स्थान) प्रयत्नविवेकः॥

अनुपयुक्ता इति। **'तुल्यास्य' (१।१।९) सूत्रे प्रशब्दग्रहणात्। उपयुक्तत्वे हि शछयोरपि सावर्ण्यं स्यादिति भावः। आन्तरतम्यपरीक्षा च घोषवत इत्यादिना तत्र तत्र स्फुटीभविष्यति। स्पर्शाः तत्पदव्यवहार्याः।**

अन्तस्थाशब्द आदन्तः। स्पर्शोष्मणोरन्तर्मध्ये तिष्ठन्तीति तदर्थः।

ऊष्माण इति। **ऊष्मा वायुस्तत्प्रधाना इत्यर्थः। एवं सोष्माण इत्यस्य वायुना सह वर्त्तन्त इत्यर्थ इति प्रातिशाख्यभाष्ये स्पष्टम्। यद्यपि वर्गद्वितीयचतुर्थयोरपि 'स्थानेऽन्तरतमः' (१।१।५०) सूत्रभाष्यादूष्मत्वं तथापि विवृतमूष्मणामित्यत्रैत एव गृह्यन्ते। अन्यथा खादीनां सावर्ण्यानापत्तौ 'नाऽऽज्झलौ' (१।१।१०) इत्यादिनिर्देशासङ्गतिरिति भावः।**

अचः स्वरा इति। **उदात्तादिभिः स्वयमेव राजन्त इति व्युत्पत्तेः। तद्धर्मत्वादुदात्तादयोऽपि स्वरा इत्युच्यन्ते।** कपाभ्यामिति। **खफयोरप्युपलक्षणम्।**

'अं अः' इत्युपलक्षणमिकारादेरपि। तदाह—अचः पराविति॥

कारस्य स्थाने उदात्तोऽकारः', 'अनुदात्तस्य स्थाने अनुदात्तः' इत्येवंरूपे नियमे एषामुपयोगः। एतद्रूपसादृश्याच्च उदात्तादीनां बाह्यप्रयत्नेषु गणना कृता, न तु बाह्यकार्यकारित्वेन तत्र गणनम्। यरलवाश्चेत्यत्र चकारेणाचामपि बोधः। अत्र प्रमाणमाह—**इति भाष्यात्** इति। इत्थं हि तत्र भाष्यम्—'लुकि किमुदाहरणम्? आर्द्रे चर्मन्, लोहिते चर्मन्। नैतदस्ति। पूर्वं सवर्णनापि एतत्सिद्धम्। न सिध्यति। यद्यत्र पूर्वसवर्णः स्यात् आन्तर्यतो दकारः प्रसज्येत' इति। भाष्ये दकारमात्रापादनेन घोषसंवारनादाल्पप्राणत्वमचाम् सिध्यति। अन्यथा अल्पप्राणत्वमात्राङ्गीकारे तकार इव दकारोऽपि प्राप्नोति। अल्पप्राणत्वस्य अचामनङ्गीकारे पूर्वोक्तत्रितयमात्राङ्गीकारे दधौ पर्यायेण प्राप्नुतो न तकार इति भावः।

स्पर्शा इति। घटः कलशः इत्यत्र अभेदान्वयवारणाय तद्धर्मभेदस्य कारणत्वं स्वीकृतम्। तथा च तद्धर्मावच्छिन्नबोधे = घटत्वावच्छिन्नघटविषयकबोधे तद्धर्मा-

---

वर्णों में प्रत्येक वर्ण पञ्चम वर्ण के पर में रहने पर यम कहा जाता है। सादृश्य यत्न से लिया गया है। यम वर्ण पूर्ण वर्ण के सदृश ही हैं, तत्स्वरूप नहीं है। अत एव अयोगवाह के मध्य में यम की गणना की गयी है। तथा पाणिनीयशिक्षा में 'यम चार हैं'—इस कथन की सङ्गति होती है। अन्यथा वर्णसमाम्नाय में पठित वर्ण से ही इनका संग्रह सिद्ध होने से अयोगवाह में इनका पाठ वर्णसमाम्नाय में ग्रहण के लिये व्यर्थ हो जायगा। इस प्रकार के वर्ण वेद में ही मिलते हैं।

अन्येषामिति। यहाँ अन्य पद से अच् एवं पूर्वकथित हल् से भिन्न हल् वर्णों का ग्रहण है। य र ल वाश्च इसमें च पद से अच् का संग्रह है। 'सुपां सुलुक्' सूत्र की भाष्योक्ति के

'ॠलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्' (वा०)। अकारहकारयोरिकार-शकारयोर्ऋकारषकारयोर्लृकारसकारयोश्च मिथः सावर्ण्ये प्राप्ते।

ॠलृवर्णयोरिति। आ च लृवर्णश्चेति विग्रहः। 'ऋत्यकः' (६।१।१२८) इति प्रकृतिभावः। एतदर्थमेव वर्णोपदेशे लृकारपाठः। अन्यथा तस्यासत्त्वशङ्कयाऽस्य वचनस्यैवाशक्यत्वं स्यात्। ध्वनितञ्चेदम् 'एओङ्' (मा० सू० ३) इति सूत्रशेषे भाष्ये। तत्र हि—सँय्यन्तेत्यादौ 'हलोऽनन्तराः (१।१।७) इति सूत्रे प्रत्याहारघटकेष्वपि ग्रहणकशास्त्रप्रवृत्त्या मात्राकालिकस्य यद्वयादेः 'अणुदित्' (१।१।६९) सूत्रेण यादिग्रहणेन ग्रहणाद् द्विव्यञ्जनाश्रयो विधिर्न प्राप्नोतीत्याशङ्क्य मात्रिकव्यञ्जनानुपदेशादनुपदिष्टस्या-

---

वच्छिन्नस्य घटस्य नान्वयः; उभयोर्धर्मयोः भेदाभावात्। तथैव कादयः इत्यादेः स्पर्शा इत्यनेन सहाभेदान्वयो न सम्भवति इत्याशयेनाह--**स्पर्शपदेति**। स्पर्शपदव्यवहारत्वेन स्पर्शपदात् स्पर्शे उपस्थिते भिन्नधर्मावच्छिन्नत्वाद् अन्वयबोधः सुलभः॥

'ॠलृवर्णयोः' इत्यनेन ऋकारऌकारयोः सावर्ण्याद् ऋकारेणैव लृकारस्यापि ग्रहणाद् वर्णसमाम्नाये लृकारोपदेशो व्यर्थः? इत्यत आह—**एतदर्थमेवेति**। एतद्बोधार्थमेव। लृकारोपदेशाभावे लृकारस्यासत्त्वशङ्कया 'ॠलृवर्णयोः' इति वार्त्तिकस्य वाक्यार्थबोध एव न स्यात्। पदार्थोपस्थिते वाक्यार्थबोधं प्रति कारणत्वेन पदार्थस्य लृकारस्योपस्थितेरभावात्। बोधाभावे वार्त्तिकारम्भ एव दुर्घटः स्यात्। अतो वर्णसमाम्नाये लृकारस्य पाठः।

कल्प्यमानमीदृशमर्थं भाष्येण प्रमाणयति—**ध्वनितमिति**। इदम् = अनुपदिष्टस्यासत्त्वम्। 'तत्र ही'ति उक्तमित्यनेन 'सूत्रे' इति ग्रहणादित्यनेन सम्बध्यते। संय्यन्ता—इत्यत्र परसवर्णे जाते प्रत्याहारघटकेषु = प्रत्याहारबोध्यत्वेनानुच्चारितेषु द्वितीयतृतीयप्रभृतिवर्णेषु उच्चारित एव शब्दः प्रत्यायको नानुच्चारितः—इति नियमानङ्गीकाराद्

बल से अचों का भी घोष संवार नाद तथा अल्पप्राण प्रयत्न है। उक्त भाष्य में 'सुपां' इस सूत्रस्थ लुक् ग्रहण के अभाव में 'आर्द्रे चर्मन्' इसमें पूर्वसवर्ण से सप्तमी-विभक्तिसम्बन्धी इकार के स्थान में आन्तरतम्य से दकार की आपत्ति दी गयी है। यदि घोष संवार नाद प्रयत्न न होकर केवल अच् का अल्पप्राण प्रयत्न होता तो वर्ग के प्रथम तृतीय पञ्चमों का अल्पप्राण प्रयत्न होने से दकार के समान तकार का भी प्रसङ्ग देना था, किन्तु नहीं दिया है। एवं घोष आदि प्रयत्न ही माना जाय, अल्पप्राण प्रयत्न नहीं--यह स्वीकार करने पर दकार के समान धकार का भी उक्त प्रयत्न के द्वारा साम्य होने से दोनों का पर्याय से प्रसङ्ग प्राप्त होगा। अतः अच् वर्णों का भी घोष आदि एवं अल्पप्राण प्रयत्न है। अच् वर्णों के घोष प्रयत्न का निर्देश 'परः सन्नि०' इस सूत्र के भाष्य में भी स्पष्ट है।

अन्ये इति। इसमें द्वितीय चतुर्थ वर्ण इनके सम्बन्धी यम, श ष स ह, और अयोगवाहों का संग्रह है। जिह्वामूलीय तथा यमों का स्थान एवं बाह्यप्रयत्न का प्रतिपादन केवल इनके स्वरूप ज्ञान कराने के लिये है, सवर्णसंज्ञा तथा आन्तरतम्य विचार में उपयोगिता की दृष्टि से नहीं है।

'अणुदित्सूत्रबलाद् यकारद्वयस्य मात्रिकस्य हल्ग्रहणेन ग्रहणाद् हल्द्वयाभावाद् हल्-द्वयनिमित्तिका संयोगसंज्ञा न प्राप्नोतीति शङ्का 'वर्णैकदेशा वर्णग्रहणेन न गृह्यन्ते' इत्यस्मिन् पक्षे कृता। ततो मात्रिकस्य व्यञ्जनस्य वर्णसमाम्नाये अनुपदिष्टत्वाद् अनुपदिष्टस्य = अनुच्चारितस्यासत्त्वात्, असतः प्रतिपत्तेः = सत्ताविरहिणो ज्ञानस्य, कर्तुमशक्यत्वात् न मात्रिकस्य व्यञ्जनस्य अण्पदेन ग्रहणमित्युक्तम्। अनेन अनुपदिष्टस्या-सत्त्वं स्पष्टमेव लभ्यते।

न चानुपदिष्टत्वमात्रेण असत्त्वस्वीकारे आकारादीनामपि वर्णसमाम्नाये अनु-पदिष्टत्वादसत्त्वप्रसङ्ग इति वाच्यम्; ए ओ ङ् इत्यनेन द्विमात्रस्य अच उपदेशात् अचां तथाविधत्वं (द्विमात्रत्वं) नानुपदिष्टम्, व्यञ्जनस्य तु मात्रिकस्य क्वचिदपि उप-देशाभावात् मात्रिकत्वं व्यञ्जनानां कल्पयितुं न शक्यते इति भावः। न च ऌकारस्य 'गम्ऌ गतौ' इत्यत्रोपदेशात् तस्यानुपदिष्टत्वं कथमिति नाशङ्कनीयम्; वर्णसमाम्नाये पाठाभावमात्रेण अनुपदिष्टत्वाभिधाने भाष्यकृतस्तात्पर्यात्। एतेन 'शिष्टैरनुपदिष्टत्वं गृह्यते' इत्युक्तिर्न भाष्यानुकूला।

यदि तु अयोगवाहानां वर्णसमाम्नाये पाठाभावेन तेषामसत्त्वं स्यात्, तदा तु सूत्रभाष्यकारादिशिष्टानामपि उपदेशो ग्राह्यः। न च ऋकारस्य ऌकारेण सह सावर्ण्ये

अनुपयुक्ता इति। यद्यपि बाह्य प्रयत्न सवर्णसंज्ञा में अनुपयोगी हैं; क्योंकि 'तुल्यास्य' सूत्र में प्र शब्द से आभ्यन्तर का ही ग्रहण है। ऐसा न मानने पर शकार तथा छकार की परस्पर सवर्णसंज्ञा स्थान तथा विवार श्वास आदि बाह्य प्रयत्न के तुल्य होने से हो जायगी। आन्तरतम्यविचार में इनका उपयोग 'घोषवन्तः' इत्यादि के द्वारा तत्तत् स्थानों में वाग्घरिः इत्यादि में स्फुट होगा। **अन्तस्था** शब्द स्था धातु से विच् प्रत्यय करने से आकारान्त है। स्पर्श और ऊष्मा अक्षरों के मध्य में रहने से इनको शब्द से कहा जाता है। **उष्माणः** इसका वायु-प्रधान अर्थ है। **सोष्माणः** इसका वायु के साथ रहते हैं ऐसा अर्थ प्रातिशाख्य में स्पष्ट है। यद्यपि वर्ग के द्वितीय चतुर्थ वर्णों को भी भाष्य में ऊष्मा कहा गया है। तथापि 'विवृतमूष्मणाम्'— यहाँ ऊष्मा से श र् का ही ग्रहण है। ऐसा नही मानने पर नाज्झलौ इस सूत्रनिर्देश की असङ्गति हो जायगी। चतुर्थ वर्ण झकार का विवृत प्रयत्न भी होने से चकार के समान प्रयत्न नहीं होगा। अतः सावर्ण्याभाव से पूर्वसवर्ण झकार नहीं हो सकेगा। हल् के विना भी अच् का उदात्तत्वादि धर्मों के साथ उच्चारण होने से इनको स्वर कहते हैं। अच् के ही उदात्तत्वादि धर्म होने से उदा-त्तादि भी स्वर कहे जाते हैं। क प यह ख फ का भी उपलक्षण है। अं अः यह भी इकारादि का उपलक्षण है।

ऋऌवर्णयोरिति। 'ऋत्यकः' इससे प्रकृतिभाव हो जाने के कारण ऋ का ऌ के साथ दीर्घ नहीं हुआ। ऌकार के बोधार्थ ही वर्णसमाम्नाय में ऌकार का पाठ है। पाठ न करने पर ऌकार के असद्भाव की आशङ्का में इस वार्तिक का आरम्भ ही अशक्य हो जायगा, अतः अ-कारादि से आकारादि के ग्रहण के समान ऋ से ऌकार का ग्रहण सम्भव नहीं होगा। इसी कारण वार्तिक का आरम्भ किया गया है।

सत्त्वात् असत्प्रतिपत्तेरशक्यत्वान्न 'अणुदित्' (१ । १ । ६९) सूत्रेण तद्ग्रहणमित्युक्तम् । न च 'क्लृ३प्तशिखः' इत्यादौ 'अनृत' इति निषेधात् प्लुतानापत्तिः; ऋल्वर्णयोः पृथगनुबन्धत्वकरणेन क्वचित् परम्पराग्राहकत्वकल्पनेनादोषात् ।

अकारहकारयोरिति । एकारस्य तालव्यत्वमोकारस्योष्ठ्यत्वमिति मते एकारशकारादीनामप्युपलक्षणमिदम् । एतेन 'नाज्झलौ' इत्येव सूत्रयितुमुचितमित्यपास्तम् । 'हशि च' (६ । १ । ११४) इत्येव सिद्धे 'अतो रोः' (६ । १ । ११३) इत्याकारे व्यावृत्त्यर्थम् ।

'गुरोरनृतोः' इत्यनेन ऋकारभिन्नस्य विधीयमानः प्लुतो लृकारस्य न प्राप्नुयात्; ऋकारग्रहणेन लृकारस्यापि ग्रहणात् ऋद्भिन्नत्वाभावात् । तथा च क्लृ३प्तशिख इत्यत्र ऋद्भिन्नत्वाभावात् प्लुतो न स्यादिति नाशङ्कनीयम्; 'गम्लृ गतौ' इत्यत्र लृकारस्य 'भ्राजृ दीप्तौ' 'ओणृ अपनयने' इत्यादि धातौ ऋकारस्य च भिन्नभिन्नरूपानुबन्धस्य करणे प्रयोजनाभावाद् वैयर्थ्यम्; एकेनैवानुबन्धनिर्देशेन उभयोरपि संग्रहात् । एवञ्च एतत्सामर्थ्यात् सावर्ण्यमनिष्टस्थले नेष्यते इत्यदोषात् । अत्र प्लुतस्येष्टतया ऋकारेण लृकारस्याग्रहणाद् ऋद्भिन्नत्वसत्त्वात् प्लुतः सिद्धः । एवं कल्पने पृथगनुबन्धकरणमपि सफलं सिद्धम् । तेन ऋदिति लृदित्कार्यम्, लृदिति च ऋदित्कार्यं न भवति ।

'ए ओ ङ्' इस सूत्र के भाष्य में यह अर्थ ध्वनित है । 'सँय्यन्ता' इत्यादि स्थलों में प्रत्याहार में घटकतया अनुच्चरित वर्ण में भी 'अणुदित्' सूत्र की प्रवृत्ति मानी गयी है । उच्चारित शब्द ही अर्थबोधक होता है । इसके अनुसार यकार का हल्‌बोधक हल् शब्द में उच्चारण न होने से सवर्णग्रहण के अभाव की शङ्का का प्रत्याहारघटकेषु अर्थात् अनुच्चारितों में भी 'अणुदित्' सूत्र की प्रवृत्ति के द्वारा समाधान किया है । इस प्रकार एक मात्रा वाले यकारद्वय का 'अणुदित्' सूत्र की सहायता से यकार के ग्रहण से 'हलोऽनन्तराः' इसमें ग्रहण होने से व्यञ्जनद्वय निमित्त से होने वाली विधि प्राप्त नहीं होगी ? इस शङ्का का समाधान मात्रिक व्यञ्जन का उपदेश नहीं है । जिसका उपदेश नहीं है उसका अस्तित्व नहीं है । असत् का प्रक्रियादशा में ज्ञान अशक्य होने से 'अणुदित्' सूत्र से ग्रहण नहीं हुआ—ऐसा लिखा है । इससे उक्तार्थ ध्वनित होता है ।

शङ्का—क्लृ३प्तशिखः में गुरोरनृतः इससे प्लुत नहीं होगा; क्योंकि ऋ लृ को सवर्णसंज्ञा होने से ऋकार से भिन्न नहीं है ?

समाधान—भिन्न भिन्न अनुबन्धों के निर्देशसामर्थ्य से वार्त्तिकोक्त सावर्ण्य अनित्य है । कहीं लृकार का ग्रहण ऋकार से न होने से उक्त दोष नहीं हुआ ।

अकार-हकारयोरिति । एकार का तालु ओकार का ओष्ठ स्थान मानने वालों के मत में एकार और शकार का भी उक्त पद उपलक्षण है । अर्थात् इनकी भी परस्पर सवर्णसंज्ञा प्राप्त है । इसीलिये अक् के स्थान पर अच् का पाठ नाज्झलौ इसमें किया । अक् पद से एकार का संग्रह नहीं होता । अकार हकार का सावर्ण्य होने से शिवोऽर्च्यः इत्यादि स्थल में हकार से अकार का ग्रहण हो जाने से 'हशि च' इससे उत्व सिद्ध होने पर भी 'अतो रोः' इसका आरम्भ दीर्घाकारस्थल में उत्वनिवारणार्थ किया गया है । 'पर में अकारत्ववान् के रहने पर यदि उत्व हो तो ह्रस्वाकार के ही पर में रहने से' इस प्रकार नियम के द्वारा चारितार्थ्य है ।

१३. नाज्झलौ । १ । १ । १० । आकारसहितोऽच्, आच्, स च

सूत्रे द्विवचनोपपत्तये मध्यमपदलोपिसमासं दर्शयति—आकारसहित इति । अत एव 'वेलासु' इति निर्देश उपपद्यते । समाहारद्वन्द्वे तु टच्प्रसङ्गोऽज्झलिति समाहारद्वन्द्वं कृत्वा आ-पदेन द्वन्द्वे तु अज्भिरप्याकारस्य सावर्ण्यं न स्यादिति भावः । अत एव भाष्ये प्रयत्नभेदेनैषां सावर्ण्याभावः साधितः ।

नाज्झलौ । एकारस्येति । अकारहकारयोः इकारशकारयोः क्रमेण कण्ठस्थानकत्वेन तालुस्थानकत्वेन यावत्स्थानप्रयत्नसाम्यात् सवर्णसंज्ञा यथा प्राप्ता तथा एकारस्य केवल-तालुस्थानकत्वम्, ओकारस्य केवलौष्ठस्थानकत्वमिति बह्वृच प्रातिशाख्यमते एकार-शकारयोः ओकारोपध्मानीययोः परस्परं सवर्णसंज्ञा प्राप्नोति । तत्प्रतिषेधाय नाज्झला-विति सूत्रम् । 'नाक्शलौ' इत्येवं सूत्रकरणे तु अक्प्रत्याहारे एकारस्य ओकारस्य च पाठाभावेन पूर्वोक्तरीत्या प्राप्तायाः सवर्णसंज्ञायाः निषेधो न स्यात्; अक्-शलोरेव सवर्ण-संज्ञायाः तथान्यासे प्रतिषेधात् । अतस्तादृशो न्यासो न कृतः ।

नच हकाराकारयोः परस्परं सावर्ण्ये हकारग्रहणेन अकारस्यापि ग्रहणाद् रामोऽस्तीत्यादौ 'हशि च' इत्यनेनैव उत्वे सिद्धे 'अतो रोरप्लुतात्' इति सूत्रारम्भो व्यर्थः । तत्सामर्थ्याद् अज्झलोः सावर्ण्यं न भवतीति ज्ञाप्यते । तथा च 'नाज्झलौ' इति सूत्रं व्यर्थमिति वाच्यम्, हकारभिन्ने स्वसवर्णे परस्मिन् सति ह्रस्वाकारात् परस्य रोः उत्वञ्चेत् तदा परस्मिन् ह्रस्वत्वविशिष्टे अकारे सत्येवेति नियमबोधनाय 'अतो रोः' इत्य-स्य चारितार्थ्यात् । एतन्नियमाभावे तु श्वः आगन्ता इत्यादावपि हकारस्य आकारेणापि सह सावर्ण्याद् उत्वापत्तेः । एकारस्य केवलतालुस्थानकत्वपक्षे इकारेण सह तस्य सवर्ण-संज्ञा प्राप्नोत्येव । अचो हला सह परस्परं सवर्णसंज्ञायाः 'नाज्झलौ' इत्यनेन निषेधेऽपि अचोः परस्परं सवर्णसंज्ञायाः प्रतिषेधे तस्याप्रवृत्तेः । तथा च एतत्सिद्धये एकारस्य विवृत-तरः प्रयत्न आस्थेयः । अतः प्रयत्नभेदात् सवर्णसंज्ञा न भवति ।

अत्र सूत्रे अच्-पदेन वर्णसमाम्नाये पठितस्य ह्रस्वाकारस्यैव ग्रहणम्; एतस्य सूत्रस्य वाक्यार्थबोधकाले अणुदित्सूत्रस्य वाक्यार्थबोधाभावेन अणुदित्सूत्रसहकारेण दीर्घाकारादीनां ग्रहीतुमशक्यत्वात् । अत एव 'न स्वस्मिन् न स्वाङ्गे' इत्युक्तं भाष्ये । तथा च आकारहकारयोः सावर्ण्यं प्रसक्तमेवेति तद्वारणाय नाज्झलौ इत्यत्र प्रश्लेषः, तत्र आ च अच् च हल् चेति द्वन्द्वे सति बहुवचनं प्रसज्येत । अतो मध्यमपदलोपिसमासेन व्याचष्टे परममूले-**आकारसहित** इति । नच आ च अच् चेत्यनयोः समाहारद्वन्द्वं कृत्वा ततो हल्पदेन सह इतरेतरयोगद्वन्द्वे द्विवचनस्योपपत्तिः स्यादिति वाच्यम्; तथा सति 'द्वन्द्वाच्चुदस-

---

शङ्का—आकार के प्रश्लेष से आ अच् तथा हल् इस प्रकार अनेक होने से द्विवचननिर्देश सूत्र में नहीं होगा ?

समाधान—आकारेण सहितः अच् आच्, इसके बाद आच् का हल् के साथ द्वन्द्व होने से द्विवचन उपपन्न हो जाता है । प्रश्लेष में 'वेलासु'' यह सूत्रनिर्देश प्रमाण है । अन्यथा आ का हकार के ग्रहण होने से इण् से उत्तर सु घटक सकार को मूर्धन्यापत्ति हो जायगी ।

हल् च–इत्येतन्मिथः सवर्णौ न स्तः। तेन दधीत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येतेषु परेषु यणादिकं न। अन्यथा दीर्घादीनामिव हकारादीनामपि ग्रहणकशास्त्रबलादच्त्वं स्यात्। तथा हि—

एतेषु परेष्विति। **इदमुपलक्षणम्। एतेषु विद्यमानस्येत्यपि बोद्धव्यम्। तेन हकारादीनामकारादिषु परतो दीर्घादिसङ्ग्रहः।**

अच्त्वं स्यादिति। **अच्पदबोद्धव्यत्वं स्यादित्यर्थः। इदं प्रत्याहारघटकेष्वपि ग्राहकशास्त्रप्रवृत्तिरिति मते व्यक्तिपक्षे च बोद्धव्यम्॥**

हान्तात् समाहारे' इत्यनेन टचि आच इति रूपं स्यात्। तस्य हल्पदेन समासे चकारे अकारः श्रूयेत। नच अच् च हल् चेत्येवं समाहारे कृते ततः आकारेण सह इतरेतरयोगद्वन्द्वे न टचः प्रसङ्गः, अन्ते चकाराभावात्। एवं सति द्विवचनमप्युपपद्यते इति वाच्यम्; आकारस्य हल्भिरिव अज्भिरपि सह सवर्णसंज्ञायाः प्रतिषेधः प्राप्नुयात्। समस्तयोः अज्झलोरेकदेशे एव हलि आकारस्य प्रश्लिष्टस्यान्वयः कर्तुमशक्यः। इष्यते च अज्भिः सह आकारस्य सवर्णसंज्ञा। किञ्च, अज्झलोः समाहारे कृते 'स नपुंसकम्' इति नपुंसकत्वनियमेन आकारेण सह इतरेतरयोगे 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इत्यनेन परवल्लिङ्गतायां नपुंसकत्वापत्तिश्च।

अतएव अचां हल्भिः सह प्रयत्नभेदात् सावर्ण्याभावं संसाध्य सूत्रं प्रत्याख्यातं भाष्यकृता। अन्यथा भाष्यमते आकारस्य अकारेण सह प्रयत्नभेदाभावात् सावर्ण्यं सूत्रमते पूर्वोक्तसमासपक्षे तन्निषेधात् सावर्ण्याप्रसक्तिरिति परस्परं मतभेदः स्यात्। अतः पूर्वोक्तसमासरीतिरेव साधीयसी इति तात्पर्यम्। एतेन = एकारस्य शकारेण सह सावर्ण्यदोषेण। **अतो रोरित्याकारे इति।** अतो रोरप्लुताद् इत्यंशस्य हशि चेत्यत्र अनुवृत्त्यर्थमावश्यकत्वेऽपि अप्लुतेऽति इत्यंश इति भावः। अत एव = आकारप्रश्लेषादेव। **द्वन्द्वे तु इति।** इतरेतरयोगे इति पूरणीयम्। अत एव = दीर्घप्लुतयोः ह्रस्वाकारेण सह सावर्ण्यस्येष्टत्वादेव। दधि हरति, दधि शीतलमित्येतत्पदद्वयप्रयोजनप्रदर्शनापेक्षया एकस्मिन् एव पदे हरतीत्यत्र हकाराकारयोः सावर्ण्ये, शीतलमित्यत्र शकारेकारयोः सावर्ण्ये च दीर्घस्य दोषस्य सम्भ-

---

शङ्का—नाज्झलौ इसमें समाहार द्वन्द्व के द्वारा आच् का हल् के साथ द्वन्द्व करने से क्या दोष है?

समाधान—'द्वन्द्वाच्चुद' इससे टच् हो जायगा, अतः वैसा नहीं कर सकते। अच् झल् के साथ अकार का समाहार करने पर आकार का अच् के साथ भी सावर्ण्य का प्रतिषेध प्राप्त होगा। आकार की अच् के साथ सवर्णसंज्ञा इष्ट होने से ही भाष्यकार ने प्रयत्नभेद से अच् और हल् को सवर्णसंज्ञा व्यावृत्त की है, अन्य की नहीं। **परेषु इति।** परेषु यह पद विद्यमानस्य का उपलक्षण है। अतः दधि हरति इसमें जिस प्रकार इकार को यण् नहीं होता, उसी प्रकार 'हरति' इसमें हकार अकार को परस्पर दीर्घ भी नहीं हुआ। प्रत्याहारघटक वर्णमात्र में न केवल उच्चारितमात्र में अणुदित्सूत्र की प्रवृत्ति पक्ष में और व्यक्तिपक्ष में इस प्रकार का कथन है।

१४. अणुदित्सवर्णस्य चाप्रत्ययः । १ । १ ६९ । प्रतीयते विधीयत

अणुदित् (१ । १ । ६९) । अणमुद्दिश्य सवर्णबोधकताऽत्र विधीयते । सवर्णस्ये- त्यस्य बोधकमिति शेषः । आदेशादौ सवर्णग्रहणवारणायाह—प्रतीयते इति ।

परे तु—प्रत्ययग्रहणमेकदेशानुमत्या 'भाव्यमानेन सवर्णानां ग्रहणं न' इति परिभाषां ज्ञापयतीति युक्तम् । प्रत्ययपदस्य तदर्थत्वं तु न युक्तम्; वार्त्तिककृता टित्किन्मि- त्सूपसंख्यानोक्तेः । भाष्यकृता चाप्रत्ययग्रहणमेतत्परिभाषाज्ञापकमित्युक्तम् । 'ज्यादादी-

वात् पदद्वये दोषदानमनावश्यकमित्याह—इदमुपलक्षणम् । परेषु इति विद्यमानेषु इत्यु- पलक्षयति । अतस्तेषामपि संग्रहः । अच्पदस्य प्रत्याहारबोध्यवर्णानां बोधकतया संज्ञा- रूपतया ततः त्वप्रत्यये स्वरूपस्य तस्य बोधः स्यात् । अत आह—अच्पदेति । 'उच्चा- रित एव शब्दोऽर्थं प्रत्याययति नानुच्चारितः' इति न्यायमनादृत्य प्रत्याहारघटकेषु= प्रत्याहारेण बोध्याः घटकाः येऽनुच्चारिता द्वितीयादिवर्णाः तेष्वपि, ग्राहकशास्त्रस्य=अणु- दित्सूत्रस्य । जातिपक्षे तु इत्वशकारत्वजातेर्भेदादेव दोषाभावात् नाज्झलावित्यस्य अनारम्भ एव ।

अणमुद्दिश्य इति । अतएव संज्ञाभूतस्यापि अणः पूर्वं निर्देशेन विरुध्यते उद्देश्य- स्य प्राथम्येन निर्देशः सर्वमतसिद्ध इति । विधेयस्य सूत्रे अनुपादानात् संज्ञासंज्ञिभावो मूलोक्तः कथम् ? इत्याह—बोधक इति । सवर्णस्य बोधकम् । प्रत्ययपदं न प्रत्ययसंज्ञक- परम् । तथा सति आगमादेशादीनां प्रत्ययपदेन संग्रहाभावेन तेषां सवर्णग्राहकत्वं स्यात् । अतः प्रत्ययपदं प्रतीयते विधीयते इति विग्रहे निष्पन्नं विधीयमानमात्रस्य बोधकम् । तदाह—आदेशादौ इति । आदि पदेन आगमस्य संग्रहः ।

स्वसिद्धान्तमाह—परे तु इति । प्रत्ययस्यापि भाव्यमानतया=विधीयमानतया । प्राचीनसम्मतायां भाव्यमानपरिभाषायां भाव्यमानस्य विधीयमानमात्रस्य ग्रहणात् परिभाषैकदेशत्वं प्रत्ययस्य सुतरामेव सिद्धम् । तथा च एकदेशे प्रत्ययांशसवर्णग्रहणा- भावस्य सूत्रकारसम्मतत्वेन तथैव भाव्यमानमात्रस्य सवर्णग्रहणाभावो बोध्यते । 'भाव्य- मानेन सवर्णानां ग्रहणं न' इति परिभाषां ज्ञापयति, बोधयतीत्यर्थः ।

तदर्थकत्वं = विधीयमानार्थकत्वम् । परममूलोक्तदिशा प्रतीयते विधीयते इति व्युत्पत्त्या प्रत्ययपदेन भाव्यमानमात्रस्य संग्रहो नोचितः । 'टित्-कित्-मित्सु सवर्णग्रहण-

अणुदित् इति । अण् को उद्देश्य करके सवर्णबोधकत्व का विधान है । बोधक के अध्या- हार से सवर्ण का बोधक ऐसा अर्थ होता है । आदेश, आगम आदि में सवर्ण ग्रहण की व्यावृत्ति का उपाय प्रदर्शित करते हैं—प्रतीयते इति । अर्थात् प्रत्यय पद विधीयमानमात्र का बोधक है ।

परे तु इति । स्वमत में प्रत्यय पद प्रत्ययसंज्ञकपरक होता हुआ भी एकदेशानुमति के द्वारा 'भाव्यमानोऽण् सवर्णान् न गृह्णाति' = भाव्यमान सवर्ण का ग्राहक नहीं होता—इस परिभाषा का बोधक है । यदि सूत्र में प्रत्यय पद का उक्त व्युत्पत्ति के द्वारा विधीयमान अर्थ विवक्षित होता तो वार्त्तिककार के वार्त्तिक द्वारा टित् कित् मित् में सावर्ण्याभाव का कथन असङ्गत हो जायगा । सूत्रघटक अप्रत्यय पद से ही उक्त स्थानों में व्यावृत्ति सिद्ध है । भाष्यकार ने भी अप्रत्यय पद से

इति प्रत्ययः, थविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् ।

यसः । ६ । ४ । १६०) इति सूत्रे भाष्ये ध्वनितमिदम् । तत्र हि—'किमर्थमादित्युच्यते, ज्याद इत्येवोच्यताम् । का रूपसिद्धिः ? आन्तर्यतो दीर्घो भविष्यति । एवं तर्हीदमेव ज्ञापयति-भवत्येषा परिभाषा 'भाव्यमानेन' इत्यादि । त्वदुक्तव्याख्याने हि पूर्वपक्ष-सिद्धान्तयोरुभयोरपि निर्दलत्वापत्तिः ।

निषेधस्य उपसंख्यानं कर्तव्यम्' इत्युक्तं वार्तिककारेण । भाष्यकारेणापि च परिभाषा ज्ञापनद्वारा तद्दूषणं परिहृतम् । यदि च प्रत्ययपदमुक्तव्युत्पत्या विधीयमानमात्रपरं स्यात् तदा टित्किन्मिदादिषु सवर्णग्रहणस्य प्रसक्त्यभावेन वार्तिकारम्भो निर्मूलः स्यात् । एवं भाष्यस्यापि परिभाषाबोधनद्वारा समाधानासङ्गतेश्च प्रत्ययपदं न विधीयमानपरम् । यदि तु प्रत्ययपदस्य उक्तव्युत्पत्त्या विधीयमानमात्रपरत्वं यद् बोधितं तत्तु उपायस्य उपायान्तरादूषकत्वेन उपायान्तरपरम् । तथा च भाष्योक्तेः सामञ्जस्यसम्भवात् नास-ङ्गतिस्तत्राह—**ज्यादादीयस इति ।**

तत्र हि भाष्ये ज्यायानित्यत्र ज्यशब्दात् परस्य ईयसुन ईकारस्य 'ज्यादादीयसः' इत्यनेन आकारो विधीयते । तत्र शङ्कितम्—आदित्यस्य स्थाने सूत्रे अदित्येवोच्यताम्, तथा च अकारादेशेऽपि 'अकः सवर्णे' इत्यनेन अकारयोः दीर्घेणापि तद्रूपं सिद्धम् । न सिध्यति । अकारविधाने 'अतो गुणे' इति पररूपापत्तिः । अकारविधानसामर्थ्यात् पररूपं न भविष्यतीति वक्तुं न शक्यते; ज्यघटकाकारस्य ईयसुन ईकारेण सह गुणस्य व्यावृत्त्या अकारविधानस्य चारितार्थ्यात् । अकारादेशाभावे ज्येयान् इति स्यात् । अतः पररूपा-पत्तिभिया अदिति न कृतम् । एतदुत्तरभाष्ये-विधीयमानस्याकारस्य अणुदित्सूत्रबलेन सवर्णस्य बोधकत्वात् अकारेण आकारस्यापि उपस्थितौ आन्तरतम्याद् ईयसुन्प्रत्यय-सम्बन्धिनो दीर्घकारस्य दीर्घाकार एव स्यात् । तथा च आदित्येव किं न कृतमिति शङ्किते अप्रत्ययपदमेकदेशे अनुमितिद्वारा 'भाव्यमानेन सवर्णानां ग्रहणं न' इति परिभाषां ज्ञापयति = बोधयतीत्यर्थः । एवञ्च अकारादेशस्यापि विधीयमानत्वेन परिभाषया सवर्णग्रहणे वारिते ह्रस्वाकारविधाने पररूपस्यापत्तेः । तद्वारणाय आदित्यादेशो विहितः । अनेन भाष्येण पूर्वोत्तरपक्षेण प्रत्ययपदस्य परममूलोक्तव्युत्पत्त्या विधीयमानमात्रपरत्वं न

व्यावृत्ति को सिद्ध न कर भाव्यमान परिभाषा के ज्ञापन से उसका परिहार किया है । 'ज्यादादी-यसः' इसके भाष्य से भी उक्तार्थ का ध्वनन होता है । वहाँ ज्यायान् इसमें ज्य से उत्तर ईयसुन् के ईकार को आकार होने से उक्त प्रयोग सिद्ध होता है । यहां अकार का विधान करने पर भी आन्तरतम्य से दीर्घ ईकार को दीर्घ आकार प्राप्त होने से रूप की सिद्धि हो जाती है । अतः आकारविधानसामर्थ्य से भाव्यमानपरिभाषा का ज्ञापन होता है—ऐसा कहा है । यदि प्रत्यय पद विधीयमान अर्थ का बोधक होता तो पूर्वोत्तर दोनों पक्षों की असङ्गति दुर्वार है, क्योंकि आदेश विधीयमान होने से सवर्णग्राहक न होने के कारण आन्तरतम्य से दीर्घ आकार प्राप्ति की शङ्का और समाधान दोनों का कथन निर्मूल होगा ।

जातिपक्षेऽप्यनयैव परिभाषया सवर्णग्रहणं वारणीयम्। व्यक्तिपक्षे गुणाभेदकत्वप्राप्तञ्च वारणीयम्। तेन घटवदित्यादौ नानुनासिको वकारः। एतेन अजुदिदित्येव सिद्धेऽण्ग्रहणेन यण्सु गुणभेदकत्वं ज्ञाप्यते इति परास्तमित्याहुः।

युक्तम्। अन्यथा आन्तरतम्येन दीर्घाकारसिद्धेराशङ्का, भाव्यमानपरिभाषाबोधनद्वारा आकारस्याग्रहणमित्युभयमसङ्गतं स्यात्। त्वदुक्तव्याख्याने=परममूलोक्तरीत्या प्रत्ययपदस्यार्थंप्रतिपादने विधीयमानलेन दीर्घाकारणामनुपस्थितौ आन्तरतम्येन आकारविधानस्य शङ्कैव न स्यात्। **ईदृशमर्थमज्ञात्वा** शङ्कायाः सम्भवेऽपि सिद्धान्तभाष्येण सिद्धान्तस्य तवभिमतस्य समाधानरूपेण वक्तव्यत्वात्। तथा नोक्तम्; अतः प्रत्ययपदस्य प्रत्ययसंज्ञक इत्येवार्थः। हिशब्दस्त्वर्थे। अजानतोऽपि पूर्वपक्षः सम्भवत्यतः **सिद्धान्तेति**। उत्तरपक्षे सिद्धान्त एव वक्तव्यः।

'अप्रत्ययः' इत्यस्य सूत्रे सत्त्वेऽपि 'अनन्तरस्य विधिर्भवति प्रतिषेधोवा' इतिनियमेन अनन्तरत्वाद् अप्रत्ययः इत्यनेन अणुदित्सूत्रेण प्राप्तस्य सवर्णग्रहणस्य निषेधेऽपि जातिपक्षेण प्राप्तं तादृशजात्यवच्छिन्नस्य व्यक्तिमात्रस्य ग्रहणम्। एवं 'गुणा अभेदकाः' इति गुणानामनुनासिकत्वादीनां भेदाभावात् निरनुनासिकेन अकारादिवर्णेन सानुनासिकस्यापि ग्रहणं प्रसक्तं नानेन वारितं स्यात्। तदर्थं 'भाव्यमान'परिभाषा कर्तव्यैव इत्याशयेनाह—**जातिपक्षे** इति। अनयैव=भाव्यमानपरिभाषयैव। एवकारेण प्रत्ययपदस्य उक्तार्थकत्वं वारयति। **वकार इति**। 'मादुपधायाश्च' इति सूत्रेण। मकारस्य अनुनासिकत्वात् तस्य स्थाने जायमानो वकारः सानुनासिकः स्यात्। परिभाषायां सत्यां विधीयमानस्य सवर्णाग्राहकत्वात् अनुनासिकवकारस्य न प्रसङ्गः। एतेन=परिभाषायाः स्वीकारेण।

सिद्धे इति। गुणानामभेदकत्वेन अनुनासिकनिरनुनासिकोभयविधानां यवलानां ग्रहणेन निर्वाहे अणुदित्सूत्रे 'अजुदित्' इत्येव पठनीयम्। अच्प्रत्याहारे अनन्तर्भूतानां यवलानां गुणाभेदकत्वपक्षस्याश्रयणेन उभयविधानां तेषां संग्रहणाद् अणुदित्सूत्रस्य तथान्यासे अप्राप्तावपि क्षतिविरहात्। अतः अण्निर्देशसामर्थ्यात् यण्सु गुणानां भेदकत्वमेव कल्प्यते। तथा च सानुनासिकयवलानां ग्रहणाय अण्पदेन निर्देशः सफलः। तेन 'घटवदित्यत्र नानुनासिको वकारः' इति वदन्तः परास्ताः। गुणाभेदकत्वपक्षेण प्राप्तस्य सवर्णग्रहणस्य भाव्यमानपरिभाषयैव निषेधसिद्धया गुणभेदकत्वज्ञापनस्यानुपयोगात्।

जातिपक्षाश्रयण में तत् जाति के आश्रयमात्र के ग्रहण का निरास, प्रत्यय आदि स्थलों में उक्त परिभाषा के द्वारा ही करना चाहिये। इसी प्रकार व्यक्तिपक्ष में गुण अभेदक है, उसके द्वारा प्राप्त सवर्णबोध का परिहार परिभाषा से करना उचित है। इसी कारण घटवत् इसमें मतुप् के मकार को 'मादुपधायाः' इससे अनुनासिक वकार नहीं हुआ। गुण के अभेद होने से ही यण्प्रत्याहारघटक वर्ण सानुनासिक और निरनुनासिक दोनों का बोधक हो जाने से इनके संग्रहार्थ अणुदित् सूत्र में अण्ग्रहण व्यर्थ हैं। अतः उसके स्थान में अजुदित् ऐसा सूत्र क्यों नहीं किया। तत्सामर्थ्य से अण्घटक वर्णों में 'गुण भेदक ही होता है'—इस ज्ञापन के लिये अण् ग्रहण किया गया है' यह किसी का कथन अनावश्यक है; क्योंकि भाव्यमानपरिभाषा से अभेदकत्व पक्ष में प्राप्त सवर्णग्रहण का परिहार हो जाने के कारण ज्ञापन का क्या उपयोग होगा!

ननु 'चोः' (८।२।३) इत्यादावनुवादे कथमुदित्त्वमिति चेत् ? न; व्याकरणान्तरे एषामुदित्संज्ञकत्वेनादोषात् । उपदेशशब्दस्य करणसाधनत्वेन शास्त्रपरत्वेऽस्यापि शास्त्रत्वेनेत्त्वप्रवृत्तेः सुलभत्वाच्च ।

चो भिन्नक्रम इत्याह—उदिच्चेति । यद्यपि समुदायसवर्णिनोऽप्रसिद्धाः, तथापि तदवयवत्वादिसवर्णा एवाऽत्र तत्सवर्णा बोद्धव्याः । ह्रस्वाकाराद्योरपि कालपुरुषाद्युपाधिभेदेन स्थानेषु भेदमारोप्य तुल्यस्थानत्वं सूपपादम् ।

आद्योच्चारणरूपस्य उपदेशाभावात् चोरित्यनुवादे कथमित्संज्ञायाः प्रवृत्तिः ? इति शङ्कते—**ननु इति**। व्याकरणान्तरे एषामुदित्संज्ञा कृता, तामेव संज्ञामाश्रित्य अत्रापि व्यवाहरत् भगवान् पाणिनिः। स्वमते उपदेशपदस्य शास्त्रपरत्वेन तस्यापि = अनुवादस्यापि। अपिना विधेयस्य संग्रहः। सवर्णस्येत्यनन्तरं सूत्रे पठ्यमानश्चकारः 'अणुदित्' इति पदानन्तरं योजनीयः। तदाह—**चो भिन्नक्रम** इति। कुचुटुतुपु इत्येतद्रूपाणां ककारादिना उकारेण च घटितत्वात् विभिन्नस्थानिकतया सवर्णसंज्ञाया अभावात् सवर्णग्राहकता दुर्लभा इत्याशङ्कते—**यद्यपीति**। समुदायः = इत्संज्ञकोकारविशिष्टः कुचुटु इत्यादिरूपः। **सवर्णिन इति**। अत्र सवर्णपदं सावर्ण्यपरम्। अन्यथा सवर्ण इत्येव वक्तव्ये तद्धितेन इन्प्रत्ययेन निर्देशस्यानौचित्यं स्यात्। एवञ्च अवयवभूतानां ककारादीनां सावर्ण्यमादाय सवर्णग्राहकता बोध्या।

ननु दैत्यारिः, श्रीशः इत्यादौ आद्याकारस्य द्वितीयाकारेण ईकारेण अपरेण ईकारेण सह भेदाभावात् स्थानेऽपि भेदाभावः। तथा च तुल्यत्वं स्थानस्य दुरुपपादम्; भेदे एव सादृश्यव्यवहारात्। अनया रीत्या सवर्णसंज्ञायाः अभावादेव दीर्घाप्राप्त्या कथं दीर्घापत्तिः ? अत आह—**ह्रस्वाकारेति**। उभयोरपि अकारयोः ईकारयोश्च एकरूपत्वात् न तद्भेदात् स्थानभेद अत आह—**कालपुरुषेति**। द्वयोरुच्चारणकालभेदात् उच्चारयितुः पुरुषस्य च भेदात् अकारादीनां भेदः। तमेव भेदं तत्स्थानेषु समारोप्य तुल्यस्थानत्वमुपपादनीयम्। स्वमते सादृश्यस्य भेदघटितत्वाभावात् आरोपस्य नोपयोगः।

शङ्का—'चोः कुः' इस सूत्र के उद्देश्य में प्रविष्ट चु शब्द उदित् नहीं है, क्योंकि चु शब्द अनुवाद में होने से अज्ञात स्वस्वरूप ज्ञापक रूप उपदेश का अभाव है। अतः इत्संज्ञा प्राप्त नहीं है ?

समाधान—व्याकरणान्तर में कु चु टु इत्यादि की उदित् संज्ञा की गयी है, उसी के अनुसार यहाँ इनको उदित् माना गया है। नवीन मत में उपदेश शब्द करणसाधन होने से शास्त्र = शासनकरणपरक हैं। विधेय के समान उद्देश्य भी शासनकरण है। अतः उपदेश होने से इत्संज्ञा हो जाती है।

उदिच्च इति। सवर्णस्य इसके उत्तर निर्दिष्ट 'च' का अन्वय भिन्नक्रम से अर्थात् उदित् के अनन्तर समझकर करना चाहिये।

शङ्का—उकारेत्संज्ञक कुचुटुतु इत्यादि समुदाय उदित् है। इनका सावर्ण्य अप्रसिद्ध है; क्योंकि समुदाय का स्थान-प्रयत्नभेद है ?

अत्राण् परेण णकारेण । कु चु टु तु पु एते उदितः ।

अत्रेति । ग्राहकसूत्र एवेत्यर्थः । व्याख्यानादिति भावः । 'उपसर्गादृति' (६ । १ । ९१) इत्यादितपरकरणादिति तु न युक्तम्; ऌकारग्रहणेन चारितार्थ्यात् ।

ग्राहकसूत्रे इति । अणुदित्सूत्रे इत्यर्थः ।

व्याख्यानादिति । अण् प्रत्याहारः परेण णकारेण, न पूर्वेण । प्रमाणञ्चात्र 'उरृत्' इत्यत्र तपरकरणम् । चुरादिण्यन्तात् कृतधातोर्लुङि अचीकृतदित्यत्र दीर्घस्य ॠकारस्य स्थाने ह्रस्वऋकार एव आदेशो भवेत्, न तु दीर्घस्य तस्य स्थाने दीर्घॠकार इत्येतदर्थमेव तत्र तपरकरणं कृतम् । यदि अणुदित्सूत्रे अण्प्रत्याहारः पूर्वेण णकारेण गृह्येत, तदा अण्-प्रत्याहारे ऋकारस्य पाठाभावेन अण्पदेनाग्रहणात् स्थानिनि ऋकारे विधेये च ऋकारे सवर्णग्रहणस्य प्रसक्त्यभावेन दीर्घव्यावृत्तये क्रियमाणं तपरकरणं वैयर्थ्यमेवापद्येत इति तस्य सार्थक्याय परेण णकारेण अण्प्रत्याहारस्तत्र गृह्यते । तथा च सवर्णग्रहणेन प्रसक्तं दीर्घम् ॠकारं वारयितुं तपरश्चरितार्थः । न च ऋकारस्य विधेयत्वेन भाव्यमानपरिभाषया सवर्णग्रहणाप्रसक्तौ तपरोच्चारणं पुनरपि व्यर्थमेवेति वाच्यम्; तपरत्वाभावे दीर्घस्य ॠकारस्य दीर्घ एव आदेशः । तथा च कस्यचित्पूर्वस्य अज्ञातत्वात् केवलं पूर्वस्वरूपस्य स्थितेरेवानुज्ञानात् अपूर्वबोध्यत्वरूपं विधेयत्वं तस्य नास्तीति भाव्यमानपरिभाषाया अप्राप्तेरित्याशयात् । स्पष्टञ्चेदं शब्दरत्ने । 'उपसर्गादृति' इत्यत्र तपरकरणम् 'अत्प्रत्याहारः परेण णकारेण' इत्यस्य न ज्ञापकम्; 'तपरस्तत्कालस्य' इति प्रवृत्त्या ऋकारेण ऌकार-स्यापि ग्रहणेन उपाल्कारीयतीत्यादिसिद्धिम् तपरकरणफलस्य वक्तुं शक्यत्वात् । तपर-निर्देशाभावे तपरसूत्राप्रवृत्त्या ऌकारग्रहणाभावेन तत्र वृद्ध्यभावात् उक्तप्रयोगासिद्धि-प्रसङ्गात् ।

'उरृत्' इत्यत्र तपरकरणं ऌकारग्रहणार्थमस्तु ?—इति न शङ्कनीयम्; स्थानिनः तपरेण अनिर्देशात् ऌकारानुपस्थित्या ऋकारमात्रस्य ग्रहणे आदेशे तपरकरणाद् ऌकारस्य उपस्थितावपि स्थानेऽन्तरतमपरिभाषया स्थानिनः ऌकारस्याभावात् ॡकारादेशस्य अप्र-सक्तेः ।

समाधान—समुदाय का सावर्ण्य अप्रसिद्ध होने से तदवयव चकारादि वर्णों का सावर्ण्य विवक्षित है ।

शङ्का—ह्रस्वाकार की ह्रस्वाकार के साथ सवर्णसंज्ञा नहीं होगी, क्योंकि दोनों अकारों का एक ही स्थान होने से तुल्य स्थान नहीं है, सादृश्य का व्यवहार भिन्न में होता है ?

समाधान—एक ही वस्तु के कालभेद से भिन्न एवं उच्चारण करने वाले के भेद से भिन्न होने के समान यहाँ भी कण्ठादि स्थान का काल, पुरुष आदि के आरोपित भेद से एक स्थान में भेद होने के कारण तुल्यत्व का व्यवहार होता है ।

अत्रैवेति । 'अणुदित्' सूत्र में ही अण् प्रत्याहार पर णकार से है । इसमें 'उरृत्' इस सूत्र का तपरकरणरूप व्याख्यान प्रमाण है । अन्यथा ऋत् इसमें तपर दीर्घव्यावृत्ति के लिये किया गया है । पूर्व णकार से अण् ग्रहण करने पर ऋकार में सवर्णग्राहकता की प्राप्ति न होने से दीर्घ ॠकार के बोध की प्राप्ति ही नहीं है, उसके व्यावृत्त्यर्थ तपरकरण व्यर्थ हो जायगा । अतः उक्तार्थ सिद्ध हुआ । 'उपसर्गादृति' इसका तपर उक्तार्थ में प्रमाण नहीं है; क्योंकि ऋकार से ऌकार

एवमिणपि परेणैव; 'अचि श्नु' (६ । ४ । ७७) इति सूत्रे इण इत्येव सिद्ध य्वोरिति गुरुनिर्देशाद् व्याख्यानाच्च इति 'लण्' (मा० सू० ६) सूत्रे भाष्ये स्पष्टम् ।

नन्वेवम् 'अस्य च्वौ' (७ । ४ । ३२) इत्यादौ सवर्णग्रहणं न प्राप्नोति, अण्ग्रहणेन वर्णसमाम्नायस्थानामेव ग्रहणेन णकारादिचिह्नेन प्रत्याहारे तत्प्रत्यभिज्ञानेन तत्रत्याद्यवर्णोपस्थितेषु उच्चारिताभेदेन गृहीतेषु सूत्रस्य चारितार्थ्येन व्यक्तिपक्षे तत्रत्यात्रत्यव्यक्त्योर्भेदेन प्रकृते प्रत्याहारघटकद्वितीयवर्णादौ चोच्चारितस्यैव ग्राहकत्वादप्रवृत्तेरिति चेत् ?

यथा अण्प्रत्याहारः परेण णकारेण, एवम् इण्प्रत्याहारोऽपि परेण णकारेणैव । इयान् विशेषः—अण्प्रत्याहारः अणुदित्सूत्रे परेण णकारेण, अन्यत्र पूर्वेण णकारेण; इण्प्रत्याहारस्तु सर्वत्र परेण णकारेणैवेति । **व्याख्यानात् इति ।** व्याख्यानं नात्र ज्ञापकरूपम्, किन्तु परम्पराप्राप्तोपदेशात्मकम् ।

नन्वेवम् = अणुदित्सूत्राङ्गीकारे । तत्तद्वर्णव्यक्तित्वावच्छिन्ने वर्णानां शक्तिरिति व्यक्तिपक्षे सर्वासां व्यक्तीनां भेदात् आक्षरसमाम्नायिकानाम् अकारादिणकारान्तसमुदायघटकानामेव अणुदित्सूत्रे अण्पदेन ग्रहणाद् 'अस्य च्वौ' इत्यत्र णकारादिचिह्नाभावात् श्रूयमाणस्याकारस्य वर्णसमाम्नायस्थाकाराद् भिन्नतया अणुदित्सूत्राऽप्रवृत्तौ सवर्णग्रहणाभावेन दीर्घाकारादौ, एवम् अइउण् घटकाकारव्यक्तेः भिन्नायामकारव्यक्तौ च व्यक्तिपक्षे 'अस्य च्वौ' इति सूत्रस्य अप्रवृत्त्यापत्तिः ।

न चैवं व्यक्तिपक्षे अन्यस्था व्यक्तिः, वर्णसमाम्नाये उपदिष्टायाः अण्बोध्यव्यक्तेः भिन्ना इति सर्वत्र अणुदित्सूत्रस्याप्रवृत्त्यापत्तौ एतत्सूत्रं व्यर्थमेव स्यादिति वाच्यम्; णकाराद्यनुबन्धदर्शनेन तत्रायं प्रत्याहारस्थः—इति प्रतिजानीते । तत उच्चारितस्य वर्णस्य आक्षरसमाम्नायिकेन सह भेदाभावं गृह्णाति । तत्र आद्ये उच्चारितेन इगादिघटकेकारादि-

---

के ग्रहणार्थ तपर चरितार्थ है । इसी प्रकार इण् प्रत्याहार सर्वत्र पर णकार से ही होता है । यदि पूर्व णकार से भी इण् प्रत्याहार माना जाता तो इ उ के संग्रह के लिये 'अचि श्नु' इस सूत्र में गुरुभूत 'य्वोः' के स्थान में 'इणः' ऐसा निर्देश करना था, वैसा न करने से उक्तार्थ सिद्ध होता है । आचार्यों की परम्परा से भी उक्तार्थ ही प्रमाणित होता है ।

शङ्का—नन्वेवमिति । अणुदित्सूत्र के अण् पद से वर्णसमाम्नायस्थ का ग्रहण है । व्यक्तिपक्ष में प्रत्येक व्यक्ति परस्पर भिन्न होने पर भी अ इ उ ण् सूत्रपठित अकार से ककारादि के समभिव्याहार से 'अयं वर्णसमाम्नायस्थः' इस प्रकार की प्रत्यभिज्ञा द्वारा अक्पदोपस्थित अकार का अभेदनिश्चय होने से वहाँ 'अणुदित्' सूत्र की प्रवृत्ति होती है । अतः सूत्र का चारितार्थ्य भी हो जाता है । किन्तु 'अस्य च्वौ' इसमें निर्दिष्ट अकार अनुबन्ध णकारादि से रहित होने के कारण 'यह वर्णसमाम्नाय का है' ऐसी प्रत्यभिज्ञा न होने से वर्णसमाम्नायस्थ से भिन्न है । अतः इस अकार से एवमुच्चारित शब्द ही अर्थ का बोधक होता है, अनुच्चारित नहीं । इसके अनुसार अण् अच् आदि में उच्चारित आदिवर्ण से व्यतिरिक्त द्वितीय तृतीय अक्षरों से 'अणुदित्' सूत्र की सहायता द्वारा सवर्ण का ग्रहण नहीं होगा ?

न; जातिपक्षाश्रयणेनादोषात्। अत एवानेकतकारादीनां झल्त्वादिसिद्धिः। सूत्रेऽण्ग्रहणं च न कार्यम्। 'ॠॢवर्णयोः सावर्ण्यम्' इत्यनेन समानजातित्वस्यैवातिदेशेन

वर्णेनोपस्थितेषु[1] अणुदित्सूत्रं चरितार्थम्। प्रकृते 'अस्य च्वौ' इत्यत्र णकाराद्यनुबन्धनिर्देशाभावेन वर्णसमाम्नायस्थोऽयमकार इति वक्तुमशक्यतया वर्णसमाम्नायस्थेन अकारेण सह एतस्य अकारस्य अभेदग्रहणासम्भवात् अणुदित्सूत्रमत्र न प्रवर्तेत। एवम् 'उच्चारित एव शब्दः अर्थस्य प्रत्यायको नानुच्चारितः' इति नियमात् अक् इक् इत्यादिषु प्रत्याहारेष्वपि उच्चारितस्य आदेरकारस्य इकारस्यैव च अभेदग्रहणेन सवर्णग्रहणं स्यात्। अतएव 'आद्यवर्णोपस्थितेषु' इत्युक्तं मूले। एतत् सर्वं मनसि निधाय आह—नन्वेवमिति। प्रत्याहारे = प्रत्याहारघटके। तत्प्रत्यभिज्ञानेन = आक्षरसमाम्नायिकप्रत्यभिज्ञानेन। तत्रत्यात्रत्येति। प्रत्याहाराद्येत्यर्थः।

भेदेन इति। णकाराद्यनुबन्धाभावेन अभेदेन ग्रहणाभावात् इति तात्पर्यम्।

समाधत्ते—जाति इति। जातिपक्षमाश्रित्य दोषाभावात्। अस्मिन् पक्षे अकारादिपदम् अत्वादिजात्यवच्छिन्नपरम्। तेन सर्वव्यक्तीनां तत्तज्जात्यवच्छिन्नत्वात् ग्रहणम्। अणुदित्सूत्रे अण्ग्रहणम् अस्मिन् पक्षे नावश्यकम्।

अन्ये तु—व्यक्तिपक्षेऽपि न दोषः। तथाहि अण्बोधकं पदं सवर्णान् गृह्णातीत्यर्थः। नच एवमर्थकरणे 'इको यणचि' 'अकः सवर्णे' इत्यादौ इक्पदस्य अक्पदस्य च समुदायरूपस्य सावर्ण्यमप्रसिद्धम्, प्रत्येकस्य सावर्ण्येऽपि इकारादिसहितककारस्य विशिष्टस्य तदभावात्। अण्बोधकं पदं स्वबोध्यसवर्णान् गृह्णातीत्यर्थेन उक्तपदेन बोध्यानामिकारोकारादीनां ये सवर्णास्तेषां ग्रहणेन दोषाभावेऽपि अश्‌प्रत्याहारस्य यवलादीनां बोधकत्वेन अण्बोधकत्वात् तद्बोध्यादकारादयः स्वसवर्णान् तकारादीनपि ग्रहीष्यन्ति। तथा च अशि विधीयमानं कार्यं तकारेऽपि स्यात्। एतद्दोषपरिजिहीर्षया मात्रपदं निवेश्य यदि अण्मात्रबोधकं पदमित्युच्यते, अश्‌पदश्च ञमङणादीनामनणामपि बोधकत्वेन अण्मात्रबोधकत्वाभावेन दोषाभावात्। तदा अण्मात्रबोधकत्वाभावात् अणुदित्सूत्राप्रवृत्त्या अश्प्रत्याहारे अकारादिना दीर्घाकारादीनां सवर्णानां ग्रहणं न प्राप्नुयात्। एवञ्च श्व आगन्ता इत्यादौ 'भो भगो' इत्यनेन यत्वं न स्यादिति वाच्यम्।

समाधान—यहाँ व्यक्तिपक्ष का अनाश्रयण होने से जातिपक्ष का आश्रयण इष्ट है। अत्व जाति से विशिष्ट व्यक्ति मात्र का ग्रहण है। इसीलिये अवात्ताम् इसकी 'अवात् स ताम्' इस अवस्था में 'झलो झलि' इस सूत्र से सकार का लोप सिद्ध हुआ। अन्यथा व्यक्तिपक्ष में झल् प्रत्याहार में किसी एक ही तकार की पाठकल्पना होने से लोप की प्राप्ति नहीं होगी। अण् से इसका ग्रहण न होने से 'अणुदित्' सूत्र के द्वारा निर्वाह नहीं है। अतः जातिपक्ष से ही समाधान करना होगा। इस पक्ष के आश्रयण से अण्ग्रहण भी सूत्र में अनावश्यक है। 'ॠॢवर्णयोः' इस वार्तिक से समानजातित्व का अतिदेश होता है। इसलिये 'उपसर्गादृति' इत्यादि में ॠ से ॢकार का भी

१. आदिरन्त्येनेति आदेरेव संज्ञेति पक्षे आद्यवर्णेनैव अण्घटकानां सर्वेषामुपस्थितिरित्यर्थो नः।

'उपसर्गादृति' (६ । १ । ९१) इत्यादौ न दोषः; एतद्व्यतिरिक्तसवर्णे समानजातित्व-सत्त्वात् । पृथगनुबन्धकरणाच्च न ऋदिल्लृदित्प्रयुक्तकार्यसङ्करः ।

अण्बोधकं स्वबोध्याण्मात्रस्य सवर्णान् गृह्णातीत्यर्थस्य स्वीकारेण अश् प्रत्याहारेण बोध्या ये अण्रूपास्त एव स्वसवर्णान् ग्रहीष्यन्ति, न तु अण्भिन्ना अपि । अतो दकारादिना तकारादीनां सवर्णानां अश्प्रत्याहारे ग्रहणस्य न प्रसङ्गः; तेषाम् अण्प्रत्याहारबोध्य-त्वेऽपि अण्त्वाभावात् । यद्यप्येवमपि अर्थवत्सूत्रे प्रत्ययपदमपि, 'सनाशंसभिक्ष उः' इति विहितस्य उकारस्य अण्रूपस्य बोधकत्वेन अण्बोधकं पदं सम्पद्यते । तत्पदबोध्यो य उकारः पूर्वोक्तसूत्रविहितः सोऽपि सवर्णान् गृह्णीयात् । तथा च हू हू इत्यस्यापि प्रत्यया-न्तत्वेन प्रातिपदिकसंज्ञा न स्यात् । अव्युत्पन्नतया 'कृत्तद्धित' इति प्रातिपदिकसंज्ञा कर्तुम-शक्या । तथाऽपि अण्बोधकपदेन व्यासज्यवृत्तिधर्मानवच्छिन्ना या बोधीयविषयता तस्याः प्रयोजकं गृह्यते । तथाच प्रत्ययनिष्ठविषयता पाणिनिसङ्केतसम्बन्धेन प्रत्ययपदं प्रत्यय-पदवति शक्तमिति रीत्या प्रत्ययपदवत्त्वेन व्यासज्यवृत्तिधर्मेण अवच्छिन्ना । अतो न तत् सवर्णग्राहकम् । अनेकपर्याप्तधर्मो व्यासज्यवृत्तिरित्युच्यते । अण्त्वावच्छिन्ना अकारादि-निष्ठा विषयता व्यासज्यवृत्तिधर्मानवच्छिन्ना अण्त्वस्य प्रत्येकस्मिन् अकारादौ पर्याप्त्या सत्त्वेन अनेकपर्याप्तत्वविरहेण व्यासज्यवृत्तित्वाभावात् । प्रत्ययत्वस्य भ्यामादावपि सत्त्वेन व्यासज्यवृत्तित्वम् ।

ह्रस्वादिपदप्रयोज्यविषयताया अपि व्यासज्यवृत्तिधर्मानवच्छिन्नतया तत्प्रयोज-कत्वेन ह्रस्वादिपदस्य सवर्णबोधकतापत्तिः । एतद्दोषपरिहाराय कालघटितधर्मान-वच्छिन्ना या अण्वृत्तिविषयता तत्प्रयोजकं पदं स्वबोध्याण् सवर्णान् गृह्णातीति निष्कर्षः । उकारोच्चारणकालसदृशकालस्य ह्रस्वसंज्ञाविधानेन ह्रस्वत्वस्य कालघटितत्वाद् विष-यता कालघटितधर्मावच्छिन्ना जातेति न दोषः । जातिपक्षस्य अवश्यस्वीकर्तव्यतामाह— **अतएव इति** । जातिपक्षस्वीकारादेव । वस्धातोर्लुङि लकारे तस्य तसादेशे तसः 'तस्थस्' इति तामादेशेऽडागमे च्लेः सिचि 'वदव्रजे'ति वृद्धौ 'सस्यार्धधातुके' इत्यनेन धातुसकारस्य तकारादेशे अवात् + स् + तामित्यवस्थायाम् 'झलो झली'ति लोपो न स्यात् । झल्प्रत्याहारे कस्यचिदेकस्यैव तकारस्य व्यक्तिपक्षे वर्णसमाम्नाये पाठात् तस्यैव एकेन तकारेण अभेदा-ध्यवसायात् उभयोस्तकारयोः झल्प्रत्याहारे अनन्तर्गतत्वेन प्रथमस्य तकारस्य झल्त्वे

ग्रहण सिद्ध होता है । ऋकार लृकार रूप अनुबन्ध पृथक् पृथक् किये जाने से कहीं समानजाति-त्वातिदेश नहीं होता है । अतः ऋदित्प्रयुक्त कार्य लृदित् में, लृदित्प्रयुक्त कार्य ऋदित् में नहीं होता ।

जिस प्रकार 'तद्वच्च तपरकरणम्' इत्यादि भाष्यानुरोध से जातिपक्षप्राप्त सवर्णग्रहण की तपरकरण के द्वारा व्यावृत्ति होती है । उसी प्रकार जातिपक्ष प्राप्त सवर्णग्रहण का अप्रत्यय इस अंश के योगविभाग द्वारा ज्ञापित भाव्यमानपरिभाषा का निषेध करने से 'त्यदादीनामः' इत्यादि से विधीयमान अण् सवर्ण का ग्राहक नहीं होगा । इसी प्रकार 'गुण अभेदक हैं' इस पक्ष के आश्रयण से प्राप्त सवर्णग्रहण का भी इसके द्वारा निषेध समझना चाहिये । विधीयमान में सवर्णग्राहकता का निषेध है, इसीलिये घटवत् इसमें मकार को अन्तरतम अनुनासिक वकार नहीं हुआ ।

अत्र पक्षे 'अइउण्' (मा० सू० १) सूत्रशेषोक्तभाष्यरीत्या 'तपर' (१ । १ । ७०) सूत्रस्य जातिग्रहणप्राप्तसवर्णग्रहणनियामकत्ववत् 'अप्रत्ययः' इत्यस्य योगविभागेन तत्प्राप्तसवर्णग्रहणनिषेधकत्वात् 'त्यदादीनामः' (१ । १ । ७४) इत्यादौ विधेये न दोषः ।

एवं गुणाभेदकत्वप्राप्तसवर्णग्रहणनिषेधकत्वमप्यस्य बोद्धव्यम् । अत एव 'घटवत्' इत्यादौ मतोर्मस्य नानुनासिको वकारः ।

द्वितीयस्य 'ताम्'घटकतकारस्य झल्त्वाभावात् परत्र झलोऽसत्त्वात् लोपानापत्त्या अवात्ताम् इत्यस्यासिद्धिप्रसङ्गात् ।

जातिपक्षाक्षश्रयणे तु तत्वजातेरुभयस्मिन् तकारे सत्त्वेन तत्वावच्छिन्नस्य तकारस्य ग्रहणात् न दोषः । तथा च क्वचित् जातिपक्षस्य, क्वचिद् व्यक्तिपक्षस्य प्रत्याहारे आश्रयणं नोचितम् इति जातिपक्षेणैव सर्वत्र निर्वाहः । 'ऋलृवर्णयोः' इत्यनेन वार्त्तिकेन समानजातित्वमतिदिश्यते । अन्यथा जातिपक्षे ऋत्वजातेः लृकारे अभावात् ऋकारेण लृकारस्य ग्रहणम् 'उपसर्गादृति' इत्यादौ न स्यात् । उपाल्कारीयतीत्यत्र वृद्धिर्न भविष्यति । तथाच अणुदित्सूत्रे अण्ग्रहणस्य च अनभ्युपगमात् न तेनाऽपि ग्रहणम् । वार्त्तिके सावर्ण्यमित्यत्र वर्णपदं जातिपरम् । यथा 'अयं वर्णाश्रमाचारवान्' इत्यत्र वर्णपदं जातिबोधकम् । समानो वर्णो यस्येत्यर्थे समासे स्वार्थे ष्यञ् । सावर्ण्यं समानजातित्वमित्यर्थः । 'होतॣकारः' इत्यत्र सवर्णसंज्ञकाच्परकत्वाभावात् दीर्घो न प्राप्नुयात् । 'ऋलृवर्णयोः' इति वार्त्तिकस्य सवर्णसंज्ञाविधायकत्वाभावेन तयोस्सावर्ण्याभावात् इति दोषस्तु अकोऽकीति न्यासेन सवर्णपदं परित्यज्य परिहरणीयः । अथवा लृकारः ऋवत् इति व्याख्यानेनापि दोषपरिहारः सम्भवति इति शब्दरत्ने स्पष्टम् । ऋकारात् लृकाराच्च व्यतिरिक्ते अकारादिस्थले सर्वत्र सवर्णे समानजातित्वस्य सत्त्वम् । न च जात्यतिदेशे ऋकारानुबन्धप्रयुक्तं कार्यं लृकारेऽपि प्राप्नुयादिति वाच्यम्; तथा सति भिन्नभिन्नानुबन्धकरणस्य वैयर्थ्यं स्यात् । अतस्तस्य सामर्थ्यात् कार्यसङ्करः = ऋदिति लृकारानुबन्धप्रयुक्तं कार्यम्, लृदिति च ऋकारानुबन्धप्रयुक्तं कार्यं न भवतीति कल्पनया दोषाभावात् इत्याशयेन–'अतएव' इत्यारभ्य 'न सङ्करः' इत्यन्तमाह । एतद्व्यतिरिक्ते = अकारादौ, अचि इति तात्पर्यम् । अन्यथा अकारखकारयोः सावर्ण्येऽपि कत्वखत्वादिरूपविभिन्नजातेरुपलम्भात् ग्रन्थासङ्गतिः स्यात् ।

अत्र पक्षे = जातिपक्षे । तपरसूत्रेण स्वसमकालस्यैव वर्णस्य बोधनेन जातिपक्षेण असमानकालानां सवर्णानां प्राप्तं ग्रहणं वार्यते । उदिदंशे उदित्करणसामर्थ्यात् विधेयेऽपि सवर्णग्रहणस्य इष्टत्वात् अप्रत्ययविशेषणे फलाभावात् तत्र योगविभाग आश्रीयते । तथा च 'अप्रत्ययः' इत्यनेन भाव्यमानपरिभाषाबोधनद्वारा जातिपक्षेण प्राप्तम् 'त्यदादीनामः' इत्यत्र सवर्णग्रहणमपि प्रतिषिध्यते । एवमेव गुणाभेदकत्वपक्षेण प्राप्तमपि सवर्णग्रहणं वारणीयम् । अतएव घटवदित्यादौ मतुपो नानुनासिको वकार इति भावः । तत्प्राप्त = जातिपक्षप्राप्त इति ।

एवम् = समानयुक्त्या । अतएव = जातिपक्षेण गुणाभेदकत्वेन च प्राप्तस्य निषेधकत्वादेव । अन्यथा जातिग्रहणप्राप्तस्य निषेधेऽपि गुणाभेदकत्वमादाय दोषस्तदवस्थ एव ।

तदेवम् अ इत्यष्टादशानां संज्ञा। तथेकारोकारौ। ऋकारस्त्रिंशतः। एवं लृकारोऽपि। एचो द्वादशानाम्।

एदैतोरोदौतोश्च न मिथः सावर्ण्यम्, 'ऐऔच्' इति सूत्रारम्भ-सामर्थ्यात्। तेनैचश्चतुर्विंशतेः संज्ञाः स्युरिति नापादनीयम्।

सामर्थ्यादिति। 'एचोऽयवायावः' (६।१।७८) इत्यादौ 'स्थानेऽन्तरतमः' (१।१।५०) सूत्रेणैव निर्वाह इति वक्ष्यते। 'न य्वाभ्याम्' (७।३।३) इत्यत्र ऐऔ स्वरूपेण पाठ्यौ, 'वृद्धिरादैच्' (१।१।१) इत्यत्राप्येङित्येव पाठ्यम्; तत्र गुणसूत्रे च परस्परसवर्णसंज्ञावादिमते चतुर्णां ग्रहणसत्त्वात्।

सामर्थ्यादिति। एकारस्य ऐकारेण सह ओकारस्य औकारेण सह समानस्थान-कत्वेन सवर्णसंज्ञायां प्रथमोपस्थितत्वात् 'ए ओ ङ्' इत्येकस्मिन्नेव सूत्रे कर्तव्ये ए औ जिति सूत्रारम्भस्य सामर्थ्यात् नानयोः परस्परं सावर्ण्यमिति परममूलाशयः। न च ऐ औ जिति एजित्युभयप्रत्याहारबोध्याश्चत्वारः स्थानिनः तावन्त एव अयाद्यादेशा अपि इति यथा-संख्यसूत्रेण क्रमेण स्थान्यादेशव्यवस्था, एतत्सूत्राभावे द्वयोरेव वर्णयोः स्थानिरूपत्वेन श्रवणात् यथासंख्यं न स्यादिति वाच्यम्; तालुस्थानिकेकारसदृशघटितसंवृतावर्णघटि-तस्य एकारस्य स्थाने तालुस्थानिकयकारघटितसंवृतावर्णघटितः अयादेशः। एवम् ओष्ठ-स्थानिकोकारघटितसंवृताकारघटितः अवादेशः। आय, आव्—इत्यनयोः आकारो विवृतः ऐकारे औकारे चापि अवर्णांशो विवृतः—इति 'स्थानेऽन्तरतमः' इत्यनेन आन्तरतम्यादेव इष्टसिद्धौ दोषाभावात्।

न च ऐऔजिति सूत्राभावे ऐचः प्रत्याहारस्यासिद्ध्या 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' इति सूत्रे ऐचो निर्देशासङ्गतिः तादृशप्रत्याहाराभावादिति वाच्यम्; अस्मिन् सूत्रे ऐ औ इत्येवं रूपेण तयोः स्वरूपनिर्देशदोषाभावात्। 'वृद्धिरादैच्' इत्यस्मिन्नपि सूत्रे ऐचः स्थाने 'एङ्' इत्येव पठितव्यम्। 'अदेङ्गुणः' इत्यनेन गुणसंज्ञाऽपि एङो विहिता। तस्यैव वृद्धिसंज्ञापीति तयोः परस्परं समावेशसंभावनया तु ए ओ इत्यनयोः ऐ औ

सामर्थ्यादिति। एकार की ऐकार के साथ, ओकार की औकार के साथ सवर्णसंज्ञा नहीं होती है। इसमें 'ऐ औ च्' सूत्र का आरम्भ ही प्रमाण है। अन्यथा 'ए ओङ्' सूत्र से ही इनका संग्रह सिद्ध होने से 'ऐ औ च्' सूत्र का वैयर्थ्य स्पष्ट है। एचोऽयवायावः इसमें क्रमिकाचय के लिये इसकी आवश्यकता नहीं है। 'स्थानेऽन्तरतमः' इससे निर्वाह हो जायगा। इसका प्रतिपादन आगे किया जायगा।

शङ्का—'ऐ औ च्' सूत्र के विना 'न य्वाभ्याम्' इसमें ऐच् प्रत्याहार से व्यवहार असङ्गत हो जायगा ?

समाधान—सूत्र में ऐच् के स्थान में ऐ औ इस प्रकार पाठ करने से दोष नहीं होगा। 'वृद्धिरादैच्' इस सूत्र में एङ्ग्रहण करने से निर्वाह हो जायगा।

शङ्का—एङ्-ग्रहण करने पर ए और ओ को वृद्धि संज्ञा हो जायगी ?

समाधान—परस्पर सवर्णसंज्ञापक्ष में ऐच् निर्देश करने पर भी ऐ तथा औ से क्रमशः

'नाज्झलौ' (सू० १३) इति निषेधो यद्यप्याक्षरसमाम्नायिकानामेव, तथापि हकारस्याकारो न सवर्णः; तत्राकारस्यापि प्रश्लिष्टत्वात्। 'विश्वपाभिः' इत्यत्र 'हो ढः' (८ । २ । ३१) इति ढत्वं न भवति।

अत्र एतत्सूत्रवैयर्थ्योपन्यासेन तन्मूलकस्य गुणवृद्धिसंज्ञाविधौ प्रत्याहारद्वयग्रहणवैयर्थ्यस्य 'प्लुतावैचः' (८ । २ । १०६) 'एचोऽप्रगृह्यस्य' (८ । २ । १०७) इत्यत्र तद्ग्रहणवैयर्थ्यस्य च संग्रहो बोध्यः। प्रयत्नभेदेनाप्यसावर्ण्यमेतयोः प्रागुक्तं न विस्मर्तव्यम्।

यद्यपीति। इदं व्यक्तिपक्षे। "वर्णानामुपदेशस्तावद्, उपदेशोत्तरकालेत्संज्ञा, तदुत्तरकालम् 'आदिरन्त्येन' (१ । १ । ७१) इति प्रत्याहारः, तदुत्तरकाला सवर्णसंज्ञा, तदु-

---

इत्याभ्यां सह परस्परं सवर्णसंज्ञा पक्षेऽपि अस्त्येवेति विशेषाभावात्। तत्र = वृद्धिसूत्रे। चतुर्णाम्—एकारः, ओकारः, ऐकारः, औकार इत्येतेषाम्।

अत्र = परममूले। एतत् = ऐऔजिति। तन्मूलकस्य = सूत्रवैयर्थ्यमूलकस्य। इत्यत्र तद्ग्रहणस्य = तत्र सूत्रे प्रत्याहारद्वयोपादानस्य। प्रयत्नभेदेन = विवृततर-विवृततमरूपप्रयत्नयोर्भेदेन।

अत्वहत्वजात्योर्भेदादेव अकारेण हकारस्य जातिपक्षे ग्रहणाभावात् विश्वपाभिरित्यत्र ढत्वापादनमनुचितम्? इत्यत आह—**इदं व्यक्तिपक्षे इति**। नाज्झलावित्यत्र वर्णसमाम्नाये पठितानां वर्णानामेव ग्रहणम्—इत्यत्र कारणं वक्तुमुपक्रमते—**वर्णानामिति**। **तदुत्तरकालमिति**। अत्र सामान्ये नपुंसकम्। तदुत्तरकालम् = सवर्णसंज्ञया सवर्णपदार्थनिश्चयानन्तरकालम्। एतेन = पूर्वोक्तेन एकवाक्यतापन्नेन। समुदितेन = समूहयुक्तेन। वाक्येन = अणुदित्सूत्रात्मकेन। वाक्यापरिसमाप्तिन्यायात् इति स्वस्य स्वाङ्गस्य च बोधकाले पदार्थज्ञानाभावे वाक्यार्थज्ञानाभावेन समुदितवाक्यार्थस्य अपरिसमाप्तिः = अनिष्पत्तिः, तदवलम्बनन्यायादित्यर्थः।

ए और ओ का ग्रहण होने के कारण उक्त संज्ञा की पूर्व में भी आपत्ति होने से कोई अन्तर नहीं होता। इसी प्रकार परस्पर सवर्णसंज्ञावादियों के मत में 'अदेङ् गुणः' इसमें एङ् से ऐ तथा औ का भी ग्रहण होगा, एवं च गुणसंज्ञा दुर्निवार है। परस्पर सावर्ण्य में 'ऐ औ च्' इस सूत्र का वैयर्थ्योपन्यास के द्वारा गुण एवं वृद्धि संज्ञा सूत्रों में भिन्न प्रत्याहारद्वय का निर्देश तथा 'प्लुतावैचः' 'एचोऽप्रगृह्यस्य' इनमें प्रत्याहारद्वय के कथन के वैयर्थ्य का भी संग्रह है। अर्थात् 'ऐ औ च्' सूत्र के समान इनका भी वैयर्थ्य हो जायगा। 'प्रयत्न के भेद से भी इनका सावर्ण्य नहीं है' इस पूर्वोक्ति को विस्मृत नहीं करना चाहिये।

यद्यपीति। 'पूर्वं वर्णानामुपदेशः' इत्यादि रूप से मूल में उक्त वाक्यापरिसमाप्तिन्याय के अनुसार उक्त समुदाय युक्त अणुदित्सूत्ररूप वाक्य से अन्य स्थल में सवर्ण का बोध होता है, स्वाङ्गभूत 'नाज्झलौ' इत्यादि सूत्रों में तथा अणुदित्सूत्र में सवर्णग्रहण नहीं होता। इस प्रकार 'नाज्झलौ' सूत्र में अच् पद से वर्णसमाम्नाय में स्वरूप से पठित अकारादि का ही ग्रहण होने से दीर्घाकार का हल् के साथ सावर्ण्य का प्रतिषेध प्राप्त नहीं है। अतः प्रश्लेष के द्वारा आकार का सूत्र में पृथक् निर्देश है।

त्तरकालम् 'अणुदित्' (१ । १ । ६९) इत्येतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णानां ग्रहणं भवति, न चात्रेकारः शकारं गृह्णाति" इति 'नाज्झलौ' (१ । १ । १०) इति सूत्रभाष्योक्तवाक्यापरिसमाप्तिन्यायादित्यर्थः ।

अयं भावः—'आदिरन्त्येन' ((१ । १ । ७१) इति प्रत्याहारसिद्धौ 'नाज्झलौ' (१ । १ । १०) इत्येतद्वाक्यार्थबोधे सति निर्णीतैतद्विषयपरिहारेण सवर्णसंज्ञाबोध्यनिश्चये 'अणुदित्' (१ । १ । ६९) सूत्रेण तावतां ग्रहणं बोधनीयम् । अन्यथा बाधकसम्भावनया 'तुल्यास्य' (१ । १ । ९) सूत्रजशक्तिग्रहेऽप्रामाण्यसन्देहेन 'अणुदित्' (१ । १ । ६९) शास्त्रजबोधानापत्तिः । न चैतद्वाक्यार्थबोधात् प्राक् तन्निश्चय इति ।

ननु अस्मिन् 'पूर्वं वर्णानामुपदेशः' इत्यादिवाक्यसमुदायमध्ये 'नाज्झलौ' इत्यस्याप्रवेशात् कथमत्र अच्प्रत्याहारेण आकारस्य न ग्रहणमित्यत आह—**अयं भाव इति ।** 'तुल्यास्य' सूत्रस्य प्रामाणिको वाक्यार्थबोधस्तावन्न सम्भवति, यावत् 'नाज्झलौ' इति निषेधशास्त्रस्य बोधो न स्यात् । निषेधरूपबाधकविषयस्य परिहारेण उत्सर्गशास्त्रस्य प्रवृत्तेरभ्युपगमेन निषेधशास्त्रविषयातिरिक्तत्वेन 'तुल्यास्य'सूत्रबोधे सङ्कोचस्यावश्यकत्वात् । तथा च तुल्यास्यसूत्रबोधात् प्रागेव 'नाज्झलौ' इत्यस्य बोधोऽपेक्षितः । तदानीं सवर्णसंज्ञाया अभावेन सवर्णपदार्थस्यानिश्चयेन सवर्णबोधकस्य 'अणुदित्' सूत्रस्य कथमपि प्रामाणिकबोधस्य कर्तुमशक्यतया 'नाज्झलौ' इत्यत्र अच्पदेन दीर्घादीनां ग्रहणं दुरुपपादम् । 'नाज्झलौ' इत्यस्य वर्णसमाम्नाये श्रूयमाणानामेव अकारादीनां बोधकस्य अचो हला सह सवर्णसंज्ञाया निषेधरूपे वाक्यार्थसम्पन्ने तद्विषयं परिहाय तुल्यास्यसूत्रस्य असन्दिग्धो वाक्यार्थबोधो जायते । ततः परम् अणुदित्सूत्रस्यापि सवर्णपदार्थनिश्चयेन सन्देहप्रतिबन्धकनिश्चयसत्त्वात् प्रामाणिको बोधो जायते इति ग्रन्थाशयः ।

सवर्णपदबोध्यनिश्चये=सवर्णपदार्थे निर्णीते । निश्चयपदप्रयोगात् 'तुल्यास्य' सूत्रस्य सामान्यतो बोधो नाज्झलावित्यस्य बोधात् प्रागपि भवतीति सूचितम् । अन्यथा

शङ्का—प्रश्लेष से समाधान व्यक्तिपक्ष में है । जातिपक्ष में अच् पद से अत्वजातिमान् सभी का बोध हो जाने से आकारादि ग्रहण के लिये अणुदितसूत्र में अण् पद की आवश्यकता ही नहीं है । अतः यहाँ स्वतः उसकी प्रवृत्ति न होने से वाक्यापरिसमाप्तिन्यायोपन्यास इस पक्ष में व्यर्थ है । इस तात्पर्य से लिखा है—**इदं व्यक्तिपक्षे ।**

वाक्यापरिसमाप्तिन्याय[1] का अभिप्राय वर्णन करते हैं—**आदिरिति ।** सर्वप्रथम वर्णों का उपदेश, तदनतर इत्संज्ञा इसके बाद ही 'आदिरन्त्येन' इसके द्वारा अच् अण् आदि प्रत्याहार सिद्ध होता है । क्योंकि पदार्थबोध वाक्यार्थबोध में कारण है ।

इसलिये 'नाज्झलौ' इसके वाक्यार्थबोधहेतु अच् प्रत्याहार की सिद्धि अपेक्षित है । इसके वाक्यार्थबोध के अनन्तर अच् हल्, जो कि पारस्परिक सवर्ण संज्ञा के सम्बन्धी होने से वर्जित किये

---

१. वाक्य अर्थात् 'अणुदित्' सूत्र का स्वाङ्ग एवं स्व के अन्यतर बोध के समय अपरिसमाप्ति अर्थात् सवर्णग्राहकत्व का असामर्थ्य; क्योंकि अभी तक सवर्णपदबोध्यत्व का ज्ञान नहीं है ।

अनुनासिकाननुनासिकभेदेन यवला द्विधा । तेनाननुनासिकास्ते द्वयो-र्द्वयोः संज्ञा ।।

ह्रो ढ इति । **हकारेणाऽऽकारग्रहणे सति यद्यत्प्राप्नोति तस्य सर्वस्याप्युपलक्षण-मिदम् ।**

ननु यण्सवर्णिनामप्रसिद्धेरज्ग्रहणेनैव सिद्धेऽण्ग्रहणं व्यर्थमत आह—यवला इति ।

निषेधे प्रतियोगिनः = निषेध्यस्य ज्ञानमपेक्षितमिति तस्य ज्ञानं विना कस्य निषेधः स्यात् । अतो विधिसूत्रस्य सामान्यबोधः प्रतियोगिज्ञानाय भवत्येव । अन्यथा = निषेधविषया-पर्यालोचने । **बोधानापत्तिरिति ।** 'तुल्यास्य' इति सूत्रस्य वाक्यार्थबोधे निषेधसम्भावनया सन्दिग्धे सवर्णपदशक्तिग्रहणे अप्रामाण्यसंशयात् 'अणुदित्'सूत्रस्य वाक्यार्थबोधो न स्यात्, अप्रामाण्यसंशयस्य निश्चयात्मकबोधप्रतिबन्धकत्वात् । एतद् = 'नाज्झलौ' । तन्निश्चयः = सवर्णपदार्थनिर्णयः ।

ननु विश्वपाभिरत्र आकारेण सह हकारस्य समानस्थानकत्वेन सवर्णसंज्ञायां 'हो ढः' इत्यनेन ढत्वापत्तिः । 'नाज्झलौ' इत्यनेन निषेधस्तु न सम्भवति; तत्र अच्पदेन वर्णसमाम्नाये पठितानामेव अकारादीनां ग्रहणस्य पूर्वमुपपादितत्वेन आकार-हकारयोः सवर्णसंज्ञायां निषेधस्याप्राप्तेः । एवं व्यञ्जनद्वयस्य यकार-हकारात्मकस्य संयोगसंज्ञाऽपि प्राप्नोति । तस्यां सत्यां संयोगान्तलोपस्य प्रसङ्गः, तथा च संयोगान्तलोपदृष्ट्या ढत्व-स्यासिद्धत्वात् संयोगान्तलोप एव आपादनीय इति ? तत्राह—**हकारेण इति ।** उपलक्षण-तया एतस्यापि सङ्ग्रहेण नासङ्गतिः ।

अनुनासिकाननुनासिकयोर्विचारस्य विचारान्तरेण विच्छेदात् पुनस्तद्विचारे सङ्गत्यभावादनौचित्यमत आह—**ननु इति ।** व्यवहितयाऽपि सङ्गत्या ग्रन्थं योजयति—यण्सवर्णिनामिति । 'अजुदित्' इत्येतावतापि सिद्धे अण्पदोपादानं सूत्रे व्यर्थमिति शङ्का-निरासाय तद्विचार इति ।

गये हैं, उनसे अतिरिक्त तुल्यस्थान तुल्यप्रयत्न की सवर्णसंज्ञा 'तुल्यास्य' सूत्र से होती है । ऐसा न मानने पर 'नाज्झलौ' इसके पूर्व 'तुल्यास्य' सूत्र के वाक्यार्थबोध में बाधक की सम्भावना से अप्रा-माण्य-सन्देह के कारण अणुदित्सूत्र का वाक्यार्थबोध नहीं होगा । सवर्ण का प्रामाण्यनिश्चय होना चाहिये । सवर्ण का असन्दिग्ध ज्ञान 'नाज्झलौ' इसके बोध से पहले सम्भव नहीं है । इस तरह 'नाज्झलौ' के बोध से पहले असन्दिग्ध सवर्णज्ञानाभाव से अणुदित्सूत्र का बोध न होने से सूत्रस्थ अच् पद सवर्ण का ग्राहक नहीं हो सकता । इसी प्रकार 'अणुदित्' सूत्र के वाक्यार्थबोध के अनन्तर ही सवर्णग्राहकता-ज्ञान होगा । इसके पहले सूत्र का वाक्यार्थबोध-वेला में सवर्णग्राहकत्व असम्भव ही है—यह तात्पर्य है ।

ह्रो ढ इति । हकार से आकार का ग्रहण होने पर प्राप्त ढत्व की 'संयोगान्तस्य लोपः' इसकी दृष्टि में असिद्धि होने से संयोगान्तलोप की आपत्ति समझनी चाहिये ।

शङ्का—यण् के सवर्णी प्रसिद्ध न होने से अणुदित् सूत्र में अण्-ग्रहण व्यर्थ है ?

समाधान—य व ल इनके अनुनासिक, निरनुनासिक दो भेद हैं । अतः इनके संग्रहार्थ अण्

१५. तपरस्तत्कालस्य । १ । १ । ७० । तः परो यस्मात्स तात्पर-

'अमोऽनुनासिका न ह्रौ' इति शिक्षोक्तेर्यण इति नोक्तम् । तेन 'सँय्यन्ता' इत्यादौ परसवर्णनिष्पन्नानुनासिकयवलानाम् 'अनचि च' (८ । ४ । ४७) इति द्वित्वं सिद्ध्यति । 'हलो यमाम्' (८ । ४ । ६४) इति लोपस्तु वैकल्पिकः । अत्रेदं बोद्धघम्—'व्यक्तिः पदार्थः, गुणा भेदकाः'—इत्यभिमानेनात्र सूत्रेऽण्ग्रहणमिति ॥

'अतो भिस' (७ । १ । ९) इत्यादौ तपरकरणात् 'सहिवहोः' (६ । ३ । ११२) इति सूत्रस्थवर्णग्रहणाद्व्याख्यानाच्च तपरपदे बहुव्रीहि-पञ्चमीतत्पुरुषावित्याह—तः पर इत्यादिना ।

यण् द्विधेत्यनुक्त्वा यवला द्विधेति किमर्थमुक्तम् ? अत आह—अमो इति । 'अमोऽनुनासिकाः न ह्रौ' इति वचनेन रेफस्य अनुनासिकस्याभावबोधनात् । एवञ्च 'यण्' इति कथने रेफस्यापि यण्प्रत्याहारान्तर्गतत्वेन अनुनासिकत्वं सम्भाव्येत । अतस्तथा नोक्तम् । रेफस्यानुनासिकत्वाभावे 'हयवरट्' सूत्रे 'रेफस्य अनुनासिकपरसवर्णद्विर्वचनप्रतिषेधो वक्तव्यः' इति प्रकरणस्थं भाष्यमपि प्रमाणम् । तथा च यवलानां संग्रहाय सूत्रे अण्पदोपादानम् । सानुनासिकस्यापि ग्रहणादेव सँय्यन्तेत्यादौ परसवर्णनिष्पन्नस्यानुनासिकस्य यकारस्य द्वित्वं सिद्धम् ॥

'तपरस्तत्कालस्य' इति । अत्र तपरपदे तः परो यस्मादिति बहुव्रीहिः । प्रमाणमाह—अतो भिस इति । यदि तपरपदे तात्परस्तपरः इत्येवं तत्पुरुषसमास एव विवक्षितः स्यात् तदा 'अतो भिस' इति सूत्रे तात् परस्यैव समकालस्य बोधने तकारात् परस्य भिसः सावर्ण्याभावाद् भिन्नकालग्रहणाभावः सिद्ध एव । पुनस्तद्व्यावृत्त्यर्थं क्रियमाणः तपरो व्यर्थं एव स्यात् । अतः सामर्थ्याद् बहुव्रीहिः तपरपदे कल्प्यते । तथा च तः परो यस्मादित्यर्थप्रतीत्या 'अतः' इत्यत्र अस्माद् अकारात् परः तकारः स तपर इति भिन्नकालस्य अकारेण ग्रहणं न भवतीति तपरकरणं सार्थकम् । 'तात्परस्तपरः' इत्येवं तत्पुरुषसमासाश्रयणे प्रमाणम् 'सहिवहोरोदवर्णस्य' इति सूत्रे वर्णग्रहणम् । तद्धि अकारेण सर्वासामकारव्यक्तीनां सङ्ग्रहाय कृतम् । बहुव्रीहिमात्राश्रयणे तु अवर्णात् परस्य तकारस्य विरहेण

पद है । 'अम् अनुनासिक होते हैं, किन्तु हकार और रेफ वैसे नहीं होते' इस वचन के कारण यवला इसके स्थान में 'यणः' ऐसा नहीं लिखा; क्योंकि ऐसा करने से रेफ का भी सानुनासिकभेद प्रतीत हो जायगा । उभयविध यकारादि के बोधक वर्णसमाम्नायस्थ यकारादि वर्ण हैं । इसीलिये संय्यन्ता इसमें सानुनासिक यकार को भी द्वित्व होता है । लोप वैकल्पिक होने से पक्ष में लोप नहीं भी होगा । व्यक्ति पदों का अर्थ है और गुण भेदक है, इनको मानकर 'अणुदित्' सूत्र में अण् किया गया है ।

अतो भिस इति । तपर शब्द में 'तः परो यस्मात्' इस प्रकार बहुव्रीहिसमास में 'अतो भिस ऐस्' इसमें तपरकरण प्रमाण है । अन्यथा तकार से पर में समकालबोध का कोई फल न होने से उसकी निष्फलता हो जायगी । 'तात्परः' इस पञ्चमी समास में 'सहिवहोरोदवर्णस्य' में वर्णग्रहण प्रमाण है । तकार से पर में वर्तमान अकार स्व समकाल ह्रस्वमात्र का बोधक होने

वर्णग्रहणे तु तत्सामर्थ्यादत्वावच्छिन्नसवर्णग्रहणबोधनेन तपरसूत्राप्रवृत्तिः। आद्योदाहरणम्—'अतो भिस ऐस्' (७।१।९) इति। अन्त्योदाहरणम्—'वृद्धिरादैच्' (१।१।१) इति। यद्यप्यत्र संज्ञा तात्परा, न च तत्समकालस्तत्सवर्णो वा प्रसिद्धः; तथापि तपरकरणाद् भाष्यप्रामाण्याच्च तात्परशब्दबोद्ध्यो वर्णः स्वसमकालग्राहक इत्यर्थेनादोषः। इदं च विद्ध्यर्थमेव; अण्ग्रहणानुवृत्तेः। गुणानां भेदकतयाऽनणि विधित्वे-

---

तपरसूत्रस्याप्रवृत्त्या सकलाकारव्यक्तेः संग्रहणाय कृतं वर्णग्रहणं व्यर्थं स्यात्। अतो वर्णग्रहणसामर्थ्येन 'तात्परः तपरः' इति समासे कल्पिते, ओत्पदे श्रूयमाणात् परस्य अकारस्य तपरसूत्रबलात् समकालस्यैव बोधकत्वे भिन्नकालस्य आकारस्य बोधो न स्यात्। कृते तु वर्णग्रहणे वर्णग्रहणसामर्थ्यात् तपरसूत्राप्रवृत्त्या अत्वावच्छिन्नस्य सर्वस्य ग्रहणं सिध्यति। तेन उदवोढामित्यत्र उदवाहघटकस्य आकारस्य ओदादेशः सिद्धः। 'एओङ्' सूत्रे भाष्ये समासद्वयं भाष्यकृता स्वयमेव उक्तमित्येवंरूपाद् व्याख्यानाच्च समासद्वयमत्राभिमतम्। तपरपदे तन्त्ररूपं व्याख्यानं वा बोध्यम्। तन्त्रेण उभयविधोऽर्थः प्रतीयते।

केचित्तु तपरपदे परशब्दस्यावयववाचितया तः परोऽवयवो यस्येत्येवं विग्रहे बहुव्रीहिर्वाच्यः। षष्ठ्यर्थे अन्यपदार्थे 'अतो भिस ऐस्' इत्यादौ अत् इति समुदायाद् विभक्तिराञ्जस्येन उपपद्यते। तकारस्य अत् इति समुदायावयवत्वात् पञ्चम्यर्थे बहुव्रीहौ तु 'यस्मात् परोऽकारः' इत्यर्थेन यच्छब्देन अकारस्य परामर्शात् स एव अन्यपदार्थः। तथा च तस्यैवार्थवत्त्वेन प्रातिपदिकत्वे समुदायाद् विभक्तिर्न स्यात्। न च तकारस्य तात्पर्यग्राहकतया तकारविशिष्टस्य अर्थबोधकत्वादर्थवत्त्वम्। एवमपि कर्तृप्रत्ययान्त-कर्मप्रत्ययान्तप्रकृतिकप्रथमान्तानामेव अन्यपदार्थे बहुव्रीहेः भाष्ये स्वीकारेण पञ्चम्यर्थे अत्र बहुव्रीहेरसम्भवात्। षष्ठ्यर्थे सप्तम्यर्थे चान्यपदार्थे आश्रीयमाणे पूर्वोक्तनियमो न। प्रथमान्तसामान्यानां मत्वर्थे = षष्ठ्यर्थे सप्तम्यर्थे च विशिष्य बहुव्रीहेरुपसंख्यानात्। अतएव पीताम्बरः, वीरपुरुषः—इत्यादौ उक्तार्थे बहुव्रीहिः। योगविभागेन पञ्चमीतत्पुरुषसमासकरणस्यापि अगतिकगतिकत्वात् न युज्यते। तस्मात् तत्पुरुषपदस्य मूलस्थस्य लक्षणया तत्पुरुषसदृशपरत्वम्, तत्पुरुष इवाचरति इति विग्रहे क्विपि वा बोध्यम्। सादृश्यमुत्तरपदार्थप्राधान्येन। तथा च सुप्सुपेति समासः पञ्चम्यन्तस्येति वदन्ति।

परं भाष्यस्वरसः पञ्चम्यर्थे बहुव्रीहावेवेति मूलं तदनुसारेण समर्थनीयम्।

से 'उदवोढाम्' में वृद्धयुत्तर बाह्यघटकाकार को अप्राप्त ओकार के विधानार्थ ही वर्णग्रहण किया गया है। वर्णग्रहणसामर्थ्य से समकाल का बोध न होने के कारण वहां ओकार का विधान सिद्ध हुआ। पञ्चमीसमास न मानने पर अकार से समकाल का ही बोध प्राप्त न होने से आकारादि के संग्रहार्थ वर्णग्रहण का वैयर्थ्य स्पष्ट है। इस आशय से 'तः परः' इत्यादि का उल्लेख है। वर्णग्रहणसामर्थ्य से अत्वावच्छिन्न अकार, आकार सबका ग्रहण होता है। अतः तपरसूत्र की प्रवृत्ति नहीं होती।

'तः परो यस्मात्' इसका 'अतो भिस' उदाहरण है। 'तात्परः' इसका वृद्धिरादैच् उदाहरण है। प्लुत ऐ औ की वृद्धिसंज्ञा ऐस् से समकाल का ही बोध होने से नहीं हुई।

ऽपि 'वृद्धिरादैच्' (१ । १ । १) इत्यादावाकारांशे सावकाशेनानेन 'अतो भिस' (७ । १ । ९) इत्यादौ परत्वेन 'अणुदित्' (१ । १ । ६९) सूत्रबाधः । संख्याकृतव्यवहारस्य परस्परपरिहारेणैव दृष्टतयेह विरोधस्य सत्त्वात् । गुणानामभेदकत्वेनानवकाशत्वाद् बाध इति बोद्धव्यम् ।

बहुव्रीहेरुदाहरणम्—'अतो भिस् ऐस्' । तत्पुरुषस्य 'वृद्धिरादैच्' इत्युदाहरणम् । अत्र तात्परस्य ऐकारस्य औकारस्य प्लुतग्राहकत्वं न । न वा सानुनासिकस्य ग्रहणम् । आकारस्य न स्वस्मिन् न स्वाङ्गे इति दिशा अणुदित्-सूत्रघटकाण्पदबोध्यत्वाभावेन सवर्णग्राहकत्वविरहात् प्लुताकारग्रहणस्य प्रसक्तिरेव नेति बहुव्रीहेर्नेदमुदाहरणम् । 'अदेङ् गुणः' इति समासद्वयस्योदाहरणं सम्भवति । अकारः एङ्बोध्यश्च न सवर्णग्राहकः; तपरकरणात् । यद्यपि 'अदेङ् गुणः' वृद्धिरादैच्' इत्यादौ तात् परा एङ् ऐच् इति संज्ञा, न चैतस्याः सवर्णः प्रसिद्धः, समकालो वा; तथापि तपरकरणसामर्थ्यात् 'इदं तर्हि प्रयोजनम्—आन्तर्यतः त्रिमात्रचतुर्मात्रा मा भूवन् खट्वा इन्द्रः' इति वृद्धिसंज्ञासूत्रस्थभाष्यप्रामाण्याच्च 'तात्परः शब्दः स्वबोध्यसमकालग्राहकः' इति कल्पनेनादोषात् ।

तपरसूत्रे अण्पदं नानुवर्तते । तेन अनणि अणुदित्सूत्रानुवृत्त्या तत्र तपरेण निर्देशे उदात्तानुदात्तस्वरितानाम् अनुनासिकाननुनासिकभेदेन षड्विधानां बोधाय तपरसूत्रस्य अप्राप्तप्रापकत्वेन विधायकत्वमुचितम् । अन्यथा षड्विधेषु एकविध एव उच्चारितोऽकारो गृह्येत । गुणानां भेदकत्वमिति पक्षे इदम् विध्यर्थकथनम् । अभेदकत्वपक्षे तु उदात्तत्वानुनासिकत्वकृतभेदाभावादेव तेषां सङ्ग्रहात् न तपरसूत्रं विध्यर्थकम् ।

यत्तु 'तात्परेण एच्छब्देन बोध्यत्वस्य प्लुतादावपि सत्त्वेन अण्पदाननुवृत्तिपक्षे तत्समकालस्यापि ग्रहणं प्रसज्येत' इत्युक्तम्, तन्न रोचते; बोध्यत्वमिह साक्षाद् विवक्षितम् । प्लुतस्य तु ऐच्पदेन वर्णसमाम्नाये पठितयोर्ग्रहणम्, ताभ्याञ्च प्लुतैकारौकारयोरिति परम्परया बोधात् क्व दोषावकाशः ।

'वृद्धिरादैच्' इत्यत्रानणि तपरस्य चारितार्थ्येन ऐजंशे अणुदित्सूत्रेण सवर्णग्रहणाद् द्वादश वर्णा ऐपदेन, एवम् औपदेन द्वादशभेदाः गृहीताः । तपरसूत्रेण समकालबोधकद्वारा षण्णामेव बोधः प्राप्तः । तस्मात् संख्याकृतव्यवहारस्य परस्परं परिहृत्य दृष्टतया एकत्र परस्परविरुद्धषट्त्वद्वादशत्वाष्टादशत्वादिसंख्यानां व्यवहाराभावेन विरोधस्य जायमानत्वात् परेण तपरसूत्रेण अणुदित्सूत्रस्य बाधात् न तपरस्थले भिन्नकालग्रहणम् । अभेदकत्वपक्षे तपरसूत्रम् अनवकाशत्वाद् अणुदित्सूत्रस्य बाधकम् ।

ननु तपर इत्यत्र तद्गुणसविज्ञानबहुव्रीहिरभ्युपगम्यते । तथा च तकारविशिष्टस्य अत् इत्यस्य समकालबोधकत्वेन संज्ञात्वे समुदायात् विभक्तेरुत्पत्तिः । तथा सति अत् इति

शङ्का—'वृद्धिरादैच्' इसमें तकार से उत्तर जो ऐच् समुदायरूप संज्ञाशब्द है, इसका न कोई समकाल है और न कोई सवर्णी है । अतः यह उदाहरण नहीं हो सकता ?

समाधान—आत् के तपरकरणसामर्थ्य और भाष्य के प्रमाण से तपरशब्दबोध्य वर्ण समकाल का बोधक है—इस प्रकार का अर्थ करने से तात्पर शब्द ऐच् होता है, उसके द्वारा बोध्य ऐ और औ है । ये ही स्व-समकाल के बोधक होंगे ।

अत्रावध्यवधिमतोः साजात्येन वर्णस्यैव संज्ञात्वेऽपि विशिष्टाद्विभक्त्युत्पत्तिः सौत्रत्वाद् बोध्या।

'तत्कालस्य' इत्यस्य तदुच्चारणकालसमकालस्येत्यर्थः, तदाह—समकालस्यैवेति। एवकारो न्यायसिद्धबाध्यबाधकभावस्यानुवादक इति भावः।

जातिपक्षे तु नियमार्थमेव; सवर्णग्रहणानुवृत्तेः।

एवं गुणानामभेदकत्वमिति 'वृद्धिरादैच्' (१।१।१) इति सूत्रभाष्यसम्मत-सिद्धान्तपक्षेऽपि नियमार्थमेव।

समुदायस्य समकालत्वमप्रसिद्धमिति सूत्रमनर्थकं स्यात् ?—अत आह—**अत्रेति**। षष्ठ्यर्थे बहुव्रीहेरभावात् पञ्चम्यर्थे बहुव्रीहेः स्वीकारेण समुदायस्य संज्ञात्वं न, किन्तु अवधेः। परत्वं यस्मात् गृह्यते तस्य अवधिमतः=यस्य परत्वं गृह्यते तस्य च वर्णस्यैव ग्रहणेन एतत्सादृश्यात् संज्ञापि वर्णस्यैव, न समुदायस्येति अनर्थकत्वात् अप्रातिपदिकत्वेन अत् इत्यादिसमुदायात् विभक्त्युत्पत्तिर्न सम्भवति; तथापि सौत्रत्वात् विभक्तिर्वाच्या। अकारस्य च सवर्णः प्रसिद्ध एवेति न सावर्ण्याप्रसिद्धिदोष इति भावः।

तत्कालस्येत्येतद्घटकस्य तत्पदस्य तदुच्चारणकालसदृशे लक्षणा, तदनन्तरं तत्पदस्य कालपदेन सह बहुव्रीहिरित्याह—**तदुच्चारणेति**। विधिसूत्रस्वीकारे तपरसूत्रे एव पदोपादानमसङ्गतमत आह—**एवकार इति**। परत्वात् प्राप्तस्य बाध्यबाधकभावस्यानुवादक इत्यर्थः। जातिपक्षाश्रयणे तु सर्वत्र तत्तज्जात्यवच्छिन्नानां सर्वासां व्यक्तीनां ग्रहणेन समकालस्यापि ग्रहणे सिद्धे तपरसूत्रम् 'तपरः सवर्णस्य बोधकश्चेत् (सर्वस्य जात्याश्रयतया ग्राहकः), तर्हि स्वसमकालस्यैव' इति नियमयति। व्यक्तिपक्षे तु परत्वेन अणुदित्सूत्रस्य बाधेन गुणाभेदकत्वस्य च अनवकाशत्वेन बाधाच्च विधित्वेऽपि तपरसूत्रस्य वैयर्थ्याभावेन नियमापेक्षया लाघवात् विधिपक्ष एवात्रोचितः। जातिपक्षे तु अणुदित्सूत्रे अण्ग्रहणाभावेन बाध्यशास्त्रस्य प्रवृत्तेरेवाभावात् जातिनिर्देशाश्रयणेन सर्वासां व्यक्तीनां ग्रहणस्य दुर्वारतया 'सिद्धे सति आरभ्यमाणो विधिर्नियमाय कल्पते' इति समकालस्यैव बोधनाय नियमार्थं तपरसूत्रम्। गुणभेदकत्वपक्षे, जातिपक्षे—उभयस्मिन्नपि पक्षे नियमसूत्रमिदमिति तात्पर्यम्।

एवञ्च इति। तपरसूत्र में अण् पद की अनुवृत्ति न होने से यह सूत्र अण्भिन्न में समकाल के बोधार्थ विधि है। 'गुण भेदक हैं' इस पक्ष में 'वृद्धिरादैच्' इसमें आकार से उदात्त अनुदात्त स्वरितादि षड्विध के ग्रहण के लिये तपरसूत्र चरितार्थ है। 'अतो भिस' इस सूत्र में अष्टादश अकार के ग्रहणार्थं प्राप्त अणुदित्सूत्र का परत्व के कारण तपरसूत्र बाध करता है। अतः समकाल का ही बोध होता है।

शङ्का—विरोध में बाध्यबाधकभाव माना गया है। प्रकृत में षड्विध बोध के साथ अष्टादश प्रकार के बोध का विरोध नहीं है। अष्टादश का बोध होने पर षड्विध का भी बोध होता ही है ?

समाधान—संख्याओं का पृथक् पृथक् व्यवहार देखा जाता है। दस संख्या के व्यवहार-स्थल में पाँच सात संख्या भी हैं परन्तु दस संख्या से ही व्यवहार होता है। अतः परस्पर विरोध

इदम् 'आद् गुणः' (६।१।८७) इत्यादौ विभक्तितकारे न प्रवर्त्तते;

दोषं निराचष्टे—**इदमिति**। विभक्तिसम्बन्धितकारमादाय तपरसूत्रं न प्रवर्तते; 'उपसर्गादृति धातौ' इति सूत्रे तपरकरणसामर्थ्यात्। अन्यथा 'उपसर्गात्' इति पदस्य विभक्तितकारपरस्य ऋकारस्य तपरसूत्रप्रवृत्त्या सवर्णसमकालबोधकत्वेन ऌकारस्यापि सवर्णतया समकालतया च ऋकारेण ग्रहणे सिद्धे तस्य बोधाय ऋतीत्यत्र कृतस्तपरो व्यर्थः स्यात्। तत्सामर्थ्येन तथा ज्ञापने तु विभक्तितकारात् परत्वमादाय तपरसूत्राप्राप्तेः ऋकारेण ऌकारस्यापि ग्रहणार्थं तत्र तपरोच्चारणस्य साफल्यात्। विभक्तितकारे तपरसूत्राप्रवृत्तेः प्रयोजनम् 'आद्गुणः' इत्यत्र अवर्णमात्रस्य अपदेन ग्रहणम्। अन्यथा आदित्यत्र श्रूयमाणविभक्तितकारेण पूर्वोऽकारः, सोऽपि तः परो यस्मात् इत्यर्थे तपरः, तत्र अस्य प्रवृत्तौ समकालस्यैव बोधः स्यात्। तथा च तः परो यस्मादिति बहुव्रीहिणा तकारात् पूर्वस्य अकारस्य स्वसमकालबोधकत्वे रमेशः इत्यत्रैव गुणः स्यात्, उपेन्द्रः इत्यत्र न स्यात्।

एवमपि 'ऋदोरप्' इत्यत्र उकारस्यापि तात्परत्वेन स्वसमकालस्यैव बोधकत्वे

होने से परत्व के कारण तपर सूत्र के द्वारा समकाल का ही बोध होता है। अभेदकत्वपक्ष में निरवकाश होने से तपरसूत्र 'अणुदित्'सूत्र का बाधक है। गुण के अभेद होने से आत् ऐच् समकाल के बोधक तपरसूत्र के बिना ही हो जाने से इसकी निरवकाशता स्पष्ट है।

अत्समुदाय अत्समुदाय के ही समकाल का बोधक माना गया है। इसी कारण, समुदाय के अर्थवान् होने से उसी की प्रातिपदिकसंज्ञा तथा उसी से विभक्ति की उत्पत्ति होती है। वस्तुतः अवधि और अवधिमान् के सजातीय होने का नियम है। तदनुसार अवधिमान् तकार से परत्वविशिष्ट वर्ण होता है तो उसकी अवधि भी वर्णात्मक तकार की होना चाहिये। इस प्रकार तकार ही बोधक होने से अर्थवान् है, समुदाय नहीं। अतः समुदायोत्तर विभक्ति की उत्पत्ति सौत्रत्वात् समझनी चाहिये।

सूत्र के 'तत्कालस्य' इसका 'तत्समकाल' अर्थ है। तत् पद की तदुच्चारणकाल सदृश में लक्षणा के अनन्तर काल के साथ बहुव्रीहि है।

शङ्का—तपरसूत्र के विधायकत्वपक्ष में समकालस्यैव इसमें एवकार का उपादान असङ्गत प्रतीत होता है?

समाधान—तपरसूत्र के द्वारा अणुदित् सूत्र का परत्वनिमित्तक बाध होने से प्राप्त जो अर्थ है उसी का अनुवादक एवकार है। जातिपक्षाश्रयण में तपरसूत्र नियमार्थक ही है। तपरसूत्र में सवर्णस्य इसकी अनुवृत्ति है। यदि जात्याश्रय होने से तपर सभी सवर्णों का ग्राहक है तो स्व समकाल का ही ग्राहक है—इस प्रकार का नियम होगा। इसी प्रकार 'गुणा अभेदकाः' इस पक्ष में भी इसकी नियमार्थता स्पष्ट है।

इदमिति। विभक्तिसम्बन्धी तकार में तपरसूत्र की प्रवृत्ति नहीं होती। इसमें प्रमाण है 'उपसर्गादृति' सूत्र में तपरकरण। अन्यथा उपसर्गात् के तकार से परवर्ती ऋकार के होने से तपरसूत्र की प्रवृत्ति द्वारा स्वसमकाल का बोध हो जाने के कारण तदर्थबोध के लिये 'ऋति' में तपर-निर्देश व्यर्थ हो जायगा। तपरसूत्र के तकार से उत्तर उकार दीर्घ का ग्राहक न होने से लवः पवः इसमें 'ऋदोरप्' इससे अप् प्रत्यय नहीं होगा। इसके समाधान के लिये लिखते हैं—

श्रोच्चार्यमाणसमकालस्यैव संज्ञा स्यात्। तेन 'अत्' इत्यादयः षण्णां षण्णां संज्ञा। 'ऋत्' इति द्वादशानाम्॥

'उपसर्गादृति' (६।१।९१) इति तपरकरणात्। 'ऋदोरप्' (३।३।५७) इत्यादौ दकार एवेति न दोषः। स च पञ्चमीसमासाभावे तकार इवोच्चारणार्थः, मुख-सुखार्थो वा। 'तपर' (१।१।७०) सूत्रे दकारप्रश्लेषपक्षे तु धकारादिस्थानिको दकारो बोध्यः॥

दीर्घोकारान्तात् लू धातोरप् न स्यात्? अत आह—**ऋदोरबित्यादौ इति।** ऋद् इति दकारान्तस्यैव पाठो न तकारान्तस्येति नास्य प्रवृत्तिस्सम्भवति। न च दकारोच्चारणे फलं किं स्यात्? पञ्चमीसमासो यदि तपरशब्देनाश्रीयते, तदा तवापि मते तकारस्य उच्चारणस्य किं फलम्? तः परो यस्मात् इति केवलबहुव्रीहिसमासे तपरशब्देन ऋकार-मात्रग्रहणेन एतत्सूत्रप्रवृत्तेः फलाभावात्। अप्रवृत्तौ तपरकरणस्य वैयर्थ्यात्। दीर्घस्य ऋकारस्य अण्त्वाभावेनैत्र अणुदित्सूत्राप्राप्त्या सवर्णग्रहणाप्रसक्तेः। जातिपक्षेणापि ह्रस्वा-दीनां ग्रहणं न कर्तुं शक्यते, तथा सति ह्रस्व उच्चारयितव्ये अधिकप्रयत्नेन दीर्घोच्चारणस्य निष्फलत्वापत्तेः। अथ असन्देहार्थं तपरकरणम्, अन्यथा ऋकारस्य उकारेण सह पररूप-सन्धौ ऋकारश्रवणं न स्यादिति वाच्यम्; तदा दकारस्यापि असन्देहार्थमेव उच्चारणं ममापि मते। अथवा अक्लेशेन उच्चारणार्थं तत्। 'तित्स्वरितम्' इति सूत्रभाष्ये तपरसूत्रे दकारोऽपि प्रश्लिष्टः, तदा तपरसूत्रप्रवृत्तिर्दुर्वारैवेत्यत आह—**धकारस्थानिको दकारः** इति। जश्त्वस्यापि असिद्धत्वात् धकारस्य सत्त्वेन दकारतकारयोः अन्यतरस्याप्य-भावेन न तपरसूत्रप्रवृत्तिरिति भावः। स च = दकारश्च। उच्चारणार्थ इति। ऋकारस्य उच्चारणमेव प्रयोजनं यस्य दकारस्य स इति। दकाराभावे यणि ऋकारस्य श्रवणं न स्यात्। असन्देहायेति फलितम्॥

ऋदोरप् इति। इसमें मुखसुख के लिये दकार है, तकार नहीं। 'तात्पर.' इस प्रकार पञ्चमी-समासपक्ष को न माननेवाले के यहाँ ऋदोरप् इसमें तपर जैसे मुखसुखार्थ है, उसी प्रकार पञ्चमी समास पक्ष में दकार भी मुखसुखार्थ माना जायगा। तपरसूत्र में दकार के प्रश्लेष-पक्ष में 'ऋदोरप्' इसमें धकार को जश्त्व द्वारा दकार हुआ है। अत. दकार तकार में कोई सा नहीं है, किन्तु धकार है। अतः तपर सूत्र की अप्रवृत्ति होने से दीर्घ ऊकारान्त 'पू' धातु से भी अप् प्रत्यय की सिद्धि होती है।

---

१. तच्चेत्थम्—तिति प्रत्ययग्रहणं कर्तव्यमित्येतत्प्रसङ्गे एतदर्थमेव प्रत्ययग्रहणं कर्तव्यम्, अत्र मा भूत्—'ऋत इद्धातोः'। नैष तकारः, किं तर्हि? दकारः। अथ दकारो न ज्ञापकः? एवं तर्हि तपरस्तत्कालस्येति दकारोऽपि चर्त्वभूतो निर्दिश्यते। यद्येवं चर्त्वस्यासिद्धत्वात् हशि च इत्युत्वं प्राप्नोति। (दकारस्य हश्प्रत्याहारे पाठात्) संहितापाठे—'अणुदित् सवर्णस्य चाप्रत्ययस्तपरस्तत्कालस्य'—इत्येवं निर्देशः स्यात्। सौत्रो निर्देश इत्युक्तम्।

१६. वृद्धिरादैच् । १ । १ । १ । आदैच्च वृद्धिसंज्ञः स्यात् ॥

वृद्धिरादैच् (१ । १ । १) । **वृद्धिः, आत्, ऐच्—इति पदत्रयमिति न समासान्तादिप्रवृत्तिशङ्का । तपरकरणमसन्देहार्थतया पूर्वार्थम्; प्रकृतसूत्रे भाष्येऽत्र शास्त्रे गुणानामभेदकत्वं ज्ञापकादाश्रित्य सवर्णग्रहणार्थत्वाभावस्योक्तत्वात् । 'कृष्णौत्कण्ठ्यम्' 'गङ्गौघः' इत्यादौ त्रिमात्रव्यावृत्तये परार्थमपि ।**

वृद्धिरादैच् (१।१।१) । अत्र वृद्धिः, आत्, ऐच्—इत्येवमसमस्तं पदम् । आदैपच्छे समाहारद्वन्द्वे 'द्वन्द्वाच्चुद' इत्यनेन चान्तत्वात् टच् प्रसज्येत । इतरेतरयोगे तु टचोऽप्रवृत्तावपि द्विवचनान्तनिर्देशस्य प्रसङ्गः । अदिति पदेन अकारस्य संग्रहः । अदित्यत्र तपरकरणन्तु अनुनासिकत्वादीनां गुणानां भेदकत्वाभावात् आकारेण षड्विधानां तेषां ग्रहणेन आकारस्य अण्त्वाभावादेव अणुदित्सूत्राप्रवृत्त्या प्लुतग्रहणाभावस्य सिद्धत्वात् समकालग्रहणार्थत्वेन भिन्नकालव्यावृत्त्यर्थत्वेन च तपरस्योपयोगाभावात् सन्देहनिवर्तकतया सफलम्, अत एव पूर्वार्थम् । तकाराभावे आकारस्य ऐचा सह वृद्धौ आकारस्य विलयेन तत्सत्त्वे एव सन्देहः स्यात् । उत्तरत्र ऐचि तु वर्णसमाम्नाये ऐऔ इति स्वरूपेण पाठात् अण्प्रत्याहारे श्रूयमाणत्वेन अणुदित्सूत्रे अण्पदेन ग्रहणात् प्लुतस्यापि ऐच्पदेन ग्रहणं प्राप्तम् । तस्य वारणाय तपरोच्चारणं चरितार्थमिति उत्तरार्थमपि ।

गुणानां भेदकत्वात् अनुनासिकत्वोदात्तत्वानुदात्तत्वादीनां समकालानां सङ्ग्रहाय तपरकरणस्य पूर्वार्थतयापि सम्भवेन असन्देहार्थत्वं कुतः ? इत्यत उक्तम्—**प्रकृतसूत्रे इति** । 'अस्थिदधि' इति सूत्रे अनङ आद्याकारस्य स्वरूपेणैव पठनीये साक्षात् उदात्तशब्देन तद्विधानस्य फलाभावात्, असति प्रयत्नविशेषे गुणानामभेदकत्वात्सामर्थ्यात् तेन कल्प्यते । 'अस्थिदधि' इति सूत्रे उदात्तपदोच्चारणरूपयत्नविशेषस्य सत्त्वाद् अत्र गुणस्य भेदकत्वं स्वीक्रियते । 'वृद्धिरादैच्' अत्र सूत्रे यत्नविशेषस्याभावाद् गुणानामभेदकत्वं मन्यते । तथाच अभेदकत्वात् समकालसवर्णानां ग्रहणस्य सिद्धौ तपरकरणं न पूर्वार्थतया सफलम् । असन्देहार्थतया च पूर्वार्थम् इति भावः । ऐकारस्य औकारस्य स्वरूपेण वर्णसमाम्नाये पाठात् तत्र अणुदित्सूत्रप्रवृत्त्या प्लुतस्य ग्रहणं प्राप्तम्, तद्वारणाय तपरोच्चारणमिति । परार्थमपि तत् । प्रकृतसूत्रे = 'वृद्धिरादैच्' इति सूत्रे । अत्र = व्याकरणे । ज्ञापकात्= उदात्तपदात् । सवर्णेति । समकालसवर्णेत्यर्थः । अत्र=अस्मिन् सूत्रे । अन्यत्र तु वृद्धि-

वृद्धिरिति । समाहार द्वन्द्व करने में 'द्वन्द्वाच्चुदषहान्तात्' इससे टच् की सम्भावना से आत् ऐच् ये पृथक् असमस्त पद हैं । समासान्त विधि की अनित्यता से समास करने पर भी टच् नहीं होगा'—इस ज्योत्स्ना टीका का अनुवाद कोई महत्त्व नहीं रखता । इसमें मनोव्यापार अधिक है । और भाष्य के अननुकूल भी है । इसमें तपरकरण सन्देहनिवृत्ति के लिये पूर्वार्थ है; क्योंकि गुण का अभेदक होने से उदात्तादि षड्विध का ग्रहण तपरसूत्र की प्रवृत्ति के विना भी सिद्ध है । असमानकाल के सवर्ण का ग्रहण प्राप्त नहीं है; क्योंकि आ का अणुदित् सूत्र के अण् से ग्रहण नहीं होता । अतः उसकी व्यावृत्ति प्रयोजन नहीं है । 'कृष्णौत्कण्ठ्यम्' इत्यादि स्थलों में आन्तरतम्य से त्रिमात्रा और चतुर्मात्रा वाले औकारादि की व्यावृत्ति भी प्रयोजन है ।

वृद्धिशब्दोऽत्र पदपरः; अर्थपरत्वासम्भवात्। आदैचो वृद्धिपदाभिन्ना इति वाक्यार्थः; पदपदार्थयोः तादात्म्यस्याङ्गीकारात्।

'रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः'

इत्यादौ तयोरभेदप्रतीतेरनुभवसिद्धत्वादित्यन्यत्र विस्तरः।

वृद्धिशब्दस्य संज्ञात्वं तु व्याख्यानात्।

शब्दस्य शक्तिग्राहकत्वाभावेन न तथा। पदपरः=स्वस्वरूपपरः। असम्भवात् = शक्तिग्रहाभावाद् अर्थपरत्वस्य वक्तुमशक्यत्वात्।

न च समानविभक्तिकयोरभेदान्वयस्य युक्तत्वेन वृद्धिरूपपदस्य स्वीयार्थेन आकारेण ऐकारेण औकारेण च सहाभेदान्वयो दुर्घटः, पदपदार्थयोः स्वरूपेण भेदात्। अत आह—**पदेति।** पदपदार्थयोस्तादात्म्यस्य भेदसहिष्णोरभेदस्याङ्गीकारेण अभेदान्वयानुपपत्तेरभावात्। न च मधुशब्दोच्चारणे मुखे माधुर्यं स्यात्, शब्दार्थयोरभेदादिति नाशङ्कनीयम्; भेदेन सह अभेदस्य स्वीकारेण सर्वथा अभेदानभ्युपगमात्। विस्तरेण मञ्जूषायां द्रष्टव्यम्। शब्दार्थयोस्तादात्म्यादेव किमिदमिति पृष्टे गौरिति, कीदृग् ज्ञानम्? गौरिति, कः शब्दः? गौरित्युत्तरयति।

ननु अनयोस्तादात्म्याङ्गीकारे घटस्य चक्षुषा यथा ग्रहणं तथा घटशब्दस्यापि चक्षुषा ग्रहणं स्यादिति न वक्तव्यम्। यथा घटे गन्धवत्त्वस्य सत्त्वेऽपि घटत्वेनैव घटस्य चाक्षुषप्रत्यक्षता, न गन्धवत्त्वेन; तथाऽत्रापि घटशब्दत्वेन न घटस्य चाक्षुषप्रत्यक्षता, किन्तु घटत्वेनेति न दोषः। न चैवमपि शब्दानां नित्यत्वे वा तादात्म्यनुपपत्तिः तदवस्थैव। नित्यत्वपक्षे अनित्यैरर्थैः सह नित्यशब्दस्य कथं तादात्म्यम्, अनित्यत्वपक्षे शब्दानामुत्पन्नप्रध्वंसित्वेन क्षणिकत्वात् चिरस्थायिभिः अर्थैः सह तादात्म्यं कथमुपपद्येत इति वाच्यम्; घटस्य नाशे ध्वंसप्रतियोगिता घटनिष्ठतद्व्यक्तित्वेन मृत्तिकायाः, न तु मृत्तिकात्वेन मृत्तिकायाः। एवमत्रापि नित्यत्वपक्षे घटादिनिष्ठतद्व्यक्तित्वेन घटादीनां ध्वंसप्रतियोगिता, न तु घटादिशब्दत्वेन, अनित्यत्वपक्षे च शब्दस्य शब्दत्वरूपेण क्षणिकत्वम्, नतु घटत्वादिन इत्यादिकल्पनया दोषः परिहरणीयः।

ननु आदैचोरेव संज्ञात्वं कुतो नेत्यत आह—**वृद्धि** इति। एकस्य अनेकसंज्ञाकरणे फलाभावात् वृद्धिपदमेव संज्ञापरम्। 'उद्देश्यं प्रथमं वाच्यम्' इति रीत्या वृद्धेः पूर्वं प्रयोगो

अन्यथा ऐच् के अण् होने से सवर्णग्रहण के द्वारा भिन्नकाल का ग्रहण हो जायगा। इस प्रकार तपर पञ्चमीसमास में परार्थ अर्थात् ऐच् के लिये भी है।

सूत्र में वृद्धिशब्द स्वरूपपरक है, अर्थपरक नहीं। वृद्धि पद का अर्थ विवक्षित नहीं है। वैयाकरण शब्द का अर्थ के साथ तादात्म्य मानते हैं। इसीलिये आकार और ऐच् वृद्धि पद से अभिन्न हैं—ऐसा बोध होता है। भेदसहिष्णु अभेद को तादात्म्य कहते हैं। अतएव 'मधु' शब्द के उच्चारण से मुख में माधुर्य नहीं होता इत्यादि अन्यत्र विस्तृत विवेचित है।

वृद्धि संज्ञा है, आ ऐ औ ये संज्ञी हैं—इसके विपरीत नहीं स्वीकार किया जाता; क्योंकि विपरीत व्याख्या में एक वृद्धि को अनेक संज्ञा की जायगी, जो अनुचित है। यद्यपि 'उद्देश्य का

विधेयत्वेऽपि तस्य पूर्वपाठो मङ्गलार्थः ।

'अपृक्त एकाल्' (१ । २ । ४२) इत्यादौ तथा करणं विधेयस्य प्रथमं प्रयोगेऽसाधुत्वभ्रमनिवारणायेति भाष्ये स्पष्टम् । सर्वशब्दानां सर्वार्थवाचकत्वेऽपि वाचकत्वस्य गृहीतस्यैव बोधजनकतया संज्ञासूत्राणामज्ञातशक्तिज्ञापकतया विधित्वम् ।

किञ्च 'सर्वे सर्वार्थाः' इत्यभ्युपगमो योगिदृष्ट्या, नास्मद्दृष्ट्या; सर्वशब्दानामर्थानाञ्च विशिष्यज्ञानाभावात् ।

नोचितः, अत आह—**विधेयस्येति** । विधेयस्य=विधानार्हस्य (वृद्धिशब्दस्य) । न चात्र मङ्गलार्थतया वृद्धिशब्दस्य पूर्वं प्रयोगेऽपि 'अपृक्त एकाल्' इति सूत्रे पूर्वोक्तनियममुल्लङ्घ्य विधेयस्य 'अपृक्त' इत्यस्य पूर्वं प्रयोगः कथम् ? इत्याशयेन शङ्कते—**अपृक्त** इति । विधेयस्य पूर्वं प्रयोगे असाधुत्वं भवति--एतादृशो भ्रमो मा भूदिति बोधयितुं नियमवैपरीत्येन सूत्रकृत् तथा प्रायुङ्क्त । तथा च उद्देश्यस्य प्रथमप्रयोगे औचित्यमात्रं बोधितं न त्वसाधुत्वमिति ।

'सर्वे शब्दाः सर्वेषामर्थानां वाचकाः' इत्यर्थकेन 'सर्वे सर्वार्थवाचकाः' इति न्यायेन घटशब्दो यथा सर्वस्यार्थस्य वाचकः, एवं वृद्धिशब्दोऽपि सर्वेषु अर्थेषु आकारैकारौकाराणामपि अन्तर्गतत्वात् तेषामपि वाचकः प्राप्तः—इत्यपूर्वार्थबोधकत्वाभावेन 'वृद्धिरादैच्' सूत्रस्य विधित्वं न सम्भवति, किन्तु अन्येषामर्थानां वृद्धिशब्देन व्याकरणे ग्रहणं मा भूत् इत्येतदर्थं नियमार्थमिदं सूत्रमिति निराकरोति—**सर्वशब्दानामिति** । सर्वशब्दानां सर्वार्थवाचकत्वेऽपि सङ्केतज्ञानस्य शाब्दबोधे हेतुत्वाभ्युपगमात् सङ्केतज्ञानमावश्यकम् । अन्यथा 'कोशात्सव्यवहारादिना सङ्केतितमिदं पदममुं अर्थं बोधयतु' इत्यादिरूपमजानतः पुरुषस्यापि बोधो दुर्वारः स्यात् । तथा च सर्वस्य शब्दस्य सर्वस्मिन्नर्थे सङ्केतयितुमशक्यत्वात् सङ्केतज्ञानाभावेन सर्वबोधासम्भवात् अज्ञातार्थस्यैव ज्ञापकत्वेन 'वृद्धिरादैच्' इत्यादिसंज्ञासूत्राणां विधित्वमेव । न च 'वृद्धिपदमर्थबोधकम्, पदत्वात्, गोपदवत्'—इत्यनुमानेन वाचकत्वं गृहीतम् स्यात् इत्यरुचेराह—**किञ्चेति** ।

यत्तु 'वृद्धिपदम् आदैच्त्वावच्छिन्नबोधकम्; आदैजितराबोधकत्वे सति अर्थबोधकत्वात्' इत्यनुमानेन आदैच्त्वेन ज्ञातुं शक्यम् ? तन्न; अजितराबोधकत्वस्य अनिर्णयात् हेतोरसिद्धेः । प्रमेयत्वेन रूपेण प्रमेयस्य अर्थस्य ज्ञानेऽपि यावत् तत्तद्घटत्वादिविशेषधर्मेण घटा-

---

प्रथम निर्देश होता है' इसके अनुसार आदैच् का पूर्व में उपादान युक्त है । तथापि मङ्गल-प्रयोजन के लिये विधेय वृद्धि शब्द का पहले प्रयोग अनुचित नहीं है । अन्यत्र 'अपृक्त एकाल् प्रत्ययः' इत्यादि सूत्रों में भी उक्त नियम का पालन न करने से यह सिद्ध होता है कि विधेय का पूर्व प्रयोग असाधु नहीं है । असाधुत्वशङ्का का वारण ही विपरीतनिर्देश का प्रयोजन है ।

'सभी शब्द सब अर्थों के वाचक हैं' इसके अनुसार वृद्धि शब्द में आद् ऐच् की बोधकता पूर्वतः ही निर्णीत होने से व्याकरण में आ ऐ औ इन्हीं का वृद्धिशब्द द्वारा बोध होता है, अन्य का नहीं'—इस प्रकार अन्य की बोधव्यावृत्ति के लिये सूत्र नियमार्थक है ।

इसके खण्डन का उपक्रम करते हैं—

सर्वशब्दानामिति । अज्ञात शक्ति से शाब्दबोध नहीं होता । अन्यथा व्याकरण कोशादि के द्वारा शक्तिज्ञान के विना भी शक्ति के रहने मात्र से शाब्दबोध का प्रसङ्ग हो जायगा । अतः

सामान्यतस्तथा ज्ञानञ्च न बोधोपयोगि ।

शास्त्रं त्वस्मदाद्युद्देशेनैव प्रवृत्तमिति बोद्धव्यम् ।

तत्रैव सङ्केतग्राहकशास्त्रकरणं स्वेच्छयैवेत्येषां यदृच्छाशब्दत्वेन व्यवहारः, स्वेच्छया संज्ञाः क्रियन्त इति च ।

एतदुपदेशरूपसङ्केतात् प्राक् तत्र संज्ञात्वाग्रहेण तासामनित्यत्वव्यवहारः ।

दीनां ग्रहणं न भवति, तावद् घटत्वादिविशेषधर्मप्रकारको बोधो न भवति । विशेषधर्म-पुरस्कारेण सर्वार्थवाचकत्वग्रहस्य योगिनां सम्भवेऽपि अस्मादृशां तत्तद्विशेषरूपेण सर्वे-षामर्थानां ज्ञातुमशक्यत्वात् । प्रमेयत्वसामान्यधर्मेण घटादिज्ञानं न घटत्वादिविशेष-धर्मप्रकारकबोधोपयोगीति विशेषधर्मेण आकारादीनां वृद्धिपदेन बोधाय सूत्रमिदम् । शास्त्रप्रणयनञ्च अस्माकं स्थूलदृशां कृते इति विधित्वमेवोचितम् । अर्थानाम् = सर्वेषाम-र्थानाम्, विशिष्य = घटत्वादिविशेषरूपेण । सामान्यतस्तथाज्ञानम् = शब्दत्वेन शब्दस्य, अर्थत्वेन अर्थस्य च ज्ञानम् । सर्वार्थवाचकत्वादि प्रकारकमित्यर्थः । न बोधोपयोगि = न प्रक्रियानिर्वाहकविशेषधर्मप्रकारकबोधजनकम् ।

शास्त्रं तु इति । व्याकरणप्रणयनं प्रधानतया न योगिनां कृते, तेषां व्याकरण-मन्तराऽपि साध्वसाधुविवेकस्य सम्भवादिति भावः । तत्रैव = आदैजाद्यर्थे एव, सङ्केत-ग्राहकाणाम् = शक्तिग्राहकाणाम्, शास्त्राणाम् = 'वृद्धिरादैच्' इत्यादिसंज्ञासूत्राणाम् करणे भगवतः पाणिनेरिच्छैव नियामिका । एषाम् = संज्ञाशब्दानाम्, यदृच्छाशब्दत्वेन व्यवहार इति । 'इति च' इत्यनन्तरं 'व्यवहारः' इति पदमनुवर्त्यं योजनीयम् ।

ननु बोधजनकताशक्तेः वैयाकरणमते नित्यत्वात् कथं संज्ञासु आधुनिकत्व-व्यवहारः ? इत्यत आह—**एतदिति ।** वृद्ध्यादिपदसङ्केतज्ञानात् पूर्वमत्र वृद्ध्यादिपदे

शक्ति के ज्ञान से शाब्दबोध होता है । संज्ञासूत्र उसी अज्ञात शक्ति के ज्ञापक हैं । अज्ञात शक्ति का ज्ञापक होने से इसमें विधिसूत्रत्व सुवच है । विधि सूत्र होने में और भी हेतु है—सब शब्दों का सब अर्थों का घटत्वपटत्वादि तत्तद्रूप से ज्ञान साधारणजन को दुर्लभ है । प्रमेयत्वादि सामान्य-लक्षणा प्रत्यासत्ति से ज्ञान शाब्दबोध में उपयोगी नहीं है; क्योकि जिस रूप से शक्तिग्रह होता है उसी रूप से शाब्द बोध भी[1] । इसलिये घटत्वादिप्रकारक शाब्दबोध या आत्व ऐत्वादि प्रकारक बोध प्रमेयत्वेन शक्तिज्ञान से नहीं होगा । योगियों को सभी शब्दों का सभी अर्थों का घटत्व पटत्व वृद्धित्व आदि रूप से ज्ञान होने पर भी, उनका ज्ञान शास्त्रप्रक्रिया में उपयोगी नहीं है । उनकी दृष्टि से शास्त्र की रचना नहीं की गयी, अपि तु हम लोगों की दृष्टि से शास्त्र का निर्माण है । उनको तत्तत् रूप से ज्ञान दुर्लभ है ।

आ ऐ औ की वृद्धिसंज्ञा, अ ए ओ इनकी गुण संज्ञा करने में महर्षि पाणिनि की इच्छा एकमात्र कारण है । इसी प्रकार अन्यत्र भी संज्ञा करने में वे संकेतकरण में स्वतन्त्र हैं । अत एव

---

१. तत्प्रकारक तद्विशेष्यक शाब्दबोधमात्र में तत्प्रकारक तद्विशेष्यक वृत्तिज्ञानाधीन तत्प्रकारक तद्विशेष्यक उपस्थिति कारण मानी गयी है । अतः भिन्नप्रकारक शक्तिज्ञान से भिन्नप्रकारक शाब्दबोध नहीं होगा ।

अत एव तत्तत्संज्ञाकरणज्ञानरूपप्रकरणादन्यार्थाग्रहणरूपनियमः कृत्रिमाकृत्रिमन्यायमूलतयोक्तः संख्यासंज्ञासूत्रे भाष्ये।

आर्थिकमेवामुं नियममादाय संज्ञासूत्रेषु नियमत्वव्यवहारः—

'व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्'

इत्यादिना कृतः। बाचकताबोधकत्वेऽपि तदनुत्पादकत्वान्न शब्दार्थसम्बन्धनित्यताहानिः। आसाञ्च शिष्टप्रयुक्तत्वात्साधुत्वमित्यन्यत्र विस्तरः।

आदैच् बोधजनकत्वाज्ञानात् संज्ञासु अनित्यत्वव्यवहारः। अत एव = संज्ञानामनित्यत्वव्यवहारादेव। यथा स्थानं तस्याः तस्याः संज्ञायाः करणेन तज्ज्ञानरूपप्रकरणबलेन प्राकरणिकस्यैव अर्थस्य प्रतीतेः अन्यस्य अप्राकरणिकस्य न—इत्येतन्मूलिका 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः' इत्येषा परिभाषा संख्यासूत्रे भाष्ये उक्ता। अन्यथा संज्ञायाः नित्यत्वाद् अकृत्रिमत्वेन, कृत्रिमत्वेन तस्याः ग्रहणे प्रभाणाभावात् तदसङ्केतेर्दुर्वारत्वात्। सङ्केतग्राहके संज्ञासूत्रे कृते तु तत्सङ्केतज्ञानरूपप्रकरणबलात् प्राकरणिकस्यैव ग्रहणं नान्यस्य इति अप्राकरणिकस्य व्यावृत्त्या फलितं नियममादाय संज्ञासूत्रे नियमत्वव्यवहारः।

प्रकरणस्याभिधानियामकत्वं 'संयोगो विप्रयोगश्च' इत्यादिना अन्यत्र स्पष्टम्।

'व्यवहाराय नियमः' इति हरेः कारिकायाः अयमर्थः—क्वचित्, न तु सर्वत्र; गुणादिपदानाम् शास्त्रान्तरे अर्थान्तरदर्शनात्। संज्ञिनि = संज्ञापदवाच्ये। संज्ञायाः = संज्ञिबोधिकायाः। व्यवहाराय व्यवहारार्थम्। नियमः = वृद्ध्यादिप्रयोगाणां नैयत्यमिति। वृद्ध्यादिपदेषु आदैजादिबोधजनकतायाः ज्ञानस्य उत्पादेऽपि बोधजनकतारूपायाः शक्तेरनुत्पादात् न शक्तेर्नित्यताहानिः। ननु टिघुघेत्यादीनां कथं साधुत्वम् तेषां शब्दानां

यदृच्छा शब्द से संज्ञाओं का व्यवहार भी किया गया है। संकेतरूप संज्ञाग्रह के पहले इनमें संज्ञात्व का ज्ञान न होने से इनमें अनित्यत्व का व्यवहार भी होता है।

संज्ञा में अनित्यत्वव्यवहार से ही—'अर्थः प्रकरणम् लिङ्गम्' इत्यादि लौकिक और शास्त्रीय संख्या में किसका ग्रहण है—इस सन्देह का तत्तत् संज्ञा करने से उत्पन्न ज्ञानरूप प्रकरण से शास्त्रीय संज्ञा का ग्रहण होता है। इससे अशास्त्रीय संज्ञा की व्यावृत्ति फलित होती है। इसी आधार पर 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः' यह न्याय है। एक अर्थ में एक पद संकेतित होने से उस प्राकरणिक अर्थ की ही उपस्थिति होने से अर्थान्तर की अनुपस्थिति होने के कारण संज्ञासूत्र में नियम का व्यवहार फलितार्थ है। 'व्यवहाराय नियमः' इत्यादि कथन भी उक्त रीति से फलितार्थ है।

संज्ञासूत्रों द्वारा तत्तत् अर्थों के वाचकत्व का बोध होता है। इनके द्वारा वाचकत्व की उत्पत्ति नहीं होती। अतः 'शब्द का अर्थ के साथ नित्य सम्मन्ध है' इस नियम की क्षति नहीं हुई। शिष्टों द्वारा प्रयुक्त होने से संज्ञाशब्दों की साधुता है।

'आत्' इसके तपरकरण से त्रिमात्र तथा चतुर्मात्र ऐ और औ को वृद्धिसंज्ञा की व्यावृत्ति होने के कारण तपरोच्चारण परार्थं भी है। इसका खण्डन किसीने इस प्रकार किया है—कार्य-

कार्यकालपक्षे 'मृजेर्वृद्धिः' (७ । २ । ११४) इत्यादौ वृद्धिपदार्थजिज्ञासायां 'वृद्धिरादैच्' (१ । १ । १) इत्युपस्थित्या तदर्थबोधरूपे शक्तिग्रहे वृत्ते विधिवाक्यार्थबोधः ।

अत एव 'ष्यङः सम्प्रसारणम्' (६ । १ । १३) इति सूत्रे भाष्ये—'कार्यकालं संज्ञापरिभाषं भस्येत्युपस्थितमिदं भवति—यचि भमिति' इत्युक्तम् ।

व्याकरणेन अव्युत्पादनात् ? अत आह—**आसाञ्चेति**। संज्ञायां साधुत्वं शिष्टानां[1] प्रयोगादित्यवधेयम् ।

यथोद्देशपक्षे संज्ञाशास्त्रस्य स्वदेशे एव वाक्यार्थबोधात् तत्र आदैचोरविधीयमानत्वेन सवर्णग्रहणात् कृष्णैकत्वम् गङ्गौघः इत्यादौ आन्तरतम्यात् त्रिमात्रचतुर्मात्रा आदेशाः स्युरिति तद्वारणाय वृद्धिसंज्ञासूत्रे तपरकरणस्य परार्थता। परं कार्यकालपक्षे तु—यत्र वृद्धिपदं श्रूयते, तत्रादैच् इत्युपतिष्ठते—इत्यर्थस्य सत्त्वात् आदैच्पदाऽभिन्ना वृद्धिर्भवतीति पदैकवाक्यतया बोधात् एचो विधीयमानेन अणुदित्सूत्राप्रवृत्त्या सवर्णग्रहणस्य अप्राप्तत्वात् त्रिमात्रचतुर्मात्रादेशानां प्रसङ्गाभावात् तद्व्यावृत्तये क्रियमाणं तपरोच्चारणं न परार्थतया सप्रयोजनम् इति कस्यचिन्मतं निराचिकीर्षुः प्रसङ्गात् प्रक्रमते—**कार्यकाल इति ।**

कार्यकालपक्षे 'मृजेर्वृद्धिः' इत्यादिषु वृद्धिविधायकसूत्रेषु वृद्धिपदार्थः कः ? इति जिज्ञासा संज्ञाशास्त्राणां स्वदेशे वाक्यार्थबोधे जातेऽपि उपेक्षया अनुत्पन्नतद्विषयकसंस्कारस्य पुरुषस्य जायते; संस्कारं विना तस्य स्मरणानुपपत्तेः। ततो वृद्धिसंज्ञासूत्रस्य विधिसूत्रदेशे समाकर्षणेन वाक्यैकवाक्यतया (न तु पदैकवाक्यतया) वृद्धिः आत् ऐचश्च भिन्ना इत्येवंरूपया विधिसूत्रेण सहान्वयः । एवञ्च अस्मिन्नपि पक्षे एचोऽविधेयत्वेन सवर्णग्रहणेन भिन्नकालस्य प्लुतस्य व्यावृत्तये परार्थमपि तपरकरणम् । उभयस्मिन्नपि पक्षे भिन्ना एकवाक्यता समानेति एकपक्षे तस्याविधेयत्वे अपरस्मिन्नपि पक्षे तथैव युक्तम्; पदैकवाक्यताया अस्वीकारात् ।

अमुमेवार्थं द्रढयितुं भाष्यमुपन्यस्यति—**अत एवेति** । वाक्यैकवाक्यतायाः स्वीकारादेवेत्यर्थः। **इत्युक्तमिति**। पदैकवाक्यतयान्वयस्वीकारे तत्र 'आदैच्' इत्यस्योपस्थितेर्वक्तव्यतया भस्येति संज्ञासूत्रस्योपस्थितेः प्रतिपादनमसङ्गतं स्यात् । एवं प्रगृह्य-

---

कालपक्ष में संज्ञासूत्र का विधिसूत्र के साथ पदैकवाक्यता से अन्वय होने से 'वृद्धिरेचि' इस विधिसूत्र का, उपस्थित 'वृद्धिरादैच्' इस संज्ञासूत्र के साथ जहाँ वृद्धिपद का श्रवण है, वहाँ 'आदैच्' की उपस्थिति होती है, इस प्रकार उपस्थित 'आदैच्' का 'भवति' में अन्वय होने से विधेयरूपत्व हो गया । अतः विधेय में सवर्णग्रहण प्राप्त न होने से भिन्नकाल व्यावृत्ति द्वारा परार्थ नहीं हो सकता । इसके निराकरणार्थ लिखते हैं—

---

१. अस्मिन् आर्यावर्ते आर्यनिवासे ये ब्राह्मणाः कुम्भीधान्यः अलोलुपाः अगृह्यमाणकारणः का विना किञ्चिदन्तरेण कस्याश्चिद् विद्यायाः पारं गतास्तत्रभवन्तः शिष्टाः । (म०भा० ६ । १ ।१०८) कुम्भीधान्याः = कुम्भीमात्रमेव येषां धान्यम् । अलोलुपाः = लोभरहिताः । अगृह्यमाणकारणकाः=दृष्टं कारणं ख्यातिलाभपूजादिविशेषरूपं विनैव सदाचारानुवर्तिनः । इति कैयटः ।

'ईदूदेद्' (१ । १ । ११) इति सूत्रे भाष्येऽपि 'कार्यकालं संज्ञापरिभाषम्, प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति—ईदूदेद् द्विवचनं प्रगृह्यम्' इति।

निष्ठा' (३ । २ । १०२) इति सूत्रे कैयटोऽपि "निष्ठेत्युक्ते संज्ञावाक्यं 'क्तक्तवतू निष्ठा' इति स्मर्यते" इत्याह।

अत्र पक्षे एकत्र शक्तिग्रहे वृत्तेऽपि तत्प्रदेशस्थस्यैव तत्रार्थे शक्तिरिति सम्भावनया प्रदेशान्तरस्थे बोधो न स्यादिति सर्वप्रदेशेषु तत्तत्पदशक्तिग्रहपूर्वकं विधिवाक्यार्थबोधः। यथोद्देशे तु एकदैव शक्तिग्रहात् सर्वत्र बोध इति विशेषः।

एतेन "कार्यकालपक्षे तपरत्वं स्पष्टार्थमेव; आदैच्पदार्थस्य वृद्धिविशेषणतया विधेयत्वेन सवर्णग्रहणाप्रसक्तेः। यत्र वृद्धिपदं तत्रादैजित्युपतिष्ठते इति क्रमेण संज्ञासूत्राणामर्थात्" इत्यपास्तमित्यन्यत्र विस्तरः।

संज्ञासूत्रस्य 'प्लुतप्रगृह्या' इति सूत्रे उपस्थितिर्भाष्योक्ता असङ्गता स्यात्। कैयटोऽपि निष्ठासूत्रे उक्ते 'क्तक्तवतू निष्ठा' इति सूत्रं सस्मार। अतस्तेनापि स एवार्थः प्रमाणीकृतः।

किञ्च, पदैकवाक्यतायां वृद्धिपदश्रवणेन 'आदैच्' इत्यस्योपस्थित्या तेन सह वृद्धिपदस्यान्वयेऽपि ऐच्पदार्थस्यानुपस्थितत्वात् पदार्थेन सह विधिवाक्यार्थस्य नान्वयप्रसङ्गः।

अत्र = कार्यकाले। एकत्र = एकस्मिन् विधिसूत्रे। संज्ञाशब्दानां शक्तिग्रहे वृत्तेऽपि= जातेऽपि। तत्प्रदेशस्यैव संज्ञापदस्य अयमर्थो नान्यप्रदेशस्थस्य तस्येति सन्देहे प्रदेशान्तरस्थेन तत्पदेन तादृशार्थबोधो न स्यात्, अतः सर्वेषु विधिप्रदेशेषु संज्ञासूत्राणामुपस्थित्या संज्ञापदबोध्यनिर्णये न विधिवाक्यार्थबोधः। एतेन = पक्षद्वयेऽपि पदार्थतया तपरस्यावश्यकत्वेन। **वृद्धिविशेषणेति**। वृद्धिर्विशेषणं यस्येति बहुव्रीहिः। क्रमेण = रीत्या। **इत्यन्यत्रेति**। उद्द्योतादौ। स्वदेशे वृद्धिपदार्थे ज्ञातेऽपि उपेक्षया तत्संस्काराभावेन स्मरणानुत्पत्त्या विधिप्रदेशे वृद्धिपदार्थे जिज्ञासिते तत्र संज्ञाविधायकं सूत्रमुपतिष्ठते कार्यकालपक्षे इति नव्यमताशयः।

कार्यकालेति। संज्ञाशास्त्र की उपस्थिति विधिसूत्र में वृद्धचादि पदार्थ की जिज्ञासा होने पर मानी गयी है। 'मृजेर्वृद्धिः' इसमें वृद्धिपदार्थ के ज्ञान के लिये 'वृद्धिरादैच्' इसकी उपस्थिति द्वारा वाक्यार्थबोधरूप शक्तिग्रह होने के अनन्तर 'मृजेर्वृद्धिः' इसका प्रारम्भिक बोध होगा। विधिसूत्र में उपस्थित संज्ञासूत्र का बोध आ ऐ औ को उद्देश्य मान कर वृद्धि का विधान किया जाना है। इस प्रकार वाक्यैकवाक्यता से अन्वय होने पर भी पदैकवाक्यता से अन्वय नहीं हुआ। अतः ऐच् विधेय न होने के कारण अणुदित्सूत्र से प्राप्त सवर्णग्रहण के निवारणार्थ परार्थ भी तपरकरण है। कार्यकाल में पदैकवाक्यता से यथोद्देश में वाक्यैकवाक्यता से अन्वय होने के कारण पक्ष में भेद नहीं है; किन्तु उपेक्षाबुद्धि से भेद है। 'भविष्यति किञ्चित् प्रयोजनम्' इस उपेक्षाबुद्धि से कार्यकाल माना गया है। (विस्तृत विवेचन विजया में देखिये)।

वाक्यभेद से अन्वय स्वीकार करने से ही 'ष्यङः सम्प्रसारणम्' इस सूत्र के भाष्य में भी पदार्थ की जिज्ञासा होने पर 'यचि भम्' इसकी उपस्थित होने की चर्चा की है। इसी प्रकार मूल में प्रदर्शित भाष्यान्तर एवं कैयट-ग्रन्थ से भी उक्तार्थ की पुष्टि की गयी है।

कार्यकालपक्ष में विशेष यह है कि—'वृद्धिरादैच्' इसकी उपस्थिति के द्वारा किसी एक विधिसूत्र में वृद्धिपदार्थ का निर्णय होने पर भी, उसी वृद्धि पद का वैसा अर्थ है, अन्य सूत्रघटक

१७. अदेङ्गुणः । १ । १ । २ । **अदेङ् च गुणसंज्ञः स्यात् ॥**

१८. भूवादयो धातवः । १ । ३ । १ । **क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ॥**

अत्रातद्भावितानामपि आदैचां ग्रहणम्, तेन शालीयादिसिद्धिः ॥

भूवादयो० (१ । ३ । १)। **क्रियावाचिनः किम्? विकल्पार्थकवाशब्दस्य**

केचित्तु कीदृशोऽसौ जडमतिः बहुशो बोधितोऽपि प्रतिविधिसूत्रं पुनः पुनः तद् जिज्ञासते । का वृद्धिः ? को गुणः ? इत्यादिजिज्ञासायाः त्रिचतुरस्थलेषु सम्भवेऽपि सर्वत्र तथा स्वीकार आग्रहमूलक एव इति वदन्ति ।

वृद्धिशब्देन यत्र आकारैकारौकाराः विधीयन्ते तेषामेव न वृद्धिसंज्ञा; किन्तु स्वयं सिद्धानामपि तेषां सा संज्ञा इत्याह—**अतद्भावितानामिति** । एतस्य स्वीकारादेव शाला-शब्दघटकाद्याकारस्य स्वयंसिद्धस्यापि वृद्धिपदेन ग्रहणात् 'वृद्धिर्यस्याचाम्' इति वृद्धि-संज्ञा सिद्धा ततश्छप्रत्ययश्च सिध्यति । तद्भावितस्य वृद्धिसंज्ञायान्तु अत्र वृद्धिसंज्ञा न स्यात् । तथा च वृद्धसंज्ञाया विरहेण छप्रत्ययस्यानुपपत्तेः । अत्र = वृद्धिसंज्ञासूत्रे । अतद्भावितानाम् = तेन वृद्धिशब्देन भाविताः = विहिताः ये; तद्भिन्नानाम् । अपि-शब्देन तद्भावितानां संग्रहः । तेन = उभयविधग्रहणेन । **शालीयादीति** । आदिपदेन 'तावद्भार्यः' इत्यादिरपि संग्राह्यः । अत्र 'आ सर्वनाम्नः' इत्यनेन आकारशब्देन आकार-स्य विधानात् तद्भाविता वृद्धिरिति 'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' इत्यनेन पुंवद्भावः सिद्धः । तद्भावितस्याग्रहणे तु अत्र वृद्धिसंज्ञाया अप्रवृत्तौ पुंवद्भावासिद्धि-प्रसङ्गात् ॥

भूवादयो धातव इति । भूश्च वाश्चेति द्वन्द्वे भूवौ, आदिश्च आदिश्चेति आदी, भूवौ आदी येषामिति भूवादयः । प्रथम आदिशब्दो व्यवस्था(प्रभृति)वाची, द्वितीयः प्रकारार्थकः । प्रकारो = भेदः, सादृश्यञ्च । 'सादृश्यं चात्र क्रियावाचकत्वेन गृह्यते' इति

वृद्धिपद का वैसा अर्थ नहीं—ऐसी सम्भावना से सूत्रान्तर के वृद्धिपदार्थ की जिज्ञासा निवृत्त न होने के कारण उसका वाक्यार्थबोध नहीं होगा । अतः सभी वृद्धिविधायक सूत्रों में वृद्धिसंज्ञासूत्र की उपस्थिति आवश्यक होती है । यथोद्देशपक्ष में स्वदेश में ही एक साथ वाक्यार्थबोध होता है । विधिसूत्रों में उसकी उपस्थिति द्वारा बोध नहीं होता । 'एतेन' यहाँ से 'अपास्तम्' तक का भाव पूर्व में लिखा जा चुका है ।

'वृद्धिशब्द[1] द्वारा आ और ऐ के स्वरूप निष्पन्न होने पर वृद्धिसंज्ञा का विधान है'—ऐसा नियम नहीं है । किन्तु जिस प्रकार से इनकी स्वरूप सिद्धि अपेक्षित है । इसीलिये 'शालीयः' में आकार को वृद्धिसंज्ञक मानकर 'वृद्धिर्यस्याचामादिः' इससे वृद्धसंज्ञा होने से 'वृद्धाच्छः' इस सूत्र से छ प्रत्यय सिद्ध होता है ॥

भूवादय इति । आदिश्च आदिश्च आदो, इसमें एकशेष या तन्त्र है । एक 'आदि'

---

१. **तद्भावितानाम् अर्थात् तेन वृद्धिशब्देन भावितानाम् विहितानाम्–यह अर्थ है । प्रकृत में वृद्धिशब्द से विहित और स्वतः सिद्ध–दोनों प्रकार के आदैच् का ग्रहण है ।**

निपातस्य धातुत्वेऽप्रातिपदिकत्वात्सुबभावे पदत्वानापत्तेः। तदुक्तौ तु न दोषः; वार्थस्य विकल्पस्य भूतभविष्यत्कालसम्बन्धाभावेन क्रियात्वाभावात्।

अस्त्याद्यर्थस्यापि तत्त्वं भूतभविष्यत्कालसम्बन्धात्।

मनोरमाकाराः। परमेतन्मते भूशब्दस्य व्यवस्थावाचिनि आदिशब्दे, वाशब्दस्य प्रकारवाचिनि आदिशब्देऽन्वयात् एकधर्मावच्छिन्ने एकधर्मावच्छिन्नस्य एकसम्बन्धेन अन्वयविवक्षारूपसहविविवक्षाया भिन्न-भिन्नधर्मावच्छिन्ने अन्वयेन अभावात् द्वन्द्वैकशेषौ कथं स्याताम्। 'आद्यन्तौ टकितौ' इत्यत्र इव समुदायत्वावच्छिन्ने समुदायत्वावच्छिन्नस्य भूवासमुदायस्य आदिसमुदाये अन्वयविवक्षया सहविवक्षायाः उपपत्तेः। द्वन्द्वे एकशेषे च कृते यथासंख्यसूत्रबलेन पश्चाद् भूशब्दस्य व्यवस्थावाचिनि वाशब्दस्य प्रकारवाचिनि अन्वयः स्यात्। एवमपि सादृश्यं क्रियावाचित्वेनेत्यस्यासङ्गतिर्दुवारा। तथाहि—चन्द्रवन्मुखमित्यत्र यथा सादृश्यप्रतियोगिनि चन्द्रे या प्रतियोगिता तदवच्छेदको धर्मः चन्द्रत्वं तद्व्यापकधर्मेण आह्लादकत्वेन सादृश्यं मुखे गृह्यते, तथैव वासादृश्यं वात्वव्यापकधर्येण असत्त्ववचनत्वेन ग्रहीतुं शक्यते, न क्रियावाचित्वेन। विकल्पार्थके वाशब्दे क्रियावाचित्वस्यासत्त्वात् वात्वरूपानुपूर्व्यास्तत्रापि सद्भावेन विकल्पार्थकवाशब्दस्यापि वाशब्देन संग्रहात्। तत्र च क्रियावाचित्वस्य विरहेण तस्य वात्वव्यापकत्वासम्भवात् इति न तेन सादृश्यं सम्भवति। न च वासहचर्याद् भूशब्दोऽसत्त्ववचनः। असत्त्ववाचिनो भूशब्दस्य साहचर्येण क्रियावाचिनो वाशब्दस्य ग्रहणमिति परस्परसाहचर्येण सादृश्यस्य क्रियावाचित्वेन ग्रहीतुं शक्यत्वार्दिति वाच्यम्। एकेनैव आदिपदेन उपस्थापितयोः व्यवस्थाप्रकारयोः उपस्थितौ क्रमिकत्वाभावेन यथासंख्यसूत्रस्य प्रवृत्तावपि क्रमनिर्णयो न स्यात्। कदाचित् भूशब्दस्याव्यवस्थायां कदाचित् प्रकारार्थे अन्वयः स्यात्। किञ्च, एकपदोपस्थितयोरर्थयोः विभिन्नपदान्तरेण उपस्थितेऽर्थे अभेदान्वयाभावेन भूप्रभृतयो वासदृशा धातुसंज्ञका इत्यर्थस्यासङ्गतिः दुष्परिहरा। अतः भूवादयश्च भूवादयश्चेति तन्त्रेण एकशेषेण वा निर्देशः।

एकस्य आदिशब्दस्य व्यवस्थावाचित्वेन अपरस्यादिशब्दस्य च प्रकारवाचित्वेन भूप्रभृतयो वासदृशा इत्यर्थस्य लाभात्। न च व्यवस्थावाचिना आदिशब्देन घटिते भूवादिपदे वाशब्दोपादानं विनापि 'भूप्रभृतयः' इत्यर्थस्य लाभात्, एवं प्रकारवाचिना आदिशब्देन घटिते भूवादिपदे भूग्रहणं विनापि 'वासदृशाः' इत्यर्थस्य लाभेन तत्र तत्र तत्तत्पदानामुपादानं विफलमिति वाच्यम्; परस्परसाहचर्येण पृथिवीवाचकभूशब्दस्य विकल्पार्थकवाशब्दस्य च ग्रहणस्य वारणाय तत्तदुपादानस्य चारितार्थ्यात्।

क्रियावाचिनः फलमाह—**विकल्पेति।** विकल्पार्थकवाशब्दस्यापि वारूपत्वाविशेषात् भ्वादिपठितवाधातुरूपतया धातुसंज्ञा स्यात्। धातुसंज्ञायां धातुभिन्नत्वाभावात् प्राति-

---

शब्द का 'प्रभृति' और दूसरे का सदृश अर्थ है। भूप्रभृति और भूसदृश को धातुसंज्ञा होती है—यह सूत्र का अर्थ है। सादृश्य क्रियावाचित्व रूप से लिया गया है। इसलिये 'विकल्प' अर्थ के बोधक निपात 'वा' शब्द की धातुसंज्ञा नहीं हुई। अदादिगण में 'वा' धातु का पाठ होने से उसका समानाकार निपात भी भ्वादिगणपठित हो जाता है। क्रियावाची निवेश करने पर भूत भविष्यत्

---

१. सादृश्यप्रतियोगितावच्छेदकव्यापकधर्मेण सादृश्यमिति नियमः।

भ्वादयः किम्? 'आणवयति' 'वट्टयति' इत्यादीनां धातुत्वे शास्त्रविषयतया साधुत्वापत्तेः। सूत्रशेषे भाष्ये स्फुटमेतत्।

स्तन्भ्वादीनामुदित्त्वेन धात्वधिकारविहितकार्योद्देश्यत्वादिना स्थितपाठभ्रंशानुमानान्न तेषु दोषः॥

पदिकसंज्ञाया विरहेण विभक्त्यनुत्पत्तौ पदसंज्ञा 'सुप्तिङन्तम्' इत्यनेन न स्यात्। तथा च वा करोतीत्यत्र अतिङन्तात् पदात्परस्य 'तिङ्ङतिङः' इत्यनेन विधीयमानो निघातो न प्राप्नुयात्। न चानर्थकस्य निपातस्य प्रातिपदिकसंज्ञेति वार्त्तिकेन प्रातिपदिकसंज्ञा स्यात् इति वाच्यम्; भाष्ये तस्य प्रत्याख्यानात्। तदुक्तौ = क्रियावाचिन इत्युक्तौ।

'क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका'

इति हरिवचनानुसारेण भूतभविष्यत्कालावच्छिन्नत्वं क्रियात्वम्। तथा च विकल्पार्थक-वाशब्दस्य कालान्वयित्वाभावेन क्रियावाचकत्वविरहात् न दोषः। तत्त्वम् = क्रियात्वम्।

भ्वादिपदप्रयोजनमाह—**आणवयतीति**। आणवयतीत्यस्य आज्ञापयति, वट्टयतीत्यस्य वर्तयतीत्यर्थः। क्रियावाचित्वेन धातुसंज्ञायां सूत्रविषयतया प्रयोगस्य साधुत्वापत्तेः। तिङुत्पत्तिस्तु नापादिता, तिङुत्पत्तेः सत्त्वात्। धातुभागस्य साधुत्वे सर्वं साधु स्यात् इति भावः। भ्वादिग्रहणे कृते तु एतस्य भ्वादिगणे पठितत्वाभावेन न धातुसंज्ञा। अत एव च न साधुत्वम्। **सूत्रशेषे इति**। भूवादिसूत्रस्य अन्ते इत्यर्थः।

येषां धातूनां भ्वादिगणादारभ्य चुराद्यन्तं यावत् मध्ये पाठो नास्ति तेषु उदित्त्वादिप्रयुक्तशास्त्रीयकार्यस्य धातुसंज्ञां विना अनिर्वाहात् सामर्थ्यात् तेषां धातूनां पाठः पूर्वमासीत्, अधुना केनचित् कारणेन लुप्तो जातः—इति कल्प्यते। तस्माद् धातुसंज्ञा तेषां निष्प्रत्यूहं सिध्यतीति भावः।

वर्तमान कालान्वयी को क्रिया मानते हैं। 'वा' शब्द उक्त कालान्वयी न होने से क्रियावाचक नहीं हुआ। धातुसंज्ञा होने से प्रातिपदिकसंज्ञा नहीं होगी। अत एव सुबन्तत्वाभाव से पदसंज्ञा नहीं होगी। अस् धात्वर्थ में भी कालान्वय होने से क्रियात्व हैं।

भ्वादय इति। 'भ्वादयः' इस कथन का प्रयोजन 'आणवयति' इत्यादि प्रयोगों की साधुत्व-व्यावृत्ति है। अन्यथा 'आज्ञापयति' इस अर्थ में प्रयुक्त 'आणवयति' तथा 'वर्तयति' इस अर्थ में प्रयुक्त 'वट्टयति' इन प्राकृत प्रयोगों में प्रकृति भाग के क्रियावाची होने से धातुसंज्ञा की आपत्ति हो जायगी। इसके द्वारा शास्त्र का विषय हो जाने से इसका साधुत्व प्राप्त होगा।

शङ्का—जिनका भ्वादिगण में निर्देश नहीं है केवल 'ऋतेरीयङ्' 'स्तन्भु' इत्यादि सूत्रमात्र में निर्दिष्ट हैं, इनकी धातुसंज्ञा नहीं होगी; क्योंकि भ्वादिगण में इनका पाठ नहीं है?

समाधान—'इत्संज्ञक उकार का निर्देश तथा धात्वधिकार में विहित तत्तत्कार्यों के प्रति उद्देश्यत्वरूप से निर्दिष्ट होने से 'स्तन्भु' 'ऋति' आदि का पाठ धातुगण में स्थित था, किन्तु इस समय पाठभ्रष्ट हो गया'—इस प्रकार के अनुमान से भ्वादिगणपठितत्व होने के कारण दोष नहीं होगा॥

१९. प्राग्रीश्वरान्निपाताः । १ । ४ । ५६ । इत्यधिकृत्य ॥

प्राग्रीश्वरा० (१ । ४ । ५६) ॥ 'अधिरीश्वरे' (१ । ४ । ९७) इत्यभिव्याप्य प्राङ्निपाता इत्यधिकारः । प्राक् निपाताः सन्तो गत्यादिसंज्ञका इत्यर्थः । तेन ताभिः समावेशः, 'अधिरीश्वरे' (१ । ४ । ९७) 'विभाषा कृञि' (१ । ४ । ९८) इत्यत्र निपातपदसम्बन्धश्च सिद्धः ।

एषां द्योतकत्वं वाचकत्वञ्च यथाकार्यं यथाप्रयोगं बोद्धव्यमित्यन्यत्र विस्तरः ।

क्रियात्वं साध्यत्वेन प्रतीयमानत्वम् । साध्यत्वञ्च कालान्वयितावच्छेदकरूपवत्त्वम् । 'धात्वर्थः क्रिया' इति तु न वक्तव्यम् । अन्यथा धातुज्ञाने धात्वर्थक्रियायाः ज्ञानम्, क्रियाज्ञाने क्रियावाचिनो धातोर्ज्ञानम्—इत्यन्योन्याश्रयः स्यात् ।

नवीनास्तु—क्रियावाचककत्वञ्च साध्यत्वविशिष्टत्वम्, वै० च 'स्वावच्छिन्ननिरूपितशक्तिपर्य्याप्त्यधिकरणत्व' 'स्वावच्छिन्नेतरनिरूपितशक्तिनिरूपकार्थविषयकबोधतात्पर्येणोच्चारिताऽघटितत्व' 'स्वावच्छिन्ननिरूपितशक्तिनिरूपकार्थविषयकबोधतात्पर्येणोच्चरितत्व'-एतत्त्रितयसम्बन्धेन । स्वं = साध्यत्वं तदवच्छिन्ननिरूपित या धात्वादिनिष्ठा शक्तिः, तस्याः शक्तेः पर्याप्तिसम्बन्धेन अधिकरणं भू इति । द्वितीयः सम्बन्धः—स्वावच्छिन्नेतरः घटादिरूपोऽर्थः, तन्निरूपिता शक्तिः घटादिपदनिष्ठा, तन्निरूपकोऽर्थः घटादिः, तद्विषयकबोधतात्पर्येण यदुच्चारितं घटपदादि तेन अघटितं भूपदम् । एवं स्वं साध्यत्वं तेनावच्छिन्ना या शक्तिः तन्निरूपतोऽर्थः क्रिया (भूपदार्थः) तद्विषयकबोधतात्पर्येण उच्चरितत्वं भू-शब्दस्य इति लक्षणसमन्वयः ॥

प्राग्रीश्वरान्निपाता इति ॥ 'अधिरीश्वरे' इति सूत्रात् प्रागित्यर्थे अधिशब्दस्य कर्मप्रवचनीयस्य निपातसंज्ञा न स्यात् । अग्रेऽपि च संज्ञाभिस्समावेशो न स्यात्, अत आह—**अभिव्याप्येति** । ऋरश्वरादित्यत्र ल्यब्लोपे पञ्चमी । अभिव्याप्य इत्यध्याह्रियते । 'प्राग्निपाताः' इत्यधिक्रियते । तेन प्राक् निपातसंज्ञकाः सन्तः गत्यादिसंज्ञकाः भवन्तीति लभ्यते । तत्सहितोऽभिविधिः । तथा च अभिविध्यर्थकस्य आङोऽध्याहारेण 'अधिरीश्वरे' इति सूत्रपर्यन्तम्—इत्यर्थस्य लाभेन 'आङ्मर्यादावचने' इत्यनेन पञ्चम्यामपि दोषाभावादिति **विषमी**टीकायाम् ।

तेन = ल्यब्लोपे पञ्चम्याः, प्रागित्यस्य अधिकारस्य "अधिरीश्वरे" इति सूत्रमभिव्याप्य च आश्रयणेन ।

ताभिः = गत्यादिसंज्ञाभिः । 'नियमेन निपातयन्ति स्वार्थमन्यस्मिन्' इति निपाताः इत्यन्वर्थसंज्ञया एषां द्योतकत्वमेव । तन्न । निपात इति महत्याः संज्ञायाः करणं प्राचामनुरोधेन इति अन्वर्थसंज्ञया द्योतकत्वमेव न, किन्तु यथाप्रयोगं द्योतकत्वकल्पनम् ।

प्राग्रीश्वरात् इति ॥ 'अधिरोश्वरे' इस सूत्र पर्यन्त 'प्राक् निपाताः' इसका अधिकार है । 'प्राक्' इसका 'निपाताः' के साथ अन्वय है । निपातसंज्ञा पूर्व में होने के बाद गति आदि संज्ञा होने से परस्पर समावेश सिद्ध हुआ । 'अधिरीश्वरे' 'विभाषाकृत्व' इन दोनों सूत्रों में निपात पद का सम्बन्ध भी सिद्ध होता है । निपातों की द्योतकता तथा वाचकता को कार्य और प्रयोग के अनुसार समझना चाहिये । विस्तृत विचार **भूषणसार** में देखिये ॥

२०. चादयोऽसत्त्वे । १ । ४ । ५७ । **अद्रव्यार्थाश्चादयो निपात-संज्ञाः स्युः ॥**

२१. प्रादयः । १ । ४ । ५८ । **अद्रव्यार्थाः प्रादयस्तथा ॥**

'असत्त्वे' इति पर्युदासो लाघवादित्याह—अद्रव्येति । विशेष्यतया द्रव्यभिन्नार्था इत्यर्थः । तेन क्रियाविशिष्टद्रव्यवाचिनां विप्रादिघटकप्रादीनां न ।

चादयः किम् ? स्वरादिपठितानामसत्त्ववृत्तित्वे आद्युदात्तत्वं मा भूदिति ॥

निपातानां द्योतकत्वं वाचकत्वं वेति विचारो **मञ्जूषादौ** विस्तरेण कृतः, तत एवावगन्तव्यम् ।

द्रव्यभिन्नस्य पूरणार्थस्य वाचकत्वमप्यस्त्येव, यथा—कार्यमिति । अनुभुंक्ते सुखम्, साक्षात् क्रियते गुरुः, इत्यादौ भूधातोरेव वाचकत्वम्, उपसर्गाणां तु द्योतकत्वम् । अन्यथा व्यापारव्यधिकरणफलवाचकत्वस्य धातोरभावात् कर्मणि लकारो न स्यात् । एवं विभक्तिप्रतिरूपकस्य अहम्पदस्य अस्मदर्थस्य वाचकत्वम् । अन्यथा अस्मदर्थवाचकत्वाभावेन "अहंशुभयोर्युस्" इत्यनेन युस् न स्यात् । 'अनुभूयते' इत्यादौ निपातस्य द्योतकत्वम्, 'अहंयुः'इत्यत्र वाचकत्वं सिध्यतीति कार्यानुसारेण द्योतकत्ववाचत्वयोः व्यवस्था । यथाप्रयोगम् = प्रयोगानुसारेण । यथा "शरैरुस्रैरिवोदीच्यान् उद्धरिष्यन् रसानिव" इति **रघुवंशश्लोके** इवशब्दस्य सादृश्यवाचकत्वे तृतीया न स्यात्, षष्ठी स्यात् । उस्रसदृशं करणं न तु उस्रः इति करणत्वाभावेन तृतीयायाः प्रसङ्ग एव न । अतः प्रयोगानुसारेण इवशब्दो द्योतकः । उस्रपदस्यैव च उस्रसदृशोऽर्थः ॥

चादयोऽसत्त्वे इति ॥ अत्र असत्त्वपदघटको नञ् प्रसज्यप्रतिषेधार्थको न । एतादृशार्थकत्वे सत्त्ववाचिनो निपातसंज्ञा न-इत्येवं पृथग् वाक्यार्थकल्पना । तथा नञः निषेध्यया भवतिक्रियया सह सम्बन्धेन सत्त्वशब्देनासम्बन्धाद् असमर्थसमासस्य स्वीकारः इति गौरवं स्यात् । तदपेक्षया पर्युदासस्वीकार एवोचितः । अत्र वाक्यभेदस्य असमर्थसमासस्य च कल्पना नेति लाघवम् इत्याशयेन व्याचष्टे—**पर्युदास इति** । ननु विशेषेण प्राति = पूरयतीति विग्रहे विपूर्वकप्राधातोः क-प्रत्यये आकारलोपे च निष्पन्ने विप्रशब्दे

'चादयोऽसत्त्वे' ॥ इसमें लाघवात् नञर्थ पर्युदास है । प्रसज्यप्रतिषेध मानने में नञ् का क्रिया के साथ अन्वय होने से 'सत्त्व' शब्द के साथ समास नहीं होगा, अतः असमर्थसमासकल्पना, क्रिया का अध्याहार-आदि करने में गौरव होगा ।

शङ्का—पर्युदासपक्ष में विशेषेण प्राति इति विप्रः, विपूर्वक प्रा धातु से क प्रत्यय के द्वारा इसकी सिद्धि है । विशिष्ट पूरणकर्ता प्रशब्द का द्योत्य अर्थ है । पूरणरूप क्रिया द्रव्य नहीं है । प्र शब्द पूरणरूप अद्रव्य का प्रतिपादक होने से असत्त्ववाची हो जाता है । अथवा 'पूरणविशिष्ट कर्त्ता' इतना समुदाय द्रव्य न होने से तादृश समुदायवाची प्र शब्द असत्त्ववाची होता है । अतः 'प्र' की निपात संज्ञा हो जायगी । प्रसज्यप्रतिषेध मानने पर 'द्रव्यवाची की निपातसंज्ञा नहीं होती'—ऐसा अर्थ होगा । विप्रघटक प्रशब्द कर्त्ता का वाचक होने से द्रव्यवाची भी है । अतः निपातसंज्ञा की प्राप्ति नहीं होती—यह दोनों पक्षों में अन्तर है ?

२२. उपसर्गाः क्रियायोगे । १ । ४ । ५९ ।

उपसर्गाः ॥ **योगग्रहणं 'यदर्थे प्रादीनामन्वयस्तं प्रत्येवोपसर्गत्वात्'—इत्यर्थ-बोधनाय । तेन विगताः सेचका अस्माद्विसेचको ग्राम इत्यादौ षत्वं न ॥**

विशब्दस्य द्योतकत्वेन पूरणकर्तृरूपार्थस्य वाचकत्वं प्रशब्दस्यैवेति तस्य द्रव्य(सत्त्व)-वाचकत्वेऽपि (विप्रसमुदायस्य कस्याप्यर्थस्य वाचकत्वाभावेन द्रव्यार्थवाचिभिन्नो विप्रसमुदायः, तत्र वर्तमानस्य) प्रशब्दस्य निपातसंज्ञाया आपत्तिः । प्रसज्यप्रतिषेधा-भ्युपगमे तु द्रव्यार्थके संज्ञाया निषेधात् न दोषः । न च सत्यपि निपातत्वे अवयवस्या, निपातत्वेनाव्ययसंज्ञायामपि तस्माद् विभक्तेरनुत्पादात् लुकोऽप्राप्त्या दोषाभाव इति वाच्यम्; अव्ययसंज्ञायां तदन्तविधेः सत्वात् प्रशब्दान्तस्य विप्रशब्दस्य अव्ययसंज्ञायां विभक्तेर्लुकि तस्याः श्रवणं तत्र न स्यादित्यत आह—**विशेष्यतया इति ।** द्रव्यावृत्ति-विशेष्यताकोपस्थितिजनकः । अत्र तु प्रशब्दः कर्तृवाचकत्वेन द्रव्यवृत्तिविशेष्यता कोपस्थितिजनक एव । लिङ्गसंख्यान्वयि द्रव्यमुच्यते । विशेषेण पूरणकर्ता इत्यर्थबोधक-त्वेन प्रशब्दो विशेष्यतया लिङ्गसंख्यान्वयिनं पुरुषमाह । अतो निपातसंज्ञाया प्रसङ्गो न ।

"वस्तूपलक्षणं यत्र, सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सोऽर्थः, नेयत्वेन विनाशितः" ।।

इति लक्षणं द्रव्यस्य । वस्तूपलक्षणम् = वस्तु उपलक्ष्यते परामृश्यते तत् सर्वनाम-परामर्शाय यत्र प्रयुज्यते सोऽर्थो द्रव्यमित्युच्यते इति **भैरवो ।**

असत्त्ववृत्तित्वे इति । सतीति शेषः । निपातसंज्ञायाम् "निपाता आद्युदात्ताः" इत्यनेनाद्युदात्तत्वं स्यादिति ॥

उपसर्गाः क्रियायोगे इति ॥ 'क्रियया' इत्येवं सूत्रकरणेनैव योगशब्दार्थस्य लाभे योगग्रहणम् 'यत्क्रियां प्रति योगः तत्क्रियां प्रत्येव प्रादीनामुपसर्गसंज्ञा' इति बोधनाय ।

समाधान—पर्युदासपक्ष में भी विप्रघटक प्र की निपातसंज्ञा नहीं होगी, क्योंकि विशेष्य-तया[1] द्रव्यभिन्न अर्थ के वाचक चादि को उक्त संज्ञा का विधान है । प्रकृत में विशेष्यतया कर्ता-रूप द्रव्य का वाचक है । द्रव्य-भिन्न क्रिया का विशेषणतया वाच्यकोटि में प्रवेश है, अतः इस पक्ष में भी संज्ञा नहीं होगी । चादि का उपादान न करने पर अद्रव्यार्थक स्वरादिगण पठितों की भी निपातसंज्ञा हो जाने से 'निपाता आद्युदात्ताः' इस से आद्युदात्त हो जायगा । इसके वारणार्थ चादि का उपादान है ।।

उपसर्गा इति ।। 'क्रियया' इस प्रकार के निर्देश से योगार्थ का लाभ हो जाने से योग ग्रहण के सामर्थ्य से जिस क्रिया के साथ प्रादि का योग है, उसी क्रिया के प्रति प्रादि की उपसर्ग संज्ञा का लाभ होता है । इससे 'विगताः सेचका; अस्माद् ग्रामात्' इस विग्रह में 'विसेचको ग्रामः' इसमें वि को सिच् धातुत्वार्थ के प्रति उपसर्गत्व नहीं हुआ, क्योंकि विशब्द का गम्-धात्वर्थ में अन्वय है । अतः 'उपसर्गात्' इससे षत्व नहीं हुआ ।

---

१. विशेष्यता द्रव्यनिष्ठ न हो । प्रकृष्ट पूरणाकर्त्ता प्र का अर्थ है । विशेष्यता कर्तृरूप द्रव्य में है । द्रव्य से लिङ्ग-संख्यान्वयी का ग्रहण है, गुणाश्रय का नहीं ।

२३. गतिश्च । १ ४ । ६० । **प्रादयः क्रियायोगे उपसर्गसंज्ञा गति-संज्ञाश्च स्युः ।**

प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि सु उत् अभि प्रति परि उप—एते प्रादयः ॥

गतिश्चेति ॥ **'च' उपसर्गसंज्ञासमावेशार्थः । तेन 'प्रतिप्रणीतम्' इत्यादौ गति-त्वात् 'गतिरनन्तरः' (६ । २ । ४९) इति स्वरः, उपसर्गत्वात् णत्वञ्च सिद्ध्यति ।**

प्रादय इति योगविभागस्तु क्रियायोगाभावेऽपि निपातत्वाय । एतत्सिद्धमेवोपसर्गप्रति-रूपकस्य निपातत्वमुक्तं चाद्यन्तर्गणसूत्रेणेति दिक् ।

प्रपरेत्यादावनुकार्यानुकरणयोरभेदविवक्षया सुब्नुत्पत्तिः ।

निस्दुसिति । **अत्रेदं बोध्यम्—सान्तग्रहणे रान्तस्याग्रहणमेव । यत्र तु रुत्वमसिद्धं**

तेन 'विसेचकः' इत्यत्र गमधात्वर्थक्रियां प्रति योगेन वेरुपसर्गस्य तां प्रत्येव उपसर्गत्वम्, नतु सिच्-धात्वर्थक्रियां प्रति, इति न 'उपसर्गात् सुनोतिसुवति' इत्यादिना षत्वम् ॥

गतिश्च ॥ चकार उपसर्गसंज्ञासमावेशार्थः, अन्यथा आकडारीयसंज्ञासु एकस्या एव सम्भवात् विकल्पापत्तौ कदाचित् उपसर्गसंज्ञा न स्यात् । तथा च 'अभिषावकः' इत्यादौ षत्वं विकल्पेन स्यात् । तेन = समावेशार्थकचकारकरणेन । 'प्रतिप्रणीतमन्त्रस्वरः' 'उपसर्गादसमासेऽपि' इत्यनेन णत्वञ्च सिध्यतः । प्रतिप्रणीतमित्येतद्घटके प्रशब्दे गति-संज्ञोपसर्गसंज्ञे समाविशतः । प्रतिशब्दोपादानं लक्ष्ये 'गतिरनन्तरः' इति सूत्रस्य व्यावर्त्य-स्थले प्रदर्शयितुं कृतम् । अथवा लौकिकस्य वैदिकस्य वा प्रयोगस्थस्यानुकरणम् ॥

प्रादयः·····निपातत्वाय इति । तेन प्रगत आचार्यः प्राचार्य इत्यत्र अव्ययपूर्वपद-प्रकृतिस्वरः सिध्यति । न चास्य उपसर्गप्रतिरूपकतया चाद्यन्तर्गणत्वेन निपातसंज्ञायाम् अव्ययसंज्ञा स्यात्, किमनेन योगविभागेन ? अत आह—**एतत्सिद्धमिति ।** योगविभाग-मूलक एव तत्र एषामुपसर्गप्रतिरूपकाणां पाठः । **अभेदविवक्षया** इति । अभेदविवक्षापक्षे

'गतिश्च' इति ॥ इसमें चकार उपसर्गसंज्ञा-समावेशार्थ है । समावेश से 'प्रतिप्रणीतम्' गति को प्रकृतिस्वर एवं 'उपसर्गादसमासेऽपि' इससे णत्व की सिद्धि हुई ।

प्रादय इति । क्रियायोग के अभाव में भी निपातसंज्ञा विधान के लिये योगविभाग किया है । इसी अभिप्राय से चादि के अन्तर्गणसूत्र से उपसर्गप्रतिरूपक को 'निपात' कहा गया है । अनुकार्य और अनुकरण की अभेदविवक्षा करने से प्र, परा—इत्यादि स्थल में विभक्ति को उत्पत्ति नहीं हुई ।

निस् दुस् इति । निस् और दुस् के ग्रहण से निर् तथा दुर् का ग्रहण नहीं होता । जैसे—'निसस्तपतावनासेवने' यहाँ सान्त से रान्त का, 'निरः कुषः' यहाँ रेफान्त से सान्त का संग्रह नहीं हुआ । निस् और दुस् के सकार को रुत्व से रेफान्त होने पर, 'निरः कुषः' 'सुदुरोरधिकरणे' इन सूत्रों में निर् और दुर् से इनका ग्रहण नहीं होता; क्योंकि उक्त सूत्रों की दृष्टि में रुत्व के असिद्ध हो जाने से रेफान्तत्व नहीं है । और जहाँ रुत्व सिद्ध है, जैसे 'दुरः षत्वणत्वयोरुपसर्गत्व-प्रतिषेधः' इसके द्वारा षत्व और णत्व विधि में दुर् के उपसर्गत्व का प्रतिषेध किया है । इसकी

तत्र रान्तग्रहणेऽपि न सान्तग्रहणम्; तद्दृष्ट्या रुत्वस्यासिद्धत्वात्। यत्र तु रुत्वस्य सिद्धत्वं यथा षत्वणत्वयोस्तद्विषयोपसर्गत्वप्रतिषेधपरे 'दुरः षत्वणत्वयोः' (का० वा०) इति वार्त्तिके कृतरेफसान्तस्यापि ग्रहणम्; 'षत्वणत्वयोः'इत्यस्य तद्विधायकशास्त्रयोरित्यर्थात्।

अत एव सुषामादिषु दुःष्ठुशब्दपाठः सार्थकः। स हि 'अपदुःसुषु स्थः कुः' (उ० सू० २५) इति दुस्पूर्वकस्थाधातोः कुप्रत्यये साधुः। अन्यथा दुस्पूर्वकात् कुप्रत्यये 'उपसर्गात्' (८ । ३ । ६५) इत्येव षत्वे सिद्धे तद्वैयर्थ्यं स्पष्टमेव। न चास्य रूढत्वेनावयवार्थाभावादुपसर्गत्वाभावः; अत्यन्तरूढेषु प्रतिष्ठा-निष्ठादिषु षत्वानापत्तेः। अर्थवत्त्वारोपेण चेत्, प्रकृतेऽपि।

दुसः पाठस्तु 'दुरयते' इत्यादौ रुत्वासिद्ध्या लत्वाभावार्थं इति दिक्॥

सादृश्याद् अनुकरणेन अनुकार्यस्योपस्थितौ वृत्त्या अनुपस्थितत्वाद् अर्थवत्त्वाभावेन 'अर्थवत्'सूत्राप्रवृत्तौ प्रातिपदिकसंज्ञाविरहेण विभक्तेरनुत्पाद इति भावः।

सान्तग्रहणे इति। सान्तनिसो ग्रहणं यथा "निसस्तपतावनासेवने" इत्यत्र रेफान्तस्य न ग्रहणम्; स्वरूपभेदात्। **यत्र तु इति**। यस्मिन् शास्त्रे प्रवर्तयितव्ये रुत्वमसिद्धं तत्र सान्तस्य निसः रान्तग्रहणेन न ग्रहणम्; रुत्वस्य असिद्धत्वेन सान्तत्वेन निर इति स्वरूपाभावात्। यथा 'निरः कुषः' इत्यस्य दृष्ट्या रुत्वस्य असिद्धत्वेन निस्पूर्वककुष्धातोः परस्य बलाद्यार्धधातुकस्य विकल्पेन इट् न भवति। यत्र तु रुत्वं सिद्धं तत्र रान्तग्रहणेन सान्तस्यापि ग्रहणं भवत्येव। यथा 'दुरः षत्व' इत्यादिना मूले एव स्पष्टम्।

कृतरुत्वस्यापि दुसो ग्रहणे प्रमाणमाह—**अत एवेति**। सान्तस्यापि दुषो रुत्वे कृति रान्तत्वेन ग्रहणादेव इत्यर्थः। सुषामादिगणे दुष्ठुशब्दस्य पाठश्चरितार्थः। दुर्पूर्वकात् स्थाधातोः कुप्रत्यये 'दुरः षत्वणत्वयोः' इति उपसर्गत्वप्रतिषेधात् सत्वाप्राप्त्या सुषामादिगणे तस्य पाठः षत्वार्थं कृतः। यदि दुर्शब्देन कृतरुत्वस्य दुरो ग्रहणं न स्यात् तदा दुस्पूर्वकात् स्थाधातोः कुप्रत्ययेन निष्पन्ने दुष्ठुशब्दे दुरः षत्वेति वार्त्तिकाप्राप्त्या उपसर्गत्वस्य सत्त्वेन 'उपसर्गात् सुनोति' इत्यनेनैव षत्वे सिद्धे सुषामादिगणे दुष्टशब्दपाठस्य वैयर्थ्यं स्यात्। न च अस्य शब्दस्य रूढत्वेन अवयवस्य क्रियाद्योतकत्वविरहेण क्रियायोगस्य

दृष्टि में रुत्व असिद्ध नहीं है, वहाँ सान्त रान्त दोनों का ग्रहण इष्ट है। "दुरः षत्वणत्वयोः" यह वार्तिक षत्व-णत्वविधायक सूत्र से सम्बद्ध है। अतः यह तत्सूत्रस्थ वार्तिक होने से रुत्वपूर्वक त्रिपादी होने के कारण असिद्ध नहीं हुआ।

वार्तिक में कृतरेफान्त दुर् का भी ग्रहण है, इसीलिये सुषामादिगण में 'दुष्ठु' शब्द का पाठ चरितार्थ होता है। सुपूर्वक स्था धातु से कु प्रत्यय एवं षत्व-ष्टुत्व से उक्त रूप की सिद्धि होती है। 'दुरः षत्वणत्वयोः' इससे उपसर्गत्व के प्रतिषेध के कारण 'सुषामादिषु च' इससे षत्व का विधान किया है। यदि दुर् से सान्त दुस् का वार्तिक में ग्रहण न होता तो दुस्पूर्वक स्था धातु से कुप्रत्यय एवं 'उपसर्गात् सुनोतिसुवति' इत्यादि से षत्व के द्वारा उक्त प्रयोग की निष्पत्ति हो जाने से सुषमादिगण में उस का पाठ व्यर्थ हो जायगा।

२४. न वेति विभाषा । १ । १ । ४४ ॥ **निषेध-विकल्पयोर्विभाषा संज्ञा स्यात् ॥**

न वेति । (१ । १ । ४४) । इतिर्लोकेऽर्थपदार्थकस्य शब्दपदार्थकत्वकृत् । यथा 'गवित्ययमाह' इत्यादावनुकरणे । इह तु 'स्वं रूपम्' (१ । १ । ६८) इति परिभाषणाच्छब्दपदार्थकस्यार्थपदार्थकत्वकृत् । क्वचित् पदार्थविपर्यासकत्वम्, यथाऽनुवादवाक्ये ।

स च नवाशब्दाभ्यां प्रत्येकं सम्बध्यते; व्याख्यानात् । तेन न-वाशब्दयोरर्थौ संज्ञिनौ ।

असत्त्वेन उपसर्गसंज्ञा न स्यात् । तथा च षत्वाप्राप्त्या तत्पाठः तस्मिन्गणे चरितार्थः इति नाशङ्कनीयम्,'प्रतिष्ठा' 'निष्ठा'इत्यादिशब्देषु अत्यन्तरूढेषु अवयवार्थाभावेन उपसर्गसंज्ञाविरहात् षत्वं न स्यात् । तदर्थम् अवयवेषु अर्थस्य आरोपात् क्रियायोग उपपादनीयः । अत्रापि अवयवेषु तथैव अर्थमारोप्य क्रियायोगो बोध्य इति भावः । 'अल्पाच्तरम्' इत्यनेन निष्ठाशब्दे अचामल्पत्वात् तस्य पूर्वनिपातापत्तिस्तु न, अभ्यर्हितत्वेन प्रतिष्ठाशब्दस्य पूर्वं प्रयोगात् ।

ननु तथापि दुरःपूर्वकात् स्थाधातोः कुप्रत्यये दुरः उपसर्गत्वप्रतिषेधेन उपसर्गनिमित्तकस्य सत्वस्याप्राप्त्या सुषामादिगणे तत्पाठश्चरितार्थ इति चेत् ? मैवम्; अपसुदुःषुस्थः इति न्यासे 'रोःसुपि' इति नियमात् सप्तमीबहुवचने रु-सम्बन्धिरेफस्यैव विसर्गस्य लाभेन सान्तस्य दुस एव ग्रहणं तत्र स्यात् । ततोऽग्रे रेफस्य रुसम्बन्धित्वाभावेन विसर्गानापत्या सूत्रे विसर्गनिर्देशस्य अयुक्तताऽपत्तेः न रान्तस्य दुरो ग्रहणमिति **विषमो ।**

न च 'निरः कुषः' 'सुदुरोरधिकरणे', 'निसस्तपतावनासेवने' इत्यादिनिर्देशात् त्रयाणां निर् दुर् निसां फलवत्त्वेऽपि दुसः किं प्रयोजनम् ? अत आह—**दुसः पाठस्तु इति ।** दुरयते इत्यादौ रुत्वासिद्धया सान्तत्वेन रान्तत्वाभावात् 'उपसर्गस्यायतौ' इत्येन लत्वं न ॥

न वेति विभाषा ॥ घटः पटः इत्यादौ घटपटादिपदात् घटपटादिशब्दप्रकारकघटपटाद्यर्थविशेष्यकोपस्थितिर्लोके भवति । शास्त्रे तु तत एव च घटाद्यर्थप्रकारक-

---

शङ्का—रूढ़ होने से अवयवार्थ नहीं है, अतः क्रियायोगाभाव से उपसर्गसंज्ञा न होने से "उपसर्गात् सुनोति" इससे षत्व की प्राप्ति नहीं है ?

समाधान—रूढ़ शब्दों में भी अवयवार्थ की कल्पना होती है । अन्यथा प्रतिष्ठा, निष्ठा आदि रूढ़ शब्दों में भी षत्व नहीं होगा । आरोपित अर्थवत्त्व दोनों स्थानों में समान है । लत्व की दृष्टि में रुत्व के असिद्ध होने से दुस्पूर्वक अय् धातु से निष्पन्न 'दुरयते' इस प्रयोग में 'उपसर्गस्यायतौ' इससे लत्व नहीं हुआ । इसी लिये प्रादिगण में दुस् शब्द का पाठ है । अन्यथा 'दुरयते' ऐसा प्रयोग नहीं होता ॥

नवेति विभाषा इति । इति-शब्द अर्थ का विपर्यास करता है । लोक में गो शब्द से आनुपूर्वी के साथ प्रधान रूप से गो व्यक्ति की उपस्थिति होती है । किन्तु 'गो इति अयमाह' इस वाक्यघटक गो पद से इति शब्द के समभिव्याहार से अर्थ का प्रकार तथा गो शब्द की प्राधा-

'स्वं रूपम्'इत्यस्य प्रत्याख्याने तु इतिशब्दो व्यर्थ एव; अर्थे कार्यस्याबाधात् । तयोरेव संज्ञित्वे तु 'विभाषा श्वेः' (६ । १ । ३०) इत्यादौ न-वाशब्दावादेशौ स्याताम् ।

शब्दविशेष्यकोपस्थितिर्जायते । अत एव "अग्नेर्ढक्" इत्यादौ 'अग्न्यर्थवाचकाग्निशब्दात् ढक्' इत्याद्यर्थो लभ्यते । तत्रैव इति-शब्दसमभिव्याहारे तु लोके अर्थप्रकारिका, शास्त्रे शब्दप्रकारिका उपस्थितिः जायते । प्रकारताविशेष्यतयोर्विपर्यासो भवति, न पदार्थयोः विपर्यासः; शब्दार्थयोः द्वयोरपि लोके शास्त्रे च अवगम्यमानत्वात् । तदाह—**इतिहि इति** । अर्थपदार्थकस्य = अर्थविशेष्यकोपस्थितिजनकस्य शब्दपदार्थकत्वकृत् = शब्दार्थ-विशेष्यकोपस्थितिजनकत्वकृत् । इह तु = व्याकरणे तु । दाहजनकात् अग्निरूपार्थात् ढक् न कर्तुं शक्यते । अतः 'स्वं रूपम्' इति सूत्रबलात् शब्दस्य प्राधान्येन अन्वयात् अर्थवाचकाद् अग्निशब्दात् ढगित्यर्थो न, दोषाभावात् । **प्रकृते चेति** समभिव्याहारात अर्थस्य प्राधान्यं गृहीतं न शब्दस्य । तथा च नवा-शब्दयोरर्थौ निषेधविकल्पौ विभाषा-संज्ञकौ क्रियेते । एवञ्च यत्र विभाषापदं श्रूयते तत्र निषेधस्य विकल्पस्य च प्रतीति-र्बोध्येति भावः ।

'गामानय' इत्यादौ गोरूपार्थविशेष्यकोपस्थित्या अर्थविशेष्यको बोधो जायते । परं 'गो इति अयमाह' इत्यत्र इतिशब्दसमभिव्याहारात् गोशब्दविशेष्यकाऽर्थप्रकारको-पस्थित्या गोशब्दविशेष्यको बोधः । क्वचित् = अनुवादवाक्ये । यथा "आः किमेत-दिति क्रोधाद् आभाष्य महिषासुरः" इति दुर्गासप्तशतीश्लोके । हेत्वर्थके इतिशब्देऽपि पदार्थविपर्यासकत्वं न । यथा—हन्तीति पलायते । पलायनस्य कारणं हननम् इतिशब्देन प्रतीयते । स च = इति शब्दश्च । नवा-शब्दयोः द्वन्द्वे कृते" द्वन्द्वान्ते द्वन्द्वादौ वा श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते" इति न्यायात् इतिशब्दस्य प्रत्येकं सम्बन्धात् नेति वेति चेति गम्यते । व्याख्यानात् = उक्तन्यायरूपात् । तेन = पूर्वोक्तन्यायेन । अर्थौ = निषेध-विकल्परूपौ ।

न्येन उपस्थिति मानी जाती है । तदनुसार 'नवा' इस शब्द से 'स्वं रूपम्' इसके द्वारा आनुपूर्वी का प्राधान्य से बोध प्राप्त था; किन्तु अर्थविपर्यासक 'इति' शब्द के सम्बन्ध से 'नवा' शब्द निषेध-विकल्प रूप अर्थ का बोधक होता है । अनुवाद-वाक्यों में 'इति' शब्द से अर्थ का विपर्यास नहीं होता । यथा "इति हेतुस्तदुद्भवे" इस काव्यप्रकाश के वचन में देखा जाता है । 'इति' शब्द का प्रत्येक के साथ सम्बन्ध होने से 'न' और 'वा' के अर्थों की विभाषा संज्ञा होती है । निषे-धार्थक 'नवा' समुदाय के साथ 'इति' का सम्बन्ध करने पर प्रदेश में निषेधबोधार्थ विभाषापद की अपेक्षा 'न' पद का निर्देश करने में लाघव होने से संज्ञाकरण का वैयर्थ्यरूप व्याख्यान प्रत्येक के साथ अन्वय में प्रमाण है । "स्वं रूपम्" इसके प्रत्याख्यान-पक्ष में इति-शब्दोपादान अनावश्यक है । अर्थ में कार्य का बोध होने पर ही अर्थ शब्द में विशेषण होता है । जैसे "अग्नेर्ढक्" यहाँ ढक् प्रत्यय अग्नि अर्थ के अनन्तर नहीं हो सकता । अतः तदर्थवाचक अग्नि पद का ग्रहण किया गया । प्रकृत में अर्थ की संज्ञा बाधित न होने से अर्थ के प्राधान्य का त्याग नहीं होगा । 'नवा' शब्द की विभाषा संज्ञा होने पर "विभाषा श्वेः" इस सूत्र में 'विभाषा' पद से उपस्थित 'नवा' शब्द का आदेश रूप से विधान हो जायगा ।

प्राप्तविभाषासु नास्योपयोगः; तासां पक्षे निवृत्तिमात्रफलकत्वात्। अप्राप्तविभाषा-स्वपि न; तासां पक्षे विधिमात्रार्थत्वात्, अप्राप्तत्वेन निषेधासम्भवाच्च। तस्मादुभयत्र-विभाषार्थमिदम्।

भाष्यकृता स्वं रूपमिति सूत्रस्य प्रत्याख्यानात् यत्रार्थे कार्यस्य बाधः, यथा "अग्नेर्ढक्" इत्यादौ दाहकादग्नेर्ढक्प्रत्ययस्य कर्तुमशक्यत्वात् तद्वाचकोऽग्निशब्दो गृह्यते। अत्र सूत्रे तु अर्थे कार्यस्य बाधाभावेन निषेधविकल्पयोरुभयोः संज्ञाया इतिशब्दं विनापि सिद्धतया इतिशब्दोपादानं सूत्रे नावश्यकम्। तयोरेव = नवाशब्दयोरेव। नवाशब्दौ = पर्यायेण एकदैव वा नवा-शब्दौ आदेशौ स्याताम्।

विभाषापदस्य भावसमानाधिकरणे अभावे अभावसमानाधिकरणे भावे च शक्तिः। तथाच नित्ये प्राप्ते यत्र विकल्पेन तस्य विधानं तत्र भावस्य सिद्धतया भाव-समानाधिकरणाभावमुखेन विभाषापदात् प्रतीतिः। यत्र तु अप्राप्ते एव विधौ विकल्पेन विधानं तत्र अभावस्य सिद्धतया अभावसमानाधिकरणभावमुखेन विभाषापदाद् उपस्थितिरिति उभयत्रापि स्थले 'नवेति' सूत्रस्य नोपयोगः। प्राप्तविभाषास्थले भावस्य अर्थात् कार्यस्य सिद्धतया पक्षे तदभावबोधनस्य विवक्षिततया तस्य विभाषापदेन बोधनाद् रूपद्वयस्य सिद्धत्वात्। यत्र तु कार्यं न प्राप्तं तत्र अभावस्य प्राप्ततया तत्सामाना-धिकरण्येन कार्यस्य विधेयस्य सद्भावो बोध्यते। तेन भावाभावयोः समावेशः सिद्धः। तथाच सूत्रस्य एतदर्थं न प्रयोजनम्; सूत्रं विनापि भावाभावान्यतरमुखेनोपस्थित्या उभयविधप्रयोगस्य निष्पादात्।

प्राप्ताप्राप्तविभाषासु अस्य सूत्रस्य प्रयोजनम्। तथाहि—एकेन पदेन एकदा एकरूपेणैव उपस्थितिः कर्तुं शक्या, न तु भिन्नभिन्नरूपेण-भावसमानाधिकरणाभावमुखेन अभावसमानाधिकरणभावमुखेन च। तथाच एकतरमुखेन उपस्थितौ कार्यस्य प्राप्तिस्थले

प्राप्तविभाषासु इति। विभाषा पद की शक्ति भावसमानाधिकरण अभाव तथा अभाव-समानाधिकरण भाव में है। "सकृदुच्चरितः शब्दः सकृदेव अर्थं गमयति" इस न्याय के अनुसार पूर्वोक्त अर्थों में एक अर्थ का ही एकत्र बोध होगा। अतः अप्राप्तविभाषा और प्राप्तविभाषा में इस सूत्र का उपयोग नहीं है; क्योंकि अप्राप्तविभाषा जैसे—"विभाषोर्णोः" इस सूत्र से अप्राप्त ङित्व का 'ऊर्णुनुविथ' इस में विधान होता है। यहाँ विभाषा-पद से अभाव के साथ केवल भाव अर्थात् ङित्व के विधान में तात्पर्य होने के कारण भावसमानाधिकरण अभाव की उपस्थिति "नवेति" सूत्र के बिना ही सिद्ध है; एवं प्राप्तविभाषा जैसे—"दिवस्तदर्थस्य" इससे प्राप्त षष्ठी का विकल्प से विधायक "विभाषोपसर्गे" इस सूत्र में है। यहाँ विभाषा पद से प्राप्त षष्ठीरूप भाव के साथ षष्ठी के अभाव में तात्पर्य होने से भावसमानाधिकरण अभाव मुख से उपस्थिति सूत्र के बिना ही सिद्ध हो जाती है। अतः इन स्थलों में सूत्र अनावश्यक है।

इस सूत्र का प्रयोजन उभयत्रविभाषा स्थल में है। जैसे—"विभाषा श्वेः" इससे विहित सम्प्रसारण 'शुशाव' इसमें अकित् रहने के कारण किसी से सम्प्रसारण प्राप्त नहीं है। 'शुशुवतुः' यहाँ कित् होने से "वचिस्वपि" इससे सम्प्रसारण प्राप्त है। अतः प्राप्त सम्प्रसारण और अप्राप्त सम्प्रसारण के होने से यहाँ प्राप्ताप्राप्त विभाषा (उभयत्रविभाषा) मानी जाती है।

'विभाषा श्वेः' (६ । १ । ३०) इत्यादौ एतदभावे यदि विधिमुखेन प्रवृत्तिस्तर्हि पित्स्वेव विकल्पः स्यात् । कित्सु तु नित्यमेव सम्प्रसारणं स्यात् । निषेधमुखेन प्रवृत्तौ

अभावस्य बोधनेऽपि, अप्राप्तिस्थले भावसमानाधिकरणाभावमुखेन उपस्थितेः । एवम् अभावसमानाधिकरणभावमुखेन उपस्थितेः प्राप्तिस्थले उपयोगाभावात् उभयविधस्य प्रयोगस्य असिद्धिप्रसङ्गात् । सूत्रे कृते तु विभाषापदघटिते सूत्रे नवेति सूत्रेण पूर्वं नेत्युपतिष्ठते । तथा च सूत्रप्राप्तो विधिर्निषिद्धः । ततश्च निषेधेन, प्राप्तिस्थले अप्राप्तिस्थले चोभयत्र विधेयस्य अप्राप्तत्वेन समीकृते लक्ष्ये तादृशे अभावसमानाधिकरणभावमुखेन विभाषापदाद् एकरूपेणैव वाशब्दार्थस्य विकल्पस्योपस्थित्या पक्षे भावः, पक्षे तदभावश्च सिद्धौ ।

उदाहरणमुखेन अयमेवार्थः स्फुटीक्रियते—

"विभाषोर्णोः" इत्यनेन ऊर्णोतिः परस्य पित्सार्वधातुकस्य वृद्धिर्विधीयते विकल्पेन । यथा ऊर्णोति, ऊर्णौति । अत्र 'उतो वृद्धिर्लुकि हलि' इत्यनेन नित्यवृद्धौ प्राप्तायां तेन विभाषावृद्धिर्विहिता । अतोऽत्र विभाषापदेन भावसमानाधिकरणाभावमुखेन बोधात् उभयरूपस्य सिद्धतया 'नवेति' सूत्रमनावश्यकम् । प्राप्तस्य विकल्पनादियं प्राप्तविभाषा । 'विभाषोपमाने" इत्यनेन यमः परस्य सिचः कित्त्वं भवति । यथा उपायत, उपायंस्त इति । अत्र कित्त्वं केनापि सूत्रेण न प्राप्तमिति अप्राप्तस्य कित्वस्य विकल्पेन विधानात् अप्राप्तविभाषेत्युच्यते । अत्र अभावसमानाधिकरणभावमुखेन विभाषापदाद् उपस्थित्या रूपद्वयस्य निष्पत्त्या एतदर्थमपि सूत्रमिदं नावश्यकम् । प्राप्ताप्राप्तरूपोभयत्रविभाषास्थले—"विभाषा श्वेः" इत्यनेन श्वयतेः सम्प्रसारणं विकल्पेन विधीयते । किति लिटि शुशुवतुरित्यत्र "वचिस्वपि" इत्यनेन नित्ये सम्प्रसारणे प्राप्ते, शुशाव इत्यत्र पिति लिटि अप्राप्ते एव सम्प्रसारणे "विभाषा श्वेः" इत्यनेन विकल्पेन विधीयते । इदम् 'उभयत्र विभाषा' इत्युच्यते । 'सकृदुच्चरित' इति न्यायेन विभाषापदाद् एकमुखेन उपस्थितिः स्यात्, नोभयमुखेन । तथाच भावसमानाधिकरणाभावमुखेन बोधे शुशाव इत्यत्र न स्यात् । सम्प्रसारणाभावस्य स्वतः सिद्धत्वेन तस्य विधानासम्भावात् । अभावसमानाधिकरणभावमुखेन उपस्थितौ "शुशुवतुः" इत्यत्र विकल्पो न स्यात्, भावस्य प्राप्तत्वेन अविधेयत्वात् । विस्तरेण

'विभाषा' पद से "नवेति" इस सूत्र के अभाव में यदि भाव के साथ अभाव का बोध करेंगे तो 'शुशुवतुः' इसकी सिद्धि होने पर भी 'शुभाव' की सिद्धि नहीं होगी, क्योंकि यहाँ अभाव तो सिद्ध ही है । यदि अभाव के साथ भाव को उपस्थिति होगो तो 'शुशुवतुः' यहाँ सम्प्रसारण के प्राप्त होने से भाव का विधान व्यर्थ होगा । भाव और अभाव दोनों प्रकार से एक 'विभाषा' शब्द से वैरूप्य और वाक्यभेद के कारण उपस्थिति नहीं हो सकतो । अतः "नवेति" इस सूत्र का आरम्भ है । इसके आरम्भ करने पर इस सूत्र के द्वारा यथाक्रम निषेध को उपस्थिति उभयत्र-विभाषा-स्थल में होने पर 'श्वि' को सम्प्रसारण नहीं होता—ऐसा "विभाषा श्वेः" इसका अर्थ होगा । इससे कित् अकित् सर्वत्र सम्प्रसारण का अभाव समान रूप से हो जाने पर 'वा' से विकल्प की अभावसमानाधिकरण भावमुख से उपस्थिति होने से उभयरूप की सिद्धि होती है । इस प्रकार यहाँ के लिये सूत्र आवश्यक है ।

कित्स्वेव प्रवर्त्तेत, न पित्सु । उभयथा प्रवृत्तिस्तु वैरूप्याद् वाक्यभेदापत्तेश्चाशक्या ।

संज्ञाकरणे तु श्रुतक्रमानुरोधात् पूर्वं कित्सु निषेधः, ततः किदकिद्रूपे सर्वस्मिन् लिटि ऐकरूप्यं प्रापिते सति पक्षे भवतीत्येकरूपेण विधिमुखेनैव विकल्पः ।

भाष्यकृतस्तु—एवं हि 'हृक्रोरन्यतरस्याम्' (१ । ४ । ५३) इत्यादावनुपपत्तिः;

महाभाष्यादौ निरूपितम् । यत्र कार्यं सिद्धं तत्र भावसमानाधिकरणाभावस्य बोधने तात्पर्यम् । यत्र तु कार्यस्याभावः सिद्धः, तत्र अभावसमानाधिकरणभावबोधने तात्पर्यम् विभाषापदस्य इति भावः ।

निवृत्तिमात्रफलकत्वात् = भावस्य कार्यरूपस्य सिद्धत्वात् तद्विधाने फलाभावात् । **विधिमात्रार्थत्वादिति** । अभावस्य पूर्वतः सिद्धत्वात् । उभयथा = विधिमुखेन क्वचित्, निषेधमुखेन च क्वचित् । **वैरूप्यात्** इति । एकेन वाक्येन भिन्नरूपयोर्विधिनिषेधयोः कर्तुमशक्यत्वात् विधेयभेदात् वाक्यभेदकल्पनायां तु वाक्यभेद एव दोषः । **श्रुतक्रमानुरोधात्** इति । ननु शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात् एकस्य बोधानन्तरं द्वितीयस्यार्थस्य बोध इति वक्तुमशक्यमिति न शङ्क्यम्, शब्दात् सहैव बोधे जाते श्रोतॄणां शाब्दबोधान्तरकालिकः बोधक्रमो विवक्षित इत्यदोषात् । एकरूपेण = लिट्त्वरूपेण । नतु कित्त्वपित्त्वोभयरूपेण । **विधिमुखेन** इति । निषेधेन सर्वत्र सम्प्रसारणाभावात् अभावस्य सिद्धतया तत्सामानाधिकरण्येन भावमात्रबोधने तात्पर्यमित्यलम् ।

ननु यथा उभयत्रविभाषास्थलेषु उभयमुखेन प्रवृत्तेरसम्भवात् 'नवेति' सूत्रमावश्यकम्, तथा अन्यतरस्यां-वा-प्राचामित्यादिपदघटितेष्वपि प्राप्ताप्राप्तविधायकसूत्रेषु उभयमुखेन प्रवृत्तेरभावात् एकरूपेण प्रवृत्तौ अपररूपेण संगृह्यमाणस्य संग्रहो न स्यात् । उभयमुखेन सूत्रोपस्थितिस्तु पूर्ववदेव दुःशका । यथा "हृक्रोरन्यतरस्याम्" इत्यनेन अभ्यवपूर्वकहृधातोः भक्षणार्थकतया 'गतिबुद्धिप्रत्यवसान' इति सूत्रेण प्राप्तायां कर्मसंज्ञायामेव विकल्पेन तद्विधानात्, हारयति कटं भृत्यमित्यत्र अप्राप्तायामेव कर्मसंज्ञायां कर्मसंज्ञाया विधानात् उभयत्र विभाषेयम् । उभयत्रविभाषास्थल इव अत्रापि उभयमुखेन प्रवृत्तेवर्क्तुमशक्यतया पृथक् पृथग्रूपेणोपस्थितौ वाक्यभेदो वैरूप्यञ्च आपतेत । उपायान्तराभावात् तत्र वाक्यभेदो वैरूप्यञ्चाभ्युपेत्य उभयमुखेन प्रवृत्तिर्वाच्या । गौरवं सोढव्यमेव । एवमेव विभाषापदघटिते शास्त्रेऽपि वाक्यभेदेन उभयमुखेन उपस्थित्या निर्वाहे 'नवेति' इति सूत्रमनावश्यकमिति भाष्यकृतां मतम् ।

भाष्यकार ने लक्ष्यानुरोध से उभयत्रविभाषा-स्थल में भाव और अभाव उभयमुख से प्रवृत्ति मानकर सूत्र का निराकरण किया है । 'अन्यतरस्याम्', 'वा' 'प्राचाम्' आदि शब्दों से उभयमुख से प्रवृत्ति आवश्यक है । अन्यथा "हृक्रोरन्यतरस्याम्" इत्यादि स्थलों में 'विभाषा' पद के अभाव से 'नवेति' सूत्र का विषय न होने के कारण भाव और अभाव दोनों की विधि नहीं हो सकेगी । इसके लिये 'इति' शब्द का 'विभाषा' के साथ भी सम्बन्ध कर विभाषा पदार्थ को संज्ञारूप मानने से "हृक्रोः" इत्यादि स्थल में दोष का निराकरण असङ्गत है; क्योंकि अर्थ का संज्ञारूप से व्यवहार नहीं देखा गया है । 'विभाषा' पदार्थ से आक्षिप्त तद्वाचक शब्दमात्र संज्ञा है—ऐसा

विभाषापदाभावात् । इतिशब्दस्य 'विभाषा' इत्यत्रापि सम्बन्धात् विभाषापदार्थः संज्ञेति तु न युक्तम्, अर्थे संज्ञात्वस्यादृष्टत्वात् । अर्थाक्षिप्तशब्दमात्रं संज्ञेत्यपि न युक्तम्; एकस्यार्थस्य समानफलकानेकसंज्ञाकरणस्य 'अनाकृतिः संज्ञा' इति वृद्धिसंज्ञासूत्रस्थ-भाष्येण तिरस्कारात् । तस्मात्तत्र लक्ष्यानुसारेणैवोभयमुखेन प्रवृत्तिर्वाच्येति विभाषा-

---

व्यक्तिपक्षे प्रतिलक्ष्यं सूत्राणि भिद्यन्ते । तथाच लक्ष्यभेदात् सूत्रभेदस्य सत्त्वात् 'शुशाव' इत्येतल्लक्ष्यसाधकसूत्रस्य अभावसमानाधिकरणाभावरूपविधिमुखेन 'शुशुवतुः' इत्यस्य कृते कल्प्यमानस्य 'विभाषा श्वेः' इति सूत्रस्य भावसमानाधिकरणाभावरूपनिषेध-मुखेन प्रवृत्तिरिति उभयत्रविभाषास्थलेऽपि निर्वाहात् व्यक्तिपक्षे सूत्रमिदं नावश्यकम् । जातिपक्षे तु प्रतिलक्ष्यं सूत्राणां नावृत्तिरिति उभयत्रविभाषास्थले एकस्यैव सूत्रस्य उभयमुखेन प्रवृत्तेरसम्भावात् सूत्रमावश्यकम्–इति कैयटोक्तं न युक्तम् । उक्तरीत्या जाति-व्यक्तिपक्षयोरुभयोरपि पक्षयोः प्रत्याख्यानस्य भाष्यसम्मतत्वात् । अन्यतरस्यां वा-इत्यादिपदघटितेषु सूत्रेषु काऽन्या गतिः । वाक्यभेदेन तत्र उभयमुखेन प्रवृत्तेरेव वक्तव्य-तया विभाषापदघटितेऽपि सूत्रे तथैव स्वीकारेण पक्षद्वयेऽपि सूत्रस्य अनारम्भणीयत्व-मेवेति तात्पर्यम् ।

ननु काकाक्षिगोलकन्यायेन 'इति' शब्दस्य विभाषापदेनापि सम्बन्धात् विभाषा-पदार्थः विभाषापदबोध्यो भावसमानाधिकरणोऽभावः, अभावसमानाधिकरणो भावो वाऽर्थः संज्ञा । तथा च अन्यतरस्यामित्यादिपदबोध्यस्य अभावसमानाधिकरणेत्याद्यर्थस्य विभाषापदार्थतया तस्यापि संज्ञात्वेन उभयविधार्थबोधकत्वेन नानुपपत्तिरिति शङ्कते—**इतिशब्दस्येति** । अर्थः संज्ञा क्वचिदपि न दृश्यते । न च अर्थेन तद्वाचकशब्दस्याध्या-हारेण तस्य संज्ञात्वं स्याद् ? अत आह—**एकस्येति** । अनाकृतिः संज्ञेत्यादिना समान-

---

कहना भी उचित नहीं है; एक ही को समान फल के लिये अनेक संज्ञाओं का तिरस्कार वृद्धिसंज्ञा-सूत्र के भाष्य में 'अनाकृतिः'[1] इसके द्वारा किया गया है ।

"व्यक्तिपक्ष में प्रतिलक्ष्यलक्षण का उपप्लव होने से शिश्वाय इसके लिये अभावसमाना-धिकरणभाव भाव का 'शुशुवतुः' इसमें सम्प्रसारण प्राप्त होने से भावसमानाधिकरण अभाव मुख से 'विभाषा' पद द्वारा उपस्थिति हो जायेगी, 'नवेति' सूत्र व्यर्थ है । जातिपक्ष में एक ही बार वाक्यार्थबोध होने से उभयमुख से बोध नहीं हो सकेगा, अतः सूत्र आवश्यक है"—यह कैयटोक्त पक्ष अनादेय है । उक्त रीति से दोनों पक्षों में सूत्र का प्रत्याख्यान किया गया है; क्योंकि 'अन्यतर-स्याम्' इत्यादि से उभयविध प्रवृत्ति के लिये "नवेति" सूत्र असमर्थ है । वहाँ लक्ष्यानुसार ही भाव और अभाव—दोनों रूप से उपस्थिति स्वीकार करनी पड़ेगी । तदनुसार विभाषा-स्थल में भी प्रवृत्ति हो जाने से सूत्र जाति, व्यक्ति—दोनों पक्षों में अनावश्यक है । यह संक्षिप्त ग्रन्थकार का तात्पर्य है ॥

---

१. अनाकृतिः—'न आकृतिर्जातिर्यस्य' इस प्रकार बहुव्रीहि है । आकृति अनेकव्यक्तिवृत्ति होती है । अतः आकृतिपद साहचर्य से भेदवान् का लक्षक है । इस प्रकार संज्ञा में एकत्व और संज्ञी में अनेकत्व सिद्ध होता है ।

२५. स्वं रूपं शब्दस्याशब्दसंज्ञा । १ । १ । ६८ । **शब्दस्य स्वं रूपं संज्ञि, शब्दशास्त्रे या संज्ञा तां विना ।**

पदघटितेऽपि तथैवास्तु, किं सूत्रेण–इति जातिव्यक्तिपक्षयोरुभयोरपि सूत्रं प्रत्याचख्युः ॥

स्वं रूपं शब्द० (१ । १ । २८) ॥ **स्वं रूपमित्यस्य बोध्यमिति शेषो व्याख्यानात्; तदाह—**संज्ञीति । **'राज्ञो यत्' इत्यादौ लौकिकव्युत्पत्त्योपस्थितार्थस्य प्रत्यये पौर्वापर्या-सम्भवात् प्रातिपदिकादित्यनेनान्वयासम्भवाच्च तदर्थकशब्दमात्रग्रहणापत्तौ नियमार्थं सूत्रम् । तत्र स्वशब्द आत्मीयत्वेनार्थमाह । रूपशब्देन शब्दस्वरूपम् । एतदुभयं संज्ञीत्यर्थः । तत्रार्थो न विशेष्यः; उक्तयुक्तेः । किन्तु शब्दविशेषणम् । एवञ्च, अर्थविशिष्टः**

प्रयोजनकस्य एकस्य अनेकसंज्ञाकरणस्य भाष्ये तिरस्कृतत्वात् । अनाकृतिः = अभिन्ना एका इत्यर्थः । तस्मात् = अन्यथा अनुपपत्तेरनुद्धारात् । तत्र='हृक्रोरन्यतरस्याम्' इत्यादौ । उभयमुखेन = वाक्यभेदादिदोषमङ्गीकृत्य विधिनिषेधोभयमुखेन । सूत्रेण = नवेति सूत्रेण ॥

स्वं रूपम् इति ॥ इदं सूत्रं न संज्ञाविधायकम्; समानविभक्त्याऽत्र संज्ञासंज्ञिनोः अनिर्देशात् । न आगमविधायकत्वम्, आगमलिङ्गस्य टित् किदादेरनुपलम्भात् । अत आह—**बोध्यमिति** । इदमध्याह्रियते इत्यर्थः । 'राजश्वशुराद् यत्' इत्यादौ राजादि-पदादुपस्थितस्य मांसपिण्डात्मकराजपदार्थस्य उत्पाद्यमानेन यत्प्रत्ययेन सह पौर्वापर्या-सम्भवात्, अनुवृत्तप्रातिपदिकपदस्य शब्दात्मकतया अर्थेन सहाभेदान्वयासम्भवाच्च सूत्रारम्भसामर्थ्यात् बहुलक्ष्यसंस्कारानुरोधेन च तदर्थवाचकस्य शब्दमात्रस्य ग्रहणं प्राप्नोति । ततश्च राजपर्यायवाचकभूपति-नृपतिपदादिभ्योऽपि यत्प्रत्ययो दुर्वारः स्यात् । अतो नियमार्थं सूत्रम् । अर्थे कार्यस्य बाधे उपात्तशब्दबोध्यार्थबोधकपदमात्रस्य ग्रहणप्रसङ्गे तादृशार्थबोधकस्य सूत्रे उपात्तशब्दस्यैव ग्रहणमनेन सूत्रेण बोध्यते, तेन अन्य-व्यावृत्त्या नियमः फलति । शब्दतो नियमार्थता न, किन्तु नियमोऽर्थतः फलितः ।

तदर्थवाचकः = राजार्थवाचकः । मात्रशब्दः साकल्यार्थे । अत्र = 'स्वंरूपम्' इति सूत्रे । तत्र = प्रकृतसूत्रे । तत्रार्थे=तयोर्मध्ये अर्थे । उक्तयुक्तेः = असम्भवरूपयुक्तेः । **शब्द-विशेषणम्** इति । शब्दस्य विशेषणमित्यर्थः । विशेषणशब्दो नित्यनपुंसकलिङ्गः । एवञ्च= तस्य तद्विशेषणत्वे च ।

स्वं रूपम् इति ॥ 'शब्द की रूप संज्ञा है' इत्यादि अर्थ विवक्षित नहीं है; क्योंकि संज्ञासंज्ञि-भाव-स्थल में समानविभक्ति पद से निर्देश देखा जाता है । यहाँ 'शब्दस्य' और 'रूपम्' इन दोनों का भिन्न विभक्ति से निर्देश है । अतः 'बोध्यम्' के अध्याहार द्वारा परममूल में अर्थ किया गया । 'रूप्यते बोध्यते अनेन' अर्थात् 'रूप' शब्द से शब्द 'स्व' शब्द से आत्मीय अर्थ का ग्रहण है । इस प्रकार शब्द का अपना अर्थ एवं रूप अर्थात् आनुपूर्वी बोध्य है । शब्द के स्व अर्थात् अर्थ तथा रूप संज्ञी हैं । "व्याकरणशास्त्र की संज्ञाओं में स्वरूप का ग्रहण नहीं होता"—यह सूत्रार्थ है ।

शब्दः संज्ञीत्यर्थवद्ग्रहणपरिभाषा सिद्धा। अत्र चार्थः कल्पितान्वयव्यतिरेककल्पितः प्रकृतिप्रत्ययादिबोध्यः शास्त्रीयोऽपि। स च मुख्यः प्रसिद्धश्चेति गौणमुख्यन्यायः 'अभिव्यक्तपदार्था ये' इति न्यायश्च सिद्धः। अत एवेयं विशिष्टरूपोपादान एव, इदं सूत्रञ्च,

---

अयं भावः—'स्वं रूपम्' इति सूत्रे स्वशब्दः आत्मीयवाची, रूपशब्दः रूप्यते बोध्यते अनेनेति व्युत्पत्त्या शब्दवाची। तथाच राजादिशब्दस्यार्थः। एवम् आनुपूर्वीरूपो यो राजादिशब्दः इत्युभयं संज्ञि वाच्यमित्यर्थः। तयोः पदपदार्थयोर्मध्ये अर्थस्य न प्राधान्यम्, उत्पद्यमानप्रत्ययेन सह पूर्वापरीभावस्य प्रातिपदिकादित्यनेन अभेदान्वयस्य चासम्भवात्। किन्तु शब्दस्य आनुपूर्वीरूपस्य प्राधान्यम्। तथाच अर्थवाचकशब्दस्य ग्रहणे सिद्धे अनर्थकशब्दस्य ग्रहणं व्यावृत्तमिति 'अर्थवद्ग्रहणे नानर्थकस्य' इत्येषा परिभाषा फलिता। 'स्वं रूपम्' इति सूत्रे अर्थशब्देन लौकिकः, तथा 'तस्य सत्त्वे तस्य सत्त्वम्, तस्यासत्त्वे तस्यासत्त्वम्'इत्येवं रूपाभ्याम् अन्वयव्यतिरेकाभ्यां कल्पितः शास्त्रे कल्पितयोः प्रकृतिप्रत्यययोरर्थश्च गृह्येते। स च = लौकिकः शास्त्रीयश्च द्विविधोऽप्यर्थः—मुख्यः, प्रसिद्धश्च ग्राह्यौ। एतन्मूलक एव 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः',

'अभिव्यक्तपदार्थाः ये स्वतन्त्राः लोकविश्रुताः।
शास्त्रार्थस्तेषु कर्तव्यः तदर्थे न तदुक्तिषु॥'

इति च न्यायः। तेन अग्निसदृशे माणवके लक्षणया विवक्षिते 'अग्निसोमौ माणवकौ' इत्यत्र ईत्वषत्वे न भवतः। एवं संज्ञावाचकात् श्वशुरशब्दात् 'राजश्वसुराद् यत्' इत्यनेन यत् प्रत्ययो न, किन्तु इञ् प्रत्ययः, अतः श्वाशुरिरित्येव भवति। अत एव = विशेषणतया अर्थस्योपस्थितत्वादेव।

विशिष्टरूपोपादाने इति। स्ववृत्त्यानुपूर्व्यवच्छिन्नमुख्यविशेष्यता प्रयोजकपदो-

---

सूत्र के उदाहरणस्वरूप "राजश्वशुराद् यत्" को लिया गया है। राजन् शब्द से शक्ति द्वारा राजपदार्थ मांसपिण्ड व्यक्ति की उपस्थिति होती है। इस व्यक्तिरूप अर्थ के साथ यत् प्रत्यय का पूर्वापरीभाव असम्भव है। तथा अनुवर्तमान प्रातिपदिक शब्द का वाच्य धातु भिन्नत्वादिविशिष्ट शब्द स्वरूप के साथ भी राजपदार्थ का अन्वय दुर्लभ होने के कारण सूत्रारम्भ-सामर्थ्य से उपस्थित राज-पदार्थ के वाचक शब्दमात्र का ग्रहण प्राप्त होने पर "स्वं रूपम्" यह सूत्र नियमार्थक है—'शब्द का स्व = अर्थ और रूप = आनुपूर्वी ये ही बोध्य हैं'। इसके द्वारा राजन् शब्द से अतिरिक्त नृपादि पद से यत् प्रत्यय नहीं होता। यह सूत्र का प्रयोजन है।

अर्थ में शास्त्रीय कार्य का बाध होने से 'स्वं रूपं' सूत्र द्वारा बोध्य अर्थ शब्द का विशेषण है। अप्रधान रूप से अर्थात् शब्द के साथ अन्वित होता है। अतः अर्थविशिष्ट का ग्रहण होने से अनर्थक शब्दों का ग्रहण नहीं होता। इसी आधार पर "अर्थवद्ग्रहणे" यह परिभाषा मानी गयी है। परिभाषा में अन्वय-व्यतिरेक से कल्पित प्रकृति प्रत्यय के द्वारा कल्पित वाच्यार्थ एवं लोकसिद्ध दोनों प्रकार के अर्थों का ग्रहण है। प्रसिद्ध और प्रधान इन्हीं दोनों प्रकार के अर्थों का ग्रहण है। अतएव 'गौण और मुख्य के मध्य में मुख्यार्थ का ही ग्रहण होता है—इत्यर्थक गौण-मुख्य परिभाषा तथा अभिव्यक्त स्वतंत्र और लोकविश्रुत पदार्थों के आश्रयण से ही सूत्रों की

तत्रैवार्थोपस्थितेस्तत्रैवानियमप्रसक्तेश्च, न तु वर्णग्रहणे इत्याकरे स्पष्टम् ।

'दाधा घ्व' (१ । १ । २०) इत्यस्य 'ई हल्यघोः' (६ । ४ । ११३) इत्यादौ चारितार्थ्येन 'उपसर्गे घोः' (३ । ३ । ९२) इत्यादौ 'स्वं रूपम्' (१ । १ । ६८) इत्यनेन परत्वाद् बाधशङ्कावारणार्थम् ।

पादाने एव, न्यायद्वयमिदं सूत्रञ्च प्रवर्तते इति भावः । अर्थवाचकपदादेव विशिष्य अर्थस्योपस्थितिर्जायते, नतु वर्णमात्रात् । अतएव वर्णग्रहणे अर्थवत्परिभाषा नोपतिष्ठते ।

ननु 'दाधा ध्वदाप्' इति सूत्रेण विहितायाः घुसंज्ञायाः 'ई हल्यघ्योः'इति सूत्रघटक 'अघोः' पदस्य घुधातुभिन्नार्थकत्वेन अधोरिति पर्युदासस्य व्यावर्त्याभावेन वैयर्थ्यं स्यात् । धुधातोराकारान्तत्वाभावेन स्वतएव उत्वस्य अप्राप्तेः तत्सामर्थ्यात् तत्र न शब्दस्वरूपस्य ग्रहणं प्राप्नोतीति स्वंरूपमिति सूत्रे अशब्दसंज्ञायामिति न कार्यमित्याह—**दाधा घु इति ।** घुसंज्ञाविधायकसूत्रस्य अधोरित्यत्र घुपदेन दाधोर्ग्रहणाय चारितार्थ्येन 'उपसर्गे घोः किः' इत्यत्र घुपदान् स्वंरूपमित्यनेन घुस्वरूपग्रहणे घुधातोर्ग्रहणस्य शङ्का स्यात्, तद्वारणाय सूत्रे अशब्दसंज्ञायामिति उक्तम् । तथोक्ते च व्याकरणशास्त्रीयसंज्ञात्वेन अशब्दसंज्ञायामित्यनेन 'स्वं रूपम् इति सूत्रस्य व्यावृत्त्या स्वरूपस्याग्रहणेन 'दाधा ध्वदाप्' इति सूत्रेण बोधितयोः दाधोर्ग्रहणमुपपन्नम् ।

न च प्रतिपदोक्तत्वात् येन नाप्राप्तिन्यायेन च घुसंज्ञैव स्यात् । अपवादस्थले उत्सर्गापवादयोः समानबलकत्वाभावेन तुल्यबलविरोधस्य असत्त्वात् बाधः—इति कथनं नोचितमिति वाच्यम्; मूले अत एव 'बाधशङ्का' इत्युक्तम् । शङ्का तादृशी, न तु वस्तुस्थितिः ।

प्रवृत्ति होती है । इस अर्थ को ध्यान में रखकर

"अभिव्यक्तपदार्थाः ये स्वतन्त्राः लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्तव्यस्तदर्थे न तदुक्तिषु ॥"

इन दोनों बचनों का प्रचलन है । प्रसिद्ध तथा मुख्य अर्थ का ग्रहण होने से विशिष्ट रूप अर्थात् आनुपूर्व्यवच्छिन्न विषयताप्रयोजक (आनुपूर्वीबोधक) के उपादान में ही 'अर्थवद्ग्रहण' परिभाषा एवं 'स्वं रूपम्' इस सूत्र की प्रवृत्ति होती है; क्योंकि तादृश शब्द से ही अर्थोपस्थिति तथा तदर्थवाचक शब्दमात्र के ग्रहण का प्रसङ्ग है । वर्णबोधक पद के ग्रहण में इनकी प्रवृत्ति नहीं होती ।

सूत्र 'में अशब्दसंज्ञायाम्' काग्र हण करने से "उपसर्गे धोः किः" इत्यादि स्थलों में घुशब्द "स्वं रूपं" शास्त्र के बल से घुरूप आनुपूर्वी का बोधक न होकर 'दाधा' का बोधक होता है । सूत्र में उक्त शब्द का ग्रहण करने पर 'घु' व्याकरण की संज्ञा होने से स्वरूप ग्रहण 'स्वं रूपं' सूत्र से नहीं हुआ ।

शङ्का—घु संज्ञा पद यदि स्वंरूप सूत्र से आनुपूर्वी का बोधक होगा तो "दाधा ध्वदाप्" इससे दाधा को घुसंज्ञा विधान अर्थ हो जायेगा । अतः संज्ञाविधान के सामर्थ्य से दाधा का ही बोध होने से 'अशब्दसंज्ञायाम्' का उपादान व्यर्थ है ?

अशब्दसंज्ञेति। नात्र षष्ठीतत्पुरुषः; कर्मसंज्ञादेरर्थसंज्ञात्वेन निषेधाप्रवृत्तौ 'कर्मण्यण्' (३। २। १) इत्यादौ स्वरूपग्रहणापत्तेः। किन्तु सप्तमीतत्पुरुषः।

शब्दपदेन च शब्दशास्त्रम् तदाह—शब्दशास्त्रे इति।

भाष्ये तु अर्थे कार्यस्य बाधेऽपि उपस्थितत्वात् 'राज्ञः' इत्यादौ तज्जन्यबोधे प्रकारतया भासमानस्य राजन्शब्दस्यैव ग्रहणं भविष्यतीति व्यर्थं सूत्रम्। उपस्थितार्थत्यागे मानाभावेन, तस्य विशेषणतयाऽन्वयसम्भवेन च 'अर्थवत्' (प० १४) परिभाषाऽपि सिद्धा।

'अशब्दसंज्ञा' इत्यत्र 'शब्दस्य संज्ञा' इत्येवं षष्ठीतत्पुरुषः, तदनन्तरं नञ्समासः—इत्येवं न बोध्यम्। किन्तु 'शब्दशास्त्रे व्याकरणे संज्ञा' इति सप्तमीतत्पुरुषः, ततो नञ् समासः। अन्यथा 'शब्दस्य संज्ञा' इत्येवं विवक्षिते 'कर्तुरीप्सिततमम्' इत्यादिना विहिता कर्मसंज्ञा संयोगादिरूपफलाश्रयस्य अर्थस्य भवति, न तु शब्दस्य; तत्र संयोगरूपफलाभावात्। तथा च 'कर्मण्यण्' इत्यादौ कर्मसंज्ञायाः शब्दनिष्ठसंज्ञात्वाभावेन 'असंज्ञायाम्' इत्यनेन व्यावृत्त्यभावे स्वं रूपमिति सूत्रस्याप्रवृत्त्या कर्मशब्दस्वरूपस्य ग्रहणापत्तौ कुम्भकारादिपदानामसिद्धिप्रसङ्गात्।

सूत्रस्य प्रत्याख्यानपक्षं भाष्यकृत्सम्मतमाह—भाष्ये त्विति। भाष्ये उरीत्याग्रतनेनान्वयः। नैवम्भूतः कश्चिदपि प्रत्ययः (ज्ञानम्) भवति यत्र शब्दो न भासते। अमुमेवार्थम्—

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानम् सर्वं शब्देन भासते"॥

इति कारिका प्रमाणयति। तथा च शब्देन अर्थस्य इव शब्दस्य स्वस्वरूपात्मकस्यापि उपस्थितौ ज्ञातायाम्, अर्थेषु शब्दवाच्ये लौकिके शास्त्रीये च शास्त्रीयकार्यस्य

समाधान—"ई हल्यघोः" इससे विहित आकार को ईत्व घुशब्द के स्वरूप ग्रहण होने पर आकार के अभाव के कारण प्राप्त नहीं है। इसमें ईत्व की व्यावृत्ति के लिये किया गया "अघोः" इस पर्युदास के वैयर्थ्य से यहाँ घु के स्वरूप का ग्रहण नहीं होगा। अतः यहाँ के लिये संज्ञाविधान चरितार्थ हो जाने से "उपसर्गे घोः" इसमें 'स्वं रूपं' सूत्र की परत्वात् प्रवृत्ति शङ्कावारणार्थ 'अशब्दसंज्ञायाम्' इसकी आवश्यकता है।

अशब्दसंज्ञा का शब्द की संज्ञा इस प्रकार षष्ठीतत्पुरुष मानने से शब्द का अर्थसंज्ञा से भिन्न अर्थ का लाभ होने से कर्म आदि संज्ञायें अर्थ को होती हैं; क्योंकि फलाश्रय ग्राम अर्थ है, शब्द नहीं। अतः "स्वं रूपम्" इसकी प्रवृत्ति से 'कर्मण्यण्' यहाँ स्वरूप का ग्रहण प्राप्त होगा। इस लिये शब्द पद की शब्दशास्त्र में लक्षणा कर सप्तमीतत्पुरुष होने से शब्दशास्त्र में जो संज्ञा की उनको छोड़कर स्वरूप का ग्रहण होता है। शब्द या अर्थ की संज्ञा का विचार यहाँ नहीं है। इस आशय से लिखा—**शब्दशास्त्रे इति**।

भाष्य का मत इस प्रकार है—राजपद से उपस्थित लौकिक अर्थ में यत् प्रत्ययरूप कार्य की, पूर्वापरीभाव न होने से, अनुत्पत्ति प्राप्त होने पर भी अर्थ में विशेषणतया भासमान उपस्थित

लक्ष्यानुसारात् तत्तत्संज्ञाकरणज्ञानरूपप्रकरणाच्च षान्तसंख्यावाचकषष्शब्दस्य षट्संज्ञाकरणेन शब्दशास्त्रीयसंज्ञायां स्वरूपाग्रहणज्ञापनाच्च 'उपसर्गे घोः' (३ । ३ । ९२) इत्यादावदोषेणाशब्दसंज्ञेत्यपि व्यर्थमित्युक्तम् ।

अत एव जनपदापत्यपशुदेवतादिशब्देषु न दोषः । अत एव वृक्षादिषु विशेषाणां

असम्भवेन बाधात् शब्दे अर्थे च खण्डशः शक्तिस्वीकारेण प्रकारतया भासमानस्य 'राजश्वसुराद्यत्' इत्यत्र राजरूपस्य शब्दस्य ग्रहणं सिध्यति । अर्थस्य विशेष्यतया अन्वयासम्भवेन सर्वथा अर्थस्य परित्यागापेक्षया सति सम्भवे विशेषणतायाा अन्वयस्य न्याय्यत्वेन अर्थवाचकः शब्दो गृहीतः—इति अर्थवद्ग्रहणपरिभाषाऽपि सिद्धा । तथा च शब्दस्वरूपस्य सूत्रं विनैव लाभे 'स्वं रूपम्'इति सूत्रं नावश्यकम् ।

शब्दानां अर्थे च खण्डशः शक्तिस्वीकारेण तयोः प्रकारतया विशेष्यतया च भानम् इष्टानुरोधेन । प्रकृते शास्त्रे अर्थे कार्यस्यासम्भवात् उपस्थितमर्थं विशेषणतया बोधविषयीकृत्य अर्थवाचकशब्देभ्यः कार्योत्पादसम्भवात् सूत्रं निष्फलमिति तात्पर्यम् ।

अशब्दसंज्ञायामित्यपि नावश्यकम् । तथाहि—'षड्भ्यो लुक्' इत्यादौ सर्वत्र षष्पदेन षष् इति स्वरूपग्रहणे षष् इत्यानुपूर्व्याः ग्रहणं सम्भवति, तद्ग्रहणाय 'ष्णान्ताः षट्' इति सूत्रेण षान्तत्वेन षष् इत्यस्य षट्संज्ञाविधानं व्यर्थं स्यात् । तस्य षट्संज्ञां विनापि 'षड्भ्यो लुक्' इत्यादौ स्वरूपग्रहणात् षष् इत्यानुपूर्वीरूपस्य ग्रहणसम्भवात् । तदेव ज्ञापयति—शब्दशास्त्रीयसंज्ञाशब्दाः स्वरूपस्य ग्राहका नेति । एवं तत्तत्संज्ञाविधानेन संज्ञासंज्ञिनां ज्ञानं प्रक्रान्तम् । अतस्तदानीं प्रकरणबलेन स्मृतिपथमारोहति संज्ञासंज्ञिभावः । तथा च कृत्रिमायाः संज्ञाया ग्रहणम् । एतन्मूलकः 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः' इति न्यायः । लक्ष्यानुरोधादपि कृत्रिमायाः संज्ञाया ग्रहणमिति सूत्रे अशब्दसंज्ञायामित्यपि व्यर्थम् ।

यत्रार्थे कार्यस्य बाधः, तत्रैव शब्दस्य प्राधान्यम् । अर्थश्च शब्दस्य शब्दे विशेषणम् । यत्र तु अर्थे कार्यस्य बाधो न, तत्र तु अर्थ एव विशेष्यः । यथा जनपदापत्यपशुदेवतादि-

---

राजशब्द का ग्रहण और उसी से प्रत्यय होगा । तथा च अर्थविशिष्ट राजशब्द से यत् प्रत्यय की सिद्धि हो जाने से 'स्वं रूपम्' इस सूत्र की आवश्यकता नहीं है । उपस्थित अर्थ के सर्वथा त्याग में प्रमाण न होने से विशेषण रूप से अर्थ का अन्वय होता है । अतः अर्थविशिष्ट ही सूत्रोपात्त आनुपूर्वी के ग्रहण से 'अर्थवत्' परिभाषा भी सिद्ध हो जाती है ।

"अशब्दसंज्ञा" इस पद की आवश्यकता नहीं है । व्याकरणशास्त्र की संज्ञा स्वरूपग्राहिका नहीं होगी; क्योंकि तत्तत्संज्ञी को तत्तत्संज्ञा ज्ञानरूप प्रकरण, लक्ष्यानुरोध एवं संज्ञा से यदि स्वरूपग्रहण होता तो विधिसूत्र में षट् संज्ञा शब्द से षष् शब्द का ग्रहण हो जाता । तदर्थ षट्संज्ञा का विधान करने के लिये 'ष्णान्ताः षट्' इसमें षकारग्रहण के वैयर्थ्य से शब्दशास्त्र की संज्ञाओं में स्वरूप ग्रहण नहीं होता—यह कल्पना होगी । इसलिये 'उपसर्गे घोः' इत्यादि स्थल में स्वरूपग्रहण नहीं होगा । अर्थ में कार्य का बाध न होने पर अपत्य, जनपद, पशु आदि में शब्दशास्त्र की संज्ञा न होने पर भी स्वरूप का बोध नहीं हुआ ।

अत एव चेति । लक्ष्यानुसारी व्याख्यान मानने से ही 'विभाषा वृक्षमृग' इस सूत्र में

ग्रहणम्, 'स्वे पुषः' (३ । ४ । ४०) इत्यत्र पर्यायाणां विशेषाणां स्वरूपस्य च ग्रहणम्, 'सभा राजा' (४ । २ । २३) इत्यत्र पर्यायाणामेव ग्रहणम्, 'पक्षिमत्स्यमृगान् हन्ति' (४ । ४ । ३५) इत्यादौ मृगपक्षिणोः पर्यायाणां विशेषाणां स्वरूपस्य च ग्रहणम्, मत्स्यपदेन स्वरूपस्य विशेषाणां मीनरूपपर्यायस्य च ग्रहणं सिध्यति । अन्यथा तदर्थं यत्नः कर्त्तव्यः । 'परेश्च घाङ्कयोः' (८।२।२२) इत्यत्र घशब्देन स्वरूपग्रहणम्, 'नदीपौर्णमासी' (५ । ४ ।११०) इत्यत्र नदीपदेन च स्वरूपग्रहणं सिध्यति । लक्ष्यानुसारिव्याख्यानेन च मम सर्वेष्टसिद्धिः । ज्ञापकपक्षेऽपि ज्ञापकसिद्धस्यासार्वत्रिकत्वान्न दोषः ।

अत एव भगवता ज्ञापकेन सिद्धवचनं प्रत्याख्यातमिति दिक् ॥

स्थलेषु । अर्थे कार्यस्य बाधाभावात् अर्थो न शब्दे विशेषणम्, लक्ष्यानुसारिव्याख्यानादेव 'विभाषा वृक्षमृग' इति सूत्रे वृक्षविशेषाणामेव ग्रहणम्, नतु वृक्ष इति स्वरूपस्य । 'स्वे पुषः' इत्यत्र स्वशब्देन 'स्व' इत्याकारकं स्वरूपम्, तत्पर्यायः, तद्विशेषश्च गृह्यन्ते । 'पक्षिमत्स्यमृगान् हन्ति' इत्यत्र 'मत्स्य' इति स्वरूपस्य तत्पर्यायेषु केवलं मीनस्य तद्विशेषस्य च ग्रहणं सिध्यति । सूत्रस्यारम्भे तु यत्नविशेषः कर्तव्यः स्यात्, येन पूर्वोक्तस्थलेषु तथाविध-एवार्थो गृह्येत ।

सूत्रसत्त्वे भाष्ये यत्र विशेष एवमुक्तः—"सित् तद्विशेषाणां वृक्षाद्यर्थम् । वृक्षादिविशेषमात्रग्रहणार्थं तत्र सित् कर्तव्यम् । पित् पर्यायवचनस्य च स्वाद्यर्थम् । चकारेण स्वरूपस्य तद्विशेषस्य च परामर्शः । अतः 'स्वे पुषः' इत्यपूर्वनिर्दिष्टस्य त्रितयस्य ग्रहणं सिद्धम् । जित् पर्यायवचनस्यैव राजाद्यर्थम् । 'सभा राजाऽमनुष्यपूर्वा' इत्यत्र राजपर्यायस्यैव ग्रहणात् । इनसभम् । झित् तस्य तद्विशेषाणाञ्च मत्स्याद्यर्थम् इत्यादि । सूत्राभावे तु लक्ष्यानुसारिव्याख्यानादेव सर्वमिष्टं सिध्यति । अस्मिन् पक्षे यत्नविशेषो न कर्तव्यो भवतीति ।

ननु षष्शब्दस्य षट्संज्ञाकरणसामर्थ्येन शब्दशास्त्रीयसंज्ञानां स्वरूपाग्रहणे ज्ञापिते 'नदीपौर्णमाग्याग्रहायणीभ्यः' इत्यत्र नदीपदेन नदीसंज्ञाया ग्रहणं स्यादिति नाशङ्कनीयम्; ज्ञापकसिद्धस्य असार्वत्रिकत्वेन तत्र सूत्रे ज्ञापितार्थानुसरणमनादृत्य

'वृक्ष' शब्द से वृक्षविशेष का, 'स्वे पुषः' इसमें स्व के पर्याय अर्थ रै आदि का गो—महिष आदि विशेष का ग्रहण एवं स्व का 'सभा राजा' इसमें राजा के पर्याय का ही ग्रहण होता है । 'पक्षिमत्स्य' इसमें मृग से अपने पर्याय हरिण का करतूरीमृगविशेष का, तथा मृगरूप का एवं पक्षिशब्द से शकुनिरूप पर्याय का शुकादिविशेष का तथा पक्षिरूप का ग्रहण सिद्ध होता है । 'मत्स्य' पद से मत्स्यस्वरूप के विशेष का और पर्याय में केवल मीन का ग्रहण हुआ । अन्यथा पूर्वोक्त इष्ट ग्रहण के लिये यत्न करना होगा । 'परेश्च घाङ्कयोः' इसमें घ पद से और 'नदीपौर्णमासी' में नदी पद से स्वरूप का ग्रहण भी सिद्ध हुआ । लक्ष्यानुसारी व्याख्यान के आश्रयण से इष्ट सिद्धि होती है । 'शब्दशास्त्र की संज्ञा में स्वरूप का ग्रहण नहीं होता'—यह नियम 'ष्णान्ताः षट्' सूत्रमें षकारग्रहण द्वारा ज्ञापित होने से ज्ञापक से सिद्ध वचन सार्वत्रिक नहीं होता । इसको मानकर समग्र सूत्र का प्रत्याख्यान किया गया है ॥

२६. येन विधिस्तदन्तस्य । १ । १ । ७२ । **विशेषणं तदन्तस्य संज्ञा स्यात्, स्वस्य च रूपस्य ।**

येन विधिः (१ । १ । ७२) ॥ **येनेति करणे तृतीया । विधिरिति भावे किः । कर्मात्र विधेयम्, कर्ता चाचार्यः प्रसिद्धत्वाल्लभ्यत एव ।**

यत्तु 'करणं कर्तृपरतन्त्रमिति तृतीयया पारतन्त्र्यं लक्ष्यते, तच्च शब्दानां विशेषणत्वेनेति विशेषणमिति लब्धम्' इति ? तन्न, 'सुब्विभक्तौ न लक्षणा' इत्यस्य सर्वसम्मतत्वात् ।

दोषस्य परिहरणीयत्वात् । अतएव = ज्ञापकसिद्धस्यासार्वत्रिकत्वादेव । अंशद्वयं भाष्ये प्रत्याख्यातमिति भावः । सूत्रारम्भे तत्प्रत्याख्याने उभयस्मिन्नपि पक्षे 'विभाषा वृक्षमृग' इत्यादिपूर्वनिर्दिष्टसूत्रेषु वृक्षविशेषपर्यायादिग्रहणे लक्ष्यानुसरणं समानमेवेति नैकतरस्य वैशिष्ट्यम् ॥

येन विधिस्तदन्तस्य ॥ अत्र = शास्त्रे । विधेयम् = कार्यम् । तथा च आचार्यकर्तृकं विधेयकर्मकं यत्करणकं विधानं तत् तदन्तस्य संज्ञेति सूत्रार्थः फलितः । कर्तुः प्रसिद्धत्वाद् यथा लाभस्तथा कार्यस्य विधेयस्यापि लाभेन विधिशब्दोऽत्र भावसाधनो न कर्मसाधनः । प्राचां मते 'येन' इति करणतृतीयान्तम् । करणञ्च कर्तृव्यापाराधीनतया कर्तृपरतन्त्रं भवति । तथा च तृतीयायाः पारतन्त्र्ये लक्षणा । परतन्त्रश्च व्यापारवान् भवति । व्यापारश्च शब्दे इतरव्यावृत्तिकरणरूपः । स च व्यापारो विशेष्ये उद्देश्ये अभावाद् विशेषणे विवक्षितः । नीलादिविशेषणेनैव पीतादिपरस्य व्यावृत्तिः । अन्यसम्बन्धापेक्षया अभेदस्य अन्तरङ्गत्वात् तेनैव विशेषणं गृह्यते—इत्याशयेन **सिद्धान्तकौमुद्यां** विशेषणमित्युपातम् ।

एतन्न युक्तमित्याह—**यत्तु** इति । विभक्तौ लक्षणाया अभावस्य सर्वमतसिद्धतया तृतीयाविभक्तेः पारतन्त्र्ये लक्षणाया अयुक्तत्वात् । न चैवं 'द्वन्द्वे च' इत्यत्र सप्तम्याः प्रथमार्थकत्वस्य प्रतिपादनमसङ्गतं स्यात्, तत्र प्रथमार्थे लक्षणायाः स्वीकारादिति वाच्यम्; सूत्राणां छन्दसा समानत्वात् तत्र व्यत्ययेन प्रथमार्थे सप्तमी बोध्येति न लक्षणायाः प्रसङ्गः । न केवलं विभक्तिमात्रस्य, किन्तु प्रत्ययमात्रस्य । तथा अन्येषां शब्दानां यस्मिन्नर्थे विधानं कृतं शास्त्रेण तेषामन्यत्रार्थे अपत्यादिभ्यो भिन्नेऽर्थे, तदर्थे प्रत्ययाद्यर्थे भवाद्यर्थे विहितानां प्रत्ययानां क्रियासातत्याद्यर्थे परापरशब्दानां च लक्षणया कृतः प्रयोगो

येन विधिरिति ॥ 'येन' इसमें करण तृतीया है । 'विधानं विधिः' इस प्रकार भाव में कि प्रत्यय है । विधानक्रिया का कार्य विधेय होगा । विधानक्रिया के कर्त्ता आचार्य हैं । 'आचार्य को जिसके द्वारा कार्य का विधान विवक्षित है उससे तदन्तविधि होती है'—यह सूत्रार्थ है । प्राचीनों ने करण, कर्त्ता के अधीन[1] होने से तृतीया की पारतन्त्र्य में लक्षणा मानी है । शब्दों की परतन्त्रता विशेषणत्व द्वारा होती है । अतः विशेषण का लाभ हुआ । यह ठीक नहीं है । सुप् विभक्ति की लक्षणा नहीं होती । जिन प्रत्ययों का या जिन शब्दों का शास्त्र से साधुत्व विहित

---

१. व्यापारवान् परतन्त्र होता है । इतरव्यावर्तकत्वरूप व्यापार विशेषण में होता है । जैसे 'नीलो घटः' यहाँ पीत घट से व्यावर्तक नील विशेषण है ।

किं बहुना, येषां प्रत्ययानामन्येषां वा शब्दानामर्थे विधानं कृतं शास्त्रेण, तेषामन्यत्रार्थे तदर्थे चान्येषां लक्षणयाऽपि साधुत्वाभावस्य 'प्रत्ययः' (३।१।१) 'पुंयोगाद्' (४।१।४८) इत्यादिभाष्यतो लाभात्।

करणस्य व्यापारवत्त्वनियमादन्येषां च व्यापाराभावाद् विशेषणमेवात्र करणतृतीयान्तेनोच्यते। तस्य चेतरव्यावृत्तिकरणमेव व्यापारः।

न साधुर्भवति। 'प्रत्ययः' इति सूत्रे भाष्ये बभ्रोरपत्यमित्यर्थे 'बाभ्रव्यः' इत्यत्र यतो विधाने कृते तत्रार्थे केवलबभ्रुशब्दस्य लक्षणया शक्त्या वा साधुत्वाभाव इत्युक्तम्।

'पुंयोगात्' इति सूत्रे भाष्येऽपि तद्धितान्तार्थेऽप्रत्ययस्य प्रयोगस्यासाधुत्वं लभ्यते। तथाहि—प्रष्ठादिशब्दानां प्रस्थानकर्तृत्वं प्रवृत्तिनिमित्तम्। तस्य च प्रायेण पुंसो धर्मतया स्त्रियां प्रवृत्तिनिमित्तत्वाभावेन प्रष्ठशब्दस्याप्रयोगात् ङीष् न प्राप्नोति। सम्बन्धित्वविवक्षायां 'तस्येदम्' इत्यणो लुग् वक्तव्यः। ततश्च स्त्रीविषयत्वात् ङीष्। 'नहि अन्तरेण तद्धितस्य लुकं पदार्थे शब्दो वर्तते' इत्युक्तम्। लक्षणया प्रष्ठादिशब्दानां तद्धितान्तार्थे साधुत्वे तदसङ्गतिः।

मूले 'प्रत्ययः' इति सूत्रस्योपादानं 'परश्च' इति सूत्रस्योपलक्षकतया योजनीयम्। अन्यथा तस्मिन् सूत्रे तादृशविचारस्याभावात् ग्रन्थासङ्गतिप्रसङ्गात्। स्वमतेन सूत्रार्थं योजयति—**करणस्येति**। उच्यते = सदृशलक्षणया बोध्यते। व्यापारवत्त्वेन उभयत्र सादृश्यम्। तृतीयान्तस्य लक्षणायां 'न विभक्तौ लक्षणा' इत्यादिना विरोधोऽपि न। शब्दे च व्यापारान्तरासम्भवेन इतरव्यावृत्तिकरणरूपो व्यापारः। इतरेषां व्यावर्तकत्वेन विशेषणमेव तादृशव्यापारवत्त्वेन गृह्यते। इतरसम्बन्धानवच्छिन्नविशेषणताया अन्तरङ्गतया ग्रहणम्।

है उससे अन्य अर्थ में और उस अर्थ में अन्य प्रत्यय या शब्द का लक्षणा द्वारा भी साधुत्व नहीं माना जाता। "प्रत्ययः" तथा "पुंयोगात्" इन सूत्रों के भाष्य[२] से उक्तार्थ प्रमाणित होता है। इन सन्दर्भों से यह सिद्ध होता हैं कि तृतीया की लक्षणा नहीं है। किन्तु करण व्यापारवाला होता है। इसमें व्यापार इतर की व्यावृत्ति करता है। विशेषण दूसरे का व्यावर्तक होने से व्यावृत्तिकरण रूप व्यापारवान् विशेषण ही होता है, विशेष्य नहीं। अतः लक्षणा के बिना ही करण तृतीयान्त पद से विशेषण की उपस्थिति होती है। भाष्य में भी लिखा है, जो मूल में स्पष्ट है। "अचो यत्" इस सूत्र के द्वारा अचा धातोर्यतं विधत्ते = अच् से धातु को यत् का विधान करते हैं। जिसको, या पर में निमित्त मानकर जिसको कार्य करना है उसमें करणत्व की व्यावृत्ति 'अन्यस्य अन्येन' के द्वारा भाष्य में दिखाया गया है। 'अन्यस्य' यह 'अन्यस्मिन्' इसका भी उपलक्षण है। उनमें शब्द द्वारा उपस्थित विशेष्य में जो शब्द से उपस्थित विशेषण है उसी में तदन्त-

---

२. 'प्रत्ययः' यह सूत्र 'परश्च' इसका उपलक्षण है। बाभ्रव्यः यहाँ अपत्यार्थ में यञ् प्रत्यय से बाभ्रव्य इसकी सिद्धि होती है। केवल बभ्रु शब्द का इस अर्थ में लक्षणा से प्रयोग असाधु कहा है। पुंयोगात् सूत्र के भाष्य में 'नहि अन्तरेण तद्धितलुकं परार्थे शब्दो वर्तते' ऐसा लिखा है। इस प्रकार उक्तार्थ प्रमाणित होता है।

तदुक्तं भाष्ये—"येनेति करणे एषा तृतीया, अन्येन चान्यस्य विधिर्भवति। यथा—चैत्रस्य सङ्ग्रामं हस्त्यश्वादिभिर्विधत्ते, एवम् 'अचो यत्' इति अचा धातोर्यतं विधत्ते इति। अन्येन चान्यस्य" इति।

अन्येन चान्यस्य विधिरिति। अयं भावः—सेनापतिः अन्यस्य राज्ञः कृते अन्येन हस्त्यश्वादिना युद्धं करोति यथा, तथा आचार्यः पाणिनिः अन्यस्य धातोः अन्येन हनो व्यावर्तकेन अचा विशेषणत्वेन यत् प्रत्ययं विधत्ते। अतो येन विधत्ते तत् तदन्तस्य बोधकं बोध्यम्। तथा च अजन्ताद् धातोः 'अचो यत्' इति सूत्रेण यत्प्रत्ययस्य विधानेन चेयम्, नेयमिति सिद्धम्। एवम् 'एरच्' इत्यत्रापि तदन्तविधौ इवर्णान्तादित्यर्थस्य लाभेन केवलात् इकाराद् अच्प्रत्ययो न स्यात्। तथा च अयः इत्यस्यासिद्धिप्रसङ्गः। अतः "स्वं रूपम्" इति सूत्रात् स्वपदमनुवर्त्य तच्च षष्ठ्या विपरिणामय्य स्वस्यापि बोधकमित्यर्थलाभेन केवलस्यापि इकारस्य संग्रहान्न पूर्वोक्तानुपपत्तिः। अतएव परममूले स्वस्य चेत्युक्तम्। स्वं रूपमित्यस्य प्रत्याख्याने तु 'तदन्तस्य तस्य च' इति परममूले पठनीयम्।

यत्र विशेष्यवाचकं पदं न श्रूयते, तत्र सति प्रमाणे शब्दस्वरूपं विशेष्यमादाय तदन्तविधिः कर्तव्यः। यथा "प्रयोजनं सर्वनामाव्ययसंज्ञायाम्" इति भाष्यप्रामाण्यात् शब्दस्वरूपमध्याहृत्य तदन्तविधिर्भवति। क्वचित् तु तदन्तविधेरनन्तरं तत्समानाधिकरणविशेषणविशेष्यभावसम्भावनायां सत्याम् अभेदान्वययोग्यतायाः सत्त्वात् तदन्तविधिर्बोध्यः। यथा "इन्हन्पूषार्यम्णां सौ" इत्यत्र नहि इन् अङ्गं भवितुमर्हति, इनः प्रत्ययत्वेन तस्य केवलस्य प्रयोगाभावाद् अङ्गसंज्ञाया दुर्लभत्वात्। किन्तु तदन्तविध्युत्तरम् इन्नन्तस्य अङ्गेन सह सामानाधिकरण्येन अन्वयसम्भवात् विशेष्येण अङ्गेन सह अभेदो भवतीति योग्यतामादाय तदन्तविधिः प्रयोक्तव्यः। विशेषणयोग्यताभ्युपगमे च अभेदसम्बन्धावच्छिन्न (इतरसम्बन्धानवच्छिन्न) प्रकारताप्रयोजकं तदन्तविध्युत्तरम् अभेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकत्वेन सम्भावितञ्च यत् पदं तत् स्वबोध्यनिष्ठचरमावयवतानिरूपकसमुदायस्य संज्ञा इत्यर्थः पर्यवस्यति।

विधि होती है। कहीं प्रमाण रहने पर शब्दस्वरूप विशेष्य के द्वारा भी विशेषण तदन्तबोधक होता है। भेदसम्बन्ध की अपेक्षा अभेद एक होने से अन्तरङ्ग है। अतः विशेष्य-विशेषण का सामानाधिकरण्य होने पर ही तदन्तविधि होती है। तदन्तविधि के अनन्तर विशेषण-विशेष्य की सामानाधिकरण्य से अन्वयसम्भावना भी इसमें निमित्त है। अतएव 'इन्हन्' इसमें इन् रूप अङ्ग के न होने पर भी तदन्तविध्युत्तर इन्नन्त अङ्ग की सामानाधिकरण्यसम्भावना से तदन्तविधि सिद्ध होती है।

शङ्का—तदन्त से कार्यविधान होने पर केवल से कार्य नहीं होगा। इवर्णान्त से अच् प्रत्यय करने पर "एरच्" इसकी प्रवृत्ति 'चि' धातु में होगी, इण् धातु में नहीं होगी?

समाधान—'स्वं रूपम्' इसमें स्वं इसकी अनुवृत्ति तथा षष्ठ्यन्त से विपरिणाम होने से स्वस्य = अपने का भी ग्रहण होता है। 'स्वं रूपं' सूत्र के प्रत्याख्यानपक्ष में येन विधिस्तस्य तदन्तस्य च'—ऐसा सूत्र करना चाहिये।

'समासप्रत्ययविधौ प्रतिषेधः' (वा०) ।

अनेन यस्य कार्यं, यस्मिन् परतश्च, तयोरकरणत्वं दर्शितम् । अन्यस्येत्यन्यस्मिन्नित्यस्याप्युपलक्षणम् । तत्र शब्दोपस्थितविशेष्यस्य तादृशं विशेषणमेव तदन्तग्राहकम् ।

क्वचित् सति गमके तादृशं शब्दरूपं विशेष्यमादायापि तदन्तविधिः । तच्चान्तरङ्गत्वात् समानाधिकरणमेव । तत्र तदन्तविधौ सति तथा विशेषणत्वयोग्यताप्येतत्प्रवृत्तौ निमित्तम् । अत एव 'इन्हन्' (६ । ४ । १२) इत्यादौ इनंशे तदन्तविधिः । न हि इन् अङ्गमित्यन्वयो भवति । तदन्तस्येत्यस्य तदन्तशब्दस्येत्यर्थः ।

नन्वेवम् 'एरच्' (३।६।५६) इति 'अयः' इत्यत्र न स्यादत आह—स्वस्य चेति । स्वमित्यनुवृत्तं षष्ठ्या विपरिणम्यते इति भावः । 'स्वं रूपम्' (१ । १ । ६८) इत्यस्य प्रत्याख्याने तु तदन्तस्य चेति पाठ्यमिति बोध्यम् ।

समासप्रत्यय० (का० वा०) इति । विशेषणविशेष्यभावव्यत्यासे तात्पर्यलक्षणयाऽपीति । अत्र अपिना शक्तेः समुच्चयस्तृतीयान्तेनोच्यते । गौणलक्षणयेति भावः । तस्य च विशेषणस्य तु । अन्येन चान्यस्येति । एतेन कार्यसम्बधिनो भिन्नस्यैव करणत्वम् । यथा चैत्रस्य संग्रामकरणे चैत्राद् भिन्ना एव हस्त्यश्वादयः करणम् । एवं धातोर्यतः उत्पत्तौ अच् करणम् । करणत्वसामान्यमादाय दृष्टान्तता बोध्या । तादृशम् = शब्दादुपस्थितम् । तादृशं शब्दरूपम् = शब्दाद् अनुपस्थितं शब्दस्वरूपम् । तच्च = विशेषणञ्च । अन्तरङ्गत्वात् = शीघ्रोपस्थितिकत्वात् विशेषणान्वययोग्यतामपि अभेदस्य द्विनिष्ठत्वाभावेन सम्बन्धमध्येऽगणितत्वात् सम्बन्धानवच्छिन्ना या प्रकारता तस्याः प्रयोजकत्वेन सम्भावितं यत् पदं तत् तदन्तविधिप्रयोजकमित्यर्थस्वीकारात् तदन्तविधिः ।

तस्य चेति पाठ्यमिति । नच तदन्तविधिसत्त्वेऽपि व्यपदेशिवद्भावेन केवलस्यापि तदन्तत्वस्य सम्भवात् स्वस्य च तस्य चेति वा वृत्तौ निर्देशो नावश्यक इति वाच्यम् । रोणीति सूत्रविषये रौण इत्यत्र तदन्तत्वाभावात् अण् न स्यात् । व्यपदेशिवद्भावस्तु 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति परिभाषया निषिद्धः । अतः स्वस्यापि ग्रहणाय तदन्तविधिसूत्रे स्वस्य तस्य चेति पठनीयम् ।

केचित् प्रत्ययस्यापि व्यपदेशिवद्भावेन प्रत्ययान्तत्वात् प्रत्ययान्तभिन्नत्वाभावेनैव प्रातिपदिकसंज्ञायाः तत्र वारणसम्भवात् प्रत्ययपदावृत्त्या प्रत्ययपर्युदासकरणस्य वैयर्थ्यं स्यात् । तत्सामर्थ्यात् तदन्तविधिस्थले व्यपदेशिवद्भावो न भवतीति कल्प्यते । तथाच व्यपदेशिवद्भावस्याप्रवृत्त्या तस्येति पाठो युक्त एवेति वदन्ति ।

समासप्रत्ययविधाविति । विशेषणविशेष्यभावस्य विपर्ययेण विशेषणस्य विशेष्यभूतत्वात् तत्र तदन्तविधेरप्राप्तिरिति सिद्धमेव तदन्तविधेरभावं वार्त्तिकमिदमनुवदति । समासे यथा 'द्वितीया श्रितातीतपतित' इत्यादौ अनुवर्तमानं समर्थपदं विशेषणं

समास इति । तदन्तविधि इष्ट न होने पर विशेषण-विशेष्य भाव का विपर्यय करना चाहिये । उक्त वार्त्तिक इसी में तात्पर्य का ग्राहक है । 'द्वितीया श्रितातीत' इसमें अनुवर्तमान समर्थ के विशेष्य होने पर श्रितादि में तदन्तविधि होने से कृष्णं परमं श्रितः यहाँ भी समास प्राप्त

'उगिद्वर्णग्रहणवर्जम्' (वा०) ॥

ग्राहकमिदम्। एवञ्च 'द्वितीया श्रित' (२।१।४) इत्यादौ श्रितादयोऽधिकारप्राप्तसमर्थैरित्यस्य विशेष्यभूता इति न तदन्तविधिः। तस्य तत्प्रकृतिके लक्षणया 'सुपा' इत्यनेनान्वयः। तेन 'कृष्णं परमश्रितः' इत्यत्र न समासः। 'नडादिभ्यः फक्' (४।१।९९) इत्यादावपि नडादि विशेष्यम्, प्रातिपदिकं विशेषणमिति सौत्रनाडिरित्यत्र न फक्।

उगिद्० (का० वा०) इति। तेन 'अतिभवति' इत्यत्र 'उगितश्च' (४।१।६) इति ङीप्, 'दाक्षिः' इत्यत्र 'अत इञ्' (४।१।९५) च सिद्धः। एवञ्चोक्तनिषेधः प्रत्ययांशे गृह्यमाणप्रातिपदिकविषये, प्रत्ययविधिविषयेण 'गृह्यमाणप्रातिपदिकेन तदन्तविधिर्नास्ति' इत्यनेनैकवाक्यत्वलाभात्।

श्रितादयो विशेष्याः। समर्थपदं तृतीयान्तेन विपरिणमय्य श्रितादीनां विशेष्याणां सुप्प्रकृतिके लक्षणया द्वितीयान्तं समर्थेन श्रितादिप्रकृतिकसुबन्तेन समस्यते इत्यर्थः। तथा च कृष्णं परमं श्रितः इत्यत्र न समासः; सुपः परमश्रितप्रकृतिकत्वेन श्रितादिप्रकृतिकत्वाभावात्। अत्रैव तात्पर्यग्राहकं तद्वचनम्। प्रत्ययस्थले तु प्रातिपदिकं विशेषणम्, नडादि विशेष्यम्। तथा च नडादिपदात् तदन्तविधेरभावेन 'सौत्रनाडिः' इत्यत्र उक्तसूत्रेण फक् प्रत्ययो नः; किन्तु 'अत इञ्' इतीञ्, अनुशतिकादित्वात् उभयपदवृद्धिः। लक्ष्यानुरोधात् प्रत्ययविधौ उगिद्विषये वर्णग्रहणे विशेषणविशेष्यभावस्य न व्यत्यासः। अतस्तदन्तविधिरिष्यते एव। यथा—उगिदन्तात् प्रातिपदिकात्, अदन्तात् प्रातिपदिकात् इत्यादि। तेन अतिभवतीत्यत्र ङीप्, दाक्षिरित्यत्र अकारान्तत्वात् इञ् प्रत्ययश्च सिद्धः। अत एव उगिद्विषये वर्णग्रहणे च तदन्तविधेरिष्टत्वात् गृह्यमाणप्रातिपदिके एव 'समासप्रत्ययविधौ' इति वचनेन प्रत्ययांशे निषेधात् ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीति परिभाषया सह 'समासप्रत्ययविधौ' इति वचनस्य एकवाक्यतासमानार्थकता सिद्धा।

उगिद्वर्णग्रहणमिति। एकदेशस्य = अगृह्यमाणप्रातिपदिकानां सूत्राणां समूहस्यैकदेशस्य। अत एव = गृह्यमाणप्रातिपदिकविषये एव 'समासप्रत्ययविधौ' इति वचनेन

है। एतद्वारणार्थ 'समासप्रत्यय' यह वार्त्तिक है। समर्थ को विशेषण, श्रितादि को विशेष्य कर देने से तदन्तविधि श्रितादि से प्राप्त नहीं हैं। अतः वार्त्तिक उक्तार्थ में तात्पर्यग्राहक ही है। श्रितादि की श्रितादि प्रकृति में लक्षणा करने से श्रितादिप्रकृतिक सुबन्त ऐसा अर्थ होता हैं।

इसी प्रकार 'नडादिभ्यः फक्' यहाँ भी प्रातिपदिक को विशेषण, नडादि को विशेष्य करने से नडादि तदन्त का बोधक नहीं होता। अतः नाडायनः इसके समान सौत्रनाडिः में फक् नहीं होता।

उगिति। उगित् और वर्णग्रहण में तदन्तविधि का प्रतिषेध न होने से 'अतिभवति' इसमें उगिदन्त होने से ङीप् और 'दाक्षिः' इसमें अदन्त होने से इञ् प्रत्यय की सिद्धि हुई। वर्णग्रहण में तदन्तविधि मानी गयी। अतः गृह्यमाण प्रातिपदिक से ही 'प्रत्ययविधौ' इससे प्रतिषेध होता है। एवं प्रत्ययविधिविषयक 'ग्रहणवता प्रातिपदिकेन' इसके साथ समानार्थकत्व की सिद्धि होती है। 'उगिद्वर्णग्रहण' वार्त्तिक अगृह्यमाण प्रातिपदिक को निमित्त मानकर प्रवृत्त होने वाले

२७. विरामोऽवसानम् । १ । ४ । ११० । **वर्णानामभावोऽवसान-संज्ञः स्यात् ।**

'उगिद्वर्ण' (का० वा०) इति त्वेकदेशानुवाद इति बोध्यम् । अत एव 'वनो र च' (४।१।७) इत्यादौ 'प्रत्ययग्रहणे तदन्तग्रहणम्' (प० २३) इत्यस्य नायं निषेध इति दिक् ॥

विरामः (१।४।११०) ॥ भावे घञ् । **शब्दानुशासनप्रस्तावादाह—वर्णानामिति । उच्चारणाभाव इत्यर्थः । स च व्याख्यानात् किञ्चिद्वर्णोच्चारणानन्तरकालिक एव गृह्यते । प्रदेशाः 'वाऽवसाने' (८।४।५६) इत्यादयः । अभावस्यापि बुद्धिकृतं पौर्वापर्यं वर्णवत् ।**

प्रत्ययग्रहणे प्रतिषेधस्वीकारादेव । 'वनो र च' इत्यादौ प्रत्ययांशे तदन्तविधिर्भवत्येव, 'वन' इत्यस्य गृह्यमाणप्रातिपदिकत्वाभावात् । गृह्यमाणप्रातिपदिकत्वं च प्रातिपदिकत्वव्याप्य-धर्मावच्छिन्नविषयताप्रयोजकत्वेन उपादीयमानं प्रातिपदिकमित्यर्थः । विशेषपरिष्कारस्तु **परिभाषेन्दुशेखर**टीकायां द्रष्टव्यः । उक्तनिषेधः = प्रत्ययविधौ प्रतिषेधः ॥

विरामोऽवसानम् ॥ वर्णानां स्वमते नित्यत्वादाह—**उच्चारणाभाव** इति । उच्चारणं वर्णोत्पत्तितद्व्यञ्जनान्यतररूपम् । तेन अनित्यत्ववादि मतमपि संगृहीतम् । प्रदेशाः = संज्ञाप्रयोजनस्थानानि ।

ननु वर्णानामुच्चारणानन्तरं यथा वर्णोच्चारणाभावः, तथा वर्णोच्चारणात् प्रागपि वर्णोच्चारणाभावस्समान इति प्राग्वर्तिनोऽभावस्य अवसानसंज्ञा प्राप्नोतीति शङ्कायामाह—**स चेति** । तदुच्चारणाभावस्तु इत्यर्थः । **व्याख्यानात्** इति । व्याख्यानञ्च 'र ऋतो हलादेर्लघोः' इति सूत्रे रेफस्य विसर्गाभावकरणम्, पूर्ववर्तिनोऽपि उच्चारणाभावस्य अव-सानसंज्ञायां 'खरवसानयोः' इति विसर्गापत्तिः । न च पदान्तत्वाभावान्न विसर्ग इति वाच्यम्; तथापि 'र्वोरुपधाया दीर्घः' इत्यत्र रेफस्य पदान्तत्वेन अवसानसंज्ञायां विसर्गा-पत्तिरूपात् व्याख्यानात् इति । 'तस्मिन्निति' परिभाषोपस्थितिबलात् 'खरवसानयोः' इत्यत्र अवसाननिरूपिताव्यवहितपूर्वत्वविशिष्टस्य रेफस्य विसर्गविधानात् 'र्वोः' इत्यत्र अवसानात् परस्य रेफस्य सत्त्वेन विसर्गाप्राप्त्या सूत्रनिर्देशस्योपपत्तौ वर्णोच्चारणात् प्राक्कालिकस्य उच्चारणाभावस्य अवसानसंज्ञाया अप्राप्तौ नेदं प्रमाणमिति चेत् ? उच्यते; तदा फलाभावात् इष्टसिद्ध्यनुरोधात् व्याख्यानात् उक्तार्थलाभ इति बोध्यम् ।

सूत्रों के समुदाय के एकदेश का अनुवादक है; क्योंकि सभी अगृह्यमाण का उगित् और वर्ण से संग्रह नहीं होता । जैसे 'वनो र च' इसमें वन् अगृह्यमाण प्रातिपदिक होने पर भी वार्तिकोक्त वर्ण और उगित् पद से असंगृहीत है । 'समासप्रत्ययविधौ' इसको प्रवृत्ति गृह्यमाण प्रातिपदिक ग्रहण में ही मानने से वनो र च' इसमें 'प्रत्ययग्रहणे यस्मात्' इसकी परिभाषा के द्वारा तदन्तविधि होती है; क्योंकि वन् प्रत्यय होने से गृह्यमाण प्रातिपदिक नहीं है ॥

विराम इति । 'विराम' शब्द भावघञन्त है । विराम शब्द अभावार्थक होने से प्रतियोगी की आकाङ्क्षा होने पर शब्दानुशासनप्रकरणवश लब्ध अर्थ का निर्देश करते है—**वर्णानामिति** ।

अवसानसंज्ञावाच्याद् अभावात् पूर्वत्वं वा परत्वं वा न सम्भवति। भावपदार्थादेव कश्चित् पूर्वः भावात् परो वा भवति। तथा च 'वाऽवसाने' इत्यादिसूत्राणां कथमवसाने पूर्वस्य चर्त्वम् इत्यादि वाच्यार्थः ? इत्यत आह—**अभावस्यापीति**। यथा वर्णानामुच्चरितप्रध्वंसितया अस्थिरत्वेन उपश्लेषः पूर्वं परत्वरूपो न सम्भवति, पौर्वापर्यस्य स्थिरपदार्थनिष्ठत्वात्, किन्तु बुद्धिगतं पौर्वापर्यमारोप्यते; तथैव अभावस्यापि पौर्वापर्यं बौद्धमेव बोध्यम्। 'यावद् ब्रह्मविष्ठितं तावती वाक्' इति श्रुत्या वर्णानां सर्वदेशकालवृत्तित्वेन दैशिक-कालिकक्रिययोरसम्भवात् स्वोच्चारणाधिकरणकालात् प्राक् काले जायमानोच्चारणस्य कर्मत्वादि रूपं पूर्वत्वादि, तथा अभावस्यापि स्वाधिकरणकालकर्मत्वादिरूपं पूर्वत्वादि, तथा अभावस्यापि स्वाधिकरणकालप्राक्कलिकोच्चारणकर्मत्वादिरूपं वा विवक्षितमिति बोध्यम्।

यत्र देवदत्तेन 'घटात्' इत्युच्चरितं यज्ञदत्तेन 'पट' इत्युच्चरितम् तत्र उच्चारणस्य सत्त्वेन अवसानसंज्ञा न स्यात्, उच्चारणाभावरूपस्य विरामस्याभावात्, एवञ्च 'वाऽवसाने' इत्यनेन चर्त्वं न सिध्येत् ? एतद्दोषवारणाय वर्णविशिष्टोऽभावोऽवसानसंज्ञको भवति। वै०च—स्वकर्मकोच्चारणकर्तृपुरुषोच्चरितत्ववर्णप्रतियोगिकत्वम् अर्धमात्राधिककालाव्यवधानेन, स्वकर्मकोच्चारणकर्तृपुरुषोच्चरितवर्णावधिकपूर्वत्वाभाववत्त्वम्—एतदुभयसम्बन्धेन। पूर्वोक्तस्थले घटादित्यनन्तरं पटस्योच्चारणं भिन्नपुरुषकर्तृकमिति अन्यपुरुषोच्चरितपटादिघटकपकारवर्णात् पूर्वत्वस्य घटादित्येतद्घटकतकारे सत्त्वेऽपि येन घटादित्युक्तं तत्पुरुषकर्तृकोच्चारितवर्णात् पूर्वत्वाभावस्य तकारे सत्त्वात् न दोष इति नवीनानामाशयः॥

शब्दनित्यतापक्ष में वर्णाभाव नहीं हो सकता, अतः उच्चारणाभावार्थ है। वर्णोत्पत्ति वर्णव्यञ्जनान्यतररूप उच्चारण का स्वरूप होने से शब्द के नित्यत्व अनित्यत्व—उभय पक्ष में सङ्गति हो जाती है। किसी वर्ण के उच्चारण के अनन्तर वर्णान्तर के उच्चारणाभाव को 'अवसान' कहते हैं। इसमें 'र्वोरुपधायाः' इस सूत्र में 'र्वो' के रेफ का विसर्गाभाव प्रमाण है। अन्यथा रेफ के पहले वर्णोच्चारणाभाव होने से अवसान संज्ञा हो जायगी। इसके अनन्तर 'खरसानयोः' इससे विसर्ग होना चाहिये। अथवा सर्वत्र 'अवसाने' इसमें परसप्तमी होने से अवसान में परत्व विवक्षित है। पूर्व में अवसानसंज्ञा होने पर भी पर में अवसान के न होने के कारण विसर्ग प्राप्त नहीं है। अतः पूर्व को अवसानसंज्ञा की कुछ भी प्रयोजन न होने से फलाभावरूप व्याख्यान से वर्णोच्चारणानन्तरकालिक उच्चारणाभाव का ग्रहण है।

अवसानसंज्ञा का व्यवहारस्थल 'वाऽवसाने' इत्यादि है।

शङ्का—अभाव अमूर्त पदार्थ है, अतः इसका पूर्वापरीभाव किस प्रकार होगा ?

समाधान—अनित्यपक्ष में वर्ण उच्चरित होने के बाद प्रध्वंसी नित्यपक्ष में नित्य तथा व्यापक होने से जिस प्रकार बुद्धिकृत पौर्वापर्य वर्ण में माना जाता है, उसी प्रकार आरोप से अभाव में बुद्धिकृत उसका व्यवहार होता है॥

२८. परः सन्निकर्षः संहिता । १ । ४ । १०९ । **वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ॥**

परः० ॥ **परशब्दो नान्यार्थोऽन्यत्वस्याव्यभिचरितत्वादत आह**–अतिशयित इति । **स्वभावसिद्धार्धमात्रातिरिक्तकालव्यवायेन रहितः । तेन तद्व्यवायेन वाक्योच्चारणे संज्ञा न । सन्निकर्षश्च प्रायः परेण, क्वचित् पूर्वेणापि । अत एवावसानकार्याणां संहिताधिकारे पाठः ।**

परः सन्निकर्षः संहिता ॥ अत्र सूत्रे परशब्दो नान्यार्थकः, किन्तु अतिशयविशिष्टार्थस्य बोधकः । कुतः ? **अव्यभिचरितत्वादिति** । सर्वे शब्दार्थाः कस्यचिदपेक्षया भिन्ना एव । कञ्चिदपेक्ष्य सर्वेषामन्यत्वस्य सत्त्वात् अन्यत्वस्य सर्ववृत्तित्वेन न कश्चिद् व्यभिचरतीति अव्यभिचारात् 'सम्भवव्यभिचाराभ्यां स्याद् विशेषणमर्थवत्' इति न्यायेन सम्भवव्यभिचाराभ्यामेव विशेषणस्य सार्थक्यापगमेन परशब्दोपादानस्य वैयर्थ्यं स्यात् । अतः परशब्दस्य अतिशयित इत्यर्थः । अतिशयितविशेषणेन एकत्रवर्णोच्चारणानन्तरम् अपरस्य वर्णस्योच्चारणे यावान् स्वाभाविकः कालविलम्बः (व्यवधानम्), ततोऽधिककालस्य व्यवधाने सन्निधिः अतिशयितो न भवतीति अतिशयितत्वानतिशयितत्वभेदेन सन्निधेर्द्वैविध्यात् अनतिशयसन्निधेर्वारणाय परविशेषस्य सार्थक्यात् ।

पूर्वस्य परेण वर्णेन प्रायेण संहिता संज्ञा । प्रायः-पदस्य सन्निवेशेन क्वचित् = अवसानसंज्ञाविषये, परस्य पूर्वेण सन्निकर्षेऽपि सा संज्ञा । यथा 'खरवसानयोः' 'वाऽवसाने' इत्यादौ पूर्वेण परस्य वर्णस्य सन्निकर्षः । दध्यत्रेत्यादौ परेण अकारेण पूर्वस्य इकारस्य सन्निकर्षः । अवसानसंज्ञानिमित्तानां कार्याणां संहिताधिकारे पाठेन पूर्वेण वर्णेन परस्य वर्णस्य सन्निकर्षोऽपि अवश्यं ग्राह्यः । अन्यथा संहितासंज्ञाया अभावे तदधिकारे तेषां पाठस्यासङ्गतिरेव स्यात् । 'तयोर्य्वावचि संहितायाम्' (८।२।१०८) इति सूत्रात् संहिताया अधिकारः ।

परः० ॥ किसी की अपेक्षा किसी में अन्यता रहती ही है, अतः अन्यत्व के अव्यभिचारी होने से पर शब्द अन्यवाची नहीं; किन्तु अतिशय अर्थ में है । इस आशय से लिखते हैं—अतिशयितः इति । एक वर्ण के उच्चारणानन्तर अग्रिम वर्णोच्चारण के मध्य में अर्धमात्राकाल का व्यवधान नियत है । इससे अधिक काल के व्यवधान से रहित रहने पर अतिशयित सन्निधि कहलाती है । इससे अतिरिक्तकालव्यवधान में संहिता संज्ञा नहीं होती ।

परवर्ण से सन्निकर्ष विवक्षित है । दध्यत्र इसमें इकार का परवर्ण अकार के साथ सन्निकर्ष संहितासंज्ञक है । कहीं पूर्ववर्ण के साथ सन्निकर्ष भी उक्तसंज्ञक होता है । अतएव 'वाऽवसाने' 'खरवसानयोः' इत्यादि सूत्रों से विहित अवसानसंज्ञाप्रयुक्त कार्यों का संहिताविवक्षा में विधान सङ्गत होता है । अन्यथा अवसान में परवर्ण के न होने से पर के सन्निकर्षाभाव से प्रयुक्त संहितासंज्ञा नहीं होगी ।

शङ्का—परवर्ण के रहने पर अवसान संज्ञा की अप्राप्तिस्थल में संहितासंज्ञा के चरितार्थ होने से परवर्ण के सद्भावस्थल में प्राप्त संहिता संज्ञा का अवसान संज्ञा द्वारा 'येन

न चावसानसञ्ज्ञया परसत्त्वे 'सावकाशायाः संहितासञ्ज्ञायाः सत्यपि सम्भवे बाधनं भवति' इति न्यायेन विषयभेदेऽपि बाधः स्यादिति तदसङ्गतिरेवेति वाच्यम्;

ननु परत्र वर्णसत्त्वे विरामाभावेन अवसानसंज्ञाया अप्राप्त्या तत्र दधि अत्रेत्यादौ संहितासंज्ञायाश्चारितार्थ्येन रामः, रामात् इत्यादौ पूर्वेण वर्णेन सह परस्य वर्णस्य सन्निकर्षेण संहितासंज्ञा, तथा अग्रे वर्णोच्चारणाभावेन विरामस्य सद्भावाद् अवसान-संज्ञा च प्राप्नुतः। यद्यपि वर्णसन्निधेः संहितासंज्ञा, वर्णोच्चारणाभावस्य च अवसान-संज्ञेति उभयोः संज्ञयोर्विषयभेदात् बाध्यबाधकभावो न सम्भवति, तथापि सत्यपि सम्भवे बाधनं भवतीति भाष्योक्तदिशा येन नाप्राप्तिन्यायमूलकः। अवश्यं प्राप्तायां संहितासंज्ञायाम् अवसानसंज्ञा आरभ्यते इत्यचरितार्थया अवसानसंज्ञया संहितासंज्ञाया बाधः स्यात्। तथा च संहिताधिकारे अवसानसंज्ञानिमित्तककार्याणां पाठो न युक्तः। न च वासुदेव-वाचकस्य अशब्दस्य सम्बोधनविभक्तौ वर्णद्वयसन्निधेरभावात् संहितासंज्ञाया अप्राप्त्या तत्र स्थले अवसानसंज्ञायाश्चारितार्थ्येन कथमपवादत्वेन बाध्यबाधकभावशङ्केति वाच्यम्; मा भूदअपवादत्वेन बाधशङ्का, परत्वात् अवसानसंज्ञया[1] संहितासंज्ञाया बाधो भविष्यति, एवं हीत्यपि तदधिकारे पाठस्य अयुक्ततैव इति चेत् ?

न; संहिताधिकारे अवसानसंज्ञायाः पाठसामर्थ्येन 'आकडारादेका संज्ञा' इति सूत्रे आकडरीयसंज्ञाविधायकसूत्रान्तर्गतत्वेन तान्येव संज्ञासूत्राणि गृह्यन्ते यानि स्वशास्त्रीय-संज्ञामात्रविधायकानि। अवसान-संहितासंज्ञे तु न केवलं शास्त्रीयसंज्ञे, किन्तु लोकेऽपि आभ्यां व्यवहारात् लोकसिद्धे अपि; संहिताऽवसानसंज्ञयोर्लोकविदितत्वादिति वार्त्तिकेन तयोः संज्ञयोः लोकप्रसिद्धत्वस्य स्पष्टं प्रतिपादनात्। तथा च आकडारसूत्राप्रवृत्त्या एकस्य एकैव संज्ञेति बोधनद्वारा परस्परं तयोः संज्ञयोः विरोधानुत्पादात् विरोधाभावेन बाध्य-बाधकभावस्याप्रसक्तेः, विरोधे सत्येव बलीयसा दुर्बलं बाध्यते नान्यथेति लोकप्रसिद्धन्या-यात्। न च एकत्र अभावः संज्ञी, अन्यत्र सन्निधिः संज्ञीति एकस्य संज्ञाद्वयं न प्रसक्तम्, तथा च एकस्य एका संज्ञेत्येतद्द्वारा कथं संज्ञयोर्विरोधः प्रसक्तः ? सत्यम्; संज्ञाद्वयस्य कार्यं जायमानन्तु एकस्मिन्नेव वर्णे, अत एकवर्णवृत्तित्वस्य कार्यगतधर्मस्य आरोपात् संज्ञिनोऽपि एकत्वमनुसन्धेयम्। वस्तुतः समानावधिकसंज्ञयोः समावेशे एव बाध्यबाधक-

---

नाप्राप्ति' न्याय से अनवकाशमूलक बाध होना चाहिये। यद्यपि अवसानसंज्ञा वर्णभाव, और संहिता संज्ञा सन्निधि को होने से दोनों के उद्देश्य भिन्न-भिन्न हैं, तथापि 'सत्यपि सम्भवे बाधनम्' इसके अनुसार विषयभेद में भी बाध्यबाधकभाव माना गया है। इस प्रकार संहिता संज्ञा का बाध होने से संहिताधिकार में अवसानकार्यों का पाठ असङ्गत है ?

समाधान—'आकडारादेका संज्ञा' इस सूत्र द्वारा प्रतिपादित एक को ही शास्त्रीय संज्ञा होती है—इस प्रकार का नियम लौकिक संज्ञाओं के विषय में न होने से संज्ञाद्वय का परस्पर विरोधाभाव रहने से समावेश सिद्ध होता है। इसमें संहिताकार में अवसान कार्यों का पाठ प्रमाण है। संहिता और अवसान संज्ञा लोकप्रसिद्ध हैं—इत्यर्थक वार्तिक से उक्त संज्ञायें लौकिक प्रमाणित होती हैं।

---

१. अवसानसंज्ञाफलम् 'अणोऽप्रगृह्यस्य' इति अनुनासिकः।

तदधिकारे तेषां पाठेन 'आकडार०' (१।४।१) सूत्रस्य स्वशास्त्रीयसञ्ज्ञामात्रविषयत्व-कल्पनात् । एते तु न तथा, लोकेऽपि सत्त्वात् । तदुक्तं वार्त्तिककृता–'संहितावसानयो-र्लोकविदितत्वात्' इति । न चावसानकार्येषु संहिताधिकारासम्बन्ध एवास्तु, अग्रे च मण्डूकप्लुतिरस्त्विति वाच्यम्; सत्यामुपपत्तौ मण्डूकानुवृत्तेरयुक्तत्वात् । ध्वनितञ्चेदं 'विसर्जनीयस्य सः' (८।३।३४) इति सूत्रे भाष्ये । सन्निकर्षः=सामीप्यम् ॥

भावस्य स्वीकारात् प्रकृते शङ्कासमाधानं ग्रन्थविस्तरार्थम् । टिप्पणीलक्षणे सुबन्तत्वस्य उभयत्र निमित्तत्वेन समानत्वात् समाससंज्ञापदसंज्ञयोश्च समासे क्लेशः । एतदपेक्षया भाष्यस्य एकदेशयुक्तित्वमेव । तदनुरोधी च ग्रन्थोऽपि प्रपञ्चार्थ एव ।

अवसानकार्यविधायकसूत्राणां संहिताधिकारेण सह सम्वन्ध एव न कल्प्यते । अग्रे च 'तोर्लि' इत्यादौ मण्डूकप्लुत्या संहितायामित्यनुवर्तनीयमिति न युक्तम्; सत्यां गतौ (उपाये) मण्डूकप्लुत्या अनुवृत्तेरयुक्तत्वात् । एतादृश्या अनुवृत्तेरयुक्तत्वं भाष्ये ध्वनितम् । तथाहि वृक्षः प्लक्ष इत्यादौ 'विसर्जनीयस्य सः' इत्यनेन सकारः कस्मान्न भवति ? इत्याशङ्क्य संहितायामिति अनुवर्त्य समाहितम् । ततः अनवकाशत्वात् अवसानसंज्ञया संहिता-संज्ञाया बाध इति पक्षे, पूर्वपरवर्णयोः सन्निकर्षे सत्येव संहिता संज्ञेति पक्षे च 'अणोऽप्रगृह्यस्य'इत्यत्र संहितायाः अवसानस्य चानुवृत्तौ दोषः शङ्कितः । अवसानसंज्ञाया बाधात् अथवा परस्य वर्णस्याभावात् संहितासंज्ञाया अभावाद्दोष इति तात्पर्यम् । भवन्मते तु अत्र संहिताधिकारस्य निवृत्त्या 'तोर्लि' इत्यादौ अग्निचित् लुनाति इत्यस्य सिद्धये मण्डूकप्लुत्या संहितायामित्यनुवर्त्य इष्टसिद्ध्या दोषाभावेन भाष्यकृतां दोषप्रदर्शनमसङ्गतं स्यात् । तेन ज्ञायते—संहितायाम् अग्निचिल्लुनाति, संहिताया अविवक्षायाम् अग्निचित् लुनातीति रूपद्वयसिद्धये संहिताधिकारस्य तत्र सूत्रे आवश्यकतया मध्ये 'अणोऽप्रगृह्यस्य' इत्यत्रापि सम्बन्धे दोषापादनं युक्तमेव । मण्डूकानुवृत्तिश्च अयुक्तत्वान्न कृता ।

सन्निकर्षश्च नात्र संयोगसमवायादिसम्बन्धरूपः; शब्दस्य गुणरूपत्वेन परस्परं संयोगादिना अन्वयासम्भवात् । 'नित्यो विभुः द्रव्यरूपः शब्दः' इति मतेऽपि न तत्सम्भवः; अप्राप्तयोः प्राप्तावेव संयोगस्वीकारात् । अतः संयोगो नाभिमतः इत्यभिप्रायेण आह— **सामीप्यम्** इति । प्रायः परेण इति वर्णेन इति शेषः । तदधिकारे = संहिताधिकारे । तेषाम् = अवसानकार्याणाम् । न तथा = न स्वशास्त्रीये एव । शास्त्रीयसंज्ञामात्रविषय-त्वे इत्यस्य स्वशास्त्रीयमात्रसंज्ञाविषयत्वे इति तात्पर्यम् । सत्यामुपपत्तौ = आकडारीयेषु स्वशास्त्रीयमात्रसंज्ञाविषयत्वकल्पनायां पूर्वयुक्तौ इति भावः ॥

शङ्का—अवसान कार्यों के विधायक सूत्रों से संहिताधिकार का सम्बन्ध ही नहीं है । "तोर्लि" इसमें मण्डूकप्लुति से संहिता का सम्बन्ध होगा ?

समाधान—युक्ति से सिद्ध अर्थ होने पर मण्डूकावृत्ति अयुक्त है । पूर्व का पर वर्ण के साथ सन्निकर्ष होने पर ही संहिता संज्ञा इसमें तथा अवसान संज्ञा से संहिता संज्ञा की बाध पक्ष में दोनों की अनुवृत्ति होने पर 'अणोऽप्रगृह्यस्य' इसमें भाष्यकार ने दोष दिखाया है । इससे उक्तार्थ ध्वनित होता है । यहाँ सामीप्यरूप सन्निकर्ष है, संयोगसमवायादि रूप नहीं ॥

२९. सुप्तिङन्तं पदम् । १ । ४ । १४ । **सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ।**

सुप्तिङन्तं० (१।४।१४)॥ सुबिति सुपः पकारेण प्रत्याहारः; व्याख्यानात् । यद्यपि

सुप्तिङन्तं पदम्' ॥ अत्र सूत्रे तिङ्साहचर्यात् सुप्पदेन प्रत्याहारो विवक्षितः, न तु सप्तमीबहुवचनम् । सुप्प्रत्याहारश्च न कपः पकारेण, तथा सति 'स्वादिष्वसर्वनाम-स्थाने' इत्यादौ स्वादिपदं विहाय कप्पर्यन्तस्य संग्राहकत्वेन सुप्पदमेव प्रयुञ्जीत । न च तथा कृतं सूत्रकृता, अतो न कपः पकारेण प्रत्याहारः । सप्तमीबहुवचनसुब्घटकस्य-पकारस्य एकसूत्रे पठितत्वात् प्रत्यासन्नत्वाच्च सुपः पकारेणैव प्रत्याहारः । नापि टापः पकारेण इत्यादिरूपाद् व्याख्यानात् । 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्' इति परिभाषया लब्धस्य तदादिशब्दस्वरूपस्य विशेष्यत्वेन[1] सुप्तिङोश्च विशेष णत्वेन विशेषणे तदन्तविधौ सुबन्ततिङन्तयोरित्यस्य लाभेन सूत्रे अन्तग्रहणं किमर्थम् ? तत्सामर्थ्यात् 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति परिभाषा ज्ञाप्यते । संज्ञा-निष्ठा या विधेयता तन्निरूपिता या प्रत्ययनिष्ठा साक्षादुद्देश्यता तत्प्रयोजकं पदं तदादि विशेष्यकतदन्तविधिबोधकं न भवतीत्यर्थः । तथा च पदसंज्ञानिष्ठविधेयतानिरूपिता या सुप्तिङ्निष्ठा साक्षादुद्देश्यता तत्प्रयोजके प्रत्ययवाचके सुपि तिङि च तदन्तविधेः प्रति-षेधात् तदन्तलाभो न स्यादतोऽन्तग्रहणं चरितार्थम् ।

प्राचीनास्तु प्रकृतेरुत्तरमेव प्रत्ययस्यानुशासनात् प्रकृतिं विना प्रत्ययानामनुत्पत्तेः येन विना यस्यानुपपत्तिस्तेन तस्योपपादकस्य कल्पना—इत्येवं रीत्या प्रकृत्यवयकसमुदा-यस्य विशेष्यत्वेन प्रत्ययस्य च विशेषणत्वेन विशेषणे तदन्तविधौ सुबन्तो यः स्वप्रकृत्यव-यवकः समुदायः इत्यर्थस्य सम्भवात् अन्तग्रहणस्य वैयर्थ्यं प्रतिपादयन्ति । तन्न समी-चीनम्; 'इयान्'—इत्यस्य इदम् शब्दात् वतुपि 'किमिदंभ्यां वो घः' इति घकारे "आयाने-यीनिनीयः फढखछघां प्रत्ययादीनाम्" इत्यनेन इयादेशे किमः 'इदंकिमोरीश् की' इति ईशादेशे 'यस्येति च' इति ईशादेशघटकेकारस्य लोपे सुब्विभक्तौ सिद्धिः । आदि-शब्देन 'अस्यापत्यम् इः' इत्यस्य संग्रहः । य इयान् इत्यत्र प्रकृतिभागस्य ईशादेशे तस्य लोपेन अपहारात् इः इत्यत्रापि अकारस्य प्रकृतेरपहारात् प्रत्ययमात्रमुभयत्र अवशिष्यते । तथाच प्रकृतिं विना प्रत्ययस्यानुपपत्तेरभावेन प्रत्ययेन स्वप्रकृत्यवयवकसमुदायाक्षेपस्य कर्तुमशक्यत्वात् न तदन्तांशलाभसम्भवः । प्रत्ययानामुत्पत्तौ प्रकृतेरपेक्षायाः सत्त्वेऽपि प्रत्ययस्य स्थितौ न प्रकृतेरपेक्षा । अत्रैव दृष्टान्तरूपेण 'इयान्' इत्यस्य उल्लेखः ।

सुप्तिङन्तमिति ॥ इसमें सुप् शब्द तिङ् साहचर्य से सप्तमीबहुवचन का बोधक नहीं है, किन्तु सु से सुप् के पकार तक प्रत्याहार का ग्रहण है ।

---

१. केचित्तु तदादिपदे तत् आदिर्यस्येति विग्रहे बहुव्रीहौ अन्यपदार्थस्य जिज्ञासितत्वेन आकाङ्क्षापूर्तये शब्दरूपं विशेष्यं शब्दानुशासनप्रस्तावात् अध्याहृत्य तद्विशेषणतया सुप्तिङोस्तदन्तविधिरिति वदन्ति ।

'प्रत्ययग्रहणे तदन्तग्रहणम्' (प० २३) इत्युक्तेः शब्दरूपं विशेष्यमादाय तदन्तग्रहणं सिद्धम् ।

प्रत्ययेन स्वप्रकृत्यवयवकसमुदायस्याक्षेपात् तद्विशेषणत्वेन तदन्तविधिरिति न युक्तम्; 'इयान्' इत्यादौ तस्य तादृशसमुदायेन व्यभिचारेणाक्षेपासम्भवात्, आक्षिप्तस्य शाब्देऽनन्वयाच्च । तथाऽपि सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभावज्ञापनार्थमन्तग्रहणम् । तेन घसंज्ञा तरप्तमपोरेव, न तदन्तस्य । तेन 'गौरीब्राह्मणीतरा' इत्यत्र न ह्रस्वः । एतन्निषेधसामर्थ्यादेव प्रदेशेष्वपि न तदन्तविधिः । न च ज्ञापितेऽपि व्यर्थम्, पदप्रदेशे प्रत्ययग्रहणे तदन्तग्रहणेनैव सिद्धेरिति वाच्यम्; पदत्वस्य प्रकृतिसाधारणतया पदग्रहणे प्रत्ययग्रहणस्यैवाभावात् ।

किञ्च, आक्षिप्तस्य शाब्दबोधे मानं नाङ्गीक्रियते । शक्त्या लक्षणया व्यञ्जनया वा उपस्थितस्यैव पदार्थस्य शाब्दबोधे भानस्य नियमात् । एवञ्च आक्षिप्तायाः प्रकृतेः शाब्दबोधे भानाभावाद् आक्षेपेण तदन्तविधेरुपपत्तिर्न सम्भवतीति भावः ।

शब्दरूपमिति । तदादीति शब्दस्वरूपमित्यर्थः । प्रत्ययेन = सुप् तिङ्रूपेण ।

स्वप्रकृत्येति । स्वपदेन प्रत्ययः, प्रकृतिपदेन तत्तत्प्रत्ययविधानावधिर्गृह्यते । स्वश्च प्रकृतिश्चेति द्वन्द्वः । स्व प्रकृती अवयवौ यस्य स तादृशः समुदायः । तद् विशेषणत्वेन = सुप्तिङोस्तादृशसमुदायविशेषणत्वेन । तेन = परिभाषास्वीकारेण । परिभाषायाः स्वीकारादेव 'तरप्तमपौ घः' इत्यत्र तदन्तविधेरभावात् तरबन्त-तमबन्तयोर्न घसंज्ञा । अतएव गौरीब्राह्मणीतरा इत्यत्र 'घरूपकल्पप्' इत्यादिना सूत्रेण गौरीशब्दे न ह्रस्वः । तदन्तविधौ तु तरबन्तस्य घसंज्ञायां ब्राह्मणीतरा इत्यस्य तरबन्ततदादित्वेन विशिष्टस्य घसंज्ञायां ततः पूर्वस्य गौरीशब्दस्य ह्रस्वः स्यात् । पुंवद्भावस्तु गौरीशब्दे नाशङ्कनीयः, 'अष्टवर्षा भवेद् गौरी' इति यमवचनात् तस्य वयोवाचकत्वेन 'जातेश्च' इत्यनेन पुंवद्भावस्य प्रतिषेधात् ।

न च घसंज्ञाविधायके सूत्रे तदन्तविधेः प्रतिषेधेऽपि 'घरूप' इति सूत्रे तदन्तविधिना घान्ते तदादौ इत्यर्थलाभेन गौरीशब्दे ह्रस्वप्राप्तेस्तादवस्थ्यादिति वाच्यम्; संज्ञाविधिसूत्रे तदन्तविधिनिषेधसामर्थ्यात् प्रदेशे घरूपेत्यादावपि न तदन्तविधिरिति ज्ञापनेनादोषात् । नच 'सुप्तिङन्तम्' इति सूत्रस्य अन्तग्रहणेन 'संज्ञाविधौ प्रत्ययग्रहणे' इति परिभाषायां ज्ञापितायामपि अन्तग्रहणस्य वैयर्थ्यं दुर्वारमेव । सूत्रे अन्तग्रहणं मास्तु, 'संज्ञाविधौ' इति परिभाषया तदन्तविधेः प्रतिषेधेन सुप्तिङोः पदसंज्ञा लभ्यते । तथाच पदत्वं निमित्तमाश्रित्य विधायके सूत्रे (प्रदेशे) 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्' इति परिभाषया तदन्तस्य बोधने पदान्तेत्यर्थसम्भवेन सुबन्ततिङन्तयोर्ग्रहणं जातमेव । ततश्चेष्टसिद्ध्या तदन्तलाभाय सूत्रे किमन्तग्रहणेन ? इत्यपि न वक्तव्यम् । 'स्वादिष्वसर्वनामस्थाने' इत्यनेन स्वादिप्रकृतेः पदसंज्ञाविधानेन पदत्वस्य

शङ्का—सुप् तिङ् प्रत्यय होने के कारण प्रत्ययग्रहणपरिभाषा से तदादि शब्दस्वरूप विशेष्यक तदन्तविधि द्वारा सुबन्त तिङन्त का लाभ सिद्ध है । तदर्थ अन्त ग्रहण सूत्र में व्यर्थ है । किसी का प्रकृति के बिना प्रत्यय का सद्भाव असम्भव होने से प्रकृत्यवयवपूर्वक समुदाय का

'यस्मात्प्रत्ययविधिः' (१।४।१३) इत्याद्यनुवृत्तेः पदसमुदायस्य न पदत्वम्। 'इयान्' इत्यादौ यस्मात्प्रत्ययविधिस्तदादितद्धितान्तत्वं व्यपदेशिवद्भावेन बोद्धव्यम्। तेनाशास्त्रीयस्याप्येकाच्त्वादेरतिदेशात्। विशिष्टनिष्ठव्यवहारनिमित्तकार्याणि असहायेऽपि कर्तव्यानीति तदर्थात्। अत एव 'इयन्मात्रम्' इत्यादौ 'वत्यन्ताः स्वार्थे' इति मात्रच्सिद्धिः।'हरिषु' इत्यादौ सोस्तु नैवं पदत्वम्; 'हलि सर्वेषाम्' (८।३।२२) इति निर्देशेन ससहाये तदप्रवृत्तेः।

प्रकृतिप्रत्ययोभयसाधारणतया प्रत्ययमात्रवृत्तित्वाभावेन 'प्रत्ययग्रहण' परिभाषाया अप्रवृत्तेः तदन्तविधेरसम्भवात्। तस्याः प्रत्ययमात्रग्रहणे एव प्रवृत्तेः स्वीकारात्। विस्तरस्तु **विजयायां** द्रष्टव्यः।

ननु 'संज्ञाविधौ' इति परिभाषया तदन्तविधेः प्रतिषेधे फलाभावात् तत्सहचरितस्य तदादेरित्यंशस्याप्यनुपस्थितौ सुबन्तानां तिङन्तानां समुदायस्यापि पदसंज्ञा स्यात्? अत आह—**यस्मादिति**। 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' (१।४।१३) इति सूत्रात् 'सुप्तिङन्तं पदम्' (१।४।१४) इत्यत्र यस्मात् प्रत्ययविधिस्तदादीत्यस्यानुवृत्त्या सुपां तिङां यस्मात् विधानं तदादितदन्तस्यैव पदसंज्ञा। अतो न पदानां समुदायस्य पदसंज्ञा, पदसमुदायात् सुप्तिङोरविधानेन तस्य तदादितदन्तत्वाभावात्। एवं व्याख्यानस्य फलं देवदत्तः पचति भवति इत्यत्र 'तिङ्ङतिङः' इत्यनेन भवतेर्निघातो न। देवदत्तः पचतीति समुदायस्य अतिङन्तत्वेऽपि पदत्वाभावात्, केवलस्य च तिङन्तत्वात्।

'सनाद्यन्ता धातवः' (३।१।३२) इत्यत्र 'प्रत्ययग्रहणे यस्मात्' इति परिभाषयैव तदादेर्बोधः सम्भवति। तत्र सूत्रादनुवृत्तिरशक्या; सूत्रस्य दूरस्थत्वात्। तथा च वह्निर्यथा यावद् अदग्धं तावदेव दहति, नतु दग्धमपि—इत्यर्थकेन अदग्धदहनन्यायेन तदन्तांशस्य सिद्धतया तस्यानुपस्थापनेऽपि तदाद्यंशस्य परिभाषया उपस्थापने बाधकाभावात् सूत्रादनुवृत्तेर्न फलमिति केचित्।

'इयान्' इत्यादौ प्रकृतिरहिते तदादितदन्तत्वं व्यपदेशिवद्भावे उपपाद्य पदसंज्ञा बोध्या। कार्यकालपक्षाभिप्रायेण समाधानमिदम्। यथोद्देशे तु इदंशब्दस्य सत्त्वे एव पदसंज्ञायां लोपोत्तरम् एकदेशविकृतन्यायेन तदादि तदन्तत्वं सूपपादम्। न च तदादित्वादेरशास्त्रीयत्वात् कथं तदाश्रयणे व्यपदेशिवद्भावस्य प्रवृत्तिः। शास्त्रीयत्वञ्च शास्त्रस्थ-

---

प्रत्यय द्वारा आक्षेप होगा, उसी को विशेष्य मानकर विशेषण प्रत्यय से तदन्त का लाभ होता है—यह कथन युक्तिसिद्ध नहीं है। इयान् इत्यादि स्थल में प्रकृतिभाग के न रहने पर भी प्रत्यय का श्रवण होने से पूर्वोक्त नियम व्यभिचरित है। तथा पदजन्य पदार्थ की उपस्थिति न होने के कारण आक्षिप्त पदार्थ का शाब्दबोध में भाव भी नहीं होता ?

समाधान—अन्तग्रहण के सामर्थ्य से संज्ञाविधानस्थल में प्रत्ययवाचक पद तदन्त का बोधक नहीं होता—इत्यर्थक 'संज्ञाविधौ' इस परिभाषा के ज्ञापनार्थ अन्तपदोपादान चरितार्थ है।

इसलिए 'तरप्तमपौ घ' इसमें तदन्तविधि न होने से तरबन्त तमबन्त को घ संज्ञा नहीं होती। इसी कारण गौरीब्राह्मणीतरा इसमें ब्राह्मणीतरा इसको तरवन्त होने से घ संज्ञा निमित्तक 'घरूप' सूत्र के द्वारा गौर शब्द में ह्रस्व नहीं हुआ।

'निजौ चत्वार एकाचः' इति भाष्यन्तु अभ्युपेत्यवादेन। ध्वनितं चेदम् 'आदेच उपदेशे' (६।१।४५) 'तास्यनुदात्तेत्' (६।१।१८६) इत्यादौ भाष्ये। तत्र हि 'ढौकते' इत्यौकारस्य, 'हतः' इत्यादावकारस्यैजन्तोपदेशत्व मकरान्तोपदेशत्वं व्यपदेशिवद्भावेनाशङ्क्याथंवता व्यपदेशिवद्भाव इत्युक्तम्। यो वर्णोऽर्थवाँस्तेन व्यपदेशिवद्भावः। वर्णस्यार्थवत्त्वञ्च 'इयाय' इत्यादावसहाये एव, न तु प्रकृते इति तदर्थः। एवं चैकस्मिन्नित्यस्यार्थवतेत्यनेनोक्ते इति दिक् ॥

पदसङ्केतितत्वरूपम्। तद्भिन्नत्वादिदमशास्त्रीयमिति वाच्यम्। व्यपदेशिवद्भावेन इयाय इत्यादौ अशास्त्रस्यापि एकाच्त्वादिधर्मस्य अतिदेशदर्शनात् शास्त्रीयस्यैव धर्मस्यातिदेश इति नियमाभावात्। अतएव इयाय इत्यत्र एकः इकाररूपोऽच् न स्वस्मिन् वर्तितुमर्हति; भेदे आधाराधेयसम्भवात्। तथा च एकाच्त्वाभावः स्फुटस्तत्र। एवमेव इयन्मात्रमित्यत्र वत्वन्तत्वाभावात् मात्रच् प्रत्ययो न स्यात्; प्रकृतिभागस्य क्लृप्ततया तदादिदवन्तत्वविरहात्। व्यपदेशिवद्भावेन अशास्त्रीयस्यापि अतिदेशे तु एकाच्त्वस्य वत्वन्तस्य चातिदेशेन उक्तप्रयोगाणां सिद्धिरिति भावः।

व्यपदेशिवद्भावस्य असहाये एव प्रवृत्तिः। अतएव हरिषु इत्यत्र सुमात्रस्य व्यपदेशिवद्भावेन सुबन्ततदादित्वमापाद्य पदसंज्ञायां जातायां 'सात्पदाद्योः' इत्यनेन पदादित्वात् षत्वस्य निषेधो न; प्रकृतिद्वारा विशिष्टस्य सुबन्तत्वसम्भवेन ससहायत्वात्। मुख्यव्यपदेशभागघटकत्वं ससहायत्वम्। मुख्यव्यपदेशभानिगो—हरिषु इति, तद्घटकत्वं सु-इत्यस्य। न च असहाये व्यपदेशिवद्भावस्वीकारे 'निजौ चत्वारः एकाचः' इति भाष्यासङ्गतिः। तथाहि—निज्, इज्, नि—इत्येषु इकाररूपोऽच् प्रत्येकं त्रिष्वपि

शङ्का—संज्ञा प्रदेश 'धरूपं' इत्यादि स्थल में तरप् तमप् मात्र का बोधक घ पद से तदन्तविधि प्रत्ययग्रहण परिभाषा द्वारा होने पर गौरी[1] ब्राह्मणीतरा इसमें ह्रस्वापत्ति दुर्वार है ?

समाधान—'संज्ञाविधौ' इससे तदन्तविधि निषेध के सामर्थ्य से प्रदेश स्थल में भी तदन्त विधि नहीं होती।

शङ्का—अन्तग्रहण, 'संज्ञाविधौ' इस परिभाषा के ज्ञापनोत्तर भी व्यर्थ है; क्योंकि 'ससजुषोरुः' इत्यादि पदसंज्ञाप्रदेश में सुप्तिङ्मात्र की पद संज्ञा होने से पद, प्रत्ययवाचक है। अतः प्रत्ययग्रहणपरिभाषा द्वारा तदन्त का लाभ हो जाने से हो तदन्त की संज्ञा का प्रयोजन सिद्ध हो जाता है ?

समाधान—"स्वादिषु" इससे प्रकृति को पदसंज्ञा का विधान होने से पद, प्रत्ययमात्र का वाचक नहीं है। प्रत्ययग्रहणपरिभाषा प्रत्ययमात्रग्रहण में लगती है। तदादि तदन्त समुदाय ही सुबन्त है। उसी की पदसंज्ञा होने से पदसमुदाय पद नहीं होता। 'इयान्' इत्यादि प्रत्ययमात्र स्थल में व्यपदेशिवद्भाव से तदादि तदन्तत्व के व्यवहार से दोष नहीं है। व्यपदेशिवद्भाव शास्त्रीय अशास्त्रीय दोनों प्रकार के धर्मों का होता है। अतएव एकाच्त्व के अशास्त्रीय दोनों पर भी अतिदेश माना गया है।

---

१. 'अष्टवर्षा भवेद् गौरी' इसके अनुसार गौरी शब्द वयोवाची है, अतः संज्ञावाची होने से पुंवद्भाव नहीं हुआ। अथवा—यह विग्रहवाक्य का प्रदर्शन है। इसमें ह्रस्व नहीं हुआ।

पूर्वोक्तेषु समुदायेषु अन्यपदार्थेषु भवितुमर्हति, परम् इकाररूपोऽच् इकारमात्रे कथं स्यात्; स्वस्मिन् स्वस्यावृत्तेः। तथाच निज्, इज्, नि, इ-इत्येतेषु क्रमेण त्रयाणाम् एकाच्त्वेऽपि चतुर्थस्य इकारमात्रस्य एकाच्त्वाभावात् चत्वार एकाचो न सम्भवन्ति। त्रयाणामेकाच्त्वे सम्भवति, एकाच्त्वव्यवहारस्यासहायत्वाभावात् व्यपदेशिवद्भावेनापि इकारे तस्य व्यवहारस्य कर्तुमशक्यत्वादिति वाच्यम्; असहाये व्यपदेशिवद्भावः-इत्यपर्यालोचनया तस्य भाष्यस्य प्रवृत्तेः। तस्मादेषा एकदेशिन उक्तिरिति न विरोधः।

असहायेऽपि व्यपदेशिवद्भावो भाष्यान्तरेण ध्वन्यते-ढौकते इत्यत्र व्यपदेशिवद्भावेन ढौ इत्यस्य एजन्तत्वात् 'आदेच उपदेशेऽशिति' इत्यनेन आत्वम्, एवं हृत इत्यत्र 'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्हिङ्वोः' इत्यनेनानुदात्तस्वरः प्राप्नोति इत्याशङ्कायाम् 'अर्थवता व्यपदेशिवद्भावः' इत्युत्तरितम्। यो हि वर्णोऽर्थवान् तेन व्यपदेशिवद्भावः। अर्थबोधकशब्देन व्यपदेशिना = मुख्यव्यवहारवता सदृशो व्यवहारो लभ्यते इति परिभाषार्थः। 'अर्थवता' इत्यनेन असहायत्वमुपलक्षितम्। असहाये एव तन्मात्रस्यार्थवत्त्वम्। विस्तरस्तु परिभाषेन्दुशेखरे द्रष्टव्यः। इत्याद्यनुवृत्तेरिति। आदिपदेन तदादेर्ग्रहणम्। तेन इति। व्यपदेशिवद्भावेन इत्यर्थः। अतएव = तदादित्वलाभादेव। नैवं पदत्वम् = व्यपदेशिवदित्यंशेन पदत्वम्। तत्र हि = सूत्रद्वये हि क्रमेणान्वयः॥

असहाय में भी मुख्यव्यवहारप्रयुक्त कार्यों को करना चाहिए—यह न्याय का तात्पर्यार्थ है। इसी कारण प्रकृतिभाग के लुप्त होने पर भी इयत् शब्द को ही व्यपदेशिवद्भाव से वत्वन्त तदादि मान कर वत्वन्त से स्वार्थ में मात्रच्प्रत्यय की सिद्धि होती है। ससहाय में व्यपदेशिवद्भाव नहीं होता। अन्यथा हरिषु इसमें षु मात्र को तदादि तदन्त मानकर 'सुप्तिङन्तम्' इससे पद संज्ञा होने से "सात् पदाद्योः" इससे पदादि सकार का निषेध हो जायगा। षत्व का निषेध नहीं होता—इसमें "हलि सर्वेषाम्" सूत्र का मूर्धन्य षकार से निर्देश प्रमाण है। अन्यथा यहाँ भी उक्त युक्ति से षत्व का निषेध हो जायगा।

शंका—भाष्यकार ने 'निज' में नि इज् निज और इ इस प्रकार चार एकाच् होने का संकेत दिया है। इकाररूप एक अच् जिसमें रहता है उसको यहाँ एकाच् माना है। इकाररूप अच् मुख्य रूप से नि इज् और निज् में है। इकार में स्ववृत्ति स्व न होने से इकार नहीं है। अतः व्यपदेशिवद्भाव से स्व में स्व के भेदव्यवहार द्वारा स्व की वृत्तिता होती है और तन्मूलक इकार में भी एकाच्त्व का कार्य प्राप्त होता है। यहाँ एकाच्त्व उक्त तीन में हो सकता है। अतः असहाय न होने से व्यपदेशिवद्भाव की प्राप्ति नहीं होगी। इसलिये "चत्वार एकाचः" इस भाष्य की असङ्गति दुर्वार है?

समाधान—असहाय के पर्यालोचन के विना यह भाष्य प्रवृत्त है। अतएव एकदेशी होने से इसका विरोध अकिञ्चित्कर है।

अतएव 'ढौकते' यहाँ व्यपदेशिवद्भाव से औकार में एजन्तोपदेशत्व, 'हृतः' इसमें अकार में अकारान्तोपदेशत्व मानकर आद्य में "आदेच उपदेशे" इससे आत्व, अन्त्य में 'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्हिङ्वोः' (६।१।१८६) से प्राप्त अनुदात्तशंका का 'अर्थवता व्यपदेशिव-

३०. हलोऽनन्तराः संयोगः । १ । १ । ७ ।

हलोऽनन्तराः (१।१।७) **'गर्गाः शतं दण्ड्यन्ताम्' इत्यत्र समुदाये शतदण्डनवदत्र समुदायस्यैव सञ्ज्ञा, न प्रत्येकम्; अनन्तरा इत्युक्तेश्च तस्य विशेषणताया एवौचित्यात् ।**

हलोऽनन्तराः संयोगः (१।१।७) ॥ "गर्गाः शतं दण्डयन्ताम् अर्थिनश्च राजानो हिरण्येन भवन्ति' इति भाष्योक्तन्यायः । यथा एकैकस्य गर्गस्य शतेन रूप्यकैर्दण्डो न विधीयते, किन्तु गर्गाणां समुदायो दण्डयते; तथैवात्र हल्समुदायः संयोगसंज्ञको भवति, न तु प्रत्येकम् । अपरोऽपि न्यायः—'सर्वे ब्राह्मणा भोज्यन्ताम्, माठरकौण्डिन्यौ परिवेविषाताम्' इति । ब्राह्मणाः भोजनकर्तृत्वेन माठरकौण्डिन्यौ च परिवेषणकर्तृत्वेन अनेन न्यायेनाभिमताः । भोजनक्रिया प्रत्येकस्मिन् भोजनकर्तरि ब्राह्मणे विश्राम्यति, न तु ब्राह्मणसमुदाये यथा, तथा चेत् अत्र संयोगसंज्ञा अवयवस्य प्राप्नोति न हल्समुदायस्य । उभावपि न्यायौ शास्त्रे आश्रितौ । तथाच कतरेण व्यवस्थेति विनिगमकान्तरमाह—**अनन्तरा** इति । नास्ति अन्तरा व्यवधानं येषामित्यर्थकस्य अनन्तरशब्दस्य व्यवधानशून्यार्थकत्वं प्रतीयते । व्यवधानञ्च द्वयोर्मध्ये केनाप्यन्येन भवति । नहि एकस्य केनापि व्यवधानं दृष्टम् । एवञ्च 'संयोगो विप्रयोगश्च साहचर्यं विरोधिता' इत्याद्यभियुक्तोक्तदिशा विप्रयोगस्यापि संयोगवद् अर्थविशेषनिश्चायकत्वेन व्यवधानराहित्ये विवक्षिते व्यवधानयोग्यतायाः सत्त्वमप्यपेक्षितम् । तथा च द्वयोरेव व्यवधानयोग्यतायाः सम्भवेन द्वयोरेव संयोगसंज्ञा, न प्रत्येकमित्याशयः ।

ननु हलः प्रत्येकं संयोगसंज्ञा अनन्तराश्च संयोगसंज्ञकाः स्युरित्यर्थे प्रत्येकं संयोगसंज्ञाया आपत्तिस्तदवस्था ? अत आह—**तस्येति** । अनन्तरा इति हलो विशेषणम्, नतु स्वातन्त्र्येण संज्ञाया उद्देश्यम् । अथवा अयमर्थः—अविद्यमानं सद् इतरव्यावर्तकम् उपलक्षणमुच्यते । 'काकवन्तो देवदत्तस्य गृहाः' इत्यत्र काक उपलक्षणम् । अविद्यमानोऽपि काकः तद्गृहं गृहान्तराद् व्यावर्तयति । तथा प्रकृतेऽपि आनन्तर्यमुपलक्षणम् । तथाच क्वचित् वर्णद्वयस्थले आनन्तर्यस्य सम्भवेन इह एकस्मिन् तद्वर्णे आनन्तर्ययोग्यतारूपानन्तर्यस्याभावेऽपि संयोगसंज्ञायाम् उपलक्षितस्य आनन्तर्यस्य निमित्तत्वेन सम्प्रति तदभावेऽपि सा संज्ञा प्राप्नोति । तद्वारणाय आह—**तस्य विशेषणताया** इति । आनन्तर्यं विशेषणमेव, न तूपलक्षणमिति न दोषः ।

शतदण्डनवत् इति । गर्गसमुदायस्य शतरूप्यात्मको दण्डो यथा, तथा संयोगसंज्ञासूत्रेण हल्समुदायस्यैव संज्ञा, न प्रत्येकमिति । तस्य = आनन्तर्यस्य । **एव** इति । एवकारेण उपलक्षणताया व्यवच्छेदः ।

द्भावः' इसके द्वारा समाधान दिया । समुदाय के रहते अवयव अर्थवान् नहीं है । इससे असहाय में व्यपदेशिवद्भाव की प्रवृत्ति ध्वनित होती है । जो अर्थवान् वर्ण है उसी स्थान में व्यपदेशिवद्भाव होता है । जैसे—इयाय । यहाँ इकार वर्णमात्र अर्थवान् है । ससहाय में वर्णमात्र अर्थवान् नहीं हो सकता ॥

हलोऽनन्तरा इति । जैसे—प्रत्येक गर्ग से सौ रुपये का दण्ड नहीं लिया जाता, किन्तु गर्गसमुदाय से लिया जाता है; इसी प्रकार संयोगसंज्ञा प्रत्येक हल् को नहीं, किन्तु हल्समुदाय को

अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ।

यत्तु 'संयुज्यन्ते वर्णा यत्रेत्यन्वर्थसंज्ञाबलान्न प्रत्येकं संज्ञा' इति, तन्न, घटपटौ संयुज्येते यत्रेत्यादौ संयुज्यमानपदार्थातिरिक्तस्यैवान्यपदार्थतया प्रतीतेर्व्युत्पन्नत्वेन तदतिरिक्ततद्घटितपदवाक्यरूपसमुदायस्य संज्ञापत्तावनिष्टापत्तेः । महासंज्ञा तु प्राचामनुरोधादेव । तेन 'सुदृषद्भाति' इत्यत्र संयोगान्तलोपो नेत्यन्यत्र विस्तरः ।

कस्यचिन्मतं दूषयितुमुपक्रमते—**यत्तु** इति । संयोगेति महत्याः संज्ञायाः करणाद् अन्वर्था = व्युत्पत्तिलभ्यार्थविशिष्टा संज्ञा विज्ञायते । एवञ्च संयुज्यन्ते वर्णा यत्रेति व्युत्पत्तिबलादेव द्वयोः संज्ञेति लभ्यते । एतन्निरस्यति-**तन्न** इति । यथा घटपटौ संयुज्येते, स्थले संयुज्यमानघटपटार्थातिरिक्तस्य अन्यपदार्थस्य प्रतीयमानतया भिन्नः प्रासादादिर्बोध्यते, तथैवात्रापि संयोगसंज्ञायां तद्वर्णघटितस्य तदतिरिक्तस्य वाक्यात्मकसमुदायस्य ग्रहणेन हल्समुदायस्य संज्ञा न स्यात् । यत्तु आचारिणो मूलविरुद्धार्थप्रतिपादनैकव्रतिनः 'व्रीहयः संयुज्यन्ते यत्र राशौ ईदृशप्रयोगदर्शनात् संयुज्यमानातिरिक्तोऽन्यपदार्थ इति नियमो व्यभिचरितः' इत्याहुः । तन्न । 'धान्यानां राशिः' एवंविधप्रयोगस्य दर्शनेन अभिन्नेऽपि भेद आरोपितः । पुरुषा एव सेना, वृक्षा एव वनम्, परं तत्र भेदेन व्यवहारः आरोपेणैव उपपाद्यते यथा, तथात्रापि आरोपितभेदेन तद्व्यवहारोपपत्तौ अन्यपदार्थः अन्य एव भवतीति नियमो न क्वचिदपि व्यभिचरति । भेदो वास्तविक एव इति न विवक्षितः ।

अथवा समूहिनोऽतिरिक्तः समूहः, तदापि दोषो न । राशिरपि धान्यात्मक एव । तेन=समुदायस्य सञ्ज्ञाकरणेन । अतः सुदृषद् भातीत्यत्र दकारस्य संयोगान्तलोपो न; दकारमात्रे संयोगाभावात् भकारेण सह संयोगसंज्ञायां संयोगान्तत्वाभावात् । वर्णा यत्रेति । समुदाये इत्यर्थः । प्रत्येकं संज्ञा = संयोगसंज्ञा ।

होती है । एवं अशङ्खचक्रो हरिः यहाँ शङ्खचक्ररहित कहने पर भी शङ्खचक्रधारणयोग्यता वाले का ही ग्रहण होता है; क्योंकि संयोग के समान विप्रयोग भी संदिग्ध अर्थ का निर्णायक होता है । तदनुसार यहाँ भी अनन्तरा अर्थात् व्यवधानरहित अर्थ से व्यवधान की योग्यता विवक्षित है । व्यवधान एक में नहीं होता—इससे भी समुदाय की ही प्रतीति सिद्ध होती है । कभी हल्समुदाय में आनन्तर्य रहने पर, आनन्तर्य के उपलक्षण मानने से समुदायघटक एक हल् की भी संयोगसंज्ञा प्राप्त हो जायगी, अतः 'अनन्तराः' इसको 'हलः' का विशेषण मानते हैं । यह संज्ञिकोटि में प्रविष्ट होकर दूसरों का व्यावर्तक है, अतः विशेषण है ।

"संयोग की 'संयुज्यन्ते वर्णाः यत्र'—इस व्युत्पत्ति के बल से लभ्य अर्थ वश प्रत्येक की संयोगसंज्ञा नहीं होती;क्योंकि वर्णों का संयोग एक में सम्भव नहीं, अपितु दो में ही हो सकता है"—यह मत ठीक नहीं है । समासघटक पदार्थों से अतिरिक्त 'यत्र' इससे प्रतीयमान अन्य पदार्थ को इस पक्ष में संयोगसंज्ञा प्राप्त होगी । वह अन्यपदार्थ वर्णघटित पद और वाक्य समुदाय होगा । 'संयोग' इस प्रकार की महती संज्ञा प्राचीनों के अनुसार है । प्रत्येक को संज्ञा न होने से 'सुदृषद् भाति' यहाँ संयोगान्त का लोप नहीं हुआ; क्योंकि संयोगान्त भ पद नहीं हैं । जो पद है सुदृषद् उसके दकारमात्र की संयोगसंज्ञा नहीं है, अतः संयोगान्त नहीं है ।

'हलः' इति बहुवचनं सौत्रम्। यद्वा, हलौ च हलश्चेत्येकशेषः। 'स्वरितात्संहितायाम्' (१।२।३९) इति सूत्रेऽनुदात्तानामिति पदे तथैकशेषस्य भाष्ये करणात्। तेन द्वयोरपीति 'शिक्षा' इत्यादौ 'गुरोश्च हलः' (३।३।१०३) इति अ-प्रत्ययः सिध्यति। यत्रापि बहवः श्लिष्टास्तत्रापि द्वयोर्द्वयोरेव, न बहूनाम्; झलि संयोगादिलोपविधानात्। बहूनामपीति चिन्त्यमेव; फलाभावात्। तत्र तत्राङ्गपदधात्ववयवसंयोगस्यैवाश्रयणेन तादृशस्य च त्रयाणां संयोगस्याभावादिति भाष्ये स्पष्टम्।

ननु हल्त्वजातेरैक्यात् जातिपक्षे एकवचनेन निर्देश उचितः, व्यक्तिपक्षे 'हलः' इति निर्देशस्योपपत्तावपि द्वयो हलोः संयोगसंज्ञा न स्यात् बहूनामेव स्यात्, अत आह— हल इति। बहुवचनमविवक्षितम् इति भावः। नच 'जात्याख्यायाम्' इति सूत्रेण जातौ बहुवचनं कल्प्यतामिति वाच्यम्; आनन्तर्यविशेषणस्य जातौ असम्भवात्। जातौ संज्ञायाः फलाभावाद् अवतरन्ती संज्ञा प्रतिहल्व्यक्ति विश्राम्येद्, एवं लाघवात् जातौ एकवचननिर्देशस्य औचित्याच्चेत्यादिदोषबाहुल्यात् सौत्रत्वादेकवचनमित्येव युक्तम्। तथाच अनेकार्थकं बहुवचनम्, नतु बहुत्वार्थकमित्यर्थः।

अथवा हलौ च हलश्च इत्येवमेकशेषकरणेन हल इत्यत्र बहुवचनस्योपपत्तिः। तथाच हल्द्वयस्य अनेकेषां हलाञ्च संयोगसंज्ञायाः प्राप्तिः। प्राचीनमतेन इदं सम्भवति; स्वमते तु 'बहूनां संयोगसंज्ञा नेष्यते' इत्यग्रे वक्ष्यमाणत्वात्। द्वयोर्हलोः संयोगसंज्ञा द्विविधेऽपि सूत्रव्याख्याने सिध्यति। एतत्फलन्तु शिक्षा इत्यत्र हल्द्वयस्य संयोगसंज्ञायां 'गुरोश्च हलः' (३।३।१०३) इत्यनेन गुरुमतो हलन्ताद् धातोः अकारस्य विधानम्। परस्मिन् संयोगे सति पूर्वस्य इकारस्य 'संयोगे गुरु' इत्यनेन गुरुसंज्ञायां शिक्ष्धातो गुरुमत्त्वं सिध्यति। बहूनामेव संयोगसंज्ञापक्षे संयोगसंज्ञा न स्यात्।

यत्रापि बहूनां हलामव्यवधानेन सन्निधानं तत्रापि द्वयोर्द्वयोः वर्णयोरेव संयोगसंज्ञा,न बहूनां हलाम्। 'स्कोः सयोगाद्योरन्ते च' इति सूत्रेण झलि परे यः संयोगः तदाद्योः सकारककारयोर्लोपो विहितः। स च न सम्भवति। झल्सहितस्य अन्यहल्वर्णद्वयस्य संयोगसंज्ञायां संयोगो न झल्परः स्यात्; सर्वत्रैव हि झल्सहितस्य संज्ञायाः प्राप्तत्वात्। अतः सूत्रवैयर्थ्यभिया बहूनां संज्ञा नेति युक्तम्। द्वयोर्द्वयोः संयोगसंज्ञायान्तु तृतीयस्य हलो झल्रूपत्वे सूत्रस्य चारितार्थ्यात्। यथा मग्नः इत्यत्र मस्ज्धातोः क्तप्रत्यये 'मस्जि-

---

दो हलों की संयोगसंज्ञा के पक्ष में 'हलः' इसमें सौत्रत्व हेतु से बहुवचन है। अथवा 'हलौ च हलश्च' इस प्रकार द्विवचन बहुवचनान्तों का एकशेष होने से बहुवचन की उपपत्ति करनी चाहिए। 'स्वरितात्संहितायामनुदात्तानाम्' इसके 'अनुदात्त' पद में 'अनुदात्तौ च अनुदात्ताश्च' इस प्रकार एकशेष 'स्वरितात्' इसके भाष्य में देखने से यहाँ भी पूर्वोक्त रीति से एकशेष के द्वारा द्वित्वविशिष्ट हल् एवं बहुत्वविशिष्ट हल् का बोध होता है। वस्तुतः स्वमत में अनेक हलों की संयोगसंज्ञा में फल न होने से 'हलौ च हलश्च' इसकी आवश्कता नहीं है। द्वित्वविशिष्ट हल् को भी संज्ञाविधान से 'शिक्षा' पद में 'संयोगे गुरु' इसके द्वारा गुरुसंज्ञा होने के कारण 'गुरोश्च हलः' इससे अ-प्रत्यय सिद्ध होता है।

आनन्तर्यं व्यवधानाभावः, व्यवधानञ्च विजातीयेनैवेत्याशयेनाह—अज्भिरिति। अत्र कुत्वं न्याय्यम्। अत एव 'हयवरट्' (मा० सू० ५) सूत्रे 'अचोऽक्षु' इति भाष्यप्रयोगे कुत्वं दृश्यते। स्वरैरव्यवहिता इति तूचिता वृत्तिः।

हलः किम्? तितउ देव। अत्र 'गुरोः' (८। २। ८६) इति प्लुतः स्यात्।

अनन्तराः किम्? द्रप्सम्। अत्र सकारमकारयोः संयोगत्वे 'स्कोः' इति लोपः स्यात्॥

नशोर्झलि' इत्यनेन सकारजकारयोर्मध्ये नुमि सकारनकारयोः संयोगसंज्ञायां जकारस्य झल्त्वम्, तस्मिन् सति यः सकारनकारयोः संयोगः तस्यादिभूतस्य सकारस्य लोपः सिद्धः। अतः फलाभावाद् बहूनां संयोगसंज्ञा न भवतीति मन्तव्यम्।

बहूनां संयोगसंज्ञायाः फलं द्वयोः संयोगसंज्ञायाः व्यावृत्तिरिति न युक्तम्। धात्ववयवस्य पदावयवस्य शृङ्गावयवस्य इत्येवंरूपार्थस्य भाष्ये तत्र तत्राश्रयणेन एकस्मिन् प्रयोगे बहूनां द्वयोश्च संयोगसंज्ञायां प्राप्तायां बहूनां न संज्ञा; फलाभावात्। धात्ववयवेति व्याख्यानेन वर्णद्वयसंयोगोऽपेक्ष्यते। अङ्गसंज्ञायां वर्णत्रयस्य अन्तेऽभावाद् बहूनां संज्ञा निष्फला। वर्णत्रयसंयोगस्य धात्ववयवस्याभावेन असङ्गतिः स्यात्। द्वयोश्च वर्णयोः संयोगसंज्ञैव न तत्र--इति अनौचित्यात् द्वयोरेव संज्ञा; बहूनां तु फलाभावादेव संज्ञायाः निरासात्।

तितउ देव इति। तितउना दीव्यति इत्यर्थः। अत्र सूत्रे हल्ग्रहणाभावे 'अनन्तराः' इत्यस्य सत्त्वेऽपि अव्यवहितयोः अज्झलोरपि 'तउ' इत्यस्य संयोगसंज्ञायां संयोगात् पूर्वस्य तिघटकेकारस्य गुरुसंज्ञायाम् 'गुरोरनृतः' इति प्लुतः स्यात्। अतो हल्ग्रहणम्। यदि तु 'अनन्तराः' इत्यनेन विजातीयेन व्यवधानराहित्यं विवक्षितम्, तथाच तकारसहितस्य संयोगसंज्ञा न प्राप्नोति; तदा प्रत्येकं संयोगसंज्ञापक्षे तकाराकारस्य प्लुतः स्यात्। पक्षान्तरे तितऊभ्याम् अत्र अकारस्य ऊकारस्य च संयोगसंज्ञायां भ्यामि परे पदत्वात् संयोगान्तलोपः स्यात्॥

अनेक वर्णों के अव्यवधान में भी दो-दो हलों को संज्ञा होती है, हल्समुदाय को नहीं। अन्यथा परवर्ती झल् को निमित्त मान कर 'स्कोः संयोगाद्योः' इससे विहित संयोगादिलोप का विधान, झल् भी संयोगान्तर्गत होने से झल्परक संयोग के अभाव के कारण, व्यर्थ हो जायगा। और उन स्थलों में हल्समुदाय को भी संज्ञा करने में कुछ फल नहीं है। अङ्ग पद तथा धातु के अवयव संयोग—इस प्रकार 'वाऽन्यस्य' इन सूत्रों का अर्थ करने से अनेक हल् को संयोगसंज्ञा होने पर धात्वादि अवयव संयोग नहीं होगा; क्योंकि तीनों हलों के समूह को संज्ञा होने से 'निर्ल्येयात्' इत्यादि में संयोगादि रेफ निर् उपसर्ग का अवयव होने से धात्ववयव नहीं है। आनन्तर्य का व्यवधानाभाव अर्थ है। व्यवधान विजातीय से होता है। इसी का फलित अर्थ है—**अज्भिरिति**। पदान्त चकार को 'चोः कुः' इससे कुत्व होने पर 'अग्भिः' ऐसा पाठ करना था। 'अचोऽक्षु' इस भाष्यप्रयोग में कुत्व देखा गया है। 'स्वरैः अव्यवहिताः' इस प्रकार की वृत्ति उचित थी; क्योंकि 'अग्भिः' ऐसा लिखने पर अक् प्रत्याहार का सन्देह हो जाता। वस्तुतः 'ऊकालोऽज्', 'उपदेशेऽजू', 'नाज्झलौ', 'अल्पाच्तरम्' इत्यादि निर्देश से पदान्त में अच् को कुत्वाभाव की कल्पना करने से

३१. ह्रस्वं लघु । १ । ४ । १० ।

३२. संयोगे गुरु । १ । ४ । ११ । **संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् ।**

३३. दीर्घं च । १ । ४ । १२ । **दीर्घं च गुरुसंज्ञं स्यात् ।**

॥ इति संज्ञाप्रकरणम् ॥

संयोगे गुरु (१।४।१९) ॥ **'भेत्ता' इत्यादौ गुणस्तु क्नोः कित्त्वसामर्थ्येन भूतपूर्व-लघूपधग्रहणाद् बोध्यः ॥**

इति संज्ञेति । **प्रथमाध्यायस्थानां सन्धिकार्योपयोगिनीनां संज्ञानां प्रकरणमिति**

संयोगे गुरु ॥ ननु भेत्तेत्यादौ भिद् ता इत्यवस्थायां 'पुगन्तलघूपधस्य च' इत्यनेन गुणो न प्राप्नोति; दकारतकारयोरव्यवधानेन तयोः संयोगसंज्ञायां संयोगपरत्वेन इकारस्य अनेन सूत्रेण गुरुसंज्ञायां लघूपधत्वविरहात् ? अत आह—**भेत्तेत्यादौ** इति । भूतपूर्वलघूपधत्वमादाय गुणस्य प्राप्तेः । अत्र प्रमाणं 'त्रसिगृधिधृषिक्षिपेः क्नुः' इत्यनेन विहितस्य क्नोः कित्करणम् । तद्धि धृष्णुः क्षिप्नुरित्यादौ गुणवारणाय कृतम् । तस्य च कित्त्वस्य लघूपधत्वाभावादेव गुणाप्राप्त्या वैयर्थ्यं स्यात् । तदेव ज्ञापयति—**भूतपूर्व-लघूपधत्वमादायापि गुणो भवतीति** । धातोरन्त्यस्य हलः धातुविहितप्रत्ययघटकस्य च संयोगसंज्ञायां पूर्ववर्तिनः ऋकारस्य इकारस्य च यथाक्रमं गुरुत्वात् उपधायां लघुत्वविरहादित्याशयः । प्रत्ययस्य विधानकाले यो लघूपध इत्यर्थः । कित्करणसामर्थ्येन ज्ञायते इति भावः । गुता इत्यादौ च न गुणप्रसङ्गः । तिबाद्युपदेशकाले धातोर्लघूपधत्वाभावात् । ततश्च भेत्ता इत्यादीनां सिद्धिः ॥

इति संज्ञाप्रकरणम् । आम्रेडित-प्रगृह्य-प्रातिपदिकादीनां बहूनां संज्ञासूत्राणामनिर्देशात्कथमिदं प्रकरणं समाप्तम् ? आह—**प्रथमाध्यायेति** । आम्रेडितसंज्ञायः प्रथमाध्याये पाठाभावात्, प्रगृह्यसंज्ञायाः प्रथमाध्याये पाठेऽपि सन्धिकार्यस्य प्रतिरोधकत्वेन तदनुपयोगित्वात् । प्रातिपदिकसंज्ञायाश्च सन्धिकार्येषु अनिमित्तत्वेन भसंज्ञाया अपि तथैव सन्धिकार्येषु अनुपयोगित्वात् ताः संज्ञाः प्रकरणेऽस्मिन् न पठिताः । कासाञ्चित् प्रथमा-

---

यहाँ कुत्व नहीं होगा । केवल पदान्त में परवर्ती सप्तमी-बहुवचन के रहने पर कुत्व 'अक्षु' इस भाष्यप्रयोग से होता है । अतएव अच्कार्याणि, अच्सन्धिः—इत्यादि प्रयोगों की सङ्गति होती है ॥

संयोगे गुरु इति ।

शङ्का—भेत्ता इसमें संयोग से पूर्व इकार के गुरु होने के कारण लघूपधगुण की प्राप्ति नहीं होगी ?

समाधान—क्षिप्नुः इसमें प्राप्त लघूपधगुण निषेध के लिए क्नु प्रत्यय में कित्करण किया गया है । संयोग से पूर्व होने के कारण लघूपधत्व न होने से गुण की प्राप्ति नहीं होगी, अतः उसकी व्यावृत्ति के लिए किये गये कित्करण के वैयर्थ्य से भूतपूर्व लघूपधत्व के द्वारा भी गुण माना जाता है ॥

समाप्तमित्यर्थः । तेनाम्रेडित-प्रगृह्य-भसंज्ञा-लोपसंज्ञाद्यनुपन्यासेऽपि न क्षतिः ।

'अ अ' (८।४।६८) इत्याद्युपन्यासस्तु प्रासङ्गिकः ॥

इति संज्ञाप्रकरणम् ॥

ध्याये पाठाभावः, कासाञ्चिदनुपयोगित्वेन प्रथमाध्याये पाठाभावेन च परित्यागः । **आम्रे-डितेति** । अत्र भस्य अल्पाच्तरत्वेऽपि क्रमानुरोधात् तस्य न पूर्वनिपातः कृतः । संज्ञानामेव इदं प्रकरणं नतु संज्ञानामिदमेव प्रकरणमिति तात्पर्यम् । सौत्रे सन्धिषु उपयोगिनीनां संज्ञानामित्यर्थः । तेन टिसंज्ञाया अनुपन्यासेऽपि तस्याः संज्ञायाः 'शकन्ध्वादिषु पररूपं वाच्यम्' इति वार्त्तिकविहितसन्धिकार्ये उपयोगात् न न्यूनता ।

लोपसंज्ञायाः भावरूपसन्धिकार्येऽनुपयोगात् परित्यागो न दोषाय । यद्यपि 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इत्यनेन दीर्घविधौ सन्धिकार्यलोपस्य निमित्ततयाऽपेक्षणात् भावरूपसन्धिकार्योपयोगित्वं तस्याः सम्भवति, तथापि ततः पूर्वमेव 'लोपः शाकल्यस्य' इत्यत्र लोपजिज्ञासायाम् अभावार्थप्रतिपादिकाया लोपसंज्ञायाः वक्तव्यतया तदनन्तरं 'ढ्रलोपे' इत्यत्र जिज्ञासाया अभावात् तत्प्रयोजनिकाया तस्या अनुपन्यासो न क्षतिकरः ।

विषम्यान्तु कतिपयसंज्ञानामसङ्ग्रहं प्रतिपाद्य 'प्रायेण' इति पदं सन्निवेश्य समाहितमिति सर्वेष्टसिद्धिः ॥

॥ पूर्णं संज्ञाप्रकरणम् ॥

इति संज्ञा इति । प्रथमाध्याय में पठित सन्धिकार्योपयोगिनी संज्ञाओं का प्रकरण इति = समाप्त हो गया । आम्रेडितसंज्ञा प्रथमाध्याय में पठित नहीं है; प्रगृह्यसंज्ञा, भ संज्ञा और लोप-संज्ञा सन्धिकार्योपयोगिनी नहीं हैं; अतः इनके यहाँ अनुपन्यास से कोई न्यूनता नहीं हुई ।

इस प्रकरण में 'अ अ', 'पूर्वत्रासिद्धम्' इत्यादि का उपन्यास प्रसङ्गवश है ॥

॥ इति संज्ञाप्रकरणम् ॥

अथ परिभाषाप्रकरणम्

३४. इको गुणवृद्धी । १ । १ । ३ । गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र 'इकः' इति षष्ठ्यन्तं पदमुपतिष्ठते ।

इको गुणवृद्धी (१।१।३)। **परिभाषेयं व्याख्यानात्** । गुणवृद्धिशब्दाभ्यामिति । गुणवृद्धिग्रहणानुवृत्त्यैव सिद्धे पुनर्गुणवृद्धिग्रहणसामर्थ्यादिति भावः । **अनुवर्त्तमानञ्च संज्ञिपरमेव स्यात्; संज्ञाकरणेनान्यत्र संज्ञिपरत्वात् ।**

इको गुणवृद्धी ॥ इदं न संज्ञासूत्रम्; गुणवृद्धिसंज्ञयोः सूत्रान्तरेणैव कृतत्वात् । नापि विधिसूत्रम्; 'ओर्गुणः' इत्यादिना पुनर्विधानस्य वैयर्थ्यात् । नापि नियमसूत्रम्; स्वार्थहानि-परार्थकल्पनादिदोषग्रस्तत्वात्, विधिप्रकरणे पठितव्ये इह पाठकरणाच्च । नाप्यतिदेशः; वतिप्रत्ययेन समानविभक्त्या चानिर्देशात् । नाप्यधिकारः; 'न धातुलोप' इत्यनेन सहैव पठितव्ये पृथग् योगकरणसामर्थ्यात् । इत्याह—**व्याख्यानादिति** । उक्तं व्याख्यानम् । 'अन्यदेवेदं परिभाषान्तरमसम्बद्धमनया परिभाषया' इति प्रकृतसूत्र-भाष्यरूपव्याख्यानाद्वा उक्तार्थलाभः । तथा चेयं परिभाषा ।

'वृद्धिरादैच्' 'अदेङ् गुणः' इति सूत्राभ्यां गुणवृद्धिपदयोरनुवृत्त्या गुणवृद्धिपदार्थस्य लाभेन सूत्रे गुणवृद्धिग्रहणस्य वैयर्थ्यम्, तत्सामर्थ्यात् 'गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी' इत्यर्थबोधकं गुणवृद्धिपदमिति कल्प्यते । गुणवृद्धिशब्दौ गुणबृद्धिपदबोध्ये लाक्षणिकौ इति भावः । 'विधीयेते' इति क्रियापदमध्याह्रियते, तथा च विधेयताप्रयोजकं यत्र गुण-वृद्धिपदं तत्र 'इकः' इति षष्ठ्यन्तं पदमुपतिष्ठते ।

विधेयता च अदेङ्, आदैजनिष्ठा गृह्यते । अतः 'अदेङ् गुणः' 'वृद्धिरादैच्' इत्यत्र नास्याः परिभाषाया उपस्थितिः । तत्र गुणवृद्धिपदाभ्यां न अकारादयो विधीयन्ते, किन्तु अकारादीन् उद्दिश्य गुणसंज्ञा (गुणपदवत्त्वं), वृद्धिसंज्ञा (वृद्धिपदवत्त्वं) बोध्यते इति न दोषावकाशः । 'त्यदादीनामः', 'पथिमथ्यृभुक्षामात्' इत्यादौ नास्याः प्रवृत्तिः, गुणवृद्धिपदेन तेषामकारादीनां विधानाभावात् ।

नच गुणसंज्ञासूत्रे, वृद्धिसंज्ञासूत्रे च श्रूयमाणं गुणवृद्धिपदं संज्ञापरत्वेन स्वरूप-परम् । अत्रानुवृत्तौ तस्य स एवार्थः स्यात्, न तद्बोध्यः संज्ञी अकारादिः । अतः संज्ञिबोधाय 'इको गुणवृद्धी' इत्यत्र गुणवृद्धिग्रहणं चरितार्थम् । अत आह—**अनुवर्तमान-ञ्चेति** । अनुवर्तमानं संज्ञापदमन्यत्र संज्ञिपरमेव भवति; शब्दमात्रस्याधिकाराश्रयणात् ।

'इको गुणवृद्धी' ॥ 'नापि तच्छेषो नापि तदपवादोऽन्यदेवेदं परिभाषान्तरम्' इस भाष्य के अनुसार यह परिभाषासूत्र है । 'अदेङ् गुणः' 'वृद्धिरादैच्' इन सूत्रों से गुण-वृद्धि पद की अनुवृत्ति से ही 'इको गुणवृद्धी' इस सूत्र के गुण-वृद्धि पद का अर्थ ज्ञात हो जाता, पुनः इस सूत्र में 'गुणवृद्धी' पद के ग्रहणसामर्थ्य से जहाँ आदेङ्निष्ठ जो विधेयता तत्प्रयोजक गुण-पद का एवं जहाँ आदैच्निष्ठ जो विधेयता उसका प्रयोजक वृद्धि-पद का अर्थात् गुण और वृद्धि का विधान होता हो. वहीं इस सूत्र से 'इकः' इसकी उपस्थिति होती है । इसी आशय से परम मूल में—'गुणवृद्धि-शब्दाभ्याम्' इसका उल्लेख है ।

यद्वा, तदप्यनुवर्त्यं गुणो वृद्धिरिति योजनयैतल्लाभः। 'स्वादिषु' (१।४।१७)

'अर्थाधिकारे हि यादृशार्थकं पूर्वत्र तादृशार्थकमेव पदं परत्रानुवृत्तिस्थलेऽपि' इति नियमः। अन्यत्रापि संज्ञाशब्दानां स्वरूपपरत्वे संज्ञाविधानं व्यर्थं स्यात्।

ननु अनुवृत्तमपि पदपदं स्वादिष्विति सूत्रे संज्ञापरमेव, न संज्ञिपरम्। अत आह—**यद्वा** इति। गुणवृद्धिपदमत्रानुवर्त्यं अर्थाधिकारानुरोधात् स्वरूपपरकमिहापि गुणवृद्धिपदं बोध्यम्। **गुणो वृद्धिरिति**। इतिशब्दः गुण इति, वृद्धिरिति प्रत्येकपदोत्तरं योजनीयः। 'उच्चार्य', 'विधीयेते' इत्युभयस्याध्याहारः। तथाच 'गुणवृद्धिपदमुच्चार्य यत्र गुणवृद्धी विधीयेते' इत्यर्थः। गुणेन यो गुणः वृद्ध्या या वृद्धिरिति परममूलोक्तमेतत्फलितार्थपरम्।

एतेन "अनुवर्तमानं गुणवृद्धिपदम् असमस्तं समस्तगुणवृद्धिपदस्य एकदेशेन गुणादिना गुणेन यो गुणः वृद्ध्या या वृद्धिरित्येवरूपोऽन्वयः 'सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणयोगो न' इति नियमबलाद्भवितुमर्हति" इति परास्तम्। मूलोक्तेः फलितार्थपरकत्वेन असङ्गत्यभावात्। 'गुणवृद्धिशब्दौ उच्चार्य' इत्येवं रीत्या पूर्वप्रदर्शितार्थे नैकदेशान्वयशङ्कापि। 'ष्णान्ताः षट्' इत्यत्रानुवर्तमानसंख्यापदस्य समस्तष्णान्तपदैकदेशे षान्ते नान्ते कथमन्वयः ? यथा तत्र तथा अत्रापीति को विशेषः ! अधिकं **छायायां द्रष्टव्यम्**।

नन्वेवं संज्ञापदस्य अनुवर्तमानस्य स्वरूपपरकत्वे 'ष्णान्ताः षट्' (१।१।२४) इत्यत्र 'वहुगणवतुडति संख्या' (१।१।२३) इति सूत्राद् अनुवर्तमानं संख्यापदमपि आनुपूर्वीपरं स्यात्? अत आह–**ष्णान्ता इति**। संख्याशब्दस्वरूपे षान्तत्वनान्तत्वयोरभावेन सूत्रवैयर्थ्यापत्त्या तत्र संज्ञिपरं सम्पद्यते। यस्मात् सूत्रात् यत् संज्ञावाचकं पदं यत्रानुवर्तते तस्मिन् सूत्रे तथा तस्मात्। तदनुवृत्तिस्तयोरुभयोर्यदि समानकार्यस्य विधायकत्वं तदा संज्ञापदं स्वरूपपरमेव। यथा 'स्वादिषु' इति सूत्रे अनुवृत्तं पदपदं स्वरूपपरम्; 'सुप्तिङन्तं पदम्' 'स्वादिषु' इति सूत्राभ्यां पदस्यैव विधानात्। 'ष्णान्ता' इत्यनेन षट्संज्ञा विधीयते, 'बहुगणवतु' इत्यनेन संख्यासंज्ञा विधीयते इति द्वयोः समानं विधेयं नास्त्यतः संज्ञिपरता तत्र बोध्या। एवमेव 'इको गुणवृद्धी' इत्यनेन इक्पदमुपस्थाप्यते, 'अदेङ् गुणः' इत्यादिना गुणादिसंज्ञाया विधानमिति भेदः। अतोऽत्र संज्ञिपरत्वम् अनुवर्तमानगुणवृद्धिपदयोर्युक्तम्। अमुमाशयं हृदि निधाय अनुवर्तमानञ्च संज्ञिपरमेवेत्युक्तं पूर्वस्मिन् कल्पे। 'यस्मात् तदनुवर्तते तदीयविधेयतावच्छेदकरूपेतररूपावच्छिन्नविधेयताके संज्ञिपरं सम्पद्यते' इति परिष्कृतभाषया पूर्वोक्तार्थो बोध्यः।

अनुवर्तमानञ्चेति। शब्दाधिकाराश्रयणादिति शेषः। शब्दाधिकारे अर्थरहितं

शङ्का—इस सूत्र में गुण और वृद्धि पद स्वरूपभूत आनुपूर्वीपरक है। अन्यत्र अनुवृत्तिस्थल में भी उन पदों का उसी प्रकार का अर्थ होगा। 'इको गुणवृद्धी' इस सूत्र में 'गुणवृद्धी' पद संज्ञिपरक है। अतः भिन्नार्थक होने से अनुवृत्ति द्वारा इस सूत्र के 'गुणवृद्धी' पद के वैयर्थ्य की कल्पना युक्त नहीं है ?

समाधान—अनुवर्तमान संज्ञा पद यहाँ संज्ञी का बोध कराता है। शब्दाधिकार में शब्द०

इति सूत्रेऽनुवृत्तपदपदस्य सञ्ज्ञापरताया एव दृष्टत्वात्। 'ष्णान्ताः' (१।१।२४) इति सूत्रे संख्यापदस्य तदन्तत्वासम्भवादर्थपरतेति बोद्धव्यम्।

शब्दमात्रमनुवर्तते। अन्यत्र = तत्सूत्रात् भिन्नसूत्रे। तदपि = गुणवृद्धिगुणभावे। अनुवर्तमानञ्च तत् शब्दस्वरूपपरमर्थाधिकारानुरोधात्। संज्ञासूत्रे गुणवृद्धिपदं स्वानुपूर्वीपरमेव। अत्रानुवृत्तानामपि तादृशार्थकमेवेति भावः। योजनया = 'गुण इति वृद्धिरिति उच्चार्य विधीयेते इत्यनयोरध्याहारः' इत्यादिपूर्वीका योजना। एतल्लाभः = कौमुदीस्थगुणवृद्धिपदाभ्यामिति वाक्यार्थलाभः। तदन्तत्वेति = षान्तत्वनान्तत्वयोः।

साक्षादुच्चरितस्येति। उच्चार्यमाणवृत्तिधर्मेण साक्षादवच्छिन्नविधेयताश्रयस्येत्यर्थः। **तत्तच्छब्दानुवादेन विहितस्येति।** शास्त्रोयोद्देश्यतावच्छेदकज्ञानसम्पादकत्वेन उपयुज्यमाना या आनुपूर्वी तदवच्छिन्नोद्देश्यतानिरूपितविधेताश्रयस्य। यत्र शास्त्रे लक्षणप्रतिपदोक्तपरिभाषा सञ्चारणीया, तच्छास्त्रबोधोपयोगिनी या आनुपुर्वी तद्विशिष्टत्वम् प्रतिपदोक्तत्वम्। वै०—स्वेन साक्षादवच्छिन्नविधेयताश्रयत्व, स्वप्रकारकज्ञानप्रयोज्योद्देश्यतानिरूपितविधेयताश्रयत्व–इत्यन्यतरसम्बन्धेन। यथा—'घुमास्थागापा' इत्यत्र पाशब्देन 'पा पाने' इत्यत्र निर्दिष्टस्य पा इत्यस्य ग्रहणम्, न तु 'पै शोषणे' इत्यत्र निर्दिष्टस्य कृतात्वस्य 'पा' शब्दस्य; एतस्य प्रतिपदोक्तत्वाभावात्। तथाहि—स्वं = पात्वरूपानुपूर्वी, तया साक्षादवच्छिन्ना विधेयता 'पा पाने' इत्येतच्छास्त्रवचनेन बोधिता, सा पानार्थके पाशब्दे एव, तदाश्रयः स एव पा। पैधातुना आत्वे कृते निष्पन्नस्य पा·शब्दस्य तु न प्रतिपदोक्तम्। 'पै ओवै शोषणे' इत्येतच्छास्त्रजन्या पैत्वावच्छिन्ना विधेयता 'आदेचः' इति सूत्रजन्या आत्वावच्छिन्ना विधेयता, न तु पात्वरूपानुपूर्व्यवच्छिन्ना विधेयता, अतो

मात्र की अनुवृत्ति होने से उस शब्द का अन्य प्रकार का भी अर्थ होता है। अतः अनुवृत्त संज्ञिपरक गुण और वृद्धि पद से सूत्रस्थ गुणवृद्धि पदार्थ का लाभ सिद्ध हो जाने से सूत्र में उसका उपादान व्यर्थ है। इसलिये इसके सामर्थ्य से गुणपद से जहाँ गुण और वृद्धिपद से जहाँ वृद्धि का विधान है, वहीं इसकी उपस्थिति होती है। अथवा गुण-वृद्धिसंज्ञा सूत्र से अनुवृत्त गुण और वृद्धि पद आनुपूर्वीपरक ही हैं। अर्थाधिकार में जैसा अर्थ पूर्व सूत्र में होता है, वैसा ही अनुवृत्तिस्थल में भी होता है। इसीलिए 'सुप्तिङन्तं पदम्' इस सूत्र से 'स्वादिष्वसर्वनामस्थाने' इस सूत्र में अनुवृत्त पर पद आनुपूर्वीपरक देखा गया है। इसी प्रकार अनुवृत्त गुण-वृद्धि पद का तृतीयान्त से विपरिणाम के द्वारा 'गुणशब्देन यो गुणो वृद्धिशब्देन या वृद्धिः'—इस अर्थ का लाभ हो जाता है।

शंका—अनुवर्तमान संज्ञापद अन्यत्र भी स्वस्वरूप का ही बोधक रहता है—ऐसा मानने पर 'ष्णान्ताः षट्' इसमें अनुवृत्त संख्यापद भी स्वरूपपरक होना चाहिए?

समाधान—संख्या शब्द से आनुपूर्वी का ग्रहण होने पर षान्तत्व और नान्तत्व के संख्याशब्द में न रहने के कारण षट् संज्ञा की प्राप्ति नहीं होगी। इस प्रकार 'ष्णान्ताः षट्' यह सूत्र व्यर्थ हो जायेगा। अतः संख्या पद वहाँ आनुपूर्वीपरक नहीं होता, किन्तु लौकिक गणना में प्रसिद्ध का बोधक होता है।

लक्षणप्रतिपदोक्तपरिभाषया तु नात्र निर्वाहः; तत्र 'प्रतिपदोक्तस्य' इत्यस्य साक्षादुच्चारितस्येति साक्षात्तत्तच्छब्दानुवादेन विहितस्येति वाऽर्थात्। ध्वनितञ्चेदमत्रैव भाष्ये।

लक्षणसङ्गतिविरहात् न तस्य ग्रहणम्। द्वितीयसम्बन्धस्य उदाहरणम्—'विभाषा दिक्समासे बहुव्रीहौ वा' इति सूत्रे'दिङ्नामान्यन्तराले' इति विहितस्य समासस्यैव प्रतिपदोक्तत्वाद् ग्रहणं नतु सूत्रान्तरेण विहितस्य। तथाहि—'विभाषा दिक्समासे' इति बोधोपयोगिनी या आनुपूर्वी दिक्त्वरूपा तत्प्रकारकज्ञानप्रयोज्या या उद्देश्यता सा दिग्वाचकशब्दत्वावच्छिन्ना तादृशोद्देश्यतानिरूपितविधेयताया आश्रयः 'दिङ्नामान्यन्तराले' इति सूत्रविहित एव समासो न त्वविहितः। तस्मात् तस्यैव समासस्य ग्रहणम्।

प्रतिपदोक्तेन गुणवृद्धिपदेन यत्र गुणस्य वृद्धेर्वा विधानं तत्रैव 'इको गुणवृद्धी' इत्यस्य सूत्रस्य प्रवृत्तौ 'त्यदादीनामः' इत्यादौ अकारशब्देन तद्विधानात् प्रतिपदोक्तपरिभाषयैव तत्र परिभाषासूत्रस्य अनुपस्थितौ सिद्धायां तदर्थं गुणवृद्धिग्रहणसामर्थ्यवर्णनं वृथेति कथा न कर्तव्या, प्रतिपदोक्तपरिभाषाया अत्राप्रवृत्तेः। 'इको गुणवृद्धी' इति सूत्रबोधोपयोगिनी आनुपूर्वी गुणत्ववृद्धित्वरूपा, तया साक्षादवच्छिन्ना विधेयता क्वचिदपि नास्ति। प्रदेशे 'मिदेर्गुणः' इत्यादौ अकारैकारौकारान्यतरत्वेन गुणपदवत्त्वेन वा अवच्छिन्ना विधेयता, न तु गुणत्वेन अवच्छिन्ना। एवं द्वितीयसम्बन्धोऽपि न। गुणत्ववृद्धित्वप्रकारकज्ञानप्रयोज्योद्देश्यतानिरूपितविधेयताया एवाभावात् नानेनापि प्रतिपदोक्तत्वसिद्धसम्भावना। अतो गुणवृद्धिग्रहणसामर्थ्याश्रयणं युक्तमेवेति विभावनीयम्।

अत्र मूले वा-शब्दश्चार्थे। अथवा मूले चकारघटित एव पाठः। उभयविधस्य

शंका—इस सूत्र में प्रतिपदोक्त गुण-वृद्धि का ग्रहण करने से गुणवृद्धि शब्द के अनुवाद द्वारा गुण-वृद्धि के विधान में इसकी प्रवृत्ति होगी, अतः 'त्यदादीनामः' 'पथिमथि' इन सूत्रों से क्रमशः विधीयमान अकार और आकार गुणवृद्धि पद से विहित न होने से इक्परिभाषा की उपस्थिति यहाँ नहीं होगी ?

समाधान—साक्षादुच्चरितेति। उच्चार्यमाणधर्मेण साक्षादवच्छिन्नविधेयताश्रयत्वरूप प्रतिपदोक्तत्व है। 'घुमास्थागापा' इसमें पा शब्द से 'पा पाने' इसमें निर्दिष्ट पा धातु का ही प्रतिपदोक्त होने से ग्रहण होता है। 'पै ओवै शोषणे' इसमें कथित 'पै' का आत्व के अनन्तर सम्पद्यमान पा का स्वल्प साम्य होने पर भी ग्रहण नहीं होता। उच्चार्यमाण 'घुमास्था' इस सूत्र का 'पा' शब्द, तद्वृत्तिधर्म पात्वरूप तदवच्छिन्न पात्वावच्छिन्न 'पा पाने' इस शास्त्रवचन से बोधित विधेयता—'पानेऽर्थे पाधातुः साधुः' = पीने के अर्थ में पा धातु साधु है—इस प्रकार की विधेयता, उसका आश्रय पानार्थक का उसी का उसी सूत्र में ग्रहण होता है। 'पै' धातु से आत्व के द्वारा निष्पन्न 'पा' प्रतिपदोक्त नहीं है; क्योंकि यहाँ शोषण अर्थ में 'पै' की साधुता विहित होने से पैत्वावच्छिन्ना विधेयतारूप विषयता है। पैत्व 'घुमास्था' सूत्रघटक 'पा' का अनुवर्ती नहीं, और जो अनुवर्ती पात्व अपेक्षित है वह 'पै' का अनुवर्ती नहीं। अतः पै से निष्पन्न 'पा' का ग्रहण नहीं होता।

तत्तच्छब्दा इति। यत्किञ्चिच्छास्त्रीयोद्देश्यतावच्छेदकज्ञानसम्पादकत्वेन उपयोगिनी या

अस्याश्च विधेयसमर्पकगुणवृद्धिपदश्रुतिर्लिङ्गम्, तदाह—विधीयते इति। अत एव **'अतो गुणे' (६ । १ । ९७) 'वृद्धिर्यस्य' (१ । १ । ७३) इत्यादौ न दोषः।**

लक्ष्यस्य सत्त्वेन उभयोः संग्रहाय चकारघटित एव पाठो युक्तः। 'इको गुणवृद्धी' इति सूत्रे भाष्ये गुणवृद्धिग्रहणसामर्थ्याश्रयणेन 'त्यदादीनामः' इत्यादौ दोषो वारितः, न तु प्रतिपदोक्तपरिभाषया। यदि अनया व्यावृत्तिः सम्भवेत्, तदा सामर्थ्याश्रयणमसङ्गतं स्यादिति परिभाषाया अप्रवृत्तिर्ध्वन्यते।

परिभाषाया उपस्थापकं लिङ्गमाह—**अस्याश्चेति**। चकारेण 'अचश्च' इति परिभाषायाः संग्रहः; 'अचश्च' इत्यत्रापि विधेयताप्रयोजकत्वग्रहणस्य वक्ष्यमाणत्वात्। **विधेयसमर्पकेति**। 'अदेङ्', 'आदैङ्' एतदन्यतरनिष्ठविषयताप्रयोजकत्वेन गृहीतस्य गुणवृद्धिपदस्य यत्र श्रवणं तत्र इयं परिभाषोपतिष्ठते इति भावः। 'अतो गुणे' 'वृद्धिर्यस्याचामदिस्तद्वृद्धम्' इत्यादौ अनुवादवाक्ये इक्परिभाषाया उपस्थितिर्न; ताभ्यां सूत्राभ्यां क्रमेण पररूपस्य वृद्धसंज्ञायाश्च विधानेन तत्र श्रूयमाणगुण-वृद्धिपदयोर्निमित्ततया उद्देश्यरूपत्वेन विधेयसमर्पकत्वाभावात्। अत एव 'भवन्ति' इत्यत्र पररूपं 'शालीयः' इत्यत्रवृद्धलक्षणश्छप्रत्ययश्च सिद्धः। अन्यथा इक्परिभाषोपस्थित्या इकः स्थाने निष्पन्ने गुणे परतः पररूपस्य विधानेन 'एधे' इत्यत्र इक्स्थानिकस्य एकारस्य सत्त्वात् तत्रैव पररूपं स्यात्। एवम् इक्स्थानिकवृद्धेः वृद्धसंज्ञायाम् 'औपगवः' इत्यत्र स्यात्, शालाशब्दस्य न स्यात्; इकः स्थाने वृद्धेरभावात्।

एतेन = विधेयताप्रयोजकगुणवृद्धिपदग्रहणेन । गुणवृद्धिसंज्ञाविधायकसूत्राभ्यां गुणवृद्धिपदमनुवर्त्य 'श्रूयेते' इत्यध्याहृत्य 'यत्र गुणवृद्धिपदे श्रूयेते' इत्यर्थस्य करणात् 'त्यदादीनामः' 'पथिमथि'' इत्यादौ न दोषः, गुणादिपदस्य अश्रूयमाणत्वात् इति वदन्तः परास्ताः। 'अतो गुणे' 'वृद्धिर्यस्य' इत्यादौ गुणवृद्धिपदयोः श्रवणात् इक्पादोस्थितिर्दुर्वारा स्यात्। अतो 'विधीयेते' इत्यध्याहार आवश्यकः।

आनुपूर्वी तदवच्छिन्नोद्देश्यतानियमितविधेयताश्रयत्वरूप भी प्रतिपदोक्त लक्षण माना गया है। इसका उदाहरण है—'विभाषा दिक्समासे बहुव्रीहौ'। इस सूत्र में 'दिङ्नामान्यन्तराले' इससे विहित समास का ही ग्रहण होता है; क्योंकि 'विभाषा दिक्' इस सूत्र से उद्देश्यतावच्छेदक ज्ञान का सम्पादक आनुपूर्वी दिग्वाचकशब्दत्व रूप, तदवच्छिन्ना उद्देश्यता से निरूपित विधेयता का आश्रय 'दिङ्नामान्यन्तराले' इससे विहित समास है, अतः उसी का ग्रहण होता है, समासान्तर का नहीं; क्योंकि समासान्तर की दिग्वाचकशब्दत्वावच्छिन्ना उद्देश्यता तन्निरूपिता विधेयता नहीं है ?

समाधान—'इको गुणवृद्धी' इसमें प्रतिपदोक्त परिभाषा की प्रवृत्ति नहीं हो सकती। यहाँ गुण-वृद्धि पद गुणवृद्धि का विधायक नहीं है। अतः विधेयता का आश्रय न होने से प्रतिपदोक्त दोनों लक्षण समन्वित नहीं होते। इसलिये परिभाषा की प्रवृत्ति नहीं होगी। उक्त अर्थ इसी सूत्र के भाष्य से ध्वनित होता है। यदि प्रतिपदोक्त परिभाषा के द्वारा निर्वाह हो सकता तो गुणवृद्धीय वृत्ति की क्या आवश्यकता थी ! विधेयताप्रयोजक गुणवृद्धि पद का श्रवण इस परिभाषा

एतेन "शब्दपरयोः पूर्वयोर्गुणवृद्धिपदयोरनुवृत्त्या 'यत्र ते पदे तत्रेदमुपतिष्ठते' इत्यर्थेन 'त्यदादीनामः' (७।२।१०२) इत्यादिव्यावृत्तौ सिद्धायामिह 'गुणवृद्धी' इति व्यर्थम्" इत्यपास्तम्।

ननु 'विधौ परिभाषोपतिष्ठते नानुवादे' इति परिभाषया गुणवृद्धिविधायके सूत्रे एव 'इको गुणवृद्धी' इति परिभाषाया उपस्थितिः स्यात्, नानुवादे 'अतो गुणे' इत्यादौ। एवञ्च 'विधीयेते' इत्यध्याहारो नावश्यक इत्याह—**विधौ इति**। 'विधीयेते' इत्यध्याहारेण विधेयताप्रयोजकगुणवृद्धिपदोपादाने इक्परिभाषायाः प्रवृत्तिरिति मत्वैष 'विधौ परिभाषा' इत्यस्याः व्यवहारः। एतस्याः परिभाषायाः 'विधीयते' इत्यध्याहृत्य तथाविधग्रहणमेव मूलं बीजमिति भावः।

यत्र विधौ परिभाषायाः प्रवृत्तिरिष्टा तत्र 'विधीयते' इति पदाध्याहारेण समाधेयम्। यथा 'अचश्च' इत्यत्रापि 'विधीयते' पदाध्याहारः। तथाच 'विधौ परिभाषोपतिष्ठते' इति परिभाषा न स्वतन्त्रेति एतत्परिभाषाद्वयातिरिक्तासु 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इत्यादिपदोस्थापकपरिभाषासु 'विधीयते' इति पदानध्याहारात् तासामनुवादेऽपि प्रवृत्तिः। आपः पूर्वोक्तोयः प्रत्ययस्थः ककारस्तस्मात्पूर्वस्य अकारस्य इत्वं 'प्रत्ययस्थात् कात्पूर्वस्येदाप्यसुपः' इत्यनेन विधीयते। अकारे विशेषणं ककारः, तत्र विशेषणे आपि तस्मिन्निति परिभाषोपस्थित्या अव्यवहितपूर्वत्वस्य लाभो न स्यात्। अनूद्यमानोऽकारः, तत्र विशेषणं ककारः, तत्र विशेषणम् आप्–इति अनूद्यमानविशेषणविशेषणेऽपि तस्मिन्निति परिभाषाया अनुपस्थितौ 'रथकट्या' इत्यादौ ककारात् पूर्वस्य इत्वं प्रसज्येत। परिभाषाया उप-

---

का उपस्थापक चिह्न है। 'विधीयते' इस पद का अध्याहार है। 'अतो गुणे' 'वृद्धिर्यस्याचामादिः' इन सूत्रों के गुण-वृद्धि पद से किसी का विधान नहीं होता। अतः इक्परिभाषा को उपस्थिति यहाँ नहीं हुई। 'विधीयते' इसका अध्याहार तथा अनुवृत्त गुण-वृद्धि पद अर्थाधिकारानुरोध से स्वरूपपरक हैं। उनका तृतीयान्त से विपरिणाम करने से गुणपद से गुण का, वृद्धिपद से वृद्धि का जहाँ विधान होगा वहीं इसकी प्रवृत्ति होती है—यह निष्कर्ष है।

किसी ने—'अनुवृत्त गुण-वृद्धि पद स्वरूपपरक है, अतः वृद्धि पद का श्रवण रहने पर इक्परिभाषा की उपस्थिति होने के कारण 'त्यदादीनामः' 'पथिमथि' इत्यादि स्थलों में इसकी प्रवृत्ति नहीं हुई'—इस प्रकार का व्याख्यान किया है! यह वाद असंगत है। ऐसा मानने पर भी 'वृद्धिर्यस्याचाम्' इसमें परिभाषा की उपस्थिति दुर्वार है। अतः 'विधेयताप्रयोजक' कहना आवश्यक है।

शंका—'विधौ परिभाषोपतिष्ठते नानुवादे' विधिबोधक पद के साथ विशेषण तथा अन्वित पद में ही परिभाषा द्वारा उपस्थापित का अन्वय होता है। अनुवाद शब्द कर्मघञन्त है। अनूद्यमान विशेषण के विधिविशेषण में भी तदन्तविधि नहीं होती—यह इसका तात्पर्यार्थ है। इस प्रकार 'त्यदादीनामः' 'वृद्धिर्यस्याचाम्' इत्यादि स्थलों में गुण पदार्थ विधि की निमित्तकोटि में, वृद्धि पदार्थ उद्देश्यकोटि में प्रविष्ट है, अतः विधेयता का बोधक न होने से इक्परिभाषा की उपस्थिति का 'विधौ परिभाषा' के द्वारा विरोध होने से उक्त दोष का निवारण सिद्ध है। पुनः गुण-वृद्धि ग्रहण व्यर्थ है?

एतन्मूलक एव 'विधौ परिभाषोपतिष्ठते, नानुवादे' इत्युद्घोषः। एवञ्च पदोपस्थापकपरिभाषाविषये 'विधीयते' इत्यस्यैवाध्याहारो बोद्धव्यः।

एवञ्च 'तस्मिन्निति निर्दिष्टे' (१।१।६६) 'षष्ठी स्थाने' (१।१।४९) इत्यादेरनुवादेऽपि प्रवृत्तिः। तेन 'प्रत्ययस्थात् कात् पूर्वस्य' (७।३।४४) 'उदात्तस्वरितयोर्यणः' (८।२।४) इत्यादौ न दोषः।

'उदीचामातः स्थाने' (७।३।४६) इति स्थानेग्रहणन्तु स्पष्टार्थमेव। तत्र विधि-

---

स्थितौ चापोऽव्यवहितपूर्वत्वं ककारस्य नास्तीति नेत्वम्। एवमेव 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इत्यनेन उदात्तस्य स्वरितस्य च स्थाने यो यण् ततः परस्यानुदात्तस्य स्थाने स्वरितो विहितः। अत्र अनूद्यमानस्य (उद्देश्यस्य) अनुदात्तस्य विशेषणं यण्, तस्मिन् विशेषणभूतयोः उदात्तानुदात्तयोः अनूद्यमानविशेषणविशेषणत्वेऽपि 'षष्ठी स्थानेयोगा' इत्यनया परिभाषया स्थानपदार्थलाभः सिध्यति।

नन्वेवम् 'उदीचामातः स्थाने यक् पूर्वायाः' इति सूत्रे स्थाने-ग्रहणं व्यर्थम्, आतः स्थाने' इत्यत्र आतः षष्ठ्यन्तत्वेन 'षष्ठी स्थानेयोगा' इति परिभाषाया उपस्थित्यैव स्थानार्थस्य लाभात्? मैवम्; स्थानेग्रहणस्य स्पष्टार्थत्वात्। नचैवमपि विधिवाक्ये पदश्रवणसमकालमेव कथं विधेयताप्रयोजकत्वं गुणवृद्ध्यादिपदानां निर्णतुं शक्यते? अत आह—**तत्रेति**। तत्र सूत्रे इत्यर्थः। प्रथमान्तपदस्य 'गुणः वृद्धिः' इत्येवंरूपस्य विधेयविभक्त्यन्तत्वेन निश्चयात् विधेयताप्रयोजकत्वनिर्णयस्य सम्भवात्। यद्यपि 'वृद्धिर्यस्याचामादिः' इति सूत्रेऽपि वृद्धिपदं प्रथमया निर्दिष्टमिति तत्रापि विधेयताप्रयोजकत्वं वृद्धिपदस्य प्राप्नोति, तथापि यच्छब्द-तच्छब्दयोर्निर्देशस्य तत्र विधेयतासमर्पकत्वनिर्णयप्रतिबन्धकत्वात् न दोषः। वृद्धिपदस्य प्राथम्येन निर्देशोऽपि विधेयतासमर्पकत्वं तस्य प्रतिबध्नाति। 'उद्देश्यं प्रथमं वाच्यम्' इति नियमेन विधेयस्य प्राथम्येन निर्देशस्यानौचि-

---

समाधान—एतन्मूलक इति। 'विधीयते' इसका अध्याहार होने से विधेयताप्रयोजक पद के रहने पर ही परिभाषा की प्रवृत्ति का लिङ्ग स्वीकार करना परिभाषा में मूल है। 'विधौ परिभाषा' यह स्वतंत्र परिभाषान्तर नहीं हैं। 'विधीयते' एतदध्याहारमूलक है। पदोपस्थापक 'इको गुणवृद्धी' 'अचश्च'—इन दोनों ही परिभाषात्रिधियों की प्रवृत्ति 'विधौ परिभाषा' इसके द्वारा बोधित होती है। परिभाषान्तर के सम्बन्ध में 'विधौ परिभाषा' इसकी प्रवृत्ति इष्ट नहीं है।

यही कारण है कि 'प्रत्ययस्थात्' इस सूत्र का—'आप् से पूर्व जो प्रत्ययस्थ ककार उससे पूर्व जो अकार उसको इत्व हो'—ऐसा अर्थ होता है। अन्यथा विधि में ही परिभाषोपस्थिति होने पर अनूद्यमान (उद्देश्य) अकार है, उसमें विशेषण प्रत्ययस्थ ककार, इसमें विशेषण आप् हैं—इस प्रकार अनूद्यमान विशेषण का विशेषण आप् होने से 'आप् से अव्यवहित पूर्व' इस अर्थ का लाभ तस्मिन्निति परिभाषा के द्वारा नहीं होगा।

अतः 'विधौ परिभाषा' अन्य परिभाषा का प्रवृत्तिस्थल नहीं मानी जाती। इस प्रकार 'तस्मिन्' 'तस्मात्' इन परिभाषाओं की प्रवृत्ति 'प्रत्ययस्थात्' इसमें होती है।

इसी प्रकार 'उदात्तानुदात्तयोः' इस सूत्र का उदात्त और अनुदात्त के स्थान में यण् ऐसा

वाक्ये प्रथमाया विधेयविभक्तित्वेन तदन्तस्य विधेयसमर्पकत्वनिर्णयः। अत एव गुणादिपदानामिक्पदोपस्थापनेन चरितार्थानामपि वाक्यार्थान्वयिता। तदर्थस्य तदनन्वयित्वे विधेयत्वाभावेन उपस्थापकत्वस्यैव भङ्गापत्तेः।

त्यात्। न च 'गुणो यङ्लुकोः' इत्यत्रापि गुणस्य प्रथमं निर्देशात् विधेयसमर्पकत्वाभावेन इक्परिभाषाया उपस्थितिर्न स्यादिति वाच्यम्; प्रथमान्तपदान्तरापेक्षया प्राथम्येन निर्देशस्य प्रतिबन्धकत्वात्। 'गुणो यङ्लुकोः' अत्र अन्यत् प्रथमान्तं पदं नास्ति, 'वृद्धिं' 'यस्याचाम्' इत्यत्र तु प्रथमान्तमन्यत् पदमादिपदमस्ति। अतोऽन्यस्य प्रथमान्तस्य सत्त्वे वृद्धिपदस्य प्राथम्येन प्रयोगः तस्य प्रतिबन्धकः। 'गुणो यङ्' इत्यत्र तु न प्रथमान्तं पदान्तरमिति न प्राथम्येन प्रयोगो विधेयसमर्पकत्वस्य प्रतिबन्धकः—इति **भट्टानां** बुद्धिविलासः।

विधेयताप्रयोजकं श्रूयमाणं गुणवृद्ध्यादिपदम् इक्परिभाषोपस्थापकत्वेन सफलमपि वाक्यार्थबोधे अन्वयि भवति। तेषां गुणवृद्ध्यादिपदानां वाक्यार्थबोधानन्वयित्वे विधेयतैव तेषामपगच्छेत्। तथा च गुणवृद्धिपदयोः उपस्थापकतैव निवर्तेत।

इदं सूत्रम् एधितेत्यादौ व्यञ्जनात्मकधकारस्य गुणो मा भूदेतदर्थं कृतम्। सूत्रसद्भावे इक एव गुणो भवति। अतो न व्यञ्जनस्य, न वा इग्भिन्नस्याचो गुणो वृद्धिर्वा भवति। एवं 'भिन्नम्' इत्यादौ 'क्ङिति च' इत्यनेन गुणवृद्धिनिषेधोऽपि इक्परिभाषायाः फलं

अर्थ सिद्ध होता है। स्वरित विधेय है। उसका उद्देश्य अनूद्यमान अनुदात्त हैं। उसमें विशेषण यण् उसमें विशेषण उदात्त और अनुदात्त है। अनूद्यमान विशेषण के विशेषण में 'षष्ठी स्थानेयोगा' की प्रवृत्ति न होने से स्थानपदार्थ का लाभ न होने पर उक्तार्थ-बोध नहीं होगा। अतः 'विधौ परिभाषा' यह स्वतंत्र परिभाषा नहीं है; किन्तु 'विधीयते' पदका अध्याहार ही उसमें मूल है। तस्मिन् इत्यादि परिभाषाओं की प्रवृत्ति अनुवादक में भी होती है, क्योंकि यहाँ 'विधीयते' का अध्याहार नहीं है।

शङ्का—'षष्ठो स्थाने' की अनुवाद में भी प्रवृत्ति स्वीकार करने पर 'उदोचामातः स्थाने यक् पूर्वायाः' इस सूत्र में 'स्थाने' ग्रहण व्यर्थ हो जायेगा; क्योंकि 'षष्ठी स्थानेयोगा' के द्वारा ही स्थानपदार्थ का लाभ सिद्ध है ?

समाधान—उस सूत्र में स्थाने-ग्रहण स्पष्टार्थक है, प्रयोजनान्तर नहीं।

शङ्का—विधिसूत्र का वाक्यार्थबोध होने के साथ गुण-वृद्धि पद के श्रवणमात्र से इन पदों में विधेयताप्रयोजकत्व का निर्णय न होने के कारण इक्परिभाषा द्वारा इक् पद की उपस्थिति विधिसूत्रों में नहीं हो सकेगी। एवञ्च पदैकवाक्यतया इक् का अन्वय नहीं हो सकेगा ?

समाधान—विधिबोधक वाक्य में प्रथमान्त का निर्देश होने से प्रथमान्त पद में विधेयता प्रयोजकत्व का निर्णय होता है। वाक्यार्थबोध में इक्पदोपस्थापन द्वारा चरितार्थ होने पर भी गुण-वृद्धि पदों का अन्वय होता है—ऐसा न मानने पर विधेयताप्रयोजकत्व न होने से इक्परिभाषा का उपस्थापक लिङ्ग हो ही जायेगा। यह भाव है। पूर्व में वाक्यार्थबोध न होने पर भी प्रतिबन्धकरहित प्रथमान्तपदमात्र के श्रवण से विधेयक समर्थकत्व का निर्णय होता है, यह निष्कर्ष है।

३५. अचश्च । १ । २ ।२८ । ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्र 'अचः' इति षष्ठ्यन्तं पदमुपतिष्ठते ।

इयञ्च 'एधिता' इत्यादौ व्यञ्जनानां गुणव्यावृत्त्यर्थम्, 'भिन्नम्' इत्यादौ निषेधप्रवृत्तये इग्लक्षणत्वसम्पत्त्यर्थञ्चेति दिक् ॥

अचश्च ॥ प्लुतशब्दैरिति । 'ऊकाल' (१।२।२७) इति सूत्राद् 'ह्रस्वदीर्घप्लुतः' इति, अजिति चानुवर्त्तते; ह्रस्वेत्यादिपदञ्च तृतीयया विपरिणतमिति भावः । तेन 'दिव उत्' (६।१।१३१) 'अष्टन आ विभक्तौ' (७।२।८४) इत्यादावेतदनुपस्थितिः । शेषं प्राग्वत् ॥

बोध्यम् । अन्यथा 'क्ङिति च' इत्यनेन इग्निमित्तकगुणवृद्ध्योः प्रतिषेधेन 'पुगन्तलघूपधस्य च' इत्यत्र इक्पदस्यानुपस्थितौ इग्निमित्तकत्वाभावाद् गुणस्य प्रतिषेधो न स्यात् । परिभाषायाः सत्त्वे तु इक्पदोपस्थित्या निषेधः सिद्धः । विस्तरेण 'कार्यमनुभवन्हि' परिभाषायां विजयायां द्रष्टव्यम् ।

एतेन=विधेयत्वेन गृहीतस्यैव परिभाषालिङ्गत्वेन । पूर्वयोः = 'अदेङ् गुणः', 'वृद्धिरादैच्' इति सूत्रस्थयोः । तत्रेदम् = 'इकः' इति पदम् । **गुणवृद्धीति** । अस्य द्विवचनान्तत्वेन 'ईदूदेद् द्विवचनं प्रगृह्यम्' इत्यनेन प्रगह्यसंज्ञायां प्रकृतिभावे दीर्घसन्धिर्दुर्लभ इति न शङ्कनीयम्; अनुकरणत्वेन गुणवृद्धीति पदस्य तत्र शब्दस्वरूपपरत्वेन द्विवचनान्तत्वाभावात् प्रगृह्यसंज्ञायाः प्राप्त्यभावात् । विभक्त्यन्तस्यानुकरणत्वेन वृत्त्या अर्थवत्त्वाभावात् । अभेदविवक्षापक्षे प्रातिपदिकत्वाभावात् विभक्तेः प्रसङ्गाभावात् । 'उभस्य सर्वनामत्वे कोऽर्थः' इति सर्वादिसूत्रस्थभाष्यस्यापि अनयैव रीत्या निस्तारः । एवञ्च = 'विधौ परिभाषा' इत्यस्या अनतिरिक्तत्वे च । **पदोपस्थापकेति** । पदोपस्थापिका 'इको गुणवृद्धी' 'अचश्च' इति परिभाषाद्वयी, अत्रैव 'विधीयते' पदस्याध्याहारो नान्यत्रेति भावः । तेन=प्रकृतपरिभाषाद्वयातिरिक्तपरिभाषाणामनुवादेऽपि प्रवृत्तिस्वीकारेण । तदर्थस्य = गुणवृद्धिपदार्थस्य । तदनन्वयित्वे = वाक्यार्थानन्वयित्वे । **उपस्थापकत्वेति** । गुणवृद्धिपदानामिति शेषः । इयञ्च = 'इको गुणवृद्धी' इति परिभाषा ॥

अचश्च ॥ ननु पूर्वस्मिन् सूत्रे 'उच्चार्य' इति 'विधीयेते' इति पदद्वयमध्याहृत्य 'गुणवृद्धिपदमुच्चार्य गुणवृद्धी विधीयेते' इत्येवं व्याख्यातम्, अस्मिन् सूत्रे तद्विपरीतं ह्रस्वदीर्घप्लुतशब्दमनुवर्त्य तृतीयान्तेन विपरिणमय्य 'ह्रस्वदीर्घप्लुतशब्दैर्यत्राज् विधीयते' इत्येवं व्याख्यायते, कथमेवमिति चेत् ? श्रूयताम् ! पूर्वत्र गुणवृद्धीपदं समस्तम् । तत्र

'एधिता' इसमें 'सार्वधातुकार्धधातुकयोः' इससे व्यञ्जन को प्राप्त गुण की व्यावृत्ति के लिये, तथा 'भिन्नम्' इत्यादि स्थल में 'पुगन्त' सूत्र को इग्निमित्तकत्व सम्पन्न करने के लिए भी 'इको गुणवृद्धी' इसका आरम्भ हैं । अन्यथा इग्लक्षण न होने पर 'क्ङिति च' इससे गुण का निषेध नहीं होगा । इस सूत्र से इग्लक्षण गुण-वृद्धि का ही निषेध माना गया है ॥

अचश्च ॥ 'ह्रस्वदीर्घप्लुत शब्द के द्वारा जहाँ ह्रस्व दीर्घ और प्लुत का विधान होता है वहाँ अच् पद की उपस्थिति होती है'—यह इस सूत्र का अर्थ है । 'ऊकालोऽज् ह्रस्वदीर्घप्लुतः' इस सूत्र से ह्रस्व दीर्घ और प्लुत की एवं अच् पद की इसमें अनुवृत्ति है । अनुवृत्त ह्रस्व दीर्घ और

३६. आद्यन्तौ टकितौ । १ । १ ४६ ।

आद्यन्तौ टकितौ ॥ **यद्यप्यत्र 'मिलितस्य नैकत्रान्वयः' इति द्वन्द्वो न प्राप्नोति, तथापि समूहयोरन्वयबोधोत्तरं 'यथासङ्ख्यम्' (१।३।१०) इति सूत्रारम्भसामर्थ्यात् पुनः प्रत्येकान्वयः । लोके त्वेवंरीत्या प्रयोगोऽसाधुरेवेति भाष्ये स्पष्टम् ।**

असमस्तगुणपदस्य वृद्धिपदस्य च तृतीयान्तेन विपरिणामे पृथक् पृथग् गुणे वृद्धौ च अन्वयस्य विवक्षितत्वेन एकदेशान्वयः स्यात्; एकदेशान्वयस्य 'वृत्तस्य विशेषणयोगो न' इत्यनेन तिरस्कारात् । अतो गुणेन यो गुणः, वृद्धया या वृद्धिरिति व्याख्यानं परित्यक्तम् । अत्र तु 'अचः' इत्यस्य असमस्तत्वात् तृतीयान्तेन व्याख्यानेऽपि वाचकाभावात् तथा व्याख्यातम् । मूलानुरोधोऽपि सम्पन्नः ।

शेषं प्राग्वदिति । पदोपस्थापकत्वं, शब्दाधिकाराश्रयणं, विधीयते इत्यध्याहारश्च एतत् सर्वं समानं द्वयोः परिभाषयोः । अत एव 'त्यदादीनामः' 'दिव उत्' 'अष्टन आ विभक्तौ' इत्यादौ ह्रस्वादिशब्दैर्विधानाभावाद् 'अचश्च' इत्यस्याः परिभाषाया अनुपस्थित्या न दोषः ॥

आद्यन्तौ टकितौ ॥ आदिश्च अन्तश्च आद्यन्तौ । इत् च इत् चेत्येकशेषे इतौ इति । टश्च कश्चेति द्वन्द्वे टकौ, टकौ इतौ ययोस्तौ टकितौ । अत्रादिपदार्थस्य टित्पदार्थे अन्तपदार्थस्य च कित्पदार्थे अन्वयेन एकस्मिन् पदार्थे द्वयोरन्वयाभावेन एकपदार्थान्वयित्वरूपसहविवक्षाया अभावेन द्वन्द्वो न स्यात् । एवम् एकस्य इत्पदार्थस्य टकारेऽपरस्य च ककारे अन्वयाद् एकशेषोऽपि अनयोर्दुलभः ? इति आह—**यद्यपि** इति । द्वन्द्वपदमेकशेषस्यापि उपलक्षकम् । एकधर्मावच्छिन्ने एकधर्मावच्छिन्नस्य एकसम्बन्धेन अन्वयविवक्षायाः सहविवक्षापदार्थत्वे तु टकित्समुदायस्य 'टित् कित्' इत्येवमर्थात् उभयत्र इत्वं समानो धर्मः । तथाच एकधर्मावच्छिन्नेऽन्वयेऽपि आद्यन्तपदार्थस्य एकधर्मावच्छिन्नत्वं कथमिति चिन्तनीयम् । समुदायत्वावच्छिन्ने समुदायत्वावच्छिन्नस्य अन्वयः सम्भवति । एतदेव च **समूहयोरन्वयबोधोत्तर**मित्यादिना मूले विवक्षितमिति प्रतिभाति ।

आद्यन्तसमुदायस्य टकित्समुदायार्थे अन्वयेन समासोपपत्तावपि प्रत्येकमन्वयो

प्लुत शब्द का तृतीयान्त से विपरिणाम किया गया है । इसी कारण से 'दिव उत्' 'अष्टन आ विभक्तौ' इन सूत्रों में इसकी उपस्थिति नहीं होती । ह्रस्व और दीर्घ शब्द से इन सूत्रों द्वारा विधान नहीं है, अतः इसकी प्रवृत्ति नहीं हुई ।

अन्य अंश का व्याख्यान 'इको गुणवृद्धी' सूत्र के समान ही समझना चाहिये ॥

आद्यन्तौ इति ।। **शंका**—'आदि' का टित्पदार्थ में, 'अन्त' का कित्पदार्थ में अन्वय सापेक्ष होने से एकधर्मावच्छिन्न में एकधर्मावच्छिन्न की अन्वयरूप सहविवक्षा के अभाव से 'आद्यन्तौ' इसमें द्वन्द्व दुर्घट है ? इसी प्रकार 'टकितौ' इसमें 'इत् च इत् च' यह एकशेष भी टकार ककार रूप भिन्न-भिन्न पदार्थों में इत् पदार्थ का अन्वय होने से नहीं होगा ?

समाधान—आद्यन्त पदार्थ टकित् पदार्थ का एवं टक समुदाय में इत् का अन्वय करने पर समुदाय की समुदाय के साथ अन्वयविवक्षा होने से सहविवक्षाप्रयुक्त द्वन्द्व तथा एकशेष हो

अत्रैव 'यथासंख्य०' (१।३।१०) सूत्रोपन्यासो युक्तः। द्वन्द्वान्ते श्रूयमाणस्येच्छब्दस्य प्रत्येकं सम्बन्धः।

पुरस्तादपवादन्यायेन स्थानेयोगत्वस्यायमपवादः। प्रत्ययपरत्वन्तु परत्वादमुं बाधते। तेन चरेष्टादयः परा एव भवन्ति।

'वृत्तस्य विशेषणयोगो न' इति नियमेन दुर्घट इति समाधत्ते—**यथासंख्येति**। लोके 'शत्रूं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय' इत्यादौ यथा क्रमिकान्वयः, तथैव शास्त्रेऽपि क्रमानुरोधेन अन्वयः सिद्ध एव, एतदर्थं 'यथासंख्यमनुदेशः समानाम्' इति सूत्रकरणं विफलम्। अत एतत्सामर्थ्यात् शास्त्रे समासोत्तरमपि क्रमिकान्वयः। अर्थात् समासोत्तरम् एकदेशान्वयस्य 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' इत्यादिन्यायेन एकदेशान्वयो वारितोऽपि सामर्थ्यात् यथासंख्यसूत्रेण भवति। लोके तु नैवंविधः प्रयोगः। तत्र क्रमेणान्वयभावात्। अत्र एव भाष्यकृता—देवदत्तस्य अजा, यज्ञदत्तस्य अविः धनम् इति तात्पर्येण लोके 'अजाविधनौ देवदत्तयज्ञदत्तौ' इति न भवतीत्युक्तम्। शास्त्रे तु दृष्टान्तस्य पुरुषारम्भो निवर्तको भवति। 'अस्ति चेत् कश्चित् पुरुषारम्भः? अस्तीत्याह संख्यातानुदेशो नाम' इति भाष्येण समर्थितो भवत्येव। लोकेऽपि ईदृशप्रयोगसमर्थनं भाष्यविरोधादुपेक्ष्यम्।

पूर्वं पठिता इति। 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति न्यायेन स्वस्मात् परस्मिन् बाधनीये प्रथमोपस्थितत्वाद् अनन्तरस्य अव्यवहितोत्तरस्य बाधेन सूत्रे चरितार्थे व्यवहितस्य परस्य बाधे मानाभाव इत्येतन्मूलकेन 'षष्ठी स्थानेयोगा' इत्यस्यैव 'आद्यन्तौ टकितौ' इति सूत्रम् अपवादत्वाद् बाधकं भवति। 'प्रत्ययः' 'परश्च' इति सूत्रं परत्वाद् 'आद्यन्तौ' इति सूत्रस्य बाधकम्। अत एव 'चरेष्टः' इत्यनेन विहितष्टप्रत्ययो धातोरनन्तरं भवति, न तु टित्त्वाद् धातोः पूर्वम्।

अत्रैवेति। एतस्मात् प्रागेवेति भावः। **द्वन्द्वान्ते** इति। 'द्वन्द्वान्ते द्वन्द्वादौ वा श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति न्यायेन इत्यर्थः। अतएव=षष्ठी स्थानेयोगा इत्यस्यैवापवाद

जायगा। 'शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय' यहाँ जिस प्रकार किसी अनुशासन के बिना ही क्रमिक अन्वय होता है, उसी प्रकार शास्त्र में भी क्रम से अन्वय सिद्ध होने से व्यर्थीभूत 'यथासंख्य' सूत्र समस्त स्थल में लोकानुरोध से अप्राप्त क्रमिकान्वय के बोधनार्थ आवश्यक माना गया है। अतः यथासंख्यसूत्र के बल पर समासानन्तर क्रमिकान्वय हो जायगा। लोक में प्रमाणाभाव से समुदायान्वय की विवक्षा में द्वन्द्वोत्तर 'अजाविधनौ देवदत्तयज्ञदत्तौ' यहाँ अजा का देवदत्त में, अवि (भेड़) का यज्ञदत्त में क्रमिक अन्वय नहीं होता।

परममूल में 'यथासंख्य' सूत्र का उपन्यास यहीं करना उचित था। इत् का द्वन्द्वान्त में श्रवण होने से ट, क प्रत्येक के साथ सम्बन्ध होता है। 'पुरस्तादपवादाः' इस न्याय से 'षष्ठी स्थानेयोगा' इससे प्राप्त षष्ठ्यर्थ स्थानेयोगत्व का इस सूत्र के द्वारा बाध होता है। 'प्रत्ययः' 'परश्च' इसका बाध नहीं करता। अतएव 'चरेष्टः' से विहित ट प्रत्यय टित्व के कारण धातु का आद्यवयव न होकर पर में ही होता है। अतः 'आद्यन्तौ' इसकी अप्रवृत्ति होने से स्थान में जहाँ षष्ठी की सम्भावना है, उसी स्थल में इसकी प्रवृत्ति होती है। इसी आशय से परम मूल में

टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः ॥

३७. मिदचोऽन्त्यात्परः । १ । १ । ४७ । **'अचः' इति निर्धारणे**

अत एव यत्रैतदभावे स्थानषष्ठीसम्भावना तत्रैवेदं प्रवर्त्तते; तदाह—यस्योक्ताविति । **आद्यन्ताक्षिप्तोऽवयवी यच्छब्दार्थः । यथासंख्यसिद्धमर्थमाह**—क्रमादिति ।

इताविति किम् ? **टुक् पर्यायेणाद्यन्तयोर्मा भूत् ॥**

मिदचो० (१ । १ । ४७) । **अयं बाध्यसामान्यचिन्तया स्थानेयोगत्वप्रत्ययपरत्व-**

इति स्वीकारादेव । प्रकृत्यर्थलाभोपायमाह—**आद्यन्ताक्षिप्त** इति । अवयववाचिना आद्यन्त-शब्देन आकांक्षितस्य अवयविन आक्षेपात् 'अवयवी' इति लभ्यते । अयमेव यस्येत्यत्र यच्छब्दार्थः ।

ननु मत्वर्थीयम् इन्प्रत्ययं विधाय टकितौ इत्यस्य स्थाने टकिनौ इति निर्देशः कुतो न कृतः सूत्रकृता, एवंकरणे कुकि पूर्वककारेण ककारवत्त्वात् अन्तिमः ककारो न वक्तव्य इति लाघवम् ? इत्याशयेन शङ्कते—**इताविति किमिति** । टुकि टकारककारयोरुभयोः सत्त्वेन सकृदेव तयोर्विधानासम्भवात् पर्यायेण कदाचित् पूर्वं कदाचित् परं प्रवर्तेत । अत्र इत्-पदं प्रवेशितम् । टकारस्येत्संज्ञकत्वाभावेन न पर्यायतापत्तिः ।

यत्तु **विषम्यामाचारिणः**—'लक्ष्ये अनुबन्धरहितस्योपस्थित्या टुकः ककाररहित-स्योपस्थितत्वाद् आद्यवयवस्यैवापादनं युक्तम्, न तु पर्यायापादनमिति मूलोक्तं चिन्त्यम्' इति । तत्तु आग्रहव्यसनप्रभवम् । सर्वत्र बोध्ये टित्त्व-कित्त्व-पित्त्वादिधर्माणामसत्त्वात् तत्तदनुबन्धवैयर्थ्यापत्तिभिया बोधकवृत्तिधर्माणां बोध्ये आरोप इति कल्पनया ककार-वत्त्व-टकारवत्त्वादीनां समारोपेण टकारवत्त्वस्येव ककारवत्त्वस्यापि सम्भवेन पर्याया-पत्तिर्युक्तैव, 'प्रमाणानां सामान्येन पक्षपातः' इति न्यायेन पूर्वोक्तकल्पनया सिद्धस्य बोधकवृत्तिधर्मारोपस्य सामान्यतोऽवगमात् । प्रत्येकस्मिन् स्थले तत्तत्सामर्थ्येन 'आद्यन्तौ' इत्यस्य प्रवृत्तौ मानाभावादित्याशयात् ॥

मिदचोऽन्त्यात् परः ॥ 'मद्विषये यद् यत् प्राप्तं तत् सर्वं मया बाध्यम्' इति बाध्य-सामान्यचिन्तापक्षस्याश्रयणेन 'षष्ठी स्थानेयोगा' 'परश्च' इत्येतत्सूत्रद्वयमपि इदं सूत्रं बाधते; मित्करणसामर्थ्यात् । नच श्नमादिप्रत्यये श्रवणार्थमेव मकारोच्चारणं स्यादिति तदुच्चारणसामर्थ्यात् 'परश्च' इत्यस्य बाधो न युक्तः ? अत आह—**तृणह इति** । अस्मिन्

'यस्योक्तौ' लिखा है । आदि और अन्त से आक्षिप्त अवयवी यत् शब्द का अर्थ है । **यथासंख्य-**सूत्रारम्भसामर्थ्य से लब्ध क्रमिकान्वय के अनुसार लिखा है—**क्रमादिति** । सूत्र में इत् न कहने पर टकार ककार दोनों ही टुक् में होने से पर्यायतापत्ति हो जायगी । इत् कहने पर ककार इत् संज्ञक होने पर भी टकार इत् नहीं है । अतः टुक् आगम टकारघटित रहने पर भी आदि को नहीं हुआ ॥

'मिदचोऽन्त्यात्परः' इति ॥ बाध्यसामान्यचिन्तापक्ष में जिन शास्त्रों की अपवादविषय में प्राप्ति होती है उन सबों का अपवादशास्त्र के द्वारा बाध होता है । अतः 'षष्ठी स्थानेयोगा'

षष्ठी । अचां मध्ये योऽन्त्यस्तस्मात् परस्तस्यैवान्तावयवो मित् स्यात् ॥

योरपवादः; 'तृणहः' (७ । ३ । ९२) इति निर्देशात् । निर्धारणे इति । **यस्य समुदायस्य मिद्विहितस्तस्याचां मध्ये इत्यर्थः । सौत्रमेकवचनमिति भावः** । तस्यैवेति । **यस्य विहितस्तस्यैवेत्यर्थः ।**

अत एव 'समुदायभक्तोऽसौ नोत्सहतेऽवयवस्येगन्ततां विहन्तुम्' इति भाष्यं सङ्गच्छते ।

अन्तावयव इति । **पूर्वसूत्रात् समस्तमप्यन्तपदमेकदेशे स्वरितत्वप्रतिज्ञाबलादनुवर्त्तते इति भावः । 'मुञ्चति' इत्यादिविषये तु फलाभावादयोग्यत्वाच्च 'अन्तावयव' इत्यंशाप्रवृत्तिः ॥**

निर्देशे अन्त्यादचः परस्य श्नम्घटकनकारस्य दर्शनात् बाध्यबाधकभावो युक्त एव । अतएव च स्वोच्चारणार्थत्वमपि नेति गम्यते । यशांसि, पयांसि इत्यादौ अन्त्यस्याचोऽभावात् 'मिदचोऽन्त्य ात्' इति सूत्रस्य प्रवृत्तिर्न स्यात् । अत उक्तम्–**निर्धारणे** इति । अचः इति निर्धारणषष्ठ्यन्तम् । अचां मध्ये अन्त्यत्वमचो विवक्षितम्, न तु समुदायस्य ।

ननु निर्धारणविभक्तेः समूहवाचकादुत्पत्तेः, तदर्थम् अच्पदे एकशेषस्यावश्यकतया द्विवचनं बहुवचनं वा तत्रोचितम् । तथा च सूत्रे 'अचः' इत्येकवचनान्तेन निर्देशः कथम् ? अत आह—**सौत्रत्वाद् इति** । यस्य समुदायस्य मित्संज्ञकः प्रत्ययो विहितः, तस्य समुदायस्येव स प्रत्ययो भवति । अत एव भाष्यकृता 'समुदायभक्तो हि नुम् नोत्सहते अवयवस्येगन्ततां विहन्तुम्' इत्युक्तम् । अवयवस्य नुमादीनामवयवत्वात् समुदाये इगन्तत्वव्यवहारो न विहन्यते । समुदायावयवत्वे तु इगन्तत्वव्याघातः स्पष्ट एव । समुदायभक्तः = समुदायावयवः ।

'अन्तावयवः' इत्यर्थलाभोपायमाह—**पूर्वसूत्रादिति** । यद्यपि 'आद्यन्तौ टकितौ' इत्यत्र आद्यन्तयोः समस्तपदत्वेन तदेकदेशस्यान्तस्य अनुवृतिरयुक्ता, पदार्थैकदेशत्वात्,

---

तथा 'प्रत्ययः' 'परश्च' इनका 'मिदचोऽन्त्यात्परः' इससे बोध की सिद्धि हुई । 'तृणह इम्' इसका 'तृणह' निर्देश उक्तार्थ का निर्णायक है । अन्यथा 'प्रत्ययः' 'परश्च' इसके द्वारा श्नम् प्रत्यय धातु के अव्यवहितोत्तर होने से 'तृणह' निर्देश की अनुपपत्ति हो जायगी । 'अचः' इसमें निर्धारणषष्ठी होने से सर्वापेक्षया अन्त्य विवक्षित नहीं है; किन्तु अचों के मध्य में अन्त्य होना चाहिये । अनेक में एक का निर्धारण होने से बहुवचन विभक्ति आवश्यक होने पर भी सौत्रत्व के कारण एकवचन हैं । तस्यैव = जिसको मित्संज्ञक प्रत्यय का विधान होता है उसी का अवयव होता है ।

इसीलिये पञ्चारत्निः इसमें नुम् का समुदायावयव होने से उत्तरपद को इगन्त समझकर 'इगन्तकालकपाल' इत्यादि सूत्र से स्वर सिद्ध हुआ । अन्यथा उत्तरपद नान्त होने से इगन्त नहीं होगा । इसके स्वीकार करने पर ही 'समुदाय का अवयव नुम् अवयव की इगन्तता का विधान नहीं कर सकता'—एतदर्थक भाष्य की सङ्गति होती है । 'आद्यन्तौ' इस सूत्र से समस्त आद्यन्त पद के एकदेश अन्त पद की अनुवृत्ति एकदेश में स्वरितत्व प्रतिज्ञा से होती है । 'मुञ्चति' इसमें परत्वांश की उपस्थिति होने पर भी समुदाय का अन्त्यावयवत्व नुम् में सम्भव न होने से और फलाभाव से अन्त इस अंश की उपस्थिति नहीं होती ॥

३८. षष्ठी स्थानेयोगा । १ । १ । ४९ । **अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्या ।**

परिभाषाणामनियमे नियमकारिणीत्वादाह—अनिर्धारितेति । **तेन 'ऊदुपधाया गोहः'** (६ । ४ । ८९) **इत्यत्र स्थानेयोगत्वं न, उपधापदसन्निधानेनावयषष्ठीत्व-निर्णयात् । 'स्थानेयोगा' इत्यस्य स्थानपदार्थनिरूपितसम्बन्धार्थिकेत्यर्थः । स्थानेन योगो**

तथापि स्वरितत्वप्रतिज्ञाबलाद् एकदेशस्यानुवृत्तिः कृता । स्वरितत्वं नाम अज्झलोः साधारणो दोषविशेषः । दोषेणानेन अनुवृत्तिज्ञानमित्यग्रे स्फुटम् । मुञ्चतीत्यादौ नुमोऽत्रावयवत्वं बाधितम्, तत्र 'अन्तावयव' इत्यंशो न सम्बध्यते । नचायोग्यत्वाद् अन्तांशमात्रस्योपस्थितिर्मा भूत्, अवयवांशस्योपस्थित्यभावे किं प्रमाणम् ? अत आह—**फलाभावात् इति** । अवयवत्वबोधने न किञ्चित् फलम्; तन्मध्यपतितन्यायेन मध्यपतितत्वादेव विशिष्टस्य संग्रहात् ।।

षष्ठी स्थानेयोगा ।। 'अनियमे प्राप्ते परिभाषाणां नियमकारिणीत्वम्' इत्याशयेनोक्तम्—**अनिर्धारितेति** । 'ऊदुपधायाः गोहः' इत्यत्र 'गोहः' इति घटकषष्ठ्या उपधापदसन्निधानात् अवयववाचकत्वस्य निश्चयेन तत्र नानेन सूत्रेण स्थाननिरूपितसम्बन्धार्थकत्वस्य बोधनम् । षष्ठीविभक्तेः स्थानमर्थो न, किन्तु स्थानपदार्थनिरूपितस्थान्यादेशभावरूपः सम्बन्धो वाच्यः । यदि स्थानरूपः सम्बन्धो विवक्षितः स्यात्, तदा 'स्थानं योगः=सम्बन्धो यस्याः' इत्येवं विग्रहेण 'स्थाने योगा' इति निर्दिशेत् । नैवं कृतम् । किन्तु 'स्थानेन योगो यस्याः' इति व्यधिकरणबहुव्रीहिरेव भाष्यकारेण कृतः । 'अस्तेर्भूः' इत्यत्र षष्ठ्या आनन्तर्यं सामीप्यं वा अर्थः ? इत्याशङ्क्य 'अस्तेरनन्तरं समीपे वा आदेशः' इति सन्देहस्योपपत्तये षष्ठ्याः सामीप्यादिकमप्यर्थ इति न वक्तव्यम् । किम् ? आनन्तर्यपदमध्याहृत्य तन्निरूपितसम्बन्धार्थिका, सामीप्यपदमध्याहृत्य तन्निरूपितसम्बन्धार्थबोधिका वा षष्ठीत्यभिप्रायकं भाष्यवचनम् । अतः षष्ठ्याः आनन्तर्याद्यर्थो न ।

षष्ठीमात्रोच्चारणे सम्बन्धविशेषस्यानिश्चयदशायां स्थानपदमध्याहृत्य तन्निरूपितसम्बन्धः षष्ठी वाच्य इति ध्येयम् ।

उपाधापदेति । अन्त्यालः पूर्वस्य उपधापदार्थतया अवयववृत्तिकत्वं तस्येति

षष्ठी स्थाने योगा ।। **परिभाषा** इति । सूत्रों से अनियत आदेश की प्राप्ति को नियमित करना परिभाषा शास्त्र का स्वभाव है । इसके अनुसार लब्ध अर्थ लिखते हैं—**अनिर्धारित** इति । अनिश्चित सम्बन्ध विशेष वाली षष्ठी स्थाननिरूपित सम्बन्ध में होती है । 'ऊदुपधाया गोहः' इसमें अवयवबोधक उपधा पद के सम्बन्ध से षष्ठी का अवयवावयविभाव सम्बन्ध निर्धारित होने से षष्ठ्यर्थ निर्धारित है । अतः वहाँ इस परिभाषा की उपस्थिति नहीं हुई ।

स्थानेन योगः—स्थाननिरूपित आदेशि-आदेश भाव = निवर्त्यनिर्तक भाव से योग सम्बन्ध यह भाव है । निपातन से एकार की साधुता है । इससे यह सिद्ध होता है कि स्थानरूप सम्बन्ध नहीं है । अन्यथा 'स्थानं योगो यस्याः' इस विग्रह को त्यागकर अधिकरण 'स्थाने, स्थानेन वा योगो यस्याः' इस प्रकार का भाष्योक्त विग्रह असङ्गत हो जायगा ।

स्थानं च प्रसङ्गः ।

यस्या इति विग्रहे निपातनात् साधुत्वस्य भाष्ये उक्तत्वात् 'अस्तेरनन्तरे' इत्यादेरपि अनन्तरादिनिरूपितसम्बन्धे इत्येवार्थः । षष्ठीमात्रोच्चारणे स्थानपदाद्यध्याहार इत्यन्यत्र विस्तरः ॥

प्रसङ्ग इति । 'दर्भाणां स्थाने शरैः प्रस्तरितव्यम्' इत्यादौ तथा दर्शनात् । भावे ल्युट् स्थानशब्दे । प्रसङ्गश्च सति सम्भवेऽर्थवत एव, अर्थप्रत्यायनार्थं शब्दप्रयोगात् । 'इको यण्' (६ । १ । ७७) इत्यादेरचपरेकारघटितशब्दस्यार्थबोधनाय प्रसङ्गे तत्पर-यकारघटितः प्रयोक्तव्य इत्यर्थः । 'एरुः' (३ । ४ । ८६) इत्यादेश्च 'तेस्तुः' इति; अतो न शब्दनित्यताहानिः ।

भावः । **निपातनात् साधुत्वेति** । यदि स्थानरूपोऽर्थः षष्ठ्या विवक्षितस्तदा 'स्थान-योगा' इत्येव वक्तव्ये निपातनेन एकारघटितप्रयोगो विफल एव कृत इति भावः ।

प्रसङ्गरूपोऽर्थः स्थानशब्दस्यान्यत्र दृष्ट इत्यप्रसिद्धार्थकत्वम् । अत आह—**दर्भाणामिति** । आभिचारिके दृष्टिविशेषे वचनमिदमुक्तम् । दर्भाः = कुशशराः, स्थूलास्तृणविशेषाः । प्रस्तरः = मुष्टिविशेषः—इति **विषमी** । स्थानशब्दो भावल्युडन्तः ।

परिष्कृतभाषयापि अवधीयताम्—वृत्तिविशेष्यतावच्छेदकतावच्छेदकताकेष्टसाधनत्व-प्रकारकभ्रमाविषयत्वप्रकारकज्ञानीयविशेष्यतावच्छेदकधर्मावच्छिन्नविशेष्यताकेष्टसाधनत्व-प्रकारकप्रमाविषयत्वप्रकारकज्ञानीयविशेष्यतावच्छेदकतावच्छेदकता । यथा 'दर्भाणां स्थाने शरैः प्रस्तरितव्यम्' अस्याम् इष्टौ दर्भकरणकं प्रस्तरणं परित्यज्य शरकरणकं प्रस्त-रणं विधीयते, दर्भपदोत्तरषष्ठ्याः निरूपितत्वमर्थः । अस्य च वृत्तित्वेऽन्वयः । वृत्तित्वञ्च द्वितीयावच्छेदकतायामन्वेति । तथाच दर्भनिरूपितं यद् वृत्तित्वं तादृशवृत्तित्ववती या विशेष्यतावच्छेदकतावच्छेदकता—दर्भकरणकं प्रस्तरणं मदिष्टसाधनमित्याकारकं ज्ञानं भ्रम इत्येतज्ज्ञानीया या प्रस्तरणत्वाच्छिन्ना प्रस्तरणनिष्ठा विशेष्यता तन्निरूपिता कर-णत्वे, तदवच्छेदकता दर्भे, तादृशावच्छेदकताकम् इष्टसाधनत्वप्रकारकं भ्रमज्ञानं तज्ज्ञानीया विशेष्यता प्रस्तरणे, तदवच्छेदकं प्रस्तरणत्वम्, तदवच्छिन्नप्रस्तरणनिष्ठविशे-ष्यतानिरूपकम् इष्टसाधनत्वप्रकारकतानिरूपकं ज्ञानं प्रमाज्ञानं शरकरणं मदिष्ट-साधनमिति प्रमाज्ञानम्, तादृशप्रमाज्ञानीया या प्रस्तरणनिष्ठा विशेष्यता तदवच्छेदकता करणत्वे, तदवच्छेकता च शरेषु, तदाश्रयाः शरा इति समन्वयः ।

शङ्का—सामीप्य आनन्तर्य आदि को षष्ठ्यर्थ न मानने पर 'अस्तेः अनन्तरं समीपे वा भू आदेशः' इस भाष्य के साथ विरोध होगा ?

समाधान—अनन्तरा पदों के अध्याहार द्वारा तन्निरूपित सम्बन्ध में षष्ठी है—इस तात्पर्य से यह भाष्योक्ति है । अत एव असङ्गति नहीं है । सम्बन्धविशेष का निर्णय न होने पर षष्ठीमात्र के उच्चारण में स्थान पद का अध्याहार होता है ।

प्रसङ्ग इति । प्रसङ्ग का अर्थ स्थान है । 'दर्भाणां स्थाने' इस आभिचारिक याग में स्थान का प्रसङ्ग अर्थ देखा गया है । सम्भव होने पर अर्थवान् का ही प्रसङ्ग = प्राप्ति है; क्योंकि

किञ्च, इकारबुद्धिप्रसङ्गे यकारबुद्धिरित्यर्थः। अत एव 'अचः परस्मिन्' (१ । १ । ५७) इत्यादि सङ्गच्छते। स्पष्टञ्चेदं 'दाधा घु' (१ । १ । २०) इति सूत्र-'स्थानिवत्' (१ । १ । ५६) सूत्रयोर्भाष्ये ॥

एवम् 'इको यणचि' इत्यत्र इकः स्थाने इति निर्दिष्टस्थानपदार्थे समन्वयः। इक्-कर्मकोच्चारणं मदिष्टसाधनमित्याकारकं ज्ञानं भ्रमः, यण् कर्मकोच्चारणं मदिष्टसाधनमि-त्याकरकं ज्ञानं प्रमाविषयत्ववदिति ज्ञानद्वयं जायते। इग्निरूपितत्ववती अर्थात् इग्-निष्ठा या विशेष्यतावच्छेदकताऽवच्छेदकता--इक्कर्मकोच्चारणं मदिष्टसाधनम् इत्याकारकं ज्ञानं भ्रमविषयतावदित्याकारकज्ञानीया उच्चारणनिष्ठविशेष्यतानिरूपिता या कर्मत्व-निष्ठाऽवच्छेदकतानिरूपिता या इग्निष्ठाऽवच्छेदकता तादृशावच्छेदकताकेष्टसाधन-त्वप्रकारकप्रमाविषयत्वप्रकारकं ज्ञानं यण्कर्मकोच्चारणं मदीयेष्टसाधनमित्याकारकं तज्ज्ञानीयोच्चारणनिष्ठविशेष्यतानिष्ठा या विशेष्यता तन्निरूपिताऽवच्छेदकता कर्मत्वे, तदवच्छेदकता यणि, तदाश्रयो यण्। विस्तरेण टिप्पण्यां निरूपितम्।

प्रसङ्गश्च सतिसम्भवे अर्थविशिष्टस्य शब्दस्य ग्राह्यः, अर्थबोधनार्थं शब्दस्य प्रयोगात्। 'इको यणचि' इत्यत्र अज्निरूपिताव्यवहितपूर्वत्वविशिष्टस्य इग्घटितस्य प्रयोगप्रसङ्गे यण्घटितस्यार्थबोधकस्य प्रयोग इत्यर्थः। अन्यथा कस्यचिद् वर्णस्य स्थाने कस्मिंश्चिद् आदेशे वर्णस्यानित्यत्वमापद्येत। तद्घटितप्रयोगप्रसङ्गे इत्यर्थेऽभ्युपगम्यमाने तादृशं प्रयोगम् अकृत्वा तद्घटितस्य प्रयोगान्तरस्य बोधनात् न नित्यत्वहानिः। अथवा इकारबुद्धिप्रसङ्गे यकारबुद्धिः कर्तव्येति बुद्धिविपरिणामेन शब्दानित्यत्वप्रसङ्गो वारणीयः। वर्णबुद्धिर्नश्यति, न वर्ण इति भावः।

नचैवं स्थानिवद्भावः 'अचः परस्मिन् पूर्वविधौ' इत्यनेन विहितो न प्राप्नोति। तेन हि अण्मात्रस्थानिकादेशस्यैव स्थानिवद्भावो विधीयते। इग्घटितस्येत्यादिव्याख्याने

अर्थबोध के लिये शब्दों का प्रयोग किया जाता है। 'इको यणचि' इत्यादि स्थल में अर्थबोध के लिये 'अच्परक इण्घटित प्रयोग की प्राप्ति में अच्परक यण्घटित का प्रयोग करना चाहिये—इस प्रकार का अर्थ होगा। 'एरुः' इसका वाक्यार्थबोध 'इकारघटित के स्थान में उकारघटित प्रयोग होता है। इस प्रकार सूत्रार्थ करने से शब्दनित्यता की क्षति भी नहीं हुई। अथवा 'कार्य विपरिणामाद्वा' इस वार्तिक में कार्य का अर्थ है बुद्धि, तदनुसार इकारबुद्धि के प्रसङ्ग में यकार की बुद्धि करनी चाहिये—इस प्रकार के सूत्रार्थ से बुद्धि का विपर्यास है, शब्द का नहीं। इसलिये नित्यत्व की क्षति नहीं हुई। ऐसा मानने पर ही 'अचः परस्मिन्' इसकी अज्मात्र स्थानिक आदेश के कारण सङ्गति होती है। एवं पदचरमावयवकर्मक विधान में 'न पदान्त' सूत्र से निषेध का सार्थक्य है। प्रथम पक्ष में समुदायादेश होने से अच् मात्र के स्थान में आदेश नहीं है; अतः स्थानिवद्भाव नहीं होगा। भाष्य में यह स्पष्ट है[1] ॥

---

१. नित्येषु आगमशासनं युक्तमित्याशङ्क्य नित्येषु आदेशशासनं यथा बुद्धिविपरिणामेन तथात्रापीत्यादिना उक्तसूत्रे भाष्ये उक्तम्।

३९. स्थानेऽन्तरतमः । १ । १ । ५० । प्रसङ्गे सति सदृशतम

स्थानेऽन्तरतमः (१ । १ ५०)। षष्ठीत्यनुवृत्त्या 'यत्र स्थानषष्ठी तत्रेदमुपतिष्ठते' इति विध्येकवाक्यतयैवास्य नियामकत्वम्, न तु विहितानां नियमः, 'भुक्तवन्तम्' इति न्यायविरोधात् ।

फलितमाह—प्रसङ्गे इति । सदृशतम इति । अर्थात् प्राप्यमाणानां मध्ये एव । अत एव 'गङ्गोदकम्' इत्यादौ त्रिमात्रो न ।

तु अज्झलुभयस्थानिकत्वेन न प्राप्नुयादित्याशयः । बुद्धिविपरिणामे इकारबुद्धेरेव विपरिणामात् अज्मात्रस्थानिकत्वमादेशस्य सूपपादम् । 'दाधा घ्वदाप्' इति सूत्रे भाष्ये प्रनिदारयतीत्यत्र दाशब्दस्य प्राप्तं घुत्वेन णत्वं वारयितुम् समानशब्दानां प्रतिषेधः' इति वार्त्तिकमुक्तम् । एतत्खण्डनाय 'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषया अर्थविशिष्टस्य 'दा' शब्दस्य ग्रहणात् नेह घुसंज्ञायाः प्राप्तिः; दारघटकदाशब्दस्यानर्थकत्वात् । एवं तर्हि प्रणिदापयतीत्यत्र पुग्विशिष्टस्यार्थवत्त्वेन दामात्रस्यानर्थकत्वात् घुसंज्ञाया अप्राप्तौ 'नेर्गदनद-पद' इत्यादिना णत्वं न स्यादित्युक्त्वा यदागमपरिभाषार्थकेन 'अर्थवतो ह्यागमाः' इति वचनेन समाधाय नित्येषु शब्देषु आगमविधानमनुपपन्नमित्याशङ्क्य नित्येषु आदेश-शासनम् = आदेशास्तर्हि अनागमकानां सागमकाः आदेशाः, कथं 'सर्वे सर्वपदादेशा' इत्यु-क्तम् । स्थानिवत्सूत्रे भाष्येऽपि—'कार्यं विपरिणामाद् वा' इत्यनेन कार्याया बुद्धेर्विपरि-णामः स्पष्टमेव दर्शितः । अत एव = तद्घटिते लक्षणस्वीकारादेव ॥

स्थानेऽन्तरतमः ॥ 'षष्ठी स्थानेयोगा' इति सूत्रात् षष्ठीपदमनुवर्तते । एतत्सूत्र-स्थस्थानपदार्थेन सह अनुवृत्तषष्ठीपदस्य सम्बन्धेन यत्र स्थानपदार्थनिरूपितसम्बन्धार्थ-

---

स्थानेऽन्तरतम इति ॥ 'षष्ठी स्थानेयोगा' इससे षष्ठी की अनुवृत्ति होने के कारण जहाँ स्थान में षष्ठी रहती है वहीं इसकी उपस्थिति होती है । अतः यह विधिसूत्रों में पदैकवाक्यतापन्न होकर उसका नियामक होता है । अर्थात् अन्तरतम आदेश का विधान अनन्तरतम का व्यावर्तक होने से नियामक है । यदि विधिसूत्र से विधानानन्तर इससे असदृश आदेश को व्यावृत्ति की जायगी तो 'भुक्तवन्तं प्रति' इस न्याय से विरोध होगा । इसी का फलित अर्थ है—प्रसङ्गे इति । आदेश की प्राप्ति-अवस्था में ही अन्तरतम आदेश का विधान है ।

सदृशतम इति । प्राप्यमाण आदेशों के मध्य में जो सदृशतम है वही होता है । इसी कारण से 'गङ्गोदकम्' में त्रिमात्र का आदेश स्थानी के सदृशतम होने पर भी प्राप्यमाण आदेश का मध्यस्थ न होने से नहीं हुआ ।

शङ्का—'अन्तरतमः' इसमें तम शब्दोपादान का प्रयोजन क्या है ?

समाधान—वाग्घरिः यहाँ 'झयो हो' इससे पूर्वसवर्ण हकार को महाप्राणत्वसाम्य से घ प्राप्त होता है । उसी प्रकार वर्ग के द्वितोय खकार का भी महाप्राण होने से सादृश्य है । अतः उसकी प्राप्ति की व्यावृत्ति सदृशमात्र से नहीं हो सकती । अन्तरतम कहने पर महाप्राण और नाद दोनों घकार के प्रयत्न है खकार के नहीं; अतः अन्तरतम घकार ही होता है । 'स्थानेऽन्त-रतमः उरण रपरः' इस प्रकार प्रथमान्त का संहितापाठ हैं । अतः 'अन्तरतमः' यह आदेश का विशेषण होने से अनन्तरतम आदेश का व्यावर्त्तक होगा । इसलिये खकार की व्यावृत्ति हो जायगी ।

आदेशः स्यात् ।

तमप् किम्? 'वाग्घरिः' इत्यादौ महाप्राणत्वसाम्येन जायमानः पूर्वसवर्णो वर्गद्वितीयो मा भूत्, किन्तु नादवान् महाप्राणश्चतुर्थो घ एव यथा स्यादिति ।

बोधिका षष्ठी तत्र सूत्रे अन्तरतमपदमुपतिष्ठते' इत्यर्थो निष्पन्नः। विधिसूत्रेण सह अस्य पदैकवाक्यतया अन्वयः। तथाच विधिसूत्रस्य वाक्यार्थः स्थानेन्तरतमपरिभाषया उपस्थापितेन अन्तरतमेन सहैव निष्पद्यते। अतः सदृशतमत्वेन भिन्नानामादेशानां व्यावृत्तिः सिद्धा। एष एव लघीयान् पन्थाः। यथाप्राप्तम् आदेशान् विधाय तदनन्तरम् एतस्य प्रवृत्त्या अनन्तरतमानामादेशानां व्यावृत्तिबोधने तु 'भुक्तवन्तं प्रति मा भुंक्थाः' इति न्यायो विरुध्येत। परममूले 'प्रसङ्गे सदृशतमः' इति फलितार्थकथनपरतया नेयम्। प्राप्यमाणानामादेशानां मध्ये योऽन्तरतमः स एव भवति, न तु येषां केषाञ्चिदादेशानां मध्ये योऽन्तरतमः स भवतीति भावः। स्थितिः स्थानमिति भावे ल्युटि तु स्थाने इत्यस्याः स्थितौ सत्याम् अन्तरतम आदेश इति वाक्यैकवाक्यतयाऽन्वये भुक्तवन्तमिति न्यायविरोधो दर्शितः। 'विहितानां नियमः' इत्यस्य कार्यविधानानन्तरमनेन नियमव्यावृत्तिरित्यर्थः। अस्मिन् पक्षे न्यायविरोधो दर्शित एव।

नच विहितानां नियम इति पक्षो नाङ्गीक्रियते, किन्तु यथा 'उरण् परः' इत्यस्य उः स्थाने प्रसज्यमान एवाण् रपरः इत्यर्थः, तथैवात्रापि प्रसज्यमान आदेशोऽन्तरतमो भविष्यति, अन्वयश्च वाक्यैकवाक्यतया, एवं रीत्या व्याख्याने मूलं शब्दार्थतयैवोपपन्नम्? इत्याशङ्कायामाह—**अर्थात् इति** । तथाविधार्थस्वीकारे स्वतन्त्रो विधिरिव गङ्गोदकमित्यत्र आकारस्य उकारस्य त्रैमात्रिकत्वेन तयोः स्थाने जायमानो गुणः सदृशतमत्वात् त्रैमात्रिकः प्रसज्येत। विधिसूत्रेण सहैव पदैकवाक्यतयाऽन्वये तु प्राप्यमाणानामादेशानां मध्ये योऽन्तरतमः स एव प्राप्नुयात्। त्रैमात्रिकस्य प्लुतस्य गुणसंज्ञाया अभावेन गुणानन्तर्गतत्वाद् गङ्गोदकमित्यादौ प्लुतस्य गुणस्यापत्तिर्न। तादृशत्रैमात्रिकगुणस्य गुणविधायकसूत्रेण प्राप्यमाणतैव नास्तीति भावः।

येन केनापि रूपेण शब्दत्वेन प्रमेयत्वादिना सादृश्यस्य सर्वत्र सत्त्वेन सूत्रे अन्तरशब्दोपादानस्य वैयर्थ्यापत्त्या अन्तरशब्द एव सामर्थ्याद् अन्तरतममर्थं बोधयिष्यतीति तमब् ग्रहणं किमर्थमिति शङ्कते—**तमप् किमिति**। तमप्-पदेन अनेकविधमान्तर्यं बोध्यते। एतद् बोधनमस्य प्रयोजनम्। अतः स्वांशे चारितार्थ्यस्य प्रश्न एव नोदेति। एतस्य फलन्तु वाग्घरिरित्यत्र महाप्राणत्वरूपबाह्यप्रयत्नसाम्येन वर्गे द्वितीयः खकारो 'झयो होऽन्यतरस्याम्' इत्यनेन न। अपितु नाद-महाप्राणत्वोभयसाम्येन घकारो वर्गे चतुर्थो भवति, खकारापेक्षया घकारस्य प्रयत्नद्वयसाम्येन सदृशतमत्वात्।

'स्थानेऽन्तरतमे उरण् रपरः' इस सप्तम्यन्त पाठ में 'अन्तरतम' के स्थानी का विशेषण होने से अन्तरतम स्थानी की व्यावृत्ति होगी, आदेश की नहीं। एवं च 'दधि अत्र' यहाँ अर्द्धमात्रिक यकार का मात्राद्वयन्यूनकालिकत्वरूप सादृश्य से इकार के स्थान में यण् चरितार्थ होने से सुधी उपास्यः में मात्राद्वय वाले दीर्घ इकार में यण् नहीं होगा। अतः इस पक्ष को भाष्य में दूषित किया है।

'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' (प०) ।

स्थानेऽन्ततमे इति सप्तम्यन्तपाठस्तु दीर्घेषु यणसिद्ध्या दुष्ट इति भाष्ये स्पष्टम् ।

यत्रानेक इति । स्थानेग्रहणे एकदेशानुवृत्त्याऽनुवर्त्तमाने पुनः स्थानेग्रहणं तृतीयया विपरिणामेन वाक्यभेदमाश्रित्य प्रसङ्गे सति सम्भवे स्थानत एवान्तरतम इत्यर्थकमिति भावः ।

सप्तम्यन्तपाठ इति । अष्टाध्याय्यां सूत्राणि अविभक्तानि पठितानि । कालेन व्यवधाय असंहितया न पठितानि । तथा च 'स्थानेऽन्तरतमे उरण्रपरः' अथवा 'स्थानेऽन्तरतमः उरण्रपरः' इत्येवमुभयविधस्य पाठस्य सन्धिविच्छेदेन कल्पयितुं शक्यतया सन्देहः । सप्तम्यन्ततया पाठकल्पने अयादेशे यकारस्य 'लोपः शाकल्यस्य' इति लोपे, प्रथमान्तपाठे च—'भोभगोः' इति यकारे लोपे च 'स्थानेन्तरतम उरण्रपरः' इति पाठः उभयस्मिन्नपि पक्षे निर्वहति । अत एव सन्देहः-कीदृशः पाठ इति । तत्रायं निर्णयः—अन्तरतमे इत्येवं सप्तम्यन्तपाठे अन्तरतमे इति न प्रथमान्तस्य आदेशस्य विशेषणं सम्भवति अभेदान्वये समानविभक्तेरपेक्षणात्, किन्तु स्थानिनि अन्वियात् । तथा च अन्तरतमे स्थानिनि आदेश इत्यर्थः । तथाच प्राप्यमाणानां स्थानिनां मध्ये अन्तरतमे स्थानिनि आदेश इत्यर्थस्वीकारेण अनन्तरतमाः स्थानिनो निवृत्यन्ते, न अनन्तरतमा आदेशाः । एवं सति ह्रस्वे इकारे मात्राद्वयन्यूनकालत्वरूपेण आन्तरम्येन यण्विधानं स्यात् । दीर्घे ईकारे यण् न स्यात्; स्थानिनि ईकारे मात्राद्वयस्य आदेशे यणि च अर्धमात्रायाः सत्त्वेन तयोर्वैषम्यात् । ह्रस्वेकारे एका मात्रा इति मात्राद्वयन्यूनकालिकत्वरूपान्तर्येण सदृशतमो यण् भवति । 'सुध्युपास्यः'इत्यादौ दीर्घेकारस्य पूर्वोक्तरीत्या यणोऽसिद्ध्या सप्तम्यन्तपाठो भाष्ये दूषितः।

प्रथमान्तपाठे तु 'अन्तरतमः' इत्यस्य प्रथमान्ततया अभेदेन आदेशेऽन्वयः । तथाच स्थानिनि प्राप्यमाणानाम् आदेशानां मध्ये योऽन्तरतम आदेशः स भविष्यति । एवम्भूतेनार्थेन अनन्तरतमाः (असदृशतमाः) आदेशा व्यावृत्यन्ते, न तु अनन्तरतमाः स्थानिनः । स्थानी अन्तरतमोऽनन्तरमो वा सर्वोऽपि इक्पदेन संगृहीतः । यण्पदेन तु प्रथमान्तपाठे अनन्तरतमा आदेशा निवारिताः । एवञ्च, दीर्घेकाराद् येऽपि स्थानिनो जाताः, तत्र दीर्घेकारस्य स्थाने आदेशान्तरवकाराद्यपेक्षया यकार एवान्तरतमत्वाद् भवति, नतु वकाराद्यादेशः; तेषामनन्तरमत्वेन व्यावर्तनात् । प्राप्यमाणानामादेशानां मध्ये यकारस्यैवान्तरतमत्वमित्याशयः ।

'षष्ठी स्थानेयोगा' इति सूत्रात् एकदेशे स्वरितत्वप्रतिज्ञया समस्तपदस्यैकदेशस्यापि स्थानेपदस्येह अनुवृत्तिः । तस्यानुवृत्तस्य प्रसङ्गे इत्यर्थः । 'स्थानेऽन्तरतमः' इति सूत्रघटकं स्थानेपदं तृतीयान्तेन विपरिणम्यते । तथा च वाक्यभेदाश्रयणेन सति सम्भवे,

यत्रानेकेति । अनेक प्रकार के अर्थ रहने पर स्थान से ही आन्तर्य लिया जाता है—यह परिभाषा का तात्पर्य है । पूर्वपद से स्थानपदानुवृत्ति द्वारा स्थानपदार्थ का लाभ हो जाने से इस सूत्र के स्थाने पद का 'तृतीयान्तेन स्थानेन' एवंरूप विपरिणाम कर 'प्रसङ्गे सति सम्भवे स्थानेनैव अन्तरतमः' ऐसा अर्थ वाक्यभेद से होगा । इसी आशय से 'यत्रानेकविधम्' इत्यादि लिखा है ।

४०. तस्मिन्निति निर्दिष्टे पूर्वस्य । १ । १ । ६६ ।

स्थानत इति । स्थानेनेत्यर्थः ।
तत्र स्थानतः—'इको यणचि' (६ । १ । ७७) इति ।
अर्थतः—'तृज्वत्क्रोष्टुः' इति । इह क्रोष्टुशब्दस्थाने पक्तृशब्दो नादेशः ।
गुणतस्तु—'वाग्घरिः' इत्यादौ ।
प्रमाणतः—'अदसोऽसेः' (८ । २ । ८०) इत्यादौ ॥
तस्मिन्निति (१।१।६६) ॥ अत्र 'तस्मिन्' इति, उत्तरत्र 'तस्मात्' इति च

प्रसङ्गे सति स्थानेनैवान्तरमो बोध्यः । 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इति परिभाषायामिदमेव मूलम् । ननु 'सकृदुच्चरितः सकृदेवार्थम् गमयति' परिभाषयाऽनया कथं द्विविधो वाक्यार्थबोध एकेन सूत्रेण ? इति संशयो न कर्तव्यः । आवृत्त्या सकृदुच्चरितत्वशङ्काया निराशात् । अर्थत इति । क्रोष्टुशब्दस्य क्रोष्टृशब्दस्य च समान एवार्थः । समानार्थकत्वेन सादृश्यमादाय 'तृज्वत् क्रोष्टुः' इत्यनेन तृज्वदतिदेशात् क्रोष्टृशब्दस्वरूपातिदेशः, न तु प्रकृतस्वरूपातिदेशः, तयोरर्थभेदात् । न चात्र क्रोष्टुशब्दो न षष्ठ्यन्तः किन्तु प्रथमान्त इति कथमत्र स्थानेऽन्तरतमः इत्यस्य प्रवृत्तिः स्थानषष्ठ्यभावात् दिति वाच्यम्; वत्-शब्दं विहाय स्थान्यादेशभावं स्वीकृत्य क्रोष्टुशब्दस्य स्थाने तृजन्त आदेश इत्यभिप्रायेण तथाभिधानात् ।

प्रमाणत इति । ह्रस्वस्य स्थाने उकारो ह्रस्वो दीर्घस्य स्थाने दीर्घ ऊकारः 'अदसोऽसेर्दादु दो मः' इति सूत्रेण । अतएव = गङ्गोदकम् इति प्राप्यमाणानां मध्ये इत्यर्थकरणादेव । दीर्घेषु = सुद्ध्युपास्य इत्यादौ । **स्थानेन इति ।** अत्र स्थानपदं ताल्वादिस्थानपरम् । **इत्यर्थकमिति ।** इत्यर्थस्य निष्पत्तेर्जनकम् ॥

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥ अत्र सूत्रे 'तस्मादित्युत्तरस्य' इत्यत्र च तच्छब्दस्य स्वतन्त्रस्य निर्देशो नतु अनुकरणस्य तस्य । अनुकरणं प्रायेण इति-पदप्रयोगापेक्षणेन पर-

स्थानतः आन्तरतम्य का उदाहरण इको यणचि है । तालु स्थानी इकार को तालु स्थान यकार ही हुआ । अर्थतः का उदाहरण—क्रोष्टु के स्थान में पक्तृ आदेश नहीं हुआ, किन्तु क्रोष्टृ आदेश हुआ । गुणकृत अर्थात् बाह्यप्रयत्नकृत आन्तरतम्य का उदाहरण है—वाग्घरिः । यहाँ हकार को घकार ही हुआ । प्रमाणतः का उदाहरण है—'अदसोऽसेः' । अमू इसमें मात्राद्वय वाले औ को तादृश उकार ही होता है ॥

तस्मिन्निति ॥ 'इति' शब्द के समभिव्याहार से तस्मिन् तस्मात् इसके स्वरूपपरक होने पर 'तस्मिन्नणि च युष्माकाऽस्माकौ', 'तस्माच्छसो नः पुंसि' इत्यादि स्थल में ही उक्त परिभाषाओं की उपस्थिति होगी । 'इको यणचि' इत्यादि सूत्र में तस्मिन् तस्मात् पद घटित न होने से यहाँ प्रवृत्ति नहीं होगी । अतः उक्त शब्द आनुपूर्वीपरक नहीं हैं । यदि आनुपूर्वी (स्वरूप) परक 'तस्मिन्' 'तस्मात्' विवक्षित होते तो 'तस्मिन्नणि' इसमें 'निर्दिष्टे पूर्वस्य' इसका पाठ करने से इष्टसिद्धि हो ही जाती, तब 'तस्मिन्निति' परिभाषा व्यर्थ हो जायगी । एवं 'ते प्राग् धातोः' इसका अपवादभूत 'व्यवहिताश्च' इसका आरम्भ 'तस्मिन्' इससे प्राप्त अव्यवहित उपसर्ग प्रयोग का व्यवहित में करने के लिये हैं । उक्त रीति से यहाँ 'तस्मिन्' इस परिभाषा की प्राप्ति न होने से अव्यवहित को प्राप्त

सप्तम्यन्तपदपञ्चम्यन्तपदार्थकः स्वतन्त्रस्य सर्वनाम्नो निर्देशो व्याख्यानात्, बहुलक्ष्य-

---

तन्त्रम् । अत्र नैवं विवक्षितम् । अनुकरणे तु तस्मिन्, तस्मादित्यानुपूर्वीरूपस्य 'तस्मिन्नणि च युष्माकास्माकौ' 'तस्माच्छसो नः पुंसि' इत्यादावेव श्रवणात् अत्रैवास्य उक्तपरिभाषाद्वयस्य यथाक्रमं प्रवृत्तिः स्यात्, नान्यत्र 'इको यणचि' 'उदः स्थास्तम्भोः पूर्वस्य' इत्यादौ; तत्र तादृशानुपूर्वीरूपस्य श्रवणाभावात् । एवं सति हे यौष्माकीण अस्मभ्यं देहीत्यत्र खञः परस्य अस्मच्छब्दस्य अस्माकादेशस्य व्यावृत्तिः परिभाषोपस्थितेः फलं स्यात्, नान्यत्र किञ्चित् फलमिति ।

स्वतन्त्रस्तच्छब्दस्तु बुद्धिस्थमर्थं परामृशति; बुद्धिविषयतावच्छेदकत्वोपलक्षिततत्तद्धर्मावच्छिन्ने तत्पदस्य शक्तेः स्वीकारात् । प्रकृते सप्तम्यन्तं पञ्चम्यन्तं च बुद्धिस्थतया तदुपलक्षितं सप्तम्यन्तं पञ्चम्यन्तं च पदमर्थः । ईदृशस्यैवात्र सूत्रे तत्पदेनाभिधानमिति बोधयितुं सप्तमीविभक्त्या पञ्चमीविभक्त्या च निर्देशः कृतः । इति-शब्दस्य पदार्थविपर्यस्तत्वं 'नवेति' सूत्रे साधितम् । एवञ्च इति-शब्दसमभिव्याहारात् सम्पन्नपदरूपार्थकस्य सप्तम्यन्तपदबोध्यार्थकत्वं पञ्चम्यन्तपदरूपार्थकस्य पञ्चम्यन्तपदबोध्यार्थकत्वं सम्पन्नम् ।

'निर्दिष्टे' इत्यत्र निरिति नैरन्तर्यस्य बोधकं दिशधातुरुच्चारणार्थकः । एवं सति सप्तम्यन्तपदबोध्ये अव्यवहिते उच्चारिते यत् कार्यं तत् पूर्वस्य भवतीत्यर्थः । पूर्वापेक्षया अव्यवहिते उच्चारिते परस्मिन्, परापेक्षया पूर्वोऽव्यवहित एव भवितुमर्हतीति अव्यवहितस्येति सूत्रार्थे फलितार्थकथनमेव । सप्तम्यन्तं पदम् 'इको यणचि' इत्यत्र अच्पदं तत्पदबोध्योऽर्थः अकारादिः, तस्मिन् अव्यवहिते उच्चारिते यत् यण्कार्यं तत् पूर्वस्य दध्यत्रेत्यत्र दधिघटकेकारस्य जायते । इकारापेक्षया अव्यवहितत्वमकारस्य यद्यस्ति, तदा अकारापेक्षया अव्यवहितत्वम् इकारस्यापि निर्बाधमस्ति ।

व्याख्यानादिति । तस्मिन्नित्यस्य शब्दस्वरूपपरत्वे 'तस्मिन्नणि च' इत्येकमेव

ही नहीं है । तद्व्यावृत्यर्थ सूत्रारम्भ का वैयर्थ्य स्पष्ट है। और अनेक लक्ष्यों की सिद्धि के अनुरोध से भी वहाँ स्वरूपका ग्रहण नहीं है । इसके साहचर्य से 'तस्मात्' पद भी स्वरूप का ग्राहक नहीं, किन्तु अन्यार्थक है—इस आशय से लिखा है ।

अत्रेति । तस्मिन् और उत्तर सूत्रस्थ तस्मात् इसमें स्वतंत्र इतिशब्द का क्रम से सप्तम्यन्ते, पञ्चम्यन्ते पदे अर्थ है । इतिशब्द शब्दपरक को अर्थपरक और अर्थपरक को शब्दपरक—इस प्रकार पदार्थ का विपर्यासक होता है । 'गवित्ययमाह' यहाँ गो शब्द से गोरूप स्वरूप का बोध 'इति' शब्द के कारण ही हुआ है। यहाँ इति-शब्द के बल से सप्तम्यन्त पद एवं पञ्चम्यन्त पदस्वरूप अर्थ वाला तच्छब्द अर्थपरक हो जाने से सप्तम्यन्त पद पञ्चम्यन्त पद से बोध्यार्थ है—इस प्रकार का अर्थ तस्मिन् तथा तस्मात् का सम्पन्न हुआ । 'तत्' शब्द क्रम से सप्तम्यन्त पञ्चम्यन्त पद का बोधक है । इसके ज्ञान के लिये तत् पद के उत्तर पञ्चमी या सप्तमी विभक्ति का उल्लेख है । तथा सप्तम्यन्त पद बोध्यार्थ का निर्दिष्ट शब्दार्थ के साथ अभेदान्वय भी सप्तमी विभक्ति द्वारा समानविभक्तिकत्व होने से सिद्ध हुआ ।

संस्कारानुरोधाच्च; न तु तत्तत्पदपरम्। अन्यथा 'तस्मिन्नणि च' (४।३।२) 'तस्मान्नुडचि' (६।३।७४) 'तस्माच्छसो नः' (६।१।१०३) इत्यत्रैव प्रवर्त्तेयाताम्। सप्तमी तु सप्तम्यन्तानामेव तच्छब्दार्थत्वमिति बोधनाय, तद्बोध्यार्थस्य निर्दिष्टे इत्यनेन सामानाधिकरण्याय च। इतिशब्दः पुनस्तस्य तदर्थपरत्वं बोधयति। निःशब्दो नैरन्तर्ये, दिशिरुच्चारणे। एवञ्च सप्तम्यन्तार्थेऽव्यवहितोच्चारिते उपश्लिष्टस्य पूर्वस्य कार्यमिति वाच्योऽर्थः। एवञ्चैतत्परिभाषाद्वयोपस्थितौ सप्तम्यन्तपदस्य पञ्चम्यन्तपदस्य चार्थौ लिङ्गम्।

'तस्मिन्' इत्येतत्पदघटितं सूत्रम्, अतोऽत्रैव 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषाया उपस्थितेः सम्भवेन लाघवात् तत्रैव तस्मिन् निर्दिष्टपूर्वयोः युष्माकाऽस्माकमणि च इत्येकस्मिन् लघुशरीरे सूत्रे कर्तव्ये पृथक्सूत्रारम्भरूपव्याख्यानात्। तथा 'ते प्राग्धातोः' इत्येतदपवादभूतस्य 'व्यवहिताश्च' इति सूत्रारम्भात् 'तस्मादित्युत्तरस्य' इत्यत्र तस्मादित्यानुपूर्वीरूपस्य न ग्रहणम्। अन्यथा 'तस्मात्' इति पदाभावेन तस्मादिति परिभाषाया अप्रवृत्त्या व्यवहिताव्यवहितस्य धातोः प्राक् प्रयोगे प्राप्ते व्यवहिते उपसर्गप्रयोगार्थं सूत्रमनावश्यकं स्यात्। बहूनां लक्ष्याणां सिद्धेरनुरोधादपि उभयपरिभाषयोः 'तस्मिन्' 'तस्मात्' इति पदं न स्वरूपपरम्।

अन्यथेति। मदुक्तार्थास्वीकारे। **इत्यत्रैवेति**। 'तस्मान्नुड् द्विहलः' इत्यस्याप्युपलक्षणम्। नचैवं तत्पदोत्तरं सप्तमी पञ्चमी विभक्तिर्नोचिता, तयोः साधुत्वार्थकत्वे, प्राथम्यात् सुविभक्तेरेवौचित्यात्। अत उक्तम्—**सप्तमी तु इति**। सप्तम्यन्त-पञ्चम्यन्तपदयोरेव यथाक्रमम् आचार्यपाणिनिबुद्धिविषयत्वं नान्यस्येति बोधनाय तयोर्विभक्त्योरुपादानम्। मूले सप्तमी पञ्चम्या अप्युपलक्षणम्। तद्बोध्यार्थस्य=तस्मिन्-पदबोध्यस्य। अर्चीति पदबोध्यस्येत्यर्थः।

निर्दिष्टे इसमें निर् शब्द का नैरन्तर्य अव्यवधान और दिश् धातु का उच्चारण अर्थ है। इस प्रकार सप्तम्यन्त पद बोध्यार्थ के अव्यवहितोच्चरित होने पर उपश्लिष्ट (समीपवर्ती) तथा पूर्व को कार्य होता है-यह वाच्यार्थ है। सप्तम्यन्तार्थ के अव्यवहित रहने पर उपश्लिष्ट भी उसमें अव्यवहित रहेगा ही—यह भाव है। 'तस्मिन्' परिभाषा का उपस्थापकलिङ्ग सप्तम्यन्तपदबोध्यार्थ तथा 'तस्मदित्युत्तरस्य' का उपस्थापक पञ्चम्यन्तपदबोध्यार्थ को माना है। स्वरूप इससे सप्तमी या पञ्चमी का निरास होता है। इस सूत्र में उपश्लिष्ट पद के अध्याहार से उपश्लिष्ट का लाभ होता है। अतएव 'निर्दिष्टे' इस पद में औपश्लेषिकाधिकरणबोधक सप्तमी मानना उचित है, क्योंकि सति सप्तमी के उपपदविभक्ति होने से उसकी अपेक्षा औपश्लेषिकाधिकरण सप्तमी के कारकविभक्ति होने के कारण बलवान् है।

---

१. 'यस्य च भावेन भावलक्षणम्' इसमें विहितसप्तमी है। यज्ञदत्तः गोषु दुह्यमानासु गतः यहां गमन क्रिया का लक्षक है गोदोहनक्रिया दुह्यमानासु सतीषु गतः, अतः इसको सतिसप्तमी कहते हैं।

अत्र सूत्रे उपश्लिष्टपदाध्याहारेण 'निर्दिष्टे' इति औपश्लेषिकेऽधिकरणे सप्तम्येवोचिता; 'उपपदविभक्तेः' (प० १०२) इति न्यायात्, न तु सतिसप्तमीति 'तत्र च दीयते' (५ । १ । ९६) इति सूत्रे कैयटे स्पष्टम् ।

'विशेष्यविशेषणयोः समानवचनकत्वे एव सामानाधिकरण्येनान्वयः' इति नियमेन 'सप्तम्यन्तनिर्दिष्टे' इत्यनेन सह सामानाधिकरण्येन अन्वयाय तत्पदबोध्यार्थस्य बोधकेन तत्पदेऽपि सप्तमी एव उचिता । अन्यथा विभिन्नविभक्तिकत्वेन सामानाधिकरण्येनान्वयो दुर्घटः स्यात् । किञ्च, यत्र सप्तम्यर्थस्य बोधस्तत्रैव एषा परिभाषा उपतिष्ठते, नान्यत्रेति बोधनाय सप्तमीविभक्तेर्निर्देशः । अत एव 'नेड्वशि कृति' 'तस्मान्नुडचि', 'ङः सि धुट्' इत्यादौ नेयं प्रवर्तते, षष्ठ्यर्थे तेषु सप्तमीविभक्तेः स्वीकारेण तत्र सप्तम्यर्थस्य बोधाभावात् । इति-पदस्य सार्थक्यमाह—**इति इति । तस्य इति ।** तच्छब्दार्थस्य अचीत्यादिपदस्य योऽर्थस्तत्परत्वमितिशब्दबलाद् बोध्यते ।

तस्मिन्निति परिभाषायाः सप्तम्यन्तपदस्यार्थ एव उपस्थापकं लिङ्गम्, एवं तस्मादिति परिभाषायाः पञ्चम्यन्तपदस्यार्थ एव उपस्थापकं लिङ्गं बोध्यम् । उपश्लिष्टपदमध्याह्रियते । उपश्लेषः सम्बन्धरूपः । एवञ्च निर्दिष्टे इत्यत्र औपश्लेषिकाधिकरणे सप्तमी । यथा 'कटे शेते' इत्यत्र तादृशी सप्तमी । 'यस्य च भावेन भावलक्षणम्' इति विहिता सतिसप्तमी । 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति न्यायेन सत्सप्तम्या दुर्बलत्वात् । तथाच औपश्लेषिकाधिकरणबोधकसप्तम्यन्तपदबोध्यार्थे लिङ्गमस्याः परिभाषाया इति निष्कर्षः । अतएव 'कर्तृकर्मणोः कृति' इत्यत्र नास्याः प्रवृत्तिः, तत्र सत्सप्तम्याः स्वीकारात् ।

कैयटे स्पष्टमिति । 'तत्र च दीयते कार्यं भववत्' (५।१।९६) अत्र सूत्रे भाष्ये

इसका 'तत्र दीयते' के कैयट में स्पष्ट उल्लेख है । 'तस्मिन्' इस परिभाषा के कारण अर्थ में सप्तमी का आश्रयण नहीं हो सकता—इस प्रकार 'स्तुक्रमोः' इस सूत्र में भी कैयट ने लिखा है । उपश्लेष—अर्थात् उप समीपे श्लेषः सम्बन्धः । समीपवृत्तित्व इसका अर्थ है ।

शङ्का—वर्णों की उत्पत्ति या अभिव्यक्ति क्रमिक और अनित्य होने से इनका पूर्वापरीभाव नहीं हो सकता ?

समाधान—एकबुद्धि में अनेक वर्णों का विषय होने से तत्रत्य पूर्वापरीभाव से वर्णों में पूर्वापरीभाव का व्यवहार है । 'इको यणचि' इत्यादि सूत्रों के अचि इसमें भी औपश्लेषिका सप्तमी 'संहितायाम्' इस सूत्र के भाष्य में प्रतिपादित है ।

'उपश्लेष' अर्थात् समीपवृत्तित्व पूर्व के समान पर वर्ण में एवं अव्यवहित के समान व्यवहित में भी है, अतः अव्यवहित पूर्व के ही उपश्लेषग्रहणार्थ 'तस्मिन्' यह नियमार्थक परिभाषा है । जहाँ 'अचि सति' इस प्रकार लक्ष्यानुरोध से सतिसप्तमी का आश्रयण है वहाँ इसकी प्रवृत्ति नहीं होती । 'श्नान्नलोपः' इस सूत्र के भाष्य में श्नम् के शकार के प्रयोग प्रश्न में नन्दिता इसमें नकार से परवर्ती नकार का लोप प्राप्त होने पर ङिति के सम्बन्ध द्वारा नलोपशङ्का की व्यावृत्ति करने के अनन्तर 'हिनस्ति' इसमें दोषोद्भावन किया, ततः 'ङिति नैषा परसप्तमी, किं तर्हि ?

'स्नुक्रमोः' (७ । २ । ३६) इति सूत्रे च कैयट आह—'तस्मिन्निति परिभाषायां सत्यां सत्सप्तम्याश्रयणमशक्यम्' इति । उपश्लेषः = समीपवृत्तित्वम् । तच्च वर्णयोर्बौद्धं द्रष्टव्यम् । एवम् 'इको यणचि' (६ । १ । ७७) इत्यादावपीयमेवेति 'संहितायाम्' (६ । १ । ७२) इति सूत्रे भाष्ये । तत्रोपश्लेषः पूर्वस्यैव परस्य, अव्यवहितस्यैव व्यवहितस्य चेति पूर्वस्यैवेति, नियमार्थमिदमव्यवहितस्यैवेति च ।

अत एव लक्ष्यानुसारात् क्वचित् सतीत्यध्याहारात् सत्सप्तम्याश्रयणे नास्याः प्रवृत्तिरिति 'श्नान्नलोपः' (६ । ४ । २३) इत्यत्र भाष्ये उक्तम् ।

अत एव 'कर्तृकर्मणोः कृति' (२ । ३ । ६५) इत्यत्र नास्याः प्रवृत्तिः, कृति सति प्रत्यासत्त्या तत्प्रकृत्यर्थकर्तृकर्मणोः षष्ठीति तदर्थात् ॥

कार्यग्रहणमनर्थकम्, किं कारणम् ? तत्र भवः भवेत् ग्रहणात् । यद्धि मासे कार्यं, मासे भवं तद् भवति । तत्र 'तत्र भवः' इति सूत्रेण सिद्धम् । किमिदं भवात् कार्यग्रहणमेव प्रत्याचष्टे न पुनर्दीयते ग्रहणमपि । यथैव यन्मासे कार्यं तन्मासे भवं भवति एवं यदपि मासे दीयते तदपि मासे भवं भवति । तत्र 'तत्र भवः' इत्येव सिद्धम् । न सिध्यति । न तन्मासे दीयते । किं तर्हि ? मासे गते । एवं तर्हि औपश्लेषिकमधिकरणं विज्ञास्यते । अत्र कैयटः— "मासे गते इति प्रतीकमादाय मासे दीयते अत्र नैवाधिकरणसप्तमी । किं तर्हि ? 'यस्य च भावेन' इति । 'तत्र भवः' इत्यत्र तु अधिकरणसप्तमी आश्रिता; 'उपपदविभक्तेः' इति न्यायात् । इह तु अतिदेशसामर्थ्याद् भावलक्षणसप्तमीपरिग्रहः" इत्युक्तवान् ।

अत्र सूत्रे उपश्लेषः संयोगादिरूपो न; प्रत्यययोरेव संयोगात्, शब्दस्य तु गुणत्वात् । नापि स्वोपत्त्यधिकरणक्षणाव्यवहितक्षणोत्पत्तिकत्वरूपः । स्वपदेन वर्णः तदुत्पत्तिक्षणात् अव्यवहितोत्तरक्षणे उत्पत्तिर्यस्य वर्णस्य तद्रूप इत्यर्थः; शब्दानां नित्यत्वेन तेषामुत्पत्तेरभावात् । अत उत्पत्तिघटितं लक्षणं दुर्घटम् । किन्तु स्वज्ञानाधिकरणसमीपक्षणवृत्ति ज्ञानविषयत्वरूपं बोध्यम् । तथा चैकबुद्धिविषयतयैव सामीप्यस्य पौर्वापर्यस्य च वक्तुं शक्यत्वात्—इत्याशयवान् आह—**बौद्धं द्रष्टव्यमिति** । ननु लोके भिन्नभिन्नकालोद्भवानामपि पौर्वापर्यम् 'चैत्रात् पूर्वः फाल्गुनः' इत्यादौ दृष्टम् । नहि अनयोरेकस्मिन् काले स्थितिः ? इति नाशङ्कनीयम्, लोके तथा प्रयोगदर्शनेन तथा स्वीकारेऽपि शास्त्रे तथाऽनभ्युपगमात् । एवं सति प्रत्ययनिमित्तकार्योत्पत्तेः पूर्वमपि उत्पत्तौ कालिकपरत्वसत्त्वात् बहूपप्लवः स्यात् ।

इयमेव = औपश्लेषिकाधिकरणबोधिका सप्तमी एव । तत्रोपश्लेषः = तदङ्गीकारे उपश्लेषः । अव्यवहितस्यैव पूर्वस्यैव इत्यस्य एकवाक्यतया नान्वयः । अत एव क्वचिदुभयस्य, क्वचिदेकस्यैवोपस्थितिः । एतद् बोधयितुमेव मूले नियमद्वयस्य पार्थक्येन उपादानम् । अत एव = औपश्लेषिकाधिकरणबोधकसप्तमीस्वीकारादेव । लक्ष्यानुरोधात् 'कर्तृकर्मणोः कृति' इत्यत्र सतिसप्तम्याः स्वीकारादस्यास्तत्र न प्रवृत्तिः । प्रवृत्तौ तु कृदव्यवहितपूर्वयोरेव कर्तृकर्मणोः षष्ठी स्यात् । तथा च 'कृतिः कृष्णस्य' इत्यत्र कृदन्तात् परस्य कर्तुः कृष्णस्य 'जगतः कृष्णः कर्ता' इत्यत्र व्यवहिते जगद्रूपे कर्मणि च षष्ठी न स्यात् ।

सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम् ॥

'तस्मात्' (१ । १ । ६७) इति सूत्रे 'निर्दिष्टे' इति निर्दिष्टादित्यर्थकम्; विभक्तिविपरिणामात्। सा चोत्तरस्येति दिग्योगलक्षणा इति दिग्योगलक्षणपञ्चम्यामेव तत्प्रवृत्तिः।

'उदः स्था' (८ । ४ । ६१) इत्यादौ च 'उदः' इति दिग्योगलक्षणा पञ्चमी। तत्रानियतदिक्शब्दाध्याहारे प्रसक्ते परशब्दस्यैवाध्याहार इति 'तस्मात्' (१ । १ । ६७) इत्यनेन नियम्यते। अव्यवहितोच्चारितात् पञ्चम्यन्तात्परस्येति तदर्थः।

तत्फलितमाह--सप्तमीनिर्देशेन इत्यादि। यदि तु अर्धमात्राधिककालेन वर्णान्तरेण वा व्यवधाने उपश्लेष एव नेत्युच्यते तदा निर्दिष्टपदं संहिताधिकारश्च विफल इति 'संहितायाम्' (६ । १ । ७२) इति सूत्रे भाष्ये स्पष्टम्।

अवग्रहे च सम्प्रदाय एव शरणमिति आनङादिविषये आदेशोत्तरमेवावग्रहोऽन्यत्र ततः प्राक्।

अकृतव्यूहपरिभाषा त्वनित्या, नास्त्येव वा। 'न लक्षणेन पदकारा अनुवर्त्याः, पदकारैर्नाम लक्षणमनुवर्त्यम्' इति भाष्येण तदनुरोधेन शास्त्रासङ्कोचस्य, शास्त्रकरणाभावस्य च स्पष्टमुक्तत्वाच्च।

एतेन संहिताधिकारस्तद्बहिर्भूतानामर्धमात्राधिककालव्यवाये प्रवृत्तिज्ञापनार्थम्। तेन 'अग्नाविष्णू' इत्यादाववग्रहे आनङादिसिद्धिरित्यपास्तम्। 'प्रत्ययः' (३ । १ । १) 'परश्च' (३ । १ । २) इत्यादौ तूत्तरांशविकला 'तस्मात्' (१ । १ । ६७) इति परिभाषा प्रवर्त्तते। तेन न प्रत्यया व्यवहिताः।

'श्नान्नलोपः' इति सूत्रे (६।४।२३) इत्थं भाष्यम्। श्नमः शकारस्य शित्करणं क्रियते। नन्दिता नन्दकः इत्यत्रापि प्राप्नोतीति शकाराभावे श्नाघटकनकारस्यैव ग्रहणाभावेन यस्य कस्यापि नकारस्य ग्रहणे 'नन्दिता' इत्यादौ नशब्दो दोषः शङ्कित इत्यभिप्रायः। ततः परं 'क्ङिति' इति वर्तते इत्युक्तम्। क्ङित्पूर्वस्यैव नकारस्यैव ग्रहणेन नात्र नकारः क्ङित्पूर्वः इति नास्ति दोष इत्याशयः। ततः पुनः शङ्कितं हिनस्ति इत्यत्र हिंसधातोः लटि श्ना प्रत्यये कृते नकारलोपो न स्यात्। धातुघटकनकारस्य श्नमः परत्वात् कित्-ङिद्व्यवहितपूर्वत्वं नास्ति। श्नमो ङित्वेऽपि ततः पूर्वत्वं नकारस्य नास्ति इत्याशयः। तत उक्तम्–नैषा परसप्तमी किन्तु सतिसप्तमीति। तथाच श्नमो ङित्वेन ततः पूर्वत्वं न विवक्षितं तस्य सत्त्वं विवक्षितम्, तच्च श्नमः कित्त्वेन अस्त्येवेत्याशय इत्यादिभाष्यादवलोकनीयम्। अनेन भाष्यप्रकरणेन सत्सप्तम्यां 'तस्मिन्' परिभाषाया नोपस्थितिरिति सिद्धम्। अन्यथा सत्सप्तम्ययणेऽपि परिभाषायाः प्रवृत्तिस्तत्र कथं वारिता स्यात्।

सतिसप्तमी' ऐसा लिखा है। 'कर्तृकर्मणोः कृति' इसका 'कृति सति' यह अर्थ होने से 'तस्मिन्' इसकी उपस्थिति नही होती। इसीलिये पूर्व, पर, व्यवहित, अव्यवहित सभी प्रकार के कृत्प्रत्ययों के योग में षष्ठी सिद्ध होती है ॥

४१. तस्मादित्युत्तरस्य । १ । १ । ६७ ।

अत एव 'छन्दसि परेऽपि' 'व्यवहिताश्च' इति सूत्रं सार्थकम् । आगमविधावपि 'आने मुक्' (७ । २ । ८२) इत्यादौ 'तस्मिन्' (१ । १ । ६६) इति परिभाषया पूर्वसम्बन्धित्वनिर्णयः ।

तस्मादित्युत्तरस्य ॥ अत्र तच्छब्दार्थः पञ्चम्यन्तपदम् । इतिशब्दसम्बन्धात् पञ्चम्यन्तपदबोध्यार्थपरस्तच्छब्दः । पूर्वसूत्रादनुवर्तमानं निर्दिष्टपदं पञ्चम्यन्ततया विपरिणामेन निर्दिष्टादित्यर्थकं पर्यवसन्नम् । अतएव तस्मादित्यनेन समानविभक्तिकतया सामानाधिकरण्यम् । सा च = निर्दिष्टादित्येतद्घटकपञ्चमी । अत एवास्य दिग्योगलक्षणपञ्चम्यामेव[1] प्रवृत्तिः । **उत्तरस्येति ।** उत्तरपदस्य श्रवणात् दिग्योगलक्षणा पञ्चमी बोध्या । दिग्योगलक्षणपञ्चम्याः प्रदेशस्थले उपपत्तये दिग्वाचकशब्दस्य यस्य कस्यचिदनियतस्याध्याहारे प्रसक्ते उत्तरशब्दाध्याहारेणैव पञ्चमी उपपादनीया नान्यदिग्वाचकपदाध्याहारेणेति नियमबोधनाय तस्मादिति सूत्रमिति अनियमे नियमकारिणीत्वमपि अस्या उपपन्नम् । अतएव च परिभाषासूत्रमिदं सिद्धम् । अव्यवहितोच्चारितपञ्चम्यन्तपदबोध्यार्थात् परस्य यत् कार्यं तदुत्तरस्येत्यर्थः । मूलन्तु फलितार्थपरम् । तदर्थः=सूत्रार्थः । तत्फलितम् = सूत्रेण फलितम् ।

एकवर्णोच्चारणानन्तरमपरवर्णोच्चारणे अर्धमात्राकालव्यवायः स्वाभाविकः, ततोऽधिककालव्यवायेन वर्णोच्चारणे उपश्लेष एव नास्तीति निर्दिष्टग्रहणं संहिताधिकारश्च विफलम् । 'तस्मादित्युत्तरस्य' इत्यत्रैव निर्दिष्टादिति वक्तव्यम् । पदानामर्धमात्राधिककालव्यवधानेन उच्चारणम् = अवग्रहः । ईदृशमुच्चारणं वैदिकानां पदपाठे भवति । ननु अवग्रहेऽपि 'अग्ना विष्णू' इत्यत्र आनङिष्यते, अधिककालव्यवधाने उपश्लेषाभावे अवग्रहे उत्तरपदस्य परस्याभावेन 'आनङ् ऋतो द्वन्द्वे' इत्यनेन विधीयमान आनङादेशो न स्यात् ? अत आह—**सम्प्रदाय इति ।** आनङादिविषये आनङादेशान्तरमेव अवग्रहः, अन्यत्र तु कार्यादादेशरूपात् प्रागेव । नच उपश्लेषस्य विनाशसम्भावनायां पूर्वमेवानङ् न स्यात्; अकृतव्यूहपरिभाषाया विरोधात् ? अत आह—**अकृतेति ।** 'अकृतव्यूहाः पाणिनीयाः' इति परिभाषायाः प्राचीनमते अनित्यत्वात् नव्यमते चासत्त्वान्न दोषः । विवेच-

---

तस्मादित्युत्तरस्य ॥ इसमें अनुवृत्त 'निर्दिष्टे' इसका पञ्चम्यन्त 'निर्दिष्टात्' इस रूप से विपरिणाम होता है । पञ्चमी विभक्ति 'अन्यारादितर' इत्यादि सूत्र से श्रुत दिग्वाचक उत्तर शब्द के योग में हैं । अतः दिग्योगलक्षणा पञ्चमी रहने पर इसकी उपस्थिति होती है । 'उदः स्था' एतत्-सूत्रघटक 'उदः' इसमें दिग्वाचक पद के योग में पञ्चमी की उपपत्ति के लिये पर शब्द के समान पूर्व शब्द का भी अध्याहार प्राप्त होने से 'तस्मात्' यह परिभाषा—'पर शब्द का ही अध्याहार है, पूर्व का नहीं'—एतन्नियमार्थक है । उद् से अव्यवहित पर स्थास्तम्भ विवक्षित है । परममूल में पूर्वोक्त प्रदर्शित रीति से फलित अर्थ का निर्देश है—सप्तमीनिर्देशेनेति ।

---

१. तेन 'अनुनासिकात् परोऽनुस्वारः' इत्यत्र नास्य प्रवृत्तिः; तत्र ल्यब्लोपे पञ्चमीस्वीकारेण दिग्योगलक्षणपञ्चमीविरहात् ।

अत एवात्र पूर्वस्येत्यादि न स्थानषष्ठी । तत्तद्विधिभिरेव सम्बन्धस्य निर्णीतत्वेन 'षष्ठी स्थाने' (२ । १ । ४९) इत्यस्याप्रवृत्तेः । गाङ्कुटादिभ्यः' (१ । २ । १) इत्यादावपि षष्ठ्यंशविकलैतत्परिभाषाप्रवृत्तिर्बोध्या ।

यिष्यते चेदमग्रे । **लक्षणेन इति** । सूत्रानुरोधित्वं पदकाराणामावश्यकम्, नतु पदकारानुरोधित्वं सूत्रस्येति भावः । तदनुरोधेन = पदकारानुरोधेन । शास्त्रसङ्कोचस्य संहितादेः तदनुसारिसूत्रान्तरकरणस्य चाभावो भाष्येणानेनैव स्पष्टं सूचितः । **एतेन इति** । अवग्रहे पूर्वोक्तरीत्या निर्वाहेण इत्यर्थः । संहिताधिकारस्य अधिककालव्यवायेऽपि संहिताधिकाराद् बहिर्भूतानां सूत्राणामधिककालव्यवधानेऽपि प्रवृत्तिरिति ज्ञापनार्थतया उपयोग इति न युक्तम्, संहिताधिकारस्य भाष्ये स्पष्टनिराकरणात् फलान्तराभिनिवेशस्य अयुक्तत्वात् ।

यत्र यावान् अंशः सिद्धस्तत्र तमंशं विहाय अंशान्तरमुपस्थापयति परिभाषाद्वयमिदम् । 'परश्च' इत्यनेन प्रत्ययानां प्रकृतेः परत्वस्य सिद्धतया केवलम् अव्यवहितोत्तरत्वांशमात्रस्योपस्थितिः । अत एव = एकांशस्यापि उपस्थितिस्वीकारादेव । 'ते प्राग् धातोः' इत्यनेन धातोः प्रागेव उपसर्गाणां प्रयोगो बोध्यते । ततोऽग्रे 'छन्दसि परेऽपि' इत्यनेन छन्दसि उपसर्गाणां परोऽपि प्रयोगः, तथा 'व्यवहिताश्च' इत्यनेन व्यवधानेऽपि प्रयोगो बोधितः । ते प्रागिति सूत्रेण उपसर्गस्य प्राक् प्रयोगप्रतिपादनेन परत्वांशेन सहान्वयविरोधात् तस्मादिति परिभाषया केवलमव्यवहितांशमात्रमुपस्थाप्यते, न परत्वांशमपि । एवञ्च उपसर्गाणां धातोः पूर्वमव्यवहितप्रयोगे उपसर्गाणां प्राप्ते 'व्यवहिताश्च' इत्यनेन वेदे व्यवहितेऽपि उपसर्गाणां प्रयोगस्य सिद्धये आवश्यकं तत् सूत्रम् । यदि एकांशानुपस्थितौ अंशान्तरस्याप्यनुपस्थितिः स्यात्, तदा 'ते प्राग्धातोः' इत्यनेन परिभाषानुपस्थित्या व्यवहिताव्यवहितसाधारणस्य प्रयोगस्य सिद्धतया व्यवहिताश्चेति सूत्रस्य वैयर्थ्यं स्यात् ।

यदि अर्ध मात्रा से अधिक काल या वर्णान्तर के व्यवधान में उपश्लेष ही नहीं मानते तो इस सूत्र में निर्दिष्ट पद एवं 'संहितायाम्' इस अधिकार सूत्र का वैफल्य भाष्य में स्पष्ट निर्दिष्ट है ।

शंका—संहिताधिकारस्थ सूत्रों से विहित कार्यों की अवग्रह (पदों को अलग कर कालविलम्ब से पढ़ना) में अप्रवृत्ति, तद्भिन्न शास्त्र से विहित कार्यों की प्रवृत्ति—इसकी व्यवस्था प्रत्याख्यानपक्ष में नहीं होती ?

समाधान—आनङादिस्थल में आनङादेशोत्तर अग्ना विष्णू इस प्रकार का अवग्रह अन्यत्र संहिताधिकारस्थ संधिकार्य के पूर्व में ही पुरः हितम् इस प्रकार अवग्रह होता है—इसका निर्णायक वैदिकों का समुदाय है ।

शंका—'अकृतव्यूह' परिभाषा (निमित्त विनाश की सम्भावना में तन्निमित्तप्रयुक्त कार्य पूर्व में ही नहीं होता) से उपश्लेष के विनाश को सम्भावना में सन्धि नहीं होगी ?

समाधान—परिभाषा अनित्य है । स्वमत में परिभाषा का अस्तित्व ही नहीं है ।

'सूत्र से पदपाठ करने वालों का अनुसरण नहीं किया जाता, किन्तु पदकारों से सूत्र का अनुगमन होना चाहिये'—इस भाष्य से पदकारों के अनुरोधवश शास्त्रों के उद्देश्य में सङ्कोच या

पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम् ।

परिभाषाणां नियमत्वन्तु यदि परिभाषासूत्रं न स्यात्तदा व्यवहितादावपि प्रवृत्तिः स्यादित्येतावतेति दिक् ॥

अतः 'एकांशविकलापि परिभाषा उपतिष्ठते' इति कल्प्यते । तथाच अव्यवहितांश मात्रस्योपस्थितौ व्यवहिते प्रयोगः उपसर्गस्य न प्राप्नोतीति 'व्यवहिताश्च' इत्या-वश्यकम् ।

'तस्मिन्निति' परिभाषायाः पूर्वत्वमव्यवहितत्वं षष्ठ्यंशश्चैतद् अंशत्रयम्, 'तस्मात्' इत्यस्याः परिभाषायाः परत्वमव्यहितत्वं षष्ठ्यंशश्चेति अंशत्रयम् उपस्थाप्यम् । तत्र 'शि तुक्' इत्यत्र तस्मिन्निति परिभाषायाः अंशत्रयस्योपस्थितिः । 'ङः सि धुट्' इत्यत्र तस्मादिति परिभाषाया अंशत्रयस्योपस्थितिः । 'इको यणचि', 'उदः स्थास्तम्भोः पूर्वस्य' इत्यत्र च षष्ठ्यंशस्य इकः स्थास्तम्भोरित्याभ्यामेव निर्देशात् तदंशविकला उक्तपरिभाषा-द्वयी यथायथमंशद्वयमुपस्थापयति । 'प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः' पूर्वशब्देन पूर्वत्वस्य निर्दिष्टत्वात् उत्तरत्वांशस्य च विरोधादेवानुपस्थितौ षष्ठ्यंशस्यापि अत इत्यनेन सिद्धतया अव्यवहितत्वांशमात्रस्योपस्थितिः । एवमेव प्रत्ययविधावपि अव्यवहितत्वांश-मात्रस्योपस्थितिः; परत्वांशस्य 'परश्च' इत्यनेन सिद्धत्वात्, षष्ठ्यंशस्य च बाधित-त्वात् । नहि प्रत्ययः परोऽपि स्यात्; स्थानेऽपीति विरोधाद् बाधः ।

परिभाषाद्वयोपस्थितायाः षष्ठ्या न स्थाननिरूपितसम्बन्धमात्रार्थबोधकत्वम्, किन्तु विधेयान्वयि सम्बन्धमात्रम् । इष्टानुरोधेन तत्र सम्बन्धविशेषस्य निर्णयः । आगम-विधावपि अनयोः परिभाषयोरुपस्थितिः । तत्र स्थाननिरूपितसम्बन्धस्य अन्वयासम्भवेन षष्ठ्या वक्तुमशक्यतया अवयवावयविभाव एवार्थः । अत एव = तत्र पूर्वसम्बन्धित्वनिर्णय-स्येष्टत्वादेव । पूर्वस्य एवम् उत्तरस्य इत्युभयत्र न स्थानषष्ठी । सम्बन्धविशेषाकाङ्क्षायाः

शास्त्र का निर्माण—इन दोनों का अभाव स्पष्ट रूप से कहा गया हैं । एतेन = अवग्रह में सम्प्रदाय की शरणागति से निर्वाह होने के कारण । संहिताधिकार इस अधिकार से बहिर्भूत सूत्रों की अर्द्ध मात्रा से अधिक काल के व्यवधान में प्रवृत्ति ज्ञापनार्थ किया गया है । इससे 'अग्ना विष्णू' यहाँ अवग्रह में भी आनङादेश की सिद्धि होती है—यह कथन असङ्गत समझना चाहिये ।

इन परिभाषाओं का जितना अंश सिद्ध या बाधित है उससे अतिरिक्त अंश की उपस्थिति इनसे होती है । अतएव प्रत्यय का पर में विधान विधिपक्ष में 'परश्च' इसके द्वारा सिद्ध होने से अव्यवहितांश मात्र की तस्मात् इससे उपस्थिति होती है । अत एव प्रत्यय प्रकृति से अव्यवहित ही होता है । षष्ठ्यंश बाधित होने से उस अंश की भी उपस्थिति नहीं होती ।

अत एव पर अंश की सिद्धि होने पर भी अंशान्तर की उपस्थिति स्वीकार करने से ही पर और व्यवहित में जाति और उपसर्ग के प्रयोगार्थ आरब्ध सूत्रों का सार्थक्य होता है । अन्यथा परत्वांश की उपस्थिति से 'ते प्रागधातोः' इसके द्वारा उपसर्ग का धातु से पूर्व प्रयोग होने से 'तस्मात्' इस परिभाषा का उपस्थाप्य परत्वांश बाधित होने पर अनुपस्थिति होने से व्यवहिता-व्यवहितसाधारण प्रयोग सिद्ध था, पुनः व्यवहित में विधानार्थ सूत्र की आवश्यकता हो क्या थी!

'षष्ठी स्थानेयोगा' इति परिभाषयाः प्रवृत्तेर्विधिसूत्रे एव तदर्थस्य निर्णयाद् उत्थानासम्भवात् । 'गुणानां परार्थत्वादसम्बन्धः समत्वात्' इति न्यायेनापि 'षष्ठी स्थानेयोगा' इत्यस्याः तस्मिन्, तस्मात् इति सूत्रघटके पूर्वस्य उत्तरस्य इत्युभयस्थले परिभाषात्वेन द्वयोः परार्थतया च परस्परमन्वयासम्भवात् । 'गाङ्कुटादिभ्यः' इत्यादावपि अव्यवहितत्वं परत्वमेतदंशद्वयमेव उपतिष्ठते; षष्ठ्यंशस्यान्वयासम्भवात् ।

ननु अनियमे नियमकारिणी परिभाषा भवतीति कथमत्र सूत्रद्वये परिभाषात्वव्यवहारः, 'इको यणचि' इत्यादौ परिभाषोपस्थित्या पदैकवाक्यतया लक्ष्यसंस्कारकवाक्यार्थबोधस्य जायमानत्वात् व्यवहिते पूर्वस्मिन् परस्मिन् च यण्प्राप्तेरभावेन कुतोऽनियमप्रसङ्गः ? इति शङ्कायामाह—परिभाषाणामिति । अस्मिन् शास्त्रे नियमपदेन परिसंख्याया व्यवहारो दृश्यते । अत्र नियमपदं अर्थसिद्धनियमपरम् । सूत्राभावसम्भावनायां यत् प्राप्तं तस्य वारकत्वेन नियमत्वम् ।

'विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥

इत्यनुसारेण पाक्षिके प्राप्ते नियमो भवति । यथा पञ्च पञ्चनखा भक्ष्याः । क्षुन्निवृत्तिः वर्जितस्यावर्जितस्य च भक्षणेन कर्तुं शक्यते । तथा च वर्जितस्यापि भक्षणं क्षुन्निवृत्तये प्राप्नोति । इत्येवं वर्जितभक्षणे अवर्जितभक्षणे च तत्र अन्यत्र च प्राप्तत्वेन 'पञ्चनखा एव भक्ष्याः' इति परिसंख्या उदाहृता । तेन वर्जितानां भक्षणं व्यावृत्तम् । नियमविधेरुदाहरणम् 'व्रीहीन् अवहन्ति' इति । यः पक्षे प्राप्तं नियमयति स नियमविधिरुच्यते ; दर्शपूर्णमासप्रकरणे पुरोडाशोपयोगिनस्तण्डुलस्य सम्पादनाय निस्तुषीकरणं चान्यस्यावश्यकम् । तुषाणां (भूसी) निवर्तनं नखद्वारा तुषाणां विदलनेन, मुसलादिना अवघातेन चोभयथा भवितुमर्हति । तथा च कदाचित् नखविदलनेनापि निष्पत्तिः प्राप्ता । एतन्नियमनाय 'अवघातैरेव तण्डुला निष्पाद्याः नान्यथा' इति व्रीहीन् अवहन्ति इति वाक्येन बोध्यते । तथा च नखविदलनादिना तण्डुलनिष्पत्तिर्वारिता ।

नियमपरिसंख्ययोर्भेदः—नियमे विधिवाक्येन प्राप्तोऽर्थः, पक्षे प्राप्तः, पक्षे चाप्राप्तः । परिसंख्यायान्तु सदा विधिवाक्यविहितोऽर्थः प्राप्तः । यथा व्रीहीन् अवहन्ति इत्यनेन प्राप्तमवहननम्, नखविदलनेन निष्पन्ने तण्डुले न प्राप्नोति, तुषाणामभावात्, तन्निवृत्त्यर्थं वाक्यस्याप्रवृत्तेः । एवञ्च अवघातः पाक्षिकः । परिसंख्या यथा—रागतः प्राप्तं भक्षणं

'आने मुक्' इत्यादि आगमविधि में भी आगम के पूर्व सम्बन्धित निर्णयार्थ 'तस्मिन्' परिभाषा की प्रवृत्ति होती है । अत एव उपस्थित 'पूर्वस्य' इसमें षष्ठी स्थानषष्ठी नहीं है; क्योंकि आगमादि विधि के द्वारा षष्ठी के सम्बन्ध का निर्णय हो जाने से अनिर्धारित सम्बन्ध वाली षष्ठी नहीं है । अतः 'षष्ठी स्थानेयोगा' इसकी प्रवृत्ति नहीं होगी । 'गाङ्कुटादिभ्यः' इत्यादि अतिदेशसूत्रों में भी षष्ठ्यंशरहित अंशान्तर की उपस्थिति 'तस्मिन्' इसके द्वारा होती है । परिभाषासूत्र के न रहने पर व्यवहित में भी कार्य होने की सम्भावनामात्र से परिभाषाओं में नियमत्व का व्यवहार है ॥

४२. अलोऽन्त्यस्य । १ । १ । ५२ । **षष्ठीनिर्दिष्टस्यान्त्यस्याल आदेशः स्यात् ।**

अलोऽन्त्यस्य (१ । १ । ५२) ॥ **'षष्ठी स्थाने' इत्यनुवर्त्तते; तदाह-षष्ठीत्यादि । स्थाने विधीयमानः स्थानषष्ठीनिर्दिष्टान्त्यस्येत्यर्थः । स्थाने इत्यादि किम् ? इट् तृच ऋकारात्पूर्वो मा भूदिति । अन्त्यस्येति साहचर्यादल इति षष्ठ्यन्तम्, अन्त्यस्याल इत्यर्थः ।**

अल इति किम् ? पदस्येति विधीयमानं 'वसुस्रंसु' (८ । २ । ७२) इति दत्वं 'स्वनडुद्भ्याम्' इत्यादावन्त्यस्य पदस्य मा भूत् । स्थाने विधीयमान इति प्रत्यासत्ति-

क्षुन्निवृत्तये वर्जितावर्जितोभयस्य सदा प्राप्तं न कदाचिदप्राप्तम्; रागस्य अवर्जितभक्षणानन्तरमपि वर्जितभक्षणे सत्त्वात् । अतः तत्र अवर्जिते तत्र च वर्जिते च सदा प्राप्तस्य भक्षणस्य परिसंख्यया वर्जितभक्षणं व्यावर्त्यते । एवमिहापि परिभाषाऽभावे व्यवहितेऽव्यवहिते पूर्वस्मिन् परस्मिन् सति विधिसूत्रं प्रवर्तेत । विधिसूत्रस्य व्यवहिते कृतेऽपि अव्यवहिते प्राप्तिरस्त्येवेति सदाप्राप्तत्वेन अयं परिसंख्याविधिः । तथा च व्यवहितादौ विधिसूत्रस्य प्रवृत्तिः परिसंख्यया वार्यते । मूले नियमपदं परिसंख्यापरं बोध्यमिति केचित् । अधिकं मीमांसातोऽवगन्तव्यम् ॥

अलोऽन्त्यस्य । षष्ठी, स्थाने इत्युभयं 'षष्ठी स्थानेयोगा' 'स्थानेऽन्तरतमः' इति द्वयाद् यथाक्रममनुवर्तते इति वैद्यनाथः । षष्ठी स्थाने अत्र समस्तत्वेन स्थानपदस्यानुवृत्तौ क्लेश इति तदाशयः । निर्दिष्टस्य पदस्याध्याहारः । अनुवर्तमानं षष्ठीपदं तृतीयया विपरिणम्यते । एवं रीत्या निष्पन्नमर्थं सूचयति—**स्थाने इति** । स्थाने विधीयमानः (आदेशः) षष्ठ्या निर्दिष्टस्य=उच्चारितस्य भवतीत्यर्थः । **स्थाने इत्यादि इति** । स्थानेपदानुवृत्तिः किमर्था ? तथा सति षष्ठ्या निर्देशेन विधीयमानस्य आदेशमात्रस्य ग्रहणे भूधातोस्तृचि 'आर्धधातुकस्येड्वलादेः' इत्यनेन विधीयमान इडपि अन्त्यस्य एतत्सूत्रबलादवयवः प्राप्नोति । एतद्वारणाय 'स्थाने' पदानुवृत्तौ स्थाने विधीयमानत्वाभावात् इड्विधौ नास्याः प्रवृत्तिः । इटः इत्संज्ञकटकारकरणात् अवयत्वबोधनात् स्थानषष्ठी 'आर्धधातुकस्य' इत्यत्र नास्तीति गम्यते । **षष्ठ्यन्तमिति** । ननु जस्विभक्त्यन्तम् । स्थाने विधीयमान इति कुतो लब्धः ? अत आह—**प्रत्यासत्ति इति** । अल्समुदायबोधकपदोत्तरं यत्र स्थानषष्ठीं तत्र अन्त्यस्याल इत्यस्योपस्थितिः । मूलोक्तार्थस्तु फलितः । 'त्यदादीनामः' इत्यत्र अलसमुदायोत्तरं स्थानषष्ठीनिर्देशाद् अन्त्यस्यालः उपस्थितिरिति ॥

अलोऽन्त्यस्येति । षष्ठी तथा स्थाने इन दोनों की अनुवृत्ति है । 'स्थान में विधीयमान कार्य स्थानषष्ठीनिर्दिष्ट के अन्त्य को होता है'—ऐसा अर्थ है । स्थानषष्ठी में विधीयमान कार्य का निवेश करने से इडागम, तृच् के अन्त्य ऋकार को टित्वात् पूर्व में नहीं हुआ; क्योंकि यहाँ आगम के चिह्न से स्थान में षष्ठी नहीं है । 'अन्त्यस्य' इसके साहचर्य से 'अलः' पद भी षष्ठ्यन्त है, प्रथमा का बहुवचनान्त नहीं । अल्-ग्रहण से पद की व्यावृत्ति होती है ।

अन्यथा अन्त्य पद का ग्रहण होने से स्वनुडुद्भ्याम् इसके अन्त्य अनुडुह् पद को दकार हो जाता । स्थाने विधीयमान इसका प्रत्यासत्ति से लाभ होता है । अल् को ही और अन्त्य को ही—

४३. ङिच्च । १ । १ ५३ । अयमप्यन्त्यस्यैव स्यात् । 'सर्वस्य' (सू० ४५) इत्यस्यापवादः ॥

४४. आदेः परस्य । १ । १ । ५४ । परस्य यद्विहितं तत्तस्यादेर्बोध्यम् । 'अलोऽन्त्यस्य (सू० ४२) इत्यस्यापवादः ॥

लब्धम् । एवञ्चाल एवेति, अन्त्यस्यैवेति नियमद्वयमत्र । अलसमुदायबोधकपदोत्तरं स्थानषष्ठी अस्या लिङ्गम् । अत एव 'इतोऽत्' (७ । १ । ८६) इत्यादौ नास्याः प्रवृत्तिः; पथ्यादीनामित्यस्यावयवषष्ठीत्वात्, इत इत्यस्यालसमुदायोत्तरत्वाभावाच्च ॥

ङिच्च (१ । १ । ५३) । अनेकालर्थमिदम् ॥

आदेरिति । आदेरल इत्यर्थः । तेन 'द्वीपम्' इत्यादौ पान्तसमुदायस्य न ईत्त्वम् । अत्र परस्येत्यावर्त्तते, तेन परबोधकशब्देन यत्र परस्य स्थाने विधानं तत्रैवेदम् । तेन 'नित्यं ङितः' (३ । ४ । ९९) इत्यादौ न दोषः; तत्र विकरणव्यवधाने प्रवृत्तये धातोरित्यस्य विहितविशेषणत्वात् ॥

ङिच्च ॥ 'अलोऽन्त्यस्य' इत्यनेनैव ङितोऽपि सिद्धे सूत्रमिदं किमर्थम्?अत आह–**अनेक इति** । अनेकालि ङिति 'अनेकाल् शित् सर्वस्य' इत्यनेन अपवादत्वाद् बाधित्वा सर्वादेशः स्यात्; तद्बाधनाय सूत्रस्यास्य आरम्भात् ॥

आदेः परस्य ॥ 'अलोऽन्त्यस्य' इति सूत्राद् अनुवृत्तान्त्यपदस्य 'ङिच्च' इत्यत्र सम्बन्धाद् इहापि सम्बध्येते । तथाच परस्य यत् कार्यं तद् अन्त्यस्य आदेरित्यर्थापत्त्या द्विर्गता आपो यत्र तद् द्वीपमित्यत्र 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इत्यनेन अन्त्यस्य आप्प्रत्ययघटकाकारस्य आदिः आप्समुदायोऽपि इति समुदायस्य ईत्वप्रसङ्गः । अतः अल्पदमनुवर्त्य आदेरल इत्यर्थो निष्पद्यते । तथाच आप्समुदायस्यालरूपत्वाभावाद् ईत्वं न । अनेन अन्त्यपदस्य असम्बन्धः सूचितः । परशब्द आवर्तते, तृतीयया विपरिणम्यते च, तथाच परबोधकशब्देन यत्र परस्य कार्यं तत्रैवानेन आदेरित्यस्य उपस्थितिः । तेन 'नित्यं

इस प्रकार दो नियम है । अल् के समुदाय वाचक पदों के अनन्तर स्थानषष्ठी परिभाषोपदस्थापक लिङ्ग है ।

अतएव 'इतोऽत्सर्वनामस्थाने' इसमें 'पथिमथि' आदि में स्थानषष्ठी के न होने से इसकी प्रबृत्ति नहीं हुई ॥

ङिच्चेति । अनेकाल् ङित् की सर्वादेश व्यावृत्ति के लिए इस सूत्र का आरम्भ है । सूत्रारम्भ न होने पर अनेकाल् होने से ङित् आदेश सम्पूर्ण को हो जाता ।

आदेरिति । 'आदेः परस्य' इसमें अलः इसकी अनुवृत्ति होने से आदेः अलः ऐसा अर्थ विवक्षित है । अत एव द्वीपम् इसमें 'द्व्यन्तरुपसर्गेभ्यः अप ईत्' इस सूत्र से आदिभूत अल् आकार को ईकार होता है । अन्यथा आदि रूप पान्त समुदाय को ईत्व हो जायगा; क्योंकि पूर्व सूत्र से अन्त्यस्य की अनुवृत्ति होने से अन्त्य आदि उभय का बोध होगा ।

४५. अनेकाल्शित्सर्वस्य । १ । १ । ५५ । स्पष्टम् । 'अलोऽन्त्य'सूत्रा-

अनेकाल् शित् (१ । १ । ५५) । शित उदाहरणम्—'इदम इश्' ।

ननु शकारोच्चारणसामर्थ्याद् भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्वे सिद्धे शिदिति व्यर्थम्, किञ्च सानुबन्धकनिर्देशे यथा नालः स्थानित्वं 'भोभगो' (८ । ३ । १७) इति सूत्रे भाष्ये उक्तम्, तथाऽऽदेशत्वमपि सूत्रोपात्तस्यैवेति तद्वचर्थम् । विधौ निर्दिष्टो योऽनेकाल्स सर्वस्येति सूत्रार्थः । उद्देश्यत्वविधेयत्वाख्यविषयतया बोधविषयता तु अनुबन्धविनिर्मुक्त-

ङितः' इत्यनेन धातोर्विहितस्य ङिदुत्तमस्य सकारान्तस्य लोपो नित्यमित्यर्थकेन सूत्रेण भवाव भवाम इत्यादौ आदेर्लोपो न; विहितपञ्चम्या आश्रयणंन परबोधकशब्देन अर्थात् परपदमुच्चार्य कार्यविधानाभावात् । किन्तु 'अलोऽन्त्यस्त्य'इत्यनेनान्त्यस्य सकारस्य । तत्र धातोर्विहित इत्यर्थस्वीकारेण विकरणव्यवधानेऽपि सलोपः सिध्यति । अन्यथा परस्येत्यर्थे तद्वयवधाने प्रवृत्तिः सूत्रस्य न स्यात् ॥

अनेकालशित् सर्वस्य । इश् इत्यत्र शकारोच्चारणसामर्थाद् लोके इशि वर्तमानस्य अनेकाल्त्वस्य बोध्ये आदेशरूपे साम्प्रतिकाभावे भूतपूर्वगतिन्यायेन च समारोपात् सर्वादेशत्वं सिध्येत् । एतदर्थमत्र सूत्रे शिद्ग्रहणं व्यर्थम् । न च इश् इत्यत्र शकारानुच्चारणे विभक्त्या निर्देशे सविसर्गपाठः, तथाच लाघावाभावः । किञ्च इकारे प्रत्ययत्वसम्भावनापि स्यात् । तद्वारणाय शकारोच्चारणचारितार्थ्यादत आह—**किञ्च इति** । यथा 'ङ्यें:' इत्यत्र सानुबन्धकनिर्देशे अलः = अल्त्वव्याप्यधर्मस्य, स्थानित्वम् अर्थात् स्थानितावच्छेदकत्वं न, किन्तु ङेत्वस्यैव, तथैव आदेशत्वमपि आदेशतावच्छेदकत्वाभावे सूत्रोपात्तस्य = सूत्रोपात्तवृत्तिधर्मस्येत्यभिप्रायः । तथा च इश्त्वस्य सूत्रोपात्तवृत्तिधर्मतया तस्य चानेकाल्वृत्तिकत्वेन अनेकाल्वृत्तिधर्मेण इश्त्वेन अवच्छिन्ना या आदेशता तदाश्रयस्य आदेशरूपेकारस्य सर्वादेशता सिद्धैवेति व्यर्थं शिद्ग्रहणम् ? इत्याशयवान् शङ्कते—**ननु** इति ।

भो भगो इति । तत्र 'भो भगोः' इति सूत्रे अश्ग्रहणं किमर्थम् ? छन्दःसु, पयःसु

इस सूत्र में पर शब्द की आवृत्ति होने से पर शब्द के उच्चारण द्वारा जहाँ पर के स्थान कार्य का विधान है वहीं इसकी प्रवृत्ति होती है । इसीलिये 'नित्यं ङितः' इसकी विकरण (शबादि) के व्यवधान में प्रवृत्ति के लिये 'धातोः परस्य' ऐसा न कहकर 'धातु से विहित'—इस प्रकार का अर्थ होने के कारण उक्त सूत्र की प्रवृत्ति आदि में नहीं हुई । धातु से पर को कार्यविधान होने पर भी अन्त्यत विहित का विशेषण धातु के होने से परशब्दोच्चारण करके विधान नहीं है ॥

अनेकाल् इति ॥ इतः इसमें सम्पूर्ण इदम् को 'इदम् इश्'—इससे इशादेश शित् मानकर होता है ।

शंका—यद्यपि शकार की इत्संज्ञा होने के अनन्तर आदेश का स्वरूप इ मात्र होने से अनेकाल्त्व नहीं है, तथापि शकारोच्चारण के सामर्थ्य से भूतपूर्व अर्थात् बोधक इश् वृत्ति अनेकाल्त्व को आदेश में मानकर अनेकाल्त्वप्रयुक्त सर्वादेशता सिद्ध होने के कारण शित्करण व्यर्थ है ?

दूसरा हेतु भी देते हैं—**किंच इति** । जिस प्रकार अनुबन्धसहित स्थानी के निर्देश में

इत्यत्र यत्वापत्तिं विसर्गस्यापाद्य पुनः शङ्कितम्—वृक्षस्तत्र, प्लक्षस्तत्रेत्यादौ प्रथमान्ते दोषस्य सम्भवेन सप्तमीबहुवचनपरः किमुदाह्रियते ? तत उक्तम्–विसर्गे कृते रोरभावात् यत्वाप्राप्तेः। स्थानिवद्भावेन तत्रापि सत्वस्य रुत्वेन पुनर्दोषतादवस्थ्यम् ? इत्याशङ्क्य 'अनल्विधौ' इत्यनेन स्थानिवद्भावस्य प्रतिषेधेन दोषः परिहृतः। विसर्गस्थानिनो रेफस्य अल्रूपत्वं वृक्षस्तत्रेत्यत्र तथैव 'छन्दःसु' इत्यत्रापि विशेषाभावात् कथमेकमनुदाहरणं तथाविधमेकमुदाहरणम्। तेनेदं सिद्धम्—सानुबन्धस्थले सूत्रोपात्तधर्म एव स्थानितावच्छेदकः। कुतः 'खरवसानयोर्विसर्जनीयः' इत्यनेन रेफस्य विसर्गो विहितः। तथा च रेफनिष्ठा स्थानिता अल्त्वव्याप्यधर्मेण रेफत्वेन धर्मेण अवच्छिन्ना, अतो न स्थानिवद्भावः। 'छन्दःसु' इत्यत्र 'रोः सुपि' इत्यनेन विसर्गस्य विधानमिति सूत्रोपात्तधर्मस्य रुत्वस्य अल्त्वव्याप्यधर्मेण अग्रहणात् अल्त्वव्याप्यधर्मावच्छिन्नस्थानितायाः अभावेन 'अनल्विधौ' इत्यस्याप्रवृत्त्या स्थानिवद्भावेन यत्वप्राप्तेः प्रसङ्गात् तदेवोदाहृतम्, न प्रथमैकवचनान्तमिति तदाशयः।

अनुबन्धानां बोधकावयवत्वमिति सिद्धान्तपक्षे अनुबन्धविशिष्टस्य अनेकाल्त्वं सूपपद्यते। तद्वृत्तिधर्मारोपेण बोध्यस्यापि अनेकाल्त्वम्। **विधौ निर्दिष्ट इति।** विधिशास्त्रे निर्दिष्टवृत्तिरनेकाल्वृत्तिर्यो धर्मः तद्धर्मावच्छिन्नविधेयताश्रयः सर्वस्य भवतीति। ननु विधेयताख्यविषयताया अनुबन्धविशिष्टे स्वीकारे 'अणुदित्' सूत्रस्थेन भाष्येण विरोधः। तथाहि—'अप्रत्ययादेष्टित्' इति व्याख्यावसरे आदेशोदाहरणम् 'इदम् इश्' इत्युक्तम्। तन्नोपपद्यते; विधेयतायाः विशिष्टे इशि सत्त्वेन विशिष्टस्य तस्य अण्रूपत्वाभावात्, यस्य च अण्रूपत्वम् इकारस्य न तत्र आदेशता (विधेयता) पर्याप्तिरिति तत्र भाष्योक्तदूषणप्रदर्शनं विरुध्येत ? अत आह—**उद्देश्यत्वेति।** धान्येन धनवान् इत्यभेदे तृतीयेत्याचारिणः। उद्देश्यत्वविधेयत्वाभिन्ना शाब्दबोधविषयतेत्यर्थः। अनुबन्धघटितधर्मस्य स्थानितावच्छेदकत्वे आदेशतावच्छेदकत्वेऽपि स्थानिता विधेयता च अनुबन्धरहितस्येति भावः। तथा च इकारमात्रे विधेयतायाः सत्त्वेन तस्य च अण्रूपत्वाद् दोषप्रदर्शनं भाष्योक्तं न विरुध्यते।

ननु 'घ्वसोरेद्धावभ्यासलोपश्च' इत्यनेन विहितस्य लोपस्य अभावरूपत्वेन अनेकाल्त्वाभावात् सर्वादेशत्वं न प्राप्नोति, अतः लोपश्चेत्यत्र लोपश् चेत्येवं शकार इत् निर्दिश्यते, शित्वाच्च सर्वादेशो भवति। एतदर्थं शिद्ग्रहणम् 'अनेकाल् शित्' इति सूत्रे

स्थानिता 'भोभगो' इस सूत्र के भाष्य[1] के अनुसार केवल इकार में नहीं है, किन्तु अनुबन्धसहित इट् में तथा रू में है। उसी प्रकार आदेशता सानुबन्धक में होने से स्वतः इश् अनेकाल् आदेश है। अतः शिद् ग्रहण व्यर्थ है। सूत्र में जो अनेकाल्त्व रूप से निर्दिष्ट किया गया है वह सम्पूर्ण को होता है–इस प्रकार सूत्रार्थ हुआ। 'अणुदित्' सूत्र के भाष्य में इश् में प्राप्त सवर्ण ग्रहण की आशङ्का का अनुबन्धसहित के अण् न होने से सवर्णग्रहण की प्राप्ति न होने के कारण प्राप्त असाङ्गत्य का परिहार उद्देश्यता और विधेयता रूप विषयताओं को अनुबन्धरहित में मानकर करना चाहिये।

१. विशिष्टो ह्येषोऽनल्माश्रयते इदं नाम।

पवादः । 'अष्टाभ्य औश्' (सू० ७।१२१) इत्यादौ 'आदेः परस्य' (सू० ४४) इत्येतदपि परत्वादनेन बाध्यते ।।

स्येति न 'अणुदित्' (१ । १ । ६९) सूत्रभाष्यविरोधः। 'ध्वसोः' (६ । ४ । ११९) इति लोपस्य 'लोपो यि' (६ । ४ । ११८) इति प्रकृते पुनर्लोपग्रहणसामर्थ्यात् सर्वादेशत्वसिद्धिः। अनुबन्धानामेकान्तत्वमेव न्याय्यमित्युक्तमिति चेत्? नः 'नानुबन्धकृतमनेकाल्त्वम्' (प० ५) इति ज्ञापनेन चारितार्थ्यात्। तेन 'दिव औत्' (७ । १ । ८४) इत्यादीनां न सर्वादेशत्वम्। अस्य च यथेत्संज्ञा तथा वक्ष्यते। 'नानेकाल् शित्' इति तु नोक्तम्, 'अनन्तरस्य' इति न्यायेन 'आदेः परस्य' (१ । १ । ५४) इत्यस्यैव निषेधापत्तेः।

परत्वात् इति। 'आदेः परस्य' इत्यस्यावकाशः—'द्व्यन्तरुपसर्गेभ्यः' (६ । ३ । ९७), द्वीपम्। शित्सर्वस्य—'इदम इश्' (५ । ३ । ३)।

आवश्यकम्?इति शङ्कां समाधत्ते—**ध्वसोरिति**। 'ध्वसोः' इति सूत्रे 'लोपो यि' इति सूत्रात् लोपपदस्यानुवृत्त्यैव लोपस्य सिद्धतया पुनरत्र सूत्रे लोपग्रहणं सर्वादेशार्थं भविष्यतीति शिद्ग्रहणस्य वैयर्थ्यात् शिद्ग्रहणेन 'नानुबन्धकृतमनेकाल्त्वम्' अनुबन्धकृतोऽनेकाल्त्व- व्यवहारो न भवतीत्यर्थिका परिभाषा ज्ञाप्यते। अतोऽनुबन्धद्वारा अनेकाल्त्वम् इशादौ न सम्भवति, तदर्थं शिद्ग्रणं सूत्रे आवश्यकम्। अत एव 'दिव उत्' इति सूत्रेण विधीयमान उकारः सर्वादेशो न।

नारायणो गुरुः कश्चित्, तन्मतं खण्डयति—**नानेकालिति**। 'अनन्तरस्य विधिर्भवति प्रतिषेधो वा' इति न्यायेन अव्यवहितपूर्वस्य 'आदेः परस्य' इत्यस्यैव निषेधः स्यात्, न 'अलोऽन्त्यस्य' इत्यस्य; व्यवहितत्वात्। अतस्तथा न्यासो नोचितः।

'देहि' इत्यादि प्रयोग में समग्र अभ्यास के लोपहेतु 'ध्वसोः' इस सूत्र के लोप पद को लोपश् पाठ के द्वारा शित् मानकर सर्वादेश लोप किया जाता है। शिद्ग्रहणभावपक्ष में 'लोपो यि' इससे 'लोप' पद की अनुवृत्ति द्वारा लोप का लाभ हो जाने पर भी क्रियमाण सूत्रस्थ लोप पद के सामर्थ्य से सर्वादिशता सिद्ध हो जायगी। अतः वहाँ के लिए भी आवश्यक नहीं है। अनुबन्धों का अवयवत्व सिद्धान्त सिद्ध होने से अनवयवत्व की सम्भावना से अनेकाल्त्वाभाव की शङ्का का अवकाश भी नहीं है। अतः शित्करण व्यर्थ है?

समाधान—'अनुबन्धप्रयुक्त अनेकाल्त्व का व्यवहार नहीं होता' इत्यर्थक 'नानुबन्धकृतम्' इस परिभाषा के ज्ञापनार्थ शित् पद का उपादान है। अत एव 'दिव औत्' इससे विधीयमान औत् आदेश सम्पूर्ण दिव् को नहीं हुआ। औत् का तकार उच्चारणार्थक है, तथापि उच्चारणार्थक वर्णों की भी इत्संज्ञा एवं लोप के द्वारा निवृत्ति का प्रतिपादन 'दिव औत्' इस सूत्र पर किया जायगा।

'नानेकाल् शित्' इस प्रकार के न्यास से 'अनन्तरस्य विधिर्भवति प्रतिषेधो वा' इस न्याय के द्वारा अनन्तरपठित 'आदेः परस्य' इसका ही निषेध होगा, व्यवहित 'ङिच्च' इसका निषेध नहीं होगा। अतः उक्त न्यास नहीं किया।

परत्वादिति। मूलोक्त स्थलों में चरितार्थ परिभाषासूत्रों के होने से रामैः यहाँ 'अतो भिस ऐस्' इससे ऐस् आदेश की व्यवस्था 'आदेः परस्य' इसको परत्व निमित्त से बाधकर 'अनेकाल्

४६. स्वरितेनाधिकारः । १ । ३ । ११ । **स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यम् ॥**

एवम् 'अतो भिस' (७ । १ । ९) इत्यादिविषये 'अनेकाल्' (१ । १ । ५५) इत्यनेन 'आदेः परस्य' (१ । १ । ५४) इति परत्वाद् बाध्यते ।

एतेन 'ङिच्च' (१ । १ । ५३) इत्यत्र 'ङिदेवानेकालन्त्यस्य' इति नियमेन सिद्धेऽनेकाल्ग्रहणं व्यर्थम्' इत्यपास्तम् ॥

स्वरितेन (१ । ३ । ११) । **इत्थम्भूतलक्षणे तृतीया । स्वरितत्वज्ञाप्योऽधिकारो**

यत्तु ङिद्रूपानेकाल्षु 'अलोऽन्त्यस्य' इत्यनेन सिद्धौ 'ङिच्च' इति सूत्रं नियमार्थं ङिदेवानेकाल् आदेशः अन्त्यस्य, नान्यः, तथा च अनेकाल्ग्रहणमत्र सूत्रे व्यर्थमिति ? तन्न; 'अतो भिस ऐस्' इत्यनेन प्रसक्त ऐसादेशः 'आदेः परस्य' इत्यनेन आदेः स्यात्, तद्बाधनाय अनेकाल्सूत्रस्य आवश्यकत्वात् । अन्यथा ङिच्चेति नियमेन 'अलोऽन्त्यस्य' इत्यस्य व्यावृत्तावपि 'आदेः परस्य' इत्यनेन आदेः स्थाने प्राप्तस्य वारणासम्भवात् । **लोपो यि इति** । एतदनन्तरम् 'इत्यतो लोपपदे' इति योजनीयम् । एकान्तत्वमेव = अवयवत्वमेव । एकान्ता इति परिभाषया बोधितोऽवयत्वपक्ष एव सिद्धान्तितः । विस्तरस्तु परिभाषेन्दुशेखरे बोध्यः ।

अस्य च = उत् इत्येतद्घटकतकारस्य । **वक्ष्यते इति** । 'दिव उत्' इति सूत्रे मूले उच्चारणार्थानामपि इत्संज्ञालोपाभ्यामेव निवृत्ते रित्यादिना वक्ष्ययाणत्वात् । एतेन = आदेः परस्येत्येद्बाधकत्वेन अनेकालित्यस्येष्टत्वेन । 'ङिच्च' इति नियमेन 'अलोऽन्त्यस्य' इत्यस्याप्रवृत्तावपि आदेः परस्येत्यनेन आदेः स्यात् । अनेकाल्सत्त्वे तु परत्वादनेन 'आदेः परस्य' इत्यस्य बाधः । तेन रामैरित्यत्र ऐसादेशः सर्वस्य सिद्धः ॥

स्वरितेनाधिकारः । जटाभिस्तापस इत्यादिवत् स्वरितेनेत्यत्र 'इत्थम्भूतलक्षणे' इत्यनेन तृतीया तस्मिन्नेवार्थे । इत्थम्भूतः = कञ्चित् प्रकारविशेषं प्राप्तः, स्वरितत्वं प्राप्तः, तस्य लक्षणे तृतीया इत्यर्थः । लक्षणत्वमत्र ज्ञानजनकज्ञानविषयत्वम् । यथा स्वरितत्वज्ञाप्योऽधिकारः । तथा च अधिकारज्ञानजनकत्वज्ञानं स्वरितत्वज्ञानं तद्विषयत्वं स्वरि-

---

शित्' इसके द्वारा होती है । एतेन = 'आदेः परस्य' इसका अनेकाल् सूत्र बाधक होने से 'ङित् हो अनेकाल् अन्त्य को होता है' ऐसा ङिच्च इससे नियम मानकर अनेकालग्रहण के वैयर्थ्य की सम्भावना निरस्त हो गयी । इसके न रहने पर 'आदेः' परस्य इससे ऐस् आदि को हो जायगा ॥

स्वरितेनाधिकार इति । इत्थम्भूत = प्रकार विशेष को प्राप्त उसके ज्ञापक से तृतीया करने वाले सूत्र 'इत्थम्भूतलक्षणे' इसके द्वारा तृतीया हुई है । स्वरित से ज्ञाप्य अधिकार अर्थात् विनियोग है । स्वरित शब्द स्वरितत्वपरक है । विनियोग = विनियोजन रूप उपस्थिति का ज्ञापक स्वरितत्व है । अच् हल् उभयवृत्ति दोषरूप अथवा अच् में रहने वाले स्वरविशेष का नाम स्वरितत्व है । अनुनासिकत्व के समान इसका भी ज्ञान तत्तत्कार्य द्वारा अनुमेय है । विनियोग-उपस्थिति उत्तर सूत्र में होती है । कहीं पूर्व सूत्र में भी प्रमाण के आधार पर होती है । किस पद की कितनी अधिकारावधि है—इसमें भाष्यकारादि का व्याख्यान ही शरण है ।

विनियोग इत्यर्थः। स्वरितत्वञ्चेदं दोषविशेषरूपमज्झलसाधारणं स्वरूपमधिक्रियमाण-पदघटकाऽज्निष्ठं वा। तच्चानुनासिक्यवत् प्रतिज्ञागम्यम्। विनियोगश्च प्रायेणोत्तरत्रो-पस्थितिः, क्वचित् पूर्वत्रापि।

कियद् दूरमधिकारः? इत्यत्रासति गमके व्याख्यानमेव शरणम्। किञ्च, स्वरिते-नाधिकारगतिः। तेन 'गोस्त्रियोः' (१।१।४८) इत्यादौ स्त्र्यधिकारस्थप्रत्ययग्रहण-मित्याद्याकरादवसेयम्।

एतेन 'व्याख्यानादेव निवृत्तिवदनुवृत्तिरपि भविष्यति, आकाङ्क्षायान्तु सत्या-मश्रुतकल्पनाया अन्याय्यत्वाच्छ्रुतापेक्षणस्य न्याय्यत्वाच्च किं सूत्रेण' इत्यपास्तम्। स्पष्टं चेदं भाष्ये॥

तस्य। तृतीयाया वैशिष्ट्यमर्थः। स्वरितत्वविशिष्टोऽधिकारो विनियोग[1] इत्यर्थः। सूत्रे स्वरितशब्दः स्वरितत्वपरः, अधिकारशब्दो भावसाधनः। अत एव तस्य विनियोगोऽर्थो दर्शितः। स्वरितत्वमज्झल्साधारणम् अज्झल्विशिष्टनिष्ठं बोध्यम्। तत्र तत्र सूत्रेषु स्वरितत्वनिर्देशस्य ज्ञानाभावात् कथं तज्ज्ञातुं शक्यम्? अत आह—**तच्च** इति। स्वरितत्वं लक्ष्यदर्शनात् प्रतिज्ञायते, यथा आनुनासिक्यम्। विनियोगः = उत्तरत्रानुवृत्तिः। क्वचित् पूर्वत्रापि अनुवृत्तिः। **असति गमके इति**। यथा 'अङ्गस्य' इत्यस्य अवधिर्न निर्दिष्टः। 'प्राग्दीव्यतोऽण्' इत्यत्र तु दीव्यते प्राग् अणोऽधिकारः इत्यवधिर्निर्दिष्टः। यत्राव-धेर्निर्देशो न तत्र स्वरितत्वप्रतिज्ञया अवधिज्ञानं कर्तव्यम्।

अथवा—लक्षणाया अधिकारशब्दोऽधिकारगतिपरः। गतेर्ज्ञानमर्थः। स्वरितत्व-ज्ञाप्यम् अधिकारज्ञानम्। अधिकारशब्दः अधिकं कार्यं करोतीति व्युत्पत्तिलभ्यार्थकः। तथाच अधिककार्यकारित्वज्ञानमित्यर्थः। तेन 'गोस्त्रियोरुपसर्जनस्य' इत्यत्र 'स्त्रियाम्' त्यधिकृत्य विहितानां टावादिप्रत्ययानामेव ग्रहणं न तु स्त्रीबोधकसामान्यस्य। **इत्यादीनि इति**। आदिपदेन गौणाधारेऽपि सप्तमी। 'पूर्वत्रासिद्धम्' इत्यत्र त्रिपाद्यामपि पूर्वं प्रति परमसिद्धमित्यर्थस्य लाभोऽपि संगृहीतः। अज्निष्ठं स्वरविशेषरूपं स्वरितत्वमिति पक्षे शब्दस्वरूपस्य तद्युक्तत्वं परम्परया बोध्यम्। स्वाश्रयाज्घटितत्वसम्बन्धेन स्वरितत्वयुक्तः

अथवा 'अधिकार' शब्द लक्षणा से अधिकारगति का बोधक है। अतः स्वरितत्व से अधिकारत्व का ज्ञान होता है। अधिकार 'अधिकः कारः = कृतिः' इस अर्थ के द्वारा पूर्वविप्रतिषेध अधिक कार्य से गौण में भी प्रवृत्ति आदि का संग्रह होता है। 'गोस्त्रियोः' इसमें स्त्री-शब्द से 'एतद् अधिकारस्य प्रत्ययः' का ग्रहण है। अधिकार शब्द से अनेक अर्थ का बोध होने से व्याख्यान के द्वारा अनुवृत्ति और निवृत्ति की सिद्धि हो जाने तथा जिज्ञासा होने पर अश्रुत पद की कल्पना अन्याय्य होने से श्रुत पद की कल्पना द्वारा जिज्ञासा की शान्ति उचित होने के कारण इस सूत्र का आरंभ व्यर्थ है—यह कहने वाले परास्त हो गये; क्योंकि अधिक अर्थ के बोध-हेतु सूत्र आवश्यक है॥

---

१. निष्पादनमिति मिश्राः। विनियोगो नाम स्वीयसूत्रोत्तरसूत्रैकवाक्यतया विवक्षितवाक्यार्थ-निष्पादनम्। यत्र पूर्वत्र विनियोगस्तत्र पूर्वसूत्रैकवाक्यतया इति विवक्षितम्। उदाहरणम् 'रायो हलि' (७।२।८५) इति सूत्रस्य हलि इत्यस्य 'अष्टन आ विभक्तौ' (७।२।८४) इति पूर्वसूत्रैकवाक्यतया हलादौ विभक्तौ इत्यर्थस्य।

'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' (प०) ॥
'असिद्धं बहिरङ्गमन्तरङ्गे' (प०) ॥

परनित्य इति (प०)। परं विप्रतिषेधसूत्राद् बलवत्। नित्यं कृताकृतप्रसङ्गि, तद्विपरीतमनित्यम्। तत्राक्लृप्ताभावकल्पनापेक्षया क्लृप्ताभावकस्यैव तत्कल्पनं युक्तमिति तस्य बलवत्त्वे बीजम्। अन्तर्मध्ये बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्येऽन्तर्भूतान्यङ्गानि निमित्तानि यस्य तदन्तरङ्गम्। तदीयनिमित्तसमुदायाद् बहिर्भूताङ्गकं बहिरङ्गम्॥

तस्य बलवत्त्वे बीजमाह—असिद्धमिति। इयञ्च 'वाह ऊठ्' (६।४।१३२) इति सूत्रेण ज्ञापिता।

शब्दः। स्वं स्वरितत्वम्, तदाश्रयः अच्, तेन घटितः स शब्दः। एतेन=अर्थान्तर-कथनेन। कियद् दूरमधिकारः ? इत्यस्य सूत्राश्रयणेऽपि व्याख्यानादेव निर्णयत्वेन तथैव अस्यानुवृत्तिरित्यपि व्याख्यानादेव अवगम्येत। वाक्यार्थबोधे पदार्थान्तरस्य आकांक्षितत्वेन तद्वाचकस्य अश्रुतस्य अनुपस्थितस्य पदस्य कल्पनापेक्षाया अन्याय्यतया पूर्वं श्रुतस्यैवा-पेक्षणात् तेनैवाकाङ्क्षाशान्तेश्च सम्भवादयमधिकारो व्यर्थ एव आरब्ध इत्यपास्तम्। अस्य न केवलमनुवृत्तिमात्रफलकत्वं किन्तु तत्र तत्र कार्यविशेषबोधनमपि प्रयोजनमिति न वैयर्थ्यम्। अस्मिन्नेव सूत्रे अधिककार्यकारित्वरूपमधिकारफलं प्रदर्शितम्॥

परेति। परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः। कृतेऽपि अकृतेऽपि च कार्ये यत् प्राप्नोति तन्नित्यम्। तथाच नित्यस्य सदा प्राप्तत्वेन अन्यशास्त्रस्य कृतेऽस्मिन् अप्राप्तत्वेन तदभावः पक्षे निश्चितः। अनिश्चिताभावकस्य सूत्रस्य अप्रवृत्तिकल्पनापेक्षया निश्चिता-भावकस्य अप्रवृत्तिरेव युक्ता। एकस्याभावः कृते अकृते क्वापि न क्लृप्तः, अन्यस्य च कृते पक्षे अभावो निश्चित इति यस्याभावः कदाचिद् भवेत् तस्यैवाभावः सर्वदा कल्प्यतामित्येव नित्यशास्त्रे बाधकताबीजम्।

अन्तरिति। 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यत्र अन्तःशब्दो मध्यवाचीत्याह—**मध्ये इति**। अङ्गशब्दो नात्र शरीरावयववाची, नवा अङ्गसंज्ञापरः, किन्तु निमित्तपरः, तदाह—**अङ्गानीति**। व्याकरणे शब्दस्य प्राधान्यात् शब्द एव निमित्ततया गृह्यते। अत एव अर्थकृतबहिरङ्गत्वस्य तत्र तत्रानाश्रयणमुक्तम्। तदीयः=अन्तरङ्गशास्त्रीयः। तस्य= अन्तरङ्गस्य। **वाह ऊठ् इति**। एतत्सूत्रघटकोठ्ग्रहणेन ज्ञापिता इत्यर्थः। तत्र सूत्रे ऊठ्-विधानं विश्वौह इत्यत्र ऊठि कृते 'एत्येधत्यूठ्सु' इत्यनेन वृद्धिविधानार्थम्। तत्र ऊठ्-

---

परनित्येति। परशास्त्र की बलवत्ता विप्रतिषेध से बोधित है। जिस शास्त्र से विहित कार्य के अनन्तर और पूर्व दोनों अवस्थाओं में जिस शास्त्र की प्रवृत्ति रहती है वह उसकी अपेक्षा नित्य है। नित्य शास्त्र की प्रवृत्ति पूर्व या अनन्तर में निश्चित है। अतः इसकी अप्रवृत्ति-कल्पना की अपेक्षा जिसकी अप्रवृत्ति एक पक्ष में निश्चित है उसकी अप्रवृत्ति-कल्पना ही उचित है। यही नित्यशास्त्र की बाधकता में बीज है।

अन्तरङ्ग इति। बहिरङ्गत्व से विवक्षित शास्त्रीय निमित्त समुदाय के मध्य में अन्तर्भूत निमित्त वाला शास्त्र अन्तरङ्ग एवं अन्तरङ्गत्व रूप से विवक्षित शास्त्रीय निमित्त समुदाय के मध्य

यद्यपि 'प्रत्यङ्गवर्ती लोको दृश्यते, मनुष्योऽयं प्रातरुत्थाय प्रथमं शरीरकार्याणि करोति, ततः सुहृदाम्, ततः सम्बन्धिनाम्' इति न्यायमूलकत्वमस्या 'अचः परस्मिन्' (१ । १ । ५७) इति भाष्ये उक्तम्; तथापि तेन न्यायेन युगपदप्राप्तिविषयतैव स्यात् ।

ग्रहणं न कर्तव्यम्, सम्प्रसारणपदमनुवर्त्य तदेव विधीयताम्, सम्प्रसारणेन उकारे जाते 'पुगन्तलघूपधस्य च' इति गुणे ओकारे पूर्वपरयोः 'वृद्धिरेचि' इत्यनेन वृद्धौ विश्वौहः इत्यस्य सिद्धया तद् व्यर्थं सद् अन्तरङ्गपरिभाषां ज्ञापयति । ज्ञापितायां परिभाषायाम्, अन्तरङ्गस्य लघूपधगुणस्य दृष्टया शस्पर्यन्तमपेक्ष्य प्रवृत्तत्वाद् बहिरङ्गस्य 'वाह ऊठ्' इत्यस्यासिद्धत्वात् पुगन्तसूत्रस्याप्राप्त्योक्तप्रयोगसिद्धये ऊठ्विधानं चरितार्थमिति भावः ।

न्यायसिद्धेऽर्थंज्ञापकानुसरणं नोपयोगीति न शङ्कनीयम् । पूर्वमेव जातस्य बहिरङ्गस्य पश्चात् प्रवृत्तेनान्तरङ्गशास्त्रेण असिद्धत्वं लोकन्यायेन प्रतिपादयितुमशक्यम् । अन्तरङ्गबहिरङ्गकार्ययोः युगपत् प्राप्तौ बहिरङ्गकार्यापेक्षया अन्तरङ्गकार्यं पूर्वं करोतीत्यत्रैव लोकदृष्टान्ते, न तु कृतमपि बहिरङ्गमकृतमिव मन्यते । एतत् प्रतिपादयितुमाह—**यद्यपीति ।** प्रत्यङ्गवर्ती=अङ्गस्य प्रत्यासन्नत्वात् समीपवर्ती । अङ्गशब्दस्यार्थो लक्षणया उच्यते । अङ्गमङ्गं प्रति प्रत्यङ्गम् । वीप्सायामव्ययीभावः । **सर्वविषय इति ।** जातं समकालप्राप्तश्चैतदुभयविषयमित्यर्थः । ज्ञापनप्रकारं दर्शयति—**अन्यथा इति ।** परिभाषाया असत्त्वे । प्रष्ठं वाह्यतीति विग्रहे णिजन्ताद् 'वहश्च' (३।२।६४) इत्यनेन णिप्रत्यये णिलोपे सम्प्रसारणे पूर्वरूपे पुगन्तेति गुणे वृद्धौ 'प्रष्ठौहः' इत्यस्य सिद्धेरूठ्विधानस्य वैयर्थ्यम् ।

नच 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' इत्यनया अज्निष्ठं यदानन्तर्यं तन्निमित्तके विधौ अन्तङ्गरशास्त्रे कर्तव्ये बहिरङ्गपरिभाषाया अप्रवृत्तिरित्यर्थिकया परिभाषया अन्यानन्तर्यानिमित्तके अज्निष्ठे लघूपधगुणे कर्तव्ये बहिरङ्गपरिभाषाया अप्रवृत्तौ गुणे वृद्धौ रूपसिद्धया ऊठ्ग्रहणस्य वैयर्थ्यज्ञापनोत्तरमपि तदवस्थमिति वाच्यम्; नाजानन्तर्यपरिभाषाया अस्वीकारात् । यच्चास्याः ज्ञापकम् 'षत्वतुकोरसिद्धः' इति सूत्रे तुग्ग्रहणम्, तदन्तरङ्गपरिभाषाया अनित्यत्वे ज्ञापकमास्ताम्; तावतैव इष्टसिद्धेः । ज्ञापनप्रकारश्चेत्थम्—'षत्वतुकोः' इति सूत्रेण षत्वे तुकि च कर्तव्ये एकादेशशास्त्रस्यासिद्धता बोध्यते । यथा अधीत्य प्रेत्य इत्यादौ दीर्घे गुणे च यथाक्रमं कृते 'ह्रस्वस्य पिति कृति तुक्' इत्यनेन

में वहिर्भूत अङ्ग = निमित्त जिसका है उसको वहिरङ्ग कहते हैं । अन्तरङ्ग के बलवत्त्व में बीज वहिरंग की असिद्धता है । 'वाह ऊठ्' सूत्र के ऊठ् ग्रहण से यह परिभाषा ज्ञापित है । प्रष्ठं वहति इस अर्थ में प्रष्ठ उपपद वह धातु से 'वहश्च' इससे ण्वि प्रत्यय द्वारा निष्पन्न प्रष्ठवाह् शब्द से शस् विभक्ति में 'वाह ऊठ्' इससे सम्प्रसारणमात्र उकार का विधान करने पर भी ण्विप्रत्ययनिमित्तक लघूपधगुण ओकार होने के बाद 'वृद्धिरेचि' इसके द्वारा वृद्धिविधान से 'प्रष्ठौहः' इसकी सिद्धि हो जाती है । एतदर्थ ऊठ्-विधान व्यर्थ है । अतः इसके सामर्थ्य से अन्तरङ्गपरिभाषा का ज्ञापन होता है । ज्ञापनोत्तर परिभाषा द्वारा लघूपध गुण की अपेक्षा सम्प्रसारण के बहिरङ्ग होने से असिद्ध हो जाने पर गुण की अप्राप्ति के कारण उक्त प्रयोग की असिद्धि प्राप्त होगी । ऊठ्-विधान करने पर 'एत्येधत्यूठ्सु' एतत्सूत्रविहित वृद्धि के विधान से उक्त प्रयोग की निष्पत्ति हो जाती है ।

शङ्का—लोक प्रत्यङ्गवर्त्ती अर्थात् अन्तरङ्ग में प्रवृत्तिशील देखा जाता है । प्रातःकाल

ज्ञापकेन तु सर्वविश्यता बोद्धचते—इति 'वाह ऊठ्' (६।४।१३२) इति सूत्रे कैयटे स्पष्टम्। अन्यथा वाहः सम्प्रसारणे पूर्वरूपे च कृते ण्याश्रये गुणे 'वृद्धिरेचि' (६।१।८८) इति वृद्धौ 'प्रष्ठौहः' इत्यादि सिद्धावूठ्विधानं व्यर्थं स्यात्। नाजानन्तर्य-

ह्रस्वाभावात् तुग् न स्यात्। अतः सूत्रं कृतम्। कृते तु एकादेशस्य असिद्धत्वात् ह्रस्वेकारमादाय तुक् सिध्यति। असिद्धपरिभाषायाः सत्त्वेन प्रवृत्तौ पदद्वयसम्बन्धिनोः इकारयोः अकारेकारयोश्च क्रमेण दीर्घे गुणे च अपेक्षणात् तयोर्बहिरङ्गत्वमिति एकपदाश्रितत्वेन अन्तरङ्गतुक्शास्त्रदृष्ट्या असिद्धत्वादेव तुकः सिद्धया सूत्रे तुग्ग्रहणं व्यर्थम्। तदेव ज्ञापयति–'नाजानन्तर्ये' इति। तथा च अन्यान्तर्यनिमित्तके अज्निष्ठे तुकि अन्तरङ्गपरिभाषाया अप्रवृत्त्या तुकोऽप्राप्तौ तुग्ग्रहणं सूत्रे चरितार्थम्।

एतस्याः परिभाषायाः ज्ञापनं विनापि अन्तरङ्गपरिभाषाया अनित्यत्वज्ञापनेनैव तुग्ग्रहणस्य चारितार्थ्यं वक्तुं शक्यमतो नाजानन्तर्यपरिभाषाया नोपयोगः। लक्ष्यानुरोधाच्च अन्तरङ्गपरिभाषायाः प्रवृत्त्यप्रवृत्ती। नाजानन्तर्यपरिभाषायाः स्वीकारे यज्धातोर्लङि उत्तमपुरुषैकवचने इटि विभक्तौ अटि शपि च अयजइ इन्द्रमित्यत्र वाक्यसंस्कारपक्षे 'आद्गुणः' इत्यनेन गुणः, इन्द्रघटकेकारेण सह द्वयोरिकारयो दीर्घश्च प्राप्तः। पदद्वयसम्बन्धिवर्णद्वयनिमित्तकत्वाद् दीर्घस्य बहिरङ्गत्वादसिद्धत्वेन गुणे उक्तं रूपं सिध्यति। 'नाजानन्तर्य'परिभाषायाः सत्त्वे तु अज्निष्ठानन्तर्यनिमित्तकत्वाद् गुणे कर्तव्ये नाजानन्तर्यपरिभाषया अन्तरङ्गपरिभाषाया अप्रवृत्तिबोधनेन अनुवृत्तौ अयजे इन्द्रमित्यत्र दोषः स्यात्। अन्तरङ्गपरिभाषाया अनित्यत्वकल्पने इष्टानुरोधाद् व्यवस्था। तथाचात्र परिभाषाया अनित्यत्वाद् प्रवृत्तिर्न; इष्टानुरोधात्। विस्तरस्तु **परिभाषेन्दुशेखरे** द्रष्टव्यः। अपवादशास्त्रस्य सर्वापेक्षया बलवत्त्वं वचनारम्भसामर्थ्यादेव भवतीति॥

उठकर सर्वप्रथम स्वशरीरसम्बन्धो कार्य, उसके बाद मित्रों का, तदनन्तर सम्बन्धियों का कार्य करता है–इस लौकिक दृष्टान्त से बहिरङ्ग की अपेक्षा अन्तरङ्ग की प्रथम में प्रवृत्ति सिद्ध है। इस प्रकार लोकसिद्ध अर्थ की प्रतिपादक अन्तरङ्गपरिभाषा में शास्त्रीय प्रमाणोपन्यास अनावश्यक है। 'अचः परस्मिन्' के भाष्य से भी इस परिभाषा का उक्त रीति से लोकन्यायमूलकत्व दिखाया है?

समाधान—अन्तरङ्ग बहिरङ्ग दोनों की समानकाल में प्राप्ति होने पर, लोकदृष्टान्त से निर्वाह होने पर भी अन्तरङ्गशास्त्र की दृष्टि में पूर्व में ही जात बहिरंग के असिद्धत्व के प्रतिपादन में लोकदृष्टान्त असमर्थ है। अतः जात बहिरंगासिद्धत्व, समकालप्राप्त बहिरङ्गासिद्धत्व—उभयविध परिभाषा का विषय है—इसमें प्रमाणोपन्यासार्थ ज्ञापक प्रदर्शनआवश्यक है।

शङ्का—अच् को अन्य के आनन्तर्य का निमित्त मानकर जायमान अन्तरङ्ग कार्य में अन्तरङ्ग परिभाषा की प्रवृत्ति नहीं होती—एतदर्थक 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' यह परिभाषा है। प्रष्ठौहः में उकाररूप अच् के स्थान में आर्धधातुक को निमित्त मानकर प्राप्त गुणादेश के कर्तव्य में अन्तरङ्गपरिभाषा का इसके द्वारा निषेध होने से ऊठ्ग्रहण का स्वांश में चारितार्थ्य नहीं हुआ?

समाधान—इस परिभाषा को नहीं मानते हैं। दोषस्थल में लक्ष्यानुरोध से अन्तरङ्ग परिभाषा को अनित्य मानकर समाधान करना चाहिये। वाक्यसंस्कारपक्ष में अयज इ इन्द्रम् यहाँ अन्तरङ्ग होने से दीर्घ की अपेक्षा गुण पहले होता है। नाजानन्तर्यपरिभाषा मानने पर यहाँ अन्तरङ्गपरिभाषा से दीर्घ का बाधक गुण नहीं होगा। विशेष परिभाषेन्दुशेखर में देखिये।

'अकृतव्यूहाः पाणिनीयाः' (प०) । निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः ।।

।। इति परिभाषाप्रकरणम् ।।

परिभाषा तु नास्त्येवेति न 'अयजे इन्द्रम्' इत्यादौ दोष इति परिभाषेन्दुशेखरे विस्तरः । अपवादस्तु वचनप्रामाण्याद् बलवान् ।।

अकृत० (प०) इति । **न कृतो विशिष्ट ऊहस्तर्को निमित्तविनाशेऽपि कार्यस्थिति-रूपः, यथा दण्डविनाशेऽपि घटस्थितिः, स यैस्ते इत्यर्थः, तदाह**—निमित्तमित्यादि । **तत्प्रयुक्तं कार्यं जातमपि न कुर्वन्ति—नोच्चारयन्तीत्यर्थः; इति कैयटादयः ।**

अकृतेति । अकृतव्यूहाः पाणिनीयाः । व्यूहपदघटकस्य विशब्दस्यार्थमाह—**विशिष्ट इति** । वैशिष्ट्यं वक्ति = विनाशेऽपि कार्यस्थितिरूपः । निमित्तपदेन निमित्तकारणम् उच्यते । पाणिनीयाः = पाणिनिना प्रोक्तं पाणिनीयम्, तदधीयते इति पाणिनीयाः । व्याकरणाध्येतारः निमित्तविनाशसम्भावनायां तन्निमित्तप्रयुक्तं कार्यं प्रागेव न कुर्वन्ति=नोच्चारयन्तीति परिभाषार्थः । अयं भावः–निमित्तं द्विविधं दृष्टम् । एकं स्वस्य सत्त्वे कार्यस्थितेर्नियामकम्, अपरञ्च कार्यस्थित्यनियामकम् । प्रथमं यथा अपेक्षाबुद्धिः = अयमेकः अयमेक इत्याकारिका स्वस्थितिकालपर्यन्तद्वित्वबुद्धिरूपकार्यस्थितेः सम्पादिका; अपेक्षायाः बुद्धेर्नाशे द्वित्वादिबुद्धेर्नाशाभ्युपगमात् । तदुक्तं **न्यायमुक्तावल्याम्**—'अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः' । इति । एवमेव प्रारब्धाख्य कर्म संसारस्थितिनियामकम् । तस्य प्रारब्धकर्मक्षये संसारस्थितिरपि निवर्तते इति शास्त्रमर्यादा । अतएव 'नाभुक्तं क्षीयते कर्म', 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इति वचनयोः परस्परं न विरोधः । 'नाभुक्तं क्षीयते' इति वचनं प्रारब्धकर्मसम्बन्धि, भोगमन्तरा प्रारब्धकर्मणोऽनिवृत्तेः । 'क्षीयन्ते चास्य' इति वचनन्तु सञ्चितकर्मसम्बन्धि; सञ्चितकर्मणो भगवद्दर्शनादिना निवृत्तेः । एवमेव न जपाकुसुमस्य उपाधेः सम्बन्धात् स्फटिके मणौ भासमानस्य लौहित्यस्य जपाकुसुमरूपोपाधेः स्थितावेव नियामकत्वम्; उपाधेरपगमे लौहित्यस्यापि निवृत्तेः ।

द्वितीयं यथा दण्डादेः घटस्थितिनियामकत्वं न, दण्डादेः असत्त्वेऽपि घटादिस्थितिदर्शनात् । दण्डनाशे घटनाशस्यादर्शनात् । शास्त्रे तु लक्ष्यानुसाराद् व्यवस्था विधेया । अपेक्षाबुद्धिनाशेन जातद्वित्वादिबुद्धिनाश इव प्रारब्धकर्मक्षयात् संसारस्य निवृत्तिकल्पनमिव निमित्तस्य विनाशे जातं कार्यं निवर्तते । परिभाषाया अनित्यत्वात् दण्डादिनिमित्तविनाशे घटादिस्थितिरिव निमित्तविनाशेऽपि कार्यस्थितिः कार्यं, न निवर्तते इति कैयटाशयः । निमित्तापाये नैमित्तिकस्याप्यपाय इति भावः ।

अपवादशास्त्र का वैयर्थ्य ही इसकी बलवत्ता में बीज है । सूत्रारम्भ सामर्थ्य से अपवाद परनित्यान्तरङ्गापेक्षया बलवान् है ।।

अकृतेति । निमित्त का विनाश होनेपर भी कार्य की स्थिति, जैसे दण्ड के विनाश होने पर भी घट की स्थिति के तर्क को नहीं करने वाले पाणिनीय (पाणिनि प्रभृति से प्रोक्त के अध्येतृगण)

अन्ये तु व्यूहोऽन्तरङ्गशास्त्रं बहिरङ्गापोहनरूपत्वात् । तत् निमित्तविनाशं दृष्ट्वा पूर्वमपि न कुर्वन्तीत्यर्थ इत्याहुः ।

इयं परिभाषा निष्फला निर्मूलेति परिभाषेन्दुशेखरे निरूपितम् ॥

॥ इति परिभाषाप्रकरणम् ॥

अन्यैस्तु व्यूहपदेन अन्तरङ्गशास्त्रं गृह्यते। कुतः ? बहिरङ्गापोहनरूपत्वात् = बहिरङ्गेण शास्त्रेण निमित्तविनाशद्वारा अपोह्यते दूरीक्रियते यत् तद्रूपत्वम् अन्तरङ्गशास्त्रस्य। व्यूहनशब्दः कर्मल्युडन्तः, व्यूहशब्दे तु कर्मणि घञ्। तत् = अन्तरङ्गशास्त्रम्। निमित्तविनाशसम्भावनायामित्यध्याहारलभ्यम्। **न कुर्वन्तीत्यर्थः**। भाविनिमित्तविनाशे कार्यस्यानुत्पत्तौ लोके दृष्टान्त उपलभ्यते। नद्याः जलवृद्धेः सम्भावनया पूर्वमेव भवननिर्माणादिकं तत्र न कुर्वन्ति। परिभाषाया निष्फलत्वं निर्मूलत्वञ्च परिभाषेन्दुशेखरे स्फुटम्।

इति परिभाषाप्रकरणम् इति। अत्र विचार्यते—'उरण् रपरः' 'यथासंख्यमनुदेशः समानाम्' इत्यादिपरिभाषाणां प्रकरणेऽस्मिन् अनुल्लेखात् न्यूनता; तासामपि प्रथमाध्यायस्थत्वात् सन्धिकार्योपयोगिनीत्वाच्च। सन्धिकार्ये अनुपयोगिनीनां कासाञ्चिद् 'इको गुणवृद्धी' इत्यादिपरिभाषाणां निरूपणञ्चाप्रासङ्गिकम्। किञ्च ज्ञापकन्यायसिद्धानां परिभाषाणां कासाञ्चित् त्यागः, कासाञ्चिद् व्याख्येयत्वेन उपादानमित्यर्धजरतीयमिति सन्देहो नावतारणीयः। प्रायेण प्रथमाध्यायस्थानां प्रायेण सन्धिकार्योपयोगिनीनाञ्च परिभाषाणामुल्लेखस्य प्रकारणे इष्टत्वात् न पूर्वोक्तदोषाणामवकाशः। प्रायेणेति निवेशात् तद्भिन्नानां निरूपणमपि नासङ्गतम्। अत्र अष्टाध्यायीपठितानां परिभाषाणामुल्लेखोऽभिमतः। अतस्तद्भिन्नपरिभाषाणामनिरूपणेऽपि न प्रतिज्ञाविरोधः। न चैवमपि अष्टाध्याय्यामपठितानामपि कासाञ्चित् परनित्यान्तरङ्गानामित्यादिपरिभाषाणामुपन्यासोऽत्र प्रकरणे कथमिति वाच्यम्; परत्वादनेन बाध्यते--एतस्योपपादनाय परनित्येत्यस्या निरूपणम्। तत्रान्तरङ्गपदप्रवेशेन अन्तरङ्गपरिभाषानिरूपणमपि प्रसङ्गायातमिति तस्याः परिभाषाया उल्लेखः—इत्यादिरूपेण कथञ्चिद् गतिश्चिन्तनीया। अप्रामाण्यज्ञानानास्कन्दितलक्ष्यधर्मिक साधुत्वप्रकारकबोधोपयोगि साधुत्वाप्रकारकबोधजनकत्वं परिभाषासामान्यलक्षणम् ॥

॥ इति परिभाषाप्रकरणम् ॥

विनाशोन्मुख निमित्त से जात कार्य का भी उच्चारण नहीं करते, अर्थात् निमित्त के न रहने पर नैमित्तिक भी नहीं रहता—यह कैयट का मत है। 'व्यूह' शब्द का अर्थ है अन्तरङ्ग; क्योंकि बहिरंग पश्चात्प्रवर्तमान शास्त्र निमित्तविनाश के द्वारा अन्तरङ्ग का अपोहन अर्थात् दूर करना है। 'न कृतः व्यूहः अन्तरङ्ग शास्त्रे यैः' इस व्युत्पत्ति से निमित्तविनाश की सम्भावना में पूर्व में भी कार्य नहीं होता—यह अर्थ 'अन्ये तु' इससे कहा गया है। यह परिभाषा निष्प्रयोजन और निष्प्रमाण है। इसका परिभाषेन्दुशेखर में पूर्ण रूप से विवेचन किया गया है ॥

॥ इति परिभाषाप्रकरणम् ॥

अथाच्सन्धिप्रकरणम्

४७. इको यणचि । ६।१।७७। इकः स्थाने यण् स्यादचि संहितायां विषये । 'सुधी उपास्यः' इति स्थिते, स्थानत आन्तर्यादीकारस्य यकारः ।

इको यणचि ॥ स्यात् इति । कार्यशब्दवादे इदम् । संहितायां विषये इति । इदं कार्यिनिमित्तयोः संहितायां विषयभूतायामित्यर्थः ।

स्थानत इति । इदं 'यथासंख्य'सूत्रे (१।३।१०) भाष्ये स्पष्टम् ।

इको यणचि ॥ कार्यशब्द इति । 'कार्या अत एव अनित्याः शब्दाः' इति वादे = पक्षे । इकारादेर्यकारादेर्विधानं युज्यते । 'शब्दा नित्याः' इति पक्षे तु कस्यचिन्नाशः, कस्यचिदपूर्वस्य सन्निवेशो न सम्भवति । तस्माद् 'अज्निरूपिताव्यवहितपूर्वत्वविशिष्टेन इका घटितस्य शब्दस्य बुद्धेः प्रसङ्गे यण्घटितबुद्धिः कर्तव्या' इत्याशयो बोध्यः । तथा च बुद्धेरेव विपर्यासो न शब्दस्येति न शब्दनित्यताहानिः ।

'संहितायाम्' इत्यत्र विषयसप्तमी । तथाच सप्तम्या विषयरूपार्थस्य प्रतिपादनात् संहितायामिति वक्तव्ये 'संहितायां विषये' इत्युक्तिः परममूले नोचिता । एवं दधि अत्र इत्यत्र पूर्ववर्णधकारेण दधिघटकाकारस्य अतिशयसान्निध्यात् 'संहितैकपदे नित्या नित्या धातूपसर्गयोः' इत्यभियुक्तोक्तिदिशा एकपदस्थसंहिताया नित्यत्वावगमेनात्र तस्याः सत्त्वात् यण्घटितप्रयोग एव स्यान्न यणाऽघटितो दधिअत्रेति, अत आह—कार्यिनिमित्तयो-रिति । न केवलं कार्यिणः स्थानिन एव संहिता यणादौ निमित्तमपि तु स्थानिनिमित्तयो-रुभयोः संहिता । तथाच एकपदस्थत्वाभावात् कदाचित् संहितायाः अविवक्षणे दधिअत्रेति यण्रहितमपि साधु । कार्यिनिमित्तयोरुभयोः संहिता, न तु कार्यिणोऽन्येन सहेति स्पष्टी-करणाय संहितायां विषयभूतायामित्युक्तम् । संहितायां विषयभूतायामित्यत्र अभेदान्वयः । उभयत्र सत्सप्तम्यन्तस्य प्रयोगः ।

स्थानत इति । स्थानेनेत्यर्थः । परममूलोक्तं प्रमाणयति—इदमिति । 'यथासंख्य-मनुदेशः समानाम् । किमुदाहरणम् ? दध्यत्र इति । नैतदस्ति, स्थानेऽन्तरतम इत्यने-नाप्येतत् सिद्धम्' इति भाष्येण 'स्थानेऽन्तरतमः' इत्यस्य प्रवृत्तिः सूचिता । समाधानमिदं व्यक्तिपक्षाभिप्रायेण । अस्मिन् पक्षे व्यक्तीनामानन्त्यात् संख्यासाम्यस्यानाकलनाद् यथा-संख्यसूत्राप्रवृत्तेः ।

स्यादिति । शब्दानित्यतावादियों के मत में यण् का विधान है । शब्द के नित्यता-पक्ष में आदेश आगम आदि वर्ण के विनाश विकार वृद्धि आदि संभव नहीं हैं । संहितायामिति । दधि अत्र यहाँ धकार इकार का भी अतिशय सान्निध्य होने से संहिता संज्ञा है, अतः स्पष्ट करते हैं कार्य स्थान और निमित्त संज्ञा विवक्षित है । संहिताविषयीभूत कार्यी = स्थानी और निमित्त दोनों को होना चाहिये । स्थानत इति । व्यक्तिपक्ष में इकार के अष्टादश भेद है और यकार के सात ही । दोनों की संख्या समान न होने से 'यथासंख्यमनुदेशः समानाम्' इस सूत्र द्वारा स्थानकृत आन्तर्य से क्रमशः इकारादि को यकारादि आदेश होता है । यथासंख्य सूत्र के भाष्य में अन्तरतमपरिभाषा से क्रमिक व्यवस्था का निरूपण किया गया है ।

जातिपक्षे यथासंख्येनापि निर्वाह इति 'स्थानेऽन्तरतमः' (१।१।५०) इति सूत्रे भाष्ये स्पष्टम्। अनुनासिकस्थानेऽपि निरनुनासिक एव; विधीयमानत्वेन सवर्णाग्राहकत्वात्। गुणाभेदकत्वपक्षोऽपि न विधेयाण्विषये। दीर्घादीनामिगादिपदैरुपस्थितये प्रत्याहारेषु जातिपक्ष एवेति 'अणुदित्' (१।१।६९) सूत्रे भाष्ये स्पष्टम्। अत एव सर्व-

---

जातिपक्षे यथासंख्यसूत्रेणापि निर्वाहः। तदुक्तं 'स्थानेऽन्तरतमः' इति सूत्रे भाष्ये–यथासंख्येनाप्येतत् सिद्धमिति। न च इक्पदेन षट्षष्टिर्गृह्यन्ते, यण्पदेन सप्तैवेति संख्यासाम्याभावात् यथासंख्यसूत्रस्य प्रवृत्तिरिह न स्यादत उक्तम्—**जातिपक्षे इति**। इकारोकारादिषु इक्पदवाच्येषु इत्वोत्वादिरूपाश्चतस्रो जातयः, यणपदवाच्येषु यकारादिष्वपि चतस्र एव जातयः—इति संख्यासाम्यात् सूत्रप्रवृत्तेः सौलभ्यात्।

ननु 'यथासंख्य'सूत्रेण स्थान्यादेशव्यवस्थायाम् अनुनासिकस्यापि इकारादेः निरनुनासिक एव यण् प्राप्नोति, 'स्थानेऽन्तरतमः' इत्यनेन व्यवस्थायान्तु सानुनासिकस्य सानुनासिको निरनुनासिकस्य निरनुनासिक इति विशेष इति चेत्? न यणो विधीयमानतया सवर्णाग्राहकत्वेन वर्णसमाम्नाये पठितानां निरनुनासिकानामेव सानुनासिकेऽपि स्थानिनि तेनाऽपि सूत्रेण विधानात् नास्ति कश्चिद् विशेष इत्याशयात् 'गुणा अभेदकाः' इति पक्षेणापि न अनुनासिकस्य न यकारादेः प्रसक्तिः; विधीयमाने तत्प्रवृत्तेरनङ्गीकारात्। व्यक्तिपक्षे 'उच्चारित एव शब्दोऽर्थप्रत्यायको नानुच्चारित' इत्यनुरोधात् अनुच्चारितेभ्य उकारादिवर्णेभ्यो दीर्घोकारादीनां ग्रहणाभाव 'इको यणचि' इत्यादौ प्राप्तः। अतो जातिपक्षाश्रयणेन दीर्घोकारादीनां ग्रहणं वक्तव्यम्।

अतएव च अणुदित्सूत्रस्य अण्विषये एव प्रवृत्त्या झलादिप्रत्याहारे एकस्यैव कस्यचिद् वर्णस्य अल्प्रत्याहारघटकस्य ग्रहणेन व्यक्तिपक्षे तद्भिन्नत्वेनान्यस्याग्रहणाद् अवात्तामित्यत्र अवात् स तामित्यवस्थायां 'झलो झलि' इत्यनेन सकारलोपो न प्राप्नुयात्; पूर्वतकारस्य झल्त्वे ताम्-शब्दघटकतकारस्य झल्त्वाभावात्। एवञ्च जातिपक्षाश्रयणमेव

जातिपक्ष में इत्व उत्वादि जाति के द्वारा तथा यकारत्व उकारत्वादि जाति से स्थानी और आदेश में संख्यासाम्य हो जाने से यथासंख्यसूत्र के द्वारा क्रमिक व्यवस्था हो जायगी—ऐसा 'स्थानेऽन्तरतमः' सूत्र के भाष्य में लिखा है।

विधीयमान अण् सवर्ण का ग्राहक नहीं होता। अतः यण् विधीयमान होने से सानुनासिक यकार-वकारादि का बोधक नहीं होगा। इसी कारण, सानुनासिक इकार को यण् निरनुनासिक ही होता है। प्रत्याहार में निरनुनासिक का ही पाठ किया गया है। इसी प्रकार 'अनुनासिकत्वादि गुण अभेदक अर्थात् भेदव्यवहार के जनक नहीं होते'—इस पक्ष में सानुनासिक को सानुनासिक आदेश की आपत्ति नहीं देनी चाहिये; क्योंकि विधीयमान के विषय में उक्त नियम व्यवस्थापक नहीं माना जाता। जातिपक्ष स्वीकार करने से इगादि प्रत्याहारों में ह्रस्व दीर्घ प्लुत सभी प्रकार के इकारादि का ग्रहण सुलभ हो जाता है। इत्वादि जाति ह्रस्व के समान दीर्घ और प्लुत में भी है। झलादि प्रत्याहारस्थल में जातिपक्ष के विना निर्वाह नहीं है। अणुदित्सूत्र से अण् में सवर्णग्रहण का बोध न करने से झलादि के सम्बन्ध में व्यक्तिपक्ष का आश्रयण करने पर किसी

तकारादीनां झल्त्वादिसिद्धिः। 'ल्वादयः' (८।२।४४) इत्यादिनिर्देशादयश्च जात्याश्रयणे मानमिति दिक्।

व्याकरणस्य साध्वनुशासनत्वन्तु शब्दनित्यतापक्षे शब्दानां सिद्धत्वेन शास्त्रवैयर्थ्यापत्त्या मृजिप्रसङ्गे मार्जिः साधुर्भवतीत्यादिवृद्धिसंज्ञासूत्रस्थभाष्यप्रामाण्येन यदिह परिनिष्ठितत्वेन ज्ञाप्यं तत्साध्वित्यर्थापत्तिकल्प्यवाक्येन बोद्धव्यम्।

तत्रोपायः। अस्मिन् पक्षे तत्तज्जात्याश्रयस्य ग्रहणेन द्वयोस्तकारयोः तत्त्वजातिसाम्याद् झल्पदेन ग्रहणात् सिद्धो लोपः। एवमिहापि जातिपक्षे स्वीकृते इत्वोत्वादिजातीनां दीर्घादिष्वपि सत्त्वात्तेषां ग्रहणमुपपादनीयम्।

'ल्वादिभ्यश्च' इत्यत्र दीर्घोकारस्य यणा निर्देशोऽपि जातिपक्षाश्रयणे प्रमाणम्। अन्यथा दीर्घोकारस्य यणोऽभावात् तथा निर्देशस्यासङ्गतिः स्यात्। तादृशनिर्देशस्य तद्वाच्यवाच्ये प्रत्याहारस्य लक्षणेति कल्पनापेक्षया झलादिप्रत्याहारे अवश्यमाश्रयितव्ये जातिपक्षे इहापि तस्याश्रयणमेव युक्तम्। **शब्दरत्ने स्फुटम्।**

ननु सूत्राणां तत्तत्कार्यविधानाय चारितार्थ्येन व्याकरणस्य साध्वनुशासनत्वं कथम्? अत आह— **व्याकरणस्येति**। व्याक्रियन्ते शब्दा अनेनेति व्युत्पत्त्या करणल्युडन्तो व्याकरणशब्दः। अनेन सूत्रादिकं गृह्यते। शब्दानां नित्यत्वपक्षे साधवोऽसाधवश्च प्रयोगाः सिद्धा एवेति सूत्रैः किं क्रियते! तद्वैयर्थ्यापत्त्या 'मृजिप्रसङ्गे मार्जिः साधुः' इति भाष्योक्तदिशा सर्वेषां सूत्राणां साधुत्वप्रतिपादकत्वं सिध्यति। परमेवं सर्वेषां साधुत्वज्ञापकत्वे केनचिद् 'मार्जः' इत्यस्य साधुत्वं बोधितम्, केनचित् 'मार्ष्टि' इत्यस्य साधुत्वं प्रतिपादितमिति विरोधात् साधुत्वनिर्णयो न स्यात्। एतदनुपपत्तिपरिहाराय प्रवृत्तियोग्यसकलशास्त्रविषये परिनिष्ठितत्वेन = अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वरूपेण यज्ज्ञाप्यं तत्साधु—इत्यर्थापत्तिप्रमाणकल्पितवाक्येन साधुत्वं निर्णेयम्। परिनिष्ठितत्वसम्पत्तिश्च चरमप्रवृत्तिमता शास्त्रेण भवतीति बोध्यम्।

एक ही तकारादि व्यक्ति का झल् प्रत्याहार से ग्रहण प्राप्त होने पर 'अवात्ताम्' इस प्रयोग में अवास् स ताम् इस अवस्था में 'सस्यार्धधातुके' इस से सकार को तकारादेश होने पर 'झलो झलि' इस सूत्र से सिच्सम्बन्धी सकार का लोप नहीं होगा; क्योंकि अवात् घटक तकार ताम्घटक तकार—इन दोनों में किसी एक तकार का ही झल् से ग्रहण होने के कारण लोप की प्राप्ति नहीं हो सकती। अतः जातिपक्ष का आश्रयण ही एकमात्र सहारा है। इस पक्ष में तकारत्वावच्छिन्न सकल तकारव्यक्ति का ग्रहण हो जाता है।

'ल्वादिभ्यश्च' इस में दीर्घ उकार को यण् का विधान जातिपक्षाश्रयण में ही प्रमाण है। दिगर्थ शब्दरत्न में देखिये।

शब्दों के नित्यतापक्ष में शुद्ध अशुद्ध सभी प्रकार के प्रयोग सदा से निष्पन्न होने के कारण सूत्रों द्वारा किसी कार्य का अपूर्व विधान असम्भव है। अतः सूत्रों का तात्पर्य कार्य के विधान में अनुपपन्न होने से 'मृजि के प्रसङ्ग में मार्जि साधु है'—इस प्रकार वृद्धिरादैच् सूत्र के भाष्यवचन से साधुत्वबोधन में तात्पर्य मान कर वाक्य की कल्पना की जाती है। परिनिष्ठितत्वेन

कार्यशब्दवादे तु पूर्वभाष्योन्नीताऽनादितात्पर्यवशात् तत्कल्पनं बोद्धव्यम् ।

एतेन 'स्थानप्रमाणोभयान्तरतमे ह्रस्वेकारे चरितार्थो यण् दीर्घे कथं स्यात् ?' इत्यपास्तम् ।

'कार्याः शब्दाः' इति पक्षे तु तत्तत्कार्यविधानाय सूत्राणां चारितार्थ्येन साधुत्वपर्यन्तं सूत्रादीनां व्यापारो न सम्भवत्यतो भगवतो भाष्यकारस्य 'मृजिप्रसङ्गे मार्जिः साधुः' इत्युक्तिबलाद् सूत्रेषु उन्नीतस्यानुमितस्य तात्पर्यस्य कल्पनया साध्वनुशासनत्वमुपपादनीयम् ।

अथवा—साधुत्वं द्विविधम् । एकं शास्त्रान्तरप्रवृत्तौ उपयोगि । द्वितीयञ्च प्रयोगार्हत्वरूपम् । प्रथमं साधुत्वं पूर्वप्रवृत्तिमता शास्त्रेण, चरमन्तु चरमप्रवृत्तिमता शास्त्रेण बोध्यते इति न परस्परं विरोधः । पूर्वेण सूत्रेण उत्तरस्य प्रवृत्तये साधुत्वं बोधितम्, चरमेण तु साधुत्वबोधने न कस्यापि सूत्रस्य प्रवृत्तिरिष्यते, तस्य प्रयोग एव भवति ।

एतेन इति । जातिपक्षाश्रयणेन अन्तरतमपरिभाषां बाधित्वा यथासंख्यसूत्रं प्रवर्तते । परममूले स्थानत आन्तरतम्यादित्युक्त्या स्थानप्रमाणोभयान्तरतमे ह्रस्वेकारादौ चरितार्थो यण्विधिः केवलस्थानसाम्ये दीर्घेकारादौ न प्रवर्तेत । अर्धमात्राकाले जातस्य व्यञ्जनात्मकस्य यकारस्य द्वैमात्रिकेण दीर्घेकारादिना प्रमाणतः साम्याभावात् इति केनचिद् यदुक्तं तत्परास्तम् । जातिपक्षे तज्जात्यवच्छिन्नस्य सर्वस्य स्थाने आदेशः स्यात् ।

व्यक्तिपक्षे व्यक्तीनामानन्त्यात् साम्याभावात् यथासंख्यसूत्राप्रवृत्तौ 'स्थानेऽन्तरतमः' इति परिभाषया सप्तम्यन्तपाठपक्षे अन्तरतमे स्थानिनि आदेशस्य बोधनेन अनन्तरतमस्य स्थानिनो व्यावृत्तौ अन्तरमे स्थानिनि ह्रस्वेकारादावेव यण्स्यात्, न दीर्घेकारादौ इत्याह—**स्थानत इति** । स्थानत आन्तर्यस्य सर्वविधान्तर्यापेक्षया बलवत्त्वेन स्थानकृतमेव आन्तरतम्यम् अत्र आदेशनियामकम्, नतु प्रमाणकृतमिति दीर्घेकारादीनामपि यण् सिध्यति । किञ्च पूर्वोक्तो दोषः सप्तम्यन्तपाठपक्षे, न प्रथमान्तपाठे । अस्मिन् प्रथमान्तपाठे अन्तरतमः आदेशः । तेन अनन्तरतमा आदेशा व्यावर्त्यन्ते, न तु स्थानिनः । स्थानिनस्तु अन्तरतमाः अनन्तरतमा सर्वे गृह्यन्ते । तेषु अन्तरतमा आदेशाः स्युः । ये त्वनन्तरतमास्ते न भविष्यन्ति । अतएव भाष्यकृता पूर्वोक्तदोषेणैव सप्तम्यन्तपाठं दूषयित्वा प्रथमान्तपाठः समर्थितः । तथाच दीर्घेकारादीनामपि यणादेशः सिध्यतीति भावः ।

अर्थात् अन्त में प्रवृत्तशास्त्र के द्वारा ज्ञाप्यम् = बोधित जो बोधन का स्वरूप वह साधु है—ऐसा प्रत्येक सूत्र का आशय है । व्याकरण से यहाँ सूत्र लिया गया है । 'इह' इस शब्द से शास्त्रप्रवृत्ति के योग्य लक्ष्य का ग्रहण है ।

अनित्यपक्ष में कार्य का विधान करने के लिये सूत्रों के चरितार्थ होने के कारण अनुपपत्ति नहीं है । इसलिये 'मृजिप्रसङ्गे मार्जिः साधुः' इस पूर्वोक्त भाष्यप्रामाण्य से उन्नीत = अनुमित तात्पर्यवश साधुत्वपर्यन्त कल्पना करनी चाहिये ।

एतेन = जातिपक्ष का आश्रयण करने से, स्थान और प्रमाण इन दोनों से सदृशतम ह्रस्व इकार आदि में यण् का विधान चरितार्थ हो जाने के कारण दीर्घ ईकार ऊकारादि में जहाँ प्रमाण-आन्तरतम्य नहीं है वहाँ यणादेश नहीं होगा—ऐसा कहने वाले परास्त हो गये; क्योंकि जातिपक्ष में परत्वात् यथासंख्यसूत्र से 'स्थानेन्तरतमः' सूत्र का बाध होने से प्रवृत्ति ही नहीं होती ।

'सुध्य् + उपास्यः' इति जाते—

४८. अनचि च । ८ । ४ । ४७ ।

स्थानत आन्तर्यस्य सर्वतो बलवत्त्वात्, 'स्थानेऽन्तरतमे' इति सप्तम्यन्तपाठस्य चैतद्दूषणेनैव भाष्ये दूषितत्वादिति भावः ॥

अनचि च ॥ चो विध्यर्थः । ध्वनितञ्चेदम् 'एओङ्' (मा०सू० ३) इति सूत्रे भाष्ये,

---

ननु यत्र एकस्मिन् स्थाने अनेककार्यस्य प्रसङ्गस्तत्रैव 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इति परिभाषया स्थानकृतान्तर्यस्य बलवत्त्वं बोध्यते, नान्यत्र। यथा 'चेता' इत्यत्र प्रमाणकृतान्तर्येण ह्रस्वेकारस्य स्थाने ह्रस्वोऽकारः प्राप्तो गुणेन, स्थानकृतान्तर्येण इकारस्य तालुस्थानिकस्य तालुस्थानिक एकारः प्राप्नोति, न त्वकारः; तस्य तालुस्थानजन्यत्वाभावात्। अतस्तत्र स्थानत आन्तर्यस्य बलवत्त्वबोधनेन एकारो नाकारः। इह तु न तथा एकस्य स्थाने भिन्नभिन्नकार्यप्रसङ्गः। तत आह—**स्थानेऽन्तरतम इति**। अत्र प्रथमान्तपाठः। तथाच अनन्तरतमानाम् = असदृशतमानां स्थानिनां न व्यावृत्तिरिति **चिदस्थिमालाकृतः**। स्थानतः आन्तर्यस्येत्यत्र स्थानशब्दोऽर्शआद्यजन्तस्तेन स्थानीत्यर्थः। एवञ्च स्थानिप्रतियोगिकस्य आदेशानुयोगिकस्य सादृश्यस्य आन्तर्यरूपस्य बलवत्त्वेन न दोषः। न चायमर्थः किं सप्तम्यन्तपाठे न सम्भवति ? इत्यत आह—**सप्तम्यन्तेति**। अस्य भाष्ये दूषितत्वात् ॥

अनचि च ॥ चकारेण अस्य सूत्रस्य विधित्वं सूच्यते। अविशेषेण सर्वत्र द्वित्वं प्राप्तमनेन अचि परस्मिन् सति निषिध्यते, तत् तस्मात् निषेधसूत्रमिदम्। एतन्मतं खण्डयितुमुक्तम्—**चो विध्यर्थ इति**। 'अचो रहाभ्यां द्वे' इति सूत्राद् अक्पदमनुवर्त्य

व्यक्तिपक्ष में समाधान देते हैं—**स्थानत आन्तर्यस्य इति**। स्थानतः आन्तर्य अन्यापेक्षया बलवान् है।

'चेता' इत्यादि स्थलों में एक स्थानी में स्थानकृत आन्तरतम्य से एकार, प्रमाणकृत आन्तरतम्य से अकार प्राप्त होता है, अतः भिन्न भिन्न कार्य होने से स्थानकृत आन्तर्य को बलवान् माना गया। यहाँ तो एक ही यण् कार्य प्राप्त है, अतः बलवत्त्वबोधन नही होगा, अतः **स्थानेन्तरतमः इति**। 'स्थानेन्तरतमः' यहाँ सप्तम्यन्त पाठ नहीं, किन्तु प्रथमान्त पाठ है। इस प्रकार स्थानी में अन्तरतम आदेश होता है। इससे अनन्तरतम आदेश व्यावृत्त हो जाता है। पर, इससे जो भी स्थानी प्राप्त है उसमें अन्तरतम की व्यावृत्ति नहीं होती। अतः स्थानी अन्तरतम अनन्तरतम दोनों प्रकार के होंगे। आदेश सदृशतम ही होगा। अतः दीर्घ को आदेशों में सबसे अधिक मात्राद्वयन्यूनकालिकत्व रूप सादृश्य ईकार का आदेश के मध्य में यकार के ही साथ है, अतः उसी को होता है। इसी दोष के कारण भाष्यकार ने सप्तम्यन्त पाठ को नहीं माना ॥

अनचि च इति। चकार विधि की सूचना के लिये है। अतः 'अचो हाभ्याम्' इससे अचः इसकी 'यरोऽनुनासिके' इस सूत्र से 'यरः' इसको अनुवृत्ति कर 'अचः यरो द्वे वा स्तः'—इस वाक्य

अचः परस्य यरो द्वे वा स्तो न त्वचि । इति धकारस्य द्वित्वम् ।

तदाह—द्वे वा स्त इति। सूत्रकृता शाकल्यमते सर्वत्र द्वित्वाभावोक्तेरिति भावः। **अवसाने द्वित्वसिद्धयेऽनचीति प्रसज्यप्रतिषेधः; तदाह—न** त्वचि इति ॥

इदं द्वित्वं षाष्ठद्वित्ववद् द्विःप्रयोग एव। 'यरः' इत्यादेरध्याहृतोच्चारणक्रिया-निरूपितकर्मषष्ठीत्वस्यौचित्यात् । इति धकारस्य इति । **न तु द्वित्वे पूर्वस्थाने**

अचः परस्य यरो द्वित्वं विधाय अचि परे प्रतिषेधस्य इष्टत्वात्। तथा च सर्वत्र द्वित्वं न प्राप्तम्, किन्तु द्वित्वमचः परस्यैव परोऽनेनेति विधित्वं स्पष्टम्। 'एओङ्' सूत्रे भाष्ये स्फुटमेतत्। तथाहि–अयोगवाहानामविशेषेण पाठे तत्प्रयोजनप्रदर्शनप्रसङ्गे "उरः केण', 'उरः पेण' इत्यादौ 'अनचि च' अचः परस्य परो द्वे भवतः इति द्वित्वं सिद्धं भवति" इत्युक्तम्।

'अचि' इत्यत्र पर्युदासे स्वीक्रियमाणे अज्भिन्ने अच्सदृशे परे द्वित्वस्य विधानेन वाक् वाग् इत्यत्र अवसाने द्वित्वं न प्राप्नोति; ककारोत्तरं गकारोत्तरञ्च वर्णानामनुपलब्धेः अच्सदृशपरत्वाभावात्। अतः प्रसज्यप्रतिषेधेन व्याख्यातम्—**अचि नेति**। एवञ्च हलि सति असति वा द्वित्वं केवलम् अचि परे नेत्यनेनोक्तं भवति। पर्युदासस्य इष्टत्वे 'हलि' इत्येव सूत्रे लाघवात् पठेत्।

इदमिति। आष्टमिकं वर्णद्वित्वमित्यर्थः। षष्ठाध्यायस्थसूत्रेण विहितं द्वित्वमिव द्विःप्रयोगो द्विरुच्चारणं विवक्षितम्। 'यरः' इत्यत्र उपपदविभक्तयपेक्षया कारकविभक्ते-

---

से द्वित्व का विधान है। 'अचि परे न' इस वाक्य के द्वारा द्वित्व का निषेध है। वर्णसमाम्नाय में अयोगवाह का अविशेषण पाठ करना चाहिये। इस प्रसङ्ग में 'उरः कः उरः पः, अनचि च, अचः परस्य यरो द्वे भवतः इति द्विर्वचनं सिद्धं भवतीति'—इस प्रकार की भाष्योक्ति से द्वित्व में विधि ध्वनित होती है।

द्वे वा स्तः। 'सर्वत्र शाकल्यस्य' इसके द्वारा शाकल्याचार्य के मत में सर्वत्र द्वित्वाभाव की प्रतीति होने से 'अनचि च' इससे प्राप्त द्वित्व की विकल्प से प्रवृत्ति सिद्ध हो जाती है। अत एव द्वित्व का विकल्प से विधान है। 'अनचि च' इसमें पर्युदास नहीं है, किन्तु प्रसज्यप्रतिषेध है। अतः वाक् वाक् इस भाष्योदाहरण में ककार को द्वित्व होता है। पर्युदासपक्ष में अज्भिन्न अच् के सदृश रहने पर द्वित्व हो–ऐसा अर्थ होगा। इस प्रकार भाष्योदाहरण में द्वित्व नहीं होगा; क्योंकि वर्णत्व रूप से सादृश्य लेने पर वहाँ आगे कोई भी वर्ण नहीं है। दूसरा कारण यह भी है कि लाघव से 'अनचि' इसके स्थान पर 'हलि' ऐसा सूत्र में पाठ करने से उक्तार्थ का लाभ हो सकता था। **इदम्** = आष्टमिक वर्ण द्वित्व किसी के स्थान में न होकर उसी अक्षर का दो बार उच्चारणमात्र किया जाता है। कारक विभक्ति उपपद विभक्ति की अपेक्षा बलवती है, अतः 'यरः' इत्यादि में षष्ठी को उच्चारणक्रियानिरूपित कर्मत्व की बोधिका मानना उचित है। उच्चारणक्रिया अध्याहार लभ्य है।

इति धस्य इति। द्वित्व के बाद पुनर्द्वित्व जश्त्वानन्तर निष्पन्न धकारस्थानिक दकार को 'अनचि च' इससे नहीं होता। 'लक्ष्ये लक्षणं सकृदेव प्रवर्तते' इस न्याय से एक सूत्र की प्रवृत्ति

४६. स्थानिवदादेशोऽनल्विधौ । १ । १ । ५६ । आदेशः स्थानिवत् स्यात्, न तु स्थान्यलाश्रयविधौ । अनेनेह थकारस्य स्थानिवद्भावेनाच्त्व-

---

जश्त्वनिष्पन्नदस्यापि 'लक्ष्ये लक्षणम्' इति न्यायात्। विकारान्यत्वेन न लक्ष्यभेद इत्यन्यत्र प्रपञ्चितम् ॥

स्थानिवदिति ॥ स्थान्यादेशयोर्भेदात् 'स्वं रूपम्' (१।१।६८) इत्युक्तेश्च 'तत्स्थानापन्नस्तद्धर्मं लभते; यथा गुरोः स्थाने शिष्यो याज्यकुलानि गत्वाऽग्रासनादीनि लभते' इति लोकन्यायेन स्थानिकार्यमादेशे न स्यादतः स्थानिवत्सूत्रम् ।

न्यिय्यतया 'कर्तृकर्मणोः' इति कर्मणि षष्ठी समुचिता। तथा च द्विरुच्चारणमात्रं न तु स्थाने द्विर्वचनमिति भावः।

ननु पूर्वधकारस्य जश्त्वे कृते दकारस्य कुतो न द्वित्वम् ? अत आह—लक्ष्ये इति। 'लक्ष्ये लक्षणं सकृदेव प्रवर्तते नतु वारद्वयम्' इति हि न्यायस्य रूपम्। नच पूर्वं धकारस्य इदानीं दकास्य द्वित्वं प्राप्नोतीति लक्ष्यभेदात् न्यायाप्रवृत्तिरिति वाच्यम्; विकारकृतो भेदो न लक्ष्यभेदप्रयोजक इति स्वीकारेण न्यायप्रवृत्तेः सुलभत्वात् । स एव धकारो जश्त्व-रूपविकारेण अन्यादृशः प्रतीयते। अत एव उदवोढामित्यत्र उदवह स् तामित्यवस्थायां 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धौ 'सहिवहोरोदवर्णस्य' इत्यनेन ओकारे पुनर्वृद्धिः कुतो न ? इत्याशङ्क्य लक्ष्ये लक्षणन्यायेन वृद्धिर्वारिता भाष्ये। त्वन्मते तु पूर्वमकारस्य वृद्धिः, पश्चाद् ओकारस्य प्राप्नोति लक्ष्यभेदात् कथं न्यायस्य प्रवृत्तिः स्यात्! तस्मात् 'विकारकृतो भेदो न्याये नाश्रीयते' इत्येव युक्तः पन्थाः ॥

स्थानिवदादेशोऽनल्विधौ । स्थानिनः सत्त्वे विधीयमानं कार्यं स्थान्यादेशयोः स्वरूपेण भेदाद् आदेशे सति न प्राप्नोतीत्याशयवान् आह—स्थान्यादेशयोरिति। न च 'तत्स्थानापन्नस्तद्धर्मं लभते' इति लोकन्यायेन यो यस्य स्थाने नियुज्यते स तस्य कार्यं करोति, यथा गुरोः स्थाने नियुक्तः शिष्यः तस्य कार्यं करोति, स्वरूपेण गुरु-शिष्ययोः परस्परं भेदेऽपि अग्रासनादिकं लभते; तथाऽत्रापि स्थानिनि नियुज्यमान आदेशः स्वरूप-भेदस्य सत्त्वेऽपि स्थानिकार्यं सम्पादयिष्यति, किमनेन सूत्रेण? इत्यत आह—स्वं रूपमिति।

एक ही वार होती है। यदि कहें कि पहले द्वित्व धकार को, अब दकार को करना है, ऐसा भी नहीं कह सकते; क्योंकि जश्त्वरूप विकार से भेद होने पर भी वस्तुतः वही धकारव्यक्ति है, अतः लक्ष्यभेद नहीं है। विशेष अन्यत्र देखिये ॥

स्थान्यादेशयोरिति । लौकिक स्थान्यादेशभाव की अपेक्षा शास्त्रीय स्थान्यादेशभाव विलक्षण है। लोक में गुरु के स्थान में याजनार्थ नियुक्त शिष्य अग्रासन आदि को तो प्राप्त करता है, किन्तु उनके चरणस्पर्श एवं उच्छिष्ट भोजन का अधिकार नहीं प्राप्त करता है, अतः गुरुस्थानापन्न शिष्य सबका अधिकारी नहीं है। किन्तु शास्त्रीय आदेश स्थानी के अर्थबोध के लिये शास्त्र द्वारा नियुक्त होकर अर्थबोध के साथ स्थानी के अन्य कार्य का भी सम्पादन करता है। अतः शास्त्रीय स्थान्यादेश का भेद स्पष्ट है। 'स्वं रूपम्' इस सूत्र से अपनी आनुपूर्वी का ग्रहण होने से स्थानी द्वारा प्रयुक्त कार्य की आदेश में प्राप्ति न रहने के कारण भी तत्स्थानापन्न उसके धर्म का लाभ

न तु स्थान्यलेति। प्रत्यासत्तिन्यायलब्धमिदम्। आदेशस्य स्थानिभूतो योऽल्, तत्स्थानिसम्बन्धी च सोऽल्, तद्वृत्तिधर्माश्रये नेत्यर्थः।

'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति सूत्रेण व्याकरणशास्त्रीयसंज्ञातो भिन्नशब्दानां स्वस्वरूपस्य = आनुपूर्वीरूपस्य बोधकत्वं ननु तद्भिन्नस्वरूपस्येति बोधितम्। तथाच 'स्वं रूपं' शास्त्रारम्भबलात् लोकन्यायाप्रवृत्तेः स्थानिकार्यम् आदेशे न प्राप्नोतीति स्थानिवत्सूत्रारम्भः सार्थकः।

केचित्तु लोकस्थान्यादेशभावापेक्षया शास्त्रीयस्थान्यादेशयोर्भेदाद् इत्यर्थाभ्युपगमेनापि लोकन्यायेन असिद्धौ हेतुतायाः प्रदर्शनं सम्भवतीति मन्यन्ते। लोके गुरुस्थानापन्नः शिष्यो यदर्थं नियुक्तस्तन्मात्रकार्यं करोति, न तु उच्छिष्टभोजनं पादोपसंग्रहणं शिष्यस्य भवति। शास्त्रे तु अर्थप्रत्यायनार्थमुपदिशन् आदेशोऽर्थं प्रत्याय्य न तूष्णीभावमालम्बते, किन्तु अर्थप्रत्यायनानन्तरं स्थानिकार्यस्यापि सम्पादनमिष्टम्। अतो लौकिकस्थान्यादेशापेक्षया शास्त्रे तयोर्वैलक्षण्यमिति वदन्ति।

प्रत्यासत्तीति। सामीप्यात् स्थानीति लब्धम्। तथाच स्थान्यवयवाल्वृत्तिधर्मनिमित्तके विधौ न स्थानिवदित्यर्थः। ननु स्थान्यपेक्षया आदेशस्य सूत्रे सान्निध्यात् प्रत्यासत्त्या आदेशस्य अला सह सम्बन्धो वक्तव्यः? इति न शङ्कनीयम्; 'श्रौतक्रमादार्थक्रमो बलीयान्' इति हि मीमांसानिर्णीतो न्यायः। यथा 'अग्निहोत्रं जुहोति यवागूं पचति' इति श्रूयते। पाठक्रमेण पूर्वम् अग्निहोत्रम् पश्चात् यवागूपाकः प्राप्नोति। आर्थक्रमे तु यवागूपाकस्य होत्रे अपेक्षिततया उपयोक्ष्यमाणद्रव्योत्पत्तये पूर्वं पाकः, पश्चाद् अग्निहोत्रहोमः। अत्र किं पूर्वं कर्तव्यमिति संशये आर्थक्रमस्य बलवत्त्वं बोधितम्। अतः पूर्वं यवागूपाकः पश्चात् अग्निहोत्रहोमः। अतएव च यवागूपाकस्य सार्थक्यमपि जातम्। तथैवेहापि आदेशः स्थानिवदित्यर्थं स्थानिपदस्य सान्निध्यात् तस्यैव ग्रहणमिति भावः। स्थानिरूपो योऽल् तद्वृत्तिर्यो धर्मः तं धर्ममाश्रित्य जायमाने विधौ स्थानिवद्भावो न भवतीति

करता है—इस लोक-न्याय से सिद्ध नहीं हो सकता। तदर्थ स्थानिवत्सूत्र का आरम्भ है। चकार हेतुद्वय का समुच्चायक है, हेतु अर्थ में नहीं है।

न तु इति। श्रौत क्रम की अपेक्षा आर्थ क्रम बलवान् माना गया है। अतः 'आदेशस्य स्थानिभूतो योऽल्' इस अर्थ में अल् के सन्निहित स्थानी के होने से स्थानी अल् का ग्रहण है। स्थानिरूप या स्थानिसम्बन्धी अल्–दोनों अर्थ विवक्षित है। तद्वृत्तिधर्माश्रय विधि में स्थानिवद्भाव नहीं होता। परिष्कार की भाषा में—अल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोवप्रकारीभूत धर्मेण साक्षादवच्छिन्नोद्देश्यताकविधौ न स्थानिवत्। अल्त्वव्याप्य धर्म रेफत्व क्योंकि 'खरवसानयोः' इसका 'रो रेफस्य विसर्गः' ऐसा अर्थ है, तदवच्छिन्ना रेफ की स्थानिता, तन्निरूपिता आदेशता का आश्रय विसर्ग, तद्धर्मिक आरोप विसर्गः, रुत्ववान् तादृशारोप में प्रकारीभूत धर्मत्व इससे साक्षादवच्छिन्नोद्देश्यताक यादेशविधि में स्थानिवद्भाव नहीं होता। 'रामाय' यहाँ 'ङे' का यादेश स्थानितया उपादान होने से ङेत्वस्थानिता का अवच्छेदक धर्म है। अतः ङेत्वावच्छिन्ना स्थानिता अल्त्वव्याप्यधर्मावच्छिन्ना न होने से निषेध की प्राप्ति नहीं हुई।

अत एव रेफस्थानिकविसर्गस्य रुशब्दत्वं न स्थानिवत्त्वेनेति 'भोभगो' (८।३।१७) इत्यत्र भाष्ये स्पष्टम्। ऋधातोर्द्वित्वेऽभ्यासस्य 'उरत्' (७।४।६६) अत्त्वेऽरित्यस्य हलादिः शेषस्तु अरित्यस्य, पुनः 'पूर्वोऽभ्यासः' (६।१।४) इत्यनेनाभ्यासत्वात्, तस्यापि द्विरुक्तधातुपूर्वभागत्वात्। प्रक्रियाज्ञानवतां तथा ज्ञानस्य सुलभत्वात्।

अनल्विधावित्यस्यार्थः। प्राचीनमते 'स्थान्यवयवो योऽल् तद्वृत्तिधर्माश्रयविधौ न स्थानिवत्'—इत्यक्षरार्थः। परिष्कृतोऽर्थः टिप्पण्यां विस्तृतः, संक्षेपेणेह प्रदर्श्यते—

ननु 'अनल्विधौ' इत्यस्य पूर्वोक्तार्थस्वीकारे 'रामाय' इत्यत्रापि स्थानिवद्भावस्य निषेधः प्राप्नुयात्। तथा हि स्थानिभूतो योऽल एकारः तदवृत्तिधर्मः सुप्त्वम्, तदाश्रयो विधिः 'ङेर्यः' इत्यनेन जायमानो यादेशविधिः, तस्मिन् कर्तव्ये स्थानिवद्भावस्य प्रतिषेधः स्यात्। तथा च सुप्त्वाभावात् 'सुपि च' इति दीर्घो न स्यात्। न च स्थानिता अल्त्वव्याप्येन धर्मेण अवच्छिन्ना ग्राह्या। अल्त्वव्याप्यं नाम अल्मात्रवृत्तित्वम्। यो हि स्थानित्वेन सूत्रे उपात्तस्तद्वृत्तिधर्म एव स्थानितायाः अवच्छेदकः। प्रकृते यकारादेशस्थानिता 'ङेर्यः' इत्यत्र निर्दिष्टे ङे इति पदे, सा च ङेत्वेन अवच्छिन्ना, तस्यैव सूत्रोपात्तवृत्तिधर्मत्वात्। ङेत्वञ्च नाल्मात्रवृत्तिधर्मः; स्तस्य 'ङ् ए' इति समुदायवृत्तित्वेन अल्मात्रवृत्तित्वाभावात्। एवञ्च अल्त्वव्याप्यधर्मावच्छिन्नस्थानिताया अभावात् अल्त्वव्याप्यधर्मावच्छिन्नस्थानितासमानाधिकरणधर्मनिमित्तके विधौ स्थानिवन्नेत्यर्थाभ्युपगमेनादोषादिति वाच्यम्। वाक्यसंस्कारपक्षे 'राम ए' इत्यवस्थायाम् 'एचोऽयवायावः' इत्यनेन अयादेशोऽपि प्राप्तः। एत्वावच्छिन्ना स्थानिता अयादेशनिष्ठ विधेयतानिरूपिता एकारनिष्ठा; 'एचोऽयवायावः' इत्यत्र एकारौकारादीनामेव स्थानित्वेन तदवच्छेदकत्वेन च एत्वादीनामेवाभ्युपगमात्। एच्-पदस्य प्रत्याहाररूपत्वेन एत्वादिरूपेणैव एकारादीनां वाचकत्वात्। तथा च अल्त्वव्याप्यधर्मावच्छिन्ना एत्वावच्छिन्ना एकारनिष्ठा या स्थानिता तत्समानाधिकरणो धर्मः सुप्त्वं तस्यापि एकारे सत्त्वात् तन्निमित्तके दीर्घविधौ स्थानिवद्भावस्य प्रतिषेधेन दोषस्य तादवस्थ्यात् इति चेत् ?

न; अल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतधर्मेण साक्षादवच्छिन्ना या उद्देश्यता तदुद्देश्यताके विधौ स्थानिवन्नेत्यर्थः। तथा च एकारौकारविधावलि वर्तमानस्य एच्त्वस्य अल्मात्रवृत्तित्वेन तद्धर्मावच्छिन्नस्थानिता एकारादिनिष्ठा तन्निरूपिता या आदेशता तदाश्रयत्वम् अयादावेव; न तु 'ङेर्यः' इत्यनेन

शङ्का—इस अर्थ के स्वीकार करने पर ऋधातु को लिट् लकार में द्वित्व के अनन्तर अभ्यास को 'उरत्' इससे अर् आदेश होने पर अभ्यासत्व स्थानिवद्भाव से दुर्लभ है। ऋकारमात्र का स्थानित्वेन 'उरत्' इस सूत्र में निर्देश होने से स्थानिता अल्त्वव्याप्यधर्मावच्छिन्ना है, अतः 'अनल्विधौ' इसके द्वारा प्रतिषेध हो जायगा ?

समाधान—'पूर्वोऽभ्यासः' इस सूत्र से धातु का पूर्व भाग होने से अर् को पुनः अभ्यास संज्ञा होने पर हलादि का शेष हो जायगा। प्रक्रिया के जानकारों को द्विरुक्त धातु से पूर्वभागत्व का अर् में ज्ञान सुलभ है।

अत एव 'धिन्वन्ति' इत्यादाविण् न; उकारवृत्त्यार्धधातुकत्वस्य वकारेऽनतिदेशात् ।

यत्तु अत्रेण्निवृत्तये स्वविधावपि स्थानिवत्त्वमपरविधाविति न्यासेन साधितं भाष्ये, सा त्वेकदेश्युक्तिः । 'असिद्धवत्' (६।४।२२) सूत्रेण सिद्धस्याऽऽयन्नासन्नित्यादेस्तत्फलत्वेनोपन्यासात् । अस्यापि 'अचः पूर्वत्वविज्ञानात्' (का० वा०) इति वार्त्तिके पञ्चमीसमासेन सिद्धेः कैयटेनोक्तत्वाच्च ।

विधीयमाने यादेशे तस्य ङेत्वावच्छिन्नस्थानितानिरूपिता या आदेशता तदाश्रयत्वात् इति यादेशे कर्तव्ये स्थानिवद्भावस्य निषेधाभावात् नानुपपत्तिः । साक्षादवच्छिन्नस्य निवेशात् 'अग्रहीत्' इत्यादौ न दोषः । तत्र 'ग्रहोऽलिटि दीर्घः' इत्यनेन दीर्घे कृते, 'इट ईटि' इति सूत्रेण ह्रस्वस्य इकारस्याभावेन सकारलोपो न स्यात् । एतदर्थं स्थानिवद्भावेन इट्त्वधर्माश्रयणद्वारा इटः सत्त्वात् सलोपः सिध्यति । 'ग्रहोऽलिटि' इत्यत्र 'अचश्च' इति परिभाषाया उपस्थित्या अल्त्वव्याप्यो धर्मः अच्त्वम् तदवच्छिन्नस्थानितानिरूपितादेशताश्रयो दीर्घविधिः, तद्धर्मिकारोपः 'दीर्घः इट्त्ववान् भवतु' इत्याकारकः, तादृशारोपे प्रकारीभूतः = विशेषणीभूतो धर्मः इट्त्वम्, तदवच्छिन्नोद्देश्यताश्रयको विधिः इट्त्वावच्छिन्नोद्देश्यताकत्वेन सलोपविधिः, तत्र निषेधः प्राप्तः ! परम् 'इटः परस्य सस्य लोपः' इत्यर्थे लोपीयविधेयतानिरूपिता साक्षात् उद्देश्यता सकारे, न तु इटि; तस्य तु तस्मिन् विशेषणत्वात् । येन साक्षादवच्छिन्ना विशेष्यता स आरोपप्रकारीभूतधर्मो न, यश्च तथा स न साक्षादवच्छेदकः—इति सर्वं सुस्थम् ।

'अनल्विधौ' इसका 'अल्त्वव्याप्य धर्मावच्छिन्न' इत्यादि प्रथम अर्थ स्वीकार करने से ही 'धिन्वन्ति' इसमें इडागम नहीं हुआ । अन्यथा 'धिन्विकृण्व्योर च' इससे विधीयमान उकार को 'धिन्वन्ति' इसमें यणादेशोत्तर स्थानिवद्भाव से उकारवृत्ति आर्धधातुकत्व का वकार में अतिदेश होने से इडागम की प्राप्ति दुर्निवार हो जायगी । पूर्वोक्तार्थ के द्वारा अल्त्वव्याप्य धर्म इवत्व, तदवच्छिन्न स्थानिता उकार में, तन्निरूपितादेशताश्रय वकार, तद्धर्मिक आरोप 'वकार आर्धधातुकत्वात् भवतु', तादृश आरोपप्रकारीभूत धर्म आर्धधातुकत्व, उससे इडागम की साक्षात् अवच्छिन्ना उद्देश्यता होने से स्थानिवद्भाव का प्रतिषेध सिद्ध होता है ।

शङ्का—इसका यह फल नहीं हो सकता । 'अचः परस्मिन्' इस सूत्र से परनिमित्तक अच् के स्थान में आदेश जो यणादेश इसको स्व के इडागम रूप कार्य के विधान में स्थानिवद्भाव होगा । एवं च, स्थानी उकार के रहने पर वल्परत्वाभाव के कारण इट् नहीं प्राप्त है, यण् के अनल् होने पर भी इट् नहीं होगा; क्योंकि यह सूत्र भाव अभाव दोनों का अतिदेश करता है । 'पूर्वविधौ' इसके स्थान में 'अपरविधौ' इस प्रकार का पाठ वार्त्तिककार ने किया है, तदनुसार परविधि से भिन्न पूर्व और स्व-दोनों की विधि में स्थानिवद्भाव होता है । अतः स्वविधि में स्थानिवद्भाव होने से इडागम नहीं होगा ?

समाधान—यहाँ का समाधानभाष्य एकदेशी है; क्योंकि आयन् आसन् इसमें अल्लोप के अनन्तर अजादित्व के विरह से अप्राप्त आडागम के विधान के लिये स्वविधि में स्थानिवद्भाव की

'प्रदीव्य' इत्यादौ च वलादिलक्षण इण्न। स्थान्यलित्युक्तेः 'बभूविव' इत्यादौ वलादिलक्षणेट्सिद्धिः। न हि तत्र वलादित्वं स्थानितो लभ्यम्; किन्तु स्वाश्रयमेव।

यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशो मृग्यते, तस्य निमित्तस्य स्थान्यलसाधारणधर्मत्व एव निषेधप्रवृत्तेः। प्रकृते चाऽऽर्द्धधातुकत्ववैकल्यप्रयुक्ताऽप्राप्तिर्न तत्स्थान्यलसाधारणम्, यच्च तादृशवल्त्वघटितं बलादित्वं न तद्वैकल्यप्रयुक्ताऽप्राप्तिरिति बोद्धचम्। प्रत्यासत्त्या च शास्त्रीयकार्ये एव स्थानिवत्त्वम्, तेन नायकसिद्धिः।

तत्स्थानिसम्बन्धीति। स्थानिसम्बन्ध्यल्वृत्तिधर्मनिमित्तके विधौ न स्थानिवदित्यर्थः। एवमर्थाभ्युपगमे 'रामाय' इत्यत्र स्थानी एकारः, तत्सम्बन्धी तदवयवो व्यपदेशिवद्भावेन स एव अल्रूप एकारस्तदवृत्तिधर्मः सुप्त्वम्, तन्निमित्तके दीर्घविधौ निषेधः प्राप्नोति, तद्वारणाय अल्त्वव्याप्योऽल्वृत्तिधर्मो ग्राह्यः। तथा च स्थान्यवयवाल्वृत्तिर्योऽल्मात्रवृत्तिधर्मस्तन्निमित्तके कार्ये निषेधेन स्थान्यवयवाल्वृत्तिधर्मत्वेन अभिमतं सुप्त्वं तच्च नाल्त्वव्याप्यम्, तस्य भ्यामादौ समुदायेऽपि दर्शनात् इति अल्मात्रवृत्तिधर्मनिमित्तकत्वाभावेन निषेधाप्रवृत्तेः।

न चैवमपि 'प्रदीव्य' इत्यत्र क्त्वो ल्यपि कृते स्थानिवद्भावेन वल्त्वनिमित्तक इट् प्राप्नोति, स्थानिवद्भावनिषेधात् न भवति। पूर्वोक्तार्थस्वीकारे तु स्थानी क्त्वा, तदवयववृत्तिः अल्मात्रवृत्तिधर्मः वल्त्वम्, तन्निमित्तको नेड्विधिः, अपि तु वलादिनिमित्तकः। एवञ्च निषेधाप्रवृत्तौ स्थानिवद्भावेन बलादित्वसत्वादिडागमः प्रसज्येत इति वाच्यम्; एतद्दोषनिवृत्तये स्थान्यवयवाल्वृत्तिर्योऽल्त्वव्याप्यो धर्मोऽतिदिदीक्षितः, तद्घटितधर्मनिमित्तके विधौ न स्थानिवत्। तथा च अल्त्वव्याप्योऽतिदिदीक्षितधर्मो वल्त्वम्, तद्घटितं वलादित्वम्, तन्निमित्तके विधौ इडागमे स्थानिवद्भावः प्रतिषिध्यते। अत इडागमो न। 'बभूविव' इत्यादौ आर्धधातुकत्वमादाय इटः सिद्धये अतिदिदीक्षित-

---

कल्पना की गयी है। किन्तु वहाँ 'असिद्धवदत्राभात्' इसमें अल्लोप की असिद्धता होने से आडागम की सिद्धि के कारण स्वविधि में स्थानिवद्भाव की कल्पना ही व्यर्थ है। यदि स्वविधि में स्थानिवद्भाव इष्ट है तो यथान्यास में भी 'पूर्वस्मात्' विधिः इस प्रकार पञ्चमी समास के द्वारा स्थानिरूप अच् से पूर्व जो है उससे पर की विधि में स्थानिवद्भाव है। इस प्रकार 'धिन्वन्ति' इसमें भी स्थानिभूत अच् से पूर्वत्वेन इष्ट नकार से परवर्ती वकार का इडागम विधि में स्थानिवद्भाव हो जाने के कारण, एतदर्थ 'अपरविधौ' इस न्यास की आवश्यकता नहीं है। 'स्थानिसम्बन्धी यो अल्' इस द्वितीय अर्थ का फल 'प्रदीव्य' इसमें इट् का अभाव है। ल्यप् का स्थानी क्त्वा, इसका अवयव अल् तकार, तद्वृत्ति वल्त्व तद्घटित वलादिनिमित्तक इडागम के विधान में स्थानिवद्भाव का निषेध हो जाता है। अल् के स्थानिसम्बन्धी होने पर ही 'अनल्विधौ' इससे निषेध होता है। अतएव 'बभूविव' यहाँ आर्धधातुकत्वातिदेश के लिये आश्रीयमाण स्थानिवद्भाव का निषेध नहीं हुआ, क्योंकि वल् इडागम में निमित्त होने पर भी स्थानिसम्बन्धी नहीं है। आर्धधातुकत्व आदेश में न होने से स्थानिसम्बन्धी होने पर भी अल्मात्रवृत्ति नहीं है। वल्त्व स्वतः आदेश में होने से अतिदेशलभ्य नहीं है।

प्राधान्यात् कार्यातिदेशोऽयम् । शास्त्रातिदेशस्तु कार्यातिदेशादभिन्नरूपः; तस्यापि कार्यफलकत्वादिति 'तृज्वत्' (७।१।९५) सूत्रे कैयटः। भाष्येऽपि तत्राऽङ्गशास्त्रातिदेशात्सिद्धमाङ्गं यत्कार्यं तदतिदिश्यते—इत्युक्त्या तयोरभिन्नरूपत्वं सूचितम् । तत्रानपेक्षितार्थसन्निधानस्तत्तन्निमित्तरूपकार्यव्यवहार एवानेन ।

कार्यन्तु स्वशास्त्रेणैवेति । अत एव 'रामाय' इत्यादौ 'स्थानिवत्त्वेन सुप्त्वात् सुपि चेति दीर्घः' इति सङ्गच्छते । 'परिवीः' इत्यादौ परत्वात् दीर्घ इति च सङ्गच्छते ।

पदप्रवेशः । यच्च अल्त्वव्याप्यो धर्मो वल्त्वं तन्नातिदेष्टुमिष्टम्; तस्य स्वतः सत्त्वात् । यच्चातिदेष्टुमिष्टमार्धधातुकत्वं तच्च नाल्त्वव्याप्यो धर्मः; तस्य अलि अनलि च साधारण्यात् । अल्त्वव्याप्यधर्मस्य प्रवेशादेव 'भोभगो' इति सूत्रस्थभाष्यासङ्गतिर्न । तत्र हि "किमुदाहरणम् ? 'छन्दःसु', 'पयः सु' । किमर्थं सप्तमीबहुवचन एवोदाह्रियते, न प्रथमैकवचनम् वृक्षस्तत्र प्लक्षस्तत्रेति ? अस्त्यत्र विशेषः–विसर्गे कृते यत्वाप्राप्तेः ।"

अयं भावः—'खरवसानयोः' इत्यत्र रोः रेफस्य विसर्गविधानात् रेफत्वावच्छिन्नायाः स्थानिताया अल्त्वव्याप्यधर्मेण अवच्छिन्नत्वात् स्थानिवद्भावनिषेधात् यत्वाप्रसङ्गः । 'छन्दःसु' इत्यादौ तु 'रोः सुपि' इति नियमसूत्रेण 'सप्तमीबहुवचने रोरेव विसर्गो नान्यस्य' इति नियमेन विसर्गस्थानितया रोरेवोपादानात् रुत्वस्य र् उ इत्युभयनिष्ठत्वेन अल्मात्रवृत्तित्वाभावात् अल्त्वव्याप्यधर्मावच्छिन्नस्थानिताया अभावात् न स्थानिवद्भावस्य निषेध इति युक्तं तदुदाहरणम् । 'वृक्षस्तत्र' इत्यत्र तु 'खरवसानयो' इति सूत्रेण विसर्गे तत्र पदान्तस्य रेफस्य विसर्ग इत्यर्थाभ्युपगमेन विसर्गस्थानितायाः रेफत्वावच्छिन्नतया रेफत्वस्य रेफव्यञ्जनमात्रवृत्तित्वात् अल्त्वव्याप्यधर्मेण र्-मात्रवृत्तिरेफत्वेन अवच्छिन्नाया स्थानितायाः सत्त्वेन निषेधप्रवृत्त्या न यादेशप्रसङ्ग इति ।

जिस निमित्त के अभाव से प्रयुक्त उपदेशशास्त्र की अप्रवृत्ति होने पर अतिदेशसूत्र की अपेक्षा होती है उस निमित्त की स्थान्यल्-असाधारणधर्मता अर्थात् स्थान्यल्वृत्ति होकर अल्मात्रवृत्तित्व के रहने पर ही निषेधशास्त्र की प्रवृत्ति इष्ट है । बभूविव इसमें जिस आर्धधातुकत्व के अभाव से इडागम को अप्राप्ति है वह अल्मात्रवृत्ति नहीं हैं; क्योंकि अल् और अनल् दोनों में उसकी स्थिति है । जो अल्मात्रवृत्ति वल्त्वघटित वलादित्व है उसके वैकल्यप्रयुक्त सूत्र की अप्रवृत्ति नहीं है; क्योंकि आदेश के वकार में वल्त्व होने से उसके अतिदेश की अपेक्षा ही नहीं ।

शास्त्रीय कार्य में स्थानिवद्भाव होता है । इससे 'नायकः' इसमें स्थानिवद्भाव के द्वारा ण्वुल्त्व या हल्त्व का अतिदेश अयादेश के प्रतिबन्धार्थ नहीं होता; क्योंकि अयादेश का अभाव शास्त्रीय कार्य नहीं है ।

प्राधान्यादिति । शास्त्रातिदेश कार्यातिदेश–इन दोनों पक्षों में कार्य के प्राधान्य के कारण प्रधानीभूत कार्यातिदेश पक्ष माना गया है । शास्त्र के अतिदेश में शास्त्र और कार्य के अतिदेश में कार्य का ही विधान अभीष्ट होने से दोनों पक्षों का फल समान है । भाष्य में भी 'अङ्गशास्त्रातिदेश के द्वारा इष्ट की सिद्धि होती है, आङ्ग जो कार्य उसका अतिदेश होता है"–इस प्रकार के भाष्यकथन से दोनों की एकरूपता सूचित होती है ।

यद्वा किञ्चिन्निमित्तवैकल्येऽपि दीर्घादिकार्यमनेन क्रियते। तच्च कार्यं किम्? इत्याकाङ्क्षायां तत्स्वरूपनिर्णयस्य विधिशास्त्रमूलकत्वेन तद्देशेनैव परशास्त्रविहितत्वरूपं परत्वं तेषां बोध्यम्।

नच ऋधातोर्द्वित्वे पूर्वस्य ऋकारस्य अभ्याससंज्ञायाम् "उरत्" इत्यनेन अत्वे रपरत्वे च "हलादिः शेषः" इत्यस्य प्राप्तये अभ्यासत्वमपेक्षते। तच्च ऋकारस्य, न अर् इत्यस्य। स्थानिवद्भावस्तु वक्तुमशक्यः। अल्त्वव्याप्यधर्मावच्छिन्ना ऋत्वावच्छिन्ना या स्थानिता तन्निरूपितादेशताश्रयः अर् इति, तद्धर्मिकारोपप्रकारीभूतधर्मः = अभ्यासत्वम्, तदवच्छिन्नोद्देश्यताके विधौ अनल्विधाविति प्रतिषेधात् इति वाच्यम्; 'पूर्वोऽभ्यासः' इत्यनेन पुनरभ्याससंज्ञायाः विधानात्। अभ्याससंज्ञायां निमित्तं द्विरुक्तस्य धातोः पूर्वभागत्वम्, तच्च ऋधातोः पूर्वभागत्वमर् इत्यत्रापि सुलभम्। प्रक्रियाज्ञानवताम् = प्रकृतिप्रत्ययादिविभागज्ञानवतां तथा ज्ञानस्य = द्विरुक्तधातुपूर्वभागज्ञानस्य सुकरत्वात् न पूर्वोक्तानुपपत्तिः।

अत एव = आद्यार्थस्वीकारादेव। धिन्वन्तीत्यत्र धिवधातोर्लटि झिविभक्त्यादेशे "झोऽन्तः" इत्यन्तादेशे 'धिन्विकृण्व्योर च' इति अकारे उप्रत्यये यणि च कृते स्थानिवद्भावेन उकारवृत्त्यार्धधातुकत्वस्य वकारे सत्त्वेन स्वतश्च वलादित्वात् इडागमः प्राप्नोति। तत्र स्थानिवद्भावप्रतिषेधो द्वितीयार्थेन न सिध्यति। तथाहि—स्थानी उकारः तदवयवो व्यपदेशिवद्भावेन स एव, तद्वृत्ति-अल्त्वव्याप्यो धर्मो नार्धधातुकत्वम्, तस्य तस् इत्यादावपि सत्त्वेन अल्त्वव्याप्यत्वाभावात् निषेधाप्राप्तेः। प्रथमार्थे तु अल्त्वव्याप्यधर्मावच्छिन्ना या इकत्वावच्छिन्ना उकारनिष्ठा यणादेशनिष्ठादेशतानिरूपिता स्थानिता, तद्धर्मिकः आरोपः 'वकारः आर्धधातुकत्ववान् भवतु' इत्याकारकः, तादृशारोपप्रकारीभूतधर्मेण आर्धधातुत्वेन साक्षादवच्छिन्नोद्देश्यताको विधिः 'आर्धधातुकस्येड्वलादेः' इत्यनेन प्राप्त इड्विधिः, तस्मिन् कर्तव्ये प्रतिषेधात् नेडागमस्य प्रसक्तिरिति बोध्यम्।

स्थानिवत्सूत्र में कार्यातिदेश का अप्रधान निमित्त कार्यातिदेश में तात्पर्य है। 'रामाय' इसमें यादेशोत्तर सुप्त्वाभावप्रयुक्त अप्राप्त दीर्घ के निमित्तभूत सुप्संज्ञारूप कार्य का स्थानिवत्सूत्र से अतिदेश होने पर 'सुपि च' इस सूत्र से ही दीर्घ का विधान होता है।

तत्र = अप्रधान प्रधान कार्यों के बीच अर्थसान्निध्य की अपेक्षा किये विना तन्निमित्तरूप कार्य का अतिदेश ही स्थानिवत्सूत्र से होता है। प्रधान कार्य का विधान स्वशास्त्र के द्वारा होता है। अत एव 'रामाय' इत्यादि स्थल में 'स्थानिवद्भाव से सुप्त्व के आनयन से प्रयुक्त 'सुपि च' इसके द्वारा दीर्घ होता है', इस भाष्य की भी सङ्गति हुई।

अतएव 'परिवीः' में व्येञ् धातु से क्विप्, सम्प्रसारण, पूर्वरूप के अनन्तर तुक्, दीर्घ दोनों की प्राप्ति होने पर, परत्व के कारण दीर्घ तुक् का बाधक सिद्ध होता है। प्रधान कार्यातिदेश मानने पर स्थानिवत्सूत्र के द्वारा दीर्घ और तुक् की प्राप्ति होने से दीर्घ में परत्व के द्वारा बाधकत्वव्यवहार की सङ्गति नहीं होगी। अप्रधान कार्यातिदेशपक्ष में 'हलः' इससे विधीयमान दीर्घ के

एतदेवाभिप्रेत्यातिदिश्यमानकार्याणामुपदेशदेश एव देश इत्यभियुक्ताः ।

अत्राऽऽद्यपक्ष एव भाष्यसम्मतः । अत एव 'स्थान्यल्विधिप्रतिषेधे कुरुवधपिबां प्रतिषेधो वक्तव्यः' इत्येतदुपपादनावसरे 'स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयं च लघूपधत्वादि, तत्र लघूपधगुणादिः प्राप्नोति'—इत्यादिभाष्योक्तेरिति बोद्धव्यम् ।

समाधानान्तरमुक्त्वा खण्डयति—यत्तु इति । धिन्वन्तीत्यत्र इटो व्यावृत्तये उपायान्तरत्वेन स्वविधौ स्थानिवद्भाव उक्तो भाष्ये, तत्तु एकदेशिमतम् । तथाहि 'आयन्' 'आसन्' इत्यस्य सिद्धये स्वविधावपि स्थानिवद्भाव एष्टव्यः ।

इण्धातोर्लङि प्रथमपुरुषबहुवचने, तथा अस्धातोर्लङि प्रथमपुरुषबहुवचने क्रमेण रूपद्वयस्य सिद्धिः । तत्र यणादेशे द्वितीये अकारलोपे अजादित्वाभावात् आडागमो न प्राप्नोति । तदर्थम् 'अचः परस्मिन्' इत्यनेन स्थानिवद्भाव आश्रीयते । परनिमित्तकोऽजादेशो यणादेशः अकारलोपश्च तयोः स्थानिवद्भावो न स्यात् । "इणो यण्" इति शास्त्ररूपस्थानिभूतोऽच् इकारः 'श्नसोरल्लोपः' इत्यस्य स्थानिभूतोऽच् अकारः ततः पूर्वं कश्चिद् वर्ण एव नोपलभ्यते, तस्य कार्यं तु दूरापास्तमिति न स्थानिवद्भावस्य प्रसक्तिः ।

पूर्वविधावित्यत्र 'पूर्वस्मात् विधिः' इति पञ्चमीसमासाश्रयणेन 'पूर्वस्मात् परस्य विधौ' इत्यर्थस्य लाभे स्वस्यापि स्वापेक्षया पूर्वस्मात् परत्वमस्त्येवेति स्वस्य विधावपि= आडागमे, स्थानिवद्भावो भवति । तथैव धिन्वन्तीत्यत्रापि वकारस्य वल्त्वात् तन्निमित्तमादाय प्राप्ते इडागमविधौ 'अचः परस्मिन्' इत्यनेन स्थानिवद्भावः स्यात् । परः= अन्तिघटकोऽकारः, तन्निमित्तीकृत्य जायमानो विधिः='इको यणचि' इत्यनेन विहितो वकाररूपयण्विधिः, तस्यैव कार्ये इडागमरूपे प्रसक्ते स्थानिवद्भावाद् अच्त्वस्य सत्त्वेन वलादित्वाभावाद् इडागमस्याप्रसक्तेः ।

लिये सम्प्रसारणत्व का अतिदेश 'ह्रस्वस्य पिति कृति तुक्' इस से प्राप्त तुक् के लिये पित्व-कृत्त्व का अतिदेश अपेक्षित होने से दीर्घ तथा तुक् की प्राप्ति तत्तत् सूत्रों द्वारा ही होती है । अतः परत्व सुलभ है ।

अथवा किञ्चित् निमित्त की विकलता रहने पर भी प्रधान कार्य का अतिदेश स्थानिवत्सूत्र से होता है । किस कार्य का अतिदेश है ? ऐसी आकांक्षा होने पर कार्य के स्वरूप का निर्णय विधिशास्त्र से होता है । अतः विधि देश के परत्व से अतिदेशप्राप्त कार्य का भी परशास्त्रविहितस्वरूप परत्व समझना चाहिये । यही मानकर अतिदेशशास्त्र का देश ही उपदेशशास्त्र का देश है—ऐसी प्रामाणिकों की उक्ति है ।

अप्रधान कार्यातिदेश पक्ष ही भाष्यसम्मत है । स्थानिवत्सूत्र के भाष्य में ही स्थानी अल् के आश्रयण में या अल्मात्र के आश्रयण में निषेध होता है ? इस प्रकार के संशयानन्तर 'स्थान्यल्विधिप्रतिषेधे' इत्यादि वार्तिक के उपादान के समय स्थानिवद्भाव से अपेक्षित अङ्गसंज्ञा का अतिदेश कर स्वाश्रय लघूपधत्व निमित्त से 'पुगन्तलघूपधस्य च' इसके द्वारा गुणविधान किया । इस सन्दर्भ में निमित्तरूप अप्रधान कार्य का अतिदेश होता है, प्रधान कार्य का नहीं—इसको सिद्धि हुई ।

इदन्त्ववधेयम्–'स्थानिवदादेशः' इत्यनेन स्थानिनि सति यत् कार्यं प्राप्नोति तन्मात्रमतिदिश्यते, न तु यत् कार्यं न प्राप्नोति तन्न भवतीत्येवमतिदिश्यते। 'अचः परस्मिन्' इत्यनेन तु स्थानिनि यद् भवति तद् भवतु, यन्न भवति तन्न भवेदित्युभयमपि अतिदिश्यते। तथा च धिन्वन्तीत्यत्र यणादेशात् पूर्वमच्त्वसत्त्वाद् वलादिलक्षण इडागमो न प्राप्नोति। इदानीमपि स्थानिवद्भावेन इडागमो न प्राप्नुयात्। एवञ्चात्र 'अनल्विधौ' इत्यस्याद्यार्थानभ्युपगमेऽपि दोषाभावाद् आद्यार्थो नोपादेयः। एतन्न युक्तम्। 'पूर्वविधौ' इति स्थाने 'अपरविधौ' इति न्यासं विधाय परस्य विधौ स्थानिवद्भावं प्रतिषिद्धवान् वार्त्तिककारः। एवञ्च स्वस्य पूर्वस्य च विधौ स्थानिवद्भावं साधितवान्। एतन्न्यासस्य यदसाधारणं फलम्–आयन् आसन् इति प्रदर्शितवान्, तत् स्वविधौ स्थानिवद्भावं विनापि सिध्यति। तथाहि 'असिद्धवदत्राभात्' इत्यनेन आभीये अडागमे कर्तव्ये जातस्य आभीयस्य यणो लोपस्य चासिद्धत्वेन अजादित्वात् अडागमस्य सिद्धत्वात्। अतः 'आयन्', 'आसन्' इत्यादिसिद्धये स्वविधौ स्थानिवद्भावस्योपन्यास एकदेशिन एव। 'अचः पूर्वत्व-विज्ञानात्' इति वार्त्तिके अर्थात् एतत् प्रतीकमादाय **कैयटेन** 'पूर्वविधौ' इत्यत्र पञ्चमी-समासेन 'पूर्वस्मात् परस्य विधौ' इत्यर्थलाभात् स्थानिनः पूर्वस्मात् परः स्थानी भवतीति स्वविधौ स्थानिवद्भावस्य संगृहीतत्वात् अपरविधाविति न्यासेन समाधानमेकदेशिन इत्यभ्युगतम्। तस्माद् आद्यार्थस्वीकारे न कश्चिद् विरोधः।

जिस निमित्त के वैकल्य से उपदेशशास्त्र की अप्रवृत्ति होती है उस निमित्त के अतिरिक्त सभी निमित्त अतिदेशशास्त्र का भी होता है। 'अपि' शब्द से मुख्य शास्त्र का भी। इसीलिये 'वृक्षम् करोति' इत्यादि स्थल में 'प्रातिपदिकाद्धात्वर्थे' इससे णिच् तथा उसको इष्ठवद्भाव होने पर णिच् में इष्ठवत्त्वातिदेश होने से 'यचि भम्' इससे भ संज्ञा होती है। इस सूत्र में अच् रूप वर्ण-वृत्तिधर्माश्रयण के कारण वर्णाश्रयत्व होने से 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' इससे प्रत्ययलक्षण का निषेध हुआ। अतः 'सुबन्तात् णिच्' इस पक्ष में प्रत्ययलक्षण द्वारा प्राप्त भ संज्ञा से पद संज्ञा का बाध नहीं हुआ। सभी अतिदेशशास्त्रों के लिये उक्त नियम है। उपर्युक्त निमित्त शास्त्रीय विवक्षित है।

शङ्का—जिस प्रकार 'पिता के समान पण्डित हैं'—इस वाक्य के द्वारा पुत्र में ही पितृ-तुल्य पाण्डित्य की प्रतीति होती है, उसी प्रकार 'स्थानिवत्' इसके कहने पर अर्थात् आदेश में स्थानिवृत्ति धर्म का लाभ सिद्ध हो जाने से आदेशपदोपादान सूत्र में व्यर्थ है?

समाधान—सूत्र में स्थान्यादेश रूप से निर्दिष्ट स्थानी और आदेश का ग्रहण है—इस आशङ्का के निवारण द्वारा शब्द की अनित्यता के परिहारार्थ 'सर्वे सर्वपदादेशाः' इस न्याय से 'एङः' इत्यादि स्थलों में 'तेस्तुः' इस प्रकार कल्प्यमान आनुमानिक स्थान्यादेशभाव के संग्रहार्थ आदेशग्रहण सार्थक है। अतः 'पचतु' इस की निवृत्ति तिङ्त्वधर्मानयन होने से पदत्व की सिद्धि होती है।

शङ्का—जिस तरह छिन्नपुच्छ कुत्ते में भी कुत्ता का ही व्यवहार होता है उसी प्रकार ति का तित्व लोकन्याय से ही तु इसमें सिद्ध होने से स्थानिवत्सूत्र व्यर्थ है। 'प्राग्दीव्यतोऽण्' इस सूत्र

द्वितीयार्थस्य प्रयोजनमाह—**प्रदीव्येत्यादौ** इति। चकारोऽन्ते इट् च नेत्येवं योजनीयम्। अत्र स्थानी क्त्वा, तदवयवस्तकारः, तद्वृत्तिरल्त्वव्याप्यो धर्मः वल्त्वं तच्चातिदेष्टुमिष्टं तद्घटितवलादिनिमित्तके इडागमे स्थानिवद्भावस्य प्रतिषेधात् न इडागमः। 'बभूविव' इत्यत्र 'परस्मैपदानाम्' इत्यादिना वसः स्थाने वादेशे वल्त्वसत्त्वेऽपि आर्धधातुकत्वाभावात् इट् न प्राप्नोति। अतः स्थानिवद्भाव आवश्यकः। अनल्विधावित्यस्य स्थान्यवयवाल्वृत्तिधर्मस्य वल्त्वस्य आदेशे स्वत एव सिद्धत्वेन नासौ धर्मः स्थानिवद्भावेन अपेक्ष्यते। यच्चापेक्षितम् आर्धधातुकत्वम्, तच्च नाल्मात्रवृत्ति—इति निषेधाप्रवृत्त्या दोषाभावात्।

अमुमेवार्थं स्फुटीकरोति—**नहीति**। स्थान्यलित्युक्त्या वल्त्वं न स्थानिवृत्ति निमित्तमपि तु आदेशनिष्ठमित्यक्षरार्थः। ननु आर्धधातुकत्वस्य समुदायवृत्तित्वे समुदायघटकाल्वृत्तित्वमपीति तन्निमित्तके इडागमे निषेधप्राप्तेस्तादवस्थ्यादित्याशयेन ग्रन्थमवतारयति—**यन्निमित्तेमि** । यन्निमित्तवैकल्यप्रयुक्ता = यन्निमित्तविरहप्रयोज्या । उपदेशशास्त्राप्रवृत्तिः = विधिशास्त्रप्रवृत्तेरभावः, तन्निमित्तं स्थान्यलसाधारणं मन्तव्यम्। तथाच वल्त्वधर्मस्य आदेशेऽपि सत्त्वात् न तद्वैकल्यप्रयुक्ता इडागमस्य प्रवृत्तिः, किन्तु 'लिट् च' इति विहितमार्धधातुकत्वं लिडादेशस्य वसः, न तु बभूविव इत्यत्र 'परस्मैपदानाम्' इत्यनेन जायमानस्य व इत्यादेशस्य। अत आर्धधातुकत्वविरहप्रयुक्ता इडागमस्य अप्रवृत्तिः। तच्च न अल्वृत्ति असाधारणो धर्मः; आर्धधातुकत्वस्य अल्समुदायेऽपि सत्त्वात्। असाधारण्यञ्च अल्वृत्तित्वे सति अलितरावृत्तित्वरूपम्। तस्मात् स्थानिवद्भावाप्रतिषेधेन बभूविव इत्यत्र इट् सिध्यति। स्थान्यवयवो योऽल् तदसाधारणो धर्मो यस्मिन् तस्य भावस्तत्त्वं तस्मात् स्थान्यवयवाल्साधारणधर्मत्वादिति।

शास्त्रे शास्त्रीयकार्यस्य प्रत्यासन्नत्वात् तस्यैवात्र ग्रहणम्। तथा च शास्त्रीये कार्ये एव स्थानिवद्भावः। तेन 'नायकः' इत्यादौ अयाद्यादेशप्रतिबन्धस्य शास्त्रीयकार्यत्वाभावेन तत्प्रतिबन्धार्थं न स्थानिवद्भावः। अशास्त्रीयकार्येऽपि स्थानिवद्भावप्रवृत्तौ 'नायकः' इत्यत्र ण्वुल्प्रत्यये सति अयादेशो न भवति; तस्य अकादेशे कृतेऽपि अयादेशो न स्यात्।

के भाष्य में दीव्यति शब्द के एकदेश 'दीव्यत्' का अनुकरण है—इस कथन के अनन्तर विकृत निर्देश के सम्बन्ध में जिज्ञासा होने पर इसके द्वारा एकदेशविकृतन्याय की सिद्धि का उल्लेख किया है। इस न्याय की प्रवृत्ति शास्त्रीय तथा अशास्त्रीय दोनों प्रकार के विकारों में होती है। अन्यथा 'दीव्यत्' इसका विकार शास्त्र द्वारा न होने से न्यायप्रवृत्ति नहीं होगी। इस न्याय के आश्रयण से ही 'श्रायसौ' यहाँ अणन्त 'श्रेयस औ' इस अवस्था में 'देविकाशिंशपा' इत्यादि से आकार, 'वृद्धिरेचि' इससे वृद्धि होने के अनन्तर सान्त श्रायस् एकदेशविकृतन्याय से अङ्ग मानकर 'उगिदचाम्' इससे प्राप्त नुम् की शङ्का का 'अचः परस्मिन्' इसके द्वारा पूर्वसम्बन्धिकार्यविधि में स्थानिवद्भाव होने से नुम् की व्यावृत्ति भाष्य में की गयी है। एकदेशविकृतन्याय का आश्रयण न होने पर अङ्गता ही दुर्लभ है?

स्थानिवत्सूत्रेण शास्त्रस्यातिदेशेऽपि कार्यस्यैव लक्ष्ये विधीयमानत्वेन उद्देश्यतया प्राधान्यात् कार्यस्यैवातिदेशः स्वीकर्तव्यः। शास्त्रातिदेशस्य कार्यातिदेशस्य च समानफलकत्वात् अभिन्नरूपता तयोः। अतएव = अनयोरतिदेशयोः अभिन्नरूपत्वादेव। **सिद्धमिति**। इष्टं सिद्धमित्यर्थः। **आङ्गमिति**। यदि द्वयोरभिन्नरूपता न स्यात्, तदा शास्त्रातिदेशमुपक्रम्य 'आङ्गं कार्यमतिदिश्यते' इत्युक्तिरसङ्गता स्यात्। तत्र = प्रधानाप्रधानकार्ययोर्मध्ये। अनपेक्षितेति। अनपेक्षितम् = अजिज्ञासितम्, अर्थसन्निधानम् = निमित्तसद्भावो येन स तथोक्तः। तन्निमित्तकार्यव्यवहारः=अप्रधानकार्यव्यवहारः। अनेन = स्थानिवत्सूत्रेण। कार्यम्=प्रधानकार्यम्, स्वशास्त्रेणैव। यथा 'रामाय' इत्यत्र सुप्प्रत्याहारे ङे-स्थानिकस्य यादेशस्य पाठाभावेन सुप्त्वाभावात् 'सुपि च' इत्यस्याप्रवृत्तौ प्राप्तायां स्थानिवत्सूत्रेण ङेवृत्तिसुप्त्वरूपाप्रधानकार्यस्यातिदेशेन सुप्त्वात् 'सुपि च' इत्यनेन दीर्घ इति संगच्छते।

अत एव इत्यस्य उभयत्र 'सुपि चेति दीर्घः' इत्यनेन, 'परत्वाद् दीर्घः' इत्येतेन च सममन्वयः। संगच्छते इति क्रियापदस्य द्विवारमुक्तिः स्पष्टार्था। परिपूर्वकाद् व्येञ्धातोः क्विपि सम्प्रसारणे कृते 'ह्रस्वस्य पिति कृति तुक्' इत्यनेन तुकि प्राप्ते 'हलश्च' इत्यनेन दीर्घे च प्राप्ते परत्वात् तुकं बाधित्वा दीर्घे जाते 'परिवीः' सिध्यति। स्थानिवत्सूत्रेण प्रधानकार्यस्य तद्विधायकशास्त्रस्य वा अतिदेशे तुग्दीर्घयोरुभयोरपि एकेनेव स्थानिवत्सूत्रेण प्राप्ततया परत्वाद् दीर्घेण तुको बाध इत्युक्तिरसङ्गता स्यात्। सूत्रभेदे पूर्वत्वपरत्वयोर्व्यवहारः, न त्वेकस्मिन्।

प्रधानकार्यातिदेशपक्षेऽपि दोषाभावमाह—**यद्वेति**। किञ्चित् निमित्तस्य विरहे स्थानिवत्सूत्रेण कार्यं विधीयते। ननु प्रधानसूत्रेण तस्य निमित्ताभावाद् प्राप्तेः सामान्यतः कार्यमिति ज्ञानेऽपि विशेषतः किं कार्यमिति जिज्ञासा समुदेति। तस्य विशेषरूपकार्यस्य स्वरूपपरिचयाय विधिशास्त्रं स्मरति। तथा च विधिशास्त्रस्य योऽष्टाध्यायीपाठः तमनुसृत्य परत्वादिना शास्त्रं व्यवस्थापयति। परशास्त्रविहितमिदं कार्यम्, न पूर्वशास्त्रविहितमित्यनुसन्धाय परशास्त्रविहितत्वेन स्थानिवत्सूत्रेण प्राप्ते कार्ये परत्वमारोपणीयम्। अत एव उपदेशदेश एव देशः अतिदिश्यमानकार्याणामिति प्रामाणिकाः वदन्ति।

अत्र आद्यपक्ष इति। अत्र=अनयोर्मध्ये। आद्यपक्षः = अप्रधानकार्यातिदेशपक्ष एव भाष्यकाराभिप्रेतः। अत्रैव=स्थानिवत्सूत्रभाष्ये एव आद्यपक्षस्य युक्तता स्फुटा। तत्र 'स्थान्यल्विधिप्रतिषेधे' इत्यस्मिन् पक्षे 'कुरुवधपिबां स्थानिवद्भावस्य प्रतिषेधो वाच्यः' इति वार्त्तिकोक्तार्थस्योपपादनप्रसङ्गे स्थानिवद्भावेन कुर इत्यत्र अङ्गसंज्ञायां लघूपधत्वस्य स्वतः सिद्धत्वेन 'पुगन्तलघूपधस्य च' इत्यनेन गुणः प्राप्नोति—इत्युक्त्या प्रधानकार्यं स्वशास्त्रेणैव भवतीति सिध्यति।

यस्य निमित्तस्य अभावात् उपदेशशास्त्रस्याप्रवृत्तिः,तन्निमित्तं विहाय अन्यत् सर्वमेव निमित्तमतिदेशसूत्रस्येति नियमात् पटुमाचष्टे पटयतीत्यादौ णिचि इष्ठवद्भावेन

एवं यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तातिरिक्तसर्वनिमित्तकत्वमतिदेशस्यापि। अत एवेष्ठवद्भावेनातिदिष्टभत्वस्य वर्णाश्रयत्वमित्यादिव्यवहारः।

सर्वातिदेशेष्विदं तुल्यम्। यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तं शास्त्रीयमेव प्रत्यासत्तेः।

स्थानिवदित्युक्तेः सम्बन्धिशब्दमहिम्नैवाऽऽदेशलाभे आदेशग्रहणं श्रौतस्थान्यादेशभावस्यैव ग्रहणमिति शङ्कावारणद्वारा 'एरुः' (३।४।८६) इत्यादौ शब्दानित्यत्ववारणाय 'सर्वे सर्वपदादेशाः' इति न्यायेन कल्प्यमानस्य 'तेस्तुः' इत्यानुमानिकादेशस्य सङ्ग्रहार्थम्। तेन 'पचतु' इत्यादेः पदत्वसिद्धिरिति भाष्ये स्पष्टम्।

ननु तोस्तित्त्वमपि छिन्नपुच्छे शुनि श्वत्वव्यवहारवल्लोकन्यायेनैव सिद्धम्। तदुक्तं 'प्राग्दीव्यतोऽण्' (४।१।८३) इति सूत्रे भाष्ये—'दीव्यतिशब्दैकदेशदीव्यच्छब्दा-

---

भसंज्ञायां कप्रत्ययावधिस्वाद्यसर्वनामस्थानविभक्तीनां निमित्तत्वेन णिच् प्रत्ययावधितो बहिर्भूतत्वेन भसंज्ञाया अप्राप्तत्वेन तदर्थम् इष्ठवदतिदेशो विहितः। तथा च इष्ठनि भसंज्ञायाः सत्त्वेन अप्रधानकार्यरूपं भत्वमिहापि अतिदिश्य 'टेः' इति सूत्रेण प्रधानकार्ये टिलोपे उक्तरूपस्य सिद्धिः; अन्यत्सर्वनिमित्तस्य सत्त्वात्। यन्निमित्तवैकल्यप्रयुक्तेत्यादि नियमः सर्वेषु अतिदेशसूत्रेषु समानः तन्निमितं शास्त्रीयमेव; शास्त्रीयकार्यस्य प्रकृतत्वेन प्रत्यासन्नत्वात्।

ननु पितृवदधीते इत्युक्तौ पुत्रपदाभावेऽपि पितुरिवाध्ययनं पुत्रस्यैव प्रतीयते, नत्वन्यस्य; तथेहापि स्थानिवदित्युक्तौ तत्स्थानापन्नादेशस्यैव लाभे पुनरिह सूत्रे आदेशग्रहणसामर्थ्यात् सूत्रे निर्दिश्यमानस्य स्थान्यादेशभावस्यैव ग्रहणं मा भूत्, किन्तु शब्दानित्यत्वपरिहाराय कल्प्यमानस्य आनुमानिकस्थान्यादेशभावस्यापि ग्रहणं यथा स्यात् तदर्थं तद्ग्रहणस्यावश्यकत्वात्। तेन 'पचतु' इत्यत्र—

"सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते॥"

इत्यनुरोधेन 'एरुः' इत्यनेन 'तेस्तुः' इत्येवं स्थान्यादेशभावः कल्प्यते। एवञ्च तिवृत्तितिङ्त्वस्य 'तु' शब्दे अतिदेशात् तिङ्त्वेन 'सुप्तिङन्तं पदम्' त्यनेन पदत्वसिद्ध्या 'तिङ्तिङः' इत्यनेन निघातस्वरः सिद्धः।

ननु छिन्नपुच्छे शुनि = पुच्छरहिते कुक्कुरेऽपि कुक्कुरत्वव्यवहारो भवति नाश्वत्वादिव्यवहारः इति लोकव्यवहारसिद्धेन 'एकदेशविकृतमनन्यवत्' इति न्यायेन 'पचतु' इत्यादौ तोस्तित्वमतिदिश्य तिङन्तत्वात् पदत्वसिद्ध्या स्थानिवत्सूत्रे आनुमानिकस्थान्यादेशभावस्य ग्रहणे फलाभावः। भाष्यकारेण चायं न्यायः 'प्राग्दीव्यतोऽण्' इति सूत्रे आश्रितः। तथा हि 'प्राग्दीव्यतोऽण्' इत्यत्र दीव्यत् इति 'तेन दीव्यति खनति जयति जितं वा' इति सूत्रस्य दीव्यतिशब्दैकदेशदीव्यत्—इत्यस्यानुकरणम्। एकदेशस्य विकृतस्य निर्देशः किमर्थं क्रियते। एतदेव = लोकसिद्धाश्रयणमेव परिभाषारूपम्, आचार्यः पाणिनिः ज्ञापयति—एकदेशविकृतमिति।

नुकरणमिदम्' इत्त्युत्वा 'किमर्थं विकृतनिर्देशः ? एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा—'एकदेशविकृतमनन्यवत्' इति ।

अत एवात्र विकारोऽशास्त्रीयोऽपि । अत एव श्रायसशब्दादण्णन्ताद् द्विवचने 'श्रायसौ' इत्यत्र वृद्धौ कृतायां सान्तस्योगित्वेनानेन न्यायेनाङ्गतया प्राप्तो नुम् पूर्वसम्बन्धिविधित्वेन 'अचः परस्मिन्' (१।१।५७) इति स्थानिवत्त्वेन वारितः 'अचः परस्मिन्' इति सूत्रे भाष्ये ।

एतन्न्यायानाश्रयणे त्वङ्गत्वमेव दुर्लभम् । 'अन्तादिवत्' (६।१।८५) सूत्रे भाष्य-

---

एतेन लोकसिद्धस्य न्यायस्य इहाप्याश्रयणे प्रामाण्यमुपदर्शितम् । अतएव = लोकसिद्धार्थस्य ज्ञापनादेव । अशास्त्रीयोऽपि = शास्त्रेण असम्पादितोऽपि । दीव्यतेः इकारस्य विकार आचार्यकृतो न तु केनचित् सूत्रेण कृतः । अतो विकारोऽशास्त्रीयः ।

एतन्न्यायाश्रयणे प्रमाणान्तरमाह—**अतएव इति ।** श्रेयसि भवमिति विग्रहे श्रेयस्शब्दाद् अणि 'देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्' इत्यनेन आत्वे औविभक्तौ वृद्धौ श्रायसौ इति सिध्यति । तत्र श्रायस् इत्यस्य एकदेशविकृतन्यायेन उगिदन्तत्वेन अङ्गत्वेन च नुममाशङ्क्य, 'अचः परस्मिन्' इत्यनेन स्थानिवद्भावाद् अकारेण व्यवधानात् नुम् न भवति इत्युक्तं भाष्यकृता । अत्र श्रेयस् इत्यस्य उगिदन्तत्वं श्रायस इत्यस्य विभक्तिमाश्रित्य अङ्गत्वम् अस्ति । एकदेशविकृतन्यायेन श्रायस् इत्यत्र तयोरतिदेश इति बोध्यम् । नच स्थानिभूतादचः पूर्वस्य स्थाने विधौ 'अचः परस्मिन्' इत्यनेन स्थानिवद्भावः, तथा च नुम आगमत्वेन स्थाने जायमानत्वाभावेन पूर्वविधित्वाभावात् कथं स्थानिवद्भावः ? इत्यत आह-**पूर्वसम्बन्धीति ।** 'पूर्वस्य विधौ' इत्यत्र न स्थानषष्ठी, अपि तु सम्बन्धसामान्ये । तथाच पूर्वसम्बन्धिकार्ये स्थानिवद्भावः प्रवर्तते । नुमागमोऽपि पूर्वसम्बन्धिकार्यमिति नानुपपत्तिः । एकदेशविकृतन्यायानाश्रयणे तु उगिदन्तत्वस्य अङ्गत्वस्य चाभावात् नुमः प्राप्तिरेव नास्ति । प्रशस्यशब्दाद् ईयसुनि 'प्रशस्यस्य श्रः' इत्यनेन श्रादेशे गुणे श्रेयस् इत्यस्य उगित्प्रत्ययो यस्माद् विधीयते तदादितदन्तत्वम्, एवं विभक्तेः पूर्वस्य यस्माद् विहितस्य तदादेः श्रायस इत्यकारान्तस्य अङ्गसंज्ञाकत्वेन विकृते तदाश्रयणाय एकदेशविकृतन्याय आश्रयणीय एव । नच अण्प्रत्ययनिमित्तिका अङ्गसंज्ञा श्रेयस् इत्यस्य स्यात् इति वाच्यम्; एवं सति यदङ्गं श्रेयस् इति, तन्न सर्वनामस्थानविभक्तेः प्रकृतिरिति नुमोऽप्राप्तेः । सर्वनामस्थानविभक्तिनिमित्तिकाया एव अङ्गसंज्ञायाः ग्रहणात् ।

मानान्तरमाह—**अन्तादिवत्सूत्रे इति ।** तत्र सूत्रे पूर्वान्तवद्भावस्य प्रयोजननिरूपणावसरे गुडोदकमित्यत्र अकेवलम् = मिश्रितं तद्वाचिनि समासे पूर्वमन्तोदात्तमित्यर्थकेन 'उदकेऽकेवले' (६।२।९६) इति सूत्रेण पूर्वस्यान्तोदात्तता एकदेशविकृतन्यायेन दकशब्दम् उदकशब्दं मत्वा सिध्यति । नचैवं वर्णानां विकारे शब्दानामनित्यत्वप्रसङ्ग इति

'अन्तादिवच्च' इस सूत्र में 'गुडोदकम्' इत्यादि स्थल में एकदेशविकृतन्याय से उदक शब्द का अतिदेश दक में मानकर 'उदकेऽकेवले' इसके द्वारा पूर्वपद के अन्त को उदात्त सिद्ध होता है ।

कैयटयोरपि 'गुडोदकम्' इत्यादावेकादेशे कृते दकशब्दस्यानेन न्यायेनोदकशब्दत्वमाश्रित्य 'उदकेऽकेवले' (६।२।९६) इति पूर्वपदान्तोदात्तत्वमुक्तम् ।

शब्दानित्यत्वं तु रेखागवयन्यायेन समाधेयम् । अनन्यवदित्यस्यान्यवन्नेत्यर्थः । तत्राऽन्यसादृश्यनिषेधेऽन्यत्वाभावः सुतरामिति चेत् ? न; अर्द्धस्यान्यत्वे जातिव्यञ्जकभूयोऽवयवदर्शनाभावेन तौ तिस्त्वप्रतीतेर्न्यायेनानुपपादनात् ।

वाच्यम्; रेखायां गवये चित्रितस्य लाङ्गुलविषाणादेः वस्तुतः पशुनिष्ठत्वाभावेऽपि यथा पशोर्लक्षकत्वम्, तथा कल्पितायां प्रक्रियायां क्रियमाणो विकारः नित्यशब्दे अवृत्तिरपि नित्यशब्दं बोधयतीति किमनुपपन्नम् ! अनन्यवदित्यनेन अन्यसादृश्यं निषिध्यते । यत्र अन्यस्य सादृश्यमपि नास्ति तत्र अन्यत्वस्य का चर्चा ! तस्माद् अन्यत्वस्याप्रतीतेः तद्रूपता सिध्यति । तत्रेति । एकदेशविकृते । अन्यत्वाभावः = अन्यत्वनिषेधः । तथाच न्यायेनैव सिद्धे 'पचतु' इत्याद्यर्थं स्थानिवत्सूत्रस्य नोपयोगः इति चेन्न । अल्पावयविकारे सति अधिकावयवस्य अविकृतस्य दर्शनेन एतज्जातीयोऽयमिति ज्ञातुं शक्यते । यत्र तु अर्धं तदधिकं वा विकृतं तत्र जातिव्यञ्जकस्य अधिकावयवदर्शनस्यासत्त्वेन किञ्जातीयः को वेति न स्फुटं ज्ञायते । एतन्मूलक एव 'अर्धविकारे अर्धाधिकविकारे न्यायो न प्रवर्तते' इति नियमः । प्रकृते तिशब्दे अर्धाधिकस्य इकारस्य विकृतत्वेन उक्तन्यायाप्रवृत्तौ स्थानिवद्भाव आवश्यकः ।

अपि च—परिच्छिन्नपरिमाणे नास्य न्यायस्य प्रवृत्तिः । अतएव शतात् न्यूने शतमिति न प्रयुज्यते । एवञ्च 'आदिरन्त्येन' इति सूत्रेण बोधिता 'तिप्तस्झि' इति सूत्रस्थतिशब्दादारभ्य महिङो ङकारपर्यन्तं तिबादिषु तिङ्संज्ञा नियताक्षरेषु वर्तमाना परिच्छिन्नपरिमाणतया विकृतेषु तिङ्व्यवहारासम्भवेन स्थानिवद्भावः तत्रावश्यकः । परिच्छिन्नपरिमाणत्वञ्च यद्धर्मावच्छिन्नज्ञानोत्तरं संख्यात्वव्याप्यधर्मप्रकारकः परिमाणत्वव्याप्यधर्मप्रकारको वा संशयो नोदेतीति तत्त्वम् । यथा संख्यात्वव्याप्यो धर्मः द्वित्वत्वत्रित्वत्वादिरूपः, तद्धर्मावच्छिन्ना त्रित्वत्वावच्छिन्ना वा या द्वित्वत्रित्वादिनिष्ठा विषयता, तद्विषयकज्ञानोत्तरं द्वौ वा त्रयो वा इति ज्ञानोत्तरं संख्यात्वव्याप्यद्वित्वत्रित्वादिसंख्याप्रकारकः संशयो न जायते; द्वित्वसंख्यानिश्चयस्य द्वित्वसंख्याप्रकारकसंशयस्य प्रतिबन्धकत्वात् । एवं तिङ्त्वमपि परिमाणिताक्षरेषु सत्त्वात् परिच्छिन्नपरिमाणत्वं बोध्यम् । तथाच नियताक्षरारब्धसमुदायवृत्तिधर्माणाम् अर्धस्य अर्धाधिकस्य वा विकारेण न्यूनतायाम् आधिक्ये, वैरूप्ये वा शास्त्रव्यापारं विना विरहात् न तत्प्रयुक्तानि कार्याणि प्राप्नुवन्तीति निष्कर्षः ।

विकार होने से शब्द की अनित्यता का सन्देह रेखागवय[1] न्याय से करना चाहिये । 'अनन्यवत्' इस शब्द द्वारा अन्यसादृश्य का निषेध प्रतीत होने से भेद की व्यावृत्ति स्वतः सिद्ध हो जाती है, क्योंकि अपने स्वरूप को ही अपने सदृश नहीं कहा जा सकता ?

---

१. जिस प्रकार चित्र में निर्मित गवय के द्वारा वास्तविक गवय का ज्ञान होता है, उसी प्रकार कल्पित स्थानी से बोध होता है । स्थान्यादेशभाव वास्तविक नहीं है । अतः नित्यत्व की हानि नहीं हुई ।

किञ्च, तिङ्संज्ञायास्तिबादिसूत्रोपात्तपरिच्छिन्नपरिमाणनिष्ठतया परिच्छिन्न-परिमाणार्थवाचकशब्दानां न्यूनेऽधिके वा शास्त्रव्यापारं विनाऽप्रवृत्तेः 'येन विधिः' (१।१।७२) इति सूत्रे, अङ्गसंज्ञासूत्रे च भाष्ये उक्ततया तदभावात्। न्यूनाधिकत्वञ्च वैरूप्यस्योपलक्षणम् ।

न च 'तण्डुलान्' इत्यादौ स्थानिवद्भावेन प्रत्ययान्तत्वेऽपि स्वतः प्रत्ययान्तभिन्न-त्वात् प्रातिपदिकत्वापत्तिरिति वाच्यम्; अतिदेशस्वभावेनाऽतिदिश्यमानधर्मविरुद्धस्वा-श्रयकार्याभावात् ।

एवं हि भाष्यम्—या एताः सर्वाद्युपादानेन परिच्छिन्नपरिमाणाः संज्ञाः कृताः ताः कथमकजादिविशिष्टा भविष्यन्ति। यथा लोके वा शतादिव्यवहारो द्रोणादिसंज्ञा-व्यवहारो वा न भवति। परिच्छिन्नपरिमाणे न्यायाप्रवृत्तिरनेन सूचिता। **परिच्छिन्न-परिमाणेति।** प्रातिस्विकरूपेण बोधितम्—तिप्तस्झीत्यादिरूपेण कृतं परिमाणम्—आनुपूर्वीविशेषो यस्यार्थस्य तद्वाचकशब्दानामित्यर्थः। **तदभावादिति।** प्रकृते शास्त्र-व्यापाराभावेन तिङ्त्वविरहात्।

विशेषान्तरं बोधयितुमुपक्रमते—**न चेति।** स्थानिवद्भावेन अन्तादिवच्चेति सूत्रं गतार्थमिति मते स्थानिवद्भावेन शङ्कामुद्भावयति—तण्डुलानिति। अत्र आनुमानिक-स्थान्यादेशभावमाश्रित्य स्थानिवद्भावेन प्रत्ययान्तत्वेऽपि स्वतश्च प्रत्ययान्तभिन्नत्वात् प्रातिपदिकत्वं स्यादिति। यद्यपि प्रसज्यप्रतिषेधाश्रयणे प्रत्ययान्तस्य प्रातिपदिकसंज्ञा नेत्यर्थस्य सम्भवेन स्थानिवद्भावेन प्रत्ययान्ततया निषेधः सुलभः, तथापि लाघवादत्र पर्युदास एवाभिमत इति शङ्का युक्ता एव। एवमपि 'पूर्वपरयोः' इत्यत्र द्विवचननिर्देशेन

समाधान—अर्द्धविकार और अर्द्धाधिक विकार में उक्त न्याय की प्रवृत्ति नहीं होती; क्योंकि उक्त प्रकार के विकारों के होने पर जाति की स्पष्ट अभिव्यक्ति नहीं होती। यह क्या और कौन है ? या कुत्ता का अवयव है ?—इस प्रकार का ज्ञान होने से ईदृश विकार में न्याय की प्रवृत्ति नही मानते। अतः 'पचतु' इसमें इकार को उकार के द्वारा अर्द्धाधिक विकार होने से न्याय से निर्वाह न होने के कारण स्थानिवत्सूत्र का आरम्भ है। अथवा उक्त परिभाषण में न्याय की प्रवृत्ति नहीं होती है। जिसके ज्ञानोत्तर संख्यात्वव्याप्य धर्मप्रकारक या परिभाषणत्वव्याप्य धर्म-प्रकारक संशय उत्पन्न नहीं होता, वही अक् परिमाण है। दस या वीस कहने के बाद किसी अन्य संख्या या परिभाषा का सन्देह निवृत्त हो जाता है। इसमें एकदेशविकृतन्याय के द्वारा उन्नीस को बीस नहीं माना जाता। तिङ् संज्ञा भी 'तिप् तस् झि' इत्यादि सूत्रोपात्त तिबादि परिच्छिन्न परिमाणनिष्ठ होने से शास्त्रव्यापार के बिना परिच्छिन्न परिमाणार्थ वाचक शब्दों का न्यून या अधिक में प्रयोग का अभाव 'येन विधिः' एवं अङ्गसंज्ञासूत्र के भाष्य में स्पष्ट रूप से उक्त है। इस प्रकार शास्त्रव्यापार के बिना 'तु' शब्द में तिङ्त्व का अभाव होने से पदत्वसिद्धि के लिये स्थानिवत्सूत्रारम्भ आवश्यक है।

शंका—'तण्डुलान्' यहाँ स्थानिवद्भाव के द्वारा प्रत्ययान्त होने पर स्वतः प्रत्ययान्त-भिन्नत्व होने से प्रातिपदिकसंज्ञा क्यों नहीं हुई, उक्त संज्ञा होने पर नलोप की प्रसक्ति होगी ?

अत एव 'जहि' इत्यादौ जादेशस्यासिद्धत्वे स्वाश्रयो हेर्लुग्न; सिद्धत्वासिद्धत्वयोर्विरोधात्। 'असिद्धवत्' (६।४।२२) सूत्रं तु 'शाधि' इत्यादौ स्थानिप्रयुक्तधिभावसम्पादनेन चरितार्थम्।

न च 'अप्रत्ययः' इत्यस्य पर्युदासत्वे शास्त्रीयकार्याभावात् स्थानिवत्त्वं दुर्लभमिति

उभयोः वर्णयोः प्रत्येकं स्थानित्वेऽपि तण्डुल इत्यस्य अस् इत्यस्य समुदायस्य पृथक् दीर्घादेशस्थानिता नास्ति, किन्तु तण्डुल असित्यस्य स्थाने तण्डुलास् इत्येव कल्प्यते। अतः स्थानिवद्भावेन प्रत्ययत्वमानेतुं न शक्यते; तस्य समुदायावृत्तित्वात्। प्रत्ययान्तत्वस्य तु अशास्त्रीयत्वात् न तदानयनसम्भवः इति न शङ्क्यम्; पूर्वपरघटितयोरुभयोरपि स्थानितायाः स्वीकारात्।

एकदेशविकृतन्यायेन तण्डुल इत्यस्य तदादित्वम्, स्थानिवद्भावेन आन् इत्यस्य प्रत्ययत्वमिति प्रत्ययान्ततदादित्वमार्थसमाजग्रस्तम्? इति शङ्कां समाधत्ते—**अतिदेशस्वभावेति**। अतिदिश्यमानो यो धर्मः प्रकृते प्रत्ययत्वरूपः तद्विरुद्धो यः स्वाश्रयवृत्तिधर्मः प्रत्ययान्तभिन्नत्वरूपः तन्निमित्तकं कार्यं प्रातिपदिकत्वं न भवति इति स्वभावोऽतिदेशशास्त्रस्य सति प्रातिपदिकत्वे नलोपापत्तिः। विरुद्धत्वं तदभाववत्तामुखेन तदभावव्याप्यवत्तामुखेन च भवति। तथाहि–तद्वत्ताज्ञानस्य = धूमवत्ताज्ञानस्य धूमाभाववत्ताज्ञानं धूमाभावव्याप्यवह्न्यभाववत्ताज्ञानं च विरोधि। धूमो वह्निव्याप्यः, परं वह्न्यभावो धूमाभावव्याप्यः। अयःपिण्डे धूमाभावसत्त्वेऽपि वह्न्यभावस्य अभावात्। अत्र च तद्वत्ताज्ञानस्य तदभाववत्ताज्ञानं विरोधि—इत्येव स्वीक्रियते, न तु तदभावव्याप्यवत्ताज्ञानं विरोधि। अतएव आधुरित्यत्र 'विभाषा घ्राधेट्' इत्यादिना विधीयमानस्य लुकः सिद्धये अतिदिश्यमानं यद् घेट्त्वं तदभावव्याप्यम् आदन्तत्वं स्वाश्रयनिष्ठम्, तत्प्रयुक्तकार्यस्य 'अतः' इत्यनेन विहितस्य जुसोऽप्राप्तिः स्यात्। अतः तदभाववत्ताज्ञानस्य विरोधिताऽत्र गृह्यते। सा च घेट्त्वाभावरूपा अत्र नास्ति इति **टिप्पण्यां स्पष्टम्**।

पुनः शङ्कते—**न चेति**। शास्त्रस्थपदप्रतिपाद्यत्वं शास्त्रीयत्वमिति **टिप्पणीकृन्मते** प्रत्ययान्तभिन्नत्वस्य सूत्रस्थप्रत्ययपदप्रतिपाद्यत्वेन शास्त्रीयत्वेन तत्प्रयुक्तकार्यस्य प्रातिपदिकत्वस्य शास्त्रीयत्वमेव। एकपदप्रतिपाद्यत्वं शास्त्रीयत्वमिति मत्वा **शेखरग्रन्थः** प्रवृत्तो न दूषणीयतां भजते। पर्युदासपक्षे हि प्रत्ययान्तभिन्नत्वस्य अशास्त्रीयत्वेन तदन्तर्गतस्य प्रत्ययत्वस्य शास्त्रीयत्वेऽपि तन्निमित्तकार्यस्य प्रातिपदिकत्वाभावरूपस्य अशास्त्रीयत्वात् स्थानिवद्भावो न प्राप्नोति।

समाधान—अतिदेशलभ्य धर्म से विरुद्ध स्वाश्रयधर्मप्रयुक्त कार्य का अभाव अतिदेशस्वभाव होने से स्वाश्रयप्रत्ययान्तभिन्नत्वनिमित्तक उक्त संज्ञा नहीं हुई। अतिदेश का उक्त स्वभाव होने से ही 'जहि' यहाँ 'अतो हेः' इससे प्राप्त हि के लुक् की दृष्टि में जादेश के असिद्ध होने पर भी स्वाश्रयप्रयुक्त निमित्तक लुक् नहीं हुआ। सिद्धत्व असिद्धत्व दोनों परस्पर विरोधी धर्म हैं।

शंका—स्वाश्रयप्रयुक्त कार्य हो जाने पर असिद्धवत्सूत्र का वैयर्थ्य हो जाने से स्वाश्रयनिबन्धन कार्य नहीं होगा?

वाच्यम्; 'वेः स्कन्देरनिष्ठायाम्' (८।३।७३) इति षत्वविधायके तिङन्तेषु षत्वाभावायाऽऽवश्यकेन न्याय्येन चानिष्ठायामिति पर्युदासेन वृत्त्यादिसम्मतेन पर्युदासलभ्याशास्त्रीयेऽपि शास्त्रतात्पर्यविषये शास्त्रीयवदतिदेशबोधनात्। 'विस्कन्नः' इत्यादौ हि निष्ठानत्वस्य नित्यतया स्थानिवत्त्वेनैव निष्ठात्वस्य वक्तव्यत्वात्। तस्य प्रसज्यप्रतिषेधत्वे तु लक्ष्यानुसारिव्याख्यानादेवोक्तार्थसिद्धिरिति बोद्धव्यम्।

प्रसज्यप्रतिषेधे तु प्रत्ययान्तस्य = प्रातिपदिकत्वनिषेधस्यापि विधानात् प्रत्ययान्तस्य प्रातिपदिकत्वाभावः शास्त्रविहितत्वेन शास्त्रीयत्वं सम्भवति। अतएवोक्तम्-**पर्युदासे इति**। समाधत्ते—**वेरिति**। 'वेः स्कन्देः' इति सूत्रे अनिष्ठायामित्यत्र पर्युदासाभ्युपगमेन निष्ठाभिन्ने निष्ठासदृशे षत्वं भवति। तथा च निष्ठाभिन्ने कृत्सु एव षत्वम्; सादृश्यस्य कृत्वेन ग्रहणात्। तथा च तिङन्ते 'विस्कन्दति' इत्यत्र न षत्वम्। 'विस्कन्नः' इत्यत्र नत्वे कृते स्थानिवद्भावेन निष्ठात्वात् षत्वं प्राप्तमनेन पर्युदासेन वारितं भवति; निष्ठाभिन्ने षत्वस्य विधानात्। षत्वाभावरूपकार्यं न शास्त्रीयम्, तत एव स्थानिवद्भावाप्राप्त्या निष्ठाभिन्नत्वस्य सत्त्वात् अनिष्ठायामित्यस्य व्यावर्त्यालाभेन वैयर्थ्यमेव स्यात्। तेन 'पर्युदासलभ्याशास्त्रीयेऽपि' इत्यादि ज्ञाप्यते। एवञ्च अनिष्ठायामिति पर्युदासलभ्यस्य षत्वाभावस्यापि शास्त्रीयत्वेन स्थानिवद्भावप्रवृत्त्या निष्ठात्वस्य सौलभ्यात्। निष्ठात्वस्य शास्त्रीयत्वेऽपि तत्प्रयुक्तकार्याभावस्य अशास्त्रीयत्वेन शङ्का कृता।

नित्यतया इति। कृते अकृतेऽपि यत् प्राप्नोति तन्नित्यम्। 'विस्कन्नः' इत्यत्र षत्वे कृते, अकृतेऽपि नत्वं प्राप्नोति। षत्वं न तथा, कृते नत्वे तदप्राप्तेः; स्थानिवद्भावं विना कृत्त्वाभावात्। यदा तु अनिष्ठायामिति प्रसज्यप्रतिषेध आश्रीयते तदा प्रातिपदिकसंज्ञाप्रतिषेधस्य शास्त्रीयत्वेन स्थानिवद्भावेन प्राप्तस्य षत्वस्य व्यावृत्तये अनिष्ठायामिति कतव्यम्। एवञ्च पूर्वोक्तज्ञापनासम्भवेन लक्ष्यानुसारिव्याख्यानादेव ज्ञापकसिद्धः उक्तोऽर्थः सिध्यतीति बोध्यम्।

समाधान—'शाधि' इसमें विशेष विहित 'शा हौ' इससे शादेश होने पर झलन्तत्वाभाव के कारण 'हुझल्भ्यो' इससे धि आदेश प्राप्त नहीं था। असिद्धवत्सूत्र के द्वारा शादेश की असिद्धता होने से धिभाव की सिद्धि होती है। एतदर्थ स्थानिसम्बन्धी कार्य के लिये उक्त सूत्र चरितार्थ है।

शंका—**न चाप्रत्ययेति**। 'अप्रत्यय' इसके प्रसज्य प्रतिषेध होने पर प्रत्ययान्त को प्रातिपदिकसंज्ञा का निषेध होने से उक्त संज्ञा का अभाव शास्त्रीय कार्य हो सकता था। पर्युदासपक्ष में प्रत्ययान्तभिन्न उक्त संज्ञा के उद्देश्य होने से प्रत्ययान्त में उक्त संज्ञा का अभाव फलितार्थ है, शास्त्रविहित नहीं। अतः अशास्त्रीय होने से उक्त संज्ञा के अभावप्रयोजक प्रत्ययान्त का अतिदेश स्थानिवत्सूत्र के द्वारा नहीं होगा ?

समाधान—'वेः स्कन्देः' इस सूत्र के अनिष्ठा पद का पर्युदासपक्ष में निष्ठाभिन्नतत्सदृश सादृश्यकृत्व धर्म से मान कर अर्थ किया गया। इससे तिङन्त स्थल में इसकी प्रवृत्ति नहीं हुई। क्योंकि यहाँ कृत् प्रत्यय नहीं है। 'अनिष्ठायाम्' इसके ग्रहण का प्रयाजन 'विस्कन्नः' इसमें षत्वाभाव 'रदाभ्याम्' इससे निष्ठानत्व के अनन्तर स्थानिवद्भाव से ही निष्ठात्वातिदेशन में करना

केचित्तु "भाष्ये तत्स्थानापन्ने तद्धर्मलाभस्य तत्कार्यस्य च लोकन्यायेनैव सिद्धेर-यमतिदेशः स्वं रूपमित्येतच्छास्त्रसत्त्वाद्धन्तेः कार्यं वधौ न स्यादिति इत्युक्तम्। एवञ्च 'स्वं रूपम्' (१ । १ । ६८) इति शास्त्राविषये तेन सिद्धिरिति सूचितम्।

एवञ्चाशास्त्रीयस्यापि धर्मस्यातिदेशो भवत्येव। अतिप्रसङ्गस्तु लक्ष्यानुसारेण क्वचिल्लोकन्यायानाश्रयणेन परिहरणीयो यदि प्राप्नोति। एवञ्च न कश्चिद्दोषः।

'न पदान्त' (१ । १ । ५८) इति सूत्रे 'ब्राह्मण-कण्डूतिः' इत्युदाहरणाच्च क्वचित्तदनाश्रयणम्। तत्र हि कण्डूयतेः क्तिचि तन्नाल्लोपे तस्य स्थानिवत्त्वादुवङि यणि वाऽनादिष्टादचः पूर्वत्वे स्थानिद्वारके गृह्यमाणे ऊठ् न स्यात्" इत्याहुः।

लाघवमनुसरतां मतमाह—केचित्तु इति। 'स्वं रूपम्' इति शास्त्रस्य सत्त्वेन यत्र शब्दानां स्वरूपग्रहणं प्राप्तं तत्र 'तत्स्थानापन्नस्तद्धर्मं लभते' इति लोकन्यायस्य बाधात् स्थानिवत्सूत्रस्य आरभ्यमाणस्य प्रवृत्तिर्वाच्या। यथा हन्तेरुच्यमानम् आत्मनेपदं स्वरूप-भेदात् वधेर्न स्यात्। तण्डुलान् इत्यादौ तु स्वरूपग्राहकस्य 'स्वं रूपम्' इति सूत्रस्य शब्द-शास्त्रीयसंज्ञाया अविषयत्वेन अप्रवृत्त्या लोकन्यायेनैव प्रत्ययत्वात् तदन्तस्य अर्थतः सिद्धत्वेन प्रातिपदिकसंज्ञाया अभाव उपपद्यते। लोकन्यायः अशास्त्रीये कार्येऽपि प्रवर्तते। तथा च एतन्न्यायाश्रयणेन यत्र दोषोद्भावनम्, तत्र न्यायानाश्रयणेन समा-धेयम्।

एवञ्च इति। तेन न्यायेन सिद्धौ च। न कश्चिदिति। पूर्वोक्तो दोषो न। 'नचाप्रत्यय इत्यस्य पर्युदासत्वे' इत्यादिग्रन्थेन उक्तो दोषो नेति भावः।

न्यायानाश्रयणस्य फलमाह—न पदान्तेति। अत्र सूत्रे भाष्ये ब्राह्मणकण्डूतिरित्यत्र यदा 'कण्ड्वादयो धातवः' इति पक्षः तदा 'क्तिच्क्तौ च संज्ञायाम्' इत्यनेन क्तिचि प्रत्यये अकार-यकारयोर्लोपे अकारस्य स्थानिवद्भावात् उवङि आदेशे प्रातिपदिकपक्षे यणि वकारे कृते 'च्छ्वोः शूडनुनासिके च' इत्यनेन ऊठि च कृते उक्तरूपं सिध्यति। अत्र लोपस्य स्थानिभूतो योऽकारः तस्मात् पूर्वत्वेन दृष्टत्वस्य लोकन्यायेन उकारस्थानिके वकारे आरोप्य वकारस्यापि स्थानिभूतादचः पूर्वत्वेन दृष्टत्वस्य सत्त्वात् 'अचः परस्मिन्' इत्यनेन स्थानिवद्भावाद् अकारेण व्यवधानाद् ऊठ् न स्यात्। तथा चोक्तरूपासिद्धि-प्रसङ्गः। अत एतदनुरोधेन अशास्त्रीयातिदेशस्य क्वचिदनाश्रयणं कल्प्यते। एवञ्च स्थानिभूतादचः पूर्वत्वस्य अशास्त्रीयतया नातिदेश इति ऊठो नाप्राप्तिरिति।

होगा। षत्वाभाव पर्युदासपक्ष में अशास्त्रीय कार्य होने से तत्प्रयोजक निष्ठात्वातिदेश न होने के कारण 'अनिष्ठायाम्' इसके वैयर्थ्य से पर्युदासलभ्य अशास्त्रीय भी शास्त्रतात्पर्यविषय कार्य में शास्त्रीय कार्य के समान व्यवहार की कल्पना होती है।

अतः उक्त स्थलों में स्थानिवद्भाव की प्राप्ति सुलभ है।

यदि 'अनिष्ठायाम्' इसमें प्रसज्य प्रतिषेध है तो लक्ष्यानुरोध से ही उक्तार्थ की कल्पना होगी। इस पक्ष में तिङन्त में भी षत्व होता है, या विपूर्वक स्कन्द का तिङन्त में प्रयोग नहीं होता। दोनों में एक स्वीकार्य होगा।

माश्रित्य 'अनचि च' (सू०४८) इति द्वित्वनिषेधो न शङ्क्यः; 'अनल्विधौ' इति तन्निषेधात् ।

अत एव अर्थवत्सूत्रशेषे 'अप्रत्ययः' इत्यस्य पर्युदासत्वमेवोक्तं भाष्ये । तत्र पक्षे च 'काण्डे' इत्यत्र पूर्वान्तवद्भावेन प्रत्ययान्तभिन्नत्वाद् दोषः शङ्कितः, न तु स्वाश्रयाप्रत्ययान्तत्वेन ।

अत एव=अतिदिश्यमानधर्मविरुद्धस्वाश्रयप्रयुक्तकार्याभावादेव । अतएवेत्यस्य तत्र पक्षे काण्डे इत्यनेन अग्रिमेणापि सहान्वयो बोध्यः ।

अर्थवत्सूत्रशेषे इति । अन्यथा प्रसज्यप्रतिषेध एव वाच्यः स्यात्, न पर्युदासः । प्रसज्यप्रतिषेधे प्रत्ययान्तस्य प्रातिपदिकसंज्ञा नेत्यर्थस्य सद्भावात् स्थानिवत्त्वेन प्रत्ययान्ततया प्रतिषेधः स्यात् । पर्युदासपक्षे तु स्थानिवद्भावेन प्रत्ययान्तत्वेऽपि स्वाश्रयं प्रत्ययान्तभिन्नत्वमादाय प्रातिपदिकत्वं स्यात् ।

अतएव 'काण्डे' इत्यत्र पूर्वान्तवद्भावेन काण्डवृत्तिप्रत्ययान्तभिन्नत्वं कृतैकादेशे काण्डे इत्यत्रानीय प्रातिपदिकसंज्ञा भाष्ये आपादिता । यदि अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभाव इति पूर्वोक्तनियमो न स्यात्, तदा स्थानिवत्त्वेन प्रत्ययान्तत्वेऽपि स्वतः प्रत्ययान्तभिन्नत्वसत्त्वेन तत एव प्रातिपदिकत्वापादनं विहाय पूर्वान्तवद्भावेन तदापादनानुधावनं व्यर्थं स्यात् । तस्मात् स नियमो भाष्यारूढ इति ।

'स्वं रूपम्' इसके द्वारा शब्दस्वरूप के ग्रहण में 'तत्स्थानापन्नः' इत्यादि पूर्वोक्त लोकन्याय से स्थानापन्न आदेश तद्धर्म और तत्कार्य का लाभ नहीं कर सकता । अत एव 'हन् को विधीयमान आत्मनेपद वध को प्राप्त नहीं होगा'—ऐसा भाष्य में कहा गया है । एवञ्च 'स्वं रूपम्' इस सूत्र के अविषयस्थल में लोकन्याय से सिद्धि होगी । ऐसी दशा में इस न्याय से अशास्त्रीय धर्मातिदेश भी होता ही है । लोकन्याय से यदि अतिप्रसङ्ग प्राप्त हो तो न्यायानित्यत्व के द्वारा उसका परिहार करना चाहिये । इस प्रकार कहीं दोष नहीं है ।

न्यायनित्यत्व में 'न पदान्त' सूत्रस्थ 'ब्राह्मणकण्डूतिः' यह भाष्योदाहरण प्रमाण है । कण्डूय शब्द से 'क्तिच् क्तौ च संज्ञायाम्' इसमें क्तिच् प्रत्यय अल्लोप यलोप के अनन्तर अल्लोप को स्थानिवद्भाव होने से उवङ् आदेश करने पर 'च्छ्वोः शूड्' इससे ऊठ् के अनन्तर दीर्घ होने से उक्त प्रयोग की सिद्धि होती है । यद्यपि स्थानिभूतादचः पूर्वत्व रूप से दृष्टत्व धर्म उवङ् के उकार में नहीं है, क्योंकि यकार के लोप के बाद उवङ् आदेश अतिदेश के द्वारा होता है; तथापि स्थानिवृत्ति अशास्त्रीय धर्म का भी अतिदेश न्याय से हो जाने के कारण 'अचः परस्मिन्' इससे स्थानिवद्भाव द्वारा अकारव्यवधान से ऊठ् नहीं होगा । तथा च तादृश भाष्यप्रयोग की असङ्गति हो जायगी । न्याय को अनित्यता स्वीकार करने पर प्रकृत प्रयोग में उसकी अप्रवृत्ति होने से अचः पूर्वत्वेन दृष्टत्व के अतिदेशाभाव के कारण 'अचः परस्मिन्' इसकी अप्रवृत्ति होने से ऊठ् की अप्रवृत्ति-संभावना नहीं है ।

अत एवेति । पर्युदासलभ्य अशास्त्रीय धर्म में भी शास्त्रीय धर्मातिदेश को स्वीकार करके ही 'अप्रत्यय' इसका पर्युदासपरक व्याख्यान भाष्यकार ने किया है । पर्युदासपक्ष में 'काण्डे' इसमें

'क्षियो दीर्घात्' (८ । २ । ४६) इति सूत्रे भाष्येऽपि **अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभाव इति स्फुटम् । तत्र हि 'क्षियः' इत्यत्रेयङर्थं प्रकृतिवदतिदेशे स्वाद्यनुत्पत्तिमाशङ्क्य 'एवं तर्हि आतिदेशिकानां स्वाश्रयाणि न निवर्त्तन्ते' इति समाधाय, अतिदिश्यमानधर्मविरुद्धस्वाश्रयनिवृत्तेरावश्यकत्वाभिप्रायेण—'अथाप्येतन्न' इत्याशङ्क्य 'निर्देशसामर्थ्याद्विभक्तिः' इत्युक्तम् । 'असिद्धवत्' सूत्रे (६ । ४ । २२) च कैयटे स्फुटमेतत् ।**

यत्तु 'गाङ्कुटादि'सूत्रे (१ । २ । १) भाष्ये **'सृजिदृशोः' (६ । १ । ५८) इत्यत्राकितीति पर्युदासात् 'सिसृक्षति' इत्यत्र 'हलन्ताच्च' (१ । २ । १०) इति कित्त्वातिदेशेऽपि अमागममाशङ्क्य प्रसज्यप्रतिषेधाश्रयणेन समाहितम्, तत्तु वार्त्तिककृदुक्तमुपायान्तरं बोद्धव्यम् ।**

'क्षियो दीर्घात्' इति सूत्रे भाष्ये 'प्रकृतिवदनुकरणं भवति' इति न्यायेन प्रकृतसूत्रघटकक्षिय इत्यत्र इयङादेशस्य सिद्धये धातुत्वातिदेशे कृते धातुभिन्नत्वाभावात् प्रातिपदिकसंज्ञाया प्राप्त्या विभक्त्युत्पत्तिर्न स्यात् । 'प्रकृतिवदनुकरणम्' इत्यनेन धातुत्वस्य अतिदेशानभ्युपगमे इयङादेशः 'अचि श्नुधातु' इत्यादिना न स्यात् इति शङ्कित्वा 'एवं तर्हि अतिदेशे स्वाश्रयाणि कार्याणि न निवर्तन्ते' इति समाहितम् । ततः अतिदिश्यमानधर्मविरुद्धस्वाश्रयप्रयुक्तकार्याभावस्य निर्णीततया स्वाश्रयप्रयुक्तकार्यं प्रातिपदिकत्वं न प्राप्नोति । अतिदिश्यमानधातुत्वस्य स्वाश्रयधातुभिन्नत्वस्य च परस्परं विरुद्धत्वात् इत्यभिप्रेत्य 'अथाप्येतन्न' इति उक्त्वा 'निर्देशसामर्थ्याद् विभक्तिः' इति उक्तम् । **एवं तर्हीति** । दीर्घे सति । आतिदेशिकानाम् = शब्दानामिति शेषः । **स्वाश्रयेति** । अन्यार्थं स्वाश्रयप्रयुक्तकार्यनिवृत्तेः ।

प्रत्ययान्तभिन्नत्व के अशास्त्रीय का प्रयोजक होने से स्थानिवद्भाव की अप्राप्ति के कारण स्वतः प्रत्ययान्तभिन्नत्व रहने पर भी दोष की शङ्का नहीं की, किन्तु पूर्वान्तवद्भाव से काण्डवृत्ति प्रातिपदिकत्व का एकादेशविशिष्ट में अतिदेश के द्वारा 'ह्रस्वो नपुंसके' इससे ह्रस्व की आशङ्का की है ।

'क्षियो दीर्घात्' इसके भाष्य में 'क्षियः' इसमें इयङ् की सिद्धिके लिये 'प्रकृतिवदनुकरणं भवति' इस परिभाषा से धातुत्वातिदेश होने पर प्रातिपदिकसंज्ञा के विरह से प्रयुक्त सुप् की अनुत्पत्ति शङ्का का आतिदेशिक = अतिदेशसिद्ध में स्वाश्रयप्रयुक्त कार्यों की निवृत्ति नही होती— इसके द्वारा समाधान किया । इसके अनन्तर अतिदिश्यमान धर्मविरुद्ध स्वाश्रयविरुद्ध कार्य के अभाव को अतिदेशस्वभावसिद्ध मानकर उक्त समान की असङ्गति को ध्यान में रखते हुये 'क्षियः' इस निर्देश के सामर्थ्य से विभक्त्युत्पत्ति का समाधानान्तर किया ।

भाष्यविरोधी शङ्का और समाधान का उपन्यास करते हैं--यत्तु इति । 'सृजिदृशोः' इसमें अकिति के पर्युदासाश्रयण पक्ष में 'सिसृक्षति' इसमें 'हलन्ताच्च' इससे सन् को किद्वद्भाव होने पर भी स्वाश्रय अकित्वप्रयुक्त अमागम की आशङ्का का कीर्तन, इस प्रकार प्रसज्यप्रतिषेध के आश्रयण के द्वारा अमागम की व्यावृत्ति असङ्गत है; क्योंकि स्वाश्रयप्रयुक्त कार्य का अभाव स्वीकार करने से पर्युदास में भी दोष नहीं है । इस प्रकार के विरोध को वार्त्तिकार का उपायान्तर मानकर परिहृत समझना चाहिये । उपायान्तरप्रदर्शन से उपाय दूषित नहीं होता ।

'अनल्विधौ' इति विधिग्रहणात् 'अलाश्रये विधौ' इत्यर्थात् यत्र विधौ शब्दतः स्थानिस्थान्यवयवाऽन्यतरालवृत्तिधर्मवतस्तेन तस्मात्तस्य तस्मिंस्तदादेरित्यादिप्रकारेण विशेष्यतया विशेषणतया वा अलाश्रयणं तत्र निषेधः। 'व्यूढोरस्केन', 'द्यौः', 'द्युभ्याम्', 'क इष्टः', 'प्रपठ्य' इत्युदाहरणानि।

ननु 'सनिदृशोर्झल्यमकिति' इति सूत्रे अकितीत्यत्र पर्युदासपक्षे सिसृक्षतीत्यत्र 'हलन्ताच्च' इति सूत्रेण कित्त्वेऽपि स्वतः किद्भिन्नत्वेन अमागममाशङ्क्य प्रसज्यप्रतिषेधाश्रयणेन समाहितं भाष्यकृता। प्रसज्यप्रतिषेधे किति परे नेत्यर्थस्वीकारेण किद्वद्भावे अमागमस्य निषेधसिद्धेरिति भावः। एवञ्च शङ्कासमाधानपरं भाष्यं विरुध्येत। पर्युदासपक्षेऽपि स्वाश्रयप्रयुक्तकार्याभावस्य पूर्वं निर्णीततया तथा शङ्कितुमशक्यत्वादिति चेत्, न; तस्य वार्त्तिकानुसारिणः उपायान्तरस्य प्रदर्शकतया सिद्धान्तप्रतिपादकत्वाभावात्।

ननु 'अनल्' इत्येतावति उच्यमानेऽपि सम्बन्धसामान्यषष्ठ्या निर्वाहे विधिग्रहणं किमर्थमत आह—**अनल्विधाविति**। अलाश्रयो विधिरित्येवं मध्यमपदलोपिसमासार्थं विधिग्रहणस्य आवश्यकत्वात्। तथा च अलाश्रये विधौ अर्थात् अल्मात्रवृत्तिधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रये विधौ इत्यर्थः। अल् च स्थानिरूपः, स्थान्यवयवरूपो वा। तादृशाल्मात्रवृत्तिधर्मवता अर्थात् तन्निमित्तीकृत्य जायमाने तस्मात्परस्य तस्य स्थाने तस्मिन् परे एवं तादृशधर्मवद्घटिते च विधौ न स्थानिवदित्यर्थः। तद्घटितत्वप्रवेशेन विशेषणतयाऽपि प्रविष्टस्य अल्मात्रवृत्तिधर्मवतो ग्रहणं सिद्धम्। क्रमेणोदाहरणम्—व्यूढं विशालम् उरो यस्येति विग्रहे बहुव्रीहौ कपि **व्यूढोरस्कः**। अत्र अयोगवाहानामट्प्रत्याहारे पाठेन विसर्गे अट्त्वस्य सत्त्वात्, स्थानिवद्भावेन सकारेऽपि वृत्तित्वात् अट्व्यवधाने 'अट्कुप्वाङ्' इति णत्वं स्यात्। अतस्तृतीयान्तेन अला इत्यनेन सह समासेन लब्धस्य तन्निमित्तकस्येत्यर्थस्य बलात् अनल्विधाविति प्रतिषेधः सिद्धः। **द्यौरि**त्यत्र 'दिव औत्' इत्यनेन औदादेशे स्थानिवद्भावेन वकारवृत्तिहल्त्वमादाय सुलोपः 'हल्ङ्याब्भ्यः' इत्यादिना प्राप्तः, हलः परस्य लोपविधानात् पञ्चम्यन्तसमासलब्धस्य 'अलः परस्य विधौ' इत्यर्थकेन तेन प्रतिषेधात् न सुलोपः। **द्युभ्यामि**त्यत्र 'दिव उत्' इत्यनेन उत्वे

अनल्विधौ इति। विधि शब्द का उपादान न करने पर किसी एक विभक्ति का निर्देश होने से अल्निमित्तक अल्स्थानिक आदेशे इत्यादि अनेक रूप में आधीयमाण जल् का संग्रह नहीं होगा। विधि ग्रहण करने पर अनेक विभक्त्यन्त के साथ समास होने से अल् निमित्त से परवर्त्ती अल् के स्थान में और परवर्ती अल् के होने पर जायमान कार्य में निषेध की सिद्धि हुई, क्योंकि अला, अलः, अलि विधौ—इस प्रकार त्रिविध समास द्वारा उक्तार्थ के संग्रह में सौकर्य है। यह प्राचीन मत है। ग्रन्थकार के मत में विधिग्रहण करने पर मध्यमपदलोपी समास—अलाश्रितो विधिः अल्विधिः। अल् स्थानिरूप या स्थान्यवयवरूप दोनों प्रकार का, एवं अल् का आश्रयतया प्राधान्य या अप्राधान्य दोनों रूप से विवक्षित है। विसर्ग का अट् प्रत्याहार में पाठ होने से इसमें अट्त्व है।

शब्दत इत्युक्ते 'अग्रहीत्' इत्यादौ 'इट ईटि' (८।२।२८) इति सिद्धयति। दीर्घविधावत्र च 'इट' इति समुदायाश्रयणात्। अन्यथा टस्यानुबन्धत्वादिकारस्यैवोभयत्राश्रयणमित्यल्विधित्वं स्यात्।

स्थानिवद्भवेन वल्त्वमादाय यकारलोपः प्राप्तः, अलो विधौ इति षष्ठी समासेन अल्स्थानिकविधौ इत्यर्थस्य सम्भवेन स्थानिवद्भावे प्रतिषिद्धेन लोपप्रसङ्गः। **क इष्टः** अत्र यज् धातोः क्तप्रत्यये सम्प्रसारणे स्थानिवद्भावेन यकारवृत्तिहल्त्वमादेशे आनीय 'हशि च' इत्यनेन उत्वं प्राप्तम्, अलीति सप्तम्यन्तव्याख्यानेन परिहरणीयम्। अल्वृत्तिधर्मस्य वल्त्वस्य विशेषणतया वलादिनिमित्तके इटि आश्रिततया प्रपठ्येत्यत्रापि स्थानिवद्भावस्य निषेधः सिद्धः। अन्यथा क्त्वावृत्तिवल्त्वातिदेशेन इडागमः स्यात्। **शब्दत इत्युक्तेरिति।** सूत्रे उपात्तशब्दद्वारा अल्साधारणो धर्मो गृह्यते। अग्रहीदित्यत्र दीर्घस्य इकारस्थानिकत्वेऽपि 'ग्रहोऽलिटि दीर्घः' इत्यस्य 'ग्रहेरिटो दीर्घः' इत्येवं व्याख्यानेन इटः शब्दत उपादानात् न तस्य अल्मात्रवृत्तिधर्मवत्त्वमिति न निषेधः। शब्दत इत्यनङ्गीकारे टकारस्य इत्संज्ञकत्वेन इकारस्येव वस्तुतो दीर्घविधौ सलोपविधौ च उभयत्र स्थानित्वेन समाश्रयणात् अलाश्रविधित्वेन निषेधः स्यात्।

अनेन सूत्रेण सामान्यविशेषयोरुभयोरतिदेशः, अन्यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमित्युक्ते, केन रूपेण तत्राचरितव्यमित्याकाङ्क्षायां ब्राह्मणसामान्यधर्माणामुपस्थितत्वात् तैरेव पूर्वोक्ताकाङ्क्षायाः प्रशमनात् न माठरकौण्डिन्यादिगतानां ब्राह्मणविशेषधर्माणामतिदेशः; आकाङ्क्षायाः विरहात्। तथेहापि स्थानिवद्भावातिदेशेन उपस्थितसामान्यधर्मैः तद्व्याप्यसामान्यधर्मैश्च स्थानिगतैः केन धर्मेणातिदेशः?—इत्याकाङ्क्षायाः निवृत्तेः न अनाकाङ्क्षितैस्तद्विशेषधर्मैः सादृश्यं ग्रहीतुं शक्यमित्येतन्मूलकेन सामानातिदेशे विशेषानतिदेशः इति सादृश्यप्रतियोगितावच्छेदकस्य, सादृश्यमस्य गृह्यते, तदेव सादृश्यप्रतियोगि, तस्मिन् प्रतियोगिता, तस्यावच्छेदकः प्रतियोगिवृत्तिधर्मः, तस्य व्यापकः तदपक्षेयाऽधिकवृत्तिधर्मः तस्यैवातिदेशः। न्यायेन विशेषातिदेशाभावे पठित्वेत्यादौ क्त्वाप्रत्ययस्य इडागमे इडादेरपि क्त्वसम्भवात् न वलादित्वं क्त्वः समान्यधर्मः, किन्तु क्त्वो विशेषधर्मतया तस्य अनतिदेशात् विशेषणतया अलः आश्रयणे स्थानिवद्भावप्रतिषेधार्थं कृतस्य विधिग्रहणस्य वैयर्थ्यं स्यात्। सम्बन्धसामान्यषष्ठ्या 'अलः' इति निर्देशेनापि

एवञ्च 'व्यूढोरस्केन' इस में विसर्गवृत्ति अट्त्व का सकार में अतिदेश होने से 'अट्कुप्वाङ्' इसके द्वारा प्राप्त णत्व नहीं होता; क्योंकि 'अटा व्यवाय' इस प्रकार अलाश्रयविधि है। 'द्यौः' इस में 'दिव औत्' इससे वकार को औत् होने पर स्थानिवद्भाव के द्वारा हल्त्वातिदेश से हल्ङ्यादि सूत्र से सुलोप नहीं हुआ। क्योंकि अलः परस्य विधिः इसके अनुसार अज्रूप हल् से पर सु की लोपविधि कर्त्तव्य होने से अलाश्रयविधिप्रयुक्त निषेध हो जाता है। 'द्युभ्याम्' इसमें स्थानिवद्भाव से 'दिव उत्' इस से विहित वकारवृत्ति उकार में वत्वातिदेश से 'लोपो व्योः' इत्यादि से लोप नहीं हुआ। अलः स्थाने विधौ इस अर्थ के अनुसार उ का आदेश वकाररूप अल् के स्थान में होने से अलाश्रय विधि है, अतः प्रतिषेध हो जाता है।

अत्र सूत्रे विशेषातिदेशोऽपि। अन्यथा इडादेरपि क्त्वः सत्त्वात् वलादित्वस्य तद्विशेषधर्मत्वात् उपस्थितधर्मैस्तद्व्यापकधर्मैश्च विध्याकाङ्क्षापूरणे सति तदतिरिक्त-विशेषग्रहणे मानाभाव इत्येतन्न्यायमूलकेन सामान्यातिदेशे विशेषानतिदेशेन सिद्धौ विशेषणतयाऽलाश्रयणे निषेध इत्येतत्प्रतिपादकस्यानल इत्येव सिद्धे कृतस्य विधिग्रहणस्य वैयर्थ्यं स्यात्। हलादिक्ङिन्निमित्तके त्वप्रतिषेधकात् 'न ल्यपि' (६।४।६९) इति लिङ्गाच्च।

अल्निमित्तकस्य इत्यनेनार्थेन अल्स्थानिकस्य अलः परस्य इत्यादिपूर्वोक्तविधीनां संग्रहात्। अतोऽनेन विशेषातिदेशोऽपि स्वीकर्तव्यः। विशेषातिदेशे सति वलादित्वमति-दिश्य इट् प्राप्नोति, अत उक्तार्थलाभाय विधिग्रहणमावश्यकम्।

प्रमाणान्तरमप्याह–हलादि इति। न ल्यपीति सूत्रेण ल्यपि परे इत्वं प्रतिषिध्यते।

यथा प्रदायेत्यत्र क्त्वावृत्तिकित्वस्य स्थानिवद्भावेन ल्यपि सत्त्वात् 'घुमास्था' इति प्राप्तमित्वमनेन प्रतिषिद्धम्। 'न क्त्वा सेट्' इत्यनेन इट्सहितस्य तस्य कित्वं निषिध्यते। तथा च क्त्वाप्रत्ययः क्वचित् कित्, क्वचिच्चाकित्, कित्वं न क्त्वामात्रे वृत्ति, किन्तु तद्-विशेषवृत्तिर्धर्मः। एवं हल्त्वमपि क्त्वामात्रे नास्ति, इडादेरपि तस्य सत्त्वात् इति तदपि तद्विशेष धर्म एव। अतोऽनयोरतिदेशाभावेन हलादिक्ङिन्निमित्तकस्येत्वाप्रवृत्त्या-तत्प्रतिषेधार्थं कृतस्य 'न ल्यपि' इत्यस्य वैयर्थ्यं स्यात् इत्येतदपि तत्र मानम्।

नच विशेषातिदेशस्वीकारेऽपि हल्त्वस्य कित्वस्य च अल्मात्रवृत्तितया पुनरपि स्थानिवद्भावो न स्यात् इति वाच्यम्; शब्दतः इत्युक्त्या 'समासे नञ्' इति सूत्रे स्थानि-

---

कः इष्टः—यहाँ यज् धातूत्तर क्त प्रत्यय और यकार को सम्प्रसारण करने से निष्पन्न इष्ट पद में स्थानिवद्भाव के द्वारा इकार में यकारातिदेश से 'हशि च' इसकी प्रवृत्ति नहीं हुई। क्योंकि 'अलि विधिः' इसके अनुसार हश् रूप अल्परक विधि उत्वविधि में निषेध हो जाता है। एवं 'प्रपठ्य' इसमें क्त्वा को ल्यप् होने के बाद स्थानिवद्भाव से ल्यप् वल्त्वातिदेश होने पर वलादि-निमित्तक इडागम नहीं होता। बलादि में अप्रधानतया प्रविष्ट वल् रूप अल् का आश्रयण होने से प्रतिषेध हो जाता है—यह भाव है।

'विधाय' में उपान्तरूप से स्थानिता की विवक्षा है—इसी आशय से शब्दतः ऐसा मूल में कथन है। 'अग्रहीत्' यहाँ 'ग्रहोऽलिटि दीर्घः' इससे दार्घ यद्यपि अनुबन्ध टकाररहित लक्ष्य में उपस्थित इकारमात्र को होता है; तथापि 'इटो दीर्घः' इस प्रकार स्थानी का शब्दतः निर्देश होने से स्थानिता उपात्तरूप इट् में इट्त्व के अल्मात्रवृत्ति धर्म न होने कारण अनल्विधौ इसकी प्रवृत्ति नहीं होती। इसीलिये स्थानिवद्भाव से कृतदीर्घ में इट्त्वातिदेश के द्वारा "इट ईटि" इस सूत्र से सिच् का लोप सिद्ध होता है। शब्दतः इसका आश्रयण न करने पर वस्तुतः टकार का अनुबन्ध होने से इकारमात्र की सिज्लोप एवं दीर्घविधि में स्थानी रूप से अपेक्षा होने से अलाश्रयविधिप्रयुक्त निषेध दुर्वार हो जायगा।

स्थानिवद्भाव के द्वारा सामान्यातिदेश और विशेष्यातिदेश—दोनों हो होते हैं।

शङ्का—'ब्राह्मणवत् अयम् आचरति' इस वाक्य से ब्राह्मण के समान आचरण का बोध

अनुबन्धकार्ये त्वनल्विधाविति निषेधो न; अनुबन्धानामनेकान्तत्वात्, एकान्तत्वेऽपि शिद्ग्रहणेन तेषामल्व्यवहाराभावज्ञापनात् । 'नानुबन्धकृतमनेकाल्त्वम्' (प० ६) इति ज्ञापयतीति भाष्येऽल्त्वव्यवहाराभावबोधनद्वारेति शेषः ।

तथा क्त्वः सानुबन्धकस्य उपादानात् स्थानितावच्छेदकस्यालमात्रवृत्तिधर्मत्वाभावात् अनल्विधावित्यस्याप्रवृत्तेः। उपायान्तरमाह—अनुबन्धकार्ये अनल्विधाविति न प्रवर्तते = न स्वीक्रियते । अनुबन्धानामनवयवत्वपक्षे ते हि न बोधकावयवा अतोऽनुबन्धरहितस्य ल्यबादेशेन कित्त्वस्य स्थान्यवयवाल्वृत्तित्वाभावात् निषेधाप्रवृत्तेर्दोषाभावात् । हल्त्वस्य च स्वत एव सिद्धत्वात् नातिदेशापेक्षा। अनुबन्धानां बोधकावयवत्वमिति सिद्धान्ते तु 'अनेकाल्' इति सूत्रे शिद्ग्रहणेन अनुबन्धेषु अल्त्वव्यवहारो न भवतीति ज्ञाप्यते। अन्यथा अनुबन्धसहितस्यौशादेरनेकाल्त्वेन अनेकाल्त्वादेव सर्वादेशत्वे सिद्धे शिद्-ग्रहणं व्यर्थम्, अतः सामर्थ्यात् अनुबन्धानामल्त्वव्यवहाराभावज्ञापनात्, अल्पदेन न तेषां ग्रहणमिति निषेधाप्रवृत्तेः। नानुबन्धकृतमिति परिभाषा ज्ञाप्यते इति भाष्यं तु अल्त्व-व्यवहाराभावप्रतिपादनद्वारा परिभाषा सिध्यतीति तात्पर्येणेति न ज्ञाप्यते इति वचनेन विरोधः।

अनुबन्धकार्ये अनल्विधावित्यस्याप्रवृत्तिर्भाष्याभिमता ।

होता है। किन किन ब्राह्मण धर्मों से समानता है ? ऐसी आकांक्षा होने पर उपस्थित ब्राह्मण के सामान्य धर्म तथा व्यापक सामान्य धर्म से समानतारूप विधि की आकाङ्क्षा शान्त होने के कारण ब्राह्मणविशेषधर्मग्रहण में मावाभाव है। इससे सिद्ध 'सामान्यातिदेशे विशेषानतिदेशः' इस न्याय से विशेषातिदेश यहाँ नहीं होगा ?

समाधान—विशेषातिदेश न मानने पर 'पठित्वा' इत्यादि में इडागम होने से क्त्वा वलादि नहीं है। अतः वलादित्व इसका सामान्य धर्म न होने के कारण स्थानिवद्भाव की स्वतः अप्रवृत्ति होने से एतदर्थ अप्राधान्येन अल् के आश्रयण में भी निषेध-प्रवृत्ति के लिये किये गये विधिग्रहण का वैयर्थ्य हो जायगा।

हलादि ङित् को निमित्त मानकर जायमान इत्त्व का निषेधक 'न ल्यपि' सूत्र भी उक्तार्थ में प्रमाण है। 'न क्त्वा सेट्' इससे सेट् क्त्वा के कित्त्व का निषेध होने से क्त्वा दोनों प्रकार का मिलता है। अतः कित्त्व क्त्वा का विशेष धर्म होने से स्थानिवद्भाव की प्राप्ति न होने के कारण 'धुमास्था' इत्यादि से इत्त्व की प्राप्ति नहीं थी। इसके निषेधार्थ 'न ल्यपि' इसकी क्या आवश्यकता है। अतः इसके चारितार्थ्य के लिये उक्तार्थ आवश्यक है।

शङ्का—विशेषातिदेश के स्वीकार करने पर भी कित्त्व, अल्घटितवृत्ति धर्म होने से स्थानिवद्भाव का निषेध हो जाने के कारण इत्त्व की प्राप्ति नहीं है, अतः निषेधार्थ 'न ल्यपि' इसका वैयर्थ्य पूर्ववत् प्राप्त है ?

समाधान—अनुबन्धबोध के अवयव होने से 'किति' इत्यादि रूप से विशेषणतया अला-श्रयण नहीं है। अतः निषेध की प्राप्ति नहीं होती । 'अनुबन्ध अवयव है'—इस सिद्धान्तपक्ष में 'अनेकाल्' सूत्र में शित् के ग्रहण से अनुबन्धों में अल्व्यवहाराभाव के ज्ञापन द्वारा दोष का वारण हो जायगा। भाष्य में परिभाषा का ज्ञापनप्रदर्शन उक्तार्थ ज्ञापन के द्वारा समझना चाहिये।

ध्वनितञ्चेदं 'क्ङिति च' (१।१।५) 'गाङ् लिटि' (२।४।४९) 'हलः श्नः' (३।१।८२) इति सूत्रेषु भाष्ये। तत्राऽऽद्ये 'यासुटो ङिद्वचनात् ङिदादेशा ङितो न इति ज्ञाप्यते' इत्युक्तम्। द्वितीये गाङो ङित्त्वस्य सानुबन्धकादेशे इत्कार्याभावज्ञापकतोक्ता, तिबाद्यादेशेषु पित्त्वासिद्ध्या दूषितं च ज्ञापकम्। अन्त्ये शानचः

अत्र मानमाह—ध्वनितञ्चेदमिति। ध्वननञ्च तदप्रवर्तनरूपम्। 'क्ङिति च' इत्यत्र लिङ्गतङित्त्वस्य स्थानिवद्भावेन विवादादारोपितस्य यदागमपरिभाषया यासुटोऽपि ङित्वात् यासुटो ङिद्विधानं व्यर्थमित्युक्त्या सामर्थ्यात् ङिदादेशा न ङित्व इति ज्ञाप्यते—इत्युक्तं भाष्ये।

'गाङ् लिटि' इत्यत्र भाष्ये इङो ङित्त्वस्य गाङादेशे स्थानिवद्भावेन अतिदेशात् तस्य सिद्धत्वात् पुनरादेशे कृतं ङित्करणम् अनुबन्धसहितादेशे इत्कार्याभावं ज्ञापयति इत्युक्तम्। एवं सति तिबाद्यादेशेषु स्थानिवृत्तिपित्त्वस्यातिदेशेन आदेशे उक्तज्ञापकेन वक्तुमशक्यतया ङित्वाद् गुणानापत्त्या दूषितञ्चैतद् ज्ञापकम्। एवं 'हलः श्नः शानज्झौ' इत्यत्र श्नावृत्तिशित्त्वस्य स्थानिवद्भावेन शानचि लाभात् तत्र शित्करणं व्यर्थमिति तत्सामर्थ्यात् अनुबन्धघटितधर्मस्य स्थानिवद्भावेन नाश्रयणमिति ज्ञाप्यते। तदुत्तरं वेद इत्यत्र णलोऽपित्त्वेन ञित्त्वाद् गुणनिषेधापत्त्या दूषितञ्च भाष्ये। अनुबन्धे अल्त्वव्यवहारसत्त्वे तु 'अनल्विधौ' इत्यनेनैव प्रतिषेधात् स्थानिवत्त्वाप्रवृत्त्या तत्तदनुबन्धनिर्देशस्यावश्यकतया तत्सामर्थ्याश्रयणेन तत्तज्ज्ञापनस्यासङ्गत्यापत्तेः।

अल्त्वव्यवहाराभावात् = अल्पदजन्यबोधाविषयत्वाभावात्। इत्कार्याभावज्ञापकता = स्थानिवत्तद्घटितधर्मनिमित्तककार्याभावज्ञापनम्। नच एतानि ज्ञापकानि सिद्धान्तिभाष्याभिमतानि न, किन्तु वार्तिककृदुक्तानि। गाङो ङित्वस्य शानचः शित्त्वस्य च भाष्यकृता प्रत्याख्यातत्वेन उक्तार्थज्ञापनासम्भवात्। यासुटो ङित्वमपि 'पिच्च ङिन्न ङिच्च पिन्न' इत्यादि नियमेन यासुटो ङित्वं न सम्भवति। अतो ङित्वविधान-

---

उक्तार्थ मूलोक्त सूत्र भाष्य में ध्वनित है। स्थानिवद्भाव के द्वारा तिङ् लकारवृत्ति ङित्व का तिबाद्यादेश में, यदागमपरिभाषा से ङित्व का यासुट् में अतिदेश हो जाने से 'लिङः परस्मैपदानाम्' इससे यासुट् का ङित् विधान व्यर्थ है। इसके सामर्थ्य से ङिदादेश ङित् नहीं होता—ऐसा ज्ञापन किया है।

द्वितीय सूत्र के भाष्य में इङ्धातुवृत्ति ङित्व का गा आदेश में अतिदेश हो जाने से ङित्व सिद्ध है। तदर्थं गाङ् आदेश में ङित् करण व्यर्थ है। अतः सानुबन्धक आदेश में इत्संज्ञाप्रयुक्त कार्य का अभाव ज्ञापित होता है। इसके बाद 'विवेद' इसमें तिप् के स्थान मे णलादेशोत्तर गुण का निषेध 'क्ङिति च' इसके द्वारा नहीं होता है; क्योंकि तिप् वृत्ति पित्व का णल् में अतिदेश होने से अपित् सार्वधातुक नहीं हुआ। उक्त ज्ञापक मानने पर स्थानिवद्भाव की अप्राप्ति होने से 'सार्वधातुकमपित्' इससे अपित् सार्वधातुक को ङित् होने से गुण निषेध हो जायगा। इसलिये इस ज्ञापन को दूषित किया। एवं 'हलः श्नः' इससे श्ना को शानच् आदेश होता है। श्नावृत्ति शित्व का शानच् में अतिदेश होने से शानच् का शित्करण व्यर्थ है। उसके सामर्थ्य से सार्वधातुक के स्थान

५०. अचः परस्मिन् पूर्वविधौ । १ । १ । ५७ । **अल्विध्यर्थमिदम् । परनिमित्तोऽजादेशः स्थानिवत् स्यात्, स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये ।**

शित्त्वस्य सार्वधातुकादेशेऽनुबन्धास्थानिवत्त्वज्ञापकत्वमुक्तम्, उक्तदूषणैरेव दूषितञ्च । अन्यथाऽनल्विधाविति निषेधेन तत्त्वाप्राप्त्या ज्ञापकत्वासङ्गतिः, तिबाद्यादेशेषु पित्त्वाद्यसिद्धिश्चेति बोद्धव्यम् ॥

अचः परस्मिन् (१ । १ । ५७) ॥ **आदेशग्रहणमनुवर्त्तते, तदनुरोधात् 'अचः' इति स्थानषष्ठी । 'परस्मिन्' इत्यादेशविशेषणम् ।** तदाह—परनिमित्त इत्यादि । **अच एवादेश इत्यर्थः । तेन मरुतमाचष्टे 'मारयति' इत्यादौ वृद्धिः । अत्र सूत्रे— प्रयोगे**

स्यावश्यकतया ज्ञापकत्वासम्भवात् अनुबन्धकार्ये' अनल्विधौ' इत्यस्याप्रवृत्तिर्न ध्वन्यते इत्यत आह—**तिबाद्यादेशेष्विति** । लक्ष्याणां बहूनामनुरोधेन अनुबन्धकार्ये 'अनल्विधौ' इति न प्रवर्तते । यदि इदं सूत्रं तत्रापि स्थानिवद्भावं प्रतिषेधेत, तदा वेद इत्यत्र तिपो मिपो वा 'विदो लटो वा' इति णलादेशे पित्त्वस्य णलि अभावेन अपित्त्वात् ङित्त्वे गुण-निषेधः स्यात् । तथा च इष्टरूपासिद्ध्या उक्तार्थस्य स्वीकारात् । 'न ल्यपि' इत्यनेन अनुबन्धकार्ये 'अनल्विधौ' इत्यस्याप्रवृत्तिः ज्ञापिता । लक्ष्यानुरोधोऽपि तदर्थे मान-मित्याशयः ॥

अचः परस्मिन् पूर्वविधौ ॥ आदेशपदानुवृत्त्या तदनुरोधेन = आदेशपदस्य योगे तदर्थान्वितः स्थानरूपषष्ठ्यर्थस्यैव सम्भवात् अच्पदोत्तरं षष्ठी स्थाने बोध्या । 'परस्मिन्' इति आदेशे विशेषणम् । तथा च परं निमित्तीकृत्य जायमानोऽच्स्थानिक आदेशः स्थानि-वद्भवतीति सूत्रार्थो निष्पन्नः । 'अच् एवादेशः' इत्यर्थो बोध्यः । अज्झलोरुभयोः स्थाने जातस्य आदेशस्य न स्थानिवद्भावः ।

परिष्कृतोऽर्थं इत्थम्—'अच् एव आदेशः' इत्यस्य अच्त्वप्रतियोगिकपर्याप्त्यनुयो-गितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकस्थानिताक आदेशः स्थानिवत् । यथा—

में जात आदेश अनुबन्धवृत्ति धर्म का अतिदेश नहीं होता । अतः शित्करण चरितार्थ है । अन्यथा अल्व्यवहार अनुबन्ध में स्वीकार करने पर 'अनल्विधौ' इससे निषेध होने से ङित्व शित्त्वादि की असिद्धि से ज्ञापकत्वोपपादन की असङ्गति हो जायगी । 'अचिनवम्' इत्यादि के पित्व के अतिदेश होने पर गुण का निषेध होने से इष्ट रूप की असिद्धि भी होगी । अतः अनुबन्धों में अल्व्यवहारा-भाव का ज्ञापन आवश्यक है ॥

अचः परस्मिन् इति । पूर्व सूत्र से अनुवृत्त आदेश पद के अनुसार 'अचः' इसमें स्थान षष्ठी है । 'परस्मिन्' यह आदेश का विशेषण है । इसी आशय से लिखा है—**परनिमित्त इति** । अचः स्थानिक आदेश से केवल अच् ही के स्थान में होने वाला आदेश विवक्षित है । अत एव मरुत् शब्द से णिच् टिलोप करने के अनन्तर उपधावृद्धि के कर्त्तव्य में स्थानिवद्भाव नहीं होता; क्योंकि णिनिमित्त से जायमान टिलोप अज् मात्र के स्थान में नहीं है, किन्तु अच् और हल्— उभय के स्थान में है ।

योऽच् तत्स्थानिक इत्यर्थः; न तु सूत्रे स्थानित्वेनोपात्ताच्स्थानिक इत्यर्थः। तेन णिलोपादेरनेन स्थानिवत्त्वं सिध्यति।

'कथयति' इत्यत्र अकारस्य लोपे णित्वात् वृद्धिः प्राप्ता, 'अचः' इति स्थानिवद्भावाद् अकारेण व्यवधानात् ककाराकारस्य उपधात्वाभावान्न वृद्धिः। अत्र पर्याप्तिसम्बन्धेन अच्त्वं यकारोत्तराकारे। एवञ्च पर्याप्तिसम्बन्धस्य प्रतियोगी अच् यः येन सम्बन्धेन वर्तते स तत्सम्बन्धस्य प्रतियोगी, यस्मिन् वर्तते स तत्सम्बन्धस्यानुयोगी। अच्त्वं प्रतियोगि यस्याः सा अच्त्वप्रतियोगिका पर्याप्तिः, तस्या अनुयोगी अकारः, तस्मिन् अनुयोगितावच्छेदको धर्मोऽकारत्वम्, तदवच्छिन्ना, तथा स्थानिताऽपि अकारे पर्याप्ता। एवञ्च स्थानिताप्रतियोगिकपर्याप्तेरनुयोगी अकारः तद्वृत्तिर्या अकारनिष्ठा अनुयोगिता तादृशानुयोगितावच्छेदकेन अकारत्वेन अवच्छिन्ना या अनुयोगिता तादृशी अनुयोगिता यस्या एवम्भूता पर्याप्तिः यस्याः स्थानितायाः तादृशस्थानिताक आदेशः स्थानिवदित्यर्थः। अच्त्वं यत्र पर्याप्तिसम्बन्धेन तत्रैव स्थानितापर्याप्तिसम्बन्धेन। अतो यदेव अच्त्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकं तदेव स्थानिताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकम् इति अच्त्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकमकारत्वं तदवच्छिन्ना अच्त्वप्रतियोगिकपर्याप्तेरनुयोगिता यथा, तथा स्थानिताप्रतियोगिकपर्याप्त्यनुयोगिताऽपि; उभयोरवच्छेदकस्य अत्वधर्मस्य एकत्वात्। तथाच लम्बायमानलौहदण्डाद् अपरस्मिन् तथाविधलौहदण्डे धूमयानं यथा विपरिवर्तते, तथैव अत्वावच्छिन्नानुयोगिता अच्त्वप्रतियोगिकपर्याप्त्यनुयोगितां परित्यज्य स्थानिताप्रतियोगिकपर्याप्त्यनुयोगितां गृह्णाति इति अत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिमूलस्थानिताक आदेशो लोपरूपः। यत्र तु अज्झलोरुभयोः स्थानिता, यथा मरुतमाचष्टे मारयतीत्यत्र णिचि टिलोपे न उकारतकारयोर्लोपेन लोपस्थानितापर्याप्तिसम्बन्धेन उकारसहिततकारे, अच्त्वं तु उकारमात्रे पर्याप्तम्; तथाच अच्त्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकम् उकारत्वम्, स्थानिताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकम् उकारतकारविशिष्टम् उत्वमिति अच्त्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकं यद् उकारत्वं तदवच्छिन्ना स्थानिताप्रतियोगिकपर्याप्त्यनुयोगिता न, किन्तु उत्वावच्छिन्ना (उकारतकारविशिष्टरूपत्वावच्छिन्ना); अतो न स्थानिवद्भावः। कथयतीत्यत्र तु य एव अच्त्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदको धर्मः अकारनिष्ठं तद्व्यक्तित्वम्, स एव स्थानिताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदको भवति; स्थानिताया अच्त्वस्य च एकस्मिन् अकारमात्रे पर्याप्तत्वात्। अतः स्थानिवद्भावेन वृद्धिर्न।

ननु अच एवादेश इत्यर्थाभ्युपगमे लोपस्य स्थानिवद्भावः एतेन सूत्रेण न प्राप्नोति, 'अनेकाल्' सूत्रे शेखरकृता सानुबन्धनिर्देशे अल्त्वव्याप्यधर्मस्य यथा न स्थानितावच्छेदकत्वं तथैव आदेशतावच्छेदकत्वमपि सूत्रोपात्तवृत्तिधर्मस्यैवेत्युक्तम्। एवञ्च अनया रीत्या लोपस्थानितायाः लक्ष्यस्थेकारे सूत्रघटकणकारे च स्वीकारेण अच्पर्याप्तस्थानितायाः विरहात्? अतो विशेषमाह—**अत्रेति**। **अत्र** = सूत्रे। **प्रयोगे इति**। प्रयोगघटकाच्पर्याप्तस्थानिताकः वस्तुतः प्रयोगे योऽच् तत्स्थानिक इत्याशयः। स्थानित्वेन इत्यस्य स्थानितावच्छेदकत्वेन। अच्स्थानिकः = अच्त्वावच्छिन्नस्थानिताकः। पूर्वस्मिन्

अत एव चङ्परनिर्ह्रासे ण्यन्तात् णिचि 'अवीवदत्' इत्यादिसिद्धचर्थो निषेधः सार्थकः ।

अच इति किम् ? आगत्य । मलोपस्य स्थानिवत्त्वात् 'ह्रस्वस्य' (६ । १ । ७१) इति तुग्न स्यात् ।

सूत्रे उपात्तस्य स्थानितावच्छेकतया ग्रहणम्, अत्र सूत्रे तु प्रयोगे योऽच् तत्पर्याप्तधर्मस्येति विशेषः । तत्र अल्त्वव्याप्यधर्मावच्छिन्ना स्थानिता विवक्षिता, अत्र तु अच्त्वप्रतियोगकपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिस्थानिता विवक्षिता इति निष्कर्षः । तेन णिलोपादेः स्थानिवत्त्वं सिद्धम् । लक्ष्ये अनुबन्धरहितस्य णिघटकेकारस्य लोपात्, तस्य चाच्त्वात् ।

अतएव = ईदृशार्थविवक्षणादेव । अवीवदत् वीणां परिवादकेन इत्यस्य सिद्धिप्रकार इत्थम्—वीणा अवादीत् परिवादकः प्रैरिरत् इति विवक्षायां णिचि, पुनः वादयन्तं परिवादकं कश्चिदन्यः प्रैरिरत् इत्येवं विवक्षिते पुर्नणिचि तस्य निष्पत्तिः, अत्र णिज्निमित्तकवृद्धौ जातायां चङ्परे णौ निर्ह्रासे = ह्रस्वे कर्तव्ये णिलोपस्य स्थानिवद्भावेन इकारेण व्यवधानाद् उपधात्वाभावेन ह्रस्वो न स्यात् । अतः 'चङ्परणिनिर्ह्रास' इत्यादि वार्त्तिकमारब्धम् । अनेन स्थानिवद्भावस्य निषेधात् ह्रस्वः सिध्यति । त्वद्रीत्या सूत्रे उपात्तस्य लोपस्थानितया णेरुपादानेन विशिष्टस्याच्त्वाभावादेव स्थानिवत्त्वाप्राप्तौ तन्निषेधाय वार्त्तिकस्य अनारम्भ एव स्यात् ।

सूत्रे 'अचः' इत्युपादानाभावे आगत्येत्यत्र स्थानिवद्भावात् यकारेण व्यवधानात् 'ह्रस्वस्य पिति कृति तुक्' इत्यनेन तुक् न स्यात् । 'परस्मिन्' इत्यस्यादेशविशेषणाभावे युवतिर्जाया यस्येति विग्रहे बहुव्रीहिसमासे 'जायाया निङ्' इत्यनेन आकारस्य निङादेशे यकारस्य लोपे युवजानिरिति सिध्यति । अत्र निङादेशस्थानिन आकारस्य स्थानिव-

---

इस सूत्र में स्थानिता सूत्रोपात्तरूप से नहीं है, किन्तु प्रयोजन में वस्तुतः अज्मात्रवृत्ति स्थानिता होनी चाहिये । अन्यथा 'णेरनिटि' इस सूत्र में लोप की स्थानिता का णित्वेन णि में उपादान होने से केवल अच् में स्थानिता न होने के कारण णिलोप का स्थानिवद्भाव नहीं होगा । प्रयोग में केवल अच् स्थानी विवक्षित होने पर णिलोप का भी स्थानिवद्भाव सिद्ध होता है । वीणा अवादीत्, परिवादकः प्रैरिरत् इति परिवादकः वीणाम् अवीवदत् । वादयन्तं परिवादकं कश्चित् प्रैरिरत्, अवीवदत् वीणां परिवादकेन (कश्चित्)—यह णिजन्त से णिच् करने पर एक णिच् के स्थानिवद्भाव से इकारव्यवधानप्रयुक्त उपधात्वाभाव के कारण 'णौ चङ्युपधायाः' इससे ह्रस्व नहीं होगा । एतदर्थ चङ्परक णि में निर्ह्रास अर्थात् ह्रस्वविधि में स्थानिवद्भाव का निषेध चरितार्थ हुआ । अन्यथा णिलोप में स्थानिवद्भाव की अप्राप्ति होने से निषेधारम्भ व्यर्थ हो जायगा ।

अच् स्थानी वाले आदेश को स्वीकार करने से ही 'आगत्य' इसमें गम् धातु से क्त्वा, ल्यप्, 'अनुदात्तोपदेश' इत्यादि से यकार के लोप के बाद 'ह्रस्वस्य' इससे तुगागमविधि में यकारलोप को स्थानिवद्भाव नहीं हुआ । अन्यथा यकार से व्यवधान होने से तुगागम नहीं होगा ।

परस्मिन्निति किम् ? युवजानिः। निङः स्थानिवत्त्वेन यलोपो न स्यादिति।

पूर्वविधाविति किम् ? नैधेयः। निपूर्वाद्धाञः किप्रत्यये, आतो लोपे, तस्य स्थानिवद्भावात् त्र्यच्त्वव्यपदेशविरोधात् स्वाश्रयद्व्यच्त्वनिवृत्तौ ढगनापत्तेरिति दिक्।

द्भावेन 'लोपो व्योर्वलि' इति वल्परत्वाभावात् न प्रवर्तेत। परस्मिन्निति विशेषणे निङादेशस्य परनिमित्तकत्वाभावेन 'अचः परस्मिन्' इत्यस्याप्रवृत्त्या यलोपः सिद्धः। नच 'न पदान्त' इत्यनेन यलोपे स्थानिवद्भावस्य प्रतिषेधात् परस्मिन्नित्यस्याभावेऽपि नास्ति दोषावकाश इति वाच्यम्; लोपाजादेशे एव स्थानिवद्भावस्य प्रतिषेधात्। इह तु निङ् रूपादेशः सच न लोपरूप इति निषेधाप्रवृत्तेः। परस्मिन्नित्यस्याभावे 'वैयाघ्रपद्यम्' इत्यत्रापि दोषः स्यात्। व्याघ्रस्य पादाविव पादौ यस्येति विग्रहे बहुव्रीहिसमासे 'पादस्य लोपोऽहस्त्यादिभ्यः' इत्यनेन अकारलोपे तस्य अपत्यार्थे 'गर्गादिभ्यो यञ्' इत्यनेन यञि ऐजागमे च उक्तरूपसिद्धिः। अत्र अल्लोपस्य स्थानिवद्भावात् 'पादः पत्' इत्यनेन पद्भावो न स्यात्। हलन्तस्यैव पादः तेन पदादेशस्य विधानात्। एतदर्थं तदुपात्तम्।

पूर्वविधौ कर्तव्ये स्थानिवद्भावस्य विधाने फलमाह—**नैधेय** इति। निपूर्वकात् धाधातोः 'उपसर्गे घोः किः' इत्यनेन किप्रत्यये, 'आतो लोप इटि च' इति आकारलोपे निष्पन्नात् निधिशब्दात्, 'द्व्यच' इति ढकि वृद्धौ **नैधेयः**। अत्र आलोपस्य स्थानिवद्भावेन द्व्यच्त्वविरोधि त्र्यच्त्वस्य बुद्धौ द्व्यजिनबन्धनो ढक्प्रत्ययो न स्यात्, द्व्यज्विरोधि-अच्त्वस्य सत्त्वात्। तस्मिन् क्रियमाणे तु पूर्वस्य विधिर्न ढक्; प्रत्ययस्य परत्वेन उत्पद्यमानत्वात्। 'पूर्वा सङ्ख्यां परा सङ्ख्या बाधते' इति नियमाद् द्वित्वस्य त्रित्वेन बाधात्। पूर्वविधावित्यत्र स्थानषष्ठ्या न समासः, किन्तु सम्बन्धसामान्ये षष्ठी, तया समासः। तेन पूर्वसम्बन्धिविधावित्यर्थः। अत एव अचः किम् ? आगत्येति प्रत्युदाहरणं संगच्छते। नहि तत्र तुगागमः पूर्वस्य स्थाने विधीयते, किन्तु पूर्वस्यान्यवयवो भवति। अत एव 'श्रायसी' इत्यत्र स्थानिवद्भावेन नुमो वारणं संगच्छते। नुमः पूर्वसम्बन्धित्वेऽपि स्थानिभूतादचः पूर्वस्य स्थाने विधानाभावात्।

युवतिर्जाया यस्य 'जायाया निङ्' इससे आकार को निङादेश होने पर 'युवजानिः' इसकी सिद्धि होती है। निङादेश परनिमित्तक नहीं हैं, अतः स्थानिवद्भाव नहीं हुआ। यलोप में 'न पदान्त' सूत्र से 'स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत्' इसके अनुसार लोपरूप अजादेश का ही स्थानिवत्त्व-निषेध होता है। प्रकृत में लोपरूप आदेश नहीं, किन्तु निङ् आदेश है।

नैधेय इति। निपूर्वक धा धातु से कि-प्रत्ययोत्तर आ-लोप होने से द्व्यच्कनिमित्तक 'द्व्यचः' इससे ढक् होने पर उक्त प्रयोग सिद्ध होता है। आलोप के स्थानिवद्भाव से त्र्यच्त्व-बुद्धि होने के कारण ढक् नहीं होगा। अतः 'पूर्वविधौ' अर्थात् स्थानिभूत अच् से पूर्व के कार्य में स्थानिवद्भाव होता है। यहाँ ढक् आकार के अनन्तर प्राप्त है, पूर्व को नहीं, अतः स्थानिवद्भाव नहीं हुआ।

इस सूत्र में भाव अभाव दोनों का अतिदेश होता है। स्थानी के रहने पर जो कार्य होता है वह आदेश के होने पर भी होता है। एवं स्थानी के रहने पर जो कार्य नहीं होता वह

अत्र स्थानिनि सति यद्भवति तदादेशेऽपि भवति, स्थानिनि यन्न भवति तदादेशेऽपि नेति भावाभावयोरुभयोरप्यतिदेशः। तत्र भावोदाहरणम्—'निगाल्यते' इति, अन्त्योदाहरणम्—'पटयति' इत्यादि। स्थानिनिमित्तकं भवत्यादेशनिमित्तकं नेति च तदर्थः। लघूपधत्वसम्पादनद्वारा लोपनिमित्तिका वृद्धिरित्याहुः।

स्थानिभूतादच इति। सूत्रे श्रवणाद्, व्याख्यानाच्च तस्यैव पूर्वत्वेऽवधित्वमिति भावः। 'पूर्वविधौ' इत्यस्य पूर्वसम्बन्धिन्येव शास्त्रविधेये कर्त्तव्ये इत्यर्थः। तेन पूर्वपरयोर्विधौ न। तेन आरतुः' इत्यादौ ऋच्छत्यृताम्' (७।४।११) इति गुणस्य सवर्णदीर्घे न स्थानिवत्त्वम्।

भावाभावयोरुभयोरप्यतिदेशोऽनेन विधीयते। स्थानी न निवृत्तः, आदेशो न जात इति सम्भावनायां यद् भवति तद् भवतु, यन्न भवति तन्मा भूदिति भावः। तेन निगाल्यते इत्यत्र णिलोपस्य स्थानिवद्भावेन णिचि सति अच्परत्वात् लत्वं प्राप्नोति, अतः लोपेऽपि तद् भवति। यन्न भवति इत्यस्योदाहरणम्-पटयतीति। पटुघटकस्य उकारस्य सत्त्वे उपधात्वाभावाद् वृद्धिर्न भवतीति उकारलोपे उपधात्वसम्पत्तावपि स्थानिवद्भावात् यन्न भवति तन्मा भूदिति व्याख्यानात् न वृद्धिरिति। वृद्धेर्लोपनिमित्तकत्वाभावात् लोपाभावे कथं न वृद्धिरित्यत उक्तम्-लघूपधत्वसम्पादनेति। लोपे सत्येव लघूपधत्वं सम्पद्यते तदनन्तरमेव वृद्धेः प्राप्तिरिति लघूपधत्वसम्पादनं लोपद्वारेण। अतस्तद्द्वारा लोपो वृद्धेर्निमित्तमिति भावः।

स्थानिभूतादच इति। पूर्वविधावित्यत्र पूर्वस्य सापेक्षतया कस्मात्पूर्वः?—इत्याकाङ्क्षायाम् 'अचः परस्मिन्' इति सूत्रे स्थानिवत्पदानुवृत्त्या स्थानिपदं साक्षात् श्रूयते, निमित्तादिपदानां श्रवणात् लक्ष्यानुसारिव्याख्यानाच्च स्थानिभूतादचः पूर्वत्वं विवक्षितम्। निमित्तात् पूर्वस्य विवक्षणे तु 'वैयाकरणः' इत्यत्र ऐजादेशस्य यणिमित्तभूताकारात् पूर्वस्य ऐकारस्य आयादेशे कर्तव्ये स्थानिवद्भावेन यकारस्य अच्त्वात् अयादेशः स्यात्। स्थानिभूतादचः पूर्वत्वस्य ग्रहणे तु विघटकेकारक्षणे ऐकारो नासीत्, यणादेशोत्तरं व्याकरणशब्दाद् अणि 'न य्वाभ्याम्' इति ऐजादेशे एकारः प्रादुर्भवति, तदानीं यणा-

---

आदेश के होने पर भी नहीं होता। भावातिदेश का उदाहरण है—'निगाल्यते'। इसमें णिलोप का स्थानिवद्भाव होने से 'अचि विभाषा' इस सूत्र से अच्परक रेफ को लत्व सिद्ध होता है। अभावातिदेश का उदाहरण है—पटुमाचष्टे पटयति। इसमें पटुमाचष्टे इस विग्रह में टिलोप के स्थानिवद्भाव से स्थानी उकार के रहने पर उपधाभूत अकार के न रहने से 'अत उपधायाः' इससे वृद्धि नहीं होती। अतः टिलोप होने पर भी वृद्धि नहीं हुई। यह निष्कर्ष है। वृद्धि में लघूपधत्व निमित्त है। 'पटयति' इसमें टिलोप होने से ही ह्रस्वाकारोपधत्वरूप लघूपधत्व का व्यवहार किया जाता है। अतः लोप वृद्धि का निमित्त है।

स्थानिभूतादिति। पूर्वत्व अवधि में सापेक्ष होने से किंनिरूपित पूर्वत्व विवक्षित है?—ऐसी जिज्ञासा होने पर सूत्र में श्रुत होने से तथा 'किरतौ लवने' इसमें 'लवने' निर्देशरूप व्याख्यान से स्थानिभूत अच् से पूर्वत्व लिया जाता है। अन्यथा गुण के निमित्त ल्युट् से पूर्व के ओकार

वस्तुतोऽत्र पूर्वविधिशब्दे तन्त्रम् । एकस्योक्तोऽर्थः, द्वितीये भावे किः। सम्बन्धसामान्यषष्ठ्यन्तपूर्वशब्देन समासः । विधिः = भावः । पूर्वसम्बन्धिभावे तत्स्थितौ स्थानिवदित्यर्थः ।

अत एव 'ऐनेयः' इत्यादौ 'यस्येति च' (६ । ४ । १४८) इति लोपे तस्य स्थानिवत्त्वात् सन्नियोगशिष्टन्यायप्राप्तनिवृत्तिप्रतिबन्धेन नकारस्थितिः ।

देशस्य स्थानी इकारो नास्तीति स्थानिभूतादचः पूर्वत्वाभावेन न स्थानिवद्भावः इत्याद्यन्यत्र विस्तरः ।

'पूर्वविधौ' इत्यस्य पूर्वसम्बन्धिन्येव विधौ इत्यर्थः । तेन पूर्वपरयोः स्थाने विधौ न स्थानिवत् विधिशब्दे विधीयते इति विधिरिति व्युत्पत्त्या कर्मणि किप्रत्ययविधानेन शेषषष्ठ्या समासस्यैवौचित्यात् । लक्ष्यानुरोधात् अवधारणपरत्वेन पूर्वसम्बधिन्येवेत्येवं व्याख्यातम् । एवम्भूतव्याख्यानस्य फलम् आरतुरित्यत्र गुणे द्वित्वे 'उरत्' इत्यनेन अभ्यासस्य अत्वे 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घे कर्तव्ये स्थानिवद्भावेन ऋकारातिदेशे सवर्णत्वाभावाद् दीर्घाप्राप्तौ पूर्वस्यैव विधाविति व्याख्यानेन स्थानिवद्भावाप्रवृत्त्या दीर्घः सिध्यति । नच अभ्यासकार्यं प्रतिबन्धकः; तदुत्तरखण्डस्य अजादेशस्य स्थानिवद्भावो नेत्यनेन स्थानिवद्भावाप्रवृत्त्या तद्रूपासिद्धेः । अतः श्लेष्मघ्न इत्युदाहर्तव्यम् । संयोगसंज्ञायाः पूर्वपरोभयसम्बन्धित्वेन तत्र कर्तव्ये स्थानिवद्भावो न । अन्यथा अकारस्य स्थानिवद्भावेन हल्द्वयमध्ये तस्य सत्त्वेन सा संज्ञा न स्यात् ।

फलान्तरमप्याह—**वस्तुत इति** । किञ्चेत्यर्थे वस्तुतः इति प्रयुक्तम् । पूर्वविधि-

---

को स्थानिवद्भाव होने कारण अवादेश की अप्राप्ति होने से 'लवने' इस निर्देश की असङ्गति हो जायगी । 'पूर्वविधौ' इससे पूर्वसम्बन्धी कार्य में ही स्थानिवद्भाव मानने से पूर्व और पर-दोनों के स्थान में होने वाले कार्य के प्रति स्थानिवद्भाव नहीं होता ।

अत एव 'आर' इसमें ऋधातु से लिट् तिप् णलादेश तथा द्वित्वोत्तर 'ऋच्छत्यृताम्' इसमें गुण होने पर 'अकः सवर्णे' इसके द्वारा प्राप्त दीर्घ का स्थानिवद्भाव के द्वारा प्रतिबन्ध नहीं हुआ; क्योंकि दीर्घ के पूर्व और पर उभय के स्थान में होने से वह केवल पूर्वसम्बन्धी नहीं है ।

इस सूत्र के 'पूर्वविधि' शब्द में तन्त्र के द्वारा दो अर्थ विवक्षित हैं । एक अर्थ तो पूर्वोक्त है । और दूसरा अर्थ इस प्रकार है—विधानं विधिः । यहाँ भाव अर्थ में किप्रत्यय है । पूर्वसम्बन्धी विधान, अर्थात् स्थितिकर्त्तव्य में स्थानिवद्भाव होता है । इससे 'ऐनेयः' इसमें स्त्रीलिङ्ग एतशब्द से 'वर्णादनुदात्तात्तोपधात्तो नः' इससे ङीष् और तकार को नकारादेश होने के बाद अपत्य अर्थ में 'स्त्रीभ्यो ढक्' इससे ढक् हुआ, उसको एयादेशोत्तर 'यस्येति च' से ईकार का लोप होने से ङीप्-सन्नियोग से विधीयमान नकारादेश भी निवृत्त हो जायगा । अतः पूर्वसम्बन्धी नकार की स्थिति में स्थानिवद्भाव के द्वारा ङीप्-बुद्धि रहने से नकार की निवृत्ति नहीं हुई । 'न पदान्त' सूत्र के भाष्य में 'पञ्चेन्द्रः' इसमें 'लुक् तद्धितलुकि' द्वारा ङीप् का लुक् होने पर तत्सन्नियोगशिष्ट 'इन्द्रवरुणभव' इत्यादि से विहित आनुक् की निवृत्ति होती है । अत एव 'अचः परस्मिन्' इससे पूर्व सम्बन्धी आनुक् की स्थिति में स्थानिवद्भाव द्वारा आनुक् की निवृत्ति में प्रतिबन्धकीभूत स्थानि-

अत एव 'न पदान्त' (१ । १ । ५८) सूत्रे पञ्चेन्द्राण्यो देवता अस्येति 'पञ्चेन्द्रः' इति 'लुकि न स्थानिवत्' इत्यस्योदाहरणं दत्तं भाष्ये। अन्यथा तत्र पूर्वत्वेन दृष्टस्य सम्बन्धिनः कस्यचिद्विधेयस्याभावात् स्थानिवत्त्वाप्राप्तिरेवेति तदसङ्गतिः स्पष्टैव।

प्रकृतसूत्रेऽपि भाष्ये 'कर्मसाधनस्य विधिशब्दस्योपादाने न सर्वमिष्टं सङ्गृहीत-

---

शब्दे सकृदुच्चरितत्वे सति अनेकार्थबोधकत्वरूपतत्त्वाभ्युपगतस्य एकस्य पूर्वविधौ इत्यस्य पूर्वोक्त एवार्थः। अपरस्य तु अयमर्थः—अत्र विधिशब्दो भावसाधनः, विधानं विधिः। सम्बन्धसामान्ये षष्ठी, तदन्तस्य समासे पूर्वसम्बन्धिनो विधौ भावे = स्थितौ स्थानिवत् इत्यर्थः। अतएव 'ऐनेयः' इत्यत्र वर्णादनुदात्तात्तोपधातो नः' इत्यनेन ङीषि तकारस्य नकारे च कृते एनीशब्दाद् ढकि 'यस्येति च' इत्यनेन ईकारस्य लोपे ङीप्सन्नियोगेन जातस्य नकारस्यापि निवृत्तौ प्राप्तायाम्, 'अचः परस्मिन्' इत्यनेन पूर्वस्य नकारस्य स्थितौ कर्तव्यायां स्थानिवद्भावेन नकारस्य निवृत्तिः प्रतिबध्यते। ईदृशार्थानभ्युपगमे पूर्वत्र कस्यापि विधेः प्राप्तेरभावेन स्थानिवत्त्वाप्रवृत्तौ सन्नियोगशिष्टस्य नकारस्य निवृत्त्यापत्तेः।

अत एव 'क्विलुगुपधात्वे'ति वार्त्तिकव्याख्यावसरे 'लुकि न स्थानिवद्' इत्यस्योदाहरणत्वेन पञ्चेन्द्र इति भाष्ये प्रदर्शितम्। तत्राणः 'द्विगोर्लुगनपत्ये' इत्यनेन लुकि 'लुक् तद्धितलुकि' इत्यनेन ङीपो लुकि तत्सन्नियोगशिष्टत्वात् आनुकोऽपि निवृत्तौ प्राप्तायां पूर्वस्य स्थितौ स्थानिवद्भावेन निवृत्तिप्रतिबन्धे आनुकः श्रवणं स्यात्। अतस्तत्र निषेधार्थं वार्तिकमेतत् कृतम्। अन्यथा वार्तिकारम्भो निष्फलः स्यात्; स्थानिवद्भावस्य पूर्वसम्बन्धिविधेरप्राप्तत्वादेव प्राप्तेः सिद्धत्वात्।

अत्रार्थे स्फुटतरं प्रमाणान्तरमुपन्यस्यति—**प्रकृतसूत्रे इति**। 'अचः परस्मिन्' इति सूत्रे। अन्यत् मूले स्फुटम्। 'भावसाधनो विज्ञास्यते' इति भाष्योक्तौ अपिशब्दो योजनीयः। तथाच भावसाधनोऽपि विज्ञास्यते इत्यर्थः। पूर्वविधावित्यत्र स्थानिभूतात् अचः पूर्वत्वं व्यवहितमव्यवहितञ्चोभयविधं गृह्यते, न तु अव्यवहितमेव; तद्ग्रहणे प्रमाणाभावात्। 'न पदान्त' इति सूत्रे स्वरग्रहणसामर्थ्याच्च न अव्यवहितपूर्वस्यैव ग्रहणम्। तत्र चिकीर्षक इत्यत्र सनोऽकारस्य लोपे ण्वुलोः लित्वेन 'लिति' इति सूत्रेण प्राप्तः स्वर ईकारस्य न स्यात्, स्थानिवद्भावेनाकारेण व्यवधानात्। स्वरे कर्तव्ये स्थानिवन्निषेधारम्भे तु तन्नि-

---

वद्भाव के निषेधार्थ 'क्विलुगुपधात्व' इत्यादि वार्त्तिक का आरम्भ सार्थक हुआ। अन्यथा पूर्वसम्बन्धी किसी कार्य की प्राप्ति न होने से स्थानिवद्भाव स्वतः ही प्राप्त नहीं, तदर्थ निषेध व्यर्थ हो जायगा।

'अचः परस्मिन्' इस प्रकृत सूत्र के भाष्य में भी 'विधानं प्रति' इत्यादि अर्थ का उल्लेख है। विधिशब्द भावसाधन है—इस लिये पूर्वसम्बन्धी कार्य में भी स्थानिवद्भाव होता है।

स्थानिभूत अच् से पूर्वत्वेन दृष्ट व्यवधानयुक्त और व्यवधानरहित—दोनों प्रकार का गृहीत होता है। अव्यवहित-ग्रहण में कोई प्रमाण नहीं है। 'न पदान्त' सूत्र से 'चिकीर्षकः' इसमें लित्स्वर के प्रतिबन्धार्थ प्राप्त स्थानिवद्भाव का स्वरविधि में निषेध चरितार्थ उसी दशा में हो सकता है यदि पूर्वत्व व्यवहित भी गृहीत होगा, क्योंकि 'चिकीर्षकः' इसमें 'लिति' इस सूत्र से

इति यणः स्थानिवद्भावे प्राप्ते—

५१. न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु । १ । १ । ५८ ॥

मिति भावसाधनो विज्ञास्यते पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति स्थानिवत्' इत्युक्तम् । तत्र भावसाधन इत्यस्य सोऽपीत्यर्थः । पूर्वत्वञ्च व्यवहिताव्यवहितसाधारणम्, अव्यवहितग्रहणे मानाभावात्, निषेधाच्च । तेन 'पटयति' इति सिद्धम् । प्रकृते च द्वित्वनिषेधे स्थानिवत्त्वप्राप्तिः ॥

न पदान्त० (१ । १ । ५८) ॥ अत्र द्विर्वचनसवर्णादिग्रहणं वतिघटिताऽन्यातिदेशानां त्रिपाद्यामपि प्रवृत्तिबोधनार्थम् । तेन 'रामः' इत्यादौ विसर्गादिसिद्धिः ।

षेधात् ईकारस्य स्वरः सिद्धः । यदि अव्यहितपूर्वस्यैव विधौ स्थानिवद्भाव इष्टः, तदा स्थानिवद्भावस्याप्राप्ततया तन्निषेधस्य वैयर्थ्यापत्तेः । अत एव च उपधावृद्धिर्व्यवहितस्य स्थाने जायमाना स्थानिवद्भावेन पटयतीत्यादौ वार्यते । प्रकृते सुद्ध्युपास्य इत्यत्र द्विर्वचने कर्तव्ये स्थानिवद्भावो निषिध्यते अतो द्वित्वम् । तत्र = पञ्चेन्द्र इत्यत्र पूर्वत्वेन दृष्टस्य विधेरभावात् तत्र भाष्ये । प्रकृते च = सुद्ध्युपास्य इत्यत्र ॥

न पदान्तेति ॥ अस्मिन् सूत्रे द्विर्वचनसवर्णादिग्रहणं नावश्यकम्; तेषां त्रिपादीस्थत्वेन स्थानिवत्सूत्रदृष्ट्या असिद्धत्वेन पूर्वस्य विधेः प्राप्तेरसत्त्वादेव स्थानिवद्भावाप्राप्तेः । अतः तस्य निषेधाय तदारम्भः 'वतिघटिता अतिदेशाः त्रिपाद्यामपि प्रवर्तन्ते' इति ज्ञापयति । तेन त्रिपाद्यामपि प्रवृत्तिज्ञापनेन द्विर्वचनादिविधावपि स्थानिवद्भावः प्राप्तः । तन्निषेद्धुं द्विर्वचनादिग्रहणं सूत्रे कृतम् । 'अचः परस्मिन्' इति सूत्रं विहाय 'स्थानिवदादेशोऽनल्विधौ' 'अन्तादिवच्च' इति सूत्रद्वयं त्रिपाद्यामपि प्रवर्तते । मूले ज्ञापनशरीरे अन्यातिदेशानामित्युक्तिः फलितार्थाभिप्रायेण । ज्ञापनस्वरूपन्तु पूर्वनिर्दिष्टमन्यपदरहितमेव । द्विर्वचनादौ 'अचः परस्मिन्' इत्यस्य अनेन प्रतिषेधात् त्रिपाद्यामेतस्य सूत्रस्य अप्रवृत्तिः फलति । द्विर्वचनादिपदं त्रिपाद्या उपलक्षकम् । यद्यपि त्रिपाद्यामपि संयोगादिलोपणत्वादिविधौ एतस्य प्रवृत्तिर्दृष्टा, तथापि सर्वत्र त्रिपाद्यां प्रवृत्तिर्न भवति । क्वचित् प्रवर्तते क्वचिच्च न प्रवर्तते इत्यभिप्रायः । 'पूर्वत्रासिद्धीये न स्थानिवत्' इति हि संयोगादिलोप-

---

लित्स्वर 'की' के ईकार को प्राप्त है । लोपादेश का स्थानिरूप अकार से रेफ और षकार के द्वारा व्यवधान है । व्यवहित को स्वर प्राप्त है । इसीलिये 'पटयति' इसमें उपधावृद्धि स्थानिभूत अच् से व्यवहित पदघटक अकार को प्राप्त होने पर भी स्थानिवद्भाव होता है । प्रकृत में स्थानिवद्भाव के द्वारा 'सुद्ध्युपास्यः' में यण् के स्थानिवद्भाव होने से अच्परक होने के कारण 'अनचि च' इससे द्वित्व नहीं होगा ॥

न पदान्तेति ॥ शङ्का—'पूर्वत्रासिद्धीये न स्थानिवत्' इसके द्वारा त्रिपादी में स्थानिवद्भाव की अप्रवृत्ति सिद्ध होने से द्विर्वचन सवर्णादिग्रहण सूत्र में व्यर्थ हैं, क्योंकि इनके विधायक त्रिपादी में पठित हैं ?

समाधान—द्विर्वचनादि के ग्रहण सामर्थ्य से वत् से घटित अतिदेशशास्त्रों की प्रवृत्ति

पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजादेशो न स्थानिवत् ।

अत्र विधिशब्दो भावसाधनः । पदान्तेत्यत्रान्तशब्दश्चरमावयववाची । कर्मषष्ठ्या समासः । तेन 'एषो यन् हसति' इत्यादौ 'एतत्तदोः' (६ । १ । १३२) इति सुलोपो न । इणः शतरि 'यन्' इति रूपम् । तत्र यणः स्थानिवत्त्वात्, उत्वे च न स्थानिवत्; अनेन निषेधात् । स्पष्टञ्चेदं भाष्ये इति भाष्यप्रदीपोद्द्योते निरूपितम् । अत्र 'पदेऽन्तः' इति सप्तमीसमासो भाष्ये उक्तः, तेन प्रत्यासत्त्या पदे परतः चरमावयवे कार्ये कर्तव्ये परपद-

लत्वादिविधौ प्रतिप्रसूयते । त्रिपाद्यामेतस्याप्रवृत्तेः फलम्—राम इत्यादौ विसर्गसिद्धिः । तत्र स्थानिवद्भावेन सुप्त्वमानीय रेफान्तस्य पदत्वात् विसर्गः सिध्यति ।

अत्र सूत्रे विधिशब्दो भावसाधनः । विपूर्वकाद् धाधातोः 'उपसर्गे घोः किः' इत्यनेन भावे किप्रत्यये आकारलोपे इदं सिद्धम् । अन्तशब्दः अन्त्यावयववाची । एतस्य 'कर्तृकर्मणोः कृति' इति विहितकर्मषष्ठ्यन्तस्य विधिशब्देन समासः । तथा च 'पदचरमावयवकर्मके विधौ न स्थानिवद्भावः' इत्यर्थो लब्धः । यत् कार्य पदचरमावयवरूपतया तत्र निविशते तदेव कार्यं पदचरमावयवपदेन सूत्रे गृह्यते । एवञ्च एषो यन् हसतीत्यत्र इण्धातोः शतृप्रत्यये यणि च कृते निष्पन्नस्य यन् इति प्रयोगे यणः स्थानिवत्त्वेन हल्परत्वाभावात् 'एतत्तदोः' इति सुलोपो न । सुलोपरूपकार्यस्य अभावरूपत्वेन कस्यचिदपि अवयवत्वासम्भवात् पदस्यापि अन्त्यावयवतायाः लोपे दुर्लभत्वात् । शेषषष्ठ्या समासे तु एषस्-घटकसकारस्य पदचरमावयवत्वेन तत्सम्बन्धिलोपस्य अवयवत्वेन अनवयवत्वेन वाऽनपेक्षितस्य विधाने प्राप्ते 'न पदान्ते'ति प्रतिषेधेन हल्परत्वात् सकारलोपः स्यात् । अतः कर्मषष्ठ्यन्तेन समास एव उचितः । तत्र उत्वविधौ कर्तव्ये स्थानिवद्भावस्य प्रतिषेधो भवति; उत्वस्य विधेः पदचरमावयकर्मकत्वात् ।

तत्र = लोपरूपे कार्ये । यणः = 'इणो यण्' इति विहितस्य । अनेन = न पदान्तसूत्रेण । न च पदसंस्कारपक्षे स्थानिभूताद् इकारात् पूर्वत्वेन दृष्टत्वम् एषस् इत्येतद्घटकस्य सकारस्य नास्तीति कथं स्थानिवद्भावस्य प्रवृत्तिरिति वाच्यम्; 'वाक्याद् निस्सार्य पदानि संस्क्रियन्ते' इति वाक्यसंस्कारपक्षे स्थानिवद्भावप्रवृत्तेरुपपत्तेः । 'पदान्तरनिरपेक्षमेव पदानां संस्कारः' इति नैष नियमः । 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि

त्रिपादी में भी होती है । अतः त्रिपादी में प्रवृत्त स्थानिवद्भाव त्रिपादी के निषेधार्थ सूत्र में द्विर्वचनादिग्रहण चरितार्थ है । इसी प्रकार आद्यन्तवदेकस्मिन्', 'अन्तादिवच्च' इनकी प्रवृत्ति भी त्रिपादी में होती है । 'पूर्वत्रासिद्धीये' इस वचन से त्रैपादिक कार्य में 'अचः परस्मिन्' इसकी प्रवृत्ति का निषेध होने के कारण इसके अतिरिक्त वत्-घटितातिदेश की प्रवृत्ति त्रिपादी में सिद्ध होती है । इसी का 'अन्यातिदेशानाम्' यह मूलोक्त फलितार्थ है । अन्यातिदेश के लिये उक्त नियम है, 'अचः परस्मिन्' इसके लिये नहीं—यह अन्य पद के प्रवेश का भाव है ।

इसकी त्रिपादी में भी प्रवृत्ति होने से 'रामः' इसमें रुत्वोत्तर रेफविशिष्ट में पदान्तत्व के आश्रयण से विसर्ग सिद्ध होता है ।

इस सूत्र में विधि-शब्द भाव में किप्रत्ययान्त है । पदचरमावयववाची पदान्त शब्द का

स्थाजादेशस्यैवानेन स्थानिवत्त्वनिषेध इति 'वेतस्वान्' इत्यादौ न दोषः। न चैवमपि 'पूर्वत्रासिद्धीये न स्थानिवत्' (का० वा०) इति निषेधोऽत्र दुर्वारः। 'पदेऽन्तः' इत्यर्थेन तत्र स्थानिवत्त्वनिषेधव्यावृत्तिपरभाष्यप्रामाण्येन 'पूर्वत्रासिद्धे' इत्यत्र पदचरमावयव-

मध्यमः' इत्यनेन युष्मत्समानाधिकरणे धातोर्मध्यमपुरुषविधानस्य दर्शनात्। अन्यथा सूत्रस्यासङ्गतिरेव स्यात्। भाष्ये इति। न पदान्तसूत्रे इति शेषः।

ननु वेतसशब्दात् 'कुमुदनडवेतसेभ्यो ड्मतुप्' इत्यनेन ड्मतुप् प्रत्यये, डित्वाट्टिलोपे 'वेतस्वान्' इत्यस्य सिद्धिः। अत्र सुबन्तात्तद्धितोत्पत्तिस्वीकारेण अन्तर्वर्तिनीं विभक्तिमादाय पदसंज्ञायां सकारस्य पदान्तत्वाद् रुत्वं स्यादित्याशङ्कां परिहर्तुमाह—पदेऽन्त इति। एतत्सूत्रघटक-पदान्तशब्दे 'पदे अन्तः' इत्येवं सप्तमीसमासो बोध्यः। तथा च पदे परतः अन्तस्य अर्थात् पदे परतः चरमावयवकर्मके विधौ प्रतिषेधस्य करणात् प्रकृते मतुपः परत्वाभावेन वेतसः पदत्वेऽपि पदे परतः चरमावयवकार्यस्य विधानाभावात् न स्थानिवत्त्वप्रतिषेधः। अतः स्थानिवद्भावेन अकारान्तस्य पदत्वात् रेफस्य पदान्तत्वविरहात् न रुत्वप्रसङ्गः। 'पदे परतः' इत्येवं व्याख्यानेन आदेशस्य परपदस्थत्वं स्वतो लभ्यते। 'पदे' इत्यत्र परपदस्योपस्थितत्वात् प्रत्यासत्त्या परपदस्थ एव अजादेशो गृह्यते इति तात्पर्यम्। न च 'पूर्वत्रासिद्धीये न स्थानिवत्' इत्यनेन प्रतिषेधात् स्थानिवद्भावाभावे पदत्वसत्त्वाद् रुत्वापत्तिरिति वाच्यम्, सप्तमीसमासाश्रयणेन तन्निषेधव्यावृत्तिं कुर्वतो भाष्यकृतः तादृशप्रयासवैयर्थ्यापत्त्या पदचरमावयवविधायकातिरिक्तस्य त्रैपादिकसूत्रस्य 'पूर्वत्रासिद्धीये' इति वार्त्तिके ग्रहणेन अनुपपत्तेरभावात्।

विधि के साथ षष्ठी-तत्पुरुष है। अनुक्त कर्म में षष्ठी होने से पदचरमावयवकर्मक विधान में स्थानिवद्भाव का निषेध सिद्ध हुआ। 'एषो यन्' यहाँ इण् धातु से शतृ प्रत्यय और यण् करने पर निष्पन्न यन् के यकार को हश् मानकर उत्व होता है और हल् मानकर 'एतत्तदो.' इस सूत्र से सुलोप नहीं होता; क्योंकि उत्वविधि के पद का चरमावयव होने से 'न पदान्त' सूत्र से स्थानिवद्भाव का प्रतिषेध हो जाता है। अभावरूप होने से लोप किसी का अवयव नहीं हो सकता। अतः लोपविधि पदचरमावयवकर्मक नहीं है। इसमें निषेध की प्रवृत्ति न होने से स्थानिवद्भाव के द्वारा स्थानी इकार का अतिदेश होने से हल्परत्वाभाव होने के कारण लोप नहीं होता है। उक्तार्थ का यह प्रयोजन है।

शंका—वेतस शब्द से 'कुमुदनड' इत्यादि से ड्मतुप् होने पर डित्प्रयुक्त टिलोप होने से निष्पन्न 'वेतस्वान्' इसमें मतुप्निमित्तक 'स्वादिषु' सूत्र से पदसंज्ञा होने के कारण पदान्त सकार को रुत्व होना चाहिये?

समाधान—पदान्त शब्द में 'पदे अन्तः' इस प्रकार सप्तमीसमास के द्वारा पद के परवर्ती होने पर अन्त = प्रत्यासत्ति से पदसम्बन्धी चरमावयवकर्मक विधान में अर्थात् परपदस्थ अजादेश स्थानिवत् नहीं होता—ऐसा अर्थ करने से उक्त प्रयोग में 'वान्' पद न होने से पद के परवर्ती रहने पर चरमावयव रुत्व नहीं है। अतः निषेध की प्राप्ति न होने से स्थानिवद्भाव के द्वारा अकारातिदेश होने से पदान्त में अकार है, सकार नहीं। इसलिये रुत्व नहीं हुआ।

शङ्का—'पूर्वत्रासिद्धीये न स्थानिवत्' इससे स्थानिवद्भाव का निषेध होने से रुत्व की शङ्का पूर्ववत् बनी है। रुत्व के त्रैपादिक होने से उक्त परिभाषा की प्रवृत्ति सुलभ है?

विधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रहणात् । अत एव 'महिष्मान्' इत्यत्र जश्त्वं न । सूत्रे जश्पदेन 'झलां जश् झशि' (८।४।५३) इत्यस्यैव ग्रहणम्, चर्सन्निहितस्यैव ग्रहणौचित्यात् ।

'कार्यकालपक्षेऽपि त्रिपाद्यामन्तरङ्गपरिभाषा न प्रवर्तते' इति वक्ष्यते इति न तयाऽस्य सिद्धिः । 'गोचा' इत्यादौ 'गतिकारकोपपदानाम्' (प०) इत्यस्यानित्यत्वेन

'पूर्वत्रासिद्धीये न स्थानिवत्' इत्यत्र तादृशसङ्कोचे फलमाह—**अत एवेति** । तादृशसङ्कोचस्वीकारादेव । महिष्मान् इत्यत्र अकारस्य स्थानिवद्भावेन षकारस्य पदान्तत्वविरहान्न जश्त्वम् । अन्यथा पूर्वत्रासिद्धीये इत्यनेन प्रतिषेधात् स्थानिवद्भावाप्राप्तौ जश्त्वं दुर्वारं स्यात् । न च न पदान्तसूत्रे जश्शब्दस्य स्वरूपेणैवोपादानात् तत्र कर्तव्ये स्थानिवद्भावनिषेधः पुनरपि दुर्वार इति वाच्यम्; चर्-साहचर्यात् तत्सन्निहितस्य 'झलां जश्झशि' इति विहितस्यैव जशो ग्रहणेन प्रकृते 'झलां जशोऽन्ते' इति प्राप्तस्य निषेधस्याप्राप्तेरित्याशयात् । नवीनैः यथोद्देशे कार्यकाले उभयस्थिन्नपि पक्षे अन्तरङ्गपरिभाषायाः त्रिपाद्यामप्रवृत्तिरभ्युपगता । अतः अन्तरङ्गपरिभाषयाऽपि वेतस्वान् महिष्मान् इत्यादेः सिद्धिसम्भावना न । न च गामञ्चतीति विग्रहे गोपूर्वकाद् अञ्चधातोः क्विपि टाविभक्तौ 'अचः' इत्यकारस्य लोपे 'गोचा' इति सिद्धम् । 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्

समाधान—सप्तमीसमास के द्वारा उक्त शङ्का का भाष्योक्त निराकणसामर्थ्य से पद चरमावयव विधान करने वाले शास्त्रों से भिन्न त्रैपादिक शास्त्रों का उक्त परिभाषा के त्रैपादिक शब्द से ग्रहण की कल्पना होती है । अतः पदचरमावयव रुत्व का विधान 'ससजुषो रुः' इसका त्रैपादिक शब्द से वार्तिक में ग्रहण नहीं है । अत एव महिष्मान् इसमें स्थानिवद्भाव से अकारान्त की पदसंज्ञा होने से पदान्त झल् के अभाव के कारण 'झलां जशोऽन्ते' इससे जश्त्व नहीं हुआ । 'पूर्वत्रासिद्धीये' इससे निषेध नहीं हुआ; क्योंकि जश्त्वविधायक सूत्र पदचरमावयव विधान त्रैपादिक है ।

शङ्का—'न पदान्त' इस सूत्र में जश् का पृथक् पाठ है, अतः सूत्र से प्रतिषेध हो जायगा ?

समाधान—चर् के साहचर्य से जश् 'झलां जश् झशि' इससे विहित का ही बोधक है, अतः इसकी प्रवृत्ति में स्थानिवत् निषेध होता है ।

शङ्का—पदान्त शब्द में सप्तमीसमास के विना भी वेतस्वान्, महिष्मान् इत्यादि स्थल में प्रकृति वेतस् महिष् सापेक्ष रुत्व तथा जश्त्व, प्रकृति-प्रत्यय उभयसापेक्ष टिलोप के अन्तरङ्ग होने से 'असिद्धं बहिरङ्गमन्तरङ्गे' इससे टिलोप बहिरङ्ग की असिद्धता होने से उक्त रूपों की सिद्धि हो जायगी, अतः सप्तमीसमास अनावश्यक है ?

समाधान—त्रैपादिक कार्यों में अन्तरङ्गपरिभाषा से असिद्धत्व का प्रतिपादन नवीन मत में यथोद्देश, कार्यकाल—दोनों पक्षों में नहीं होता । (इसका विचार परिभाषेन्दुशेखर में किया गया है ।)

शङ्का—'गोचा' इसमें 'गतिकारकोपपदानाम्' इससे उत्तरपद से सुबुत्पत्ति से पूर्व ही समास होने पर केवल अच् पद नहीं है । अतः 'अचः' इससे विहित अकारलोप को प के स्थानि-

सुबुत्पत्त्यनन्तरमेव समासः। 'उत्तरपदत्वे च' (का० वा०) इति प्रत्ययलक्षणप्रतिषेधश्च प्रत्यासत्त्योत्तरपदस्य कार्यित्वे एवेति न दोषः।

पदे इति पदत्वयोग्योपलक्षणं वा। अत्रेदं भाष्यमपि मानम्। अत्र पदचरमावयवादि-साधकः प्रतिबन्धकश्च स्थानिवद्भावो निषिध्यते; विनिगमनाविरहात्।

सुबुत्पत्तेः' इति परिभाषया विभक्त्युत्पत्तेः प्रागेव 'उपपदमतिङ्'इति समासे अच् इति शब्देन विहिताया विभक्तेरभावात् तन्मात्रस्य पदत्वाभावेन पदे परतः चरमावयवस्य कार्यस्य विधानाभावात् निषेधाप्रवृत्तौ स्थानिवद्भावे अवङादेशः स्यादिति वाच्यम्; 'गतिकारको-पपदानाम्' इत्यस्यानित्यत्वेन सुबुत्पत्यनन्तरमेव समासे प्रत्ययलक्षणेन सुप्त्वबुद्ध्या सुबन्त-त्वेन पदत्वसत्त्वात् पदेऽन्त इति सप्तमीसमासेऽपि उत्तरस्य पदत्वात् निषेधप्रवृत्तेः सम्भवात्।

न च प्रत्ययलक्षणस्य 'उत्तरपदत्वे चापदादिविधौ प्रतिषेधः' इति वार्त्तिकेन प्रतिषेधे पुनरपि पदत्वाभावात् स्थानिवद्भावप्रतिषेधो न स्यादिति वाच्यम्; तत्र कार्यित्व-प्रवेशेन उत्तरपदस्य पदत्वप्रयुक्तकार्ये कर्तव्ये तेन प्रत्ययलक्षणस्य प्रतिषेधात्। प्रकृते उत्तरपदस्य गोचेत्यत्र 'अचः' इत्यस्य न किञ्चित् कार्यं विधित्सितम्, अपितु गोशब्द-घटकस्य ओकारस्य, न तत् उत्तरपदस्थमिति न प्रत्ययलक्षणप्रतिषेधः प्राप्नोतीति। कार्यित्वनिवेशफलं 'ङमो ह्रस्वादचो'ति सूत्रे स्फुटीभविष्यति। अथवा पदशब्देन पदसंज्ञकस्य न ग्रहणम्, किन्तु पदत्वयोग्यता विवक्ष्यते। इहापि योग्यता अस्ति—यदि सुबुत्पत्तिः

वद्भाव के द्वारा प्राप्त अवङादेश की प्राप्तिदशा में परवर्ती पद न होने के कारण 'पदे अन्तः' इस अर्थ में 'न पदान्त' सूत्र से निषेध नहीं होगा। इसलिये अवङ् दुर्वार हो जायगा?

समाधान—लक्ष्यानुरोध से 'गतिकारकोपपदानाम्' इसके अनित्य होने से यहाँ आश्रयण नहीं है। अतः सुबुत्पत्त्यनन्तर समास होने से पदत्व सुलभ है। अतएव 'पदे अन्तः' इस समास में निषेध हो जाने से अवङ् नहीं हुआ।

शङ्का—सुबुत्पत्ति के अनन्तर समास होने पर भी 'उत्तरपदत्वे चापदादिविधौ प्रतिषेधः' इससे प्रत्ययलक्षण का प्रतिषेध होने से सुबन्तत्व न होने के कारण पदसंज्ञा नहीं होगी, इस लिये सप्तमीसमासपक्ष में गोचा इसमें निषेध की अप्राप्ति होने से अवङ् आदेश दुर्निवार है?

समाधान—'उत्तरपदत्वे' इसमें कार्यित्व का निवेश होने से उत्तरपद को प्रत्ययलक्षण-प्रयुक्त कार्य के करने में प्रत्ययलक्षण का निषेध होता है। प्रकृत में पूर्वपद गो शब्द को अवङा-देश की प्राप्ति है, उत्तरपद को नहीं। अतः प्रत्ययलक्षण का निषेध न होने से उत्तरपदभूत अच् पदसंज्ञक है। इसलिये पदपरक चरमावयव कार्य अवङादेश के करने में स्थानिवद्भाव का निषेध होता है। अथवा पदे इसमें पद शब्द पदत्वयोग का उपलक्षण है। जिसमें पदत्वयोग्यता अर्थात् पदत्वसम्भावना है। यदि प्रत्ययलक्षण का प्रतिषेध नहीं होता तो प्रत्ययलक्षण के द्वारा अन्तर्वर्ती सुप् से अच् के सुबन्त होने के कारण पदसंज्ञा हो जाती, ऐसी सम्भावना गोचा इसमें भी होने से पदत्वयोग्यता है। 'पद' शब्द का ऐसा अर्थ होने में भाष्योक्त सप्तमीसमास भी प्रमाण है।

स्यात् तदा पदसंज्ञा स्यात्—इत्येवंरूपा। पदे परतः इत्येवं सप्तमीसमासाश्रयणमपि भगवतो भाष्यकारस्य पदत्वयोग्यतायाः ग्रहणे मानं बोध्यम्। अन्यथा 'गोचा' इत्यादौ दोषात् कथं तथाविधोऽर्थः कल्पितो भगवता!

अत्रेदमवधेयम्—स्थानिवद्भावः चतुर्विधः प्राप्तः। तथाहि–१. साक्षात् पदचरमावयवसाधकः, २. साक्षात् पदचरमावयवप्रतिबन्धकः, ३. परम्परया पदचरमावयवसाधकः, ४. परम्परया पदचरमावयवप्रतिबन्धकश्च। तत्र परम्परया पदचरमावयवसाधकः स्थानिवद्भावो नानेन प्रतिषिध्यते, किन्तु अन्यस्य त्रिविधस्य प्रतिषेधः। आद्योदाहरणम्—कानि सन्ति। अत्र वाक्यसंस्कारपक्षे अस्धातुघटकाकारस्य 'श्नसोरल्लोपः' इति सूत्रेण लुप्तस्य स्थानिवद्भावात् अकारबुद्ध्या प्राप्तो यणादेशः पदचरमावयवत्वेन सम्भाव्यमानः, अतः तत्प्रापकः स्थानिवद्भावो भवति पदचरमावयवसाधकः। द्वितीयस्योदाहरणम्—एषो यन् हसतीति। अत्र इण्धातोः शतृन् प्रत्यये 'इणो यण्' इति यणि प्रथमैकवचने यन् इति रूपसिद्धिः। यणः स्थानिवत्त्वेन इकारबुद्धौ हश्परत्वाभावात् 'हशि च' इत्यनेन एष इत्यत्र रोरुत्वं न स्यात्। उत्वं च पदचरमावयवत्वेन सम्भाव्यमानं प्राप्तं स्थानिवद्भावेन निवर्त्यते। तस्मादयं स्थानिवद्भावः साक्षादेव पदचरमावयवकार्यम् उत्वं प्रतिबध्नाति।

चतुर्थस्य परम्परया पदचरमावयवप्रतिबन्धकस्य स्थानिवद्भावस्य उदाहरणम्—दध्यर्चः। दधिपूर्वकाद् ऋच्धातोः 'कर्मण्यण्' इत्यणि, गुणे, दधि अर्च इत्यवस्थायां स्थानिवद्भावेन ऋकारातिदेशे 'ऋत्यकः' इत्यनेन प्रकृतिभावः प्राप्नोति। प्रकृतिभावेन पदचरमावयवकार्यस्य यणः प्रतिबन्धेन स्थानिवद्भावः प्रकृतिभावसम्पादनद्वारकपरम्परया पदचरमावयवस्य यणः प्रतिबन्धकः।

परम्परया पदचरमावयवसाधकस्य नानेन प्रतिषेधः। यथा 'षडिकः' इत्यस्य षडङ्गुलिदत्तशब्दात् 'बह्वचो मनुष्यनाम्नष्ठज्वा' इति ठचि, 'ठाजादावूर्ध्वं द्वितीयादचः' इत्यनेनाङ्गुलिदत्तशब्दस्य लोपे 'ठस्येकः' इत्यनेन इकादेशे षष् अ इक इत्यवस्थायाम् अकारस्य 'यस्येति च' इत्यनेन लोपे[1] जश्त्वे च कृते सिद्धिः। अत्र स्थानिवद्भावेन अकारस्यातिदेशे अकारान्तस्य भत्वेऽपि समानावधिकत्वाभावात् षान्ते पदत्वसंज्ञायाः भसंज्ञया बाधाभावेन पदान्तत्वाद् जश्त्वं सिद्ध्यति। अत्रापि निषेधे षान्तस्यैव भपदसंज्ञयोः प्राप्तत्वेन समानावधिकत्वात् भसंज्ञया पदसंज्ञाया बाधात् पदचरमावयवस्य जश्त्वस्य प्रतिबन्धः स्यात्। अतः पदसंज्ञासम्पादनद्वारा जश्त्वसाधकस्य स्थानिवद्भावस्य नानेन प्रतिषेधः—इति कल्पनीयम्। अन्यथा स्थानिवद्भावनिषेधे भत्वेन पदत्वस्य बाधाद् जश्त्वं न स्यादिति भावः।

'वाचिकः' इत्यस्य 'एकाक्षर[2]पूर्वपदानामुत्तरपदलोपो वक्तव्यः' इति वचनेन वागाशीर्दत्तशब्दे उत्तरपदस्य आशीर्दत्तशब्दस्य लोपे अज्मात्रस्थानिकादेशस्य विरहेण स्थानिवद्भावस्य शङ्कैव नास्तीति भत्वेन पदत्वस्य बाधात् पदान्तत्वाभावाद् जश्त्वं

१. 'अकारस्य टिलोपः' इति कस्यचित् कथनमनवधानमूलकं प्रतिभाति।

२. एकाक्षरपदेन अच्सहितं व्यञ्जनं गृह्यते। न तु एकमक्षरमिति भावः।

इति स्थानिवद्भावनिषेधः ।।

एतत्सूत्रभाष्ये—'कमेर्णिङ्' (३ । १ । ३०) इत्यादिसूत्रभाष्यैः **'पूर्वत्रासिद्धे न स्थानिवत्' इत्यवष्टभ्य वरेयलोपस्वरदीर्घग्रहणवर्जं द्विर्वचनादि प्रत्याख्यातमिति लभ्यते ।** निषेध इति । **द्विर्वचनग्रहणात् 'पूर्वत्रासिद्धे' इति निषेधाद्वेति भावः ।।**

कुत्वञ्च नेति विभावनीयम् । 'षडिकः' इत्यत्र 'षषष्ठाजादिवचनात् सिद्धम्' इति वार्त्तिकात् 'ठाजादावूर्ध्वं द्वितीयादचः' इति सूत्रानुसारेण द्वितीयादचः परस्याङ्गुलिदत्तशब्दस्य लोपः । 'वाचिकः' इत्यत्र तु 'एकाक्षरपूर्वपदानाम्' इत्युक्त्यनुसारेण आशीर्दत्तशब्दस्य लोप इति व्यवस्था । 'पूर्वत्रासिद्धीये' इत्यस्य न प्रवृत्तिः; तत्र पदचरमावयवविधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रहणात् ।

'पूर्वत्रासिद्धीये न स्थानिवत्' इति वचनं स्वीकृत्य वरेयलोपस्वरदीर्घग्रहणं विहाय द्विर्वचनादिग्रहणं सूत्रे प्रत्याख्यातं भाष्यकृता । वरेयलोपस्वरविधेः प्रत्याख्याने वर्जनं 'न पदान्त' सूत्रे भाष्ये स्पष्टम् । दीर्घांशस्य वर्जनं 'कमेर्णिङ्' (३।१।३०) इति भाष्ये स्फुटम् । तथाहि णिङ्प्रत्यये णकारस्य 'णेरनिटि' इत्यत्र णिपदेन णिङोऽपि ग्रहणं यथा स्यात् तदर्थं चारितार्थ्यात्, ङित्करणस्य च आत्मनेपदस्य विधानार्थतया सावकाशत्वात्—इत्येवमुभयोः सावकाशत्वेन प्रतिषेधस्य बलवत्त्वाद् वृद्धिप्रतिषेधः प्राप्नोति । एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति—न कमेः वृद्धिप्रतिषेधो भवति, यदयं 'न कम्यमिचमाम्' इति मित्संज्ञायाः प्रतिषेधं शास्ति ।

मित्प्रतिषेधस्य अर्थवत्त्वात् वृद्धिप्रतिषेधः प्राप्नोति । अर्थवान् मित्प्रतिषेधः । कोऽर्थः ? णिङन्तस्य णिचि या वृद्धिः तस्याः ह्रस्वत्वं मा भूत् । अयं भावः—कम्धातोर्णिङ्प्रत्यये ततो णिचि णिन्निमित्तकवृद्धेः 'क्ङिति च' इत्यनेन प्रतिषेधो न सम्भवति । ङिन्निमित्तकवृद्धेरेव तेन प्रतिषेधाद् णिचश्चाकित्त्वात् वृद्धेः सौलभ्यात् । तत्र मितां ह्रस्ववारणाय 'न कम्यमि' इत्यस्यारम्भः सप्रयोजनः—इति न तज्ज्ञापकम् । अतः परं स्थानिवद्भावेन णिङ्व्यवधानात् णिन्निमित्तिका वृद्धिर्न प्राप्नोति । तस्मात् पूर्वोक्तं ज्ञापनं युक्तमित्याशयः ।

---

१. साक्षात् पदचरमावयव साधक, २. परम्परया पदचरमावयव साधक, ३. साक्षात् पदचरमावयव प्रतिबन्धक, ४. परम्परया पदचरमावयवप्रतिबन्धक—इस प्रकार यहाँ चतुर्विध स्थानिवद्भाव का प्रतिषेध 'न पदान्त' सूत्र से प्राप्त होता है । किन्तु परम्परया पदचरमावयवसाधक स्थानिवद्भाव का प्रतिषेध नहीं होता । शेष तीनों में प्रतिषेध इष्ट है । उदाहरण अन्यत्र (ऊपर संस्कृत टीका में) स्पष्ट हैं ।

'पूर्वत्रासिद्धीये न स्थानिवत्' इसके स्वीकार करने से सूत्र में द्विर्वचन, सवर्ण, अनुस्वार, जश्, चर इनका ग्रहण अनावश्यक है । कमेर्णिङ् तथा न पदान्त सूत्र के भाष्य से उक्तार्थ की पुष्टि होती है । 'सुद्ध्युपास्यः' इसमें द्विर्वचनविधि में प्राप्त स्थानिवद्भाव का निषेध 'न पदान्त' अथवा 'पूर्वत्रासिद्धीये' इसके द्वारा होता है ।।

५२. झलां जश्झशि । ८ । ४ । ५३ । **स्पष्टम्** । **इति धकारस्य दकारः** ।

दकार इति । **स्थानत आन्तर्यादिति भावः** ॥

ततो णिचं निमित्तीकृत्य जायमानाया वृद्धेर्णिङ्निमित्तको ह्रस्वो मा भूदित्येवमर्थो मित्प्रतिषेध इति कल्प्यते । तथाच पूर्वोक्तार्थज्ञापनासम्भवमुक्त्वा, 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया णिङ्निमित्तकत्वेन अन्तरङ्गत्वात् ह्रस्वदृष्ट्या बहिरङ्गभूतायाः बहिर्भूतणिज्निमित्तकवृद्धेरसिद्धत्वाद् ह्रस्वस्य ह्रस्वत्वे फलाभावात् 'मितां ह्रस्वः' इत्यस्याप्रवृत्तौ 'न कम्यमि' इत्यस्य वैयर्थ्येन पूर्वोक्तज्ञापकताया युक्तत्वात् । तथाच णिङन्तात् णिचि प्रयोजनं मत्वा पुनः पूर्वोक्तयुक्त्या स्थानिवद्भावेन व्यवधानमाश्रित्य तन्निराकृतम् । अतः परं मित्सञ्ज्ञाप्रतिषेधस्य 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' इति दीर्घत्वं शास्ति तत् कमेर्णिङि मा भूत् ।

ततः पुनराशङ्कितम्—किं पुनः कारणं तत्र 'दीर्घोऽन्यतरस्याम्' इत्युच्यते, न ह्रस्वोऽन्यतरस्यामित्येव । यथाप्राप्तं कमेः ह्रस्वत्वमेव । तत्रायमर्थः (प्रयोजनम्) ह्रस्वग्रहणं न कर्तव्यं भवति । प्रकृतमनुवर्तते । क्व प्रकृतम् ? मितां ह्रस्वः । का रूपसिद्धिः ? अशमि अशामि, शमं शमं शामं शामम् । वृद्ध्या सिद्धम् । न सिध्यति; 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' इति वृद्धिप्रतिषेधः प्राप्नोति । नैष दोषः । चिण्कृतोः स वृद्धिप्रतिषेधो न णिचि । इदं तर्हि प्रयोजनम्-अजनि अजानि ? 'जनिवध्योश्च' इति वृद्धिप्रतिषेधः । सोऽपि चिण्कृतोरेव न णिचि । णिज्व्यवहिते यङ्लोपे चोपसंख्यानं कर्तव्यं स्यात् शमयन्तं प्रयोजितवान् अशमि अशामि शमं शमं शामं शामम्, शंशमयतेः अशंशमि अशंशामीत्यादि । किं पुनः कारणं न सिध्यति ? चिण्णमुल्परे णौ मितामङ्गानां ह्रस्वो भवतीत्युच्यते, यश्चात्र णिः चिण्णमुल्परो न तस्मिन् इदमङ्गम् । यस्मिंश्चेदमङ्गम् नासौ चिण्णमुल्परः । स्थानिवद्भावात् न चिण्णमुल्परः । णिलोपे कृते चिण्णमुल्परः । स्थानिवद्भावात् न चिण्णमुल्परः—एतावता भाष्यसन्दर्भेण ह्रस्वविधानन्यासे णिज्व्यवहिते इत्यादि पूर्वोक्तं वचनं कर्तव्यं स्यात् । अत उत्तरं दीर्घघटिते 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' इति सूत्रे कृते तु वचनस्यानावश्यकतां वदन्ति भाष्यकाराः । अयं 'दीर्घोऽन्यतरस्याम्' इत्युच्यमाने कथमेतावता सिध्यति । एतदिदानीं दीर्घग्रहणस्य प्रयोजनम्–दीर्घविधौ अजादेशो न स्थानिवद् भवतीति स्थानिवन्निषेधः सिद्धो भवति ।

एतेन भाष्येण न पदान्तसूत्रे दीर्घग्रहणमावश्यकमिति प्रतीयते । अन्यथा 'चिण्णमुलोः' इत्यस्य सापादिकत्वेन 'पूर्वत्रासिद्धीये' इत्यनेनानिर्वाहात् स्थानिवद्भावप्रतिषेधप्रतिपादनं भाष्यकृतोऽसतं स्यादित्यलं बहूक्त्या । न पदान्तसूत्रघटकेन केन अंशेन स्थानिवद्भावप्रतिषेधो गम्यते ? इत्याकांक्षायामाह—**द्विर्वचनेति** । तस्य प्रत्याख्यानपक्षे आह—**पूर्वत्रेति** । 'पूर्वत्रासिद्धीये न स्थानिवत्' इत्येनन प्रतिषेधः । अतः 'सुध्युपास्यः' इत्यत्र द्विर्वचने कर्तव्ये यणादेशस्य न स्थानिवद्भावः ॥

ननु धकारस्य दकार एव कथम् ? इत्यत उक्तम्—स्थानत इति । दन्तस्थानकृतान्तर्येण धकारस्थाने जश्त्वेन दकार एव भवति ॥

५३. अदर्शनं लोपः । १ । १ । ६० । **प्रसक्तस्यादर्शनं लोप संज्ञस्यात् ।**

अदर्शनम् (१ । १ । ६०) ॥ **स्थाने इति वर्तते, प्रसङ्गे सतीति तदर्थः, तदाह्–** प्रसक्तस्य इति । **शास्त्रतोऽर्थतो वेति भावः । अत्र दृशिर्ज्ञानसामान्ये । तत्र ज्ञानस्यावर्ज-**

अदर्शनं लोपः ॥ 'स्थानेऽन्ततरतमः' इति सूत्रात् स्थानेपदमनुवर्तते। क्वचित् शास्त्रतः प्रसक्तिः, यथा राजा दधि इत्यादौ विभक्तेः प्रसक्तिः; यथा वा प्रत्ययादिघटकानुबन्धानाम् । अर्थतः प्रसक्तिः ल्यब्लोपे । यथा प्रासादात् प्रेक्षते इत्यत्र आरुह्य इत्यस्य अर्थतः प्रसक्तिः । तदाह–**शास्त्रतोऽर्थतो वेति** । अदर्शनम् = दर्शनाभावः–दृश्धातुना भावे ल्युटि निष्पन्ने दर्शनपदे दृश्धातुर्ज्ञानसामान्यार्थकः, न तु चाक्षुषज्ञानमात्रपरः। अत एव 'पश्यार्थैश्चानालोचने' इत्यत्र अनालोचनग्रहणस्य सार्थक्यम् । आलोचनम्=चाक्षुषज्ञानम्, तद्भिन्नं ज्ञानम् अनालोचनं तत्रार्थे विद्यमानैः पश्यार्थैः अर्थात् दर्शनार्थैः इति विवक्षितम् । दृशोर्भावे शः, पाघ्रेति पश्यादेशे पश्य इति । यदि चाक्षुषज्ञानार्थको दृश्धातुः स्यात् तदा अनालोचनेन सहान्वयो न स्यात् ।

विषयेन्द्रियसम्बन्धादिरूपज्ञानसामग्रीसत्त्वे 'ज्ञानं मे न जायताम्' इतीच्छायां सत्यामपि तदविषयकं ज्ञानं प्रमा अप्रमा वा नियमेन जायते एव । अतः ज्ञाननिषेधस्य कर्तुमशक्यतया कथमनुबन्धादीनां सत्त्वे तज्ज्ञानाभावरूपलोपो वक्तुं शक्यते ? इत्याह—**तत्रेति** । तत्र लोपविधायके शास्त्रे तत्सामग्र्येति—ज्ञानसामाग्र्याः इत्यर्थः । **'प्रत्ययलोपे'** इत्यस्य प्रत्ययलक्षणार्थमित्यग्रिमेणान्वयः । अनुत्पत्तेरेव इत्यत्र एवपदं ज्ञाननिवृत्तिव्यवच्छेदं बोधयति । तथा च यत्र लोपो विहितस्तत्र सर्वत्र 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायेन जातनिवृत्त्यपेक्षया तेषामनुत्पत्तेरेव लाघवात् स्वीकारः । न च अकृतेत्यादौ 'ह्रस्वादङ्गात्' इति सिचो लोपे = अर्थादनुत्पत्तौ, च्लेः श्रूयमाणत्वं प्रसज्येत इति नाशङ्कनीयम् ।

अदर्शनम् इति । 'स्थानेऽन्तरतमः'[1] इस सूत्र से स्थाने पद की यहाँ अनुवृत्ति है । उसका प्रसङ्ग अर्थ है । उसी का फलितार्थ है—प्रसक्तस्य । प्रसक्ति शास्त्र या अर्थ से गृहीत है । हे राम यहाँ शास्त्र से प्रसक्त सुविभक्ति का 'एङ्ह्रस्वात्सम्बुद्धेः' इससे लोप हुआ । 'प्रासादात् प्रेक्षते' इसमें अर्थतः प्रसक्त ल्यबन्त 'आरुह्य' इसके अदर्शनरूप लोप होने से 'ल्यब्लोपे' इससे पञ्चमी सिद्ध होती है । यहाँ दृश् धातु का ज्ञानसामान्य अर्थ है; चाक्षुष ज्ञानमात्र विवक्षित नहीं । विषय के साथ इन्द्रियसम्बन्ध होने से अनिच्छा रहने पर भी ज्ञानोत्पत्ति अनिवार्य हैं । अतः उच्चारण के अभाव द्वारा उच्चारणसत्ता का निषेध समझना चाहिये । मूल का परम्परा से सत्ता के निषेध में तात्पर्य होने से टिप्पणीकार की चिन्ता निरर्थक है । शास्त्रतः या अर्थतः प्रसक्त के उच्चारणाभाव का लोप द्वारा बोधन करने में 'भुक्तवन्तम्' इस न्याय का विरोध एवं शब्दानित्यत्व प्राप्त होगा । अतः वहाँ प्रत्यय की अनुत्पत्ति का ही प्रत्ययलोप में प्रत्ययलक्षण के लिये अन्वाख्यान करना चाहिये ।

---

१. स्थान-शब्द की ताल्वादिस्थानपरक व्याख्या में अर्थाधिकारानुरोध से 'षष्ठी स्थानेयोगा' इससे स्थान-पदानुवृत्ति है ।

नीयत्वेन तत्सामग्र्यन्तर्गता उच्चारणकृता सत्ता निषिध्यते। तत्र प्रत्ययलोपे शास्त्रतोऽर्थतश्च प्रसक्तोच्चारणस्य लोपविधानेन तस्य तस्मिन् विषयेऽनुत्पत्तेरेवान्वाख्यानं प्रत्ययलक्षणार्थमिति बोद्धव्यम्। अर्थस्यैषा संज्ञा; व्याख्यानात्।

यत्तु "प्रसक्तस्येति किं ग्रामे तिष्ठतीत्यादौ 'ल्यब्लोपे' इति पञ्चम्यापत्तेः। अस्ति चात्र ल्यपोऽदर्शनम्। शास्त्रतोऽर्थतश्च न तत्प्रसक्तिरिति न दोषः" इति? तन्न; तेन प्रत्यासत्त्या ल्यबन्तार्थकर्माधिकरणयोरेव पञ्चमीविधानेन तस्यात्राप्राप्तेः। तत्त्वे तु अस्त्येवार्थतो ल्यबन्तस्य प्रसक्तिः। तस्मात् 'त्रपु' इत्यत्र क्विपोऽदर्शनसत्त्वेन प्रत्ययलक्षणेन तुगापत्तिर्दोषः।

च्लेः स्थाने झलादिप्रत्ययाव्यवहितपूर्वत्वविशिष्टं ह्रस्वान्तमङ्गं यत् तदव्यवहितोत्तरत्वाभाववान् सिज् विधीयते 'च्लेः सिच्' इत्यनेन। अत्रैव 'ह्रस्वादङ्गात्' इति सूत्रं तात्पर्यं ग्राहयति।

ननु 'स्वं रूपमिति' शास्त्रबलात् अदर्शनशब्दस्य लोपसंज्ञा स्यात्, न तु दर्शनाभावरूपस्य अदर्शनशब्दार्थस्य? इत्यत आह—**अर्थस्येति**। व्याख्यानात् लोपरूपमहासंज्ञाकरणरूपाद् इति महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानाय। तथा च लोपनं लोपः—नहि अदर्शनशब्दो लोपनक्रियारूपो भवितुमर्हति। स्वं रूपमिति सूत्रप्रत्याख्यानपक्षेऽपि यत्रार्थे कार्यस्य बाधः, तत्र शब्दपरता। यथा कर्मादीनामर्थे बाधाभावात् अर्थस्य संज्ञा, न शब्दस्य, तथा अत्रापि अर्थे संज्ञाया बाधाभावात् तस्यैव सञ्ज्ञा।

प्रसक्तस्यादर्शनमिति विवक्षणे फलम्—**ग्रामे तिष्ठतीति**। अन्यथा अदर्शनमात्रस्य लोपसञ्ज्ञायाम् अत्रापि लोपदर्शनेन लोपसञ्ज्ञायां 'ल्यब्लोपे कर्मण्यधिकरणमेके' इत्यनेन पञ्चमी स्यात्। प्रसक्तस्य अदर्शने विवक्षिते तु नात्र लोपसञ्ज्ञाप्रसङ्गः। तिष्ठतेरधिकरणत्वेन ग्रामस्यैव विवक्षितत्वेन अर्थतः शास्त्रतो वा ल्यबन्तस्याप्रसङ्गात्।

वस्तुतस्तु 'ल्यब्लोपे' इत्यनेन ल्यबन्तार्थनिरूपितकर्मत्वाश्रये अधिकरणत्वाश्रये च पञ्चमी विधीयते इति ग्रामे तिष्ठतीत्यत्र ल्यबन्तार्थक्रियानिरूपिताधिकरणताया विरहादेव पञ्चम्या अप्राप्तेः प्रसक्तस्येत्यस्य नैतदुदाहणं युक्तम्। ल्यबन्तार्थक्रियानिरूपिताधिकरणत्वेन विवक्षितत्वे तु ल्यबन्तस्य अर्थतः प्रसक्त्या पञ्चमी इष्यते एव। अतः फलान्तरमाह—**तस्मादिति**।

इस सूत्र से 'अदर्शन' शब्द को लोपसंज्ञा नहीं होती है, किन्तु यहाँ संज्ञाकरणसामर्थ्य से अदर्शनशब्दार्थ दर्शनाभाव की लोपसंज्ञा होती है। प्रसक्त का अदर्शन विवक्षित न मानने पर 'ग्रामे तिष्ठति' इसमें भी ल्यबन्त का अदर्शन होने से 'ल्यब्लोपे' से पञ्चमी की आपत्ति हो जाएगी। उक्त निवेश करने पर शास्त्रतः या अर्थतः ल्यबन्त का प्रयोग प्रसक्त नहीं है, अतः लोपसंज्ञा नहीं हुई—यह कथन युक्त नहीं है। क्योंकि ल्यब्लोप होने पर भी ल्यबन्तार्थ के प्रति कर्म या अधिकरण को ही पञ्चमी का विधान उक्त वचन से होता है। अतः उसकी प्राप्ति नहीं है। यदि ल्यबन्तार्थ के प्रति कर्मत्व या अधिकरणत्व विवक्षित है तो अर्थतः ल्यबन्त की प्रसक्ति है। अतः 'प्रसक्तस्य' के प्रवेश रहने पर भी पञ्चमी की प्राप्ति होने से उसका यह व्यावर्त्य नहीं हो सकता। इसका व्यावर्त्यस्थल त्रपु है। यहाँ क्विप् के अदर्शन से प्रत्ययलोप के कारण प्रत्ययलक्षण

५४. संयोगान्तस्य लोपः । ८ । २ । २३ । **संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् । इति यलोपे प्राप्ते ।**

'यणः प्रतिषेधो वाच्यः' (वा०) । 'यणो मयो द्वे वाच्ये' (वा०) 'मय इति पञ्चमी यण इति षष्ठी' इति पक्षे यकारस्यापि द्वित्वम् ।

कृत्प्रत्ययेन प्रकृत्याक्षेपस्तु न । अत्रैव प्रकृतिं विनाऽतिदेशतः प्रत्ययज्ञानसत्त्वेन व्यभिचारात्तदाक्षेपासम्भवात् ।

इति पक्षे इति । **विनिगमनाविरहादिति भावः । द्वित्वस्य त्रैपादिकत्वात् तत्र न यणो बहिरङ्गासिद्धत्वम् । अत एव** 'दद्ध्यत्र' इति भाष्ये **उदाहृतम् ।**

प्रसक्तस्येत्यस्याभावे त्रपुशब्दात् प्रथमैकवचने नपुंसकत्वात् सोर्लुकि निष्पन्ने 'त्रपु' इत्यत्र क्विपोऽदर्शनेन लोपसञ्ज्ञायां सत्यां प्रत्ययलक्षणेन क्विपं निमित्तीकृत्य 'ह्रस्वस्य पिति कृति तुगि'त्यनेन तुगापत्तेः । न च 'त्रपु' इत्यत्र प्रत्ययलक्षणेन क्विबुद्धावपि क्विप्निमित्तकतदादित्वविरहात् न तुकः प्राप्तिः; पित्कृन्निमित्तकतदादेरेव लुको विधानादिति वाच्यम्; अत्र **सदाशिवभट्टाः—**'त्रपु' इति 'सोमसुत् त्रपु' इत्यस्योपलक्षणं मत्वा तत्र दोषमुद्भावितवन्तः । अत्र सुनोतेरनन्तरमिव क्विपोऽदर्शनस्य त्रपुशब्दादग्रेऽपि सत्त्वेन तस्यापि लोपसंज्ञायां प्रत्ययलक्षणेन त्रपुशब्दादग्रेऽपि क्विपोबुद्धौ तन्निरूपितदादित्वस्यापि बुद्धौ अविवादात् नानुपपत्तिरिति वदन्ति । धातोरनुवृत्त्या तुग्वारणे तु सोमसुत्, पुत्रीयतीत्युदाहार्यम् ।

कृत्प्रत्ययेनेति । परदेशावच्छेद्यत्वविशिष्टप्रत्ययज्ञानापेक्षया प्रकृतिज्ञानस्य व्यापकतया कृत्प्रत्ययेन प्रकृतिमन्तरा अनुपपद्यमानेन अर्थापत्तिमूलकेन 'येन विना यदनुपपन्नं तत्तेनाक्षिप्यते' इत्येतन्न्यायेन अनुमानेन वा प्रकृतेराक्षेपे क्विपः प्रकृतेः तुग्विधानात् त्रपुशब्दे तुगापादनं पुनरपि न युक्तमिति वाच्यम्; त्रपुशब्दे एव प्रकृतिज्ञानं विनाऽपि प्रत्ययलक्षणेन प्रत्ययज्ञानस्य सुलभत्वेन 'इयान्' इत्यत्र च प्रत्ययभागे सत्यपि प्रकृतिभागज्ञानाभावात् व्यभिचारेण प्रकृतिज्ञानस्य व्यापकत्वमेव दुर्घटमिति प्रत्ययज्ञानेन प्रकृत्यनुमानरूपाक्षेपासम्भवात् । प्रकृतिं विनाऽपि प्रत्ययस्य सत्त्वेन अर्थापत्तिरपि दुर्घटा ॥

यणो मयो द्वे वाच्ये इति । अत्र 'यणः' 'मयः' इत्युभयं षष्ठीपञ्चम्योः समानं रूपं भवतीति एकतरविभक्त्यन्तनिर्णये प्रमाणाभावादुभयं विवक्षितम् । अतएव 'यण इति षष्ठी मय इति पञ्चमी, मय इति षष्ठी यण इति पञ्चमी' इत्येवं सिद्धान्तकौमुद्यां व्याख्यातम् ।

के द्वारा क्विब्निमित्तक 'ह्रस्वस्य पिति' इससे तुक् की आपत्ति हो जायगी । कृत् प्रत्यय से स्व प्रकृति का आक्षेप होने से तुक् की व्यावृति नहीं हो सकती; क्योंकि प्रकृति के बिना भी प्रत्यय 'इयान्' इत्यादि स्थल में देखने से उक्त नियम व्यभिचरित है ॥

यणो मयो द्वे इति । षष्ठी और पञ्चमी दोनों में 'यणः' तथा 'मयः' इस प्रकार का निर्देश होने से किसी एक के निश्चय में प्रमाणाभाव के कारण षष्ठ्यन्त और पञ्चम्यन्त उभय रूप से व्याख्यान किया गया है । अपरनिमित्तक द्वित्व की अपेक्षा परनिमित्तक होने से बहिरङ्ग यणादेश

तदिह धकारयकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि—एकधमेकयम्, द्विधं द्वियम्, द्विधमेकयम्, एकधं द्वियम् । सुद्ध्युपास्यः । मद्ध्वरिः । धात्त्रंशः । लाकृतिः ।

धकारयकारयोरिति । **तेन विसर्गादिद्वित्वेनाऽऽधिक्येऽपि न क्षतिः ।**

द्विधमिति । **द्विधत्वं प्रक्रियायां बोध्यम् । 'एकस्या आकृतेश्चरितः प्रयोगो न द्वितीयस्यास्तृतीयस्याश्च भविष्यति' इति 'कृञ्चानुप्रयुज्यते' (३ । १ । ४०) इति सूत्रभाष्योक्तन्यायेनैकस्य द्वित्वे परस्य तदभावोऽनुचित इति न वाच्यम्, सार्थकानेकविषये तन्न्याया-**

तात्पर्यसन्देहे शाब्दबोधो निश्चयात्मको मा भूत् । शाब्दबोध एव न भवतीति न युक्तम्; अनुभवविरोधात् । किञ्च तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वमेव नानुमन्यन्ते बहवः । तन्मते शाब्दबोधप्रतिवन्धे कारणाभावादयुक्तमेव तत् । त्रिपाद्यामन्तरङ्गपरिभाषाया अप्रवृत्तेर्न अन्तरङ्गद्वित्वापेक्षया परनिमित्तकत्वेन वहिरङ्गस्य यणोऽसिद्धत्वं शङ्कनीयम् ।

ननु विसर्गस्य सकारस्य च द्वित्वेन रूपाधिक्यमिति कथं चत्वारि रूपाणि ? इत्यत उक्तम्—**धकारयकारयोरिति** । ननु एकस्य धकारस्य जश्त्वेन दकारेन द्विधत्वम् ? इत्यत आह—**द्विधत्वमिति** । प्रक्रियादशायामिति भावः ।

ननु 'एकस्या आकृतेः = स्वरूपस्य चरितः = कृतः प्रयोगो न द्वितीयस्या आकृतेः प्रयोगः' इति 'कृञ्चानुप्रयुज्यते लिटि' (३।१।४०) इति सूत्रस्थभाष्योक्तनियमेन 'गवामश्वानाञ्च स्वामी' इत्येव प्रयोगो नतु 'गवामश्वेषु च स्वामी' इति । अत्र 'स्वामीश्वराधिपतिदायाद' (२।३।३९) इत्यादिना सूत्रेण षष्ठी । अनेन सप्तम्या अपि विधानात् एकत्र षष्ठी अपरत्र सप्तमी न क्रियते । गवा स्वामी अश्वेषु चेति नैव विरुद्धः प्रयोगः । कुतः ? एतन्न्ययादेव एकस्या आकृतेः षष्ठ्यन्तस्य प्रयोगे द्वितीयस्या आकृतेः सप्तम्यन्तरूपायाः प्रयोगस्यायुक्तत्वात् । अतः 'सुद्ध्युपास्यः' इत्यत्र धकारस्य द्वित्वे द्वितीये यकारे द्वित्वाभावो भवितुं नार्हतीति शङ्कते—**एकस्या इति** । 'कृञ्चानुप्रयुज्यते' इति सूत्रे भाष्ये—'लिट् परार्थं तर्हि कृञोऽनुप्रयोगवचनं क्रियते । लिट्परस्यैवानुप्रयोगो यथा स्यात् अन्यपरस्य मा भूत् । किम्परस्य अनुप्रयोगः प्राप्नोति ? लट्परस्य । न लट्परस्यानुप्रयोगेण भूतकालो विशेषितः स्यात् । अस्मिन्नेव प्रसङ्गे 'हशश्वतोर्लङ् च' इत्यत्र प्रयोजनं कृञोऽनुप्रयोगस्य' उक्तम् । ह तथा शश्वत्-इत्यनयोः प्रयोगे लिटः प्रसङ्गे परोक्षानद्यतने

असिद्ध नहीं हुआ; क्योंकि त्रिपादी में अन्तरङ्गपरिभाषा की उपस्थिति नहीं होती । इसलिये भाष्य में मय् से परवर्ती यण् को द्वित्व होने का उदाहरण 'दध्यत्र' दिया है ।

शङ्का—द्वित्वोत्तर धकार को जश्त्व होने से दकारघटित प्रयोग होगा । इस प्रकार दो धकारघटित प्रयोग का कथन युक्त नहीं है ?

समाधान—प्रक्रियादशा में द्विधकारत्व का कथन है । अतः प्रयोगावस्था में दकार होने पर भी कोई क्षति नहीं ।

शङ्का—'स्वामीश्वराधिपति' इत्यादि से स्वामी शब्द के योग में षष्ठी और सप्तमी दोनों का विधान पर्याय से होता हैं । जैसे 'गवाम् अश्वानाञ्च स्वामी' गोषु अश्वेषु स्वामी गवां स्वामी

५५. नादिन्याक्रोशे पुत्रस्य । ८ । ४ । ४८ । **पुत्रशब्दस्य न द्वे स्तः, आदिनीशब्दे परे आक्रोशे गम्यमाने । पुत्रादिनी त्वमसि पापे ।**

ङ्गीकारात्; यत्रान्याकृतिकरणे भिन्नार्थत्वसम्भावना तद्विषयत्वाच्च । 'हलो यमाम्' (८ । ४ । ६४) इति लोपे द्वित्वाभावे चैकधमेव रूपम् ॥

नादिन्याक्रोशे (८ । ४ । ४८) । **'यरोऽनुनासिके'** (८ । ४ । ४५) **इत्यतो यर**

लङ्लिट् च पर्यायेण प्रयोक्तव्यौ । तत्र लङ्परोऽनुप्रयोगो मा भूत्, अतः कृञोऽनुप्रयोगो विहितः । इत्यनन्तरम् 'एतदपि नास्ति प्रयोजनम्, एकस्या आकृतेरित्यादि आनुपूर्वीरूपेण पठ्यते' इति स्पष्टमेव उक्तन्याये भाष्यप्रामाण्यम् ।

समाधत्ते–**सार्थकेति** । 'अर्थोऽभिधेये रैवस्तुप्रयोजननिवृत्तिषु' इति (अ०को० ३-३-८६) कोशानुसारेण अर्थशब्दः प्रकृते अभिधेये प्रयोजने च उभयत्रार्थे प्रयुक्तः । अभिधेयसहितस्य शब्दस्य या आकृतिः प्रयुक्ता ततो भिन्ना आकृतिर्नैव वक्तव्येत्यभिप्रायः ।

यथा गवामित्यस्य सार्थकस्य भिन्ना आकृतिरश्वेषु इति न प्रयोक्तव्यम्; अप्रकृतत्वात् । सफलानेकविषयोदाहरणं वैदिकं नेहोपन्यस्तम् । तथा च प्रकृते दकारादिवर्णानां सार्थकत्वाभावात् नैतेषां न्यायविषयता । अथवा यत्रान्याकृतिकरणे अन्यार्थकत्वसम्भावना तत्रैव एष न्याय इति न दोषः । प्रकृते द्वित्वाभावघटितप्रयोगे नान्यार्थकत्वसम्भावना । 'गवां स्वामी अश्वेषु'—इति प्रयोगे तु गवां स्वामी अश्वेषु तिष्ठतीत्यर्थान्तरसम्भावना । अतः तादृशः प्रयोगो दुष्यति । अत एव साहित्ये ईदृशप्रयोगे क्रमभङ्गदोषः प्रतिपादितः । विस्तरेण 'कृञ्चानुप्रयुज्यते' इति **प्रदीपे उद्द्योते** च स्फुटम् ॥

नादिन्याक्रोशे पुत्रस्य ॥ अत्र आदिनीशब्दो ङीप्प्रत्ययान्तो यणादेशेन निर्दिश्यते । अस्मात् उत्पन्नायाः सप्तमीविभक्तेः 'छन्दोवत्सूत्राणि भवन्ति' इत्यनुसारेण सूत्राणां छान्दसत्वावगमात् 'सुपां सुलुक्' इत्यादिना लुकि कृते निष्पन्नस्य निर्देशः । आदिनीशब्दस्य सप्तम्यर्थे विद्यमानतया 'ईदूतौ च सप्तम्यर्थे' इत्यनेन प्राप्ता प्रगृह्यसंज्ञाऽपि छान्दसत्वादेव परिहरणीया ।

अश्वेषु च' इस प्रकार के प्रयोग की एक आकृति समान स्वरूप का प्रयोग करने पर उससे भिन्न आकृति का प्रयोग नहीं करना चाहिए—एतदर्थक 'एकस्याः आकृतेः' इस न्याय से जिस प्रकार व्यावृत्ति होती है उसी प्रकार धकार के द्वित्व होने पर यकार को द्वित्वाभाव होना अनुचित है ?

समाधान—उक्त न्याय की प्रवृत्ति अनेक आकृतिविषय में सार्थक मानी गयी है । यहाँ द्वित्व वैसा नहीं है । जहाँ अन्य आकृति का प्रयोग होने पर भिन्न अर्थ की सम्भावना रहती है, जैसे 'गवां स्वामी अश्वेषु' इसमें अश्वारूढ़ स्वामी—इस प्रकार अनिष्टार्थ प्रतीति की सम्भावना से वहाँ भिन्न आकृति का प्रयोग वर्जित किया गया है । जहाँ ऐसी सम्भावना नहीं है वहाँ न्यायप्रवृत्ति नहीं होती । इसलिए भी यहाँ भिन्नार्थत्व की आपत्ति न होने से न्यायप्रवृत्ति नहीं है ॥

नादिन्या इति । 'यरोऽनुनासिके' यथ् से की अनुवृत्ति है । पुत्रस्य इसमें अवयवार्थ में षष्ठी है । पुत्रस्य और आदिनी शब्दे परे—ये दोनों प्रधानीभूत में विशेषण हैं । आदिनी-शब्दपरक पुत्रशब्दावयव को आक्रोश अर्थ में द्वित्व नहीं होता—यह निष्कर्ष है । आदिनी शब्द से उत्पन्न ङि

आक्रोशे किम् ? तत्त्वकथने द्विर्वचनं भवत्येव—पुत्त्रादिनी सर्पिणी । 'तत्परे च' (वा०) । पुत्त्रपुत्त्रादिनी त्वमसि पापे ।

इति वर्त्तते । पुत्रशब्दस्येत्यवयवषष्ठी । 'आदिनीशब्दे परे' इति च प्राधान्याद् यर एव विशेषणम् ।

सूत्रे आदिनीति ङ्यन्तानुकरणं लुप्तसप्तमीकम् । अत एव 'तत्परे च' (का० वा०) इत्यस्याऽऽदिनीशब्दो 'यस्मात्परस्तत्र परे' इत्यर्थं हरदत्तो **व्याख्यत् । अद्धातौ** माधवोऽप्येवमेव **। ईदृशाक्रोशस्य स्त्रीष्वेव दर्शनाच्च । आक्रोशः=निन्दा, तदाह—**पुत्त्रा-दिनीति **।**

आदिनीति । आदिनीशब्दः प्रधानीभूते 'यरोऽनुनासिकेऽनुनासिको वा' इत्यतः अनुवृत्ते यरि विशेषणतया अन्वेति । पुत्रस्येत्यत्र अवयवषष्ठी । आक्रोशः = निन्दा । तथाच आदिनीनिरूपिताव्यवहितपूर्वत्वविशिष्टस्य पुत्रशब्दावयव-यरो द्वित्वं न निन्दायां गम्यमानायामिति सूत्रार्थः । इत्येतत्सर्वमभिप्रेत्य आह—**यरोऽनुनासिके** इति ।

नच आदिनीशब्दात् पूर्वस्य अचः परस्य च पुत्रघटकतकारस्य मध्ये रेफेण व्यवधानाद् अव्यवहितपूर्वत्वं नास्तीति कथं द्वित्वनिषेध इति वाच्यम्; सामर्थ्याद् एकवर्णस्य रेफस्य व्यवधानेऽपि प्रवृत्तेः स्वीकारेणादोषात् । अतएव ङीबन्तपुत्रीपदोत्तरम् आदिनीशब्द-प्रयोगे पुत्र्यादिनीत्यादौ न द्वित्वनिषेधः; अत्र रेफातिरिक्तेन यकारेणापि व्यवधानात् । न च नात्र पुत्रशब्दः, किन्तु पुत्रीशब्दः; लिङ्गविशिष्टपरिभाषया पुत्रशब्देन पुत्रीशब्दस्य ङीबन्तस्यापि ग्रहणात् । सूत्रे 'नादिन्या' इति यणा निर्देशः आदिनि-एवरूपसप्तम्यन्तस्य ङीबन्तस्य च उभयोरपि सम्भवात् कस्य निर्देश इति सन्देहो निराकृतः ।

अत्रार्थे परस्यापि सम्मतिमाह—**अत एवेति** । ङीबन्तस्य ग्रहणादेव । यदि ङिविभक्त्यन्तस्य आदिनी इत्येवं रूपस्य निर्देशोऽभिमतः स्यात्, तदा आदिनीशब्दः परो यस्मादित्यनुक्त्वा 'आदिशब्दो यस्मात् परः' इत्येवं वदेत् । आदिशब्द इत्यस्य समस्ततया विभक्तेः, नकारस्य च निवृत्तौ 'आदि' इत्येवं स्वरूपं स्यात् ।

युक्तिमप्यत्रार्थे आह—**ईदृशेति** । पुत्रमत्तुं शीलमस्याः इत्यर्थे भक्षणार्थकाद् अद्धातोः 'सुप्यजातौ णिनिस्ताच्छील्ये' इत्यनेन णिनिप्रत्यये नान्तत्वाद् ङीपि च कृते

विभक्ति का 'सुपां सुलुक्' इस सूत्र से लुक् होता है । नान्त आदिन् शब्द से ङि विभक्ति में आदिनि ऐसा प्रयोग निष्पन्न हो जाएगा । ङीबन्त का अनुकरण अनावश्यक है । इसलिए हरदत्त के संवाद से उक्तार्थ प्रमाणित करते हैं—अत एव इति । 'आदिनीशब्दपरः' ऐसा व्याख्यान हरदत्त ने किया है । ङीवन्त न मानने पर शब्द के साथ समास और विभक्तिलुक् होने पर 'आदिशब्द-परः' ऐसा प्रयोग करना उचित था । इससे ङीबन्तपदोत्तर उत्पन्न सप्तमी का लुक् होने से उक्त प्रयोग की सिद्धि प्रमाणित होती है । 'अद्भक्षणे' इस धातु के प्रकरण में माधवाचार्य ने भी पूर्वोक्त अर्थ के अनुसार ही व्याख्यान किया है ।

---

१. नहि भिक्षुको भिक्षुकान्तरं याचते सत्यन्यस्मिन्नभिक्षुके इति दृष्टान्तेन प्रधानेऽन्वयो युक्तः ।

वा हतजग्धयोः (वा०) पुत्रहती, पुत्त्रहती । पुत्रजग्धी, पुत्त्रजग्धी ॥

५६. त्रिप्रभृतिषु शाकटायनस्य । ८ । ४ । ५० । **त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वम् । इन्द्रः, इन्न्द्रः । राष्ट्रम्, राष्ट्रम् ॥**

तादृशाक्रोशस्य स्त्रीष्वेव दर्शनादाह—पुत्रहतीति । **'अनचि च' (८ । ४ । ४७) इति सिद्धे–पुत्रस्य क्तान्ते चेद्धतजग्धयोरेव, आक्रोशे एवेति नियमार्थमिदम् ॥**

संयुक्तेषु इति । **'त्रिप्रभृतिषु' (८ । ४ । ५०) इति सूत्रे वर्णानां सजातीयानामेव ग्रहणम्; परस्परसाहचर्यात् । न च तथाऽचः सम्भवति । अत एव 'अचो रहाभ्याम्' (८ ।**

निष्पन्नं पुत्रादिनीतिशब्दं कलहायमाना स्त्रिय एव आक्रोशे प्रयुञ्जते, न पुरुषाः । तस्मात् ङीबन्तस्यैवायं निर्देश इति युक्तमुत्पश्यामः । **पुत्रहतीति** । पुत्रो हतो यया सा । 'वाहिताग्न्यादिषु' इत्यनेन हतशब्दस्य परनिपाते 'स्वाङ्गपूर्वपदाद् वा' इत्यतेन ङीषि तत् सिद्धम् । 'अनचि च' इत्येन द्वित्वे सिद्धे 'नियमार्थं वार्त्तिकमिदमिति' इत्यादि मूले स्फुटम् ॥

त्रिप्रभृतिषु शाकटायनस्य इति ॥ अस्मिन् सूत्रे 'रामार्जुनौ' इत्यत्र यथा परस्परसाहचर्याद् रामपदेन बलरामस्य अर्जुनपदेन च पार्थस्य ग्रहणम्, नतु भगवतो दाशरथेः नवासहस्रार्जुनस्य; तथैव परस्परसाहचर्यात् त्रयाणां व्यञ्जनानामेव ग्रहणं बोद्धव्यम् । नन्वाचामेव त्रयाणां तथाविधानां ग्रहणं किन्न भवतीत्यत आह—**नच तथा इति** । नचेत्यस्य नहीत्यर्थः । तथा द्वित्वप्राप्तियोग्ययर्विशिष्टा अचः सम्भवन्ति । तितउ अत्र इत्यादौ त्रयाणामचां समभिव्यवहारे सत्यपि अचः परस्य यरोऽभावाद् द्वित्वप्राप्तियोग्यतैव नास्तीति निषेधस्य वैफल्यम् । **अतएव** इति । सजातीयवर्णग्रहणादेव । सजातीयविजातीययोरुभयोर्ग्रहणे 'हर्यनुभवः' इत्यादौ त्र्यादिवर्णेषु मध्ये अचः परस्य यरो द्वित्वेनेत्यर्थकेन 'त्रिप्रभृतिषु' इत्यनेन विकल्पेन द्वित्वनिषेधे रूपसिद्धौ 'अचो रहाभ्याम्' इत्यस्य वैयर्थ्यापत्तेः ।

ननु 'अचो रहाभ्याम्' इत्यनेन रेफात् परस्य यरो यकारस्य द्वित्वं हर्य्यनुभव

इस प्रकार का आक्रोश (= निन्दा) स्त्रियों में ही परस्पर कलह के समय देखा जाता है । अतः तदनुसार उदाहरण देते हैं—पुत्रहती ।

शंका—'अनचि च' से वैकल्पिक द्वित्व द्वारा भी उक्त प्रयोग की सिद्धि हो सकती है, एतदर्थ 'वा हतजग्धयोः' इसकी आवश्यकता नहीं है ?

समाधान—वचनान्तर से सिद्ध कार्य के विधान के लिये आरब्ध सूत्र नियमार्थक है । 'परवर्ती क्त-प्रत्ययान्त के रहने पर पुत्र शब्द को यदि द्वित्व हो तो हत और जग्ध को ही तथा आक्रोश अर्थ में ही होता है'—इस प्रकार नियम के लिए उक्त वार्त्तिक आवश्यक है ॥

संयुक्तेषु इति । समानजातीय तीन वर्णों के समुदाय का त्रिप्रभृति शब्द से ग्रहण होने 'संयुक्तेषु' यह फलितार्थ है । सजातीय तीन अच् एकत्र द्वित्व प्राप्ति के योग्य मिल सकते हैं । हल् अच् दोनों के समुदाय का त्रिप्रभृति शब्द से ग्रहण होने पर 'अचो रहाभ्यां द्वे' इसका वैयर्थ्य प्राप्त होगा; क्योंकि अच् से उत्तर रेफ हकार इसके अनन्तर यर् को द्वित्व उक्त सूत्र से होता है । यहाँ सभी लक्षणों में हल तथा स्वरात्मक तीन वर्णों का समुदाय होने से द्वित्व का निषेध हो

५७. सर्वत्र शाकल्यस्य । ८ । ४ । ५१ । **द्वित्वं न । अर्कः । ब्रह्मा ॥**

५८. दीर्घादाचार्याणाम् । ८ । ४ । ५२ । **द्वित्वं न । दात्रम् । पात्रम् ।**

५९. अचो रहाभ्यां द्वे । ८ । ४ । ४६ । **अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः । हर्य्यनुभवः । न ह्यचस्ति ।**

४ । ४६) इति सार्थकम् । निर्धारणे सप्तमी, 'अचः' इत्यनुवर्त्तते, त्रिप्रभृतिसंयुक्तवर्णमध्येऽचः परस्य यरो द्वे वा न स्त इत्यर्थः । तेन 'इन्द्रः' 'राष्ट्रम्' इत्यत्र नकारषकारयोः प्राप्तद्वित्वस्यैव निषेधविकल्पः । 'अनचि च' (८ । ४ । ४७) 'सर्वत्र शाकल्यस्य' (८ । ४ । ५१) इत्येव सिद्धे इदं सूत्रद्वयं विकल्पस्य मतभेदप्राप्तव्यवस्थाबोधनार्थमिति बोध्यम् । 'यरोऽनुनासिके' (८ । ४ । ४५) इत्यतो वेत्यनुवृत्त्या 'अनचि' (८ । ४ । ४७) इत्येव सिद्धे तु सूत्रत्रयमपि तथेति बोद्धव्यम् ॥

अचो रहाभ्याम् (८ । ४ । ४६) । **।अच इति श्रुतत्वाद् व्याख्यानाच्च रहाभ्यां सम्बध्यते । 'तस्मादित्युत्तरस्य' (१ । १ । ६७) इत्येतल्लभ्यमाह**—अचः पराभ्यामिति ।

इत्यत्र भवति । 'त्रिप्रभृतिषु' इत्यनेन तु रेफस्य द्वित्वम्, अथवा द्वित्वस्य निषेधो विकल्पेन भवतीति द्वयोर्विषयभेदात् कथं तस्य रूपस्य तेन सिद्धिः ? कथं वा 'अचो रहाभ्याम्' इत्यस्य वैयर्थ्यापादनमिति चेन्न; 'नेमौ रहौ कार्यिणौ किं तर्हि ? निमित्तं द्विर्वचनस्य' इति भाष्योक्त्या रेफस्य द्वित्वविधेयताश्रयत्वेन ग्रहणस्यां प्रतिषेधेन रेफस्य अविद्यमानवद्भावः कल्प्यते । तथा च अचः परस्य यरो द्वित्वनिषेधे रेफस्य अविदयमानतया यकारस्यैव द्वित्वं प्राप्तं निषिध्यते इति न विषयभेदः । अतएव 'अचो रहाभ्याम्' इत्यस्य वैयर्थ्यशङ्कापि युक्तैव ।

वस्तुतस्तु 'अनचि च' इत्यत्र 'वा' शब्दानुवृत्त्या द्वित्वविकल्पस्य सिद्धतया इदं सूत्रत्रयं शाकटायन-शाकल्यादीनामाचार्याणां मतभेदप्राप्तव्यवस्थाया बोधनार्थम् । निष्फल एव एतावान् प्रपञ्चः ॥

अचो रहाभ्यां द्वे ॥ श्रुतानुमितयोः श्रुतसम्बन्धो वलीयानिति परिभाषया श्रुतेन

जाने के कारण इससे द्वित्वविधान का वैयर्थ्य स्पष्ट है । 'त्रिप्रभृतिषु' इसमें निर्धारण में सप्तमी एवं अच् पद की अनुवृत्ति होने से त्र्यादि संयुक्त वर्णों के मध्य में जो यर् अच् से परवर्त्ती है उसको द्वित्वनिषेध विकल्प से होता है—ऐसा अर्थ होता है । अत एव इन्द्रः, राष्ट्रम्—इन प्रयोगों में नकार षकार को प्राप्त द्वित्व का ही विकल्प से 'अनचि च' से निषेध होता है । 'अनचि च' 'सर्वत्र शाकल्यस्य' इसी से द्वित्व द्वित्वाभावघटित उभयरूप की सिद्धि हो जाने से 'त्रिप्रभृतिषु' तथा 'दीर्घादाचार्याणाम्'—इन सूत्रों के मतभेद से विकल्पव्यवस्था में तात्पर्य है । 'अनचि च' इसमें वा शब्द की अनुवृत्ति द्वारा विकल्प द्वित्व की सिद्धि हो जाने से उक्त सूत्रद्वय एवं 'सर्वत्र शाकल्यस्य' इन तीनों सूत्रों की मतभेद-व्यवस्थार्थ आवश्यकता है ॥

अचो रहाभ्यामिति । 'श्रुतानुमितयोः श्रौतसम्बन्धो बलवान्' इस न्याय से तथा प्रत्यासत्ति से 'अचः' इसका रहाभ्याम् = रेफ और हकार के साथ सम्बन्ध है । 'तस्मात्' इस परिभाषा से परत्व

६०. हलो यमां यमि लोपः । ८ । ४ । ६४ । **हलः परस्य यमो लोपः स्याद्वा यमि । इति लोपपक्षे द्वित्वाभावपक्षे चैकयं रूपं तुल्यम् ।**

लोपारम्भफलं तु 'आदित्यो देवतास्येत्यादित्यं हविः' इत्यादौ ।

'यमां यमि' इति यथासंख्यविज्ञानान्नेह—माहात्म्यम्, तादात्म्यम् ॥

वा यमि **इति । 'झयो हः' (८ । ४ । ६२) इत्यतोऽन्यतरस्यामित्यनुवृत्तेरिति भावः । 'दीर्घादाचार्याणाम्' (८ । ४ । ५२) इत्युत्तरम् 'अनुस्वारस्य ययि' (८ । ४ । ५८), 'वा पदान्तस्य' (८ । ४ । ५९), 'तोर्लि' (८ । ४ । ६०), 'उदःस्था' (८ । ४ । ६१) 'झयो हो' (८ । ४ । ६२), 'शश्छोऽटि' (८ । ४ । ६३) इति षट्सूत्रीपाठोत्तरं 'झलां जश् झशि' (८ । ४ । ५३) 'अभ्यासे चर्च' (८ । ४ । ५४) 'खरि च' (८ । ४ । ५५), 'वाऽवसाने' (८ । ४ । ५६), 'अणोऽप्रगृह्यस्य' (८ । ४ । ५७) इति पञ्च-सूत्र्याः पाठ इति** भाष्यसम्मताष्टाध्यायीपाठे तु **'वाऽवसाने' इत्यतोऽनुवृत्तिर्बोध्या । स्पष्टं चास्य वैकल्पिकत्वं** 'लण्' (मा० सू० ६) सूत्रे भाष्ये ।

आदित्य **इति । आदित्यशब्दाच्छेषार्थण्यान्ताद्देवतार्थे ण्यः । 'यस्येति च'**

सम्बन्धस्य बलवत्त्वात् 'अनचि' इत्यग्रिमे सूत्रे प्रत्यासत्तिद्वारेणान्वयबोधनेन इह तत्त्यागे मानाभावरूपव्याख्यानाच्च 'अचः' इति रहाभ्यामित्यस्य विशेषणम् इत्याशयेनाह— **अच** इति । अग्रे अन्यत् सर्वं स्पष्टार्थकम् ॥

हलो यमां यमि लोपः ॥ अदिति-शब्दात् प्राग्दीव्यतीये भवाद्यर्थे 'दित्यदित्या' दिना निष्पन्नात् 'आदित्य' शब्दात् देवता र्थेण्यप्रत्यये, 'यस्येति च' इति अकारलोपे हलो यमाम्' इत्यनेन यकारलोपे 'आदित्यः' इति सिध्यति । अपत्यार्थे ण्ये तु, 'आपत्यस्य च तद्धितेऽनाति' इत्यनेनैव यलोपस्य सिद्धत्वात् नैतस्योदाहरणं तत् स्यात् । नच अल्लोपस्य स्थानिवद्भावात् यलोपो न प्राप्नोतीति वाच्यम्; 'हलो यमां यमि' इत्यस्य त्रैपादिकत्वेन 'पूर्वत्रासिद्धीये न स्थानिवत्' इत्यनेन स्थानिवद्भावस्य प्रतिषेधात् ॥

का लाभ हुआ । 'झयो हः' इससे 'अन्यतरस्याम्' की अनुवृत्ति है । मूल में दिखाये गये भाष्योक्त अष्टाध्यायीपाठ में 'वाऽवसाने' इस सूत्र से 'वा' पद की अनुवृत्ति है । द्वित्व का वैकल्पिकत्व लण्-सूत्र के भाष्य में स्पष्ट है ।

अदितिना जातः इस विग्रह में अदिति शब्द से 'दित्यदित्यादित्यपत्युत्तरपदाण्यः' इससे ण्य-प्रत्यय वृद्धि इकारलोप होने पर निष्पन्न आदित्य शब्द के उत्तर देवता अर्थ में 'दित्यादित्य' इत्यादि पूर्वोक्त सूत्र से ण्य प्रत्यय, आकार का लोप तथा 'हलो यमां यमि लोपः' इससे यकार का लोप होने पर आदित्यः इसकी सिद्धि होती है । 'आपत्यस्य च तद्धितेऽनाति' इससे यलोप नहीं हो सकता; क्योंकि यकार जातरूप शेष अर्थ में होने से अपत्यसम्बन्धी नहीं है । 'शय्या' इसमें यकारलोप की व्यावृत्ति 'हल् से परत्व'; विशेषण का फल है इसी प्रकार 'यमाम्' इसके ग्रहण का 'आर्न्नोत्' और 'यमि' इस विशेषण का 'रामाभ्याम्' प्रत्युदाहरण है ॥

६१। एचोऽयवायावः ६।१।७८। **एचः क्रमादय् अव् आय् आव् एते स्युरचि।**

(६।४।१४८) इत्यल्लोपेऽनेन यलोपः। 'आपत्यस्य' (६।४।१५१) इति तु न; आपत्यत्वाभावात्। हल इति किम्? शय्या। यमामिति किम्? आर्घ्नोत्। यमीति किम्? रामाभ्याम्॥

एचोऽय० (६।१।७८)। **'इचोऽचि यणयवायावः, अवावौ यि प्रत्यये' इति सूत्रयितुमुचितमित्याहुः। यथासङ्ख्यसूत्रलब्धमर्थमाह—क्रमाद् इति। उदात्तादिगुणयुक्तानामन्यगुणकव्यावृत्तिस्तु स्थानेऽन्तरतमपरिभाषया बोद्धया। एतदेवाभिप्रेत्य यथासङ्ख्यसूत्रे भाष्ये प्रकृतसूत्रे 'स्थानेऽन्तरतम'—(१।१।५०)सूत्रेण व्यवस्थोक्ता—'संवृतावर्णस्य संवृतवर्णो विवृततावर्णस्य विवृत्तावर्ण' इति। एतद्भाष्यप्रामाण्येन एओ इत्यनयोरकारांशे संवृतत्वम्; इतरांशे विवृत्ततरत्वम्, तद्बुपरागाच्च न संवृतत्वस्य पृथग् ग्रहणम्। ऐओ इत्यनयोस्त्वकारांशेऽपि विवृतत्वमेवेति बोध्यम्॥**

एचोऽयवायावः॥ 'इचो चि' इत्यादिमूलोक्तन्यासे मात्रालाघवस्य पदलाघवस्य च सत्त्वेऽपि तस्य अपाणिनीयत्वेन अदृष्टाजनकत्वात् अरुचिरत्र 'आहुः' इत्यनेन सूचिता। यथासंख्य-सूत्रसहकारेण एकारादीनां क्रमेण अयादयो भवन्ति। स्थानेऽन्तरतमपरिभाषाबलात् उदात्तगुणकस्य एकारस्य उदात्तगुणक एवादेशः, नानुदात्तगुणकः। तथा च विभिन्नगुणकादेशव्यावृत्तये स्थानेऽन्तरतमसूत्रसहकारस्यावश्यकत्वेन तेनैव क्रमस्यापि लाभेन यथासंख्यसूत्रस्य सञ्चार इह नावश्यकः। अत एव कौमुद्यामत्र यथासंख्यसूत्रं नोपन्यस्तम्। तथा च क्रमादिति फलितार्थकथनम्। इत्यभिप्रायेण आह—**उदात्तादीति**।

संवृतावर्णस्येति। ए ओ इत्युभयत्र पूर्वभागे संवृतत्वम्, इतरांशे इकारोकारांशे विवृतत्वम्। विवृतस्य भूयस्त्वेन तेन अभिभवात् = तदाच्छादनात् संवृतांशस्य पार्थक्येन ज्ञानं न भवतीति। ऐकारे औकारे च पूर्वभागे अकारांशेऽपि विवृतत्वमेव। न च अयाद्यादेशे संवृतस्यापि अकारस्य 'स्थानेऽन्तरतमः' इति सूत्रदृष्ट्या असिद्धत्वात् विवृतत्वमेवेति वाच्यम्; 'स्थानेऽन्तरतमः' इति सूत्रस्य लोकन्यायसिद्धार्थानुवादकत्वेन एतद्दृष्ट्या असिद्धत्वाभावकल्पनात् इत्याचारिणः। संवृतावर्णस्य संवृतावर्णः इत्युपलक्षणम् तालुस्थातिकेकारघटितसंवृतावर्णघटितस्य तालुस्थानिकघटितसंवृतावर्णघटित आदेश इत्यस्य। एवं ओष्ठस्थानिकोकारघटितसंवृतावर्णघटितस्य ओष्ठस्थानिकवकार-

---

एचोऽयवायाव इति॥ 'यथासख्यमनुदेशः समानाम्' इस सूत्र से लब्ध अर्थ है—**क्रमेण इति**। उदात्तादिगुण वाले एकारादि को उदात्तादि गुण युक्त अकारघटित अव् आदेश 'स्थानेऽन्तरतमः' इसके द्वारा होता है। इसलिये स्थानी के गुण से भिन्न गुण वाला आदेश नहीं होता। भाष्य में भी स्थानेऽन्तरतमः' इसके द्वारा संवृतावर्ण को संवृतावर्ण और विवृतावर्ण को विवृतावर्ण होता है—ऐसी अवस्था कही गया है। ए तथा ओ अकारांश में संवृत इतर इकारांश में विवृततर है। इसके सम्पर्क से अभिभूत हो जाने से संवृत का पृथक् ग्रहण नहीं होता। ऐ तथा औ इसमें अकार भी विवृत है॥

६२. तस्य लोपः । १ । ३ । ९ । **तस्येतो लोपः स्यात् । इति यवयोर्लोपो न; उच्चारणसामर्थ्यात् । एवं चेत्संज्ञापीह न भवति । हरये । विष्णवे । नायकः । पावकः ।**

तस्य लोप : (१ । ३ । ९) । **'उपदेशेऽज्' (१ । ३ । २) इत्यत इदित्यनुवृत्त्या विभक्तिविपरिणामेन च सिद्धौ 'तस्य' ग्रहणं सर्वलोपार्थम् । तेन ञिटुडूनामन्त्यस्य लोपो न । 'नाऽनर्थके' (५०) इति परिभाषा तु** भाष्ये **प्रत्याख्यातैवेति दिक् ।**

न भवति **इति । फलाभावादिति भावः ॥**

घटितसंवृतावर्णघटित आदेश इत्यस्य च । विवृतावर्णस्य विवृतावर्ण इत्यपि तालुस्थानिकेकारघटितविवृतावर्णघटितस्य 'ऐ' इत्यस्य स्थाने तालुस्थानिकयकारघटितविवृतावर्णघटितः आय् आदेशः, तथा ओष्ठस्थानिकघटितविवृतावर्णघटितस्य 'औ' इत्यस्य स्थाने ओष्ठस्थानिकवकारघटितविवृतावर्णघटित आव् आदेशः—इत्यस्योपलक्षणं बोध्यम् ।

भाष्यानुरोधात् 'ऐ औ' इत्यत्र पूर्वभागे अकारांशोऽपि विवृत एव, न संवृतः । ग्रन्थकृता अपूर्वबोधितेन अंशेन आन्तरतम्यं प्रदर्शितम् । तद्भिन्नोंऽशस्तु विदितत्वेन निवेशनीयमेवेति न पृथगुपात्तम् । अत एव केषाञ्चित् अयुक्तत्वप्रदर्शनं वृथैव ।

तदुपरागाच्चेति । अत्र चकारः तु-शब्दार्थे ॥

तस्य लोप इति ॥ अत्र 'उपदेशेऽजनुनासिक इत्' इति सूत्रात् इत्-पदमनुवर्त्य षष्ठ्या विपरिणम्य च 'इतो लोपः' इतीष्टस्यार्थस्य लाभाद् इत्पदार्थस्य संग्राहकतया सूत्रे उपात्तं तस्येति पदं व्यर्थमिति नाशङ्कनीयम्; इत्संज्ञकानां सर्वेषां वर्णानां लोपार्थं तस्येति पदस्य सूत्रे सार्थक्यात् । अन्यथा अलोऽन्त्येति सूत्रेण ञिटुडूनामन्त्यस्यैव लोपः स्यात् । एतदुपादानसामर्थ्यात् सर्वेषामित्संज्ञकानां लोपो भवति । न च 'नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे' इति वचनेन अनर्थकत्वाद् इत्संज्ञकवर्णानां तल्लोपविधौ अलोऽन्त्यपरिभाषाया अप्रवृत्तिरिति न वाच्यम्, 'अलोऽन्त्यात् पूर्व उपधा' इति सूत्रे एव भाष्ये 'तस्मान्नार्थोऽनया परिभाषया' इत्येवं परिभाषायाः प्रत्याख्यानात् । इत्याशयेन—'उपदेशेऽच्' इत्यादिग्रन्थावतारः ।

फलाभावादिति । लोपद्वारकस्थान्यफलस्याभावात् । तेन इत्त्वस्य लोपरूपफलस्य सत्त्वेऽपि न ग्रन्थस्यासङ्गतिः ॥

तस्य लोप इति । 'उपदेशेऽच्' इत्यादि सूत्र से अनुवृत्त इत् पद का षष्ठ्यन्त से विपरिणाम करने पर 'इतः' का लाभ होता है । तदर्थ सूत्र में किया गया 'तस्य' इसका ग्रहण इत्संज्ञक सभी वर्णों के लोपविधान के लिये है । अन्यथा ञि टु और डु इसमें 'अलोऽन्त्यस्य' इसके द्वारा अन्त्य इत् का ही लोप होगा । लोपग्रहण के सामर्थ्य से ञकार टकार और डकार सब का लोप सिद्ध होता है । अभ्यासविकारातिरिक्त अनर्थक में 'अलोऽन्त्यस्य' इसकी प्रवृत्ति नहीं होती । अतः यहाँ उसकी प्रवृत्ति नहीं होगी । भाष्य में इस परिभाषा का प्रत्याख्यान होने से 'अलोऽन्त्यस्य' सूत्र की प्रवृत्ति दुर्निवार है ॥

६३. वान्तो यि प्रत्यये । ६ । १ । ७९ । **यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः ।**

वान्तो यि (६ । १ । ७९) । **'येन विधिः' (१ । १ । ७२) इत्यस्यापवादभूतया 'तस्मान्नुडचि' (६ । ३ । ७४) इत्याद्यर्थमावश्यिकया वाचनिक्या 'यस्मिन्विधिस्तदादावल्ग्रहणे' (प०) इति वार्त्तिककृदुक्तपरिभाषया लब्धमर्थमाह**—यकारादाविति । ओदौतोरिति । **'ओदौतोरिति वक्तव्यम्' इति वार्त्तिकमूलाद् व्याख्यानादिति भावः । 'पूर्वसूत्रे वान्तौ प्रति तयोरेव स्थानित्वनिर्णयात्' इति 'स्थानेऽन्तरतमः' (१ । १ । ५०) सूत्रस्थ**कैयटोक्तं **तु न युक्तम्; वान्तज्ञानाय सूत्रपर्यालोचनस्याऽऽवश्यकत्वेऽपि तद्वाक्यार्थपर्यालोचने मानाभावात् । 'यथासंख्य' (१।३।१०) सूत्रसहकारेण बोधोत्तरं तयोस्तत्त्व-**

वान्तो यि प्रत्यये इति ।। अत्र यादौ इत्यर्थः कथम् ? अत्र आह—**येन विधिरिति** । यीत्यस्य प्रत्ययविशेषणत्वेन 'येन विधिस्तदन्तस्य' इत्यनेन प्राप्तं तदन्तविधिं प्रबाध्य 'यस्मिन् विधिस्तदादावल्ग्रहणे' इति परिभाषया तदादिविधिना 'यादौ प्रत्यये' इत्यर्थो लब्धः । अभेदसम्बन्धावच्छिन्नाल्मात्रवृत्तिधर्मावच्छिन्नप्रकारताप्रयोजकत्वेन इष्टं सप्तम्यन्तं पदं तदादिविधिविषयताप्रयोजकं भवतीति परिभाषार्थः । परिभाषाशब्दार्थस्त्वेवम्—गृह्यते = इतरभिन्नत्वेन ज्ञायते येन तद् ग्रहणं विशेषणम् । अल् च ग्रहणञ्च अल्ग्रहणं तस्मिन् । पूर्वनिपातप्रकरणस्यानित्यत्वेन विशेषणस्य परनिपातः । 'यस्मिन्' इति सप्तम्यन्तानामनुकरणम् । तथा च सप्तम्यन्तरूपे विशेषणे यो विधिः स तदादौ बोध्यः । तेन 'इको यणचि' इत्यत्र 'अचि' इत्यस्य सप्तम्यन्तत्वेऽपि विशेषणताया अभावेन न तदादिविधिः ।

एतत्परिभाषाया अभावे तु 'घुमास्थागापाजहातिसां हलि' इत्यस्य तदन्तविधिना हलन्ते क्ङिति आर्धधातुके एषाम् ईत्वमित्यर्थसम्भावनायां 'प्रदाय' 'प्रस्थाय' इत्यादौ ल्यबन्तस्य हलन्तत्वाभावादेव ईत्वाप्राप्त्या तन्निषेधार्थमारब्धस्य 'न ल्यपि' इति सूत्रस्य वैयर्थ्यं स्यात् । एवं 'कोः कत् तत्पुरुषेऽचि' इत्यत्र तदन्तविधिना अजन्ते उत्तरपदे इत्यर्थस्य सम्भवेन कद्रथः, कद्वदः—इत्युभयत्र कोः कदादेशस्यानेनैव सिद्धे 'रथवदयोश्च' इति सूत्रारम्भस्य वैफल्यं स्यात् । अत एषा परिभाषा सिद्धा भवति । तथा च परिभाषयाऽनया तत्र तदन्तविधिं बाधित्वा तदादिविधौ क्रमेण हलादौ अजादौ इत्यर्थे प्राप्तस्य ईत्वस्य वारणाय 'न ल्यपि' इत्यस्य चारितार्थ्यम् । एवं रथादेरजादित्वविरहात् 'कोः कत्' इत्यस्याप्राप्त्या 'रथवदयोश्च' इत्यस्य साफल्यम् । ज्ञापकसिद्धाया अपि अस्याः परिभाषायाः 'वाचनिक्या' इति मूलोक्तिः भाष्ये ज्ञापकानुपन्यासेन वचनरूपेण अस्याः पाठादित्याशयेन[1] ।

वान्तो यि इति । शङ्का—प्रत्यय में यकार विशेषण होने से 'येन विधिः' इससे तदन्तविधि होने पर **'यान्त प्रत्यय'** इस प्रकार अर्थ होना चाहिये ?

समाधान—तदन्तविधि का अपवादभूत 'यस्मिन् विधिस्तदादावल्ग्रहणे' इस वार्त्तिक-

---

१. **नवाह्निके भाष्ये स्फुटमिदमिति नेह तत्प्रसङ्गो दर्शितः ।**

गोर्विकारो गव्यम्। 'गोपयसोर्यत्' (सू० १५३८)। नावा तार्यं नाव्यम्। 'नौवयोधर्म०' (सू० १६४३) इत्यादिना यत्।

निर्णयात्। अन्तरतमपरिभाषया निर्वाहे तु लक्ष्यपर्यालोचनकाले तन्निर्णयः। अत एव 'पूर्वसूत्रे स्थानिविशेषलाभो यथासंख्यसम्बन्धात्, इह तु निमित्ताभावात्तल्लाभाभावः' इति षष्ठे प्रकृतसूत्रे कैयटः।

गव्यमिति। **भत्वाद्वलोपो न। यीति किम्? गोभ्याम्। प्रत्यये किम्? गोयानम्।**

'तस्मान्नुडचि' इत्यनेन लुप्तनकारात् नञः परस्य अजादेः उत्तरपदस्य नुडागमोऽनेन विधीयते। यथा 'अनश्वः' इत्यत्र अजादेरश्वस्य नुडागमः। परिभाषाया 'अस्वीकारे:' अघट इत्यादावपि उत्तरपदस्य अजन्तत्वान्नुडापत्तिरित्याशयेन मूले—**आवश्यक-येत्युक्तम्।** प्रकृतेऽपि तया परिभाषया तदादिविधिरित्याह—**यकारादाविति।** नच यस्मिन् विधिरिति परिभाषानभ्युपगमेऽपि यान्तस्य प्रत्ययस्य विरहात् सूत्रारम्भ-सामर्थ्याद् 'यादौ' इत्यर्थस्य लाभाद् उक्तपरिभाषायां नोपयोग इति वाच्यम्; गोमयमततीति गोमयात् तमाचष्टे इत्यर्थे णिचि टिलोपे गोमययतीत्यादौ यान्तप्रत्ययस्य सम्भवात् परिभाषाया आवश्यकत्वात्।

'ओदौतोरिति वक्तव्यम्' इति वार्त्तिकानुरोधाद् 'ओदौतोर्वान्तादेशः' इति परममूले उक्तम्।

यत्तु कैयटेन वान्तो यीति सूत्रे वान्तपदे श्रुते तदर्थविशेषजिज्ञासायाम् 'एचोऽयवायावः' इति सूत्रस्य पर्यालोचनया वान्तपदेन अवावौ यथा संगृह्येते तेनैव तन्निर्णयः, तथैव वान्तयोस्तयोः स्थानिनोरपि तत एव निर्णेतुं शक्यतया ओदौतोरिति लब्धमित्युक्तम्, तन्न; वान्तपदार्थज्ञानाय सामान्यतः सूत्रार्थपर्यालोचनेऽपि यथासंख्यसूत्रबललब्धेन क्रमिकस्थान्यादेशभावेन घटितस्य वाक्यार्थबोधस्य परामर्शे मानाभावेन वान्तयोः स्थानि-

---

कारोक्त वचन से तदादिविधि होती है। अतएव 'तस्मान्नुडचि' इससे तदादिविधि होने से परवर्त्ती अजादि उत्तरपद के रहने पर नुट् का आगम सिद्ध होता है। अजन्त उत्तरपद के रहने पर 'अघटः' यहाँ भी नुट् का प्रसङ्ग हो जायगा और अनिट्, अनण् इत्यादि स्थल में नहीं होगा। ओ और औ में रहने से इस सूत्र में भी वान्तादेश की स्थानिता उन्हीं में मानी जाती है। इस प्रकार की कैयटोक्ति युक्त नहीं है; क्योंकि वान्त आदेश कौन है?—इसके लिये सूत्र का पर्यालोचन करने पर भी यथासंख्यसूत्र के सहकार से जायमान वाक्यार्थबोध का पर्यालोचन आवश्यक नहीं है। यथासंख्यसूत्र के सहकार के अनन्तर ही स्थानी का निर्णय हो सकता है। 'स्थानेऽन्तरतमः' परिभाषा की प्रवृत्ति लक्ष्य के पर्यालोचन के समय होने से उसके पूर्व स्थानिता का निर्णय उसके द्वारा भी सम्भव नहीं है।

अत एव पूर्व सूत्र में स्थानिविशेष की प्रतीति यथासंख्य के सम्बन्ध से और यहाँ निमित्ताभाव से स्थानी का लाभ नहीं होगा। इस प्रकार पूर्वोक्त कैयटोक्ति परस्पर विरोधी होने से युक्त नहीं है। 'गव्यम्' में 'यचि भम्' के द्वारा भसंज्ञा होने से पदान्त न होने के कारण 'लोपः शाकल्यस्य' इससे वकार का लोप नहीं हुआ।

'गोर्यूतौ छन्दस्युपसंख्यानम्' (वा०)। 'अध्वरिमाणे च' (वा०)। गव्यूतिः। 'ऊतियूति-' (सू० ३२७४) इत्यादिना यूतिशब्दो निपातितः।

ननु 'गव्यूतिः' इत्यत्र वस्य 'हलि सर्वेषाम्' (८।३।२२) इति 'लोपः शाकल्यस्य' (८।३।१९) इति वा लोपः स्यात्? अत आह—वान्त इत्यत्रेति। **न च विशेषविहितेन कार्यित्वेन लोपे वस्य निमित्तत्वबाध इति वाच्यम्; निमित्तत्वानाक्रान्ते विषये कार्यित्वस्य चारितार्थ्यात्। तक्रकौण्डिन्यन्यायश्चानवकाशविषयो विधेयविषयश्चेति**

विशेषनिर्णयाय वार्त्तिकस्यैव शरणीकरणीयतया तदनुरोधिव्याख्यानादेव स्थानिविशेषलाभ इति युक्तः पन्थाः। नच यथासंख्यसहकारेणैव बोधो नावश्यकः। 'स्थानेऽन्तरतमः' इत्यनेनापि इष्टस्थान्यादेशयोर्निर्णयादित्यत आह—**अन्तरतमेति**। 'स्थानेऽन्तरतमः' इत्यनेन अन्तरतमत्वात् इष्टस्थान्यादेशयोर्बोधने तु लक्ष्ये विधिसूत्रप्रवृत्तिकाले स्थानिविशेषलाभेऽपि सूत्रीयवाक्यार्थबोधवेलायाम् अनुवृत्तेन एच्पदेन स्थान्याकाङ्क्षायाः शान्तत्वेन निराकाङ्क्षत्वात् तदानीं स्थानिविशेषयोरोदौतोर्लाभासम्भवात्। अत एव कैयटेन 'अत्र='वान्तो यि' इत्यत्र निमित्ताभावात् तल्लाभाभावः=ओदौतोरित्यस्य लाभाभावः' इत्युक्तम्। एतेन=कैयटोक्तेन विरोधात् पूर्वोक्तकैयटग्रन्थो न युक्तः। अमुमेवाशयं 'प्रकृतसूत्रे कैयटः' इत्यन्तो ग्रन्थो विवृणोति।

ननु गव्यमित्यादौ भत्वात् पदान्तत्वाभावेन 'लोपः शाकल्यस्य' इत्यनेन वलोपाप्राप्तावपि 'ऊतियूतिजूति' इति निपातिते गव्यूतिरित्यत्र यूतिशब्दे परे पूर्वस्य भत्वाभावेन अन्तर्वर्त्तिविभक्त्या पदत्वात् 'लोपः शाकल्यस्य' 'हलि सर्वेषाम्' इत्यनेन वलोपः स्यात्। यूतिशब्दस्य यजादिस्वादिप्रत्ययत्वाभावेन भसंज्ञाया अप्राप्तिरिति बोध्यम्। 'हलि सर्वेषाम्' इत्यत्र वकाराननुवृत्तिपक्षे 'लोपः शाकल्यस्य' इत्यनेन वलोपः प्राप्त इति चेत्? न; 'वान्तो यि' इति सूत्रे वकारात् पूर्वं वकारः प्रश्लिष्यते। प्रश्लिष्टस्य वकारस्य 'लोपो व्योर्वलि' इत्यनेन लोपात् सूत्रे श्रवणं न भवति। एवञ्च 'ववान्त आदेशः' अर्थात् श्रूयमाणवकारान्तादेश इत्यर्थाभ्युपगमेन लक्ष्ये वकारस्य न लोपः। न च गव्यं नाव्यमित्यादौ भत्वादेव वलोपाप्रसक्त्या वलोपवारणाय 'वान्तो यि' इत्यत्र वकारात् पूर्वं वकारप्रश्लेषो नावश्यक इति वाच्यम्; गव्यूतिरित्यत्र प्राप्तस्य वकारलोपस्य वारणाय तत्र प्रश्लेष इति बोध्यम्।

ननु—इति। पुनः शङ्कते—**न चेति**। 'येन नाप्राप्तौ यो विधिरारभ्यते स तस्य बाधको भवति' इति न्यायेन 'लोपो व्योर्वलि' इति सूत्रीयवलोपनिमित्ता लोपकार्यिता (स्थानिता) चोभयी वकारे न सम्भवति, लोपीयकार्यितया निमित्तताया बाधात्। तथा

शङ्का—'अध्वपरिमाणे च' इससे वान्तादेश से गव्यूतिः (दो क्रोश की संज्ञा) इसकी सिद्धि हुई है। इसमें वकार का 'हलि सर्वेषाम्' अथवा 'लोपः शाकल्यस्य' इससे वकार का लोप होना चाहिये। यहाँ यादि प्रत्यय न होने से भसंज्ञा नहीं होती?

समाधान—'वान्तो यि' इसमें वकार से पूर्व वकार का प्रश्लेष है। 'लोपो व्योर्वलि' इससे वकार का लोप हो जाने से उसका श्रवण नहीं है। इस प्रकार ववान्त आदेश होता है—अर्थात् श्रूयमाण वान्तादेश। अतः लोप नहीं होता।

च 'वान्तो यि प्रत्यये' इत्यत्र वकारप्रश्लेषे वद्वयश्रवणापत्तिरिति नाशङ्कनीयम्; येन नाप्राप्तिन्यायस्य अनवकाशविषयकत्वात्। अत्र च निमित्तत्वानाक्रान्ते वकारभिन्ने वल्प्रत्याहारघटके वर्णे वलोपीयस्थानितायाः सावकाशत्वात्। यथा जीव्-धातो रदानु-प्रत्यये रेफे परे वकारस्य लोपे जीरदानुरत्र निमित्तता वकारे नास्ति, स्थानिता च वकारे अस्तीति न पूर्वोक्तदोषः।

'सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयताम् तक्रं कौण्डिन्याय' इति न्यायेनापि न कार्यितया निमित्ततायाः बाधः शङ्कनीयः। अयमपि न्यायः अनवकाशविषयो विधेयविषयश्च। नाप्राप्ते=अवश्यं प्राप्ते दधिदाने तक्रदानमारभ्यते, कौण्डिन्यस्यापि ब्राह्मणान्तर्गतत्वेन दधिदानस्य तत्रापि प्राप्तिसत्त्वेन दधिदानस्य सर्वत्र प्राप्तेः तदप्राप्तिस्थलं किमपि नास्ति यत्र तक्रदानं चरितार्थमिति अनवकाशेन तक्रदानेन दधिदानस्य कौण्डिन्ये बाधः। नैवमत्र; निमित्तत्वानाक्रान्ते जीरदानुरित्यादौ कार्यितायाः सावकाशत्वात्। न वा निमित्ततायां कार्यितायाञ्च विधेयता इति सर्वं सुस्थम्।

अत्र 'तद्धितेष्वचामादेः' इति सूत्रस्थं भाष्यं प्रमाणम्। तथाहि—'क्रौष्टः' 'जागतः' इत्यादौ क्रमेण अन्त्यवृद्धिमुपधावृद्धिञ्चाशङ्क्य 'आदिवृद्धिरन्त्योपधावृद्धी बाधते' इत्याशयकेन वचनेन समाहितम्। ततः पुनः सत्यपि सम्भवे बाधनं भवति। तद्यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति। सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्तकं भवति, एवमिहापि आदिवृद्धिः अन्त्योपधालक्षणां वृद्धिं बाधिष्यते? विषम उपन्यासः;

शंका—वत्वविशेष रूप से वकार में स्थानिता है, इससे सामान्य वत्व रूप से आश्रीयमाण वकार की निमित्तता का बाध हो जाने से लोप नहीं होगा?

समाधान—अप्राप्तियोग्यस्थल में उसका अचारितार्थ्य होना ही 'येन नाप्राप्तौ यो विधिरारभ्यते स तस्य बाधको भवति' इस न्याय में बाधकत्व का बीज है। प्रकृतस्थल में जहाँ लोपशास्त्र का वकारलोपसम्बन्धी निमित्तत्व वकार में नहीं है, किन्तु किसी अन्य वर्ण में है, अर्थात् किसी अन्य वर्ण को निमित्त मानकर वलोप की प्राप्ति हुई है, वहाँ वकार के लोप की कार्यिता सावकाश होने से निमित्तता का बाधक नहीं हो सकती।

शंका—'सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय'। सब ब्राह्मणों को दधि और कौण्डिन्य नाम के ब्राह्मण को तक्र=मट्ठा दिया जाय—यह न्यायार्थ है। यहाँ दधि देने के पहले या बाद में तक्र दिया जा सकता है। अतः तक्रदान चरितार्थ है। फिर भी तक्र का देना दधिदान का बाधक माना गया है। यहाँ भी इसी न्याय से बाध की आशङ्का है?

समाधान—इस न्याय की प्रवृत्ति भी निरवकाश और विधेय विषय में मानी गयी है। इसमें भाष्य प्रमाण है। 'तद्धितेष्वचामादेः' इस सूत्र से विहित आदिवृद्धि तक्रकौण्डिन्यन्याय से अन्त्य तथा उपधा को होनेवाली वृद्धि की बाधक है। इस कथन के अनन्तर दधिदान की अप्राप्ति के स्थल में तक्रदान कहीं भी चरितार्थ नहीं है। दधि देने के पहले या बाद में तक्र दिया जा सकता है—यह अन्य विषय है; किन्तु तक्रदान-स्थल में दधिदान की प्राप्ति नहीं है—ऐसा नहीं कहा जा सकता। इसलिये तक्रदान अचरितार्थ है। ऐसी बात यहाँ नहीं है; क्योंकि 'सौश्रुतः' इत्यादि स्थलों में अन्त्य और उपधा किसी को भी वृद्धि प्राप्त नहीं है। अन्त्य वर्ण हल्

स्पष्टं 'तद्धितेष्वचाम्' (७।२।११७) इति सूत्रे, यङ्विधायके च भाष्ये। अन्त्ये 'उत्तरयोर्विग्रहेण विशेषासम्प्रत्ययान्नित्यग्रहणानर्थक्यं, क्रियासमभिहारे च नैतेभ्यो यङा भवितव्यम्' इति भाष्ये चेन विशेषासम्प्रत्यादित्यनुकृष्यते। अन्यथा तक्रकौण्डिन्यन्यायेन सिद्धे 'विशेषासम्प्रत्ययात्' इत्यनुकर्षकचकारवैयर्थ्यापत्तिः।

निरूपयिष्यते चेदं यङन्ते। तस्य च वार्त्तिकेऽनुवृत्त्या यूतौ श्रूयमाणवकारान्त

नाप्राप्ते दधिदाने तक्रदानमारभ्यते इति तक्रदानं बाधकं भवति। इह पुनरप्राप्ताया-मन्त्योपधावृद्धौ अचामादिवृद्धिरारभ्यते—सुश्रुतोऽपत्यं सौश्रुत इति। अनेनास्य न्यायस्य अनवकाशविषयकत्वं स्पष्टमेव लभ्यते। **यङ्विधायके भाष्ये इति।** 'नित्यं कौटिल्ये गतौ' 'लुपसदचर' इत्यादिसूत्रद्वये।

तथाहि—'नित्यं कौटिल्ये गतौ' (३।१।२३) अत्र सूत्रे नित्यग्रहणं व्यर्थम्। न च नित्यग्रहणाभावे यङोऽभावपक्षे कुटिलं क्रामतीति वाक्यमपि स्यात्, नित्यग्रहणे तु यङो नित्यत्वेन चङ्क्रम्यते इत्येव भवति न वाक्यमिति वाच्यम्; उत्तरयोर्विग्रहेण विशेषस्तु अप्रत्ययात् नित्यग्रहणानर्थक्यमित्युक्तं भाष्ये। अर्थात् यादृशोऽर्थः 'चङ्क्रम्यते' इत्यनेन प्रतीयते, तादृशोऽर्थो वाक्येन। किन्तु तेन कुटिलं पन्थानं क्रामतीति विपरीतोऽर्थः प्रतीयते। अतो वाक्यं तस्मिन्नर्थे न किन्तु चङ्क्रम्यते इति यङन्तमेवेति नित्यग्रहणं व्यर्थम्।

'लुपसदचर' इत्याद्यर्थमपि नित्यग्रहणं नावश्यकम्। कुतः? 'क्रियासमभिहारे च नैतेभ्यो यङा भवितव्यम्' इत्युक्तम्। विशेषासम्प्रत्ययादिति चकारेण परामृश्यते। अर्थात् 'जञ्जप्यते' इत्यतः भृशं जपतीत्यर्थविशेषस्य विग्रहेण प्रतीयमानस्य यङन्तान्न प्रतीतिः। तक्रकौण्डिन्यन्यायेन भावगर्हायां विहितेन यङा क्रियासमभिहारे यङो बाध-सम्भवे चकारेण अप्रत्ययादित्यस्यानुकर्षणं निष्फलं स्यात्। तेन विधेयविषयोऽयं न्याय इति फलति। 'विशेषविहितेन सामान्यं बाध्यते' इति हि बाधकत्वे मूलम्। तथा च विधीयमानयोरेव बाध्यबाधकभावः। क्रियासमभिहारादेर्यङो द्योत्यतया विधीय-मानत्वाभावादित्याशयः।

तस्य च वार्त्तिके इति। प्रश्लिष्टस्य वकारस्य गोर्यूतावित्यत्र इत्यर्थः। तेन वार्त्ति-

---

उपधा में उकार होने से 'अचो ञ्णिति' 'उपधायाः' इन दोनों की प्राप्ति नहीं है। यहाँ 'तद्धितेष्व-चाम्' इसकी प्राप्ति होने से यह चरितार्थ है। अतः न्याय से आदिवृद्धि से अन्त्योपधा वृद्धि का बाध नहीं होगा—एतदाशयपरक उक्त भाष्य से अनवकाश विषय में ही उक्त न्याय की प्रवृत्ति होती है।

'नित्यं कौटिल्ये गतौ' इस सूत्र में नित्यग्रहण के प्रयोजनपक्ष में 'कुटिलं व्रजति' इस वाक्य की व्यावृत्ति करना है। किन्तु यङ्प्रत्ययान्त 'वाव्रज्यते' इससे प्रतीयमान अर्थ 'कुटिलं व्रजति' इस वाक्य से प्रतीत नहीं होता। प्रत्युत कुटिलता गमनक्रिया में प्रतीत न होकर मार्ग में प्रतीत होती है। वृत्ति और विग्रह का समान अर्थ होने का नियम है। इस नियम के प्रतिकूल विपरीत अर्थ का बोध होने से यङन्त वृत्ति के अर्थ में 'कुटिलं व्रजति' इस वाक्य का प्रयोग स्वतः ही अप्राप्त है। इसकी व्यावृत्ति के लिये सूत्र में किया गया नित्यग्रहण व्यर्थ है।

'वान्तः' इत्यत्र वकाराद् 'गोयूतौ' इत्यत्र छकाराद्वा पूर्वभागे 'लोपो व्योः' (सू० ८७३) इति लोपेन वकारः प्रश्लिष्यते ।

आदेश इत्यर्थः । सूत्रे तु न फलम्, गव्यादौ भत्वेन वान्तस्य पदत्वाभावात्; लव्ये स्वत एव तदभावात् लोपाप्राप्तेः । गोशब्दादिभ्यः क्यजादावपि 'नः क्ये' (१ । ४ । १५) इति नियमेन पूर्वस्य पदत्वाभावात् ।

एवं तर्हि वार्त्तिके एव प्रश्लेष उचितः ? इत्याशयेनाह—छकाराद्वेति । 'लोपो व्योः'

केनापि श्रूयमाणवकारान्तादेशः सिद्धो भवति । गव्यमित्यादौ भत्वेन पदत्वबाधात् लुनातेर्यति प्रत्यये स्वतः पदत्वाभावात् गामिच्छतीति 'सुप आत्मने क्यच्' इति क्यचि निष्पन्ने गव्यूतिरित्यत्र 'नः क्ये' इति सूत्रेण नान्तस्यैव पदत्वबोधनात् पूर्वस्य पदत्वाभावात् वकारलोपाप्रसक्त्या सूत्रे वकारप्रश्लेषस्य प्रयोजनाभावात् वार्त्तिके एव प्रश्लेष उचित इत्याशयेनाह—**छकाराद्व**ति । न च 'लोपो व्योः' (६।१।६६) इति सूत्रे वकारस्य प्रत्याख्याने कथमत्र वकारस्य प्रश्लिष्टस्य लोप इति वाच्यम्; लौकिके प्रयोगे फलाभावेन प्रत्याख्यानेऽपि शास्त्रप्रक्रियानिर्वाहार्थं तस्य सत्त्वात् । अत एव 'अतो ल्रान्तस्य' इत्यत्र 'लुप्तवकारोऽत्र निर्दिश्यते' इत्युक्तं भाष्ये ।

वकारप्रश्लेषं निराकर्तुमुपक्रमते—**परे तु** इति । सा = 'इको गुणवृद्धी' इति सूत्रे 'अतो ल्रान्तस्य' इत्यत्र लुप्तनिर्दिष्टो वकार इति भाष्योक्तिः । इत्थं हि तत्र भाष्यम्—वृद्धिग्रहणस्य प्रयोजनं न्यनुवीदित्यत्र क्ङिति वृद्धिर्मा भूदिति प्रतिपाद्य अन्तरङ्गत्वादुवङि कृते अनन्त्यत्वात् 'सिचि वृद्धिः' इति न प्राप्नोति । यदि सिचि अन्तरङ्गं भवति 'अकार्षीत्' इत्यादौ गुणे रपरत्वे च कृते अनन्त्यत्वाद् वृद्धिर्न प्राप्नोति । मा भूदेवम्, हलन्तलक्षणा वृद्धिर्भविष्यति, इह तर्हि न्यस्तारीत् न्यदारीत्, गुणे रपरत्वे च अनन्त्यत्वाद् वृद्धिर्न प्राप्नोति । मा भूदेवम्, 'अतो ल्रान्तस्य' इत्येवं भविष्यति । इदं तर्हि अलावीत् । गुणे अवादेशे च अनन्त्यत्वाद् वृद्धिर्न प्राप्नोति । मा भूदेवम्, ल्रान्तस्येत्येवं भविष्यति । ल्रान्तस्येत्युच्यते नचेदं ल्रान्तम् । लुप्तनिर्दिष्टो वकारः । वकारोऽत्र लुप्यते इत्येवं पूर्वपक्षिणा उक्ते 'ह्म्यन्तक्षण' इति सूत्रे 'णिश्विग्रहणेन न सिच्यन्तरङ्गं भवति' इति प्रतिपादितम् । तथाच वकारप्रश्लेषस्य न तत् फलम् । प्रकृते वकारप्रश्लेषे वकारस्य श्रवणं प्रसज्येत, 'लोपो व्योर्वलि' इत्यनेन वकारस्य लोपाभावात् । छन्दसि सर्वविधीनामवस्थितत्वात् गव्यूतिरित्यत्र वकारलोपशङ्कैव नास्ति । लोके च 'गव्यूतिः स्त्री क्रोशयुगम्' इति कोशानुसारेणैवास्य संज्ञारूपत्वात् संज्ञाभङ्गभयादेव न वलोपप्रसङ्गः । तस्मात् वकारप्रश्लेषस्य फलं न किञ्चिदस्तीति ।

एवं 'लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम्' इस सूत्र में भी अनुवृत्त नित्यपद व्यर्थ है, क्योंकि लुप सद इत्यादि धातुओं से पक्ष में क्रियासमभिहार अर्थ में यङ् की व्यावृत्ति नित्यपदानुवृत्ति का प्रयोजन है । सूत्र में पठित धातुओं से 'भावगर्हा' अर्थ में नित्य ही यह यङ् प्रत्यय होता है—यह सूत्रार्थ है । यङन्त 'लोलुप्यते' 'सासद्यते' 'चञ्चूर्यते' इत्यादि से क्रियासमभिहार = क्रिया के पौनःपुन्य अर्थ की प्रतीति न होने से इस अर्थ में यङ् प्रत्यय नहीं होगा—इस प्रकार

तेन श्रूयमाणवकारान्त आदेशः स्यात् । वकारो न लुप्यत इति यावत् ॥

(६ । १ । ६६) इति सूत्रे वकारप्रत्याख्यानं तु लौकिकोदाहरणाभावेन तदर्थतया बोद्धव्यम् । अत एव 'इको गुण' (१ । १ । ३) इति सूत्रे 'अतो लान्तस्य' (७ । २ । २) इत्यत्र 'लुप्तनिर्दिष्टो वकारः' इत्युक्तं भाष्ये । शास्त्रीयसौत्रप्रयोगार्थं तदिति तदाशयः । न चैवं 'विष्णवे' इत्यादौ 'तस्य लोपः' (१ । ३ । ९) इति दुर्वारम्, गव्यूतावुच्चारणस्य चारितार्थ्यादिति वाच्यम्; 'गवि च युक्ते' (का० वा०) इत्यादिनिर्देशैर्वारणात् ।

परे तु सा पूर्वपक्षयुक्तिरिति न वकारप्रश्लेषो लोपेनोचितः ।

किञ्च; छन्दसि सर्वविधीनां व्यवस्थितत्वान्न वलोपप्रसक्तिस्तत्रत्ये गव्यूतौ । अध्वपरिमाणेऽपि संज्ञाशब्दोऽयम्, तत्र संज्ञात्वभङ्गापत्तेर्न वलोपः । यथा 'रघुनाथ' इति संज्ञाशब्दे नित्यस्यापि णत्वस्याभावः । सर्वनामशब्दे णत्वाशङ्का तु तस्य संज्ञिविशेषे आधुनिकविनियोगात् शास्त्रानुसारिशब्दस्यैव विनियोग उचित इत्यभिप्रायेण । निरूपितश्चैतत् सर्वादिसूत्रे भाष्यप्रदीपोद्द्योते इत्याहुः ।

रघुनाथशब्दे संज्ञाभङ्गभयादेव 'पूर्वपदात् संज्ञायामगः' इत्यनेन णत्वं न । नन्वेवं संज्ञाभङ्गभयादेव सर्वनामशब्दे णत्वाभावस्य सिद्धतया णत्वशङ्कायाः निपातनात् व्यावृत्तिर्भाष्यकृतो विरुध्येत इति वाच्यम्; 'साधुशब्दस्यैव सञ्ज्ञायां विनियोगस्यौचित्यात् कृतणत्वस्य शास्त्रानुसारित्वेन तस्यैव संज्ञाशब्देन व्यवहारः किं न कृतो भगवता पाणिनिना' इति तात्पर्यमूला णत्वाशङ्का । णत्वरहितस्यैव तस्य निपातनात् साधुत्वमाश्रित्य समाहितमिति न तद्विरोधसम्भावना, इत्याशयः—परे तु इत्यादिना प्रतिपादितस्य । 'सर्वादीनि' इति सूत्रे भाष्यम्—इह सर्वनामानि इति 'पूर्वपदात् संज्ञायामगः' इति णत्वं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः । सर्वनामसंज्ञायां निपातनात् णत्वाभावः ।

अत्र **प्रदीपः**—राजपुरुषादिवत् संज्ञाशब्दा अपि शास्त्रप्रक्रियायां सन्तमसन्तं वा अर्थमाश्रित्य व्युत्पाद्यन्ते इति णत्वप्रसङ्गः । प्रयोगे च सणत्वा अणत्वाश्च नित्या एव

'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इस सूत्र के भाष्य में स्पष्ट निर्देश किया गया है ।

भावगर्हारूप विशेष अर्थ में विशेष विहित यङ् से क्रियासमभिहार अर्थ में सामान्य एकाच् हलादि धातु से विहित यङ् का तक्रकौण्डिन्य न्याय के द्वारा बाध सिद्ध हो जाता है । पुनः कौटिल्य और भावगर्हा का बोध विग्रहवाक्य से तथा क्रियासमभिहार की प्रतीति शब्द-शक्ति स्वभाव से 'लोलुप्यते' आदि यङन्त प्रयोग से नहीं होती—इस अर्थ के बोधन के लिये 'न चैतेभ्यः' इसमें चकार के द्वारा 'विशेषासम्प्रत्ययात्' इस का अनुकर्षण किया है । विशेष = कौटिल्य और भावगर्हा का विग्रहवाक्य से तथा यङन्त 'लोलुप्यते' आदि से क्रियासमभिहार रूप विशेष का बोध नहीं होता—यह 'विशेषासम्प्रत्ययात्' इसका अर्थ है । न्याय से ही बाध सिद्ध हो जाने से चकार के द्वारा अनुवृत्त 'विशेषासम्प्रत्यात्' इसकी निष्फलता हो जायगी । अतः विधेय में न्याय की प्रवृत्ति मानी गयी है । प्रकृत में धातु ही तत्तदर्थ का वाचक है । यङ् द्योतक है । अतः धात्वर्थनिष्ठ शक्ति का यङ् उद्बोधनमात्र करता है । अज्ञातार्थ का बाचक नहीं है । अतः भाव-गर्हा तथा क्रियासमभिहार—दोनों ही विधेय नहीं । अपूर्वार्थ ही विधेय होता है । क्रियासमभि-हार की अविवक्षा में भावगर्हा में यङ् चरितार्थ है । अतः अनवकाश भी नहीं है ।

निरूपयिष्यते चेदं 'पूर्वपदात्संज्ञायाम्' (८ । ४ । ३) इति सूत्रे ॥

शब्दाः । तत्र संज्ञायां सणत्वा एव साधवः, असंज्ञायाम् अणत्वा एव साधव इति शास्त्र-व्यापारात् णत्वं प्राप्नोत्येव" इति ।

अत्र **उद्द्योतः**—"द्वितीयविषये 'आरोप्य' इत्यर्थकम् । अस्यायं भावः-असन्तमर्थ-मिति द्वितीयपक्षे (कैयटोक्ते) आश्रित्य इत्यस्य आरोप्य इत्यर्थो बोध्यः । रथन्तर-शब्दस्य सामविशेषे रथकरणकतरणकर्तृत्वमारोप्य साधुत्वान्वाख्यानं यथा तथा, सर्वार्थवाच-कत्वरूपार्थमारोप्य प्रकृतेऽपीति न वार्त्तिकानुपपत्तिः । नापि णत्वाप्राप्तिः"—इत्यादि तत्रत्या चर्चा प्रकृतोपयोगिनी । 'पूर्वपदात्' इति सूत्रभाष्ये न कश्चिद् विशेषः । न वोऽर्थः प्रतिषेधेन, णत्वं कस्मान्न[2] भवति यथा सर्वनामसंज्ञायाम् । उक्तञ्च सर्वनामसंज्ञायाम् निपातनात् णत्वाभावः । यथा तत्र निपातनं सर्वादीनीति[3] । प्रदीपोद्द्योतेऽपि न प्रकृतार्थो

प्रश्लिष्ट वकार सहित वान्त पद की 'गोर्यूतौ' इस वार्तिक में अनुवृत्ति होने से श्रूयमाण वकारान्तादेश का विधान होता है । अतः वलोप का प्रसङ्ग नहीं है । 'वान्तो यि प्रत्यये' इसमें प्रश्लेष द्वारा 'श्रूयमाण वान्त आदेश' इस प्रकार अर्थ करने का कोई प्रयोजन नहीं है; क्योंकि 'गव्यम्' इत्यादि स्थल में यादि प्रत्यय होने से 'यचि भम्' इस सूत्र से भसंज्ञा के द्वारा पदसंज्ञा का बाध हो जाने के कारण पदान्त वकार नहीं है, अतः वकार लोप की प्राप्ति नहीं है । 'लव्यम्' इत्यादि में पदसंज्ञा स्वतः प्राप्त नहीं है । कप्रत्ययावधि स्वादि के परवर्ती होने पर ही 'स्वादिषु' इससे पदसंज्ञा होती है । गामिच्छति गव्यति इसमें अन्तर्वर्ति विभक्ति के द्वारा पदत्व की सम्भावना 'सुप्तिङन्तं पदम्' इससे नहीं है । क्योंकि 'नः क्ये' इस सूत्र से क्यच् और क्यङ् में नान्त को ही पदसंज्ञा के विधान का नियम है । इसलिये यहाँ पदसंज्ञा दूरापास्त है । इसप्रकार प्रश्लेष का सूत्र में प्रयोजन न होने से वार्तिक में ही प्रश्लेष करना उचित है । इस आशय से लिखते हैं—**गोर्यूतौ इत्यत्र छकाराद्वेति** ।

शंका—'गोर्यूतौ' इस वार्त्तिक में छकार से पूर्व वकार का प्रश्लेष करने पर वकार का श्रवण होना चाहिये, 'लोपो व्योर्वलि' इस सूत्र के वकार का भाष्य में प्रत्याख्यान होने से उस सूत्र के द्वारा वकार के लोप की सम्भावना नहीं है ?

समाधान—लौकिक उदाहरण के अभाव से वकार का प्रत्याख्यान है, किन्तु शास्त्रीय प्रयोगनिर्वाह के लिये सूत्र में वकार का निर्देश आवश्यक माना गया है । इसीलिये 'अतो ऌान्तस्य' इसमें ऌकार के पूर्व प्रश्लिष्ट वकार का लोप होता है । 'लुप्त निर्दिष्ट वकार है'—इस आशय के भाष्य की उपपत्ति उक्तार्थ स्वीकार करने पर ही होती है ।

शंका—वार्त्तिक में वकार का प्रश्लेष मानने पर 'विष्णवे' इस प्रयोग में वकार की इत्संज्ञा लोप के द्वारा निवृत्ति हो जायगी; क्योंकि अवादेश में वकारोच्चारण गव्यूतिः में चरितार्थ है ?

समाधान—'गवि च युक्ते' इसमें वकार के श्रवण से लोपाभाव की कल्पना होती है । अतः उक्त दोष नहीं है ।

---

१ पूर्वपदादिति सूत्रे 'अगः' इति प्रतिषेधो न कर्तव्यः ।

२. ऋगयनमित्यत्र ।

३. इह तु निपातनम् अणुगयनादिभ्य इति ।

६४. धातोस्तन्निमित्तस्यैव । ६ । १ । ८० । **यादौ प्रत्यये परे धातोरेचश्चेद् वान्तादेशस्तर्हि तन्निमित्तस्यैव ।**

धातोस्तन्निमित्तस्यैव (६ । १ । ८०) ॥ **धातोरित्यस्याभावे प्रातिपदिकमात्रविषयो नियमः स्यात् । तथा च 'गव्यम्' इत्यत्र न स्यात्; 'ओयते' इत्यत्र च स्यात् ।**

विशेषरूपेण विवेचितः । 'पूर्वपदात्' इति सूत्रे शेखरग्रन्थः प्रकृतार्थविवेचक इत्थम्—'रघुनाथादिशब्दे तु क्षुभ्नादिपाठात् णत्वाभावः; णत्वे संज्ञात्वभङ्गापत्तेर्वा' इति ॥

धातोस्तन्निमित्तस्यैव इति ॥ अत्र धातोरित्यस्याभावे 'यादौ प्रत्यये परे प्रातिपदिकावयवस्य एचश्चेद् वान्तादेशस्तर्हि तन्निमित्तस्यैव = यादिप्रत्ययनिमित्तस्यैव' इति नियमाकारः स्यात् । तथा च गव्यमित्यत्र वान्तादेशो न प्राप्नुयात् । गोशब्दघटकस्य ओकारस्य यादिप्रत्ययनिमित्तकत्वाभावात् एतन्नियमेन व्यावृत्तेः । 'ओयते' इत्यादौ वान्तादेशापत्तेश्च, नियमस्य प्रातिपदिकसम्बन्धिन एचो विषयत्वात्; अत्र च ओकारस्य आङुपसर्गपूर्वकाद् व्येञ्धातोर्निष्पन्नतया धातुसम्बन्धित्वेन प्रातिपदिकसम्बन्धित्वा-

---

परे तु इति । 'अतो ल्रान्तस्य' इसमें वकार का प्रश्लेष एकदेशी भाष्य से अभिमत है । वहाँ सिद्धान्तपक्ष में वलोप इष्ट नहीं हैं । 'गोर्यूतौ' इसमें छकार से पूर्व वकार का प्रश्लेष अनावश्यक है; क्योंकि 'गव्यूतिः' इसका प्रयोग वेद में होता है । वहाँ सभी विधियों के व्यवस्थित होने से वलोप का प्रसङ्ग नहीं । लोक में क्रोशद्वय के अर्थ में प्रयुक्त गव्यूतिशब्द संज्ञावाची होने से संज्ञास्वरूप की विकृति होने के कारण बलोप नहीं होगा ।

शंका—संज्ञा के स्वरूपभङ्ग के कारण सूत्र की अप्रवृत्ति नहीं होती, अन्यथा सर्वनाम संज्ञाशब्द में भाष्योक्त णत्वाशङ्का अयुक्त हो जायगी ?

समाधान—'महर्षि पाणिनि ने णकारयुक्त संज्ञा क्यों नहीं की । संज्ञा भी साधुशब्दों के द्वारा बोधक होती है'—इस अभिप्राय से भाष्य में णत्व की शङ्का की गयी है । अतः संज्ञास्वरूप भङ्ग से णत्व की प्राप्ति न होने से णत्वाशङ्का निर्मूल है—इस आपत्ति का परिहार हो गया ।

यह प्रसङ्ग 'पूर्वपदात्संज्ञायामगः' सूत्र पर लघुशब्देन्दुशेखर में विस्तृत निरूपण किया जायगा[1] ॥

धातोस्तन्निमित्तस्यैव ॥ इस सूत्र में धातुग्रहण न करने पर इस सूत्र के द्वारा होनेवाला नियम प्रातिपदिकसम्बन्धी होगा । उसका आकार इस प्रकार होगा—'यादि प्रत्यय को निमित्त

---

१. रघुनाथादिशब्दे तु णत्वे संज्ञात्वभङ्गापत्तेर्न णत्वम् । कृतणत्वेन चेत्संज्ञारूप्यर्थो गम्यते इति सूत्रार्थः । तदुक्त 'भृञोऽसंज्ञायाम्' इति सूत्रभाष्ये—ये एते संज्ञायां विधीयन्ते, तेषु नैवं विज्ञायते—संज्ञायामभिधेयायामिति । किं तर्हि ? प्रत्ययान्तेन चेत्संज्ञा गम्यते इति । प्रत्ययान्तेन यदि रूढिर्गम्यते ततः प्रत्ययः—इति कैयटः । रूढिः=रूढ्यर्थः । भाष्ये प्रत्ययान्तेनेति तत्तसंज्ञाविधायकशास्त्रोपलक्षणम् एन्मूलकमेव अभियुक्तैः पठ्यते—संज्ञाशब्दाः अनादिप्रयुक्ता नियतानुपूर्वीका एव सिद्धाः, तत्रेदानीं कस्तद् विपरीतं प्रयोक्तुमर्हति । इति ।

लव्यम् । अवश्यलाव्यम् ।

तदभावे सामान्यतो नियमापादनन्तु योगविभागैवकारवैयर्थ्यापत्तेरयुक्तम् । 'तन्निमित्तस्य चेद्धातोरेव' इति नियमे बाभ्रव्यासिद्धेस्तद्वारणाय एवकारः ।

भावान्नियमानाक्रान्ततया वान्तादेशस्य निर्बाधं प्रवृत्त्यापत्तेः । अतो धातुग्रहणमावश्यकम् । कृते तस्मिन् 'धातोरेचश्चेद् वान्तादेशः तर्हि यादिप्रत्ययनिमित्तकस्यैव' इति नियमः पर्यवस्यति । 'गव्यम्' अत्र धातुसम्बन्धिनः एचोऽभावात्, 'ओयते' इत्यत्र एचो यादिप्रत्ययनिमित्तकत्वाभावान्न पूर्वोक्तानुपपत्तिः ।

केचित्तु धातोरभावे यादौ प्रत्यये एचश्चेद् वान्तादेशस्तर्हि यादिप्रत्ययनिमित्तकस्यैव एचो नियमाकारमाहुः, तन्न; तथा सति 'वान्तो यि प्रत्यये तन्निमित्तस्य' इत्येवंरूपे एकस्मिन् योगे कर्तव्ये फलाभावेन पृथग्योगकरणस्य एवकारस्य च वैयर्थ्यं स्यात् ।

तदभावे = धातुग्रहणाभावे । **सामान्यत** इति । 'यादौ प्रत्यये एचश्चेद् वान्तादेशः' इत्यादि नापूर्वोक्तो नियमः । सूत्रे एवपदस्य साफल्यं दर्शयति—**तन्निमित्तस्येति** । एवपदाभावे 'यादिप्रत्ययनिमित्तकस्य एचश्चेद् वान्तादेशस्तर्हि धातोरेव' इति विपरीतनियमः स्यात् । तथाच बभ्रोर्गोत्रापत्यं 'बाभ्रव्यः' इत्यस्य असिद्ध्यापत्तेः । बभ्रुशब्दात् 'मधुबभ्र्वोर्ब्राह्मणकौशिकयोः' इत्यनेन यञि कृते बाभ्रव्यशब्दस्य सिद्धिः । अत्र यञ्प्रत्ययं निमित्तीकृत्य बभ्रुशब्दघटकस्य उकारस्य 'ओर्गुणः' इत्यनेन विहितस्य गुणस्य यादिप्रत्ययनिमित्तकत्वेन धातुसम्बन्धित्वाभावात् नियमेन वान्तादेशव्यावृत्त्या तस्यासिद्धि-

मानकर प्रातिपदिकावयव एच् को यदि वान्त आदेश होता हो तो यादिप्रत्यय को निमित्त मान कर निष्पन्न एच् को ही होता है' । इस नियम से 'गव्यम्' इसमें अवादेश नहीं होगा; क्योंकि गोघटक ओकार की यादिप्रत्यय को निमित्त मानकर निष्पत्ति नहीं हुई है । गो का ओकार डोस् प्रत्यय गम् धातु से किया गया है, उसका है । 'ओयते' इसमें वान्तादेश की व्यावृत्ति भी नियम से नहीं हो सकती; क्योंकि प्रतिपदिकावयव एच् के सम्बन्ध में नियम है । यहाँ आ + ऊयते इसमें 'आद्गुणः' इसके द्वारा होनेसे निष्पन्न ओकार में परादिवद्भाव होने के कारण धात्ववयव एच्त्व है । अतः नियम के द्वारा प्राप्त वान्तादेश की व्यावृत्ति नहीं होगी ।

शङ्का—'एच् को, यादि प्रत्यय के परवर्ती रहने पर, वान्तादेश हो तो यादिप्रत्ययनिमित्तक ही एच् को हो'—ऐसा नियमाकार स्वीकार करने से धातुप्रातिपदिकसामान्य का एच् गृहीत होगा । अतः 'ओयते' इसमें यादिप्रत्ययनिमित्तक एच् के न होने से वान्तादेश का निवारण हो जायगा ।

समाधान—यादिप्रत्ययनिमित्तक ही एच् को वान्तादेश नियम यदि अभीष्ट है तो 'वान्तो यि' इसको पृथक् सूत्र क्यों बनाया । 'धातोस्तन्निमित्तस्यैव' इसके साथ ही उक्तसूत्र का पाठ करना चाहिये था । इसीप्रकार एव का सूत्र में उपादान भी व्यर्थ ही किया गया । अतः पूर्वोक्त सामान्य नियम नहीं हो सकता । 'यादि प्रत्यय को निमित्त मानकर निष्पन्न एच् को वान्तादेश हो तो धातुसम्बन्धी एच् को ही हो' इस प्रकार के विपरीत नियम के वारणार्थ सूत्र में एव शब्द का उपादान है । उक्त विपरीत नियम के होने पर 'बाभ्रव्यः' इसमें वान्तादेश नहीं होगा; क्योंकि

तन्निमित्तस्यैव इति किम् ? ओयते, औयत ।

लव्यमित्यादि । **अत्र गुणवृद्ध्योर्यण्यन्निमित्तकत्वेनैचो यादिप्रत्ययनिमित्तकता ।**

तन्निमित्तस्येति किमिति । **सूत्रमेव किमर्थमिति प्रश्नः ।** ओयत इति । **वेञः कर्मणि लटि यकि यजादित्वात् सम्प्रसारणे 'अकृत्सार्व' (७ । ४ । २५) इति दीर्घे**

प्रसङ्गात् । अतएव एवकारोपादानम् । एवञ्च 'यादौ प्रत्यये धातोरेचश्चेद् वान्तादेशस्तर्हि यादिप्रत्ययनिमित्तकस्यैव' इति नियमाकारः पर्यवस्यति । 'वाभ्रव्यः' इत्यस्य तु नियमेन न व्यावृत्तिः, नियमस्य धातुसम्बन्धिनः एचो विषयत्वम्, नतु प्रातिपदिकावयवस्य एचो विषयत्वम् । अतएव गव्यम्, नाव्यम् इत्यादीनामपि सिद्धिः । तत्रापि प्रातिपदिकावयवस्य एचः सत्त्वेन नियमानाक्रान्तत्वात् । औयते, औयत इत्यादौ च नियमेन वान्तादेशो व्यावर्त्यते; एचो धातुसम्बन्धित्वेन यादिप्रत्ययनिमित्तकत्वाभावात् । तत्र 'आद् गुणः' इत्यनेन गुणे द्वितीये अडागमे 'आटश्च' इति वृद्धौ, एच् निष्पन्नः । गुणो वृद्धिश्च यादिप्रत्ययम् निमित्ततया नाश्रीयेते इति सकलेष्टसिद्धिरिति ग्रन्थाशयः ।

'न धातुलोपः' इति सूत्रस्थभाष्यरीतिरित्थम्—'न धातुलोप' इति सूत्रे आर्धधातुकग्रहणे लोपविशेषणे उपेद्धः प्रेद्धः इत्यत्र 'आद् गुणः' इति विहितगुणस्यापि निषेधमाशङ्क्य अन्तरङ्गनिषेधदृष्ट्या बहिरङ्गस्य गुणस्य असिद्धत्वात् दूषणं निराकृतम् । तथैवात्रापि धातूपसर्गनिमित्तकस्य गुणस्य बहिर्भूतनिमित्ततया बहिरङ्गत्वेन अन्तर्भूतनिमित्तकत्वेन अन्तरङ्गवान्तादेशापेक्षया अन्तरङ्गपरिभाषया असिद्धत्वेन अवादेशाप्राप्तेः नेदं फलमत आह—**औयत** इति । 'आटश्च' इति वृद्धिर्न बहिर्भूतनिमित्तिका, तत्र आङः स्थानित्वेनानिमित्तत्वात् । अनयोः प्रयोगयोः सिद्धिप्रकारो मूले एव स्फुटः । विस्तरस्तु **भैरव्यां** द्रष्टव्यः ।

लव्यमिति । अत्र लुनातेः 'अचो यत्' इति यत्प्रत्यये 'सार्वधातुकार्धधातुकयोः' इति

वभ्रोर्गोत्रापत्यम् 'मधुबभ्र्वोर्ब्राह्मणकौशिकयोः' इससे वभ्रुपदोत्तर ण्यत्, प्रत्यय, आदिवृद्धि, 'ओर्गुणः' इससे गुण होने अनन्तर निष्पन्न ओकार धातुसम्बन्धी न होने से यहाँ अवादेश की नियम से निवृत्ति हो जायगी । एवकार का उपादान करने पर धातुसम्बन्धी एच् के सम्बन्ध में नियम है । 'वाभ्रव्यः' इसका एच् धातुसम्बन्धी नहीं है ।

लव्यम्, अवश्यलाव्यम् । इनमें लुञ् धातु से क्रमशः यत् और ण्यत् प्रत्यय होता है । यादि प्रत्यय को निमित्त मानकर उक्त प्रयोग में क्रम से गुण और वृद्धि होती है । अतः यहाँ एच् यादिप्रत्ययनिमित्तक है । 'तन्निमित्तस्य' इसका प्रयोजन 'ओयते' को दिया है । अवयव के द्वारा समुदाय में प्रश्न से सूत्र का ही प्रयोजन पूछा गया और उत्तर भी तदनुरूप ही दिया गया । इस सूत्र के अभाव में 'ओयते' में 'वान्तो यि' इससे वान्तादेश प्राप्त है । इसके निवारणार्थ इस सूत्र की रचना है । एच् यहाँ यादिप्रत्ययनिमित्तक नहीं है । अतः वान्तादेश की नियम से निवृत्ति हो जाती है । "न धातुलोप" इस सूत्र के भाष्य में उपेद्धः प्रेद्धः यहाँ 'बहिरङ्गो गुणः अन्तरङ्गो न लोपः' ऐसा कहा गया है । इससे धातु और उपसर्ग निमित्तक गुण बहिरङ्ग होने से

६५. क्षय्यजय्यौ शक्यार्थे। ६ । १ । ८१ । **यान्तादेशनिपातनार्थमिदम् । क्षेतुं शक्यं क्षय्यम् । जेतुं शक्यं जय्यम् । शक्यार्थे किम्? क्षेतुं जेतुं योग्यं क्षेयं पापम् । जेयं मनः ॥**

६६. क्रय्यस्तदर्थे । ६ । १ । ८२ । **तस्मै प्रकृत्यर्थायेदं तदर्थम् । क्रेतारः**

आङा सहाऽऽद्गुणः । 'न धातुलोप' (१ । १ । ४) इति सूत्रभाष्यरीत्या बहिर्भूतधातूपसर्गकार्यस्य बहिरङ्गत्वाद्वान्तादेशे गुणोऽसिद्ध इत्यरुचेराह—औयतेति । **तस्मादेव कर्मणि लङि आडागमे वृद्धिः पूर्ववत् ॥**

क्षय्यजय्यौ (६ । १ । ८१) ॥ **'क्षि क्षये', 'जि जये' इत्यनयोरेव ग्रहणं न तु 'क्षीष् हिंसायाम्', 'क्षै क्षये' इत्यनयोः; व्याख्यानात् । अत एव 'क्षिज्योरेवैचः' इति भाष्ये उक्तम् ॥**

तस्मै प्रेति । **क्रयार्थे वस्तुनि 'क्रय्य' इति निपात्यते इत्यर्थः । व्याख्यानाद् गुण-**

गुणे तत् सिद्धम् । अवश्यलाव्यमित्यस्य 'ओरावश्यके' इति ण्यति 'अचो ञ्णिति' इति वृद्धौ सिद्धिः । न च आर्धधातुकनिमित्तकत्वगुणस्य णिन्निमित्तकत्वं वाधेदिति कथं तयोः यादिप्रत्ययनिमित्तकत्वमिति वाच्यम्; तेनैव स्वरूपेण निमित्तताग्रहणे मानाभावात् । वस्तुतो यादिनिमित्तकत्वमस्त्येव ॥

क्षय्यजय्यौ शक्यार्थे इति ॥ सूत्रे कयोर्धातोर्ग्रहणम्? इत्याह—**व्याख्यानादिति** । 'क्षिज्योरेवैच' इति भाष्योक्त रूपमेव व्याख्यानम् । अन्यथा क्षिज्योरेवेति कथना सङ्गतिः स्यात् ॥

क्रय्यस्तदर्थे इति ॥ अत्र तस्मै इदं तदर्थम् । तच्छब्देन प्रकृत्यर्थस्य क्रीधात्वर्थक्रयणस्य परामर्शः । मूले **तदा** इति तच्छब्देनेत्यर्थः । यद्यपि सर्वनाम्नां प्रधानपरामर्शित्वेन प्रकृते अप्रधानस्य प्रकृत्यर्थस्य परामर्शो न युक्तः, तथापि नायं नियमः किन्तु औत्सर्गिकः; अप्रधानस्यपि परामर्शदर्शनात् । यथा 'दशैते राजमातङ्गाः तस्यैवामी तुरङ्गमाः' इत्यत्र मातङ्गे विशेषणत्वाद् राज्ञोऽप्रधानस्यापि तस्यैतद्घटकतच्छब्देन परामर्शः संगच्छते ।

अन्तरङ्ग वान्तादेश की दृष्टि में असिद्ध हो जायगा । अतः यहाँ दोष न होने के कारण प्रत्युदाहरणान्तर देते हैं—**औयत इति** । यहाँ 'आटश्चे' से वृद्धि होगी । धातूपसर्गनिमित्तकत्वाभाव होने के कारण यहाँ वृद्धि बहिरङ्ग नहीं है । इन प्रयोगों की सिद्धि मूल में ही स्फुट है । 'ओयते' इसमें आङ्पूर्वक व्येञ् धातु है । 'औयत' इसमें केवल व्येञ् धातु है ।

क्षय्यजय्यौ शक्यार्थे ॥ इस सूत्र में 'क्षिज्योरेव एचः' इस भाष्योक्ति से 'क्षि क्षये' 'जि जये' इत्यर्थक धातु का ग्रहण है । क्षीष् और क्षै एवं जै का ग्रहण इक् होता तो 'क्षिज्योः' ऐसा कथन असङ्गत हो जायगा ॥

क्रय्यस्तदर्थे ॥ इस सूत्र से दुकान में विक्रय के लिये प्रस्तुत वस्तु के अर्थ में क्रय्य शब्द का नियातन होता है । और वहाँ शोभा या कार्यान्तर के लिये सन्निहित वस्तु के अर्थ में क्रेय शब्द का प्रयोग साधु होता है । इस प्रकार अर्थ के भेद से प्रयोग का भेद होता है । तदर्थे' इसमें तत्पद से क्रयण क्रिया के कर्मभूत धान्यादि के प्रधान होने पर भी अप्रधान क्रयणक्रिया का ही ग्रहण है । स्वभावतः सर्वनामपद प्रधान का परामर्शी माना गया है । तथापि यहाँ तत्पद

क्रीणीयुरिति बुद्ध्याऽऽपणे प्रसारितं क्रय्यम् । क्रेयमन्यत् । क्रयणार्हमित्यर्थः ।

भूतस्यापि तदा परामर्शः । क्रयार्थत्वञ्च फलोपधानरूपं तदर्थे इति विशेषणात्, तदाह— क्रेतार इति । **योग्यतामात्रग्रहणे त्वव्यावर्तकं तत्स्यादिति भावः ।**

केचित्तु **स्वीयं धान्यादि दत्त्वा यत्र तन्मूल्यग्रहणं तत्र धान्यं क्रय्यम् । यत्र तु स्वयं द्रव्यं दत्त्वा परकीयधान्यादिग्रहणं तत्र धान्यं क्रेयम् । द्रव्ये तु न क्रय्यत्वं नापि क्रेयत्वम्; किन्तु धान्यादेरेव; शक्तिस्वभावात् ।** भाष्यस्वरसोऽप्येवमेवेत्याहुः ॥

किञ्च तच्छब्दस्य प्रधानपरामर्शत्वे अत्र 'तदर्थे' इत्यस्य क्रय्यार्थे इत्यर्थः सम्पद्यते । तथाच क्रय्य इति निपातनं स्वार्थे जायेत । एवं सति तदर्थपदोपादानस्य वैयर्थ्यप्रसङ्गः । तस्यानुपादानेऽपि अर्थान्तरानुपन्यासेन स्वार्थे तद्विधानस्य सिद्धत्वात् । **क्रयार्थत्वञ्चेति** । क्रीधातोर्विक्रयोऽर्थः । लाभेच्छया द्रव्यग्रहणप्रयोजनकं धान्यादीनां प्रदानं विक्रयः । विक्रयार्थत्वं फलोपधायकत्वरूपेण विवक्षितम्, न तु तद्योग्यतया । अन्यथा 'तदर्थे' इति विशेषणस्य वैयर्थ्यापातः स्यात् ।

अत्रेदं बोध्यम्—कारणता द्विविधा—फलोपधायकता, स्वरूपयोग्यतारूपा च । स्वजनकतावच्छेदकत्वसम्बन्धेन स्वविशिष्टत्वमाद्यम् । कारणतावच्छेदकधर्मरूपं द्वितीयम् । यस्मात् दण्डात् घटो जायते तस्मिन् दण्डे फलोपधायकतारूपा कारणता । यस्माच्च कार्यं न जायते किन्तु तत्सत्त्वे तेनापि कार्यमुत्पादयितुं शक्यते । अरण्यदण्डे स्वरूपयोग्यतारूपकारणता; कारणतावच्छेदकस्य दण्डत्वधर्मस्य तत्रापि सत्त्वात् । फलोपधायकत्वरूपकारणताया अत्र ग्रहणादेव परममूले—**क्रेतारः क्रीणीयुरिति बुद्ध्या प्रसारितं द्रव्यं क्रय्यमित्युक्तम् । तदा परामर्श इति** इति । तच्छब्देन ग्रहणमित्यर्थः । **तत् स्यादि** । तदर्थविशेषणम् । **धान्यादि** इति । अत्र आदिपदेन गवादेर्ग्रहणम् ।

केचित्तु इत्यनेन प्रतिपादिते मते विक्रेतुः धान्यादिकं क्रय्यम्, क्रेतुश्च तत् क्रेयम्—इति फलति । केनचित् द्रव्यं दत्वा धान्यं क्रीतम्, तं प्रति कश्चिदाह—मह्यं धान्यं देहि । येन पूर्वं धान्यं क्रीतं तेनोक्तम्—क्रेयं न चास्ति क्रय्यमिति भाष्ये प्रत्युदाहरणप्रदर्शनात् तस्य स्वारस्यमत्रार्थे प्रतीयते इति भावः ।

प्रधानपरामर्शी होने पर 'तदर्थे' इस सूत्रोपात्त विशेषण की सङ्गति न होने से अप्रधान का परामर्शी है; क्यों कि अर्थ का निर्देश न होने पर भी स्वार्थ में निपातन की स्वतः सिद्धि हो जाती है । पुनः 'तदर्थे' इसका निर्देश सूत्र में व्यर्थ हो जायगा ।

तदर्थत्व = क्रयणार्थत्व, अर्थात् क्रयणक्रियाजनकत्व रूप है । जनकता = कारणता के फलोपधायकता और स्वरूपयोग्यता—ये दो भेद हैं । कार्य के अव्यवहितपूर्ववर्तीक्षण में वर्तमान कारणीभूत व्यक्तिवृत्तिकारणता, फलोपधायकतारूपा और कारणतावच्छेदकधर्म वाले कारणमात्रवृत्ति स्वरूपयोग्यतारूपा कही गयी । अरण्य के दण्ड में स्वरूपयोग्यतारूप कारणता है; क्योंकि घटनिष्ठकार्यता निरूपिताकारणता का अवच्छेदक दण्डत्वधर्म इसमें भी है । प्रकृत में फलोपधायकतारूप कारणता विवक्षित है । स्वरूपयोग्यता की विवक्षा होने पर क्रयण की योग्यता वस्तुमात्र में रहने से 'तदर्थे' यह विशेषण अव्यावर्तक होने से व्यर्थ हो जायगा ।

६७. लोपः शाक्यल्यस्य । ८ । ३ । १९ । **अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे । 'पूर्वत्रासिद्धम्' (सू० १२) इति लोपशास्त्रस्यासिद्धत्वान्न**

लोपः शाकल्यस्य (८ । ३ । १९) ॥ **'भोभगोअघोअपूर्वस्य' इति, अशीति चानुवर्त्तते । तत्र ओकारान्तेषु 'ओतो गार्ग्यस्य'** (८ । ३ । २०) **इति बाधकमित्याशयेनाह—** अवर्णपूर्वयोरिति । **व्योरित्यनुवृत्तावपि वर्णसमाम्नाये यकारस्य प्राक् पाठात्तत्क्रमेणाह—** यवयोरिति । **'स तस्मा आचष्टे' इत्यादिभाष्यप्रयोगादत्र रोरित्यस्यासम्बन्धः ।**

द्रव्ये तु इति । मूल्यभूतस्वर्णरूपादिद्रव्ये इत्यर्थः—इति **विषम्यां** स्पष्टम् । यथा विक्रेतुः धान्यं क्रय्यं क्रेतुश्च क्रेयम्, तथैव मूल्यरूपेण गृहीतं द्रव्यं दातुर्ग्रहीतुश्च भेदमनुसृत्य क्रय्यत्वं न व्यवह्रियते इति ग्रन्थाशयः । एवमेव आपणे प्रसारितानां रजतादीनां क्रय्यत्व-क्रेयत्वव्यवहारे क्षत्यभावात् । तथाच द्रव्यमात्रे तद्व्यवहाराभावो न ग्रन्थतात्पर्यविषयः । अतस्तत्सम्बन्धे केषाञ्चित् कोलाहलो वृथैव ॥

लोपः शाकल्यस्य इति ॥ सूत्रे 'भोभगो अघो अपूर्वस्य योऽशि' इति सूत्राद् यथा अशीत्यनुवर्तते, तथैव 'रोः' इत्यस्यानुवृत्तिः कुतो न ? इत्यत आह—**स तस्मा इति ।** तस्मा आचष्टे इति भाष्यप्रयोगे ऐकारस्यायादेशे यकारस्य अनेन लोपस्य कृतत्वात् रोरित्यस्यासम्बन्धः प्रतीयते । तत्सम्बन्धे तु रुसम्बन्धियकारस्य लोपे अत्र लोपो न स्यात् । तथा च लोपाभावे तन्निर्देशासङ्गतिः । 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' इति सूत्रेण बोधितयोर्यकारवकारयोस्तु लोपोऽनेन न भवति; शाकटायनमतेन लघुप्रयत्नतरयोस्तयोः शाकल्यमतेन असत्त्वात् । लोपो हि शाकल्पमतेन विहितः । गौर्यत्र = गौरी अत्र इति पदच्छेदः । 'यत्र गौः इत्यर्थके गौर्यत्रेति प्रयोगे सूत्रे अवर्णग्रहणाभावेऽपि न दोषः;

किसी का सिद्धान्त इस प्रकार है—जो व्यक्ति धान्यादि को बेचकर उसके मूल्य का ग्रहण करता है, उसके लिये धान्य 'क्रय्य' है, और जो व्यक्ति द्रव्य देकर धान्य को खरीदता है, उसके लिये वह धान्य 'क्रेय' है । धान्य के समान रुपये-पैसे का भी आदान-प्रदान होता है । इसमें भी 'क्रय्य' और 'क्रेय' का भेद से व्यवहार प्राप्त होता है । परन्तु शब्दशक्ति के स्वभाव से रुपये पैसे आदि द्रव्यों में इस प्रकार का व्यवहार नहीं माना जाता । भाष्य का स्वारस्य भी इसी अर्थ में है । तथा हि—'क्रेयं नो धान्यम्' । उत्तर देता है—'न चास्ति क्रेयम्, क्रय्यमस्ति' । अर्थात् बेचना नहीं है, यह बिका हुआ है । अतः 'क्रय्य' का प्रयोग किया है ॥

लोपः शाकल्यस्य ॥ सूत्र में 'भो भगो अघो' इस सूत्र से भो, भगो, अधो तथा अपूर्व की एवं अशि पद की अनुवृत्ति है । इसमें भो भगो अथो इन तीन के ओकारान्त होने से 'ओतो गार्ग्यस्य' सूत्र से बाध हो जाने के कारण, परिशेष अवर्ण ही रह जाता है । इस आशय से 'अवर्णपूर्वयोः पदान्तयोः' परम मूल में लिखा है । 'लोपो व्योर्वलि' इस सूत्र से अनुवृत्त 'व्योः' इसके अनुसार वकार ऐसा अर्थ करना चाहिये था, किन्तु वर्णसमाम्नाय के पाठक्रम का अनुसरण करने से 'वयोः' इस प्रकार का निर्देश किया गया है । रुसम्बन्धी यकार—इस प्रकार का अर्थ विवक्षित नहीं है । यदि यकार में रुसम्बन्धित्व विशेषण होगा तो 'तस्मा आचष्टे' इस भाष्य-प्रयोग में यकार का लोप प्राप्त नहीं होगा, क्योंकि यहाँ रु के स्थान में यकार नहीं हुआ है । शाकटायन के

स्वरसंधिः । हर एहि, हरयेहि । विष्ण इह, विष्णविह । श्रिया उद्यत, श्रियायुद्यतः । गुरा उत्कः, गुरावुत्कः ।

इदं सूत्रं लघुप्रयत्ने न; शाकटायनमते तयोर्विधानेन शाकल्यमते तद्भावात् । अवर्णेति किम् ? गौर्यत्र । पदान्तयोः किम् ? हरये ।

अशि किम् ? वृक्षं वेतीति वृक्षवीः, क्विप्, तमाचष्टे इति ण्यन्ताद्विच् । वृक्षव् करोति । क्विपि तूठ् स्यात् । विज्निमित्तको 'लोपो व्योः' (६ । १ । ६६) इति लोपस्तु न; णिलोपटिलोपयोः स्थानिवत्त्वात्, प्रातिपदिकाण्णिजुत्पत्त्या पदत्वाभावेन परपदस्था-

---

तत्र यकारस्य पदान्तत्वाभावादेव लोपाप्राप्तेः । **हरये इति ।** 'सुप्तिङन्तं पदम्' इत्यनेन विभक्त्यन्तस्य पदत्वात् । स्वादिष्विति पदत्वन्तु भत्वेन बाधितमिति भावः ।

वृक्षव् करोति इति । 'लोपो व्योर्वलि' इत्यनेन वलोपोऽत्र नाशङ्कनीयः; णिलोपस्य इष्ठवद्भावेन कृतस्य टिलोपस्य च स्थानिवद्भावेन व्यवधानाद् वलपरत्वाभावेन लोपाप्राप्तेः । 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च' इति वार्त्तिकेन प्रातिपदिकादेव णिचो विधानेन सुबन्तत्वाभावात् पदत्वाभावेन 'न पदान्त' इत्यादिना पदान्तत्वनिबन्धनस्थानिवद्भावप्रतिषेधस्याप्रवृत्तेः । न च 'सुबन्तात् णिच्' इति मते सुबन्तत्वेन पदसंज्ञा सुलभेत्यत आह--**परपदस्थेति ।** परपदस्थस्य अच आदेशस्य स्थानिवत्त्वस्य निषेध इत्यभ्युपगमेन, लोपस्य अभावरूपत्वेन पदचरमावयवकर्मकविधेरभावेन च निषेधप्रवृत्तेर्दुर्लभत्वात् ।

मत में 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' से विहित लघुप्रयत्नतर यकार वकार का शाकल्यमत में 'लोपः शाकल्यस्य' से लोप नहीं होता, क्योंकि शाकल्य ऋषि के मत में इस प्रकार के यकार वकार का अस्तित्व ही नहीं है ।

'अवर्णपूर्वक' विशेषण न देने पर 'गौर्यत्र' इसमें यलोप की प्रसक्ति हो जायगी । इसमें 'गौरी अत्र' ऐसा पदच्छेद विवक्षित है । यण् से निष्पन्न यकार पदान्त है, किन्तु अवर्ण यकार के पूर्व में नहीं है । यदि 'गौः यत्र' के तात्पर्य से 'गौर्यत्र' ऐसा प्रयोग किया है तो भी यकार पदान्त नहीं है । इसी से लोप का प्रसङ्ग नहीं है । अतः 'अवर्णपूर्व में हो'—इसका प्रयोजन यह कैसे हो सकता है ।

शंका—सूत्र में 'अशि' इसकी अनुवृत्ति का प्रयोजन क्या है ?

समाधान—वृक्षम् वेति इस अर्थ से निष्पन्न क्विबन्त वृक्षवीशब्द से आचक्षाण अर्थ में णिच् प्रत्यय एवं टिलोप के अनन्तर विच् प्रत्यय और णिलोप करने से सिद्ध वृक्षव् शब्द का 'करोति' इसके साथ योग करने पर 'वृक्षव् करोति' यहाँ वकार के लोप की व्यावृत्ति के लिए उसका उपादान है । अश् प्रत्याहार में ककार पाठ नहीं है । अतः लोप नहीं होता । यहाँ विव् के प्रसङ्ग में क्विप् करने से ऊठ् की प्राप्ति हो जायगी । अतः विच् किया ।

शंका—इस सूत्र से लोप की प्राप्ति न होने पर भी 'लोपो व्योर्वलि' इस सूत्र से विच् प्रत्ययनिमित्तक लोप का आपत्ति बनी हुई है ?

जादेशाभावेन च लोपस्य पदचरमावयवत्वाभावेन च 'न पदान्त' इति निषेधाप्रवृत्तेः। एतेन 'वनिमित्तको वलोपोऽत्र दुर्वारः' इत्यपास्तम्।

किञ्च, **स्थानिवत्त्वनिषेधं विनाऽस्य पदान्तत्वासिद्धयाऽत्र निषेधाप्रवृत्तिः। स्थानि-**

एतेन = आद्यभिन्नयुक्तिद्वयेन, न पदान्तेति निषेधाप्रवर्तनेनेत्यर्थः। अन्यथा पूर्वोक्तदिशा पदत्वाभावेऽपि विजुत्तरसुब्निमित्तिकायाः पदसंज्ञायाः सत्त्वेन निषेधो दुर्वारः स्यात्। न च इष्ठवद्भावातिदिष्टेन भत्वेन पदत्वबाधः शङ्क्यः; णेलुँप्तत्वात्। न च 'अचः परस्मिन्' इत्यनेन स्थानिद्भावः स्यात् इति वाच्यम्; लोपस्य पदचरमावयववकार-स्थानिकत्वेन पदत्वप्रतिबन्धद्वारा तस्य लोपस्य प्रतिबन्धकः स्थानिवद्भाव इति; 'न पदान्त इति निषेधात्। विधिकर्मसाधनत्वेन स्थानषष्ठ्या समास इति पक्षाश्रयणे इदम्। अथवा टिलोपस्यापि स्थानिवद्भावेन वान्ते भत्वस्य दुर्लभत्वेन पदत्वानिवृत्तेः। स्पष्टञ्चेदं **शब्दरत्ने**। एतेन = स्थानिवद्भावेनेत्याशयं कश्चित् मन्यते।

निषेधं विनाऽस्य = निषेधमन्तरा वकारस्य। अत्र = वृक्षव् करोतीत्यत्र यावत् णिलोपस्य टिलोपस्य च स्थानिवद्भावनिषेधो न स्यात्, तावत् वान्तपदत्वज्ञानं दुर्लभम्; एवं यावत् पदान्तत्वं न निश्चीयते, तावत् स्थानिवद्भावप्रतिषेधः कथं प्राप्नुयात्—इत्यन्योन्याश्रयः। अनेनापि हेतुना 'न पदान्त' इति सूत्रेण निषेधो वक्तुमशक्यः। विधिशब्दस्य भावसाधनत्वे पदचरमावयवकर्मके विधावित्यर्थे नास्य ग्रन्थस्य सङ्गतिः; लोपस्याभावरूपत्वेनानवयवत्वात्। किन्तु कर्मसाधनत्वे स्थानषष्ठीपक्षे ग्रन्थो योजनीयः।

समाधान—णिलोप या टिलोप का स्थानिवद्भाव होने से वकार के परवर्ती वल्प्रत्याहारघटक वर्ण नहीं है। मध्य में णि का व्यवधान है, इसलिये लोप नहीं होगा।

शंका—'न पदान्त' सूत्र से पदान्त वकार के लोपप्रसङ्ग में स्थानिवद्भाव का निषेध हो जायगा, अतः लोप दुर्निवार है?

समाधान—'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च' इस वार्तिक से प्रातिपदिक से णिच् प्रत्यय का विधान होने के कारण सुबन्तत्व नहीं है। अत एव पदसंज्ञा न होने कारण पदचरमावयवक विधि नहीं है। एवं परपद के अच् को होनेवाले आदेश को प्राप्त स्थानविद्भाव का ही पदान्त-निमित्तक निषेध होता है। अतः णिलोप परपदस्थ अच् का नहीं है, अतः निषेध प्राप्त नहीं है।

इसमें और भी कारण है—पद के चरमावयव कार्य के कर्तव्य रहने पर स्थानिवद्भाव का निषेध होता है। लोप अभावरूप है। यह किसी का अवयव नहीं हो सकता। अतः पदचरमावयव का विधान न होने से भी स्थानिवद्भाव के निषेध की प्राप्ति नहीं होगी। 'करोति' 'एतद्-घटक ककार को निमित्त मानकर भी लोप की प्राप्ति नहीं होगी; णिलोप, ठिलोप का स्थानिवद्भाव होने से व्यवधान हो जायगा।

विधि शब्द के कर्मसाधन शेषषष्ठी के समासपक्ष में निषेधशास्त्र की अप्रवृत्ति का उपाय लिखते हैं—**किञ्चेति**। स्थानिवद्भावनिषेध के विना 'वृक्षव्' इसमें वकार में पदान्तत्व ही दुर्लभ है। अतः निषेध की प्रवृत्ति नहीं होगी। निषेध होने पर ही में पदान्तत्व वकार में ज्ञान होगा। इस प्रकार निषेध होने पर पदान्तत्व का वकार में ज्ञान; पदान्तत्व के निर्णय अनन्तर निषेध-

वत्त्वनिषेधज्ञाने पदान्तत्वज्ञानम्, तन्निर्णये च स्थानिवत्त्वाभावज्ञानम्—इत्यन्योन्याश्रयस्तत्राप्रवृत्तौ मानम्। इदञ्च 'न पदान्त'सूत्रे भाष्ये स्पष्टम्।

न च पदसंज्ञायां टिलोपस्य स्थानिवत्त्वाद्वस्य पदान्तत्वमेव नास्तीत्यशीलि व्यर्थमिति वाच्यम्; 'पूर्वत्रासिद्धीये' इति निषेधात्। साक्षात् पदत्वादिद्वारकपरम्परया वा, पूर्वत्रासिद्धीयप्रापकस्य तत्प्रतिबन्धकस्य वाऽतिदेशस्य तेन निषेधादिति केचित्।

भाष्ये स्पष्टमिति। तत्र हि भावसाधनविधिशब्दाश्रयणे 'वेतस्वान्' इत्यत्र रुः प्राप्नोतीत्याशङ्क्य 'ननु चैवं विज्ञायते यः सम्प्रति पदान्तः' इति। अत्र कैयटः—स्थानिवत्त्वनिषेधं विना यः सिद्धः पदान्तः तस्य विधौ स्थानिवद्भावनिषेधः, यथा—कानि सन्ति कौ स्त इति। इह तु सकारः स्थानिवत्त्वनिषेधाद् विना पदान्तत्वेनासिद्ध इति भवत्येव स्थानिवद्भावः। इत्यपदान्तत्वात् सस्य रुत्वाभाव इति।

न च विभक्तिनिमित्तकपदसंज्ञायां टिलोपस्य स्थानिवद्भावेन वकारान्तस्य पदसंज्ञा दुर्लभा। तथाच पदान्तस्य वकारस्याभावेन अश्पदानुवृत्तिं विनाऽपि 'लोपः शाकल्यस्य' इत्यस्याप्रवृत्त्या अश्पदस्यानुवृत्तेः नेदं प्रयोजनमिति वाच्यम्; 'पूर्वत्रासिद्धीये न स्थानिवत्' इति वचनेन तन्निषेधात्। साक्षात् पूर्वत्रासिद्धीयसाधकस्य, साक्षात् पूर्वत्रासिद्धीयप्रतिबन्धकस्य, पदत्वभत्वादिद्वारकपरम्परया पूर्वत्रासिद्धीयसाधकस्य, परम्परया पूर्वत्रासिद्धीयप्रतिबन्धकस्य च स्थानिवद्भावस्य निषेधोऽनेन विधीयते। मूले पदत्वादिघटकादिपदेन पदत्वाभावस्यापि ग्रहणम्। तेन पदत्वाभावद्वारकपरम्परासम्बन्धेन त्रैपादिकस्य 'लोपः शाकल्यस्य' इत्यस्य प्रतिबन्धकस्थानिवद्भावस्यानेन प्रतिषेधात्। 'पदसंज्ञायां यथोद्देशपक्ष एव, न कार्यकालपक्षः' इति सिद्धान्तानुसारेण

प्रवृत्तिज्ञान होने से अन्योन्याश्रय दोष ही स्थानिवद्भावनिषेधक शास्त्र की अप्रवृत्ति में कारण है। न पदान्त सूत्र के भाष्य में इसका विशेष विवेचन किया गया है।

शंका—क्विबन्त वृक्षव् प्रातिपदिक से उत्पन्न सुप् का प्रत्ययलक्षण के द्वारा आश्रयण होने से प्राप्त हुई पदसंज्ञा टिलोप के स्थानिवद्भाव से वृक्षवी को होगी। अतः इसके द्वारा भी पदान्तत्व वकार में दुर्लभ ही है। ऐसी अवस्था में पदान्त वकार के न होने से लोप की प्रसक्ति नहीं है, अतः अश्ग्रहण का कोई प्रयोजन नहीं है ?

समाधान—लोप के त्रैपादिक होने से 'पूर्वत्रासिद्धीये न स्थानिवत्' इससे स्थानिवद्भाव का निषेध हो जाने से वकार में पदान्तत्व सुघट है।

शंका—पदसंज्ञा में यथोद्देशपक्ष माना गया है। अतः स्वदेश ही इसका देश है। इस प्रकार पदसञ्ज्ञा में त्रैपादिकत्व सम्भव नहीं है ?

समाधान—साक्षात् त्रैपादिक कार्य के साधक स्थानिकवद्भाव का या पदत्व-भत्वद्वारक परम्परा से त्रैपादिक कार्य साधक या प्रतिबन्धक स्थानिवद्भाव का उक्त वचन से निषेध होता है। प्रकृत में पदसंज्ञा द्वारा 'लोपः शाकल्यस्य' इसका प्रतिबन्धक स्थानिवद्भाव होने से 'पूर्वत्रासिद्धीये' इसकी प्राप्ति सुलभ है। अतः स्थानिवद्भावन होन से पदान्त वकार का लोप प्राप्त है। उसके निवारणार्थं अश्-ग्रहण है।

परे तु **'न पदान्ता हलोऽणः सन्ति' इति लण्सूत्रस्थभाष्याद् वृक्षवादेरनभिधानमेव । 'भोभगो' इति सूत्रे 'अश्ग्रहणमनर्थकमन्यत्राभावात्' इति वार्त्तिकाच्च । अशोऽन्यत्र**

पदसंज्ञायाः सापादिकत्वेन त्रैपादिकत्वाभावात् 'पूर्वत्रासिद्धीये' इति वचनस्य विषय एव नेति शङ्काऽपि अनेन समाहिता । पदसंज्ञाया अत्रैपादिकत्वेऽपि पदत्वाभावद्वारकपरम्परासम्बन्धेन पूर्वत्रासिद्धीयस्य लोपस्य त्रैपादिकत्वेन तत्प्रतिबन्धकस्य स्थानिवद्भावस्य निषेधे बाधकाभावात् । इदमेव व्याख्यातं **केचि**दित्यन्तेन ग्रन्थेन ।

क्रमेण उदाहरणानि—

साक्षात् पूर्वत्रासिद्धीयसाधकस्य स्थानिवद्भावस्य उदाहरणम्—किमु सन्ति । अत्राल्लोपस्य स्थानिवद्भावः 'मय उञो वो वा' इति पूर्वत्रासिद्धीयसूत्रस्य साधकः । अनेन प्रतिषेधात् मयः परस्य उञो वादेशो न भवति ।

परम्परया पूर्वत्रासिद्धीयसाधकस्य 'पिपठीस्तत्र' इत्युदाहरणम् । पठितुमिच्छतीति विग्रहे सनि प्रत्यये पिपठिषति । सन्नन्तादेस्तस्मात् क्विपि अकारस्य लोपे रुत्वे विसर्गे च कृते तत्रेति सम्बन्धे विसर्जनीयस्य सकारे 'आदेशप्रत्यययोः' इत्यनेन मूर्धन्यादेशः सकारस्य पदान्तत्वान्न भवति; अपदान्तस्य सकारस्य तेन षत्वविधानात् । अल्लोपस्य स्थानिवद्भावेन सकारे पदत्वप्रतिबन्धात् अपदान्ततया षत्वापत्तिः, अतः स्थानिवद्भावः पदत्वप्रतिबन्धद्वारा षत्वस्य परम्परया साधकः ।

साक्षात् स्थानिवद्भावस्य पूर्वत्रासिद्धीयप्रतिबन्धकस्योदाहरणम्—राज्ञः इति । अत्राल्लोपस्य स्थानिवद्भावः साक्षात् त्रैपादिकस्य श्चुत्वस्य प्रतिबन्धकः ।

परम्परया पूर्वत्रासिद्धीयप्रतिबन्धकस्य स्थानिवद्भावस्य उदाहरणम्—पिपठीः । अत्राल्लोपस्य स्थानिवद्भावे पदान्तषकारस्याभावात् रुत्वं न स्यात् इति पदत्वप्रतिबन्धःद्वारा परम्परया रुत्वस्य प्रतिबन्धकः इति तेन निषेधे रुत्वं सिद्धम् । इति **सदाशिवभट्टाः** ।

स्वसिद्धान्तं वक्तुमुपक्रमते—**परे त्विति**। लण्सूत्रे भाष्ये—'अणोऽप्रगृह्यस्यानुनासिक' इत्यत्र अण् प्रत्याहारः पूर्वेण णकारेण परेण वा ? इति सन्दिह्य 'असन्दिग्धः पूर्वेण न परेण । कुत एतत् ? पराभावात् । नहि पदान्ताः परे अणः सन्ति । ननु चायमस्ति–कर्तृ हर्तृ ? एवं तर्हि सामर्थ्यात् पूर्वेण, न परेण । यदि परेण स्यात् अण्ग्रहणनर्थकं स्यात् । 'अचोऽप्रगृह्यस्यानुनासिक'' इति । अप्रगृह्यस्येति पर्युदासेन प्रगृह्यस्य अचः एव सम्भवात् तद्भिन्नस्य तत्सदृशस्य अच एव ग्रहणेन 'अचोऽप्रगृह्यस्य' इत्येव ब्रूयादिति **कैयटेना**भिप्रायः प्रदर्शितः ।

सिद्धान्त अर्थ का निरूपण करते हैं—**परे तु** इति । 'पदान्त में हल् रूप अण् नहीं होता'—इस आशय के भाष्य से वृक्षव् करोति इत्यादि प्रयोगों का अनभिधान है । 'भो भगो अघो' इस सूत्र में अश्ग्रहण व्यर्थ है, क्यों कि अश् से भिन्न स्थल में खर् होगा । वहाँ विसर्ग हो जाने के कारण अश्निमित्तक कार्य (यादेशादि) के स्थानी रु की उपलब्धि नहीं है । स्थानी रु नहीं है—ऐसा वार्त्तिक का भाष्यव्याख्यान स्थानिमात्र का उपलक्षण है । इस प्रकार वार्त्तिक भी उक्त प्रयोग के अनभिधान में प्रमाण है । अन्यथा 'लोपः शाकल्यस्य' इसमें अश्-पद की अनुवृत्ति

तन्निमित्तकार्यिणोऽभावादिति तदर्थः। न ह्यन्यत्र रुरस्तीति तद्व्याख्यानभाष्ये रुग्रहण-मुपलक्षणम्। एतदाशयमजानानैकदेशिना "उत्तरार्थम्, 'हलि सर्वेषाम्' (८।३।२२) इति 'वृक्षव् करोति' इत्यत्र मा भूत्" इत्युक्तम्। अस्य चैकदेश्युक्तित्वं 'लण्' (मा० सू० ६) सूत्रस्थोक्तभाष्यविरोधेन स्पष्टमेव कैयटेनोक्तम्।

अत एव भाष्ये **उत्तरार्थमित्युक्त्वा 'हलि सर्वेषाम्' (८।३।२२) इत्यत्रैव प्रयोजनमुक्तम्। 'हलि सर्वेषाम्' इत्यत्र वकारनिवृत्त्यैवात्र तद्वारणसम्भवान्न तत्राप्य-श्ग्रहणस्य प्रयोजनमिति तद्भाष्यमेकदेश्युक्तिरेवेत्याहुः।**

शेखरकारस्तु 'न पदान्ता हलोऽणः सन्ति' इति मत्वा हल्रूपा अणो न। तथा च कर्तृ हर्तृ इत्यादि प्रयोगसत्त्वे न कश्चिद् विरोधः। वृक्षवादेश्चानभिधानात् 'अप्रगृह्यस्य' इत्येव ब्रूयात्—इत्यस्य सङ्गतिः। नच गिरादिशब्दानां पदान्ते हल्रूपाणः सत्त्वेन एषामपि अनभिधानप्रसङ्ग इति वाच्यम्; अनुनासिककार्यभाजो हल्रूपा अणो न सन्तीत्यभि-प्रायेण रेफस्य अनुनासिकस्याभावात् न पूर्वोक्तनियमेनानभिधानस्य आपादनं सम्भवति।

'भोभगो' इति सूत्रे अश्ग्रहणस्य वैयर्थ्यं प्रतिपादयता **वार्त्तिके**नाऽपि एषामनभि-धानं लभ्यते। अशोऽन्यत्र खरि सत्त्वेन विसर्गे जाते अश्निमित्तकयादेशस्य कार्यिणः = स्थानिनः अभावात् खरि यकारस्थानिनो रोरभावादित्यर्थः। वृक्षव् करोतीत्यादीनाम् उक्तरीत्या अभिधानाभावात् लोपस्थानिनो वकारस्याप्यभावेन यकारवकारयोरुभयोर-भावः पर्यवस्यति।

नन्वेवं 'नहि अत्र रुरस्ति' इति भाष्येण विरोधः, लोपस्थानिनो वकारस्यापि अभावो दर्शनीयः स्यात्, नच स दर्शितः ?—इति शङ्कां समाधत्ते—**रुग्रहणमिति**। अस्या-ऽपि संग्रहात् न विरोधः, एतदग्रे 'हलि सर्वेषाम्' इत्यत्रानुवृत्त्यर्थं तत्। तेन 'वृक्षव् करोती-त्यादौ न वकारलोपः' इत्युक्तिः एकदेशिनः। अस्यैकदेश्युक्तित्वं लण्सूत्रस्थेन 'न पदान्ता अणः सन्ति' इति भाष्यविरोधेन कैयटः स्पष्टमुक्तवान्। अतएव = तदनभिधानादेव। 'उत्त-रार्थम्' इत्युक्त्वा 'हलि सर्वेषाम्' इत्यत्रैव तत्प्रयोजनं प्रतिपादितम्। तत्र च वकारानुवृत्त्यैव-लोपवारणस्य कर्तुं शक्यतया न तद् अश्ग्रहणस्य प्रयोजनमिति भावः।

उक्त प्रयोग में लोपव्यावृत्ति के लिये आवश्यक होने से 'अश्ग्रहणानर्थक्यम्' इस वार्तिक की अयु-क्तता हो जायगी।

शंका—'हलि सर्वेषाम्' इस सूत्र का अश्मात्र निमित्त नहीं है—ऐसा मानने पर 'देवा इह' यहाँ भी उक्त सूत्र से नित्य लोप हो जायगा। हल्मात्र के निमित्त मानने पर 'वृक्षव् रकोति' यहाँ भी वलोप हो जायगा। अतः अश्रूप हल् ही इस सूत्र का निमित्त है। उक्त दोनों स्थलों में अश्रूप हल् के न होने से लोप की शङ्का नहीं है। इस आशय के भाष्य से 'हलि सर्वेषाम्' इसमें अनुवृत्त्यर्थ अश् पद की आवश्यकता सिद्ध होती है। साथ ही साथ 'वृक्षव्' इसके अनभि-धान की उक्ति अप्रमाणिक लक्षित होती है ?

समाधान—लण्सूत्रस्थ 'न पदान्ता अणः सन्ति' इस भाष्योक्ति से विरुद्ध होने के कारण पूर्वोक्त 'भोभगो' इस सूत्र का भाष्य एकदेशी है। भाष्य के एकदेशित्व का प्रतिपादन कैयट ने भी किया है। वृक्षव् का अनभिधान मानने से ही अश् ग्रहण का प्रयोजन 'लोपः शाकल्यस्य'

'कानि सन्ति', 'कौ स्तः' इत्यत्रास्तेरल्लोपस्य स्थानिवत्त्वेन यणावादेशौ प्राप्तौ 'न पदान्त०' (सू० ५१) इति सूत्रेण पदान्तविधौ तन्निषेधान्न स्तः ॥

६८. एकः पूर्वपरयोः । ६ । १ । ८४ ॥ **इत्यधिकृत्य ॥**

कानि सन्तीति । **वाक्यसंस्कारपक्षेऽपि पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वमादायान्तरङ्गाणां पूर्वं प्रवृत्तिरितीकारादेः स्थानिभूतादचः पूर्वत्वं बोद्धव्यम् ॥**

एकः पूर्वपरयोः (६ । १ । ८४) । **गुण इत्यादेर्विधेयसमर्पकत्वेन तत्रैकत्वसंख्याया**

कानि, सन्ति कौ स्त इति । अत्र 'श्नसोरल्लोपः' इति विहितस्य अल्लोपस्य स्थानिवद्भावात् क्रमेण यणावादेशौ प्राप्नुतः । 'न पदान्त' इति सूत्रेण पदचरमावयवकविधित्वेन स्थानिवत्त्वनिषेधाद् नादेशौ भवतः । वाक्यात् पदानि बहिष्कृत्य पूर्वोपस्थितत्वात् 'कानि' इति पदं संसाध्य ततः परं 'सन्ति' 'स्तः' इत्यनयोः साधने स्थानिभूतादचः अकारात् पूर्वत्वेन दृष्टत्वं कानि-घटकेकारे, 'कौ' इत्यत्र च औकारेऽस्त्येवेति स्थानिवद्भावस्य प्रवृत्तिः सुलभा । पदसंस्कारपक्षे तु 'कानि' इति पदस्य, 'सन्ति' इति पदस्य च कालभेदेन साधुत्वं सम्पाद्य ततस्तयोः पूर्वापरोभावेन सन्निवेशे लोपस्थानिनः अस्-धातुघटकाकाररूपादचः पूर्वत्वेन दृष्टत्वं कानिपदघटके इकारे नास्तीति 'अचः परस्मिन्' इत्यनेन स्थानिवद्भावस्य प्राप्त्यभावात् 'न पदान्त' इति सूत्रस्य नैतदुदाहरणं सम्भवति । अतः वाक्यसंस्कारपक्षेण दोषोद्भावनम् ॥

एकः पूर्वपरयोः ॥ अत्र सूत्रे एकग्रहणफलं विचार्यते । 'आद् गुणः' 'वृद्धिरेचि'

इसमें न दिखाकर 'हलि सर्वेषाम्' इसमें ही दिखाया । इस सूत्र में वकारानुवृत्ति न करने से ही उक्त प्रयोग में वलोप की निवृत्ति सिद्ध हो जाने से अश्ग्रहण का 'वृक्षव् करोति' इसमें प्रयोजनप्रदर्शन निरर्थक होने से भाष्य की एकदेशिता स्पष्ट हो जाती है । तन्निमित्तकार्यिणः = यहाँ 'कार्यिणः' का अर्थ 'स्थानिनः' है । अतएव = उनके अनभिधान होने से ही ।

शंका—'कानि सन्ति' इसमें वाक्यसंस्कारपक्ष का आश्रयण करने पर 'कानि' में जस् एवं 'सन्ति' इसमें 'श्नसोरल्लोपः' इससे अकार का लोप किसी प्रकार का विरोध न होने से युगपत् होगा । ऐसी दशा में लोप के स्थानिभूत अकार से पूर्वत्वेन दृष्ट 'कानि' का इकार नहीं है । स्थानिवद्भाव स्वतः प्राप्त नहीं है, अतः 'न पदान्त' सूत्र का यह उदाहरण नहीं हो सकता ?

समाधान—पदसंस्कारपक्ष में 'कानि' इस पद की सिद्धि के अनन्तर 'सन्ति' इसके साथ सम्बन्ध होने से इकार में लोप के स्थानिभूत अच् से पूर्वत्वेन दृष्टत्व है; किन्तु वाक्यसंस्कारपक्ष में ऐसा नहीं है । इसका खण्डन इस प्रकार है—वाक्यसंस्कारपक्ष में श्रुत पदों के क्रमानुरोध से उनकी सिद्धिप्रक्रिया मानी गयी है; क्योंकि पूर्वोपस्थित निमित्त वाले अन्तरङ्ग कहे जाते हैं । इसलिये 'कानि' इसमें अन्तरङ्ग शि आदेश पहले होगा । उसके अनन्तर 'सन्ति' एतत्पदघटक अस् धातु के अकार का लोप होता है । इस प्रकार इकार में स्थानिभूत अच् से पूर्वत्व होने से स्थानिवद्भाव का प्रसङ्ग स्पष्ट है । किम् शब्द का जस् बिभक्ति में 'कानि' रूप है । अस् धातु के लट् लकार में बहुवचन का रूप 'सन्ति' है ॥

एकः पूर्वपरयोः ॥ इस सूत्र का अधिकार है । 'आद् गुणः', 'वृद्धिरेचि' इत्यादि

६९. आद् गुणः । ६ । १ । ८७ । **अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् संहितायाम् । उपेन्द्रः । रमेशः । गङ्गोदकम् ॥**

विवक्षणेनोभयोः पूर्वपरयोरेकत्वावच्छेदेनैव विधेयान्वयेन च 'अनयोः पूलयोः कटं कुरु' इत्यादित इवोभयसम्बन्ध्येकविधेयस्यैव प्रतीतेरेकग्रहणं स्पष्टार्थम् ॥

इत्यत्र गुणवृद्धिपदं विधेयताप्रयोजकत्वेन विवक्षितम् । अतएव तत्र गुणवृद्ध्यादिपदे एकत्वसंख्यायाः विवक्षा । यथा 'पशुना यजेत' इत्यादौ यागस्य वाक्यान्तरेण विहिततया यागे अनेन वाक्येन पशुकरणकत्वं विधीयते । अत्रापि पशुगतैकत्वस्य टाविभक्तिप्रतिपाद्यस्य विवक्षितत्वेन एकत्वविशिष्टेन पशुना यागः, नानेकपशुकरणकः । तथैवात्राऽपि एकत्वस्य विवक्षणेन अनेकगुणवृद्ध्योः प्रसङ्ग एव नास्तीति एकग्रहणं विफलम् । नच सूत्रे 'लिङ्गवचनमतन्त्रम्' इति परिभाषया अत्र एकवचनं विवक्षितुं न शक्यते इति वाच्यम्; अनया परिभाषया अनुवादगतयोः लिङ्गवचनयोरविवक्षितत्वं बोध्यते, न तु विधेयगतयोरपि तयोरिति न दोषः । एवं द्वन्द्वसमासस्य सहविवक्षायामेव साधुत्वेन द्वन्द्वेन निर्दिष्टयोः 'पूर्वपरयोः' इत्यस्य एकधर्मावच्छिन्नान्वयित्वरूपसहविवक्षया एकस्मिन्नेव गुणे सहैवान्वयाच्च एकत्वसंख्याविशिष्टस्य गुणादेर्लाभेन पूर्वपरस्थानिभेदात् आदेशद्वयस्य निवृत्तौ सिद्धायां सूत्रे एकग्रहणं नावश्यकम् ।

अत एव 'अनयोः पूलयोः कटं कुरु' इत्येतेन वाक्येन एकस्यैव कटस्य निर्माणं विधीयते । अन्यथा वाक्ये एकपदानुपादानेन पूलद्वयेन कटद्वयस्य निर्माणं विधिसम्मतं स्यात् । विधेयगतसंख्याया विवक्षणे तु एकस्यैव कटस्योत्पत्तिर्विधिसम्मता इति न कटद्वयस्य निर्मितिः । एवमेव विधेयगतसंख्यायाः विवक्षणेन इहापि एकस्यैव गुणादेः प्रसक्तिर्न दण्डवारिता इत्यवधेयम् । उद्देश्यगता संख्या तु न विवक्ष्यते । यथा 'ग्रहं संमार्ष्टि' । ग्रहो नाम यज्ञसम्बन्धिपात्रविशेषः । अत्र ग्रहपदोत्तरविभक्त्या एकत्वं न विवक्षितम् । अतः अनेकयज्ञपात्राणि उद्दिश्य संमार्जनस्य (शोधनस्य) विधिरुत्पद्यते । विवक्षणे तु एकस्यैव तत्पात्रस्य संमार्जनं स्यादित्याशयः ।

ननु एकत्वसंख्यायाः सर्वत्र सत्त्वेन (यत्रापि द्वित्वत्रित्वादिसंख्या तत्राऽपि एकत्वमस्त्येव) केवलान्वयित्वात् पूर्वपरस्थानिद्वयबलाद् आदेशद्वयस्य विधानेऽपि एकत्वसंख्याया

स्थल में गुण और वृद्धि पद विधेयताप्रयोजक = विधि है । जिस प्रकार 'अनयोः पूलयोः कटं कुरु' इस वाक्य से पूलद्वयसम्बन्धी एक ही चटाई बनाने की प्रतीति वाक्य में एकशब्दोच्चारण के बिना भी होती है; क्योंकि कटपदोत्तर विधेय बिभक्त होने से उसका एकत्व अर्थ विवक्षित है । उसी प्रकार विधेयताप्रयोजक गुणपदोत्तर एवं वृद्धिपदोत्तर सुविभक्ति का अर्थ एकत्व की विबक्षा है । इसीसे पूर्वपर के स्थान में एक ही गुण और वृद्धि का बिधान सिद्ध हो जाने से सूत्र में एकग्रहण स्पष्टार्थक है ।

दूसरा कारण भी है—'पूर्वपरयोः' इसमें सहविवक्षा में द्वन्द्व होने से पूर्व पर पदार्थ का एक ही गुण पदार्थ के साथ अन्वय होगा । इसलिये दोनों स्थानी को एक ही गुण प्राप्त होगा । इसलिये भी एकपदोपादान स्पष्टार्थ ही है । सूत्र में लिङ्ग और वचन अविवक्षित हैं—यह नियम उद्देश्यगत लिङ्गवचन के लिये है । विधेय विभक्त्यर्थ के सम्बन्ध में नहीं है ॥

७०. उरण् रपरः । १ । १ । ५१ । **'ऋ इति त्रिंशतः संज्ञा' इत्युक्तम्, तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते ।**

उरण् रपरः (१ । १ ५१) । उः स्थाने **इति । 'षष्ठी स्थाने' (१ । १ ४९) इति**

अनिवृत्तेः एकत्वविवक्षणेऽपि गुणद्वयं दुर्वारमेव ?—इति चेन्न; स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपस्य एकत्वस्य एकवचनार्थतया विवक्षितत्वात् । साजात्यञ्च स्वप्रकृत्यर्थतावच्छेदकवत्त्व, स्वसमभिव्याहृतपदार्थसंसर्गित्वोभयरूपेण । एवञ्च 'उपेन्द्रः' इत्यादौ गुणद्वये सति, साजात्यघटकस्वपदेन एकवचनं तत्प्रकृतिः गुणशब्दः, तदर्थः—गुणपदं पाणिनिसङ्केतसम्बन्धेन गुणपदवति शक्तमिति गुणपदवान्, गुणपदार्थतावच्छेदकं गुणपदवत्त्वम्, तद्वत्त्वम् अर्थात् गुणपदवत्त्वं गुणे; एवं स्वसमभिव्याहृतपदयोः पूर्वपरयोरर्थौ पूर्वपरौ, तत्सम्बन्धित्वमपि गुणद्वये—इत्येवं रीत्या एकवचनसजातीयं गुणद्वयं जातम् । तन्निष्ठः = गुणनिष्ठो यो भेदः स द्वितीयगुणवृत्त्येकत्ववान्, न पूर्वगुण इति । एवं पूर्वगुणवृत्त्येकत्ववान् न द्वितीय इत्याकारकः, गुणव्यक्तेः परस्परं भेदात्, तादृशप्रतियोगिता एकत्ववति, तदवच्छेदकम् एकत्वम्; एकत्वस्य एकत्ववति विशेषणत्वात्, न तु अनवच्छेदकम् । नातो गुणद्वयस्य प्रसङ्गः ।

चालनीन्यायेन अर्थात् 'चालनी तित उः पुमान्' इति अमरकोशेन चालनी क्षुद्रच्छिद्रशतोपेता (भाषायां चलनीति प्रसिद्धा) यथा युगपदेव न सर्वान् तन्निहितपदार्थान् निस्सारयति, किन्तु क्रमेण; एवमिहापि तद्गतैकत्ववान् न परः, परगतैकत्ववान् न पूर्वः—इत्येवं क्रमेण उभयनिष्ठं भेदप्रतियोगितावच्छेदकं गुणद्वयनिष्ठमेकत्वं वक्तव्यम् । एकस्मिन् गुणादेशे उभयोः स्थाने विहिते तु स्वसजातीयः पूर्वोक्तरीत्या एको गुणः, तन्निष्ठो यो भेदः स स्ववृत्त्येकत्ववान् न—इत्याकारको भेदः । अयञ्च भेदः स्वस्मिन् कथं वक्तुं शक्यते; स्वस्मिन् स्वस्य भेदाभावात्; किन्तु घटपटादौ, तादृशभेदीयप्रतियोगिता 'यस्याभावः स प्रतियोगी' इति रीत्या घटपटादौ, प्रतियोगितावच्छेदकं घटत्व-पटत्वादिकम् अनवच्छेदकं गुणवृत्ति एकत्वम् । अत एक एव गुणादेशः सम्पन्नः ॥

उरण् रपर इति ॥ अत्र 'षष्ठी स्थानेयोगा' इति सूत्रात् स्थानेग्रहणमनुवर्त्य 'उः स्थाने इत्यर्थो लभ्यते' इति कस्यचिदुक्तिं खण्डयति—**षष्ठी स्थाने इति ।** स्थानेयोगेति समस्तपदात् एकदेशस्य 'स्थाने' पदस्यानुवृत्तेरसम्भवात् 'षष्ठी स्थानेयोगा' इति परिभाषासूत्रेणैव अनिर्धारितसम्बन्धविशेषाया षष्ठ्याः स्थानपदार्थनिरूपितसम्बन्धार्थकत्वबोधनात् तल्लाभः । न च 'विधौ परिभाषोपतिष्ठते नानुवादे'[1] इति परिभाषया उरित्यत्र षष्ठ्याः उद्देश्यगतत्वेन 'षष्ठी' इति सूत्रस्याप्रवृत्त्या स्थानपदार्थनिरूपितसम्बन्धार्थालाभ इति वाच्यम्; तस्याः परिभाषायाः 'इको गुणवृद्धी', 'अचश्च'—इत्येतन्मात्रविषयकत्वे-

उरण् रपरः ॥ इसमें 'षष्ठी स्थानेयोगा' इस सूत्र से 'स्थान' पदार्थ का लाभ होने से ऋकार के स्थान में रपर का होना सिद्ध होता है । 'उदात्तस्वरितयोः' इस सूत्र का 'उदात्त और स्वरित के स्थान में' इस प्रकार का अर्थ देखा जाता है । 'स्थानेऽन्तरतमः' इससे अनुवृत्त 'स्थाने'

१. अनूद्यते इति अनुवादः । कर्मणि घञ् । अनूद्यमान इत्यर्थः ।

परिभाषया लब्धम्, 'उदात्तस्वरितयोर्यणः' इतिवत्। 'स्थानेऽन्तरतमः' इत्यतः स्थाने-ग्रहणमनुवर्त्तते, तस्य लक्षणया प्रसङ्गावस्थायामित्यर्थस्तदाह—रपरः सन्नेवेति। **रपर इत्यवयववाचिना परशब्दे षष्ठ्यर्थेन बहुव्रीहिः, तेनास्यावयवत्वात् 'यदागमाः' इति न्यायेन विशिष्टस्य गुणवृद्धित्वेन 'ऋकारस्य गुणवृद्धी अरारावेव' इति नियमोपपत्तिः।**

नान्यत्राप्रवृत्तेः। तत्रापि 'विधीयते' इति पदाध्याहारेण दोषाभावात् 'विधौ परिभाषा' इत्यस्याः खण्डनेन 'षष्ठी स्थाने' इत्यस्य उपस्थितौ बाधकाभावात्।

अनुवादेऽपि प्रवृत्तिस्वीकारे उदाहरणमाह—**उदात्तेति**। 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इत्यनेन उदात्तस्य स्थाने, स्वरितस्य स्थाने च यो यण् ततः परस्य अनुदात्तस्य स्वरितो विधीयते; अनूद्यमाने अनुदात्ते विशेषणीभूते यणि विशेषणीभूतयोः 'उदात्तस्वरितयोः' इत्यत्र 'षष्ठी स्थानेयोगा' इति परिभाषया स्थाननिरूपितसम्बन्धार्थ-लाभस्य इष्टत्वात्। तथैव अत्राऽपि तल्लाभात्।

'स्थानेऽन्तरतमः' इति सूत्रात् 'स्थाने' इति पदमनुवर्तते। स्थानेपदस्य तृती-यान्तेन विपरिणामात् स्थानेन = कण्ठताल्वादिना इत्यर्थसम्पादकतया तस्य प्रकृतानु-पयोगित्वात्, अत आह—**लक्षणयेति**। स्थानपदस्य लक्षणया प्रसङ्गावस्थायामित्यर्थः। तथा च उः स्थाने अण् प्रसङ्गावस्थायामेव रपरः—इत्येतत्फलितमर्थमाह—**रपरः सन्नेव प्रवर्तते इति।**

सदाशिवभट्टास्तु 'षष्ठी स्थानेयोगा' इति सूत्रादेव अनुवर्तमानस्य 'स्थाने' इति पदस्य प्रसङ्गार्थकत्वं मन्यन्ते। तथा च 'स्थानेऽन्तरतमः' इति सूत्रस्य स्थाने-पदे लक्षणया स्वरितत्वप्रतिज्ञा, सा च न। पूर्वसूत्रे तु 'स्थानञ्च प्रसङ्गः' इत्यनेन प्रसङ्गार्थकत्वस्य स्फुटमङ्गीकारात्।

पद का लक्षणा द्वारा 'प्रसङ्ग' अर्थ है। इसी तात्पर्य से 'रपरः सन्नेव प्रवर्तते' अर्थात् जायकान में ही रपर की प्रवृत्ति होती है—ऐसा माना गया है।

'पर' शब्द अवयववाची है। 'रः परो यस्य' इस प्रकार षष्ठ्यर्थ में बहुव्रीहि होने से रेफ में अन्त्यावयवत्व का बोधन होता है। अत एव यदागमपरिभाषा की सहायता से रेफविशिष्ट में गुणवृद्धित्वातिदेश होने के कारण 'गुणवृद्धी अरारावेव' इस प्रकार का समानाधिकरणप्रयोग सङ्गत होता है। एवं ऋकार का गुण और वृद्धि के साथ आन्तरतम्याभाव को ही आन्तरतम्य मानकर उसके स्थान में क्रमशः अकार एवं आकार रूप गुण तथा वृद्धि होती है। आन्तरतम्याभावरूप आन्तरतम्य ऐकार औकार के साथ भी होने से उनकी निवृत्ति भी रेफविशिष्ट गुण वृद्धि द्वारा विधान होने से हो जाती है। अर् और आर् का वर्णान्तर की अपेक्षा मूर्धस्थान से स्थानी के साथ आन्तरतम्य भी है। अतः ये ही आदेश होते हैं। इसकी उपपत्ति तभी हो सकती है जब रेफविशिष्ट में गुणवृद्धित्व का अतिदेश माना जाय। 'गुणो भवति वृद्धिर्भवति रेफशिरा गुणवृद्धि-संज्ञकोऽभिनिर्वर्तते'—इस भाष्य से भी इस अर्थ की पुष्टि होती है। मूल में उद्धृत कैयट से भी

---

१. **प्रसङ्गश्च आहार्यज्ञानापत्तिरूपः।**

अत एव 'रदाभ्याम्' (८ । २ । ४२) इति सूत्रे, 'थलि च सेटि' (६ । ४ । १२१) इति सूत्रे च भाष्ये—**'गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसञ्ज्ञकोऽभिनिर्वर्त्तते'** इत्युक्तम् । **'उः स्थानेऽण् प्रसज्यमान एव रपरो भवति, पूर्वभक्तश्च रेफ इत्यर्थः'** इति कैयटः । **अवयवत्वं वाचनिकमेव तत्सादृश्यबोधनपर्यवसायि । अन्यथा वर्णस्य वर्णान्तरावयवत्वं 'हलन्ताच्च' (१ । २ । १०) इति सूत्रभाष्योक्तरीत्याऽसङ्गतं स्यात् ।**

'मिदचोऽन्त्यात्' इत्यत्र 'आद्यन्तौ' इत्यतः अन्तपदमनुवर्त्य अन्तावयवत्वं बोध्यते, तथैवेहापि रेफस्यान्तावयवत्वमिति न युक्तम्; गौरवात्, अन्यथैव तस्योपपत्तिसम्भवे अनुवृत्तेः फलाभावाच्चेत्याशयेनाह—**रपर इति ।** परशब्दोऽत्र अवयवत्वविशिष्टपरत्वावच्छिन्नवाची । एवञ्च रः परो यस्येत्येवं बहुव्रीहिसमासे रेफनिष्ठपरत्वस्यावधिश्च गुणादिवाच्याकारादिर्भवति । तथा च अवयववाचिना परशब्देन रेफस्य अवयवत्वबोधनेन यदागमपरिभाषया रेफविशिष्टस्य अकारस्य गुणत्वं वृद्धित्वं च क्रमेणोपपद्यते । अतोऽन्तपदानुवृत्तेर्वैफल्यम् । अतएव = परशब्दस्यावयववाचित्वादेव । गुणवृद्धी अरारावेवेति नियमः । ऋकारस्य मूर्धस्थानकत्वेन आन्तरतम्यात् मूर्धस्थानकरेफघटित आदेशः सिद्धः । ऋकारेण सह गुणवृद्धयोरनान्तर्यमेव आन्तर्यमिति तु क्लेशबहुलम् । बहुत्र अनान्तर्यरूपस्यान्तर्यस्य सम्भवेन दोषापत्तेः । अतएव रेफः शिरसि यस्य स रेफशिरा इत्यर्थकः 'रेफशिरा गुणवृद्धिसंज्ञकः' इत्यादि भाष्ये उक्तम् । पूर्वभक्तः = पूर्वस्यावयव इति कैयटोऽप्याह ।

ननु वृक्षस्य सर्वा शाखा अवयवभूता, न तु एकस्याः शाखायाः तद्वृक्षस्था अपरा शाखा अवयवरूपा भवति, तथैवात्रापि एकस्य वर्णस्य अकारस्य वर्णान्तरं रेफरूपमवयवतया कथं व्यवहर्तुं शक्यते ? अत आह—**वाचनिकमेवेति ।** वचनेन बोधितं, न तु तत् तथा अस्ति । तथापि यद् यथाभूतं सिद्धं तथैव वचनार्हम् । नच शास्त्रसहस्रमपि घटं पटयितुमीशते । अत आह—**तत्सादृश्येति ।** वर्णस्य वर्णान्तरमवयवसदृशम्, न तु अवयवः । **अन्यथा** वर्णान्तरावयवत्वसादृश्याविवक्षणे । 'हलन्ताच्च' इति सूत्रभाष्ये युक्तोऽयं निर्देशः—'कथं हि इको नाम हलन्तः स्यात्, अन्यस्यान्त्यः' इति । अत्र कैयटः—

रेफ स्वपूर्ववर्ती का अन्त्यावयव सिद्ध होता है । रेफ अवयव के सदृश है; क्योंकि एक वर्ण दूसरे वर्ण का अवयव नहीं हो सकता ।

उक्तार्थ को स्वीकार न करने पर 'हलन्ताच्च' इस सूत्र के भाष्य के साथ विरोध प्राप्त होगा । इस सूत्र में 'अन्तशब्द समीपवाची है, अवयववाची नहीं; क्योंकि अन्य अन्य का अवयव नहीं हो सकता'—ऐसा लिखा है । अतः वास्तविक अवयवत्व नहीं है, किन्तु अवयव के सदृश है । 'रः परो यस्मात्' इस प्रकार पञ्चम्यर्थ में बहुव्रीहि समास के द्वारा रेफ में अनवयवत्व मानने से गुण और वृद्धि पद से 'उरण् रपरः' के साथ एकवाक्यतापन्न होने के कारण रेफविशिष्ट अ, आ का क्रमशः विधान होने पर भी रेफविशिष्ट अकारादि में गुणत्व और वृद्धित्व का लाभ नहीं होगा । इस प्रकार 'अकार के स्थान में गुण और वृद्धि 'अर्' और 'आर्' रूप होती है'—इस प्रकार का नियम नहीं होगा; क्योंकि रेफसहित अर् और आर् गुण तथा वृद्धि नहीं है । रेफ को अवयव मानने पर रेफ का मूर्धा स्थान होने से उसी स्थान वाले ऋकार के साथ गुण वृद्धि का सादृश्य

पञ्चम्यर्थे बहुव्रीहिणाऽनवयवत्वे तु गुणवृद्धिशब्देनाकारादेरेव रेफपरस्यैतदेकवाक्यतया विधानं स्यात् । गुणत्वादिकं त्वकारादिनिष्ठमेव स्यादित्युक्तनियमानुपपत्तिः ।

अत एव 'वव्रे' इत्यादौ 'हलादिः शेष' (७ । ४ । ६०) सिद्धिः; अभ्यासावयवस्यैवानादेस्तेन निवृत्तेः । एतेन 'अणमनूद्य रपरत्वं विधीयते' इति परास्तम्; उक्तनियमानुपपत्तेः । अत्र पक्षे क्व रपरत्वं क्व लपरत्वमिति व्यवस्थानुपपत्तिस्तु न; रेफवत्स्थानिकस्य रेफपरत्वम्, लकारवत्स्थानिकस्य लपरत्वमिति व्यवस्थासम्भवात् ।

'अन्तशब्दमवयववचनं मत्वा पर्यनुषक्ते (पद्धति) अन्यस्य अन्यः' इति । अत्यन्तभेदमनेन दर्शयति । सामीप्ये अन्तशब्दप्रयोगं मत्वा समाहितम् । हल् चासौ अन्तः । निपातनात् विशेषणस्यापि अन्त्यस्य पूर्वनिपातः । इक् **समीपात् हल इति** । अत्यन्तभिन्नयोरवयवावयविभावो न भवतीति दर्शितम् । तन्तूनां पटः पटो भवति, न तन्तवः—इत्युभयविधप्रयोगात् तन्तुपटयोर्नात्यन्तं भेदः । अत्र तु इगन्तस्य हल् कथमवयवः ? इत्याद्यनुसन्धेयम् ।

उक्तमेवार्थं प्रकाशयति—**पञ्चम्यर्थे** इति । रः परो यस्मादित्येवं पञ्चम्यर्थे बहुव्रीहिसमासे यदवधिकपरत्व(सामीप्य)मात्रबोधने—(अवयवत्वाप्रतिपादने) गुण-वृद्धिपदाभ्याम् अकारस्य आकारस्यैव च रेफपरकत्वम् 'उरण्रपरः' इत्यनेन सह वाक्यैकवाक्यतया विहितं स्यात् । तथा च गुणत्वं वृद्धित्वं च न रेफविशिष्टाकारादौ इति ऋकारस्य अकार एव गुणो भवति, आकार एव वृद्धिर्भवति–इति नियमानुपपत्तिः स्यात्; स्थान्यादेशयोरान्तरतम्याभावात् । रेफविशिष्टस्य गुणवृद्धित्वे तु रेफद्वारा तुल्यस्थानत्वमादाय उक्तव्यवस्थायाः सम्भवात् । अत एव = रेफस्य उः स्थानिकाणोऽवयवत्वादेव । वव्रे इत्यत्र वृधातोर्लिटि द्वित्वे 'उरत्' इत्यनेन अत्वे रपरत्वे च 'हलादिः शेषः' इत्यादिशब्दस्य अवयववाचित्वेन तेन सूत्रेण आद्यवयवस्य हलः सत्त्वे तदतिरिक्तस्याभ्यासघटकस्य हलः अवयवस्यैव निवृत्तौ रेफस्यापि निवृत्तौ वव्रे इत्युपपद्यते । रेफस्य अवयवत्वाभावे तु तस्य निवृत्तिर्न प्राप्नोतीति रेफस्य अभ्यासे श्रवणं प्रसज्येत ।

एतेन = गुणवृद्धिअरारावेवेति नियमानुपपत्तिदोषेण । यदि ऋकारस्थाने जातमणमुद्दिश्य रपरत्वमनेन विधीयेत, तदा अकारमात्रस्य गुणत्वेन, आकारमात्रस्य वृद्धित्वेन अरारावेवेति नियमो न स्यात् । अत्र पक्षे = स्वतन्त्रविधिपक्षे । क्व रपरत्वम् ? क्व लपरत्वम् ?–इति निश्चयाभावेन रेफलकारयोर्व्यवस्था न स्यादिति केनचिदुक्तम्; तन्न; रेफस्थानिकस्य = रेफवतः स्थाने जायमानस्य रपरत्वम्, लकारवतः स्थाने जायमानस्य लपरत्वम् इत्येवं रूपेण रेफलकारयोः स्थानिविशेषस्य व्यवस्था उपपद्यते ।

स्पष्ट उपलब्ध होता है । इसी प्रकार 'वव्रे' इसमें वृ धातु के ऋकार को 'उरत्' इससे अत् आदेश के साथ उत्पन्न रेफ का हलादिः शेष सिद्ध होता है, क्योंकि अभ्यासावयव आदिभिन्न हल् की ही निवृत्ति का बोधन किया है ।

'ऋकार के स्थान में आदेश होने के बाद रपरत्व का विधान है'—ऐसा किसी का मत है, जो उपादेय नहीं है । इस मत में ऋकार को गुणवृद्धि से अर् आर् का ही विधान सिद्ध नहीं होगा; क्योंकि अ आ ये ही गुणवृद्धि पद से बोध्य है । इनका स्थानी के साथ सादृश्य नहीं है । कहाँ रपर कहाँ लपर होता है ?–इसकी व्यवस्था इस प्रकार से होगी–रेफवान् स्थानी को

तत्रान्तरतम्यात् 'कृष्णर्द्धिः' इत्यत्रार् । 'तवल्कारः' इत्यत्राल् । 'अचो रहाभ्याम्' (सू० ५९) इति पक्षे द्वित्वम् ॥

तत्रान्तरतम्यादिति । **स्थानत इति भावः । रेफादिद्वाराऽऽदेशस्यापि मूर्धादि-स्थानत्वात् । तत्र तत्राऽऽदेशानेव रलपरानुच्चार्येदं सूत्रं न कार्यमिति तु न वाच्यम्; 'आप्ज्ञप्यृधामीत्' (७ । ४ । ५५) 'भृञामित्' (७ । ४ । ७६) इत्यादौ दोषापत्तेः ।**

अत्राण् पूर्णेणैव; प्रशास्तृणामिति निर्देशात् । वस्तुतो रप्रत्याहाराभावेन 'रपर' इत्यस्य स्थाने 'लंपर' इति पठनीयमिति 'लपरत्वं वक्ष्यामि' इति तुल्यास्यसूत्र-भाष्याल्लभ्यते ॥

टिप्पणीकृतस्तु—रः परो यस्मादिति पञ्चम्यर्थे बहुव्रीहिं स्वीकृत्य परशब्दस्य च अवयववाचितामस्वीकृत्य अनान्तर्यमेव आन्तर्यं मन्यन्ते । अतएव च ऋकारस्य गुणवृद्धी अरारावेवेति नियमस्योपपत्तिः । नचानान्तर्यरूपान्तर्यस्वीकारे एकारादेरपि ऋकारस्य स्थाने प्रसक्तिः स्यात्, अनान्तर्ये रूपान्तर्यस्य तत्रापि सत्त्वात् इति वाच्यम्; स्ववृत्तित्व, स्वेतरयावदादेशवृत्तित्व, स्वदलभिन्नदलीयवृत्तित्व—इत्येतत्त्रितयसम्बन्धेन स्वविशिष्ट-स्थानप्रयत्नजन्यत्वम् आन्तर्यं वक्तव्यम् । स्वपदेन एकारः, तद्वृत्तित्वं कण्ठतालुस्थान-जन्यत्वे; एवम् स्वपदेन एकारः तदितरो यावान् आदेशः—अकारः ओकारश्च, तत्र कण्ठ-तालुस्थानजन्यत्वं नास्ति, अतोऽवृत्तित्वमपि; एवं स्वदलाद् = गुणदलात् भिन्ने दले ऐकारे कण्ठतालुवृत्तित्वमस्ति । तथा च एकारे आन्तर्यमेवास्ति, न अनान्तर्यमिति न तस्य प्रसङ्गः । ऋकारेऽपि आन्तर्यं यथा स्वपदेन ऋकारः तद्वृत्तित्वम्, स्वेतरो यावान् आदेशः अकारः एकारः ओकारश्च, तत्र मूर्धस्थानजन्यत्वं नास्तीति यावदादेशावृत्तित्वम्, एवं स्वदलभिन्नदले अजादौ मूर्धस्थानजन्यत्वमस्ति । इति लक्षणसमन्वयः ।

अकारे आदेशे विवक्षिते तु स्वस्मिन् अकारे कण्ठस्थानजन्यत्वं स्वेतरयावति आदेशे एकारे ओकारे च कण्ठस्थानजन्यत्वस्य सत्त्वात् तद्वृत्तित्वमेव, नतु तदवृत्तित्व-मिति आन्तर्यलक्षणस्यागमनाद् अनान्तर्यमस्ति । अतः स एवादेशः ।

विधीयमान अण् रूपादेश को रपरत्व और लकारवान् स्थानी को जायमान आदेश को लपरत्व होगा । मूर्धा स्थान वाले ऋ को मूर्धा स्थान वाले रेफ से घटित अर् आर् होते हैं । यहाँ स्थान-कृत आन्तरतम्य से यह व्यवस्था है ।

शंका—जिन आदेशों में रपरत्व या लपरत्व का विधान इष्ट है, उन आदेशों में ही रेफ या लकार का उच्चारण करना उचित था; ऐसा न कर 'उरण् रपरः' इसको क्यों किया ?

समाधान—'आप्ज्ञाप्यृधामीत्' इस सूत्र में ईत् के स्थान में रेफान्त का उच्चारण करने पर 'ईप्सति', 'ज्ञीप्सति' में भी रेफ का श्रवण प्राप्त होगा । रेफ का उच्चारण न करने पर 'ईर्त्संति' में रेफ का श्रवण नहीं होगा ।

इस सूत्र में अण् प्रत्याहार पूर्व णकार से है । अन्यथा 'प्रशास्तृणाम्' इसमें दीर्घादेश होने से रपरत्व का प्रसङ्ग हो जायगा । यहाँ पूर्वणकार तक अण् प्रत्याहार स्वीकार करने से ऋकार को दीर्घ ॠ होता है । उसका अण् में पाठ नहीं है । ऌकार के स्थान में जायमान आदेश को

७१. झरो झरि सवर्णे । ८ । ४ । ६५ । **हलः परस्य झरो लोपो वा स्यात्**

झरो झरि सवर्णे इति ॥ **'झयो हः' (८ । ४ । ६२) इत्यतः, 'वाऽवसाने'**

नच 'अचो ञ्णिति' इति सूत्रेण अकारेण सह आकारस्य आन्तर्यसत्त्वाद् वृद्धिः स्यात्, ननु ऋकारस्य । तथा च ऋकारस्य गुणवृद्धी अरारावेवेति नियमो विरुध्येत । आकारवृत्तित्वं कण्ठस्थानजन्यत्वे स्वेतरो यावान् आदेशः–ए औ इति, तत्रापि 'एदैतोः कण्ठतालु' 'ओदौतोः कण्ठोष्ठम्' इत्यनुरोधात् कण्ठस्थानजन्यत्वं तद्वृत्तित्वं कण्ठस्थानं जन्यते, न तु तद्वृत्तित्वमिति द्वितीयसम्बन्धस्य समन्वयाभावात् ।

ननु तस्मिन् तस्मिन् सूत्रे रपरो लपरश्च उच्चारणीयः । तेनैव रपरत्वं लपरत्वञ्च तत्र सेत्स्यति, किमनेन 'उरण् रपरः' इति पृथक् सूत्रेण । 'वृद्धिरारालादैच्' 'अरलदेङ् गुणः' 'ऋत इर, 'उरोष्ठ्यपूर्वस्य' इत्येवं न्यासं विधाय सूत्रं प्रत्याचक्षीतेति भावः ? समाधत्ते–**आप्ज्ञप्यृ** इति । अत्रापि इदित्यस्य स्थाने 'ईर' इति पठ्येत तदा आप्-ज्ञप्-धात्वोरपि तस्मिन् सूत्रे पठितत्वेन तत्रापि रेफविशिष्ट आदेशः प्रसज्येत । तथा च ईप्सति, ज्ञीप्सति—अत्रापि रेफश्रवणं स्यात् । रेफस्यानिर्देशे ऋध्-धातुना निष्पन्ने ईर्त्सतीत्यत्रापि रेफो न श्रूयेत । उभयपाठे, स्थानिनिर्णयप्रयासे च गौरवम् । एवं 'भृञामित्' इति सूत्रेण भृञ् माङ् ओहाङ्–एतेषां त्रयाणामभ्यासस्य इत्वं श्लौ परे विधीयते । तत्रापि इर्-विधाने मिमीते, जिहीते—इत्यादावपि रेफश्रवणं स्यात् । रेफस्य अकरणे 'बिभर्ति' इत्यत्र रेफस्य श्रवणं न स्यात् । उभयकरणे गौरवम् ।

यद्यपि 'भृञामित्' इत्यत्र रेफघटितविधानेऽपि रेफस्य 'हलादिः शेषः' इत्यनेन निवृत्त्या मिमीते इत्यादौ दोषाभावेन तथा पाठे क्षतिविरहः, तथापि रेफनिवृत्तये सूत्र-स्मरणरूपप्रक्रियागौरवन्तु सर्वानुभवसिद्धमस्त्येव । आदिपदेन 'ऋत इत्' इत्यादेः संग्रहः; गमुल् इत्येतदर्थं लपरस्यापि तत्रावश्यकत्वात् । न च कपिलकादित्वात् तत्र लत्वस्य सिद्धिः । तथा सति पृषोदरादित्वादेव सर्वेष्टसिद्धौ तदतिरिक्तं सर्वमनारम्भणीय-मित्येव किन्न स्यात् ! एतत्सर्वमवधार्य 'उरण् रपरः' इति पृथगेव सूत्रमारब्धमिति 'अप्तृन्-तृच्' इति सूत्रे प्रशास्तृणामिति दीर्घस्य ऋकारस्य निर्देशात् 'उरण् रपरः' इति सूत्रे अण्-प्रत्याहारः पूर्वेणैव णकारेण गृह्यते, न परेण । अन्यथा ऋकारस्य स्थाने जायमानदीर्घ-स्यापि अण्त्वेन रपरत्वं स्यात् । तथा च तस्य श्रवणं प्रसज्येत । पूर्वेण णकारेण अणो ग्रहणे तु ऋकारस्य अण्त्वाभावात् न दोषः ।

'लपरत्वं वक्ष्यामि' इति वार्त्तिकानुरोधेन लकारस्यापि सूत्रे पाठः कर्त्तव्यः । रप्रत्याहारेण लकारस्य संग्रहो न युक्तः; र-प्रत्याहारस्य पूर्वमेव निराकृतत्वादित्यवधेयम् ॥

झरो झरि सवर्णे इति ॥ अत्र पूर्वोक्तभाष्यसम्मताष्टाध्यायीपाठपक्षे 'वाऽवसाने'

लपरत्व के लिये 'लपरत्वं वक्ष्यामि' इस वार्त्तिक के अनुरोध से सूत्र में लकार का पाठ भी करना चाहिये; क्योंकि र प्रत्याहार का पूर्व में निराकरण होने के कारण र पद से लकार का संग्रह नहीं हो सकता ॥

झरो झरि सवर्णे ॥ इस सूत्र में 'झयो होऽन्यतरस्याम्' सूत्र से 'अन्यतरस्याम्' पद की, और भाष्योक्त अष्टाध्यायीपाठपक्ष में 'वाऽवसाने' इस सूत्र से 'वा' पद की अनुवृत्ति है ।

सवर्णे झरि । द्वित्वाभावे लोपे सत्येकधम् । असति लोपे, द्वित्वलोपयोर्वा द्विधम् । सति द्वित्वे, लोपे चासति त्रिधम् । कृष्णर्धिः, कृष्णर्द्धिः, कृष्णर्द्ध्धिः ।

(८ । ४ । ५६) इत्यतो **वा विकल्पोऽनुवर्त्तते । हयवरट्सूत्रशेषे** भाष्ये **स्पष्टमिदम् ।** लोपे **इति । ऋधधातोर्झर इति भावः ।** असतीति । **'द्वित्वाभाव' इत्यनुकृष्यते ।** त्रिधमिति । **त्रिधकारत्वं प्रक्रियाभिप्रायेण ।**

न च द्वित्वभिन्ने पूर्वत्र कर्त्तव्ये परमसिद्धमित्यर्थकेन 'पूर्वत्रासिद्धमद्वित्वे' इत्यनेन धातुधकारस्य जश्त्वे दस्य द्वित्वमिति इदमयुक्तमिति वाच्यम्; फले विशेषाभावेन तदनादरणात् । न ह्यत्र जश्त्वात् पूर्वमनन्तरं वा द्वित्वे रूपे विशेषोऽस्ति; तदनन्तरं जश्त्वप्रवृत्तेः । तस्य परिभाषात्वेन फलविशेषे एव प्रवृत्तेरित्यन्यत्र विस्तरः ।

इति सूत्रात् यथास्थितपाठे तु 'झयो होऽन्यतरस्याम्' इत्यतो विकल्पानुवृत्तिरत्र सूत्रे । **हयवरट्सूत्रशेषे** इति । 'स एष कथं भेदो न स्यात् यदि नित्यो लोपः स्यात् । विभाषा च स लोपः' इत्यादिना भाष्ये स्पष्टम् ।

द्वित्वभिन्ने पूर्वस्मिन् कार्ये कर्तव्ये परमसिद्धमिति । ननु द्वित्वे भिन्ने पूर्वत्र कर्तव्ये परमसिद्धमित्यर्थबोधिकया 'पूर्वत्रासिद्धीयमद्वित्वे' इति परिभाषया द्वित्वात् पूर्वं परस्य त्रैपादिकस्य जश्त्वस्य प्रवृत्त्या जश्त्वेन दकारे कृते ततो दकारस्यैव द्वित्वेन त्रिधकारत्वोक्तिः परममूलेऽसङ्गतेति चेन्न; यत्र परिभाषायाः प्रवृत्तौ अप्रवृत्तौ च फले विशेषो भवति, तत्रैव परिभाषा प्रवर्तते । अत्र तु पूर्वं द्वित्वे ततो जश्त्वं पूर्वं जश्त्वे ततो द्वित्वम्—उभयथा दकारस्यैव लक्ष्ये श्रवणम्, न तु धकारस्य । तथा च प्रवृत्त्यप्रवृत्त्योर्भेदाभावात् परिभाषा नेहादृता; सत्येव फलविशेषे परिभाषायाः प्रवृत्तेः ।

यत्तु केनचित् **सिद्धान्तकौमुद्याम्**—धकारस्य द्वित्वमिति पाठाभावेऽपि तथाविधं पाठं परिकल्प्य 'पूर्वत्रासिद्धीयमद्वित्वे' इति परिभाषया पूर्वं जश्त्वे दकारस्य द्वित्वविधानात् दीक्षितोक्तिरयुक्ता अनूदिता, तन्न; परिनिष्ठिते जश्त्वेन दकारे जाते त्रिधमिति कथमुक्तमित्याशङ्कायां मूले (शेखरे) उक्तम्—प्रक्रियादशायां त्रिधकारत्वम् ।

ननु तत्रापि 'पूर्वत्रासिद्धये' इत्यनया पूर्वत्रासिद्धीमित्यस्याप्रवृत्त्या पूर्वं जश्त्वे ततो दकारस्य द्वित्वे प्रक्रियादशायामपि धकारत्रयस्याभावात्—इदमयुक्तम् । अर्थात् प्रक्रियादशायामपि त्रिधमित्ययुक्तम्–इत्याशयेन शङ्कते—**न चेति ।**

त्रिधमिति । जश्त्व के द्वारा दकार हो जाने के कारण तीन धकार का प्रयोग नहीं हो सकता । अतः प्रक्रियावस्था में ही त्रिधकार का स्वरूप समझना चाहिये ।

शंका—द्वित्व से भिन्न कार्य की प्रवृत्ति में 'पूर्वत्रासिद्धम्' इसकी प्रवृत्ति होती है—यह अर्थ 'पूर्वत्रासिद्धीयमद्वित्वे' इस वचन का है । इसके अनुसार द्वित्वकार्य में 'पूर्वत्रासिद्धम्' इसकी अप्रवृत्ति होने से जश्त्व के अनन्तर दकार को द्वित्व की प्राप्ति होने से धकार को द्वित्व का कथन अयुक्त है ?

'यण इति पञ्चमी मय इति षष्ठी' इति पक्षे ककारस्य द्वित्वम् । लस्य तु 'अनचि च' (सू० ४८) इति । तेन 'तवल्कारः' इत्यत्र रूपचतुष्टयम् ॥

द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि ।

तवल्कारादिषु बुधैर्बोध्यं रूपचतुष्टयम् ॥

७२. वृद्धिरेचि । ६ । १ । ८८ । **आदेचि परे वृद्धिरेकादेशः स्यात् । गुणापवादः । कृष्णैकत्वम् । गङ्गौघः । देवैश्वर्यम् । कृष्णौत्कण्ठ्यम् ॥**

७३. एत्येधत्यूठ्सु । ६ । १ । ८९ । **अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात् ।**

पञ्चमीति । **विनिगमकाभावादिति भावः । अत एवास्य वैकल्पिकत्वम् ॥**

वृद्धिरेचि ॥ कृष्णैकेति । **कृष्णेति सम्बुद्ध्यन्तं पृथक्पदमिति कश्चित् ॥**

एत्येधत्यूठ्सु (६ । १ । ८९) । **ऊठ् अत्राऽऽदेश एव; व्याख्यानात् । एचीति नोठो विशेषणम्, ऊठस्तत्त्वासम्भवात् । 'एत्येधत्योः' (६ । १ । ८९) इति योगं विभज्य**

'यणः' इति पञ्चम्यन्तमेव षष्ठ्यन्तमेव वा, एवं 'मय' इति पञ्चम्यन्तमेव षष्ठ्यन्तमेव वा इत्येकतरनिर्णायकप्रमाणानुपलम्भात् उभयविधं व्याख्यातम् । एकेन व्याख्यानेन यत्र द्वित्यं प्राप्नोति तत्रैव अपरेण व्याख्यानेन द्वित्वं न प्राप्नोतीति व्याख्यानभेद एव द्वित्वस्य वैकल्पिकत्वं साधितम् । तदनन्तरम् = द्वित्वानन्तरम् । तस्य = पूर्वत्रासिद्धीयमिति वचनस्य । अतएव = व्याख्यानभेदादेव ॥

काकस्य कार्ष्ण्यमित्यत्र यथा 'पूरणगुण' इति सूत्रात् षष्ठीसमासप्रतिषेधात्रसमासः, तथा कृष्णैकत्वमित्यत्र षष्ठीसमासासम्भवः ? इत्यत आह—**कृष्णेति** । तथा सम्बोधनान्तं कृष्णेति पृथक् पदम् । 'तदशिष्यं संज्ञाप्रमाणत्वात्' इत्यत्र संज्ञायाः प्रमाणत्वेन गुणवचनेन सह सूत्रे समासदर्शनात् गुणनिषेधस्यानित्यत्वकल्पनया कृष्णस्य एकत्वमिति षष्ठीसमासोऽपि कर्तुं शक्यः । अत एव बुद्धेर्मान्द्यं बुद्धिमान्द्यमित्यस्य प्रयोगः । तथा च समस्तप्रयोगोऽपि युज्यते । **कश्चित्** इत्यनेन पूर्वोक्तार्थे अस्वरसः सूचितः ।

एत्येधत्यूठ्सु इति ॥ अत्र सूत्रे एकेषां मतेन सिद्धः ऊठ्धातुरत्र उपघातार्थक ऊठ्-

---

समाधान—जश्त्व के पूर्व या अनन्तर द्वित्वविधान से लोप में फलविशेष नहीं होता, अतः उक्त परिभाषा का यहाँ अनादर है । फलविशेषसम्पादनार्थ ही परिभाषा की प्रवृत्ति होती है ॥

'यणो मयो द्वे वाच्ये' इस वार्तिक में 'यणः' और 'मयः'—ये दोनों पद पञ्चम्यन्त या षष्ठ्यन्त–दोनों प्रकार के हो सकते हैं । एक प्रकार का ही होने में कोई प्रमाण नहीं है । अतः यण् से उत्तर मय्, मय् से उत्तर यण्—इन दोनों को पक्षभेद से द्वित्व होता है । इसी से द्वित्व में वैकल्पिकत्व फलित हो जाता है ॥

कृष्णैकत्वम् । इसमें कृष्ण पद सम्बोधन है । 'कृष्णस्य एकत्वम्'—इस प्रकार षष्ठी समास नहीं है, क्योंकि 'पूरणगुण' इस सूत्र से षष्ठीसमास का प्रतिषेध हो जायगा ॥

एत्येधत्यूठ्सु ॥ इसमें आदेशरूप ऊठ् का ग्रहण है । किसी के मत से उपघात अर्थ में

परिरूपगुणापवादः । उपैति । उपैधते । प्रष्ठौहः ।
एजाद्योः किम् ? उपेतः । मा भवान्प्रेदिधत् ॥

तयोरेवैचीति विशेषणस्य भाष्ये **कृतत्वाच्च । तदाह**—एजाद्योरिति । **एतिरत्र इणेव प्रसिद्धत्वात् ।**

'उपैति' इत्यादौ **'वृद्धिरेचि (६ । १ । ८८) इत्यनेन गतार्थत्वमाशङ्क्याह—** पररूपगुणेति । **एत्येधत्योरेङि पररूपस्योठि चाऽऽद्‌गुणस्येति विवेकः ।**

उपैधते इति । **अत्र न सर्वादेशः; एत्येधत्याद्यवयवेऽचीत्येवं क्रमेण सूत्राणामर्थात् । अयमेवार्थ इति प्रत्ययलक्षणसूत्रस्थ**भाष्य**स्वरसः । वृक्षे शाखेतिवद् 'एत्येधत्यूठ्सु' इति सप्तमी बोध्या ।**

प्रष्ठौहः । **प्रष्ठं वहतीत्यर्थे वहेण्वौ ततः शस्यूठि सम्प्रसारणे पूर्वरूपेऽनेन वृद्धिः ।**

शब्देन न गृह्यते, किन्तु आदेशरूपः । प्रमाणञ्चात्र अन्तरङ्गपरिभाषाज्ञापकपरं 'वाह ऊठ्' इति सूत्रस्थं भाष्यम् । तत्र आदेशस्यैव ऊठो ग्रहणमादाय चिन्तितम् । तदाह–**ऊठत्रेति** । न चात्र जश्त्वेन ऊठत्रेति भाष्यम् । अनुकार्यानुकरणयोरभेद विवक्षामाश्रित्य प्रतिपादिकत्वसुबन्तत्वयोरभावेन जश्त्वं न कृतम् सूत्रे तु भेद विवक्षया विभक्तिनिर्देशः । यथा 'ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः' इति ।

'सम्भवव्यभिचाराभ्यां स्याद् विशेषणमर्थवत्' इति सिद्धान्तेन ऊठः एजादित्वासम्भवात् भाष्ये एत्येधत्योरेव एचो विशेषणस्य दानाच्च ऊठो न एचीति विशेषणम् । गतिव्याप्त्याद्यर्थकवीधातौ प्रश्लिष्टस्य ई धातोर्ग्रहणं प्रतिक्षिपति—**एतिरत्रेति । इत्याशङ्क्येति** । नच शङ्कायाः परसमूलेऽकृतत्वान्नेदं युक्तमिति वाच्यम्; शङ्कां मनसि निधायेत्यत्र तात्पर्यात् । ननु गुणस्य अल्पाच्तरत्वेन पूर्वं निपाते गुणपररूपापवाद इति पठितुं युक्तमिति नाशङ्कनीयम्; सूत्रक्रमानुसारेण बाध्ययोस्तयोः तथा पाठात् । एत्येधत्योः पररूपस्य ऊठि च गुणस्यापवाद इति कल्पस्य विवक्षणात् । अत्र = उपैधते इत्यत्र । उपैतीत्यत्र वृद्धेः सर्वादेशत्वशङ्का नास्ति । निर्दिश्यमानपरिभाषया इकारमात्रस्यैव वृद्धेः

पठित ऊठ् धातु का ग्रहण नहीं है । इसमें 'वाह ऊठ्' इस सूत्र का भाष्यव्याख्यान प्रमाण है । 'एचि' यह ऊठ् का विशेषण नहीं है; क्योंकि एजादि ऊठ् असम्भव है । यदि ऊठ् धातु का ग्रहण होता तो आङ्पूर्वक ऊठ का 'ओठति' इस प्रयोग में सम्भव होने से भाष्योक्त असम्भवप्रदर्शन नहीं हो सकता । इस सूत्र में 'एत्येधत्योः'–ऐसा अलग योग है । इस पक्ष में 'एजादि' यह पद एति और एधति में ही विशेषण है—इस भाष्य से भी 'एचि' यह दोनों उक्त धातुओं का ही विशेषण है । इसी आशय से 'एजाद्योः एत्येधत्योः' ऐसी वृत्ति लिखी है । प्रसिद्ध होने से एति इस पद से इण् धातु का ग्रहण है । 'उपैति' इसमें 'वृद्धिरेचि' सूत्र से वृद्धि हो जाने से रूपसिद्धि हो जाती है । 'एङि पररूपम्' से प्राप्त पररूप के बाध के लिये 'एत्येधत्यूठ्सु' सूत्र की आवश्यकता है । अन्यथा अपवाद होने से 'एङि पररूपम्' के द्वारा 'वृद्धिरेचि' से प्राप्त वृद्धि का बाध हो जायगा ।

यह सूत्र इण् तथा एध् धातु में प्राप्त पररूप और ऊठ् में गुणादेश का अपवाद है ।

प्रेदिधदिति। परे तु 'इणीकारादौ प्रतिषेधः' (का० वा०) इति वार्त्तिके एधत्यनुपादानात्, 'न त्वेधतेरव्यभिचारात्' इति वृत्तेश्चास्यानभिधानमेव। 'एत्येधत्योरेचीति विशेषणम्' इति भाष्यस्यैधत्यंशे सम्भवमात्रेणोपरञ्जकतया विशेषणमित्याशय इत्याहुः। 'उपैधयते' इत्यादावपि वृद्धिर्भवत्येव। प्रकृतिभागस्यैच्रूपत्वात्। किञ्च, एत्येधत्यवयवेऽचीत्यर्थः प्रत्ययलक्षणसूत्रभाष्यसम्मत इति अत्र न दोषः।

प्रसङ्गात्। एध्धातौ च परिभाषया न वारयितुं शक्यते, धातोः निर्दिश्यमानत्वेन सर्वादेशप्रसक्तेः सम्भवात्। अतः 'अत्र' इत्युक्तम्।

न च 'आदेः परस्य' इत्यनेन आदेरेकारस्यैव वृद्धिः स्यादिति वाच्यम्; परशब्दमुच्चार्य परस्य यत्कार्यं तत्रैव तस्य प्रवृत्तेः। अतः आह—**एत्येधत्याद्यवयवे इति।** अचीत्यपि अनुवृत्तम्, तथा च 'एजाद्योरेत्येधत्योराद्यवयवेऽचि परे'––इत्यर्थाभ्युपगमेन न सर्वादेशत्वम्। एतेस्तु निर्दिश्यमानपरिभाषयैव सर्वादेशत्वस्य वारणात् कथमर्थे निर्देशः इति न शङ्कनीयम्। ऐकरूप्येण अर्थबोधाय एतेरपि तत्रार्थे सम्बन्धः। **सूत्राणामिति।** वार्त्तिकस्यापि उपलक्षणं बोध्यम्। अयमेवार्थः = सप्तमीस्वारस्येनापि क्रियमाणः शाब्दः एत्येधत्योरवयवेऽचीतिरूपोऽर्थः। **प्रत्ययेति।** 'प्रत्ययलक्षणमेतद्घटकमकाररहितस्येदमनुकरणम्। तत्र सूत्रे गामिच्छतीति गव्यतीत्यत्र प्रत्ययलक्षणेन अम्-विभक्तिमाश्रित्य 'औतोम्शसोः' इत्यात्वं कुतो नेत्याशङ्क्य अम्यवयवेऽचीति व्याख्याय अज्निमित्तकत्वेन वर्णाश्रयत्वान्न प्रत्ययलक्षणमित्युक्तम्। तेन च अत्रापि तदवयवेऽचीत्यर्थे स्वारस्यं प्रतीयते इति भावः। 'अवयवेऽचि' इत्यर्थे सप्तम्याः प्रयोगो नोचितः; किन्तु षष्ठ्यन्तस्यैव प्रयोग उचित इति न शङ्क्यम्। वृक्षावयवभूता शाखा, तथापि वृक्षे शाखेति प्रयोगो भवति; कारकाणां विवक्षाधीनत्वात् अधिकरणत्वेन विवक्षायां सप्तमी युक्तैव।

शंका—'उपैधते' इसमें समग्र एध् धातु को इस सूत्र से वृद्धि होनी चाहिये, क्योंकि 'एकः पूर्वपरयोः' के द्वारा स्थानिता का बोध पर में किया गया है। इण् धातु में तो समग्र स्थानी है, अतः इसमें सन्देह नहीं है ?

समाधान—'एति' 'एधति' का आद्यवयवभूत अच् ही पर शब्द से विवक्षित है। अतः वृद्धि की स्थानिता समग्र में नहीं हुई। 'इक्श्तिपौ धातुनिर्देशे' इक् और तिप् से निर्देश को धातु का निर्देश समझना चाहिये। इसके अनुसार 'एति' से इण् तथा 'एधति' से एध धातु का बोध होता है। 'एत्येधत्याद्यवयवेऽचि' इसका एजादि एति और एधति का आद्यवयव अच्— ऐसा अर्थ समझना चाहिये।

प्रत्ययलक्षणसूत्र के भाष्य में 'औतोऽम्शसोः' इस सूत्र में अनुवृत्त 'अचि' के सम्बन्ध में 'नैवं विज्ञायते अचि अमि इति, कथं तर्हि अमि अचि'। अर्थात् अच् अम् का विशेषण न होकर अमि अचि इस रूप से अम् का विशेष्य है। अम् का अवयवभूत अच्—ऐसा अर्थ होने से तदादिविधि द्वारा 'अजादि अम्' ऐसा अर्थ नहीं हुआ—यह तात्पर्य है। इसके अनुसार यहाँ भी सप्तमी विभक्ति के स्वारस्य से एति और एधति का आद्यवयव अच्—ऐसा अर्थ लक्षित होता है।

'इकारादि इण् धातु में वृद्धिप्रतिषेधविधायक वार्त्तिक में एध धातु के अनुपादान से एवं एध् में एच् विशेषण नहीं है, क्योंकि एध् धातु में एजादित्व का कहीं व्यभिचार नही है,

पुरस्तादपवादन्यायेनेयं वृद्धिः 'एङि पररूपम्' (सू० ७८) इत्यस्यैव बाधिका, न तु 'ओमाङोश्च' (सू० ८०) इत्यस्य। तेन 'अवेहि' इति वृद्धिरसाधुरेव।

पुरस्तादिति। **'पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान्' इति न्यायः। अवश्यं स्वपरस्मिन् बाधनीये भेदेनापेक्षायां प्रथमोपस्थितबाधेनाऽऽकाङ्क्षानिवृत्तिर्हि तद्बीजम्।**

प्रेदिधदित्यादौ वृद्धिवारणाय एजाद्योरिति विशेषणं देयम्। **शेखरकृन्मते** ईदृशप्रयोगाणामनभिधानात् तद्विशेषणं नोपादेयम्। तेषामनभिधाने प्रमाणञ्च 'इणीकारादौ प्रतिषेधः' इति वार्त्तिककृदुक्तिः। उपेतः इत्यत्र इकारादौ इण्धातौ वृद्धिवारणाय प्रतिषेधः उक्तः, न त्वेधतेरपि। यदि च प्रेदिधदित्यादिप्रयोगाः स्युः, तदा अत्रापि वृद्धिवारणाय प्रतिषेधं ब्रूयात्। एवं वृत्तिकारोऽपि 'एजादिविशेषणमेतेरेव, न त्वेधतेः; अव्यभिचारात्' इत्युक्तवान्। अस्य प्रयोगस्य सत्त्वे तु अत्रैव व्यभिचारेण तदुक्तिरसङ्गता स्यात्। अतोऽस्यानभिधानमेव। यत्तु 'एत्येधत्योरेचीति विशेषणम्' इति भाष्ये एधतेरपि तद् विशेषणं प्रतिपादितं तत्तु सम्भावनामात्रेण, न तु प्रयोजनदृष्ट्या इति न तद्विरोधः।

ननु 'प्रकृतिग्रहणे ण्यधिकस्याग्रहणम्' इति परिभाषया ण्यन्तस्य एधीत्यस्याग्रहणात् 'उपैधयते' इत्यत्र वृद्धिर्न स्यात्, अत उक्तम्—**उपैधयते इति**। णिज्विशिष्टस्य एध्भिन्नत्वेनाग्रहणेऽपि णिजन्तघटकप्रकृतिभागस्य एधूरूपताया अनपायात् वृद्धिविधाने तत्र बाधकाभावात्। एधतेराद्यवयवस्य सत्त्वेन अस्मिन्नर्थेऽपि वृद्धेः सम्भवेन दोषानवकाशात्।

स्वपरस्मिन्निति। स्वस्मात् परस्मिन् अपवादशास्त्रात् यस्मिन् अवश्यं बाधनीये भेदेन = विशेषेण कस्य बाधः ?—इत्याकाङ्क्षायां प्रथमोपस्थितस्य सूत्रस्य बाधने बाधापेक्षायाः प्रशमनात्, अपवादशास्त्रस्य चारितार्थ्येन 'विप्रतिषेधे परं कार्यम्' इति सूत्रस्य बाधे मानाभावाच्चेति बीजात् सिद्धेन 'पूर्वं पठिता ये अपवादास्ते अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति न्यायेन 'एङि पररूपम्' इति विहितस्य पररूपस्यैव 'एत्येधत्यूठ्सु' इति सूत्रेण बाधः, नतु व्यवहितस्य 'ओमाङोश्च' इति विहितस्य। अतः अव-आङ्पूर्वकाद् इण्धातोर्लोटि मध्यमपुरुषैकवचने निष्पन्ने 'अवेहि' इत्यत्र वृद्धिर्न जायते।

सर्वत्र एजादि है—इस आशय वाले वृत्तिग्रन्थ से 'प्रेदिधत्' इसका अनभिधान है। अन्यथा यहाँ की व्यावृत्ति के लिये एध् में भी एच् विशेषण आवश्यक होने से इसमें एच् विशेषण का परित्याग असङ्गत हो जायगा। 'एत्येधत्योरेचि विशेषणम्' (= एति एधति इन दोनों में एच् विशेषण है) यह भाष्योक्ति एध् में सम्भावनामूलक है। अतः भाष्यविरोध नहीं है। 'उपैधयते' इत्यादि स्थल में भी वृद्धि होती है; क्योंकि णिजन्त एधिघटक एध् में एधूरूपता का अभाव नहीं है। प्रत्ययलक्षणसूत्रस्थ भाष्य के स्वारस्य से 'एति एधति के आद्यवयव अच्'—ऐसा अर्थ होने के कारण भी दोष नहीं है; क्योंकि अच् में एध् की आद्यवयवता णिच् होने पर भी अबाधित है।

अवेहि। इसमें 'ओमाङोश्च' सूत्र से प्राप्त पररूप का 'एत्येधत्यूठ्सु' के द्वारा बाध नहीं होता, स्व से दूसरे का बाध अवश्य करना है। किसका बाध होता है?—इस प्रकार

'अक्षादूहिन्यामुपसंख्यानम्' (वा०) । अक्षौहिणी सेना ।

'स्वादीरेरिणोः' (वा०) । स्वैरः । स्वेनेरितुं शीलमस्येति स्वैरी । स्वैरिणी ।

'प्रादूहोढोढ्येषैष्येषु' (वा०) । प्रौहः । प्रौढः ।

'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्' (प०) । 'व्रश्चभ्रस्ज०' (सू० २९४) इति सूत्रे राजेः पृथग् भ्राजिग्रहणाज्ज्ञापकात् । तेनोढग्रणेन क्तान्तमेव गृह्यते, न तु क्तवत्वन्तस्यैकदेशः । प्रोढवान् । प्रौढिः ।

'इषु इच्छायाम्' तुदादिः, 'इष् गतौ' दिवादिः, 'इष् आभीक्ष्ण्ये' क्र्यादिः— एषां घञि ण्यति च 'एषः', 'एष्यः' इति रूपे । तत्र पररूपे प्राप्तेऽनेन वृद्धिः । प्रैषः । प्रैष्यः । यस्तु 'ईष् उञ्छे', यश्च 'ईष् गतिहिंसादर्शनेषु'— तयोर्दीर्घोपधत्वात्-ईषः । तत्राद्गुणे—प्रेषः । प्रेष्यः ।

'ऋते च तृतीयासमासे' (वा०) । सुखेन ऋतः सुखार्तः । 'तृतीया' इति किम् ? परमर्तः ।

'प्रवत्सतरकम्बलवसनार्णदशानामृणे' (वा०) । प्रार्णम् । वत्सतरार्णमित्यादि । ऋणस्यापनयनाय यदन्यदृणं क्रियते तदृणार्णम् । दशार्णो देशः । नदी च दशार्णा । ऋणशब्दो दुर्गभूमौ जले च ॥

असाधुरेवेति । आङ्गिणोरेकादेशस्य पूर्वान्ततयाऽऽङि परंरूपेण बाधादिति भावः ।

अर्थवद्ग्रहणे इति । अस्या बीजं 'स्वं रूपम्' (१ । १ । ६८) इति सूत्रे उक्तम् । पररूपे प्राप्ते इति । 'पूर्वं धातुः साधनेन युज्यते' इति सिद्धान्तादिति भावः ॥

किन्तु 'ओमाङोश्च' इति पररूपमेव भवति । अत एव 'अवेहि मां किङ्करमष्टमूर्तेः' इति रघुवंशस्य (२-३५) पद्यमिदं सङ्गच्छते ।

अस्या इति । 'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषायाः । बीजम् = कारणम् । प्रमाणमिति भावः । 'स्वं रूपम्' इति सूत्रस्याभावे शब्दादुपस्थितस्य अर्थस्य विशेषणतया यत्रान्वये कार्यबाधः, तत्र सर्वथा तस्यार्थस्य त्यागापेक्षया विशेषणतया उपस्थितशब्देऽन्वयस्य स्वीकाराद् अर्थविशिष्टशब्दविशेषरूपस्य बोधेन अर्थरहितस्य तस्याग्रहणात् सिध्यति एषा परिभाषा इति । अस्याः सीरदेवोक्तं ज्ञापकं मनोरमायामनुसन्धेयम् ॥

की आकांक्षा में अपने से अव्यवहित उत्तर का 'एङि पररूपम्' इसका बाध करने से ही 'एत्येधत्यूठ्सु' इसकी चरितार्थता हो जाती है । अतः व्यवहित 'ओमाङोश्च' इसके बाध में अनवकाशत्व रूप बाधबीज न होने से, बाध नहीं होता । 'पुरस्तादपवादाः' यह न्याय एतन्मूलक है । 'अवेहि मां किङ्करमष्टमूर्तेः' इस रघुवंश पद्य (२-३५) में वृद्धिघटित प्रयोग नहीं करना चाहिये । 'अव आ इहि' इस अवस्था में गुण होने के बाद पूर्वान्तवद्भाव से एकार में आङ्त्वातिदेश के द्वारा वृद्धि का पररूप से बाध होता है । 'अर्थवद्ग्रहण' परिभाषा का बीज पूर्व में कहा गया है । पररूपे इति । धातु का साधन बोधक प्रत्यय के साथ योग पहले ही होता है ।

७४. उपसर्गादृति धातौ । ६ । १ । ९१ ॥ **अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् । उपार्च्छति । प्रार्च्छति ॥**

उपसर्गादृति धातौ (६ । १ । ९१) ॥ **तपरकरणादुपऋकारीयतीत्यादौ 'वा सुपि' (६ । १ । ९२) इति न वृद्धिः । सौत्रऋतिस्तु न गृह्यते; व्याख्यानात् । आदित्यनुवृत्तेन तदन्तविधिरित्याह**—अवर्णान्तादिति । **'यस्मिन्विधिः' इति परिभाषयाऽऽह**—ऋकारादा-

---

उपसर्गादृति धातौ ॥ अत्र तपरकरणं दीर्घस्य ॠकारस्य ग्रहणं व्यावर्तयितुं कृतम् । परं दीर्घॠकारादेर्धातोरभावात् फलमेतद् भवितुं नार्हति । नच उपॠकारीयतीत्येव फलं तपरकरणस्येति वाच्यम्; प्रसिद्धत्वात्, एधसाहचर्याच्च धातुगणपठितस्यैव ऋकारादि-धातोर्ग्रहणेन नामधातौ प्रवृत्त्यभावात् । अत आह—**वा सुपीति** । उत्तरसूत्रेण 'वा सुप्यापिशलेः' इत्यनेन दीर्घस्थले प्राप्ताया वृद्धेर्वारणाय तपरकरणस्य चारितार्थ्यात् । 'वा सुपि' इति प्रतीकोल्लेखो मूले 'वा सुप्यापिशलेः' इति सूत्रे निर्दिष्टपदं विभज्य कृतः । ईदृशी परम्परापि अनेन साधिता ।

अत्र सूत्रे 'ऋतेरीयङ्' इति सूत्रे निर्दिष्टस्य ऋतधातोर्ग्रहणं कुतो न ? इत्यत्र आह—**व्याख्यानादिति** । 'उपसर्गबलेनैव धातोराक्षेपे सिद्धे, सूत्रे पुनर्धातुग्रहणं योगविभाग-द्वारा पुनर्वृद्धिविधानार्थम् । यदन्यत् प्राप्नोति तन्मा भूत् । किञ्चान्यत् प्राप्नोति ? ह्रस्व-त्वम्, ऋत्यकः'—इत्युक्तं भाष्ये । यदि सौत्रो धातुर्गृह्येत ऋतपदेन, तदा धातोरित्यस्य सत्त्वे ऋतेर्धातोः शीघ्रोपस्थितिः सिध्यति । एतदर्थं धातोरित्यस्य आवश्यकत्वेन योग-विभागद्वारा पुनर्वृद्धिविधानार्थत्ववर्णनमनुचितं स्यात् । धातुग्रहणाभावे 'ऋत्यकः' इत्यत्र यथा ऋतपदेन ऋकाररूप वर्णस्य ग्रहणं तथाऽत्रापि वर्णमात्रग्रहणं स्यात्—इत्येवं-रूपाद् व्याख्यानात् ।

अथवा—धातुग्रहणस्य फलं प्रार्षभं वनमित्युक्तं भाष्ये । यदि ऋतिः सौत्रो धातु-र्गृह्येत तदा प्रार्षभमत्र दोषाप्रसक्तेः तत्प्रत्युदाहरणत्वेन तस्योपन्यासो न युज्येत । एतादृश-दोषदानरूपाद् व्याख्यानाद् वा न सौत्रधातुग्रहणमिति भावः । वृद्धेः सर्वादेशत्वं वारयितु-

---

उपसर्गादृति धातौ ॥ इस सूत्र के 'ऋति' पद में तपरनिर्देश होने से ह्रस्व ऋकार का ग्रहण होता है । इसीलिये 'वा सुप्यापिशलेः' इसमें अनुवृत्त ऋकार ह्रस्व ही गृहीत होता है । अतः 'उपॠकारीयति' में वृद्धि नहीं हुई । इस सूत्र में ऋत् शब्द से सौत्र ऋत् धातु का ग्रहण नहीं है । 'आत् अचि' इत्यादि पद वर्णमात्रबोधक है । इसी प्रकरण में 'ऋति' का निर्देश होने से इससे भी वर्ण का ही ग्रहण करना उचित है । यहाँ उक्तार्थ में एतन्मूलक व्याख्यान ही प्रमाण है । 'येन विधिः' इससे आत् पद में तदन्तविधि द्वारा 'अवर्णान्त' इस अर्थ का लाभ होता है ।

पूर्व पर समुदाय को पररूप की व्यावृत्ति के लिये, समुदाय के अन्त्य और आद्य वर्णों को पररूप का विधान होता है—ऐसा सूत्रार्थ है । उपसर्गावयव अकार से अव्यवहित उत्तरधात्व-वयव ऋकार के रहने पर पूर्व और पर को वृद्धिरूप एकादेश होता है—इस प्रकार के सूत्रार्थ का निर्देश उचित है । 'उपसर्गात्' इसके स्थान में 'गतेः' ऐसा सूत्र लाघवार्थ करने पर अच्छर्च्छति यहाँ 'अच्छ गत्यर्थवदेषु' इससे अच्छ को गतिसंज्ञा होने से वृद्धि हो जायगी । अतः 'उपसर्गात्' इसका निर्देश है । अच्छ उपसर्ग नहीं है, अतः वृद्धि नहीं हुई ॥

७५. अन्तादिवच्च । ६ । १ । ८५ । **योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवत् स्यात् । इति रेफस्य पदान्तत्वे ।**

विति । पूर्वपरयोस्तयोः समुदाययोरन्त्याद्योर्वर्णयोरेकादेश इत्यर्थः । उपसर्गावयवाकाराद्धात्ववयवे ऋकारे तयोः पूर्वपरयोर्वृद्धिरित्युचितम् । 'गतेः' इति तु नोक्तम्; 'अच्छर्छति' इत्यादौ दोषात् ।

अन्तादिवच्च (६ । १ । ८५) । इह 'पूर्वपरयोः' इति वर्तते, यथासङ्ख्यं च । अन्तादिशब्दावुपस्थितैकादेशस्थानिपरौ । पूर्वपरशब्दौ च तद्घटितसमुदायपरौ । एवञ्च पूर्वस्य परस्य समुदायस्यान्तादिभ्यां वर्णाभ्यां पृथगवस्थिताभ्यां ये व्यवहारा प्रातिपदिकत्वसुजन्तत्वप्रत्ययत्वादयस्ते कृतैकादेशस्य भवन्ति, न तु तद्वर्णमात्रवृत्तयोऽत्वह्रस्वत्वादय इत्यर्थः । तत्फलितमाह—योऽयमित्यादि । तेन रामावित्यादौ परादिवत्त्वेन औ

माह—पूर्वेति । स्वसिद्धान्तानुरोधिनमर्थमाह—उपसर्गेति । उपसर्गाद् इति विहाय तस्थ स्थाने गतेरिति लाघवात् नोक्तम् । अच्छर्च्छतीत्यत्रापि वृद्ध्यापत्तेः । 'अच्छ गत्यर्थवदेषु' इत्यनेन अच्छशब्दस्य गतिसंज्ञायाः विधानात् ॥

अन्तादिवच्च इति । अत्र 'पूर्वपरयोः' इत्यनुवर्त्य यथासंख्यं सम्बन्धः । पूर्वशब्दस्य एकादेशपूर्वस्थानिचरमावयवके परपदस्यैकादेशपरस्थानिचरमावयवके लक्षणा । एवञ्च 'एकादेशः एकादेशपूर्वस्थानिचरमावयवकसमुदायस्य अन्तवत्', तथैव 'एकादेशः एकादेशपरस्थान्याद्यवयवकसमुदायस्य आदिवद्' इत्यर्थः सम्पन्नः । तथाच एकादेशघटिते समुदाये एकादेशस्थान्यन्त्यावयवतायाः निरूपकः = यस्य समुदायस्य अन्त्यावयवः एकादेशः, तस्मिन् समुदाये, एकादेशस्य पूर्वो यः स्थानी तन्निष्ठा या चरमावयवता तन्निरूपकत्वं बोध्यम् । तत्र समुदाये वर्तमाना अर्थवत्पर्याप्तधर्माः, एवम् एकादेशनिष्ठायाः आद्यवयवताया निरूपके समुदाये एकादेशपरस्थानिनिष्ठा या आद्यवयवता तन्निरूपकसमुदायवृत्तयो ये अर्थवत्पर्याप्तधर्मास्ते अतिदेष्टव्याः—इत्यर्थः पर्यवसन्नः ।

एकादेशस्थानिघटितसमुदायवृत्त्यर्थवत्पर्याप्तधर्मस्यैवातिदेशेन 'खट्वाभिः' इत्यत्र एकादेशस्थानिपर्याप्तधर्मातिदेशो न । तथाविधस्य तस्यापि अतिदेशे अकारत्वाद् भिस ऐसादेशः स्यात् । वर्णमात्रवृत्तिधर्मस्य तद्घटितधर्मस्य चातिदेशो न भवतीत्यर्थकस्य 'अताद्रूप्यस्यातिदेशात्' इति वचनस्य समुदायवृत्त्यर्थवत्पर्याप्तधर्मस्यैवातिदेश इत्येव मूलम् । तस्मान्नेदमपूर्वकं वचनं किन्तु तन्मूलकत्वेन फलितार्थवचनम् । अतएव वर्णाश्रये अन्तादिवद्भावप्रतिषेधवचनमारभ्य 'अताद्रूप्यातिदेशात्' इति वचनेन प्रत्याख्यातम् । वचनस्यास्य अपूर्वत्वे एकस्य वचनस्य अपरेण अपूर्ववचनेन प्रत्याख्यानासङ्गतिः स्यात्—इत्यादि **टिप्पण्यां** स्पष्टम् ।

पूर्वस्य परस्येति । चकाराभावेऽपि समुच्चयः प्रतीयते । 'पूर्वपरयोः' इत्यस्यानुवृत्त्या पूर्वपरघटितसमुदायस्य ग्रहणम् ।

अन्तादिवच्च ॥ इसमें 'एकः पूर्वपरयोः' इसकी अनुवृत्ति है । यथासंख्य के अनुरोध से पूर्व का अन्त के साथ और पर का आदि के साथ सम्बन्ध है । अन्त तथा आदि शब्द प्रत्यासत्ति से एकादेश स्थानी के बोधक है । पूर्व और पर शब्द पूर्वपरघटित समुदाय के बोधक हैं । इस

इत्यस्य सुप्त्वे पूर्वमान्तस्यैकदेशविकृतन्यायेन प्रकृतित्वे यस्माद्विहितस्तदादितदन्तत्वमार्थ-समाजग्रस्तमिति पदत्वसिद्धिः। तद्वर्णमात्रवृत्तिधर्मानतिदेशात् 'खट्वाभिः' इत्यत्राऽत्व-निबन्धन ऐस्न, अयजे इन्द्रमित्यादौ सवर्णदीर्घश्च न। अत एव तुक्यसिद्धवचनं चरि-तार्थम्। अन्यथा 'अधीत्य' इत्यादावादिवत्त्वेन ह्रस्वत्वप्रयुक्ततुक्सिद्धौ तद्वैयर्थ्यं स्पष्टमेव। तदुक्तम्—'वर्णाश्रये चान्तादिवत्त्वप्रतिषेधो वक्तव्यः, न वाऽताद्रूप्यातिदेशात्' इति। अन्तादिवर्णमात्रवृत्तिधर्मानतिदेशादिति तदर्थः।

तद्वर्णेति। अन्तादिवर्णेत्यर्थः। सुप्त्वस्य औ विभक्तौ सत्त्वेन वर्णवृत्तित्वेऽपि भ्यामादावपि सत्त्वेन वर्णमात्रवृत्तित्वाभावात् 'रामौ' इत्यादौ सुप्त्वस्य औकारे अतिदेशे बाधकाभावादिति 'वर्णमात्रवृत्तयः' इत्यत्र मात्रपदनिर्देशं सफलयन्नाह—**तेनेति**। उक्ता-र्थाङ्गीकारेण। औ इत्यस्य परादिवद्भावेन सुप्त्वम् राम इत्यस्य एकदेशविकृतन्यायेन तदादित्वं (प्रकृतित्वं) यस्माद् विहितस्तदादितदन्तत्वरूपं सुबन्तत्वं फलितो यः आर्थः समाजः समुदायः, तेन ग्रस्तम् = सिद्धम्। अतः सुबन्तत्वनिबन्धना पदत्वसिद्धिः। अत्वस्य वर्णमात्रवृत्तित्वात् तद्घटितस्यादन्तस्य नातिदेशः। अतः 'खट्वाभिः' इत्यत्र ऐस् न। अयजे इन्द्रमित्यत्र यज्धातोर्लङि उत्तमपुरुषैकवचने निष्पन्ने गुणरूपैकादेशस्य परादि-वत्त्वेन इकारबुद्ध्या सवर्णदीर्घोऽपि न भवति। इत्वस्य वर्णमात्रवृत्तिधर्मत्वेन अतिदेशा-सम्भवात्।

वर्णमात्रवृत्तिधर्मघटितधर्मानयने अन्तादिवद्भावो न भवतीत्यत्र प्रमाणमाह—**अत एवेति**। उक्तार्थाङ्गीकारादेव। 'षत्वतुकोरसिद्धः' इति सूत्रेण तुकि असिद्धत्वबोधनं चरितार्थम्। तद्धि 'अधीत्य', 'प्रेत्य' इत्यत्र क्रमेण दीर्घे गुणे च जाते 'ह्रस्वस्य पिति कृति तुक्' इत्यनेन ह्रस्वस्येकारस्याभावात् तुक् न स्यात्। अतस्तुकि कर्तव्ये एकादेशशास्त्र-स्यासिद्धत्वं तेन सूत्रेण विहितम्। वर्णमात्रवृत्तिधर्मातिदेशेऽपि अन्तवद्भावप्रवृत्तौ तु अति-देशेनैव सिद्धौ असिद्धत्वविधानं व्यर्थं स्यात्। नच अधिपूर्वकाद् ईङ्धातोः क्त्वाप्रत्यये ल्यपि च कृते सिद्धे 'अधीत्य' इत्यत्र पूर्वान्तवद्भावेन ह्रस्वान्तत्वस्य परादिवद्भावेन कृत्तदादित्वस्य चातिदेशेन तुकः प्राप्तौ अनेन एकादेशशास्त्रस्य असिद्धत्वस्य बोधनात् दीर्घस्य ईकारस्य बुद्ध्या तुको व्यावृत्तिः सम्भवति। एतदर्थमेव सूत्रमिदं सफलमिति वाच्यम्; उभयतः आश्रयणे अन्तादिवद्भावस्याप्रवृत्तेः।

प्रकार एकादेश पूर्व स्थानी से घटित समुदाय में वृत्ति जो अर्थवान् का पर्याप्तधर्म, एवं एकादेश पर स्थानी से घटित समुदायवृत्ति अर्थवत्पर्याप्तधर्म उसका अतिदेश होता है। अर्थात् पूर्व-पर घटित समुदाय के अन्त तथा आदि वर्ण के पृथक् पृथक् रूप में अवस्थित रहने पर जो व्यवहार होता है, वही व्यवहार एकादेश होने पर भी होना चाहिये। किन्तु वर्णमात्रवृत्तिधर्म अत्व ह्रस्वत्वादि का अतिदेश नहीं होता। इसीका परममूल में फलितार्थ है—**योऽयमेकादेश** इत्यादि।

अत एव 'रामौ' इसमें परादिवद्भाव से औ विभक्ति में सुप्त्व और एकदेशविकृतन्याय से मान्त में प्रकृतित्व का अतिदेश होने से 'यस्माद् विहितः तदादितदन्तत्व' अर्थात् सिद्ध हो जाने से सुबन्तत्वनिमित्तक पदसंज्ञा की सिद्धि होती है। 'खट्वाभिः' में एकादेश में अत्वधर्मातिदेश

'क्षीरपेण' इत्यादावेकारविशिष्टे एकाजुत्तरपदत्वं भवत्येव।

अन्तरङ्गपरिभाषया तुकि कर्तव्ये पदद्वयसम्बन्धिनो वर्णद्वयस्य निमित्तमाश्रित्य दीर्घस्य जायमानत्वेन बहिरङ्गत्वाद् असिद्धत्वेन दोषाभावाच्च। 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' इति परिभाषया अन्तरङ्गपरिभाषायाः निषेधस्तु नाशङ्कनीयः; स्वमते तस्या असत्त्वात्। भाष्यकारादिसम्मत्याऽपि इममर्थं प्रमाणयति—**तदुक्तमिति। अताद्रूप्येति।** ताद्रूप्यस्य वर्णमात्रवृत्तिधर्मस्य अतिदेशो नेत्यर्थः। 'ताद्रूप्यस्यातिदेशः' इति षष्ठीसमासानन्तरं नञा समासो विधेयः। **क्षीरपेणेति।** 'पे' इत्यत्र एकाच्त्वन्तु स्वत एव उत्तरपदत्वमतिदेशेन लभ्यम्। विशिष्टे = पूर्वसमुदाये एकोजुत्तरपदत्वं फलितम्, न तु समुदायातिदेशेन लभ्यते इति सुगमः पन्थाः।

यदि च एकाजुत्तरपदत्वं समग्रमतिदेशेन लभ्यम्—इत्याशयोऽग्रिमग्रन्थस्य पर्यालोचनया प्रतीयते, तदा वर्णमात्रवृत्तिधर्मोऽच्त्वं तद्घटितधर्मस्यापि एकाजुत्तरपदत्वस्य कथमतिदेशः स्यात् ?—इति शङ्कायां स्ववृत्तित्वम्, स्ववृत्तिवर्णत्वव्याप्यत्वम्, स्ववृत्तिस्थानिकादेशावृत्तित्वम्—एतत्त्रितयसम्बन्धेन अन्तादिवर्णविशिष्टधर्मघटितधर्मस्यातिदेशो न भवतीति स्वीकारात् न दोषः। तथाहि एकाजुत्तरत्तरपदघटकाच्त्वस्य गुणपदबोध्ये एकादेशेऽपि सत्त्वेन स्वस्थानिके आदेशे अवृत्तिता तस्य अच्त्वस्य नास्ति। अतो वैशिष्ट्याभावात् ताद्रूप्यं न भवतीति।

न च उत्तरपदाद्यच्त्वस्य ताद्रूप्यानतिदेशेन अतिदेशो न सम्भवतीति **परिभाषेन्दुशेखरे** विरोध इति वाच्यम्; स्ववृत्तित्व, स्ववृत्तिवर्णत्वव्याप्यत्व, स्वाभाववत्त्व—एतत्त्रितयसम्बन्धेन स्वविशिष्टधर्मघटितधर्मो नायाति अतिदेशेन। अभावस्य स्वस्थानिकादेशवृत्तित्व स्वनिष्ठाभेदसम्बन्धावच्छिन्नप्रकारतावच्छेदकता (अभेदस्य द्विनिष्ठत्वाभावेन सम्बन्धत्वाभाव इति एतन्मते) सम्बन्धानवच्छिन्ना प्रकारतावच्छेदकता वा तादृशावच्छेदकत्वोभयसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः। एकाजिति एकः अच् यस्मिन् इत्यर्थे बहुव्रीहिणा निष्पन्नः उत्तरपदे विशेषणाय भेदेन। तथा च उत्तरपदनिष्ठविशेष्यतानिरूपिता अभेदसम्बन्धावच्छिन्नाज्निष्ठप्रकारतानिरूपिता अवच्छेदकता अच्त्वनिष्ठा इति तादृशावच्छेदकत्वस्य स्वस्थानिकः आदेशो गुणरूपः एकारः, तस्मिन्नपि अच्त्वमिति उभयसम्बन्धेन स्वभावो नास्ति। अतोऽत्र ताद्रूप्याभावात् निषेधाप्रवृत्तेः दोषाभावात्।

से प्राप्त ऐसादेश नहीं होता; क्योंकि अकारत्व वर्णमात्रवृत्ति धर्म होने के कारण अतिदेश द्वारा लभ्य नहीं है।' इसी प्रकार 'अयजे इन्द्रम्' इस के एकार में गुणपर स्थानी इकारवृत्ति इत्वधर्मातिदेश के द्वारा इन्द्रघटक इकार के साथ 'अकः सवर्णे' इससे दीर्घ नहीं हुआ; क्योंकि इत्व वर्णमात्रवृत्तिधर्म होने से अतिदेशशास्त्र का विषय नहीं है।

'वर्णमात्रवृत्ति धर्म का अतिदेश नहीं होता'—इसमें 'षत्वतुकोरसिद्धः' इसका तुक्ग्रहण प्रमाण है। 'अधीत्य' में दीर्घानन्तर ह्रस्वत्वाभाव के कारण 'ह्रस्वस्य पिति कृति तुक्' सूत्र से तुक् की प्राप्ति न होने से तुक् का सूत्र में उपादान है। तुक् के कर्तव्य में एकादेश की असिद्धता हो जाने से ह्रस्वत्वनिमित्तक तुक् होता है। यदि वर्णमात्रवृत्तिधर्म का भी अतिदेश इष्ट होता तो इसीसे ह्रस्वत्वातिदेश हो जायगा, पुनः असिद्धत्वविधान के लिये किया गया तुक् ग्रहण व्यर्थ

स्थानिवद्भावेन तु नैतल्लभ्यम्, अप्राधान्येनालाऽऽश्रयणात् ।

किञ्च, एकादेशे वर्णयोरेव स्थानित्वं न समुदायस्येति 'भी ई भियः' इत्यादावेकादेशविशिष्टे धातुत्वानापत्तिः; धातुत्वस्यैकादेशस्थानिधर्मत्वाभावात् । आनुमानिका-

---

'स्थानिवत्सूत्रेणैव निर्वाहे 'अन्तादिवच्च' इति सूत्रं नारम्भणीयम्'—इति प्राचोक्तं दूषयति—**स्थानिवद्भावेनेति** । अल्मात्रवृत्तिधर्मः अच्त्वं तद्घटितो धर्मः एकाजुत्तरपदत्वं तस्यातिदेशोऽनल्विधाविति प्रतिषेधः स्यात् । 'अन्तादिवच्च' इति सूत्रस्य तु तत्रापि प्रवृत्तिः—इत्येतत् पूर्वमुपपादितम् । किञ्च, एकादेशस्य स्थानी योऽकारः तद्वृत्ति नोत्तरपदत्वम्, यत्र प-शब्दे उत्तरपदत्वं नासौ एकादेशस्य स्थानी । अनेन एकादेशपूर्वस्थानिघटितसमुदायवृत्तिधर्मस्यातिदेशो भवतीति न दोषः । एवमेव 'भियो हेतुभये षुक्' इति सूत्रे 'भी ई' इत्येवमीकारः प्रश्लिष्यते । तथा च द्वयोरीकारयोर्दीर्घे कृते धातुत्वस्य एकादेशस्थानिद्वयेऽप्यभावात् स्थानिवद्भावेन अतिदेशासम्भवात् 'अचि श्नुधातु०' इति सूत्रेण इयङादेशस्यानुपपत्त्या सूत्रे 'भियः' इति निर्देशासङ्गतिः स्यात् । 'अन्तादिवच्च' इति सूत्रसत्त्वे तु एकादेशपूर्वस्थानि-भीधातुघटकः ईकारः तदन्त्यावयवतानिरूपकसमुदायोऽर्थवान् भीति; तत्पर्याप्तधर्मस्य धातुत्वस्य एकादेशविशिष्टे अतिदेशेन इयङादेशस्योपपत्तेः । न च 'सर्वे सर्वपदादेशाः' इति सिद्धान्तेन वर्णयोः स्थानित्वे शब्दस्यानित्यनापत्तिमूलोक्तेन भी ई इत्यस्य स्थाने भीत्यानुमानिकादेशस्य कल्पनायामपि अन्तर्घटितस्य आदिघटितस्य समुदायस्य स्थानित्वलाभेऽपि एकैकस्य एकादेशपूर्वस्थानिघटितस्य एकादेशपरस्थानिघटितस्य च स्थानिताया लाभात् विशिष्टे समुदाये धातुत्वस्य पर्याप्तत्वाभावात् स्थानिवद्भावस्याप्रसक्तेः निर्देशानुपपत्तेस्तादवस्थ्यात् ।

यदि च, आनुमानिकस्थान्यादेशभावस्थले प्रत्येकस्मिन् स्थानिता स्यात् तदा स्व अश्व इति समुदायस्य स्थाने स्वाश्व इत्यादेशे स्थानिवद्भावेन स्वाश्वशब्दस्य स्वशब्दतया ईरिनि परे 'स्वादीरेरिणोः'इति वृद्ध्यापत्तेः, प्रत्येकस्य स्थानितायाः कथयितुमशक्यत्वात् ।

किञ्च, अभीयादित्यत्र 'अन्तादिवच्च' इत्यनेन पूर्वान्तवद्भावेन एकादेशविशिष्टे उपसर्गत्वं परादिवद्भावेन इणोऽण्त्वमादाय 'एतेर्लिङि' इति सूत्रेण प्राप्तो ह्रस्वादेशः 'उभयत आश्रयणे नान्तादिवत्' इत्यनेन अन्तादिवच्चेत्यस्य प्रतिषेधात् 'अभीयात्' इति सिद्ध्यति । स्थानिवद्भावेन अन्तादिवच्चेत्यस्य गतार्थतायान्तु 'उभयत आश्रयणे' इत्यस्य स्थानिवद्भावस्याप्रतिषेधकत्वात् तत्र ह्रस्वादेशः स्यात् । उभयत आश्रयणे स्थानिवद्भावस्याप्रवृत्तिकल्पनायान्तु प्र अयते इत्यत्र दीर्घानन्तरं 'उपसर्गस्यायतिपरत्वाभावात् 'उपसर्गस्यायतौ' इत्यनेन रेफस्य लत्वं न स्यात् । 'अचः परस्मिन्' इति स्थानिवद्भावस्य

हो जायगा । इसी से वर्णमात्रवृत्तिधर्मातिदेश में अन्तादिवद्भाव की अप्रवृत्ति-कल्पना होती है । अत एव वर्णाश्रय में अन्तादिवद्भाव के प्रतिषेधार्थ आरब्ध वचन का तादरूप्य = वर्णमात्रवृत्ति धर्म का अतिदेश नहीं होता । इसके द्वारा उक्त वचन का खण्डन सङ्गत होता है । अन्त आदि जो वर्ण तन्मात्रवृत्तिधर्म का अतिदेश न होने पर भी वर्णमात्रवृत्तिधर्म से घटित धर्म का अतिदेश होता है । अतः 'क्षीरपेण' इसमें वर्णमात्रवृत्तिधर्म एकाच्त्व से घटित न होने पर भी एकाजुत्तरपदत्व का अतिदेश होने से णत्व की उपपत्ति होती है ।

देशकल्पकवाक्यमन्तादिघटितसमुदायस्यैकादेशघटित आदेश इत्येव, न तु प्रत्येकं तयोः स्थानित्वबोधकम्, तथा सति स्वाश्वशब्दस्य स्थानिवत्त्वेन स्वशब्दतया तत ईरिन्शब्दे वृद्ध्यापत्तेः।

किञ्च, भवत्सम्मतस्य 'उभयत आश्रयणे नान्तादिवत्' इत्यस्यासङ्गतौ भवत्सम्मत 'अभीयात्' इत्याद्यसिद्धिः।

स्थानिवत्त्वं तूभयत आश्रयणे इष्यत एव, अन्यथा 'अचः परस्मिन्' (१।१।५७) इत्यस्याप्युभयत आश्रयणेऽप्रवृत्त्यापत्तौ 'प्लायते' इत्याद्यसिद्धिरिति दिक्।

निर्देशादिति। न च 'कर्त्तरि चर्षि०' (३।२।१८६) इत्यादौ गुणस्य पदद्वय-

---

उभयत आश्रयणेऽपि प्रवृत्तौ तु स्थानिवद्भावेन लत्वं सिध्यति—इत्येतदेव दिक्पर्यन्तमाह ग्रन्थकारः। दिगर्थस्तु टिप्पण्यां प्रदर्शितः सुगमतया न व्याख्यातः।

स्व अश्व इत्यत्र आनुमानिकादेशकल्पने स्व इत्यस्य स्वा, अश्व इत्यस्य स्थाने आश्व, पुनः स्व अश्व इत्यस्य स्थाने स्वाश्व आदेश इति कल्पनायाः भाष्यादौ अदृष्टत्वात् 'उभयत आश्रयणे' इत्यस्य 'स्थानिवदादेशे' इत्येतत्सूत्रमात्रनिषेधकत्वकल्पनं.......... इत्यादि सिद्धयर्थं कल्पनञ्च गौरवग्रस्तमिति शेखरोक्तमेव युक्ततरं प्रतिभाति॥

प्रार्च्छतीत्यत्र प्रनिष्ठं पदत्वं कृतैकादेशे प्रारित्यत्र पूर्वान्तवद्भावेन अतिदिश्य पदान्तत्वात् रेफस्य 'खरवसानयोः' इत्यनेन विसर्गः प्राप्नोति। तद्वारणाय 'उभयथर्क्षु', 'कर्तरि चर्षिदेवतयोः'—इति सूत्रयोः उभयथा ऋक्षेत्यत्र 'आद्गुणः' इत्यनेन गुणे, चर्षीत्यत्रापि तेन गुणे अन्तवद्भावेन पदत्वमादाय विसर्गः सूत्रकृता नैवाकृत, ततोऽन्तवद्भावेन पदान्तत्वमादाय न विसर्ग इति कल्पनया नात्र विसर्ग इति परममूलस्यार्थः।

तत्र शङ्कते—न चेति। उभयथा ऋक्ष, च ऋषि—इत्युभयत्रापि पदद्वयसम्बन्धिनो

स्थानिवद्भाव से 'अन्तादिवच्च' सूत्र गतार्थ नहीं है। अल्मात्रवृत्तिधर्मघटित धर्म के अतिदेश में स्थानिवद्भाव का 'अनल्विधौ' इसके द्वारा प्रतिषेध होता है। 'अन्तादिवच्च' की प्रवृत्ति अल्मात्रवृत्तिधर्मघटित धर्म के तिदेश में भी होती है। अतः स्थानिवद्भाव की अप्रवृत्ति के स्थल में इसकी आवश्यकता होने से गतार्थ नहीं है। अत एव एकाजुत्तरपदत्व का अतिदेश सिद्ध होता है। अल्मात्रवृत्तिधर्म अच्त्व से घटित धर्म के अतिदेश में इसकी प्रवृत्ति न होने पर उक्तार्थ का अतिदेश न होने से 'क्षीरपेण' में णत्व नहीं होगा।

'क्षीरपेण' इसके 'पे' इस में एकाच्त्व स्वतः सिद्ध होने से उत्तरपदत्वमात्र स्थानिवद्भाव के द्वारा लब्ध हो ही जायगा, फिर 'अन्तादिवच्च' सूत्र की आवश्यकता क्या है ? अतः समाधानान्तर देते हैं—किञ्चेति। 'भापयते' इसमें षुक् की व्यावृत्ति के लिये 'भियो हेतुभये षुक्' इस सूत्र में 'भी ई' इस प्रकार ईकार का प्रश्लेष होने से ईकारान्त 'भी' को षुक् होता है, अतः उक्त प्रयोग में षुक् नहीं हुआ। कृतदीर्घ 'भी' का ईकार दीर्घ का स्थानी है, तावन्मात्र में धातुत्व नहीं है; जिस 'भी' समुदाय में धातुत्व है वह भी-समुदाय दीर्घ का स्थानी नहीं है। अतः स्थानिवद्भाव की अप्राप्ति होने से 'भियः' इसमें इयङादेश नहीं होगा। अन्तवद्भाव मानने पर भी-वृत्ति धातुत्व एकादेशविशेष में अतिदेश होने से इयङ् आदेश की उत्पत्ति होती है।

सम्बन्धिवर्णद्वयाश्रितत्वेन बहिरङ्गत्वाद्रेफाभावेन न विसर्ग इति वाच्यम्; गुणस्येव पदद्वयसम्बन्धिरेफस्वरात्मकवर्णद्वयाश्रितत्वेन विसर्गस्यापि तत्त्वात्। परनिमित्तकत्वमप्युभयोः समम्।

किञ्च, कार्यकालपक्षे त्रिपाद्यां तदुपस्थितावपि पूर्वं प्रति परस्यासिद्धत्वादन्तरङ्ग-

---

वर्णस्य गुणे निमित्तत्वाद् गुणो बहिरङ्गः। तथा च बहिरङ्गत्वेन गुणस्यासिद्धत्वात् रेफाभावेन विसर्गाप्राप्त्या निर्देशस्य सङ्गतेर्नोक्तज्ञापकत्वमिति न शङ्क्यम्; विसर्गसूत्रस्यापि रेफस्वर-उभयनिमित्तकत्वेन पदद्वयसम्बन्धिवर्णद्वयनिमित्ततायाः समानत्वेन बहिरङ्गत्वमपि समानमेव। त्रिपाद्यामन्तरङ्गपरिभाषायाः प्रवृत्तिमभ्युपेत्येदं शङ्कासमाधानम्।

वस्तुतस्तु यथोद्देशपक्षे कस्यापि मते त्रिपाद्याम् अन्तरङ्गपरिभाषा न प्रवर्तते। कार्यकालपक्षे तु प्राचीनमते त्रिपाद्यामपि तस्याः परिभाषायाः प्रवृत्तेः स्वीकारादतः तन्मतं निराचिकीर्षुः त्रिपाद्यां कार्यकालेऽपि तस्या अप्रवृत्तिं बोधयितुमाह—**कार्यकालेति**। अन्तरङ्गशास्त्रत्वं परिभाषाया अस्या उपस्थापकं लिङ्गम्। त्रैपादिकेऽन्तरङ्गपरिभाषाया उपस्थितौ त्रैपादिकस्यान्तरङ्गस्य सापादिकबहिरङ्गशास्त्रस्य दृष्ट्या 'पूर्वत्रासिद्धम्' इत्यनेन असिद्धत्वबोधनाद् अन्तरङ्गशास्त्रासत्त्वबुद्ध्या अन्तरङ्गनिरूपितबहिरङ्गत्वबुद्धेरपि पूर्वस्मिन् सूत्रे अभावात्। 'सति अन्तरङ्गे बहिरङ्गम्' इति नियमेन अन्तरङ्गत्वाभावे बहिरङ्गत्वस्य प्रतिपादयितुमशक्यत्वात्। तथा च बहिरङ्गस्यासिद्धत्वबोधनं न सम्भवति।

शंका—आनुमानिक स्थान्यादेशभावपक्ष में शब्द की अनित्यता के परिहारार्थ 'भी ई' इस समुदाय में दीर्घादेश की कल्पना होने से स्थानिवद्भाव की प्राप्ति हो सकती है ?

समाधान—इस पक्ष में भी 'भी ई' के स्थान में 'भी' आदेश की कल्पना होने से विशिष्ट में स्थानिता है, केवल धातुमात्र में नहीं; क्योंकि 'अन्तादिघटित समुदाय को एकादेशघटित आदेश होता है'—इस प्रकार का स्थान्यादेशभाव माना जाता है। इसीलिये 'स्व अश्व' के स्थान में स्वाश्वरूप आनुमानिक आदेश होने पर स्व में 'स्वाश्व' की स्थानिता नहीं हुई। अन्यथा स्वाश्व के उत्तर ईरिन् शब्द का सम्बन्ध रहने पर स्थानिवद्भाव से स्ववृत्ति स्वत्व का स्वाश्व में अतिदेश करने पर 'स्वादीरेरिणोः' इसके द्वारा वृद्धि की आपत्ति हो जायगी। अतः समुदाम में स्थानिता है, प्रत्येक में नहीं। आनुमानिक स्थान्यादेशभावपक्ष में समुदाय में ही स्थानिता मानी जाती है।

दोषान्तर भी देते हैं—**किञ्चेति**। 'अभीयात्' इसमें अभि उपसर्गपूर्वक इण् धातु के आशीर्लिङ् में 'अकः सवर्णे' इससे दीर्घ होने पर पूर्वान्तवद्भाव से उपसर्गत्व और परादिवद्भाव से इण्-धातुत्व के अतिदेश से प्राप्त 'एतेर्लिङि' इस सूत्र से ह्रस्व उभयतः आश्रयण में अन्तादिवद्भाव न होने के कारण प्रवृत्त नहीं होता। इसप्रकार से किया गया ह्रस्व का परिहार 'अन्तादिवच्च' इस के प्रत्याख्यानपक्ष में असङ्गत हो जायगा; क्योंकि 'अन्तादिवच्च' इसके गतार्थ होने के कारण 'उभयतः आश्रयणे नान्तादिवत्'—इसका भी आरम्भ अयुक्त होगा। उभयतः आश्रयण में स्थानिवद्भाव माना गया है। इसलिये ह्रस्व की प्राप्ति होने से 'अभीयात्' इसमें ह्रस्व की आपत्ति

ल० श० शे० १४३

७६. खरवसानयोर्विसर्जनीयः । ८ । ३ । १५ । **खर्यवसाने च परे रेफस्य विसर्जनीयः स्यात् पदान्ते । इति विसर्गे प्राप्ते । अन्तवद्भावेन पदान्तरेफस्य न विसर्गः; 'उभयथर्क्षु' (सू० ३६३०), 'कर्तरि चर्षि-देवतयोः' (सू० ३१६७) इत्यादिनिर्देशात् ।**

भावेन पूर्वस्यान्तरङ्गनिरूपितबहिरङ्गत्वाभात् कथं तस्यासिद्धत्वप्रतिपादनम् । न चानया पूर्वस्यासिद्धत्वादभावेन तं प्रति परासिद्धत्वं 'पूर्वत्र' (८।२।१) इत्यनेन वक्तुमशक्य-मिति वाच्यम्; एवं हि विनिगमनाविरहादुभयोरप्यप्रवृत्तौ विसर्गो दुर्वारः ।

एवञ्च विरोधात् कार्यकालपक्षेऽपि तदनुपस्थितिरेव त्रिपादीस्थेऽन्तरङ्गे उचिता ।

अत एव विसर्जनीयसूत्रे भाष्ये **इमामेव युक्तिमुक्त्वा 'अयुक्तोऽयं परिहारो न वा बहिरङ्गलक्षणत्वात्' इत्युक्तम् ।**

एवञ्च तत्र तत्र वचनान्येव कार्याणि, ज्ञापकानुसरणं वा कर्तव्यम् । अत एव 'निगाल्यते' इत्यादौ लत्वाद्यर्थं 'तस्य दोषः' (का० वा०) इति वचनमेवारब्धम् ।

न च पूर्वसूत्रस्य सापादिकत्वेऽपि बहिरङ्गतया 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यनया परिभाषया त्रैपादिकस्यापि अन्तरङ्गशास्त्रस्य दृष्ट्या तस्यासिद्धत्वबोधनेन बहिरङ्गपूर्वसूत्रदृष्ट्या 'पूर्वत्रासिद्धम्' इत्यत्रत्येन 'पूर्वत्र' इत्यनेन त्रैपादिकस्य अन्तरङ्ग-शास्त्रस्याग्रहणाद् असिद्धत्वं कथं सम्भवतीति वाच्यम्; एवं तर्हि अनयोः कतरस्य पूर्वं प्रवृत्तिरिति निर्णयाभावे असिद्धमिति, पूर्वत्र—इति द्वयोरपि अप्रवृत्त्यापत्तौ प्राच्छंतीत्यादौ विसर्गशङ्कायाः सुस्थत्वात् । अतः ज्ञापनद्वारा शङ्कापरिहार आवश्यकः ।

वस्तुतः साक्षादुच्चारितेन पाणिनिसूत्रेण आनुमानिक्या अन्तरङ्गपरिभाषाया बाधस्यौचित्यात् परिभाषाया अस्याः कस्मिन्नपि पक्षे त्रिपाद्यां न प्रवृत्तिरिति । एवञ्च = विसर्गस्य दुर्वारत्वे च । विरोधात् = उक्तरूपविरोधात् । **पक्षेऽपि इति** । अपिना यथोद्देशपक्षस्य समुच्चयः । अत एव = त्रिपाद्याम् अन्तरङ्गपरिभाषाया अप्रवृत्ति-स्वीकारादेव । विसर्जनीयसूत्रे = 'खरवसानयोर्विसर्जनीयः' इति सूत्रे । **इमामेवेति** । 'विनि-गमनाविरहादुभयोरपि अप्रवृत्तौ' इत्याद्युक्तां युक्तिमित्यर्थः । एवञ्च बहिरङ्गपरिभाषया विसर्गवारणमयुक्तमेव । भाष्यकृता तत्र दोषपरिहारार्थं वचनानि आरब्धानि, नतु परि-भाषया दूषणानि परिहृतानि ।

अत एव = परिभाषायाः त्रिपाद्यामप्रवृत्तिस्वीकारादेव । **'निगाल्यते'** इत्यादौ

दुर्निवार है । उभयतः आश्रयण में स्थानिवद्भाव की अप्रवृत्ति मानने पर 'प्लायते' इसमें सवर्ण दीर्घ के अनन्तर 'उपसर्गस्यायतौ' इससे लत्व नहीं होगा । 'अचः परस्मिन्' से स्थानिवद्भाव के द्वारा 'प्रा' इसमें उपसर्गत्व, आय इसमें आय धातुत्व के अतिदेश से लत्व होता है । उभयतः आश्रयण में स्थानिवद्भाव की अप्रवृत्तिकल्पना विनिगमताविरह से दोनों में समान ही होगी ।

सूत्रारम्भ की अपेक्षा टिप्पणीकार की सूत्रप्रत्याख्यानप्रक्रिया गुरुतर तथा काल्पनिक होने से संग्राह्य नहीं है ।

शङ्का—निर्देशादिति । 'उभयथर्क्षु' एवं 'चर्षि' इसमें 'आद्गुणः' इससे विहित गुण, पदद्वय

लोपानन्तरमच्त्वाभावात् लत्वस्याप्रवृत्तौ स्थानिवद्भावः प्रार्थ्यते। स्थानिवद्भावस्य च 'पूर्वत्रासिद्धीये न स्थानिवत्' इति वचनेनैव व्यावृत्तौ प्राप्तायां 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु प्रतिषेधात्' इत्यनेन तस्य प्रतिप्रसवेन (निषेधस्य निषेधः = प्रतिप्रसवः) निर्विरोधं स्थानिवद्भावस्य प्रवृत्त्या अच्परत्वात् लत्वं सिध्यति। बहिरङ्गपरिभाषायाः त्रिपाद्यामपि प्रवृत्तौ अन्तरङ्गलत्वापेक्षया बहिरङ्गस्य णिलोपस्य असिद्धत्वेन लत्वस्य सिद्ध्या 'तत्र दोषः संयोगादिलोप' इत्यादिवचनारम्भो निष्प्रयोजनः स्यात्।

सम्बन्धी वर्णद्वय को निमित्त मानकर जायमान है। अतएव बहिरङ्ग होने से अन्तरङ्ग विसर्ग की दृष्टि से असिद्ध होने के कारण रेफाभाव से विसर्ग की प्राप्ति नहीं है। अतः उक्त निर्देश ज्ञापक नहीं हो सकता ?

समाधान—'खरवसानयोः' इस सूत्र का भी खर निमित्त है। अतः पदद्वय के वर्ण की निमित्तता दोनों सूत्रों की समान ही है। गुण और विसर्ग की परत्वनिमित्तता भी समान ही है। अतः असिद्धता न होने से निर्देश की ज्ञापकता अक्षुण्ण है। त्रिपादी में अन्तरङ्गपरिभाषा की प्रवृत्ति न होने से विसर्गविधायक त्रिपादीशास्त्र की दृष्टि से गुण की असिद्धता इस कारण से भी नहीं हो सकती।

शङ्का—यथोद्देशपक्ष में सपादसप्ताध्यायीस्थ 'वाह ऊठ्' सूत्र से अन्तरङ्गपरिभाषा के ज्ञापित होने से परिभाषा भी सपादसप्ताध्यायीस्थ है। अतः इसकी दृष्टि में त्रैपादिक अन्तरङ्गशास्त्र असिद्ध होने से परिभाषोपस्थापक अन्तरङ्गशास्त्रत्वरूप लिङ्ग ही नहीं है। अतः परिभाषोपस्थिति के न होने पर भी, कार्यकालपक्ष में परिभाषा का वही देश माना जाता है जहाँ स्वोपस्थापक लिङ्ग होने से परिभाषा उपस्थित होती है। इस प्रकार परिभाषा का त्रैपादिक अन्तरङ्गशास्त्र का ही देश होने से परिभाषा की दृष्टि से अन्तरङ्गशास्त्र असिद्ध नहीं है। अतः परिभाषा की प्रवृत्ति में कोई बाधक नहीं है ?

समाधान—पूर्व बहिरङ्गशास्त्र की दृष्टि में 'पूर्वत्रासिद्धम्' के द्वारा त्रैपादिक अन्तरङ्गशास्त्र की असिद्धता होने से अन्तरङ्गशास्त्र ज्ञापनाभाव के कारण अन्तरङ्गनिरूपित बहिरङ्गत्व का ज्ञान भी बहिरङ्गशास्त्र में नहीं है। अतः इस पक्ष में भी परिभाषा से बहिरङ्गशास्त्र की प्रसिद्धता का अतिपादन नहीं हो सकता।

शङ्का—अन्तरङ्गपरिभाषा के द्वारा पूर्वशास्त्र की बहिरङ्ग होने से असिद्धता हो जाने पर पूर्वशास्त्र का अभाव है। अतः 'पूर्वत्रासिद्धम्' इसकी उपस्थिति द्वारा पूर्वापेक्षया पर त्रिपादी के असिद्धत्व का प्रतिपादन नहीं हो सकता ?

समाधान—इस प्रकार अन्तरङ्गपरिभाषा से पूर्वशास्त्र की असिद्धता प्रयुक्त ज्ञानाभाव के कारण 'पूर्वत्रासिद्धम्' इसकी प्रवृत्ति का प्रतिबन्ध, अथवा 'पूर्वत्रासिद्धम्' इसके द्वारा अन्तरङ्ग त्रैपादिक के असिद्धत्व के कारण तन्निरूपित बहिरङ्गत्वाभावप्रयुक्त अन्तरङ्गत्वाभाव से अन्तरङ्ग परिभाषा की प्रवृत्ति का प्रतिबन्ध इनमें से किसी एक की कल्पना का निर्णायक प्रमाण नहीं है। अतः दोनों की प्रवृत्ति न होने से विसर्ग की प्राप्ति सुलभ है। इस प्रकार विरोध के कारण कार्यकालपक्ष में भी परिभाषा की प्रवृत्ति त्रिपादी में नहीं होती।

अन्यथाऽन्तरङ्गत्वात् णिलोपात् पूर्वं वैकल्पिकलत्वे चक्रयत्र, माषवपनीत्यादौ बहिरङ्गा-सिद्धत्वेन च सिद्धे तद्वैयर्थ्यं स्पष्टमेव ।

एवं 'चक्रयत्र' इत्यत्र पदान्ते ककार-रेफ-यकाराणां संयोगः । तत्र आदिभूतस्य ककारस्य 'स्कोः संयोगाद्योरन्ते च' इत्यनेन प्राप्तो लोपः स्थानिवद्भावेन वार्यते । ईकारस्य स्थानिवद्भावेन अतिदेशात् संयोगस्य पदान्तत्वाभावात् । स्थानिवद्भावस्य 'पूर्वत्राऽसिद्धीये' इत्यनेन प्रतिषेधः प्राप्तः, तस्य निषेधाय 'संयोगादिलोप' इत्यादि वचन-मारब्धम् । असिद्धपरिभाषया सिद्धे संयोगादिलोपोपादानस्य वचने वैयर्थ्यप्रसङ्गः ।

तथा **माषवपनी**त्यत्र 'प्रातिपदिकान्तनुम्विभक्तिषु च' इत्यनेन प्रातिपदिकान्त-त्वात् नकारस्य प्राप्तं णत्वम् अकारलोपस्य स्थानिवद्भावान्न भवति । 'पूर्वत्रासिद्धीये' इति प्राप्तं स्थानिवद्भावप्रतिषेधं 'तस्य दोष' इत्यादिना प्रतिप्रसूयते । अन्तरङ्ग-परिभाषया सिद्धे प्रतिप्रसवविधानस्य वैयर्थ्यम् ।

'चक्रयत्र' इत्यत्र यणादेशस्य पदद्वयसम्बन्धिनोः वर्णयोः अपेक्षणात् बहिरङ्गता । 'निगाल्यते' इत्यत्र 'णेरनिटि' इत्यनेन आर्धधातुकं बहिर्भूतमपेक्ष्यते, अतः 'अचि विभाषा' इत्यपेक्षया बहिरङ्गत्वम् । 'माषवपनी' इत्यस्य माषा उप्यन्ते अस्यामित्यर्थे वप्धातोर्ल्युटि तस्य अनि, ङीपि, 'यस्येति च' इति अकारस्य लोपे च सिद्धिः । ङीब्घटकेकारनिमित्तक-स्य अकारलोप्स्य प्रातिपदिकान्तणत्वापेक्षया बहिरङ्गत्वम् । परिभाषया सिद्धे वचन-स्य वैयर्थ्यात् त्रिपाद्यां परिभाषाया अप्रवृत्तिरेव युक्ता ।

भाष्यकार ने भी 'एवं हि' इत्यादि पंक्तियों से पूर्व उल्लिखित युक्तियों के द्वारा बहिरङ्ग परिभाषा से त्रिपादी में परिहार को अयुक्त कहा है । ऐसी दशा में 'विसर्जनीयस्यानुत्तरपदे' इस वचन के द्वारा अथवा ज्ञापन से विसर्ग का परिहार उचित है । अतएव 'निगाल्यते' में लत्वार-विधानार्थ 'तस्य दोषः' इस वचन का आरम्भ है । अन्यथा लत्वविधायक अन्तरङ्ग शास्त्र की णिलोप की अपेक्षा प्रथम प्रवृत्ति होने से स्थानिवद्भाव के लिये उक्त वचन का आरम्भ व्यर्थ हो जायगा । एवं 'चक्रयत्र' इसमें संयोगिलोप की दृष्टि से पदद्वयसम्बन्धी वर्णद्वय की अपेक्षा करने वाला यण् बहिरङ्ग होने से असिद्ध हो जायगा । इसी से संयोगादिलोप की प्राप्ति नहीं हो सकती; क्योंकि पदान्त में इकार के कारण संयोग नहीं है । इसकी व्यावृत्ति के लिये स्थानिवद्भाव को आवश्यक मान कर 'पूर्वत्रासिद्धीये' इस वचन के द्वारा प्राप्त स्थानिवद्भाव-प्रतिषेध का प्रतिप्रसव (=प्रतिषेध) 'तस्य दोषः' इस वार्तिक से करने की आवश्यकता नहीं थी । तथा 'माष-वपनी' इसमें अकारलोप के स्थानिवद्भाव से नकार में प्रातिपदिकान्तत्व के न होने से 'प्राति-पदिकान्तनुम्विभक्तिषु च' इसके द्वारा णत्व नहीं हुआ । 'पूर्वत्रासिद्धीये' इससे प्राप्त स्थानिवत्त्व-प्रतिषेध के प्रतिषेध के लिये 'तस्य दोषः' इसमें णत्वोपादान है । यदि त्रिपादी में अन्तरङ्गपरि-भाषा की प्रवृत्ति इष्ट होती तो णत्व की दृष्टि में बहिरङ्ग अकारलोप के असिद्ध हो जाने के कारण णत्व की अप्राप्ति से उक्त प्रयोग की सिद्धि हो जाती है । अतः 'तस्य दोषः' इस वचन में णत्वोपादान का वैयर्थ्य हो जायगा ।

उपसर्गेणैव धातोराक्षेपे सिद्धे 'धातौ' इति योगविभागेन पुनर्वृद्धिविधानार्थम् ।

यत्तु लक्ष्यानुरोधात् कार्यकालपक्षे उपस्थितयाऽन्तरङ्गपरिभाषयाऽनुमानिक्या प्रत्यक्षसिद्धस्यापि 'पूर्वत्र' (८ । २ । १) इत्यस्य बाध इति, तन्न लक्षणैकचक्षुषामाचरणीयम् । अत एव 'उरण्' (१ । १ । ५१) इति सूत्रे 'रेफस्य पूर्वान्तवत्त्वे विसर्जनीयप्रतिषेधो वक्तव्यो नार्कुटाद्यर्थम्' इत्युक्तं भाष्ये इति दिक् ॥

उपसर्गेणैवेति । तत्संज्ञायाः क्रियायोगनिमित्तत्वादित्यर्थः । यदर्थे क्रियारूपे

पुनः शङ्कते—यत्तु इति । लक्ष्यसिद्ध्यनुरोधात् सूत्रकारेण साक्षात् पठितस्य श्रोत्रेन्द्रियप्रत्यक्षगोचरस्यापि 'पूर्वत्रासिद्धम्' इति सूत्रस्य 'वाह ऊठ्' इति ज्ञापितया अर्थापत्तिप्रमाणलब्धया अनुमितिसिद्धया वा अन्तरङ्गपरिभाषया बाधः स्यात् । तथा च 'पूर्वत्रासिद्धम्' इत्यस्याप्रवृत्तौ पूर्वदृष्ट्या त्रैपादिकस्य अन्तरङ्गस्य असिद्धत्वाभावेन अन्तरङ्गबहिरङ्गभावस्य निष्प्रत्यूहं सिद्धतया कार्यकालपक्षे त्रिपाद्यामपि तस्याः परिभाषायाः प्रवृत्तिः सिध्यति इति यदुक्तम्, तन्न लक्षणैकचक्षुष्काणामस्माकं सूत्रेणैव लक्ष्यस्य सिद्धिं जानतां कथमिदमिष्टमनिष्टं वेति निर्णयः कर्तुं शक्यः सूत्राणामभावे । लक्ष्यैकचक्षुषः सूत्रं विनाऽपि इष्टानिष्टयोः निर्णयं कर्तुं शक्नुवन्ति । तस्मान्नेदं कथनं युक्तम् । चक्षुषामिति मूले सम्बन्धसामान्यविवक्षायां 'शेषे षष्ठी' इति षष्ठी । 'कृत्यानाम्' इत्यस्य उभयप्राप्तौ प्रवृत्तिरिति नात्र प्रवृत्तिः । 'उरण्' इति सूत्रे' इत्यस्य भाष्ये इत्यनेनान्वयः । अत एव = त्रिपाद्यामप्रवृत्तेरेव । नृकुटस्यापत्यं नार्कुटः, नृपतेरपत्यादिकं नार्पत्यम् इत्यादौ विसर्गवारणाय 'विसर्जनीयोऽनुत्तरपदे' इति वचनमारब्धम् ।

तत्संज्ञायाः = उपसर्गसंज्ञायाः । जन्यबोधविषयीभूतक्रियाविशेषविषयकतात्पर्य-

---

शंका—लक्ष्यानुरोध से 'वाह ऊठ्' के द्वारा ज्ञापित अतएव आनुमानिक अन्तरङ्गपरिभाषा के द्वारा साक्षात् उच्चरित 'पूर्वत्रासिद्धम्' इसका बाध होने के कारण कार्यकालपक्ष में भी अन्तरङ्गशास्त्रदेशस्थ परिभाषा बहिरङ्ग सिद्धत्व का प्रतिपादन त्रिपादी में कर सकती है ?

समाधान—लक्षण के द्वारा लक्ष्य के साधुत्व का ज्ञान करने वालों (लक्षणैकचक्षुष्कों) को सूत्रप्रवृत्ति से पहले साधुत्वासाधुत्व का विवेक दुर्लभ है । अतः लक्ष्यानुरोध से किसी वस्तु का निर्णय असम्भव है । अतएव भाष्यकार ने 'नार्कुटः' 'नार्पत्यः'—इन प्रयोगों में पूर्वान्तवद्भाव से पदान्तत्वातिदेश मानकर प्राप्त विसर्ग का वारण वचनारम्भ के द्वारा किया ।

उपसर्गेणैवेति । उपसर्गसंज्ञा क्रियायोग में ही होती है ।

शङ्का—'उपसर्गाः क्रियायाम्' इस प्रकार के सूत्रनिर्देश में लाघव है, इसकी उपेक्षा कर 'योग' शब्द का उपादान क्यों किया ?

समाधान—जिस धात्वर्थ क्रिया के साथ जिस उपसर्ग का सम्बन्ध विवक्षित है, उसी धात्वर्थ क्रिया के प्रति प्रादि की उपसर्गसंज्ञा होती है, इसके लाभार्थ योग-ग्रहण है—इस अर्थ के स्वीकार करने से ही प्रगतः ऋद्धः इस तात्पर्य से प्रयुक्त 'प्रर्द्धः' इसमें वृद्धि नहीं हुई; क्योंकि गम् धात्वर्थ के साथ योग होने से गम् धात्वर्थ क्रियानिरूपित उपसर्गत्व है । ऋकारादि ऋध

तेन 'ऋत्यकः' (९२) इति पाक्षिकोऽपि प्रकृतिभावोऽत्र न भवति ।

७७. वा सुप्यापिशलेः । ६ । १ । ९२ । **अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ परे वृद्धिर्वा स्यात् ।**

प्रादीनामन्वयस्तं प्रत्येवोपसर्गत्वमिति भावः । प्रकृते च प्रत्यासत्त्या ऋकारादिनिमित्तोपसर्गग्रहणात् प्रगतः ऋद्धः 'प्रर्द्धः' इत्यत्र न ।

पुनरिति । **प्रकृतसूत्रे** भाष्ये **स्फुटमेतत् ।**

सुब्धाताविति । **सुबन्तप्रकृतिके धातावित्यर्थः । तुल्यास्यसूत्रे उपार्कारीयतीत्यादेरेतदुदाहरणत्वस्य** भाष्ये **उक्तत्वात् । शास्त्रे सुबन्तस्य धातुप्रकृतित्वेनोक्ततया**

ग्राहकत्वे सति प्राद्यन्यतमत्वम् उपसर्गत्वम् । जन्यः = उत्पाद्यो यो बोधः, तद्विषयीभूतो यः क्रियाविशेषः, तद्विषयकतात्पर्यस्य ग्राहकत्वमित्यर्थः । जन्यता च बोधनिष्ठानिरूपकतया विवक्षिता इत्याकांक्षायां क्रियाविशेषबोधस्य धातुजन्यतया जनकत्वेन धातोराक्षेपेण लाभात् । धातुनिष्ठजनकतानिरूपितजन्यतावद्बोधविषयीभूतक्रियाविशेषनिष्ठकतात्पर्यग्राहकत्वे सति प्राद्यन्यतमत्वस्योपसर्गपदार्थतया धातोः संग्रहात् 'उपसर्गादृति धातौ' इति सूत्रे क्रियमाणं धातुपदं योगविभागेन पुनर्वृद्धिविधानाय कल्पते । प्रादीनां यद्धातुजन्यबोधविषयीभूतक्रियाविशेषस्य तात्पर्यग्राहकत्वं तद्धात्वर्थनिरूपितमेव उपसर्गत्वम्—इति स्वीक्रियते । तथा च प्रकृते 'प्रगतः ऋद्धः' इत्यत्र गम्-धात्वर्थनिरूपितोपसर्गत्वस्य सत्त्वेऽपि ऋधु-धात्वर्थनिरूपितोपसर्गत्वस्याभावात् न 'प्रर्द्धः' इत्यत्र वृद्धिः । न च 'आटश्च' इत्युपसर्गस्य चारितार्थ्यमिति वाच्यम्; तत्रैव धातुग्रहणे कर्तव्ये अत्र सूत्रे तदुपादानेन तादृशार्थकल्पनात् ॥

वा सुप्यापिशलेः इति ॥ अस्य 'सुबन्ते धातौ' इत्यर्थे विवक्षिते ऋदिति सौत्रःस्य

धात्वर्थ के प्रति योग न होने से तन्निरूपित नहीं है । प्रकृत सूत्र में प्रत्यासत्ति से ऋकारादि धातु की जो क्रिया है उसी के प्रति उपसर्गत्व होना चाहिये ।

शङ्का—उपसर्गसंज्ञा का क्रिया के योग में ही विधान होने से क्रियायोग के विना उपसर्ग होना असम्भव है । अतः क्रियायोग के विना अनुपपन्न उपसर्गत्व क्रियावाचक धातु का आक्षेपक होगा । इस प्रकार लब्ध धातु का सूत्र में उपादान क्यों किया ?

समाधान—धातु-पद योगविभाग के द्वारा पुनः वृद्धि-विधानरूप फलान्तर के लिये है । अतः 'ऋत्यकः' इस सूत्र से पक्ष में प्राप्त प्रकृतिभाव का बाध सिद्ध हुआ । 'न माङ्योगे' इस सूत्र के भाष्य में धातु-ग्रहण को 'आटश्च' इसके लिये उत्तरार्थक कहा है । इस प्रकार उक्तार्थ भाष्य से सम्मत नहीं है । अतः लिखा—'प्रकृत सूत्र के भाष्य में इस अर्थ को स्पष्ट किया गया है' । यदि धातुग्रहण उत्तरार्थ ही होता तो उसी सूत्र में इसका ग्रहण करना था, यहां निर्देश क्यों किया । इसका यहां ग्रहण योगविभाग द्वारा पुनः वृद्धिविधानार्थ है । अत एव 'धातोरित्युभयोः शेषः'—ऐसा भाष्यकार ने कहा ।

सुब्धातौ इति । 'उपार्कारीयति' इत्यादि भाष्योदाहरण के देखने से 'सुब्धातौ' इस पद का सुबन्तप्रकृतिक क्यजादिघटित धातु—इस प्रकार का अर्थ विवक्षित है । शास्त्र में धातु-

आपिशलिग्रहणं पूजार्थम् । प्रार्षभीयति, प्रर्षभीयति । सावर्ण्याद् लृवर्णस्य ग्रहणम् । प्राल्कारीयति, प्रल्कारीयति । तपरत्वाद्दीर्घो न । उपऋकारीयति, उपर्कारीयति ।

७८. एङि पररूपम् । ६ । १ । ९४ । आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात् । प्रेजते । उपोषति ।

तत्प्रकृतिके इति व्याख्यानमेवोचितम् । ऋषभस्य समीपमुपर्षभं तदिच्छति उपर्षभीयतीत्यत्र तु न वृद्धिः; उपेत्यस्यानुपसर्गत्वात् । अत्रापि 'धातौ' इत्यनुवर्त्य वाक्यभेदेन व्याख्येयम्, तेन सुब्धातावपि न प्रकृतिभावः ।

प्रार्षभीयतीति । अत्र 'शरोऽचि' (८ । ४ । ४९) इत्यस्यानुपन्यासेन व्यञ्जनात्परस्यैकस्यानेकस्य वोच्चारणे विशेषाभावेन 'अचो रहाभ्याम्' (८ । ४ । ४६) इत्यस्य तन्निषेधस्य चानावश्यकता सूचिता ॥

धातोः क्विपि सुपि च निष्पन्ने, धातोः सुबन्ततायाः सम्भवेन एतादृशे एव प्रयोगे अनेन वृद्धिः स्यात् । अत आह—सुबन्तेति । सुबन्तप्रकृतिके ऋकारादिधातौ इत्यर्थः । सुबन्तप्रकृतिकक्यजादिघटिते ऋकारादिधातौ इति निष्कर्षः । तुल्यास्यसूत्रस्य उपार्कारीयतीत्युदाहरणं पूर्वोक्तार्थस्वीकारे मानम् । सुबन्तावयवे इति कुतो नोच्यते? अत आह—शास्त्रे इति ।

धातुप्रकृतिकत्वेन = धातुसंज्ञाप्रयोजकक्यजादिप्रकृतिकत्वेन इत्यर्थः—इति भट्टाः । सुबन्तस्य धातुसंज्ञाप्रयोजकक्यजादिप्रकृतित्वेन व्यवहारात् नापूर्वकल्पनाऽपि ।

क्रियायोगे एव प्रादीनामुपसर्गसंज्ञाविधानात् 'ऋषभस्य समीपम्' अत्रार्थे प्रयुक्तस्य उपशब्दस्य उपसर्गप्रतिरूपकत्वेऽपि उपसर्गत्वाभावात् ततः क्यचि न सूत्रस्य प्रवृत्तिः ॥

एङि पररूपम् इति ॥ सूत्रे 'एवे चानियोगे' इति पठ्यते । अत्र 'वाच्यः', 'वक्तव्यः'

संज्ञा प्रयोजक जो क्यच् आदि प्रत्यय, उनकी प्रकृति सुबन्त को ही कहा गया है । अतः सुब्धातु उस अर्थ का बोधक है । ऋषभस्य समीपम् उपर्षभम्, तमिच्छति इस अर्थ में निष्पन्न उपर्षभीयति इसमें वृद्धि नहीं होती है । क्योंकि उप का ऋषभ के साथ अन्वय विवक्षित है; क्यजन्त ऋषभीय इसके साथ अन्वय विवक्षित नहीं है । ऋषभ क्रियावाचक न होने से उसके योग में 'उप' उपसर्गसंज्ञक नहीं है । यहां उपसर्ग प्रतिरूपक है । 'वा सुप्यापिशलेः' इस सूत्र में भी धातु पद की अनुवृत्ति और वाक्यभेद से व्याख्या इष्ट है । अतः पुनः वृद्धिविधान-सामर्थ्य से 'उपर्कारीयति' में पक्ष में 'ऋत्यकः' इससे प्रकृतिभाव नहीं होता ।

'प्रार्षभीयति' इसमें 'अचो रहाभ्यां द्वे' इसके द्वारा प्राप्त द्वित्व तथा द्वित्व के प्रतिषेधार्थ 'शरोऽचि' इनका उपन्यास यहां आवश्यक था । किन्तु व्यञ्जन वर्ण के उत्तर एक या अनेक वर्णों के उच्चारण में कोई विशेष नहीं है—एतद्-बोधनार्थ उन सूत्रों का उपन्यास नहीं किया ॥

एङि पररूपम् ॥ इस सूत्र में 'वा सुप्यापिशलेः' इस सूत्र से 'वा सुपि' इसकी अनुवृत्ति है ।

इह 'वा सुपि' इत्यनुवर्त्य वाक्यभेदेन व्याख्येयम् । तेनैङादौ, सुब्धातौ वा । उपेडकीयति, उपैडकीयति । प्रोघीयति, प्रौघीयति ।

'एवे चानियोगे' (वा०) । नियोगः = अवधारणम् । क्वेव भोक्ष्यसे । अनवक्लृप्तावेवशब्दः ।

'अनियोगे' किम् ? तवैव ।

७९. अचोऽन्त्यादि टि । १ । १ । ६४ । **अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् ।**

वाक्यभेदेनेति । **इदं वृत्तौ स्पष्टम्, भाष्ये तु न दृश्यते । 'एवे च' (का० वा०) इति वार्तिकं सूत्रे धाताविलत्यनुवृत्तेरारब्धम् । अवधारणम् = नियमः । एवशब्दस्य द्योत्यमर्थद्वयमवधारणमसम्भवरूपानवक्लृप्त्यादि च, तयोरन्त्योऽत्र एवशब्दार्थ इत्यभिप्रेत्याह— अनवक्लृप्तावेवेति । 'क्वेव भोक्ष्यसे' इत्युक्तेः स्थलसङ्कीर्णत्वादिना नास्ति सम्भवस्तव भोजनस्येति गम्यते ॥**

अचोऽन्त्यादि टि (१ । १ । ६४) । **अच इति निर्धारणे षष्ठी । अन्ते भवोऽन्त्यः ।**

इत्यादिपदानामनिर्देशात् सूत्रत्वभ्रमो मा भूत्, अत आह—**वार्तिकमिति । धाताविति ।** मण्डूकप्लुत्यानुवृत्तिः । **द्योत्यमिति ।** निपातानां द्योतकत्वाभिप्रायेण । असम्भव इति अनवक्लृप्तेरेव विशेषणम् ॥

अचोऽन्त्यादि टि ।। अत्र 'अचः' इति न पञ्चम्यन्तम्, किन्तु 'यतश्च निर्धारणम्' इति विहितषष्ठ्यन्तम् । निर्धारणे बहुवचनस्यौचित्येऽपि सौत्रत्वादेकवचनम् । एतदनुसृत्य परम-मूले व्याख्यातम्—अचां मध्ये इति । अन्ते भवोऽन्त्यः । अन्त्यशब्दस्य अन्त्यावयववाचकत्वेन अवयविनि साकाङ्क्षतया साकाङ्क्षमसमर्थमिति रीत्या असमर्थत्वात् अन्त्य आदिर्यस्येति बहुव्रीहिरनुपपन्नः ?—इति शङ्कां हृदि निधाय आह—गमकेति । गुरोः कुलं गुरुकुलमित्यत्र यथा गुरुत्वस्य यत्किञ्चिन्निरूपितत्वेन नित्यसाकाङ्क्षतया देवदत्तस्य गुरुकुलमत्र समस्तैकदेशपदार्थेऽपि देवदत्तस्यान्वयो भवति, तथैव इहापि अवयवत्वस्य यत्किञ्चिन्निरूपितस्यैव

उसकी वाक्यभेद के द्वारा व्याख्या करने से एङादि सुब्धातु में विकल्प से पररूप के विधान की चर्चा वृत्ति-ग्रन्थ में होने पर भी भाष्य में इस प्रकार का व्याख्यान नहीं है । इस सूत्र में धातु-पद की अनुवृत्ति होने से एङादि धातु के परवर्ती रहने पर पररूप की प्राप्ति है । अतः 'एव' शब्द के परवर्ती होने पर अप्राप्त पररूप के विधानार्थ 'एवे च' इस वार्तिक का आरम्भ है । नियोग = निश्चय, इससे भिन्न अनियोग = अनिश्चय । असम्भवरूप एव शब्द का नियम और असम्भवरूप अनवक्लृप्ति—ये दोनों द्योत्य अर्थ हैं । इसमें नियम से भिन्न जो द्वितीय अर्थ है उसी अर्थ में 'एव' शब्द के प्रयोग में पररूप का विधान है । 'स्थान की सङ्कीर्णता से यहां बैठकर भोजन करना असम्भव है'—इस आशय से 'क्वेव भोक्ष्यसे' इस वाक्य का प्रयोग है ॥

अचोऽन्त्यादि टि ।। एतत्सूत्रघटक अच् पद में 'यतश्च निर्धारणम्' इस सूत्र से निर्धारण अर्थ

'शकन्ध्वादिषु पररूपं वाच्यम्' (वा०) तच्च टेः । शकन्धुः । कर्कन्धुः । कुलटा ।

'सीमन्तः केशवेशे' (वा०) । सीमान्तोऽन्यः । मनीषा । हलीषा । लाङ्गलीषा । पतञ्जलिः ।

'सारङ्गः पशुपक्षिणोः' (ग०) । साराङ्गोऽन्यः । आकृतिगणोऽयम् । मार्तण्डः ।

अन्त्यादीति गमकत्वाद् बहुव्रीहिः । मार्त्तण्ड इति । **मृताण्डादागतो मार्त्तण्डः । अण्विषये एव पररूपम् ।**

ननु मार्त्तशब्दान्त्याच्-तकारकारः; स आदिर्यस्येत्यन्यपदार्थो दुर्लभ इति चेत् ?

सम्भवेन नित्यसाकाङ्क्षस्यापि समासः । 'सविशेषणानां वृत्तिर्न', 'पदार्थः पदार्थेनान्वेति' इति नियमो नित्यसाकाङ्क्षेतरविषयक इति न दोषः ।

अण्-प्रत्ययस्य सम्भावनायामेव, न तु अणि कृते 'शकन्ध्वादिषु पररूपं वाच्यम्' इत्यस्य प्रवृत्तेरिष्टतया अण उत्पत्तेः प्रागेव पररूपे कृते मृतण्डशब्दादण् प्रत्ययः । अत एवोक्तं विग्रहे—**मृतण्डादागत** इति । **अण्विषये** इति । विषयता च भावित्वेन । अणि आदिवृद्धौ मार्तण्डः = सूर्यः । अत्र विग्रहे 'आगतः' इति कथनेन पूर्वसिद्धस्यैव अभिव्यक्तिः सिध्यति । 'भवः' इत्यर्थे तु उत्पत्तिः दर्शिता स्यात् । आगमनन्तु पूर्वसिद्धस्यैव भवतीति विशेषः । 'बुधशापवशाद् अदितेर्गर्भो निश्चेतनो मृतः, बहिर्निःसृतस्तु चैतन्यं प्राप्तवान्'—इति व्युत्पत्तिः महाभारते मोक्षधर्मेषु प्रदर्शिता । अण्डम् = ब्रह्माण्डम् ।

ननु मार्तशब्दघटको यस्तकाराकारः स आदिभूतोऽवयवो यस्य समुदायस्य तादृशः समुदायोऽत्र दुर्लभः । यदि तकाराकारात् परोऽन्यः कश्चिद् वर्णः स्यात् तदा तत्समुदायस्य अयमकार आद्यवयवः स्यात् । यथा मनीषा=बुद्धिः । अत्र अचां मध्ये अन्त्योऽच् नकारोत्तरसकारः स आद्यवयवो यस्य समुदायस्य स समुदायः अस् इति, तस्य टिसंज्ञायां तस्य पररूपं भवति । तथेह नास्ति; अकारात् परस्य वर्णस्याभावात् । अतः अन्त्यावयवसहितो वर्णान्तघटितः समुदायोऽत्र नास्ति । इत्याशङ्कायास्तात्पर्यम् ।

में षष्ठी है । सूत्रघटक होने से एकवचनान्त भी साधु है । निर्धारण में बहुवचनान्त होना चाहिये ।

शंका—अन्त्यादि शब्द में 'अन्त्यः आदिर्यस्य' ऐसा बहुव्रीहिसमास नहीं हो सकता । क्योंकि अन्त्य शब्द अवयववाचक होने से अवयवी में साकांक्ष है । साकाङ्क्ष को असमर्थ माना गया है ?

समाधान—नित्य साकांक्ष शब्द में उक्त नियम नहीं है । नित्य साकाङ्क्ष का समास, तथा समासोत्तर पदार्थैकदेश में अन्वय—दोनों ही माना गया है । अतः समास होने में बाधा नहीं है । 'मृतण्डाद् आगतः' इस विवरण वाक्य में भी पररूप होने से 'मृताण्डात्' ऐसा प्रयोग नहीं हुआ । 'अण् विषय में अर्थात् अण् की सम्भावना में पररूप होता है'—ऐसी व्याख्या करने से यहाँ भी पररूप की सिद्धि होती है ।

न; एकस्मिन्नेव समुदायरूपत्वारोपेण तदवयवत्वारोपेण च तदुपपत्तेः। एतन्मूलकमेव 'व्यपदेशिवदेकस्मिन्' इति पठ्यते इत्यलम्।

वस्तुत आरोपस्य नात्रोपयोगः। 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' (यो० सू० १-९) इति पतञ्जल्युक्तेरर्थाभावेऽपि विकल्पात्मकं ज्ञानमत्र, तदपि लक्ष्यानुरोधाच्छास्त्रप्रवृत्त्युपयोगीति बोध्यम्।

समाधातुश्चायमाशयः—एकस्मिन्नेव पुत्रे यथा अयमेव ज्येष्ठः पुत्रः अयमेव कनिष्ठोऽयमेव मध्यम इति व्यवहारो भवति, तथैवात्रापि एकस्मिन्नेव तकाराकारे समुदायत्वं तदवयवत्वञ्चारोप्य अन्त्यादित्वव्यवहार उपपादनीयः। तथा च पठ्यते—'व्यपदेशिवदेकस्मिन्'। तथा च यत्र यो धर्मो नास्ति तत्र स धर्म आरोप्यते। आरोपश्चात्र विपर्ययः। तदुक्तं योगसूत्रे विपर्ययलक्षणम्—"विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" (यो० सू० १-८) इति। नैयायिकैरेतत् तदभाववति तत्प्रकारकं ज्ञानं भ्रमात्मकमन्यथाख्यातिरूपमुच्यते। शुक्तौ इदं रजतमिति यथा। 'रामाय' इति सुप्त्वाभाववति यकारे सुप्त्वप्रकारकज्ञानस्य सत्त्वेन दीर्घः सिध्यति।

स्वसिद्धान्तमाह—**वस्तुतस्तु** इति। विकल्पात्मकं ज्ञानमिदम्। तल्लक्षणं मूले शब्दज्ञानेत्यादिना निरूपितम्। तस्यार्थः—शब्दश्च ज्ञानञ्चेति शब्दज्ञाने, ते अनुपातिनी जनके यस्य स शब्दज्ञानानुपाती श्रूयमाणशब्दहेतुको वक्तुश्च पदार्थस्मृतिहेतुको बाधनिश्चयसद्भावेऽपि कलहादौ, शशशृङ्ग-वन्ध्यापुत्रादिप्रयोगे, उत्प्रेक्षायाञ्च बाधितार्थविषयो वस्तुशून्यः प्रत्ययो (ज्ञानं) विकल्पः इति। सर्वानुभवसिद्धश्चायं प्रत्ययः। तथाच तस्य पदार्थस्य असत्त्वेऽपि तत्र तत्र तत्पदार्थज्ञानं विकल्पात्मकं जायते। 'रामाय' इत्यत्र यकारे सुप्त्वाभावेऽपि सुप्त्वरूपं विकल्पात्मकं ज्ञानं जायते। अत एव दीर्घः सिध्यति। एवं प्रकृतेऽपि योजनीयम्। 'मार्तण्डः' इत्यत्र तकाराकारस्य अन्त्यरूपस्य अन्यपदार्थः समुदायरूपः तदाद्यवयवता च नास्ति। एवमपि विकल्पात्मकज्ञानस्य सत्त्वेन शास्त्रप्रवृत्तेः सुलभत्वात्। विकल्पात्मकमपि ज्ञानं शास्त्रप्रवृत्तौ उपयोगि, लक्ष्यानुरोधादिति सर्वं सिद्धम्।

शङ्का—'मार्तण्डः' इसमें मार्तघटक अन्त्य अकार किसी वर्ण के पूर्व में नहीं है। अतः अन्त्य वर्ण में भिस् समुदाय के आदि में रहता है उस समुदाय को टि संज्ञा का विधान होसे से यहाँ तादृश समुदाय न होने से टि संज्ञा नहीं होगी ?

समाधान—एक ही अन्त्याकार में व्यपदेशिवद्भाव के द्वारा समुदायत्व तथा अवयवत्व का आरोप है। अतः उक्तदोष का प्रसङ्ग नहीं है। एतदारोपमूलक 'व्यपदेशिवदेकस्मिन्' यह परिभाषा है। वस्तुतः आरोप की आवश्यकता नहीं है। शास्त्र की प्रक्रिया में प्रमा (यथार्थ) ज्ञान के समान विकल्पात्मक ज्ञान भी उपयोगी है। इसका लक्षण महर्षि पतञ्जलि विरचित योगसूत्र में 'शब्दज्ञानानुपाती' इत्यादि मूल में स्पष्ट है। इसका अर्थ इस प्रकार है—शब्दश्च ज्ञानञ्च शब्दज्ञाने तयोः अनु=पश्चात्, पतितुं शीलमस्य इति शब्दज्ञानानुपाती=शब्द और ज्ञान के अनन्तर जायमान वस्तुशून्य=बाधित बाह्यपदार्थविषयक ज्ञान ही विकल्प है। कलह, वन्ध्यापुत्र तथा उत्प्रेक्षा आदि स्थलों में बाह्यार्थ के विना ही श्रोता को शब्दद्वारा, वक्ता को पदार्थों-

'ओत्वोष्ठयोः समासे वा' (वा०) । स्थूलोतुः, स्थूलौतुः । बिम्बोष्ठः, बिम्बौष्ठः । 'समासे' किम् ? तवौष्ठः ॥

पतञ्जलिरिति तु अञ्जलेः पतित इति विग्रहे मयूरव्यंसकादित्वात् समासे तत्रैव निपातनादितशब्दस्य लोपे, पृषोदरादित्वाद्वा तल्लोपे साधुः; 'गोनर्ददेशे कस्यचिदृषेरञ्जलेः सन्ध्याकरणसमये पतितः' इत्यैतिह्यात् ।

ओत्वोष्ठयोः० (**का० वा०**) । **अत्र समर्थपरिभाषा नोपतिष्ठते; 'समासेऽङ्गुलेः**

अन्यमते विपर्ययात्मकं ज्ञानमारोपमूलकम् । ईदृशस्थले तदेव शास्त्रप्रवृत्तौ नियामकम् । एतन्मते आरोपमकृत्वैव विकल्पात्मकज्ञानेन इष्टं सेत्स्यतीति भावः ।

गोनर्ददेशे[1] कस्यचिद् ऋषेः सन्ध्याकरणसमये अञ्जलेः पतित[2] इति व्युत्पत्तौ मयूरव्यंसकादित्वात् समासे एतेन निपातनेन पृषोदरादित्वाद् वा इतशब्दस्य लोपे पतञ्जलिशब्दस्य साधुत्वम्—इति पररूपस्यानावश्यकत्वात् शकन्ध्वादिगणेऽस्य पाठो न कल्पनीयः । **ऐतिह्यात्** इति । यस्य वचनस्य वक्ता न स्मर्यते तद् वचनम् = ऐतिह्यम् । 'इतिह' इति निपातसमुदायात् 'अनन्तावसथेतिहभेषजाञ्ञ्यः' (५ । ४ । २३) इत्यनेन ञ्यप्रत्यये आदिवृद्धौ ऐतिह्यम् इति । इतिह-शब्द उपदेशपारम्पर्ये वर्तते । अस्मिन्नेवार्थे (स्वार्थे) ञ्यः प्रत्ययः । यद्यपि निपातसमुदायो न प्रातिपदिकम्, तथापि एतद्वचन-प्रामाण्यात् प्रत्ययो भवति । 'पतन्तोऽञ्जलयो यस्मिन् पूज्यत्वात्' इत्यर्थे पतञ्जलिशब्दस्य साधुत्वे पररूपार्थं शकन्ध्वादिगणे पाठ आवश्यकः ।

ओत्वोष्ठयोः समासे वा इति वार्त्तिकस्य ओत्वोष्ठयोः पदत्वात् तत्सम्बन्धिवर्ण-निमित्तकस्य पदसम्बन्धिविधित्वेन तत्र 'समर्थः पदविधिः' इति परिभाषया समर्थ-पदस्य उपस्थापनेन एकार्थीभावरूपसामर्थ्यस्य समासे एव सम्भवात् समासोऽर्थादेव लभ्यते, पुनरत्र वार्त्तिके समासग्रहणं नावश्यकम् ? इति शङ्कायामाह—**अत्रेति** । पदत्वेन सुबन्तत्वेन वा यत्र उद्देश्यता तत्रैव पदविधित्वस्वीकारात् । प्रकृते ओत्वोष्ठयोः सुबन्तयोः उद्देश्यता न; किन्तु सुब्रहितयोस्तयोरिति न समर्थपरिभाषायाः प्रवृत्तिः । यथा-

---

पस्थिति द्वारा बाधितार्थ का ज्ञान होता है । अतः अन्त्य अकार से घटित समुदाय के न रहने पर भी तथाविध विकल्पात्मक वृत्ति द्वारा कल्पित अर्थ में शास्त्र की प्रवृत्ति हो जायगी ।

'पतञ्जलिः' इस का 'अञ्जलेः पतितः' इस प्रकार विवरण करने पर मयूरव्यंसकादिगण में पाठ मानकर समास और उसी के द्वारा निपातन, अथवा पृषोदरादि मानकर इत शब्द का लोप होने से उक्त प्रयोग की सिद्ध होती है । 'किसी ऋषि के सन्ध्या करते समय अञ्जलि से गिरने के कारण इनका नाम पतञ्जलि है'-ऐसी किंवदन्ती है । 'पतन्तः अञ्जलयो नमस्कार्यत्वाद् अस्मिन्' इस अर्थ में शकन्ध्वादिगण में पाठ मानकर पररूप होता है—ऐसा समझना चाहिये ।

शङ्का—'ओत्वोष्ठयोः समासे वा' इस वार्त्तिक की 'समर्थः पदविधिः' सूत्र के द्वारा पद-सम्बन्धी विधि होने से समर्थ में ही प्रवृत्ति होगी । सामर्थ्य एकार्थीभावरूप है । समास एकार्थी-

---

१. गोनर्दे = पर्वतरूपे इत्यर्थः इति विदस्थिमालाकृतः ।

२. सर्परूपेण इति विषम्यासुक्तम् ।

सुङ्गः (८ । ३ । ८) इत्यादौ समासग्रहणेन, पदविधिरिति सूत्रस्वरसेन, भाष्यादिस्वारस्येन च पदत्वेन सुबन्तत्वेन वा यत्र साक्षादुद्देश्यता तत्रैवैतत्परिभाषाप्रवृत्तिस्वीकारात् ओत्वोष्ठादिमात्रस्य पदत्वाभावात् । अवर्णादोत्वोष्ठयोरचि तद्घटितसमासे इत्यर्थाद् 'दन्त्योष्ठ्यो वः स्मृतः' इति प्रयोगसिद्धिः । अन्यथा प्रत्यासत्त्यौत्वाद्युत्तरपदकसमास एव प्रवृत्त्यापत्तौ तदसङ्गतिः स्पष्टैव । ओतुः = बिडालः ॥

कथञ्चित् पदस्य निमित्ततया आश्रयणेऽपि समर्थपरिभाषाया उपस्थितौ 'समासेऽङ्गुलेः सङ्गः' इति सूत्रे सङ्गग्रहणस्य वैयर्थ्यं स्यात् । समर्थपरिभाषयैव सामर्थ्ये लब्धे सामर्थ्यस्य एकार्थीभावरूपस्य समासे एव सम्भवात् समासपदोपादानस्य वैयर्थ्यात् । ततश्च पदत्वेन सुबन्तत्वेनेति पूर्वोक्तकल्पनायां तादृशोद्देश्यताया असत्त्वात् समर्थपरिभाषया सामर्थ्यालाभे समासपदोपादानं चरितार्थम् । पदत्वेन साक्षादुद्देश्यताया उदाहरणं मृग्यम् । सुबन्तत्वेनेति तिङन्तस्याप्युपलक्षणम् । तेन 'आख्यातमाख्यातेन क्रियासातत्ये' इत्यत्रापि प्रवृत्तिः । पदविधि-शब्दस्यापि स्वारस्यमस्मिन्नेवार्थे । अत्र स्वरस-शब्दो मूले उपात्तो धर्मपरतया नेयः । स्वारस्येनेत्यर्थः ।

पदसंज्ञाप्रयोजक प्रत्ययोत्पत्तिप्रयोजक संज्ञाशास्त्रीयोद्देश्यतावच्छेदकरूपावच्छिन्नसम्पादकविधित्वं पदविधित्वमिति निष्कर्षः । यथा पदसंज्ञायाः प्रयोजकः प्रत्ययः सुप्तिङ्प्रत्ययः, तस्योत्पत्तिप्रयोजकं संज्ञाशास्त्रं समासस्थले 'कृत्तद्धितसमासाश्च' इति तदीयोद्देश्यतावच्छेदकं समासत्वम्, तदवच्छिन्नः समासः, तस्य सम्पादको विधिः 'षष्ठी' इत्यादि सूत्रम्, तस्य पदविधित्वमुपपन्नम् । ओत्वोष्ठयोरिति न तादृशमिति न पदविधित्वम् । **मात्रस्येति** । मात्रपदेन सुबादि व्यावर्त्यते । ओष्ठादिघटिते समासे अस्य प्रवृत्त्या 'दन्त्योष्ठ्यो वः स्मृतः' इत्यत्र प्रवृत्तिः सिध्यति । अन्यथा = 'तद्घटितसमासे' इत्यर्थानङ्गीकारे । ओत्वोष्ठयोः परत्वेनाश्रीयमाणे प्रत्यासत्त्या = सामीप्यात् तदुत्तरपदके = ओत्वोष्ठयोः उत्तरपदभूतत्वेन समावेशो यस्मिन् समासे तत्रैवास्य प्रवृत्तिः स्यात् । तथाच ओष्ठस्य व्रणः ओष्ठव्रणः वृषलस्य ओष्ठव्रणः वृषलोष्ठव्रणः—इत्यत्र पररूपं न स्यात्, ओत्वोष्ठयोः उत्तरपदत्वेन समासे सन्निवेशाभावात् । अत्र ओष्ठव्रणशब्दो हि उत्तरपदम् । ओष्ठव्रणसमासे तु तत् पूर्वपदम् । 'दन्त्योष्ठ्यः' अत्रापि ओष्ठ्यशब्देन दन्तपदस्य समासेन

भावरूप सामर्थ्य में होने से सामर्थ्य के द्वारा समास का लाभ हो जाता है । तदर्थ समासग्रहण व्यर्थ है ?

समाधान— पदत्व या सुबन्तत्व को साक्षात् उद्देश्य मानकर जायमान शास्त्र में ही समर्थपरिभाषा की प्रवृत्ति होती है । निर्विभक्तिक होने से ओतु और ओष्ठ पद नहीं हैं । अतः पदोद्देश्यक विधि के न होने से समर्थपरिभाषा की उपस्थिति नहीं होगी । अत एव 'समासेऽङ्गुलेः सङ्गः' इसमें समास-ग्रहण चरितार्थ होता है । अन्यथा समर्थपरिभाषा की उपस्थिति से ही सामर्थ्य का लाभ हो जाने से समासोपादान व्यर्थ हो जायगा । अवर्ण से उत्तर ओतु या ओष्ठ शब्दावयव अच् के परवर्ती रहने पर तद्घटित समास में पररूप होता है । 'ओतु ओष्ठ एतदुत्तरपदक समास'—ऐसा विवक्षित नहीं है । इसीलिये 'दन्त्योष्ठ्यो वः स्मृतः' यहाँ ओष्ठ्य, समास का

८०. ओमाङोश्च । ६ । १ । ९५ । ओमि आङि चात्परे पररूपमेकादेशः स्यात् । शिवायों नमः । शिव एहि, शिवेहि ॥

ओमाङोश्च (६ । १ । ९५) ॥ अत्र एङीति नानुवर्त्तते, तेनेषदर्थकाऽऽङा सह ऋषभशब्दस्य समासे 'अद्य अर्षभः' इत्यत्र पररूपेऽद्यर्षभसिद्धिः । न चात्र परत्वाद्दीर्घप्रसङ्गः, प्रतिपदविधित्वञ्च निरवकाशत्वे सत्येव बाधकत्वे प्रयोजकम्, इदञ्च 'मध्येऽपवाद' न्यायेन 'अवेहि' इत्यादौ वृद्धेरेव बाधकं स्यादिति वाच्यम्; लक्ष्यानुरोधेनात्र बाध्यसामान्यचिन्ताश्रयणात् ।

ओष्ठमात्रस्य उत्तरपदत्वाभावात् पररूपं न प्राप्नोति । तस्मात् ओत्वोष्ठयोरिति अचो विशेषणम्, नतु परत्वेनाश्रयणम् । प्रवृत्त्यापत्तौ इति । प्रवृत्तिप्राप्तौ इत्यर्थः ।

ओमाङोश्च ॥ अत्र एङ्पदस्याननुवृत्तौ फलमाह—तेन इति । ईषदर्थवाचिना आङा सह 'कुगतिप्रादयः' इत्यनेन ऋषभशब्दस्य समासे 'आद्गुणः' इत्यनेन गुणे सति निष्पन्नस्य अर्षभशब्दस्य अद्यपदेन सह सम्बन्धे अद्य अर्षभ इति दशायां पूर्वान्तवद्भावेन आङ्त्वातिदेशात् 'ओमाङोश्च' इत्यनेन पररूपं सिद्ध्यति । एङ्पदानुवृत्तौ पररूपं न स्यात् ।

हरदत्तोक्तिं खण्डयति—नचेति । न च 'अकः सवर्णे दीर्घः' इत्यनेन पररूपं बाधित्वा दीर्घः स्यात् । प्रतिपदविधित्वेन = साक्षात् तच्छब्दानुवादेन विहितत्वेन पररूपं दीर्घस्य बाधकं भविष्यतीति नाशङ्कनीयम् । आङ्पदमुच्चार्य पररूपस्य विधानेन प्रतिपदविधित्वेऽपि शिवेहीत्यादौ 'वृद्धिरेचि' इत्यनेन प्राप्तां वृद्धिं बाधित्वा पररूपस्य चारितार्थ्येन बाधकत्वासम्भवात् । अनवकाशत्वमेव हि प्रतिपदविधेर्बलवत्त्वे बीजम् । नचेदमनवकाशम् । तथा च 'मध्ये पठिता ये अपवादाः ते पूर्वान् विधीन् बाधन्ते नोत्तरान्' इति परिभाषया वृद्धेरेव बाधकं पररूपम्, न दीर्घस्य । अतोऽत्र दीर्घः प्राप्नोतीति वाच्यम्; लक्ष्यसिद्ध्यनुरोधात् बाध्यसामान्यचिन्तापक्षः आश्रीयते । मद्विषये यद् यत् प्राप्नोति तत्सर्वं मया बाध्यमिति बाध्यसामान्यचिन्तापक्षस्य तात्पर्यम् । एवञ्च पररूपेण स्वविषये प्राप्तौ दीर्घो वृद्धिश्च बाध्यते ।

उत्तरपद होने पर भी पररूप सिद्ध हुआ, क्योंकि ओष्ठघटित समास है । ओतु = बिलाव को कहते हैं । 'ओतुर्विडालो मार्जारः' इत्यादि अमरकोश है ॥

ओमाङोश्च ॥ इस सूत्र में एङ्पद की अनुवृत्ति न होने से आङ् का ऋषभ के साथ समास द्वारा निष्पन्न 'अर्षभः' इसमें अद्य के साथ सम्बन्ध करने पर पररूप होता है ।

शङ्का—मध्ये पठिता येऽपवादास्ते पूर्वान् विधीन् बाधन्ते नोत्तरान्' इस न्याय से पूर्व में पठित विधि का ही पररूप बाधक होगा, उत्तरपठित 'अकः सवर्णे' इसका बाधक न होने से परत्वात् दीर्घ होना चाहिये ?

समाधान—लक्ष्यानुरोध से यहाँ बाध्यसामान्यचिन्तापक्ष का आश्रयण होने से पररूप के विषय में जिस जिस शास्त्र की प्रवृत्ति प्राप्त है पररूप के द्वारा उन सभी शास्त्रों का बाध होता है । इस प्रकार वृद्धि और दीर्घ दोनों का बाध होने से उक्त प्रयोग में दीर्घ की सम्भावना नहीं है । तत्तत् शब्दों का अनुवाद कर होने वाली विधि प्रतिपदविधि है । पररूप के प्रतिपदविधि होने से पररूप दीर्घ का बाधक होगा । प्रतिपदविधि की बलवत्ता अन्यत्र मानी गयी है ॥

८१. अव्यक्तानुकरणस्यात इतौ । ६ । १ । ९८ । **ध्वनेरनुकरणस्य योऽच्छब्दस्तस्मादितौ परे पररूपमेकादेशः स्यात् । पटत् इति पटिति ।**

अन्यत्र प्रतिपदविधित्वस्य बलवत्त्वे प्रयोजकतादर्शनेन परदीर्घात् पूर्वं पररूप-प्रवृत्तेश्च ॥

अव्यक्तशब्दार्थो ध्वनेरिति । **अविद्यमानकत्वादिशब्दस्येत्यर्थः । तस्य चाच्छब्दे-ऽनुकरणे एव सम्भवतीत्याह**—अनुकरणस्येति । **अत्र 'अलोन्त्यस्य' इति न प्रवर्तते, 'नानर्थके' (प० भा०) इति निषेधात्; 'आम्रेडितस्य वा' इति वक्तव्ये 'नाम्रेडितस्य' (६ । १ । ९९) इत्यारम्भाद्वा । अत इति किम् ? वटगिति ॥**

लक्षणैकचक्षुषां लक्ष्यानुरोधस्य वक्तुमशक्यत्वात् बाध्यसामान्यचिन्तापक्षस्यै-वाश्रयणे मानाभावात् पक्षान्तराश्रयणेन दीर्घस्य वारणासम्भवादत आह—**अन्यत्रेति ।** सावकाशस्यापि प्रतिपदविधेर्बलवत्त्वस्य हे रमे, स्वाम्पि इत्यादौ दृष्टतया प्रकृतेऽपि पररूपस्य परदीर्घबाधकाभावात् । रमाशब्दात् सम्बुद्ध्येकवचने 'सम्बुद्धौ च' इत्यनेन प्रतिपदविधित्वेन पूर्वमेत्वे कृते आरूपाद् आपः परत्वाभावात् सोः 'हल्ङ्याब्भ्यो दीर्घात्' इत्यनेन न प्राप्नोति ? इत्याशङ्कायाम् 'एङ्ह्रस्वात् सम्बुद्धेः' इत्यनेन लोपो विहितः । नाऽत्रप्रतिपदविधिर्निरवकाशः; कृतेऽपि लोपे प्रत्ययलक्षणेन एत्वस्य प्रवृत्तेः । तथा च प्रतिपदविधित्वे लोपबाधकत्वं तस्य कथमुक्तम् । एवं सुष्ठु आपो येषु तानि स्वाम्पि । अत्र परं नित्यञ्च नुमं बाधित्वा प्रतिपदविधित्वेन 'अप्तृन्तृच्' इत्यादिना दीर्घे पश्चात् नुमि तस्य सिद्धिः । 'अप्तृन्तृच्' इति सूत्रस्य 'आपः' इत्यत्र स्त्रियां चारितार्थ्येन निरव-काशत्वाभावात् कथं प्रतिपदविधित्वेन बाधकत्वमिति । एवञ्च सावकाशस्यापि प्रति-पदविधेर्बलवत्त्वस्य दृष्टतया इहापि तदनुसरणं न दण्डवारितम् । बलवत्त्वे = सावकाशत्वे-ऽपि शीघ्रोपस्थितिकत्वेन प्रतिपदविधित्वस्य पूर्वप्रवृत्तिप्रयोजकत्वे ॥

अव्यक्तानुकरणस्यात इतौ ॥ अत्राव्यक्तशब्देन ध्वनेर्ग्रहणं दर्शयति—**अविद्यमानेति ।** अविद्यमानः अव्यक्तः कत्वादिधर्मो यत्र स चासौ शब्दस्तस्येत्यर्थः । बहुव्रीहिपूर्वपदकः कर्म-धारयः । सूत्रस्थाव्यक्तानुकरणशब्दे अव्यक्तस्य अनुकरणमिति षष्ठीतत्पुरुषः । नचैवं षष्ठी-समासे अव्यक्तस्यानुकरणं ध्वन्यात्मकं सजातीयं स्यात् । तत्र च अच्छब्दस्यासम्भवः । कर्म-धारयाभ्युपगमे अव्यक्तमनुकरणमिति कथने विशेषाभावात् अनुकरणपदोपादानस्य वैयर्थ्य-प्रसङ्गादिति वाच्यम्; अच्छब्दग्रहणसामर्थ्यादेव वर्णसमूहात्मकस्यानुकरणस्य ग्रहणात् ।

अव्यक्तानुकरणस्यात इतौ ॥ इसमें अव्यक्त शब्द से जिसमें कत्व, खत्वादिरूप से ककार खकारादि की प्रतीति नहीं होती; उस प्रकार की ध्वनि विवक्षित है । इस प्रकार की ध्वनि में अत् शब्द का बोध अनुकरण में ही सम्भव है । इस आशय से लिखते हैं—**अनुकरणस्य** इति । **इत्याह** इससे 'इत्याशयेनाह'—ऐसा विवक्षित है । 'नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे' इस परिभाषा से अनर्थक में 'अलोऽन्त्यस्य' इसकी प्रवृत्ति का निषेध होता है । अतः 'अत्' इसके अन्त्य को पररूप नहीं होता; किन्तु अत्-समुदाय को होता है । यदि अत् के तकारमात्र को पररूप अलोऽन्त्यपरिभाषा के द्वारा इष्ट होता तो आम्रेडितस्थल में 'नाम्रेडितस्यान्त्यस्य तु वा'

'एकाचो न' (वा०)। श्रदिति ॥

८२. नाम्रेडितस्यान्त्यस्य तु वा । ६ । १ । ९९ । आम्रेडितस्य

नाम्रेडित० (६ । १९ । ९)। 'अव्यक्तानुकरणस्य' इति, 'अतः' इति च वर्त्तते। अव्यक्तानुकरणावयवीभूताम्रेडितावयवाच्छब्दस्येत्यर्थः। 'नाम्रेडितस्य तस्तु वा' इति न

यद्यपि सजातीयमनुकरणं भवतीति रीत्या अव्यक्तवर्णकस्य व्यक्तवर्णरूपतया अनुकरणं न सम्भवि, तथापि सर्वथा तादृशस्यैवानुकरणे तदेवास्तीति प्रत्यभिज्ञा स्यात्। तथा च तत्रानुकरणत्वासम्भवः। अतस्तयोरनुकार्यानुकरणयोर्भेदोऽवश्यं वाच्यः। भेदे च सति सर्वसाम्ये भेदानुपपत्तेः शब्दत्वेन ज्ञेयत्वेन वा साम्येन सजातीयत्वसम्भवात्। अतः षष्ठीतत्पुरुषो न दोषावहः। **इत्याह** इति। इत्याशयेनाहेति भावः। अनुकरणस्य = स्फुटाकारादिवर्णस्य ॥

अनेन अलोऽन्त्यसूत्रसहकारेण 'पटत् इति' इत्यत्र अन्त्यस्य तकारमात्रस्य पररूपं न भवति। 'नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे' इत्यनया अभ्यासविकारातिरिक्ते अनर्थके अलोऽन्त्यपरिभाषायाः अप्रवृत्तेर्बोधनात्। तथाच सर्वस्य अत् इत्यस्य भवति। 'नानर्थके' इति परिभाषाया अस्वीकारेऽपि दोषं परिहरति—**आम्रेडितस्येति**। 'नाम्रेडितस्यान्त्यस्य तु वा' इत्यनेन आम्रेडितस्य पररूपं प्रतिषिध्य अन्त्यस्य तकारस्य पररूपं विकल्पेन विधीयते। यदि च 'अव्यक्तानुकरणस्य' इत्यनेन प्राप्तस्य पररूपस्य अलोऽन्त्यसूत्रेण अन्त्यस्य स्यात् तदा 'नाम्रेडितस्यान्त्यस्य तु वा' इति सूत्रस्थाने 'आम्रेडितस्य वा' इति सूत्रं लाघवादारभेत। अलोऽन्त्यपरिभाषया अन्त्यतकारस्य विकल्पेन पररूपसिद्धौ पटत्पटेति, पटत्पटदिति रूपद्वयसिद्धौ गुरुभूतसूत्रकरणाद् अलोऽन्त्यपरिभाषाया अप्रवृत्तिकल्पनात्।

'नाम्रेडितस्यान्तस्य तु वा' इत्यत्र 'अव्यक्तानुकरणस्यात इतौ' इति समग्रं सूत्रमनुवर्तते—इत्येवं मूलेऽनुक्त्वा पदं पृथक् पृथक् विच्छिद्य चकारेण च इतिशब्दमनुकृष्य अनुवर्तते इत्यर्थे वर्ततेशब्दस्य च प्रयोगो वैचित्र्याय। पूर्वापेक्षया अत्र तयोः पदयोरन्वये वैलक्षण्यस्य बोधनाय च। **वैचित्र्यार्थमिति**। अस्मिन् न्यासे पदलाघवं न, किन्तु मात्रा-

इस अग्रिम सूत्र से अत् इसको प्राप्त पररूप का निषेधकर अन्त्य को पररूप विधान करने की क्या आवश्यकता थी! क्योंकि अत्-शब्दसमुदाय को अलोऽन्त्यपरिभाषा से पररूप की प्राप्ति ही नहीं है, तन्निषेधार्थ सूत्र में प्रयास व्यर्थ हो जायगा। 'आम्रेडितस्य वा' इस प्रकार का सूत्र करना चाहिये था, पररूप के निषेधार्थ न तथा अन्त्य पदों का उपादान अनावश्यक हो जायगा।

घटक् मरुत् इत्यादि स्थल में पररूप की व्यावृत्ति के लिये सूत्र में अत् पद का उपादान है।

'नाम्रेडितस्य' इस सूत्र का अर्थ इस प्रकार है—अव्यक्तानुकरण तथा अतः—इन की अनुवृत्ति द्वारा आम्रेडित के अव्यक्तानुकरण का अवयवभूत अत् शब्द को पररूप नहीं होता, किन्तु इसके अन्त्य को विकल्प से होता है।

शङ्का—'नाम्रेडितस्य तस्तु वा' इस न्यास में पद का लाघव न रहने पर भी मात्रा का लाघव होने से इस प्रकार का न्यास क्यों नहीं किया?

समाधान—यद्यपि उक्त न्यास में तकारोपादान से अन्त्यशब्द की अपेक्षा शीघ्र ही तकार

प्रागुक्तं न स्यात् । अन्त्यस्य तु तकारमात्रस्य वा स्यात् । 'डाचि बहुलं द्वे भवतः' (वा०) इति बहुलवचनाद् द्वित्वम् ॥

सूत्रितं वैचित्र्यार्थम् । फलकल्पनाभिनिवेशस्तु न युक्तम्; भाष्यानुक्तेः । अत एव 'तदधीते तद्वेद' (४।२।५९) इति सूत्रे 'द्विस्तद्ग्रहणं प्रमादकृतमाचार्यस्य' इति भाष्ये उक्तम् । 'लाघवानवधानलक्षणोऽत्र प्रमादः' इति कैयटः । क्व तदनवधानम् ? इति तु भाष्यकृदुक्तप्रयोजने तदवधानमन्यत्रान्यदिति निर्णयम् ।

ननु डाचोऽभावादेतदप्राप्तिः ? अत आह—बहुलवचनादिति ॥

लाघवम्, तकारज्ञानप्रक्रियायाञ्च स्वरूपेण निर्देशात् लाघवम् । सर्वत्र मात्रालाघवस्य नादुर इति सूचनमत्र वैचित्र्यम् । **फलेति** । फलान्तरं कल्पयतामयमाशयः—'नाम्रेडितस्य' इत्यंशस्य अन्वाचयशिष्टत्वं परार्थप्रवृत्तिविषयत्वेन, नतु उद्देश्यत्वेन अर्थात् आनुषङ्गिकत्वेन अन्वयस्य ज्ञापनात् वटक्वटक् इत्यत्र अन्त्यस्य पररूपं विकल्पेन सिध्यति । 'नाम्रेडितस्य तस्तु' इति न्यासेन सिद्धे पूर्वोक्तन्यासस्य तथाविधार्थस्य कल्पनया तस्य सफलत्वं सिद्धमिति, एतन्न युक्तम्; एतादृशफलान्तरकल्पनाया निर्मूलत्वात् । कल्पनाया अभिनिवेशः = आग्रहो भाष्यानुक्तत्वेन उपेक्ष्यः ।

अमुमेवार्थं द्रढयति—**अत एवेति** । भाष्यानुक्ते फलेऽपि चेत् कल्पनायाः प्रसारः, तदा 'तदधीते तद् वेद' इत्यत्रापि सूत्रे द्विवारं 'तद्' इति पदस्य फलविशेषकल्पनां वारयितुं को नाम ईष्टे ! तथाहि वृत्तिकारेण द्विस्तद्ग्रहणस्य फलमिदं प्रदर्शितम् । द्विवारं तद्ग्रहणेन अधीयानोऽपि वैयाकरणः व्याकरणं विदुषोऽपि वैयाकरणपदेन बोधः । द्विवारं तत्पदाभावे तु योऽधीते स एव वेद च इत्युभयस्य एकस्मिन् सत्त्वे एवाण् प्रत्ययः स्यादिति । कल्पनैषा 'द्विस्तद्ग्रहणं प्रमादकृतमाचार्यस्य' इति भाष्यविरोधाद् हेया यथा, तथात्रापि भाष्यानुक्ता कल्पना त्याज्या । तत्पदाभावे जायमानस्य तादृशभ्रमस्य दूरीकरणाय भाष्यमेकदेशि इति युक्ता कल्पनेति सूरिभिर्विचारणीयम् ॥

का बोध होने से ज्ञान और मात्रा दोनों प्रकार का लाघव है, तथापि उक्त प्रकार का लाघव अवश्य मन्तव्य है, इस प्रकार का नियम नहीं है—इसके ज्ञापनार्थ ही यथावस्थित सूत्र का न्यास है । **वैचित्र्यार्थ** शब्द से मूल में इसी अर्थ की विवक्षा है ।

'नाम्रेडितस्य' इसको आनुषङ्गिक मानकर अत् शब्द से अन्यत्र भी अन्त्य को पररूप होने से 'वटक् वटक् इति' इस में पररूप की सिद्धि अन्त्यपद के उपादान का प्रयोजन है । अतः इसके उपादान से उक्त प्रयोग में पररूप नहीं होगा—इस प्रकार की फलकल्पना भाष्यानुक्त होने से अयुक्त है । अत एव "'तदधीते तद्वेद' इस सूत्र में दो वार तत् तत् पद का उपादान लाघव का अवधान न करने से आचार्य ने किया है"—ऐसा भाष्यकार ने कहा है । इस अर्थ में कैयट की भी सम्मति है । दो वार तद्ग्रहण से फलान्तर[2] की कल्पना नहीं की गयी है । भाष्योक्त प्रयोजन जहाँ है

---

१. आनुषङ्गिकत्वम् = अनुद्देश्यत्वमिति 'चार्थे द्वन्द्वः' इति सूत्रे शेखरे ।

२. अध्ययन और ज्ञान समानकर्तृक होने पर ही अण् प्रत्यय होता है—इसकी व्यावृत्ति दो वार तद् ग्रहण का प्रयोजन है । जो पढ़ता है या जानता है—दोनों वैयाकरण हैं । पृथक्-पृथक् अर्थों में प्रत्यय होता है । यही फलान्तरकल्पना है ।

८३. तस्य परमाम्रेडितम् । ८ । १ । २ । **द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात् । पटत्पटेति ॥**

८४. झलां जशोऽन्ते । ८ । २ । ३९ ।

तस्य परमा० (८ । १ । २) । **अवयववाचिपरशब्दयोगेऽत एव ज्ञापकात् षष्ठी । 'तस्य' ग्रहणं स्पष्टार्थम्, 'द्वे' इत्यनुवर्त्य षष्ठ्या विपरिणामेन सिद्धेः । अन्यद्विरुक्तपरस्य तु न संज्ञा, अष्टमे 'सर्वस्य' इत्येतत्प्रकरणे संज्ञाकरणात् ॥**

झलां जशोऽन्ते (८ । ४ । ५३) । **अन्तग्रहणं झलीति निवृत्त्यर्थम् ।**

तस्य परमाम्रेडितम् ॥ अत्र 'तस्य' इति पदे दिशिदृष्टः शब्दो दिक्शब्द इति स्वीकारेण परशब्दस्य दिग्वाचकत्वेन दृष्टतया तस्य योगे 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इत्यनेन पञ्चमी युक्ता इति नाशङ्क्यम्; एतन्निर्देशसामर्थ्यात् अवयववाचकपरशब्दयोगे षष्ठीविभक्तेः कल्पनात् । 'सर्वस्य द्वे' इति सूत्राद् 'द्वे' पदमनुवर्त्य षष्ठ्या विपरिणम्य च द्विरुक्तस्य परमाम्रेडितसंज्ञं स्यादित्यर्थलाभे सूत्रे तस्येति पदोपादानं स्पष्टार्थम्; 'पूर्वोऽभ्यासः' इत्यादौ अनुवृत्तद्विपदस्य षष्ठ्या विपरिणामेन द्विरुक्तस्येत्यर्थस्य दृष्टत्वात् । प्रकरणान्तरेण द्वित्वे कृते एतत्सूत्रस्याप्रवृत्त्यर्थं 'तस्य' इति पदमुपात्तमिति न मन्तव्यम् । 'सर्वस्य द्वे' इत्यनन्तरमेतस्य पाठेन तदनन्तरस्य आष्टमिकद्वित्वस्य परस्वरूपे आम्रेडितसंज्ञायाः प्राप्तेः सम्भवात् । तदर्थं 'तस्य' इत्युपादानं नावश्यकम् । अवयववाचिपरशब्दयोगे षष्ठीत्वं तु 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः' (६।४। १५६) इति निर्देशाद् बोध्यम् । अतएव = एतन्निर्देशादेव । **अन्यद्विरुक्त** इति । **प्रकरणान्तरस्येत्यर्थः** ।

झलां जशोऽन्ते इति ॥ अत्र 'स्कोः संयोगाद्योरन्ते च' इति सूत्राद् अन्तपदे लब्धे

वहीं लाघव का आदर है । जहाँ भाष्योक्त प्रयोजन नहीं है, वहाँ लाघव का आदर न होने से सूत्रकार की अनवधानता है—इसप्रकार का विवेक है । डाच् प्रत्यय के अभाव में द्वित्व की प्राप्ति नहीं है । अतः बाहुलक होने से द्वित्व की उपपत्ति करनी चाहिये ॥

तस्य परमाम्रेडितम् ॥ **शङ्का**—इसमें 'तस्य' यह षष्ठ्यन्त प्रयोग अनुपपन्न है । जो शब्द कहीं भी दिग्वाचक के रूप में प्रयुक्त हो चुका हो उसके योग में 'अन्यारादितरर्ते' इससे पञ्चमी विभक्ति होने से 'तस्मात्' इस प्रकार का निर्देश होना चाहिये ?

समाधान—इसी निर्देश के आधार पर अवयववाचक पर-शब्द के योग में षष्ठी की साधुता स्वीकार करने से उक्त प्रयोग की अनुपपत्ति नहीं हुई ।

इस सूत्र में 'द्वे' इस पद की अनुवृत्ति और उसका षष्ठ्यन्ततया विपरिणाम करने से द्विरुक्त के पर भाग को आम्रेडितसंज्ञा सिद्ध हो जाती है । अतः 'तस्य' ग्रहण स्पष्टार्थक है । प्रकरणान्तरस्थ षाष्ठ द्वित्व के परभाग की संज्ञा की व्यावृत्ति 'तस्य' इसका फल नहीं है; क्योंकि अष्टमाध्याय में पठित 'सर्वस्य द्वे' इसके प्रकरण में इसका पाठ है । अतः इसी प्रकरण के द्वित्व का ग्रहण होगा ॥

झलां जशोऽन्ते ॥ इस सूत्र में 'झलो झलि' इससे 'झलि' इसकी अनुवृत्ति-व्यावृत्ति के

पदान्ते झलां जशः स्युः । पटत्पटदिति ॥

८५. अकः सवर्णे दीर्घः । ६ । १ । १०१ । **अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात् । दैत्यारिः । श्रीशः । विष्णूदयः ।**

'अचि' किम् ? कुमारी शेते । 'नाज्झलौ' (सू० १३) इति सावर्ण्यनिषेधस्तु न दीर्घशकारयोः; ग्रहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पत्तेः ।

सर्वोपकारकतया च प्रकरणान्तेऽस्य लेखः । एतेन 'श्रत् इत्यत्रैव लेख उचितः' इत्यपास्तम् ।

अज्झलोः सावर्ण्यनिषेधादाह-अचि किमिति । अनिष्पत्तेरिति । **नाज्झलाविति सूत्रविषयनिर्णयेऽपवादविषयपरिहारेण तत्तद्वर्णीयसवर्णपदवाच्यनिर्णयोत्तरं तावतां ग्रहणस्य**

पुनरिह अन्तपदोपादानं 'झलो झलि' इति सूत्राद् अनुवृत्तिप्राप्तस्य झलीत्यस्य निवृत्त्यर्थम् । तेन अन्तपदार्थस्य अवयविनि साकांक्षतया अनुवृत्तेन पदेनैव सम्बन्धात् पदान्ते इत्यर्थो लब्धः । नच 'श्रदिति' इत्यत्रैव जश्त्वविधानाय अस्य सूत्रस्य उल्लेख उचितः? इति शङ्कायामाह—**सर्वोपकारे**ति । एतत्प्रकरणोपयोगित्वेन प्रकरणान्ते सूत्रस्यास्य लेखो न किञ्चिद् वैपरीत्यमापादयति ॥

अकः सवर्णे दीर्घः ॥ सूत्रेऽत्र अचिपदाननुवृत्तौ 'कुमारी शेते' इत्यत्र दीर्घापत्तिरुक्ता; तन्न युक्तम्; अज्झलोः सवर्णसंज्ञायाः 'नाज्झलौ' इत्यनेन प्रतिषेधात् सावर्ण्याभावादेव दीर्घस्याप्राप्त्या अचीत्यस्यानुवृत्तौ फलाभावः ? इत्याशङ्कां समाधत्ते—**नाज्झलौ** इति । एतत्सूत्रस्य तुल्यास्यसूत्रस्य निषेधकत्वेन निषेधविषयं परिहृत्यैव तुल्यास्यसूत्रस्य अप्रामाण्यज्ञानानास्कन्दितवाक्यार्थस्य बोधात् । एतादृशबोधानन्तरमेव सवर्णपदबोध्यत्वस्य निश्चयः । तदनन्तरञ्च अणुदित्सूत्रेण सवर्णानां ग्रहणं बोधयितुं शक्यते । तथा च तुल्यास्यसूत्रापेक्षया 'नाज्झलौ' इत्यस्य वाक्यार्थबोधः प्रथमं जायते, ततः तुल्यास्यप्रयत्नमित्यस्य, ततः परम् अणुदित्सूत्रस्य वाक्यार्थबोधः—इत्येषा परम्परा सिद्धा । अस्यां परम्परायाम् 'नाज्झलौ' इत्यस्य वाक्यार्थबोधवेलायां ये वर्णाः अच्प्रत्याहारे उच्चारितास्ते एव अच्पदेन गृहीता भवन्ति । तत्र च दीर्घेकारादीनां वर्णसमाम्नाये पाठाभावेन तेषामच्पदेनाग्रहणात् न तेषां दीर्घेकारादीनां सवर्णसंज्ञायाः निषेधसम्भवः । तस्मात् सावर्ण्यस्य सत्त्वाद् दीर्घः प्राप्नोतीति 'अचि' ग्रहणमावश्यकम् । सवर्णग्राहकता अणुदित्सूत्रेण सवर्णपदबोध्यत्वनिश्चयानन्तरमेति, न तदानीम् अच्पदेन सवर्णानां ग्रहणाशा ।

लिये सूत्र में अन्त पद का उपादान है । सर्वोपकारक होने से प्रकरणान्त में इसका उल्लेख है । अत एव 'श्रदिति—इसकी सिद्धि में इस सूत्र का उपयोग होने से वहीं इसका उल्लेख करना उचित था'—ऐसा विचार रखने वाले निरस्त हो गये ॥

अकः सवर्णे दीर्घः ॥ इसमें 'अचि' की अनुवृत्ति होने से सवर्ण अच् में दीर्घ होता है ।

शङ्का—अच् की हल् के साथ सवर्णसंज्ञा का 'नाज्झलौ' इससे निषेध होने से अक् का सवर्ण अच् ही होगा, अतः 'अचि' इसकी अनुवृत्ति अनावश्यक है ?

अकः किम् ? हरये । 'अकोऽकि दीर्घः' इत्येव सुवचम् ।

'ऋति सवर्णे ऋ वा' (वा०) । होतॄकारः, होतृकारः ।

'लृति सवर्णे लृ वा' (वा०) होत्लृकारः । पक्षे—ऋकारः सावर्ण्यात् । होतृकारः ।

ग्रहणकशास्त्रबोद्ध्यतया एतद्बोधकाले ग्रहणकशास्त्रस्य तावद्ग्रहणबोधकत्वानिष्पत्ते-रित्यर्थः ।

सूत्रस्थसवर्णपदानुवृत्तिमभिप्रेत्याह—ऋति सवर्ण इति । **तत्फलम्—दध्यृकारा-दावेतदप्रवृत्तिः । एतद्विधेययोः 'अ इ उ ण्' (मा० सू० १) सूत्रानन्तरं पाठादच्त्वम्, तेन तयोः स्थाने प्लुतसिद्धिः, स्तयोश्च न रपरत्वम् ।**

अपवादेति । बाधकत्वसाम्यात् निषेधशास्त्रेऽपि अपवादत्वव्यवहारः । **एतदिति** । नाज्झलावित्यर्थः । **अनिष्पत्तेरिति** । अमुमेवार्थं स्फुटीकरोति । 'नाज्झलौ' इत्यस्य वाक्यार्थबोधात्पूर्वं सवर्णपदार्थो नावगन्तुं शक्यते । सवर्णपदार्थानिश्चये अणुदित्सूत्रबलात् अष्टादशानां बोधनं निष्पद्यते[1] ।

एवंविधस्य वार्त्तिकपाठस्याभावादाह—**सूत्रस्थेति** । सवर्णपदानुवृत्त्या दध्यृकारादौ नास्य प्रवृत्तिः । 'ऋति सवर्णे' इति 'लृति सवर्णे' इति वार्त्तिकाभ्यां क्रमेण विधीयमानस्य ॠकारस्य ॡकारस्य च 'अइउण्' इति सूत्रानन्तरं पाठाद् अच्त्वम् । पूर्वेण णकारेण 'उरण् रपरः' इत्यत्र अण्प्रत्याहारग्रहणात् वार्त्तिकविधेये ॠकारे रपरत्वप्रसङ्गोऽपि दूरस्थराहतः ।

समाधान—तुल्यास्य सूत्र के अपवादभूत 'नाज्झलौ' इसके वाक्यार्थबोध के अनन्तर ही तुल्यास्य सूत्र के द्वारा अपवादविषय का परिहार कर वाक्यार्थबोध होगा । उस समय 'ह्रस्वा-कारादि से दीर्घाकारादि का भी ग्रहण होता है'—इस प्रकार के ज्ञान का अभाव होने से वर्ण-समाम्नाय में पठित वर्णों का ही 'अणुदित्सवर्णस्य चाप्रत्ययः' इस सूत्र के अण्पद से ग्रहण होगा । इस प्रकार 'नाज्झलौ' इसके बोध के समय अणुदित्सूत्र के वाक्यार्थबोध की अनिष्पत्ति है । अतः वर्णसमाम्नाय में पठित वर्णों की ही सवर्णसंज्ञा का निषेध होने से दीर्घ ईकार और शकार की परस्पर सवर्णसंज्ञा हो जाने के कारण 'कुमारी शेते'—यहाँ दीर्घापत्ति के परिहारार्थ 'अचि' इसकी आवश्यकता है ।

अणुदित्सूत्रघटक अण्पद से भी वर्णसमाम्नाय में पठित वर्णों का ही ग्रहण होता है । क्योंकि इस सूत्र के बोध के अनन्तर ही अकारादि में अष्टादशविधत्व का ज्ञान होगा । इसके पूर्व सूत्रार्थ-बोधकाल में उक्त भेद का ज्ञान असम्भव है । अतः दीर्घाकारादि वर्ण से सवर्ण का ग्रहण

---

१. यथा दीर्घप्लुतयोराकारयोः हल्भिः सह सावर्ण्यप्रतिषेधाय प्रश्लेषः सूत्रे, तथा दीर्घकारा-दीनां सावर्ण्यभङ्गाय कुतो न प्रयासः ? अत्रेदं बोध्यम्—हकारः अण्प्रत्याहारे श्रुतत्वात् स्वसवर्णान् आकारादीन् अणुदित्सूत्रसहकारेण ग्रहीष्यति । अतः तत्वाशङ्का, प्रश्लेषेण तद्वारणञ्च, ईकारादौ च नायं प्रसङ्गः । दीर्घकारादीनां शीतल-षष्ठादिघटकशकारषकारा-दीनाञ्च पूर्वोक्तदिशा अण्प्रत्याहारेण अग्रहणात् सवर्णग्राहकतायाः अभावादेव दोषाभावात् । सवर्णसंज्ञायां सत्यामपि न क्षतिः ।

'ऋति ऋ वा', 'ऌति ऌ वा' इत्युभयमत्रापि विधेयं वर्णद्वयं द्विमात्रम्। आद्यस्य मध्ये द्वौ रेफौ, तयोरेका मात्राभितोऽज्भक्ते रपरा।

द्विमात्रमिति। **अत एव 'अकः सवर्णे' (६।१।१०१) इत्यनेनैव ऋकारद्वयस्य स्थाने रेफद्वयवत्तारूपगुणकृतान्तर्येण, कदाचिद् रेफद्वयगर्भस्य विवृतत्वान्तर्येण, कदाचिद्वि-वृतस्य ऌकारे ऌकारवत्तान्तर्येण, कदाचिद् द्विलकारस्य कदाचिद्विवृतत्वसाम्येन रेफ-वत्तासाम्येन च तादृशस्य ऋकारस्य सिद्धया विकल्पफलसिद्धिमाश्रित्यैतद्वचनद्वयं 'तुल्यास्य' (१।१।९) इति सूत्रे** भाष्ये **प्रत्याख्यातम्।**

द्वौ रेफाविति। **अत्रापि तदेव** भाष्यं **मानम्, द्विरेफत्वे हि रेफद्वयवति स्थानित्वयं**

तथा च वार्त्तिकविधेयस्य ऋकारस्य ऌकारस्य च लोकप्रसिद्धेन ऋकारादिना भेदेऽपि वर्णसमाम्नाये पाठादच्त्वेन प्लुतोऽपि सिध्यति। अतएव = द्विमात्रकत्वादेव।

वार्त्तिकविधेये रेफद्वयं तस्यैकमात्रा अभितः अज्भक्तिरस्ति, तस्या एका मात्राऽपि द्विमात्रम् ईषत्स्पृष्टश्च। एवं वार्त्तिकविधेये ऌकारे लकारद्वयम्, तस्य एका मात्रा लकारौ अभितः अज्भक्तेरेका मात्रा इति इदमपि द्विमात्रमीषत्स्पृष्टश्च। लोकप्रसिद्धे ऋकारे एको रेफः, ऌकारे च एको लकारः। अनयोश्च विवृतः प्रयत्नः।

गुणेति। स्थानार्थप्रमाणकृतान्तर्येण भिन्नं सर्वमान्तर्यं गुणकृतमुच्यते।

स्थानिनि ऋकारे रेफद्वयस्य सत्त्वेन रेफद्वयवत्तारूपेण गुणकृतान्तर्येण रेफद्वयवान् वार्त्तिकविहितो द्विमात्र ऋकारादेशः ईषत्स्पृष्टश्च। यदा तु स्थानिनः ऋकारस्य विवृत-प्रयत्नजन्यतया तेन आन्तर्यं विवक्ष्यते तदा विवृतो लोकप्रसिद्ध ऋकारो भविष्यति। एवं ऌकारवत्तारूपान्तर्येण लकारद्वयघटितो वार्त्तिकविधेयः ऌकारः, यदा विवृतत्वेन रेफवत्तया च आन्तर्यं गृह्यते, विवृतो लोकप्रसिद्धः ऋकारो दीर्घो भविष्यति। एवंरूपेण द्विविधप्रयोगाणाम् 'अकः सवर्णे दीर्घः' इत्यनेन निष्पत्त्या वार्त्तिकद्वयं भाष्ये प्रत्याख्यातम्। एतच्च प्रत्याख्यानं वार्त्तिकविधेययोस्तयोः द्विमात्रत्वे एव संगच्छते। द्वयोर्मात्राभेदे तु प्रत्याख्यानासङ्गतिः स्यात्। **द्वौ रेफौ इति**। 'अभितः परितः समया निकषा हा प्रति-

---

नहीं होता। इसीलिये 'न स्वस्मिन् न स्वाङ्गे' इस प्रकार की भाष्योक्ति है। अतएव दीर्घ ईकार से ह्रस्व इकारादि का ग्रहण नहीं होता।

'ऋति ऋ वा, ऌति ऌ वा' इस प्रकार वार्त्तिक का स्वरूप होने पर भी सवर्ण-पदानुवृत्ति के द्वारा सवर्ण-पदघटित वार्त्तिक का उल्लेख करते हैं—**ऋति सवर्णे इति**। सवर्ण पद का सन्नि-वेश करने से दधि ऋकारीयति इसमें ऋकार का इकार सवर्णी न होने से वार्त्तिक की प्रवृत्ति नहीं हुई। वार्त्तिकविधेय ऋ तथा ऌ का 'अइउण्' सूत्र के अनन्तर पाठ करने से पूर्व णकार से निष्पन्न अण् प्रत्याहार के अन्तर्गत न होने से वार्त्तिकविधेय ऋ ऌ को रपर नहीं हुआ। तथा इनमें अच्त्व भी सिद्ध हुआ। अच्त्व होने से प्लुत की सिद्धि भी हो जाती है। वार्त्तिकविधेय की दो मात्रा तथा ईषत्स्पष्ट प्रयत्न है।

इनको द्विमात्र मानने से ही भाष्योक्त प्रत्याख्यान की सङ्गति होती है। ऋकारद्वय स्थानी में रेफद्वय के होने से रेफद्वयवत्तारूप गुणकृत आन्तरतम्य होने से 'होतॄकारः' इसमें

ऌकारवत्यपर इति व्यवस्था सिद्ध्यति। अभित इति। द्वौ रेफावित्यनुषज्यते, तच्च द्वितीयान्तम्, 'अभितः' पदयोगात्।

'एओङ्' (मा० सू० ३) सूत्रे भाष्ये मातॄणामित्यादौ णत्वादिसिद्ध्यर्थमवश्यमङ्गीकर्त्तव्ये 'वर्णग्रहणेन गृह्यन्ते' इति पक्षे प्रलूय, खट्वाभिः, वाचा तरतीत्यादौ तुगैस्-

---

योगेऽपि' इति वार्त्तिकेन अभित इत्यस्य योगे रेफौ इत्यत्र द्वितीया। यद्यपि अभित इति उभयत इत्यर्थकम्, तथाऽपि इह सर्वतः इत्यर्थे तद् बोध्यम्। अत एव अज्भक्तेरत्र एकवचनमुपपद्यते। आदौ अन्ते च अज्भक्तिद्वयस्य कल्पनायां द्विवचनान्तनिर्देशस्यैव औचित्यं स्यात्।

वार्त्तिकविधेययोरुपक्रमे अज्भक्तेः तत्र उपपादनेन अन्यस्मिन् लोकप्रसिद्धे ऋकारे ऌकारे च अज्भक्तिर्नास्तीति शङ्कां दूरीकर्तुं साधयन्नाह—एओङ् इति। मातॄणामित्यादौ ऋकारघटकं रेफमादाय णत्वं साधयितुं 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते' इति स्वीकृतं भाष्ये। वर्णैकदेशानामपि वर्णग्रहणेन ग्रहणे प्रलूयेत्यत्र द्वयोर्ह्रस्वोकारयोः समूहो दीर्घः ऊकारः। तथाच वर्णैकदेशस्य ह्रस्वोकारस्य ह्रस्वपदेन ग्रहणात् 'ह्रस्वस्य पिति कृति तुक्' इत्यनेन तुक्, एवं खट्वाभिरित्यत्र दीर्घाकारघटकस्य ह्रस्वाकारस्य अत्पदेन ग्रहणात् 'अतो भिस ऐस्' इत्यनेन ऐस् आदेशः, तथा वाचा तरति इति विग्रहे 'नौ द्व्यचष्ठन्' इत्यनेन ह्रस्वाकारद्वयस्य दीर्घे आकारे सत्त्वेन द्व्यच्त्वनिबन्धनः ठन् प्रत्ययश्च प्राप्ताः किं न भवन्ति ? इत्याशङ्क्य यदि दीर्घे वर्णैकदेशग्रहणेन ह्रस्वत्वप्रयुक्तं कार्यं स्यात् तदा 'छे च' इत्यनेनैव तुक्सिद्धौ 'दीर्घात्' इति विभक्तसूत्रेण तुग्विधानं विफलं स्यात्।

एवं खट्वाभिरित्यत्र ह्रस्वत्वप्रयुक्त ऐसादेशः प्राप्नुयात्, तदा 'अतो भिस' इत्यत्र तपरकरणस्य दीर्घव्यावृत्त्यर्थं क्रियमाणस्य वैयर्थ्यप्रसङ्गः। एवमेव च 'नौ द्व्यचः' इत्यत्र वर्णैकदेशग्रहणपक्षे द्व्यच्कत्वादेव नौशब्दात् ठन्सिद्धौ पृथग् नौपदोपादानस्य वैफल्य-

---

वार्तिकविधेय ईषत्स्पृष्ट ॠ तथा विवृतत्वरूप प्रयत्नसाम्य की विवक्षा में सूत्रविधेय विवृत दीर्घ ॠकार एवं लकारद्वयवत्ता आन्तरतम्य से ईषत्स्पृष्ट वार्त्तिकविधेय ॡकार तथा रेफवत्ता और विवृतत्वरूप आन्तरतम्य से दीर्घ ॠकार 'अकः सवर्णे दीर्घः' इसके द्वारा सिद्ध हो जाने से वार्त्तिकारम्भ की अनावश्यकता भाष्यकार ने प्रकट की है। वार्त्तिकविधेय द्विमात्र नहीं होने पर आन्तरतम्यग्रहण के भेद से दीर्घ द्वारा प्रत्याख्यान की संगति नहीं होगी। द्वौ रेफौ—इसमें 'अभितः परितः' इत्यादि वार्तिक से द्वितीया विभक्ति हुई है।

'एओङ्' इस सूत्र के भाष्य में 'मातॄणाम्' इत्यादि प्रयोगों में णत्व की सिद्धि के लिये वर्ण के ग्रहण से वर्णैकदेश का भी ग्रहण माना जाता है। इस पक्ष में 'प्रलूय' इसमें दीर्घ ऊ में दो ह्रस्व उकार की सत्ता होने से उसके एकदेश उकार का भी स्वतन्त्र उकार के द्वारा पूर्वोक्त नियम से, ग्रहण होने के कारण 'ह्रस्वस्य पिति कृति तुक्' इससे तुक्, एवं 'खट्वाभिः' इसमें ह्रस्वाकारद्वयवाले आकार के एकदेश ह्रस्वाकार का अत् पद से ग्रहण होने से 'अतो भिस ऐस्' इससे ऐस् आदेश एवं वाचा तरति इस अर्थ में वाक् शब्द से 'नौ द्व्यचष्ठन्' इससे द्व्यज्निमित्तक ठन् की आपत्ति का समाधान 'दीर्घात्' इसका तुग्विधान के लिये किया गया आरम्भ, 'अतो भिस' इसमें किया तपरकरण तथा 'नौ द्व्यचः' इसमें नौशब्द को द्व्यज्निमित्तक ठन् हो जाने से नौ-

द्वितीयस्य तु मध्ये द्वौ ऌकारौ, शेषं प्राग्वत् । इहोभयत्रापि 'ऋत्यकः' (सू० ९२) इति पाक्षिकः प्रकृतिभावो वक्ष्यते ॥

द्व्यज्लक्षणानां शङ्कायाः, 'दीर्घात्' (६ । १ । ७५) इति तुग्विधानसामर्थ्य-तपरकरण-सामर्थ्य-'नौ द्व्यचः' (४ । ४ । ७) इति सूत्रस्थनौग्रहणसामर्थ्यैर्भेदेनाप्रतिभासमानेषु वर्णावयवेषु अवयवसदृशस्वतन्त्रवर्णाश्रयकार्याभावज्ञापनरूपसमाधानस्य च करणवत् 'प्रातर्ऋतम्' इत्यत्र 'रो रि' (८ । ३ । १४) इत्यस्य, 'तद्ऌकारः' इत्यादौ 'तोर्लि' (८ । ४ । ६०) इत्यस्य च शङ्कासमाधानाकरणेन 'यत्तद्रेफात्परं भक्तेः' इति 'हयवरट्' (मा० सू० ५) सूत्रस्थभाष्येण च ऋऌक्सूत्रस्थयोरर्धमात्राज्भागस्याभितः क्लृप्तत्वेन तथैवोचितत्वादिति भावः ।

द्वौ ऌकाराविति । हल्द्वयवत्पूर्वसाहचर्यादिति भावः । अत्र ह्रस्वऋकारद्वय-स्थानिकैकादेशे एव पूर्वस्य साधुत्वम्, ह्रस्वऋकारऌकारस्थानिकैकादेशे एवोत्तरस्य साधुत्वम् ।

मिति सर्वमनुसन्धाय भेदेनाप्रतिभासमानेषु वर्णावयवेषु अवयवसदृशस्वतन्त्रवर्णाश्रयकार्या-भावस्य दीर्घात्, अतः 'नौ' इत्येतेषां सामर्थ्येन ज्ञापनात् परिहृतं भाष्ये ।

यया रीत्या एतेषु स्थलेषु वर्णैकदेशग्रहणपक्षे पूर्वोक्तशङ्कायाः समाधानं कृतं न तया रीत्या प्रातः ऋतमित्यत्र 'रो रि' इति लोपाशङ्कायाः 'तद् ऌकारः' इत्यत्र 'तोर्लि' इत्यनेन प्राप्तपरसवर्णस्य च वारणाय उपायो भाष्ये दर्शितः; किन्तु उपायान्तरेण 'यत्तद् रेफात् परं भक्तेः' इत्येवं रूपेण समाहितम् । अतः 'ऋऌक्' सूत्रघटके ऋकारे ऌकारे च अर्धमात्रोऽज्भागः सर्वतः क्लृप्तोऽस्ति । तथा च परममूले वार्त्तिकविधेयोपक्रमे अज्भक्तेर्व्याख्यानेन वार्त्तिकविधेये एवाज्भक्तिरिति भ्रमवारणाय सर्वस्मिन् ऋकारे अज्भक्तिः साधिता अनेन ग्रन्थेन । **अत्रेति ।** वार्त्तिकविधेययोः ॠकारॡकारयोश्च मध्ये । ह्रस्वस्य ऋकारद्वयस्य स्थाने एव वार्त्तिकविधेयस्य ॠकारस्य, एवं ह्रस्वस्य ऋकारस्य ऌकारस्य च स्थाने एव 'ऌति ऌ वा' इति वार्त्तिकविधेयस्य साधुत्वम् ।

शब्द का पृथक् उपादान—इन सबों के वैयर्थ्य से भिन्नरूप से अप्रतीयमान वर्णावयवों में अवयवसदृश स्वतन्त्र वर्ण प्रयुक्त कार्य नहीं होता है—इस प्रकार का ज्ञापन किया ।

इसी प्रकार पूर्वोक्त शङ्का—समाधान के समान ही 'प्रातर्ऋतम्' इसमें 'रो रि' इसके द्वारा रेफ का लोप एवं 'तद् ॡकारः' इसमें 'तोर्लि' इससे परसवर्ण की शङ्का तथा समाधान के न करने से, एवमेव 'मातॄणाम्' इसमें ऋकारवृत्ति रेफ से अव्यवहित उत्तर नकार नहीं है, किन्तु रेफरूप भाग से व्यवहित है । अतः 'रषाभ्याम्' इससे णत्व की प्राप्ति न होने से णत्व के विधानार्थ 'ऋवर्णान्नस्य णत्वं वाच्यम्' इस वार्तिक का आरम्भ है'—इस भाष्य से ऋ और ऌ में अज्भक्ति का होना प्रमाणित होता है । यत् तत् रेफात् परं भक्तं इस भाष्य में समानाधिकरण दोनों पञ्चमी हैं । रेफरूपभाग से पर में जो है उससे व्यवधान है—यह भाव है ।

जिस प्रकार रेफद्वयविशिष्ट ॠ आदेश होता है उसी प्रकार ऌकारद्वयविशिष्ट ॡ वार्तिक से विधेय माना गया है । हल्द्वय के पूर्वसाहचर्य का आश्रयण है । वार्तिकविधेय ॠ की ऋकारद्वय के स्थान में एवं ह्रस्व ऋकारद्वय के स्थान में ऌ की साधुता मानी जाती है; अत

अत एव ऌति न ऋकारः, नाप्यृति ऌकारः। अत एव वार्त्तिके 'ऋति' इति तपरकरणम्, उत्तरवार्त्तिके 'ऌति' इति च चरितार्थम्। 'तुल्यास्य' (१। १। ९) सूत्रे भाष्ये 'यदेतदृतीति एतदृत इति वक्ष्यामि' इत्येतद्वचनाश्रयणेन 'ऋऌवर्णयोः सावर्ण्यम्' (वा०) न कार्यमिति च सङ्गच्छते। उपस्थितरेफीयप्रयत्नत्यागे मानाभावादीषत्स्पृष्टाविमौ। विवृतत्वे हि विवृतऋकारऌकाराभ्यामनयोरपि ग्रहणे 'अकः सवर्णे' (६।१।१०१) इत्यनेनैव सिद्धे वार्त्तिकस्यैव वैयर्थ्यापत्तेः ॥

वार्त्तिकप्रत्याख्यानपक्षेऽपि एतादृशयोरेव तयोः साधुत्वम्; आरम्भ-प्रत्याख्यानपक्षयोः फलभेदस्यायुक्तत्वात्।

अत एव = तथैव साधुत्वस्वीकारादेव। परस्मिन् ऌकारे सति 'ऋति सवर्णे' इति विहितस्य ऋकारस्य, एवं परस्मिन् ऋकारे सति 'ऌति ऌ वा' इति विहितस्य ऌकारस्य विधानं न भवति।

केचित्तु व्यवस्थितविभाषाश्रयणाद् वार्त्तिकस्य 'क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः' इत्यनुरोधेन 'ऋति परे ऌति परे एव च वार्त्तिकयोस्तयोः प्रवृत्तिर्नान्यत्र' इति सिध्यतीति वदन्ति। तन्न। व्यवस्थितविभाषाणां परिगणनस्यानुपदमेव वक्ष्यमाणत्वेन तत्र अस्याः परिगणनाभावात्। तदेतद् ध्वनयन् अत्रार्थे प्रमाणान्तरमुपन्यस्यति—**अत एव** इति। उक्तार्थस्य इष्टत्वादेव। ऋति ऌति च वार्त्तिकस्थे तपरकरणस्य साफल्यम्। अन्यथा दीर्घस्यापि ऋकारस्य वार्त्तिकेन ऋकारादेशे दीर्घादिव्यावर्तकस्य तपरस्य करणे को लाभः स्यात्! एवं ऌतीत्यत्रापि बोध्यम्। न च तपरकरणेन उत्तरस्य ऋकारस्य ऌकारस्य च ह्रस्वस्यैव ग्रहणेऽपि पूर्वत्रापि ह्रस्वस्यैव ग्रहणेनेदं प्रमाणमत आह—**तुल्यास्येति**। तत्र ऋऌवर्णयोः सावर्ण्यस्य 'होतॄ ऌकारः' इत्यत्र दीर्घरूपं फलमभिधाय ऌति ऌ वेति वार्त्तिकेनास्य सिद्धिं विधाय उक्तम्—अत्र वार्त्तिके सवर्णपदमनुवर्तनीयम्। अनुवृत्त्यभावे 'दधि ऌकारीयति' अत्रातिप्रसङ्गः स्यात्। अतः ऋकारऌकारयोः सवर्णसंज्ञा विधेया। सवर्णसंज्ञां विना वार्त्तिकेनापि 'होतॄ ऌकारः' इत्यस्य सिद्धेर्नाशा। सवर्णसंज्ञायान्तु द्वयोरपि प्रवृत्तिः सुलभा।

ततः परमुक्तम्—**यदेतद् ऋतीति एतद् ऋत इति**। तथा च ह्रस्वाद् ऋकारात् परस्यैव वार्त्तिकेन विधानात् दीर्घाद् ऋकारात्परस्य दधि ॡकारीयतीत्यादौ च न वार्त्तिकप्रवृत्तिः। भाष्येणानेन 'ऋतः' इत्यस्य 'ऌति ॡ वा' इत्यत्र सम्बन्धेन ऋकारात् परस्यैव ऌकारस्य आदेशविधानं प्रतीयते। अनेन भाष्येण 'ऋतः' इति पाठेन ऋकारस्यैव ॡकारे परे वार्त्तिकस्य प्रवृत्तिः। तपरकरणाच्च दीर्घस्य ऋकारस्यापि व्यावृत्तिः वार्त्तिकद्वये सिद्धा भवति। वार्त्तिकद्वयेन विधीयमानयोः ईषत्स्पृष्टः प्रयत्नः; रेफऌकारयोः ईषत्स्पृष्टत्वात्। एतद्भिन्नयोस्तयोः विवृतत्वम्। विवृतयोः ऋकारऌकारयोः वर्णसमाम्नाये पाठात् ईषत्स्पृष्टयोः वार्त्तिकविधेययोः ऋकारऌकारयोः अच्त्वं न स्यात्; वर्णसमाम्नायेऽनयोः पाठाभावात्। अतः 'अच्त्वं वक्ष्यामि' इति वार्त्तिकमारब्धम्।

एव उत्तरवर्ती ऌकार के होने पर ऋकार तथा उत्तरवर्ती ऋकार के रहने पर ऌकार वार्तिक से नहीं होता। अत एव वार्तिकघटक ऋति तथा ऌति इसमें तपरोच्चारण चरितार्थ होता है।

८६. एङः पदान्तादति । ६ । १ । १०९ । **पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् । हरेऽव । विष्णोऽव ॥**

८७. सर्वत्र विभाषा गोः । ६ । १ । १२२ । **लोके वेदे चैङन्तस्य**

एङः पदान्तादति (६।१।१०९) । **पदान्तात् किम् ? भवति ॥**

सर्वत्र विभाषा (६।१।१२२) । **'प्रकृत्याऽन्तः' (६।१।११५) इति सूत्रात् प्रकृत्येत्यनुवर्तते । प्रकृतिशब्दोऽत्र स्वभाववाची; 'दुस्त्यजा प्रकृतिः' इत्यादौ तथा दर्शनात् ।**

यदि वार्त्तिकविधेययोरपि विवृतः प्रयत्न इष्येत तदा अच्त्वस्य स्वतः सिद्धत्वाद् 'अच्त्वं वक्ष्यामि" इति वार्तिकारम्भो वृथा स्यात्, अतो भिन्नः प्रयत्न आस्थेयः ॥

एङः पदान्तादति इति ॥ सूत्रे पदान्तादित्यस्य अपदान्ते प्रवृत्तिव्यावृत्त्यर्थतया न चारितार्थ्यम् । तथाहि–अपदान्ते हरे अस्, विष्णो अस् इत्यवस्थायाम् अनेन पूर्वरूपे हरेः, विष्णोः इत्यादीनां सिद्धौ 'ङसिङसोश्च' इति सूत्रारम्भो व्यर्थः स्यात् । अतः तत्सामर्थ्यात् 'अपदान्ताच्चेत् पूर्वरूपं तर्हि ङसिङसोरेव' इति नियम्यते । तथा च पदान्ते अस्य सूत्रस्य नियमबलात् प्रवृत्तौ पदान्तादित्यस्योपादानं सूत्रे निरर्थकम् ? इति न शङ्कनीयम्; विभक्तौ चेत् तर्हि ङसिङसोरेवेति विपरीतनियमस्यापि सम्भवेन'भवति' इत्यत्र भो अति इत्यवस्थायाम् अपदान्तस्यापि ओकारस्य पूर्वरूपं स्यात्, विभक्त्या सह पूर्वरूपे एव नियमस्य प्रवृत्तेरित्याह–**भवति इति** ॥

सर्वत्र विभाषा गोः ॥ सूत्रेऽस्मिन् 'प्रकृत्या' इत्यनुवर्तते । प्रकृतिशब्देन सांख्योक्ता त्रिगुणात्मिका प्रकृतिर्न गृह्यते । किन्तु स्वभावो गृहीतः । यथा 'स्वभावो दुरतिक्रमः' इत्यस्यानुवादभूते 'दुस्त्यजा प्रकृतिः' इत्यत्र स्वभाववाची प्रकृतिशब्दः । 'नान्तःपादमव्यपरे'

तुल्यास्य सूत्र में 'यदेतद् ऋतिस्तदेतदृत इति वक्ष्यामि' अर्थात् 'ऌति ऌ वा' इस वार्त्तिक में अनुवृत्त ऋति इसको ऋतः ऐसा पढ़ने से ऋकार को ऌकार के परवर्ती होने पर एकादेश होता है—ऐसा अर्थ करने से ऋकार ऌकार के सावर्ण्यबोधक 'ऋऌ वर्णयोः' इस वार्त्तिक का भाष्यकार ने खण्डन किया है । इससे स्पष्ट प्रतीति होती है कि उत्तरवर्ती ऋकार में वार्तिक प्रवृत्त नहीं होता; क्योंकि 'ऋतः' इससे पूर्व में ऋकार के रहने पर ही भाष्य की सङ्गति है । पूर्वोत्तर दोनों स्थलों में ऋकार के रहने पर पूर्व वार्तिक की प्रवृत्ति इष्ट है । रेफ और ऌकार का ईषत्स्पृष्ट प्रयत्न होने के कारण इसके स्थान में सम्पन्न वार्त्तिक से विधेय ॠ तथा ॡ का भी ईषत्स्पृष्ट प्रयत्न होता है । अत एव वार्त्तिकद्वय की चरितार्थता होती है । अन्यथा विवृत ॠ तथा ॡ का विधान दीर्घ के द्वारा सिद्ध हो जाने से वार्त्तिकद्वय का आरम्भ निरर्थक हो जायगा । वार्त्तिकद्वय में उच्चारित 'वा' शब्द विकल्पार्थक नहीं है, किन्तु समुच्चय अर्थ में है । यदि विकल्पार्थक माना जायगा तो दीर्घ पद की अनुवृत्ति करने से दीर्घ को विकल्प करना था । विधेय ॠ ॡ का निर्देश व्यर्थ हो जायगा । विधेय-निर्देश के वैयर्थ्य में सूत्रवैयर्थ्य के कथन का तात्पर्य है ॥

सर्वत्र विभाषा गोः ॥ इस सूत्र में 'प्रकृत्यान्तःपादमव्यपरे' इस सूत्र से 'प्रकृत्या' इसकी अनुवृत्ति है । उसका 'स्वभाव से' ऐसा अर्थ है । दुस्त्यजा प्रकृतिः (प्रकृति छूटती नहीं है) यहाँ स्वभाव अर्थ में प्रकृति शब्द का प्रयोग देखा गया है । प्रकृतिभाव अर्थात् स्वभाव से स्थिति

गोरति वा प्रकृतिभावः स्यात् पदान्ते । गोअग्रम्, गोऽग्रम् ।

'एङन्तस्य' किम्? चित्रग्वग्रम् । 'पदान्ते' किम्? गोः ।

८८. अवङ् स्फोटायनस्य । ६ । १ । १२३ ।

प्रकृत्या = स्वभावेनावस्थानमित्यर्थः । अत एव प्रकृतिभावे न पूर्वरूपम्, नाप्ययादय इति भावः ।

'नान्तः पादम्' इति पाठे त्वनेन सूत्रेण गोशब्दस्य यत्प्राप्तं तन्नेति व्याख्यानेन 'नान्तः पादम्' इत्यनेनैव पूर्वरूपत्वादिकं विकल्पेन निषिद्ध्यत इति बोद्धव्यम् ॥

अवङ् स्फोटायनस्य ॥ **स्फोटोऽयनं यस्य सः । स्फोटप्रतिपादक इत्यर्थः । स्फौटायनस्येति पाठे नडादित्वं कल्प्यम् । स्फोटायनोऽवङः स्मर्त्ता, अन्यस्तु तदभावस्येति स्मृत्यन्तरानुसन्धानद्वारेणात्र विकल्पो बोद्धव्यः ।**

इति न्यासे न-पदस्यानुवृत्त्या बाध्यसामान्यचिन्तापक्षाश्रयणेन गोशब्दस्य यत् प्राप्तं तन्नेति व्याख्यानं सूत्रस्य बोध्यम् ॥

अवङ् स्फोटायनस्य इति । अत्र स्फोटायनपदं स्फोटः अयनं परायणं प्रतिपाद्यविषयो यस्येत्यर्थकं विवक्षितम् । स्फोटप्रतिपादकः कश्चिदाचार्य इति भट्टाः । स्फौटायनस्येति सूत्रपाठे तु स्फोटविचारे निमित्ततया तस्य स्फोट इति नामैव जातम् । तस्य ऋषेरपत्यमिति विग्रहे नडादित्वात् फकि प्रत्यये 'आयनेयी' इत्यादिना आयन्रूपादेशे वृद्धौ उक्तरूपसिद्धिः । साधुत्वस्य नित्ये शब्दे नित्यतया नहि तद् विकल्पयितुं शक्यते । कदाचित् तदेव साधु, कदाचिच्च असाधु । किन्तु कार्यमवङ्रूपं विकल्पेन बोद्धव्यम् । विभाषापदमत्र पूर्वसूत्रात् नानुवर्तते । स्फोटायनाचार्यः अवङादेशं स्मरति, अन्यस्तु अवङोऽभावमित्यनुसन्धानेन रूपद्वयं सिद्ध्यति । ग्रन्थकारस्येदं मतं प्रतिभाति ॥

प्लुतप्रगृह्या अचि नित्यमिति सूत्रे नित्यग्रहणं किमर्थम्? विभाषा मा भूत् । पूर्वस्मिन्नेव योगे विभाषाग्रहणं निवृत्तमिति भाष्ये 'पूर्वस्मिन् योगे' इत्यनेन एकस्य योगस्य निर्देशात् प्लुतप्रगृह्या इति सूत्रात् अव्यवहिते पूर्वस्मिन् 'इन्द्रे च' इत्यत्र अनुवृत्तिवारणेन अवङिति सूत्रे विभाषापदस्यानुवृत्तिर्न वार्यते । अत्रापि अनुवृत्तौ इष्टायाम् 'पूर्वयोर्योगयोः' इति वक्तव्यं स्यात् । व्यवस्थितविभाषाश्रयणाच्चेति दीक्षितोक्त्या विभाषापदानुवृत्ति-

---

यहाँ इसका अर्थ है । अतः प्रकृतिभावस्थल में पूर्वरूप या अयाद्यादेश आदि कोई भी नहीं होता है । 'नान्तःपादम्' ऐसा सूत्रपाठ रहने पर 'न' इसकी अनुवृत्ति होने से बाध्यसामान्यचिन्तापक्ष के आश्रयण के द्वारा सभी प्राप्त सूत्रों का निषेध होगा । दोनों प्रकार की व्याख्या सम्भव हैं ॥

अवङ् स्फोटायनस्य ॥ स्फोट के प्रतिपादक ऋषिविशेष का नाम स्फोटायन है । स्फौटायन इस प्रकार सूत्रपाठ रहने पर 'स्फोटस्य तन्नामकस्य ऋषेरपत्यम्' इस विग्रह में 'नडादिभ्यः फक्' इससे फक् है । 'उक्त ऋषि अवङादेश का स्मर्ता हैं, अन्य ऋषि उसके अभाव के स्मर्ता हैं'—इस प्रकार अनुसन्धान करने पर विकल्प का लाभ होता है । इस सूत्र में 'अति' इसकी अनुवृत्ति न होने से 'गवेन्द्रः' यहां भी अवङ् की सिद्धि होने के कारण 'इन्द्रे च' इसका आरम्भ नित्य अवङ्-विधान के लिये है—यह भाष्योक्ति सङ्गत होती है । अन्यथा 'गवेन्द्रः' में परवर्ती अकार के न होने से अवङादेश की प्राप्ति इससे नहीं हो सकती ।

'अति' इति निवृत्तम् । अचि परे पदान्ते गोरवङ् वा स्यात् । गवाग्रम् । 'पदान्ते' किम् ? गवि । व्यवस्थितविभाषया--गवाक्षः ।।

निवृत्तमिति । **अत एव 'इन्द्रे' (६ । १ । १२४) इति सामर्थ्यान्नित्यमिति भाष्यादावुक्तम् ।**

गवाग्रमिति । **सन्निपातपरिभाषया अनित्यत्वाद्दीर्घ इति बोद्धव्यम् ।** व्यवस्थेति ।

"देवत्रातो गलो ग्राह इतियोगे च सद्विधिः ।
मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः ।।"

तेन प्राण्यवयवे न"—इति 'शाच्छोः' (७।४।४१) इति सूत्रे भाष्ये **स्पष्टम् ।**

दीक्षितमते प्रतिभाति । अनयोर्युक्तत्वायुक्तत्वे विद्वद्भिर्विचारणीये । **अत एवेति ।** अतीति नानुवर्तते इत्यङ्गीकारादेव । 'अवङ् स्फोटायनस्य' इत्यनेनैव 'गवेन्द्रः' इत्यत्र अवङि सिद्धे 'इन्द्रे च' इति सूत्रस्यारम्भसामर्थ्यात् नित्यत्वं सिध्यतीति भाष्योक्तव्याख्यानेन तस्यानुवृत्तिर्नेति कल्प्यते । तदनुवृत्तौ तु इन्द्रशब्दे परे पूर्वसूत्रेण अवङोऽप्राप्त्या 'इन्द्रे च' इत्यस्यावश्यकतया तस्य वैयर्थ्यापादनं भाष्यकृतोऽसङ्गतं स्यात् ।

व्यवस्थितविभाषां परिगणयति—**देवत्रात** इति । अत्र त्राधातोः 'क्तिच्क्तौ च संज्ञायाम्' इत्यनेन क्तप्रत्ययेन निष्पन्नस्य त्रात-शब्दस्य देवपदेन सम्बन्धे देवत्रात इत्यत्र 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' इत्यनेन संज्ञायां नत्वं न । यत्र तु क्रियाशब्दस्तत्र त्राणम्, त्रातः—इत्युभयं भवति । प्राण्यङ्गे 'अचि विभाषा' इत्यनेन लत्वे—गल इति । विषरूपेऽर्थे गर इत्यत्र लत्वं न । ग्रहधातोः 'विभाषा ग्रहः' इत्यनेन जलचरेऽर्थे नित्यं णप्रत्यये—ग्राह इति । नक्षत्रेऽर्थे पचादित्वाद् अच्प्रत्यये ग्रहः इत्येव भवति, न तु णप्रत्ययेन ग्राह इत्यपि । इतियोगे सद्विधिः = शतृशानचौ न । यथा—हन्तीति पलायते । पलायनस्य हेतुर्हननम् । तत्र हेतुताद्योतक इति-शब्दः । तद्योगे शतृप्रत्ययो न । ते = नत्वादिविधयो मिथः = एकस्मिन् विषये परस्परं न विभाष्यन्ते=न विकल्प्यन्ते, किन्तु विषयभेदेन । एवं वातायने गवाक्षः इत्यत्र नित्यमवङ् । गोः अक्षिणीव अक्षिणी यस्य इत्यर्थे बहुव्रीहिणा निष्पन्ने गोऽक्षः, गवामक्षि गोऽक्षि इत्यत्र वा प्राण्यङ्गे 'सर्वत्र विभाषा गोः' इत्यस्य अवङादेशस्य च न प्रवृत्तिः । संशितम्—इत्यत्र 'शाच्छोरन्यतरस्याम्' इत्यनेन व्रतेऽर्थे संपूर्वकात् शोधातोः तनूकरणार्थात् क्तप्रत्यये 'आदेचः' इत्यात्वे नित्यमित्वम् । संशितं व्रतं सम्यक् सम्पादितवान् इत्यर्थः ।

इस सूत्र में व्यवस्थितविभाषा होने से गौ की आंख के बोधनार्थ प्रयुक्त 'गो अक्षि' इसमें अवङ् के होने से 'गोऽक्षि' ऐसा ही प्रयोग होता है। व्यवस्थितविभाषा के स्थलों का निर्देश मूल में किया गया है। उसका विवरण इस प्रकार है—देवत्रातः इसमें 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' इससे संज्ञा में निष्ठासम्बन्धी तकार को नकार नहीं होता, अन्यत्र होता है। गृधातु से अच् प्रत्यय होने पर 'अचि विभाषा' इससे रेफ को लकार का विधान प्राण्यङ्ग (गला) अर्थ में नित्य ही होता है। विष अर्थ में लत्व नहीं होता। अत एव विष को गर कहते हैं। ग्रह धातु से जलचर अर्थ में 'विभाषा ग्रहः' इससे नित्य णप्रत्यय होता है। अतः ग्राहः

'अग्नीत्प्रेषणे' (८।२।९२) इति सूत्रे 'अग्नीदग्नीन्विहर' इत्यत्र एतद्व्यावृत्यर्थं वार्त्तिककृद् बहुलग्रहणघटितं न्यासं कृतवान्। तत्प्रत्याख्यानाय भाष्ये कृतेन विभाषेति योगविभागेन विभाषेत्यस्य व्यवस्थितविभाषात्वं ध्वनितम्। तथा 'अजेर्व्यघञपोः' (२।४।५६) इति च व्यवस्थितविभाषेति अजेर्वीति सूत्रे भाष्ये स्पष्टम्। न च व्यवस्थितविभाषयेन्द्रे नित्यावङि सिद्धे 'इन्द्रे च' (६।१।१२४) इति व्यर्थमिति वाच्यम्; भाष्योक्तातिरिक्तव्यवस्थितविभाषाणामप्रामाणिकत्वज्ञापनार्थं तत्सत्त्वादित्याहुः।

देवत्रात इत्यादिना व्यवस्थितविभाषायाः परिगणनं न, अतिरिक्तस्थलेऽपि अस्याः दर्शनात् इति वक्तुमुपक्रमते—**अग्नीत्** इति। 'अग्नीत् प्रेषणे परस्य च' (८।२।९२) इति भाष्ये 'अग्नीत्प्रेषणे' इत्यतिप्रसङ्गो भवति, इहापि प्राप्नोति—अग्नीदग्नीन् विहर। सिद्धमेतत्, कथम्? 'ओश्रावये परस्येति वक्तव्यम्'। ओ३ श्रा३ वय। बहुलमन्यत्रेति वक्तव्यम्। अपर आह—ओश्रावया श्रावययोरिति वक्तव्यम्। ओ३ श्रा३वय। बहुलमन्यत्रेति वक्तव्यम्। उद्धरा३ उद्धर, आहरा ३ आहर। योगविभागः करिष्यते—अग्नीत् प्रेषणे परस्य च विभाषा, ततः परम्—पृष्टप्रतिवचने हेः, विभाषा इत्येव। अयमाशयः—यथाश्रुतसूत्रे अग्नीदग्नीन् विहर इत्यत्रापि प्लुतः प्राप्नोति। अतः ओश्रावये परस्येति वचनं क्रियताम्। अथवा ओश्रावयाश्रावययोः परस्येत्येवं क्रियते। तेन आश्रवयेत्यस्यापि संग्रहः। ओश्रावय आश्रावय इत्यनयोरादेस्ततः परस्य च अचः प्लुतो भवतीत्यर्थः। अनेनापि उद्धरा३ इत्यत्र अन्त्यस्य संग्रहो न जायते। अतो बहुलवचनात्तत्र नाऽऽदेर्न अनन्त्यस्य, किन्तु अन्त्यस्य। बहुलमिति यथाश्रुतसूत्रे एव क्रियते। बाहुलकाद् अग्नीदग्नीन् इत्यादौ न प्रवृत्तिः। अथवा 'विभाषा पृष्ट' इति सूत्राद् विभाषापदं पृथक्कृत्य 'अग्नीत्प्रेषणे परस्य च विभाषा,' ततः 'पृष्टप्रतिवचने हेः'; तथा च विभाषा प्लुतविधानात् क्वचित् स्यात्, क्वचिच्च न स्यात्, क्वचिदुभयं स्यात्—इत्याशयेन योगविभागद्वारा बहुलवचनं निराकृतं भाष्यकृता। व्यवस्थितविभाषाश्रयणाद् निमित्ताभावेऽपि क्वचित् प्रवृत्तिः, सत्यपि निमित्ते अप्रवृत्तिः शक्यते कल्पयितुम्। तथाच परिगणितव्यवस्थितविभाषासु अस्या विभाषाया गणनाभावेन व्यवस्थितविभाषात्वानुपपत्त्या नेदं परिगणनमिति युक्तम्।

का प्रयोग होता है,। सूर्यादि ग्रहों के अर्थ में णप्रत्यय नहीं होता, किन्तु अच् प्रत्यय होता है। अतएव वृद्धि न होने से ग्रह का प्रयोग होता है। 'हन्तीति पलायते' यहां पलायन का हनन हेतु होने से 'लक्षणहेत्वोः क्रियायाः' इससे हेतुत्व के द्योत्य होने पर भी शतृरूप सत्संज्ञक प्रत्यय नहीं होता। अन्यत्र 'अर्जयन् वसति' यहां शतृ हो जाता है। संशितम्—यह प्रयोग व्रत अर्थ में होता है। यहां 'शाच्छोरन्यतरस्याम्' इससे नित्य ही इत्व होता है। अन्यत्र विकल्प से होता है। इसी प्रकार खिडकी अर्थ में प्रयुक्त गवाक्षः इसमें अवङादेश नित्य ही होता है। अन्यत्र नहीं होता।

'अग्नीदग्नीन् विहर' यहाँ 'अग्नीत् प्रेषणे परस्य च' इस सूत्र से प्राप्त प्लुत की व्यावृत्ति के लिये वार्त्तिककार ने बहुलघटित उक्त सूत्र का न्यास किया। बाहुलक होने के कारण कहीं सूत्र की प्रवृत्ति होने से उक्त प्रयोग में प्लुत नहीं भी होता है। भाष्यकार ने 'विभाषा पृष्टप्रतिवचने

८९. इन्द्रे च । ६ । १ । १२४ । **गोरवङ् स्यादिन्द्रे । गवेन्द्रः ॥**

इन्द्रे च (६।१।१२४) ॥ **क्वचिद्भाष्यपुस्तके च-शब्दरहितः पाठः । इन्द्रावयवेऽचीत्यर्थः । तेन षष्ठीतत्पुरुषोत्तरपदषष्ठीतत्पुरुषे 'गवेन्द्रयज्ञः' इत्यादावङ्सिद्धिः । अन्यथा वाक्ये गोशब्दस्येन्द्रपरत्वासम्भवेन समासाक्षेपादिन्द्रशब्दस्योत्तरपदत्व एव प्रवृत्तिः स्यात् ॥**

'अजेर्व्यघञपोः' (२ । ४ । ५६) इति सूत्रे भाष्ये समजनं समज्येत्यत्र अनेन वीरूप आदेशः प्राप्नोति ? इत्याशङ्क्य अप्प्रत्ययघटकाकारेण अप्प्रत्ययघटकेन पकारेण अप्प्रत्याहारमाश्रित्य दूषणं परिहृत्य पुनराशङ्कितम्—तथासति संवीतिर्न सिध्यति । एवं तर्हि नार्थः उपसंख्यानेन, नापि घञपोः प्रतिषेधेन । चक्षिङः ख्याञ् वा लिटि, ततो वक्ष्यामि—अजेर्वी । अजेर्वीभावो भवति वा व्यवस्थितविभाषा च" इत्युक्तं भाष्ये । अनेन पूर्वनिर्दिष्टा व्यवस्थितविभाषा ततोऽन्यत्रापि स्वीकृतेति लभ्यते । न च व्यवस्थितविभाषाश्रयणेनैव 'गवेन्द्रः' इत्यत्र नित्यमवङि सिद्धे 'इन्द्रे च' इति सूत्रं व्यर्थमिति वाच्यम्; भाष्योक्तातिरिक्तस्थले व्यवस्थितविभाषा अप्रामाणिकी इति बोधनाय तस्य सूत्रस्यावश्यकत्वात् । व्यवस्थितविभाषात्वञ्च—विभाषाशास्त्रीयोद्देश्यतावच्छेदकं यद् व्याप्यरूपं तद् व्यापकस्य भावाभावयोरन्यतरस्य विधायकत्वम् । उद्देश्यतावच्छेदकव्यापकत्वं विधेये इति नियमः ॥

इन्द्रे च ॥ अनेन इन्द्रावयवेऽचि परे अवङ् भवति । तेन इन्द्रस्य यज्ञः इन्द्रयज्ञः, तस्य गोपदेन सह समासे गवेन्द्रयज्ञः इत्यत्र अवङ् सिध्यति । अन्यथा वाक्ये गोशब्दात्

है' इससे, इसमें विभाषा पद का योगविभाग कर, विभाषाविधान के द्वारा उक्त दोष का परिहार किया । इससे व्यवस्थितविभाषा का ध्वनन होता है । अन्यथा 'ओश्रावय आश्रावययोः परस्य च' इस न्यासान्तर के अनन्तर अन्य के सङ्ग्रहार्थ बहुलपद से घटित दूसरा न्यास किया । इस प्रकार बहुल-पदघटित सूत्र के रहने पर अन्यत्र प्लुत की प्रवृत्ति बहुल प्रकार से होती है । अतः न आदि को और न पर को, किन्तु अन्त्य को ही नित्य प्लुत होता है । विभाषापद के योगविभाग द्वारा पूर्वोक्त व्यवस्था नहीं हो सकेगी । अतः व्यवस्थितविभाषा में भाष्य का तात्पर्य स्वीकार करना आवश्यक है ।

'अजेर्व्यघञपोः' इस सूत्र में भी भाष्य में व्यवस्थितविभाषा का आश्रयण किया गया है । अत एव समाजः, समजः; उदाजः, उदजः—इत्यादि स्थल में वी आदेश नहीं होता ।

शंका—व्यवस्थितविभाषा मानने से ही उत्तरवर्ती इन्द्रशब्द के रहने पर गोशब्द को 'अवङ् स्फोटायनस्य' इस सूत्र से नित्य अवङादेश की सिद्धि हो जाने से 'इन्द्रे च' इस सूत्र का आरम्भ क्यों किया ?

समाधान—इस सूत्र के आरम्भ से यह सूचित होता है कि भाष्यानुक्त स्थल में व्यवस्थित विभाषा का आश्रयण नहीं होता । अतः 'गवाक्षः' इसके अतिरिक्त व्यवस्थितविभाषा का इस सूत्र में आश्रयण नहीं है । इसलिये सूत्र का आरम्भ है ॥

इन्द्रे च ॥ इसका चकाररहित पाठ भी किसी किसी भाष्य-पुस्तक में मिलता है । इन्द्र शब्दावयव अच् के परवर्ती होने पर अवङादेश होता है—यह इस सूत्र का अर्थ है । अतएव 'गवेन्द्र-

अथ प्रकृतिभावः

९०. प्लुतप्रगृह्या अचि नित्यम् । ६ । १ । १२५ । **प्लुताः प्रगृह्याश्च वक्ष्यन्ते, तेऽचि परे नित्यं प्रकृत्या स्युः ।**

'प्लुतप्रगृह्याः' (६।१।१२५) इत्यस्य **प्रकृत्येति पाठे एव सामञ्जस्यं मत्वाऽऽह**—अथ प्रकृतीति । **न चैतद्घटकपदार्थज्ञानाय प्रगृह्यत्वादिकथनं पूर्वं युक्तमिति वाच्यम्; 'इन्द्रे च'** (६।१।१२४) इत्यत्र **प्राचीनपठितनित्यग्रहणस्य प्रामादिकत्वं बोधयितुं तद-व्यवहितमेतत्सूत्रलेखनात् । तत्र नित्यग्रहणे तदव्यवहितोत्तरैतत्सूत्रे तद्वैयर्थ्यं स्पष्टमेवेत्याशयेनाह**—प्लुताः प्रगृह्याश्च वक्ष्यन्त इति ।

परत्वम् इन्द्रशब्दस्य नास्ति; विभक्त्या व्यवधानात् । ततः समासाक्षेपे इन्द्रोत्तरपदक-समासस्य प्रकृते उदाहरणे अभावात् अनेन अवङ् न स्यात् । अतः इन्द्रावयवे अचि अवङ् इत्यर्थः श्रेयस्करः । आक्षेपश्चात्र श्रुतार्थापत्तिपरः ॥

प्लुतप्रगृह्या अचि नित्यम् ॥ एतत्-सूत्रव्याख्यानोपक्रमे 'अथ प्रकृतिभावः' इत्युल्लेखो नोचितः । किन्तु 'सर्वत्र विभाषा गोः' (६ । १ । १२२) इत्यनेनापि प्रकृति-भावस्य विधानात् एतत्सूत्रापेक्षया पूर्वं तस्य व्याख्यातत्वेन तत्रैव तदुल्लेखो युक्तः । इह तु तथा पाठः अपपाठः । किञ्च—प्रकृतिभावमध्ये 'अवङ् स्फोटायनस्य' 'इन्द्रे च' इत्येतयोः अवङ्विधायकतया पाठो न युज्यते, अनयोः पाठो बहिरेव युक्तः ?—इति न शङ्कनीयम् । मध्येपठिते अवङ्विधायकसूत्रद्वये गोपदानुवृत्तेरावश्यकत्वेन गोपदघटितस्य 'सर्वत्र विभाषा गोः' इति सूत्रस्य अनयोः पूर्वमुल्लेखः । ततः परमनयोः पाठो गोपदा-नुवृत्तेः सौकर्येण बोधनाय कृतः । अतः 'अथ प्रकृतिभावः' इत्यस्य अनयोः परमेव उल्लेखो युक्तः ।

तत्र तथा पाठे, मध्ये अनयोः पाठे विसङ्गतिः स्यात्—इति कस्यचित् समाधानं न युक्तमिति बोधयितुमाह—**प्लुतेति** । सूत्रे 'प्लुतप्रगृह्याः' इत्यस्य प्रथमान्ततया 'नान्तः पादम्' इति सूत्रपाठे न-पदस्यानुवृत्तौ अनेन सहान्वयो न स्यात् । तदनुरोधेन षष्ठ्यन्ततया विपरिणामेन दीर्घादिकार्यं नेत्यर्थः सम्भवेत् । सर्वेषां सन्धिकार्याणां व्यावृत्तये बाध्य सामान्यचिन्तापक्षश्च आश्रयणीयः—इति गौरवम् । 'सर्वत्र' इति सूत्रे तु गोरित्येवं षष्ठ्यन्तत्वेन निर्देशात् नेत्यनुवृत्त्या निषेधार्थप्रतिपादनेऽपि अन्वयसम्भवात् प्रकृतिभाव-

---

यज्ञः' इत्यादि में भी अवङ् की सिद्धि होती है । अन्यथा वाक्य में गोशब्दोत्तर विभक्ति द्वारा व्यवधान होने से अव्यवहित उत्तरवर्ती इन्द्रशब्द का प्रयोग असम्भव होने के कारण समास का आक्षेप होगा । ऐसी अवस्था में इन्द्रोत्तरपदक समास में अवङादेश के होने से उक्त प्रयोग इन्द्र-शब्द के उत्तरपद में न होने से अवङ् की प्राप्ति नहीं होगी । पूर्वोक्तार्थ के स्वीकार करने से सर्वेष्टसिद्धि होती है ॥

अच्सन्धिप्रकरण पूर्ण हुआ ॥

'सर्वत्र विभाषा गोः' प्रकृतिभावविधायक इस सूत्र का पूर्व में उल्लेख किया जा चुका है । अतः इसके पहले प्रकृतिभावप्रकरण का निर्देश करना उचित था । इस सन्देह की निवृत्ति के लिये लिखते हैं—**प्लुतप्रगृह्या**इति । 'नान्तःपादम्' इस प्रकार के पाठ से भी 'सर्वत्र विभाषा

एहि कृष्ण३ अत्र गौश्चरति । हरी एतौ ।

'नित्यम्' इति किम् ? 'हरी एतौ' इत्यादावयमेव प्रकृतिभावो यथा स्यात्, 'इकोऽसवर्णे' (सू० ९१) इति ह्रस्वसमुच्चितो मा भूत् ॥

अचीत्यनुवर्त्तमाने पुनरज्ग्रहणं प्रत्यासत्त्या यत्राचि अनयोः प्रकृतिभावस्तदज्निमित्तकार्यस्यैव तेनाभाव इत्यर्थलाभार्थम्, तेन 'जानु उ अस्य रुजति, जानू अस्य' इत्यादौ सवर्णदीर्घरूपसन्धिर्भवत्येव ।

एहि कृष्णेति । 'दूराद्धूते च' इति प्लुतः । अत्र प्लुतस्याऽऽश्रयात् सिद्धत्वं बोद्धव्यम् । नित्यमिति किमिति । वाग्रहणनिवृत्त्यैव तल्लाभ इति प्रश्नः । मा भूदिति । नित्यग्रहणसामर्थ्येन पुनर्विधानाद् बाधकविषयेऽप्ययमेवेति भावः ॥

विधायकत्वं नावश्यकमिति मत्वा 'सर्वत्र' इति सूत्रम् पपाठ । तदनन्तरमवङ्विधायकं सूत्रद्वयं निर्दिदेश । अतः परम् 'अथ प्रकृतिभावः' इत्युल्लिख्य 'प्लुतप्रगृह्याः' इत्यादौ 'नान्तः' इति पाठे असामञ्जस्यं मत्वा 'प्रकृत्या' इति पाठे एव अन्वयस्य सौलभ्यात् 'प्रकृत्या' इति पाठ एव आदृतः । 'सर्वत्र' इति सूत्रे तु नेति पाठेऽपि निर्वाह इति तात्पर्येण पूर्वसूत्रे न तदुल्लेख इति चिदस्थिमालाकृतः ।

गोः' इसमें निषेधार्थ प्रतीति द्वारा ही इष्ट प्रयोग का निर्वाह हो सकता है । अतः प्रकृतिभाव का विधान आवश्यक नहीं है । किन्तु 'प्लुतप्रगृह्या' इस सूत्र की 'प्रकृत्यान्तः पादम्' इस पाठ के द्वारा ही संगति हो सकती है, क्योंकि नञ् से निषेध का बोध होने से प्रथमान्तनिर्दिष्ट प्लुत और प्रगृह्य का ही निषेध हो जायगा । अतः प्रकृतिभाव-विधान से ही यहाँ सामञ्जस्य होने से प्रकरण का प्रारम्भ यहाँ से किया गया ।

शङ्का—वाक्यार्थज्ञान के लिये पदार्थ का ज्ञान आवश्यक होता है । अतः प्लुत और और प्रगृह्य पदार्थ ज्ञान के लिये इनके परिचायक सूत्रों का निर्देश पहले होना चाहिये ? ऐसा क्यों नहीं किया गया ?

समाधान—'इन्द्रे च' इसमें कुछ लोगों ने नित्य शब्द का पाठ माना है । इस पाठ की असंगति व्यक्त करने के लिये अपेक्षित सूत्रों के पहले 'प्लुतप्रगृह्या' इसका निर्देश किया गया है । यदि इसके पूर्व सूत्र में नित्य शब्द का उपादान होता तो इसमें नित्यग्रहण करने की आवश्यकता नहीं थी; क्योंकि पूर्व सूत्र से ही 'नित्य' पद की अनुवृत्ति सिद्ध है । इस आशय से प्रथम उल्लेख है ।

शंका—'इको यणचि' इससे अनुवृत्ति द्वारा अच् का लाभ हो जाने से इस सूत्र में अच् पद का उपादान व्यर्थ है ?

समाधान—जिस अच् को निमित्त मानकर प्लुत और प्रगृह्य को प्रकृतिभाव होता है उसी अच् की निमित्तता से होने वाले सन्धिकार्यों का अभाव बोधित करने के लिये इसमें अच् का ग्रहण है । अतएव 'जानु ऊ अस्य रुजति' इसमें अकारनिमित्तक प्रकृतिभाव से उकारद्वयसम्बन्धी दीर्घ का प्रतिबन्ध नहीं हुआ ।

'एहि कृष्ण' इसमें 'दूराद्धूते च' इससे प्लुत होता है । प्लुत का आश्रयण कर प्रकृतिभाव

९१. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च । ६ । १ । १२७ । **पदान्ता**

इकोऽसवर्णे (६।१।१२७) ॥ **'एङः'** (६।१।१०९) **इत्यतः पदान्तादित्यनुवृत्तं प्रथमया विपरिणम्यत इत्याह**—पदान्ता इति । वेति । **ह्रस्वयणोर्विधानसामर्थ्यात्तु न विकल्पसिद्धिः; अपदान्तादौ यणश्चरितार्थत्वात् ।**

यद्यपि पदार्थबोधस्य वाक्यार्थबोधे हेतुत्वात् प्लुतप्रगृह्यसंज्ञयोः प्रथमं निरूपणमावश्यकम्, तथापि 'इन्द्रे च' इति सूत्रे नित्यमिति पाठस्य भ्रमं वारयितुं संज्ञासूत्रमपेक्ष्य 'प्लुतप्रगृह्याः' इति सूत्रमेव प्रथमं पठितम् । अत्र नित्यमित्यस्य ग्रहणेन पूर्वस्मिन् तस्य पाठाभावः सिध्यति, पूर्वत्वसत्त्वे पुनः परत्रात्र नित्यपदघटितसूत्रपाठस्य असङ्गतिः स्यात् । 'अचि' इति 'इको यणचि' इति सूत्रादनुवर्तते । 'जानु उ अस्य रुजति' इत्यत्र 'निपात एकाजनाङ्' इति सूत्रेण उ इत्यस्य प्रगृह्यसंज्ञा । अत्र सूत्रे अच्-पदानुवृत्त्यैव अच्पदार्थे लब्धे पुनः सूत्रे अच्पदोपादानेन यस्मिन्नचि प्रकृतिभावः तदज्निमित्तकमेव सन्धिकार्यं न भवति । तेन पूर्वोक्ते उदाहरणे उ इत्यस्य अस्येति घटकाकारेऽचि प्रकृतिभावविधानात् तन्निमित्तकस्य यणो व्यावृत्तावपि जानु उ इत्यनयोः दीर्घो भवत्येव । तथा च 'जानू अस्य' इति प्रयोगः साधुरेवेति मनसि विधायाह—**अचीति । तदज् इति ।** तद् अज् निमित्तं यस्य कार्यस्य तदिति बहुव्रीहिः ।

ननु प्लुतस्य त्रैपादिकत्वात् सापादिकस्य 'प्लुतप्रगृह्याः' इति सूत्रस्य दृष्ट्या असिद्धत्वात् प्रकृतिभावो न प्राप्नोति ? अत आह—**अत्रेति ।** आश्रित्य = अनूद्य । प्लुतमनूद्य प्रकृतिभावस्य विधानात् सर्वत्र प्लुतस्यासिद्धत्वे प्रकृतिभावविधानस्य वैयर्थ्यापत्त्या प्लुतस्य सिद्धत्वं कल्प्यते इत्यदोषात् । **बाधकेति ।** 'इकोऽसवर्णे' इत्यस्य प्रकृतिभावापेक्षया परत्वेन बाधकत्वं प्राप्तम् । वापदस्य अननुवृत्त्यैव नित्यत्वे लब्धे नित्यग्रहणस्य पुनर्विधानार्थतया प्रकृतिभाव एव । तेन 'हरी एतौ' इत्यत्र 'इकोऽसवर्णे' इति ह्रस्वो मा भूत् । अत्र = प्रकृतिभावे । **बाधकेति ।** परत्वात् बाधकविषये इति भावः ।

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च इति ॥ सूत्रघटकम् इकः इति पदं प्रथमाविभक्तिबहुवचनान्तम् । एतदनुरोधाद् अनुवृत्तं पदान्तादिति पदं प्रथमान्तेन विपरिणम्यते । तदाह—**एङ इत्यत** इति । **प्रथमया इति ।** प्रथमान्तेन इत्यर्थः । सवर्णेऽचि दीर्घेण यणो बाधाद् असवर्णेऽचि एव यण्-ह्रस्वयोः प्राप्त्या सूत्रयोरनयोरारम्भसामर्थ्यात् पर्यायेण द्वयोः प्रवृत्तौ सिद्धायां शाकल्यग्रहणमुत्तरार्थमिति केषाञ्चिन्मतं निरस्यति—**अपदान्तेति ।** गौर्यौ

का विधान है । अतः प्रकृतिभाव-विधान के सामर्थ्य से सापादिक प्रकृतिभाव की दृष्टि से त्रैपादिक प्लुत की असिद्धता नहीं होती ।

शंका—'वा' की निवृत्ति से ही प्रकृतिभाव की नित्यता सिद्ध है । अतः इसमें नित्यपदोपादान निष्फल है ?

समाधान—नित्य-ग्रहण सामर्थ्य से पुनः वृद्धि का विधान है । अत 'हरी एतौ' में परत्वात् प्राप्त 'इकोऽसवर्णे' इस सूत्र का बाध होने से ह्रस्वसहित प्रकृतिभाव नहीं हुआ ॥

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥ इसमें 'एङः पदान्तादति' इस सूत्र से अनुवृत्त 'पदान्तात्' इसका प्रथमान्त में विपरिणाम है । ह्रस्व और यण्—उभय विधान के सामर्थ्य से दोनों की

इकोऽसवर्णेऽचि परे प्रकृत्या स्युर्ह्रस्वश्च वा । अत्र 'ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्यः' इति भाष्ये स्थितम् । चक्रि अत्र, चक्र्यत्र ।

'पदान्ताः' इति किम् ? गौर्यौ ।

'न समासे' (वा०) । वाप्यश्वः । सिति च (वा०) । पार्श्वम् ॥

सामर्थ्यदिवेति । **येन प्रकृतिभावाकर्षणेऽपि 'ऋत्यकः' (६।१।१२८) चानुकृष्टत्वेन तदसम्बन्ध इति तदर्थं ह्रस्वविधानसामर्थ्यस्याऽऽवश्यकत्वेन चकारो व्यर्थ** इति भावः ।

भाष्ये स्थितमिति । **प्रकृतसूत्रे इति शेषः । एतेन 'ह्रस्वाभावे प्रकृतिभावार्थं चकारः' इति न्यासाद्युक्तमपास्तम् । 'चक्री अत्र' इति तु संहिताया अविवक्षायां बोध्यम् ।**

न समासे' (का० वा०) 'सिति च' (का० वा०) इति वार्त्तिकम् । पार्श्वमिति । **'पर्शर्वा णस् वक्तव्यः' (का० वा०) इति णस् । 'सिति च' इति पदत्वम् ॥**

इत्यत्र अपदान्ते गौरीशब्दघटके ईकारे 'इकोऽसवर्णे' इत्यस्य पदान्ते एव प्रवृत्त्या अत्राप्रवृत्त्या यणादेशस्य चारितार्थ्याद् वैयर्थ्याभावेन ह्रस्वोऽपवादत्वात् यणं बाधिष्यते । तथा च ह्रस्वस्य वैकल्पिकत्वालाभेन शाकल्यग्रहणं विकल्पलाभार्थमावश्यकम् । 'अपदान्तादौ' इत्यत्र आदिपदेन 'वाप्यश्वः' इत्यादिसमासस्थलस्य संग्रहः; तत्र 'न समासे' इति ह्रस्वस्य निषेधेन यणश्चारितार्थ्यात् ।

चकारेण प्रकृतिभावापकर्षणे 'चानुकृष्टं नोत्तरत्र' इति परिभाषया चानुकृष्टत्वेन 'ऋत्यकः' इत्युत्तरसूत्रे तदपकर्षणस्याभावाद् ह्रस्वत्वविधानसामर्थ्यादेव 'ब्रह्म ऋषिः' इत्यत्र गुणस्य वारणीयतया 'अन्ते रण्डाविवाहश्चेद् आदावेव कुतो न हि' इत्याभाणकानुसारेण इहापि तथैव ह्रस्वत्वविधानसामर्थ्यादेव सन्धिकार्याणां व्यावृत्तेः सम्भवात् प्रकृतिभावापकर्षणाय चकारोऽत्र सूत्रे न कार्यम् । चकारप्रत्याख्यानस्य भाष्यसम्मततया ह्रस्वाभावे प्रकृतिभावार्थश्चकारः—इति फलान्तरकल्पना न कर्तव्या । **वार्त्तिकमिति ।** अत्र एकवचनेन एकमेव वार्त्तिकमिति सूचितम् । **पदत्वमिति ।** पदत्वेन भत्वस्य बाधाद् 'ओर्गुणः' इत्यनेन 'पार्श्वम्' इत्यत्र गुणो न ॥

पर्यायता सिद्ध है । अतः विकल्पार्थक शाकल्यग्रहण उत्तरार्थ है—इस प्रकार का कथन सङ्गत नहीं है । क्योंकि 'गौर्यौ' इत्यादि स्थल में अपदान्त ईकार में यण्-विधान चरितार्थ है । पदान्त इक् में ही 'इकोऽसवर्णे' इसकी प्रवृत्ति होती है । आदिपद से 'वाप्यश्वः' इसका संग्रह है । यहाँ 'न समासे' इससे प्रकृतिभाव का निषेध होने से यण् का विधान चरितार्थ है । अतः विकल्पार्थक शाकल्यग्रहण चरितार्थ है ।

सामर्थ्यादिति । 'प्रकृतिभाव के अनुकर्षणार्थ चकार का उपादान सूत्र में है'—ऐसा स्वीकार करने पर "चानुकृष्टं नोत्तरत्र"=चकार से अनुकृष्ट का सम्बन्ध अग्रिम सूत्र में नहीं होता—एतदर्थक परिभाषा से "ऋत्यकः" इस में चानुकृष्ट प्रकृतिभाव की अनुवृत्ति नहीं होगी : अतः 'ब्रह्म ऋषिः' यहाँ केवल ह्रस्व का विधान होगा । गुण की व्यावृत्ति ह्रस्व-विधानसामर्थ्य से

९२. ऋत्यकः । ६ । १ । १२८ । **ऋति परेऽकः प्राग्वत् । ब्रह्म ऋषिः, ब्रह्मर्षिः । 'पदान्ताः' इत्येव । आर्च्छत् ।**

ऋत्यकः (६।१।१२८) ॥ **सवर्णार्थमनिगर्थञ्चेदम् । होतृऋकारः । ब्रह्मऋषिः । आर्च्छदिति । आटो धात्ववयवत्वेनापदान्तत्वादिति भावः । एतेन 'आटश्च' (६।१।९०) इति पुनर्वृद्धिविधानार्थेन चेन 'उस्योमाङ्क्षु' (का० वा०) पररूपबाध·**

ऋत्यकः । 'आटश्च' इत्यत्र चकारः पुनर्वृद्धिविधानाय कृतः[1] । अत एव उसि ओमि आङि च पररूपं बाधित्वा वृद्धिरेव यथा भवति, तथैव आर्च्छदित्यादावपि

करनी होगी । इसी प्रकार 'चक्रि अत्र' यहाँ भी ह्रस्वविधानसामर्थ्य से यण् की व्यावृत्ति सिद्ध हो जाने से प्रकृतिभाव के अनुकर्षण के लिये सूत्र में चकार आवश्यक नहीं है । चकार-ग्रहण की अनुपादेयता प्रकृत सूत्र के भाष्य में स्पष्ट है । न्यासकार की 'ह्रस्वाभावपक्ष में प्रकृति-भाव के द्वारा यण् की व्यावृत्ति के अनुकर्षणार्थ चकार का ग्रहण है'—इस प्रकार की उक्ति भाष्य-सम्मत न होने से निरस्त है । इस मत में 'चक्री अत्र' इस प्रयोग की उपपत्ति संहिता की अविवक्षा से करनी होगी ।

'न समासे', 'सिति च'—ये दोनों सम्मिलित एक ही वार्तिक हैं; क्योंकि 'वार्तिकम्' इस प्रकार एकवचनान्त का भाष्य में निर्देश है । वक्तव्यम्, वाच्यम्—इन पदों का उक्त वचन में निर्देश न होने से सूत्रभ्रमवारणार्थ वार्तिक पद का प्रयोग है । प्रथम भाग से समास में प्रकृति-भाव का निषेध होने से 'वाप्यामश्वः' इस विग्रह से 'वाप्यश्वः' में "सप्तमी शौण्डैः" इससे समास होने पर प्राप्त प्रकृतिभाव का निषेध होता है । अत एव यण् की सिद्धि हुई । द्वितीय भाग से 'सकारः इद् यस्य स सित्' । सकारेत्संज्ञक प्रत्यय के परवर्ती होने पर शाकल प्रकृतिभाव का निषेध होता है । अतः 'पर्शूनां समूह' इस अर्थ में पार्श्व शब्द है । 'पर्शु' पार्श्व भाग की हड्डी का नाम है । पर्शु शब्द से 'पर्श्वा णस् वक्तव्यः' इससे णस् प्रत्यय होने के अनन्तर "इकोऽसवर्णे" इससे प्राप्त प्रकृतिभाव का निषेध होने से यण् होता है । और "ओर्गुणः" इससे विहित गुण नहीं होता; क्योंकि भसंज्ञा का "सिति च" (१।४।१६) इस सूत्र से विहित पदसंज्ञा के द्वारा बाध हो जाने से भसंज्ञानिमित्तक गुण की अप्राप्ति है ॥

ऋत्यकः ॥ सवर्ण एवं इक् से भिन्न को प्रकृतिभाव के विधानार्थ इसका आरम्भ है । 'आर्च्छत्' इसमें धातु को आडागम होने से आट् पदान्त नहीं है । आकार आङ् उपसर्ग का नहीं

---

१. **'ओमाङोश्च' इति सूत्रे भाष्ये स्फुटमेतत् । तथाहि–उस्योमाङ्क्ष्वाटः प्रतिषेधो वक्तव्यः । उस्त्रमैच्छत् औस्त्रीयदित्यत्र क्यजन्तात् लङि 'उस्यपदान्तात्' इत्यनेन पररूपम्; औङ्कारीयत् इत्यत्र ओङ्कारमैच्छदिति विग्रहे क्यचि लङि आडागमे 'ओमाङोश्च' इति पररूपम्; ऊढमैच्छत् इति विग्रहे क्यचि लङि आडागमे वृद्धौ औढीयत् इति, अत्र 'ओमाङोश्च' इति पररूपं प्राप्तम्, तस्य प्रतिषेधः कृतः । स तर्हि प्रतिषेधो वक्तव्यः ? न वक्तव्यः; उक्तम्—'आटश्च' इत्यत्र चकारस्य प्रयोजनम्—आटोऽचि वृद्धिरेव स्यात्, यदन्यत् प्राप्नोति तन्मा भूदिति ।**

समासेऽप्ययं प्रकृतिभावः । सप्तऋषीणाम्, सप्तर्षीणाम् ।।

९३. वाक्यस्य टेः प्लुत उदात्तः । ८ । २ । ८२ । **इत्यधिकृत्य ।।**

वत्प्रकृतिभावस्यापि बाधेनेष्टसिद्धिरित्यपास्तम् ।

समासेऽपीति । **व्याख्यानादिति भावः ।**

सप्तऋषीणामिति । 'दिक्संख्ये' (२।१।५०) **इति समासः ।।**

प्रकरणशुद्धये प्रकृतिभावविधायकं सूत्रद्वयमुपन्यस्य 'प्लुतप्रगृह्याः' इति सूत्राकाङ्क्षितप्लुतप्रगृह्ययोर्मध्ये प्रथमोपात्तत्वात् प्लुतप्रकरणमारभते—वाक्यस्य टेरिति । **वाक्यस्येत्यभावे 'पदस्य टेः' इत्यर्थेऽनन्त्यस्यापि पदस्य टेः प्लुतः स्यात् । तत्सत्त्वे तु**

प्रकृतिभावं बाधित्वा वृद्धिर्भविष्यति इति केनचिदुक्तं न युक्तम् । इत्याह—**एतेनेति** । अपदान्तत्वादेव तत्र प्रकृतिभावस्याप्रवृत्तेर्बाधानवकाशात् । एतेनेति । अपदान्तत्वात् प्राप्तेरेवाभावेन ।

व्याख्यानादिति । पूर्वसूत्रप्राप्तियोग्यस्यैवोदाहरणस्य भाष्ये उपन्यासमूलकादित्यर्थः । तथा च 'न समासे' इत्यस्य 'ऋत्यकः' इति सूत्रे न विषयः; समासेऽपि अस्य प्रवृत्तेरिष्टत्वात् ।

अथ प्रकृतिभाव इत्यनेन प्रतिज्ञातस्य प्रथमं निरूपणमावश्यकं मन्यमानः प्रकृतिभावविधायकं सूत्रद्वयं (तावतः एव सत्त्वात्) व्याख्याय तदनन्तरं 'प्लुतप्रगृह्याः' इति सूत्रे प्राथम्यादुपात्तस्य प्लुतस्य जिज्ञासाविषयत्वात् प्लुतमेव निरूपयितुं प्रथममुपक्रमते—**वाक्यस्य टेः प्लुतः उदात्त** इति । प्रथमोपस्थितस्य त्यागे मानाभावात् प्रकृतिभावविधायकसूत्रेऽपेक्षितत्वात् प्रथमं प्लुतस्य निरूपणमुचितं तदुपेक्ष्य प्रकृतिभावविधायकसूत्रोपन्यासो न्यायविरुद्ध इति कस्यचिदुक्तिः पराहता । प्रतिज्ञया प्रकृतिभाव-

---

है । इस प्रकार स्वतः प्रकृतिभाव की प्राप्ति न होने से प्रकृतिभाव के वारणार्थ "आटश्च" इसका चकार पुनः वृद्धि के विधानार्थ है । अतः 'ओम् और आङ् में पररूपबाध के समान ही प्रकृतिभाव का बाध हो जाता है'—यह कथन निरस्त समझना चाहिये । इस सूत्र में 'पदान्तात्' इसकी अनुवृत्ति का प्रयोजन 'आच्छंत्' यह उचित है । 'न समासे' इससे 'इकोऽसवर्णे' इसके द्वारा प्राप्त ह्रस्वसहित शाकल प्रकृतिभाव का निषेध होता है । अतः 'ऋत्यकः' इसके द्वारा प्राप्त प्रकृतिभाव 'सप्तऋषीणाम्' इसमें 'दिक्संख्ये संज्ञायाम्' इसके द्वारा समास होने पर भी सिद्ध हो गया; क्योंकि 'सिति च' इस वार्तिक द्वारा शाकल प्रकृतिभाव का ही निषेध होता है । 'सिति च' इस वार्तिक की प्रवृत्ति 'इकोऽसवर्णे' इससे प्राप्त प्रकृतिभाव के निषेधार्थ ही होती है । इसके सान्निध्य में पठित 'न समासे' इस की भी प्रवृत्ति तत्प्राप्त के निषेधार्थ ही है । यह व्याख्यान उक्तार्थ में प्रमाण है ।

नित्यपदघटित 'इन्द्रे च' इस सूत्र के पाठ को भ्रमप्रयुक्त सिद्ध करने के लिए 'प्लुतप्रगृह्याः' इस सूत्र का निर्देश प्लुत और प्रगृह्य विधायक सूत्रों से पहले करना उचित समझा गया । उनके पाठानन्तर प्रकृतिभावविधायक सूत्रद्वय का **प्रकरणवश** उपन्यास करने का औचित्य है । तदनुसार ही उनका उपन्यास है । 'प्लुतप्रगृह्याः' इस सूत्र में निर्दिष्ट क्रम के अनुसार पूर्व में प्लुतप्रकरण का आरम्भ करते हैं—**वाक्यस्य टेरिति ।**

९४. प्रत्यभिवादेऽशूद्रे । ८ । २ । ८३ । **अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात्, स चोदात्तः । अभिवादये देवदत्तोऽहम् भोः ! आयुष्मानेधि देवदत्त३ !**

वाक्यस्य **टिरन्त्यपदस्यैव सम्भवतीति न दोषः। टिग्रहणाभावे प्लुतश्रुत्योपस्थिताऽचपरिभाषयाऽजन्तस्यैव स्यात्। टिग्रहणे तु तत्सामर्थ्याट्टिनाऽचो विशेषणाद् व्यञ्जनान्तस्यापि भवति ॥**

प्रत्यभिवादे० (८।२।८३) ॥ **प्रणामादिभिराशिषं वाच्यमानो गुर्वादिर्यत्प्रतिसम्भाषते तत्प्रत्यभिवादः, न त्वाशीर्वचनम्; शूद्रे आशीर्वादरूपप्रत्यभिवादाभावेनाऽशूद्रे**

निरूपणे तात्पर्यावधारणात् प्रकृतिभावस्य निरूपणमादौ नानौचित्यमावहति ।

'वाक्यस्य' इत्यस्याकरणे तु पदस्य अधिकारलब्धस्य टेः प्लुतविधानं स्यात् । तथा च पदस्य आदौ मध्ये अन्ते च सत्त्वात् अन्तपदस्य टेरिव आदिमध्यपदयोरपि टेः प्लुत आपद्येत । कृते तु तस्मिन् वाक्यस्यैव टेः प्लुतस्य विधानात् अन्त्यपदस्यैव टेः स सिध्यति, न आद्यन्तपदयोः टेः; तत्र वाक्यस्य टेरभावात् । नन्वेवं टिग्रहणस्य किं फलम्, वाक्यस्य अन्त्याच एव प्लुतस्य प्राप्तत्वात् ? अत आह—**टिग्रहणेइति ।** प्लुतपदश्रुत्या 'अचश्च' इति सूत्रेण उपस्थितस्य 'अचः' इत्यस्य समानविभक्तिकेन वाक्यस्येत्यनेन सह अभेदेन अन्वये विवक्षिते तदन्तविधौ अजन्तस्य वाक्यस्य इत्यर्थापत्तौ हलन्तवाक्ये प्लुतो न स्यात् । टिग्रहणे तु टिना अचो विशेषणात् = विशेष्यीकरणात् टिरूपस्याभावः इत्यर्थेन हलन्तेऽपि प्लुतः सिद्धः—इत्याशयेनाह—**व्यञ्जनेति ।** वाक्यस्य व्यञ्जनान्तस्यापीत्यर्थः ॥

प्रत्यभिवादेऽशूद्रे ॥ अत्र 'प्रत्यभिवादः आशीर्वचनम्' इति हरदत्तः, तन्न; तेनाह—**प्रणामेति ।** तथा च 'कुशली असि तुषजक' इत्यादि प्रश्नरूपं वा, 'आयुष्मान् भव' इत्यादि आशीर्वादरूपं वा वाक्यम् अभिवादयितरि अनुग्राहकं सर्वं प्रत्यभिवादपदेन गृह्यते । **आशिषमिति ।** आशीरादिकं बोधयितुम् । वचनम् = वचनमात्रम् । आशीर्वचनमात्रमेव

'वाक्यस्य' इसके अभाव में अन्त्य और अनन्त्य दोनों पदों के टि को प्लुत प्राप्त होगा । अतः 'वाक्यस्य' इसका उपादान है । अन्त्य पद का जो टि है वही वाक्य का टि हो सकता है । इसलिए अनन्त्य पद के टि को प्लुत नहीं होता । टि ग्रहण करने से पद के व्यञ्जनान्त होने पर भी उसके टि को, जो कि अच् है, प्लुत होता है । अन्यथा 'अचश्च' इस परिभाषा के द्वारा अच् की उपस्थिति होने से 'अजन्त वाक्य' इस प्रकार समानाधिकरण अन्वय प्राप्त होगा । अतः व्यञ्जनान्त वाक्य में प्लुत की प्रवृत्ति नहीं होगी । टि पद के रहने पर अच् को टिग्रहणसामर्थ्य से टि का विशेष्य मान कर टिरूप जो अच् उसको प्लुत का विधान होता है । अतः व्यञ्जनान्त में भी प्लुत की सिद्धि होती है ॥

प्रत्यभिवादेऽशूद्रे ॥ इसमें 'प्रत्यभिवाद' शब्द से प्रणाम करने के अनन्तर श्रेष्ठ जनों द्वारा जो प्रत्युत्तर के रूप में वचोविन्यास है वही विवक्षित है । आशीर्वचन को प्रत्यभिवाद नहीं कहा जाता; क्योंकि शूद्र को आशीर्वचन के स्थान में कुशलक्षेम पूछा जाता है । ऐसी अवस्था

स्त्रियां न (वा०)। अभिवादये गार्ग्यहम्। भो आयुष्मती भव गार्गि !

इत्यस्य वैयर्थ्यापत्तेः। अत एव भाष्ये 'अशूद्रे इति किम् ? कुशल्यसि तुषजक' इत्युक्तम्।

अभिवादये इति। **नमस्कारादिपूर्वमाशीरादि वाचयामीत्यर्थः। आयुष्मानित्यायुष्मत्त्वस्य विधेयत्वात् सम्बोधनविभक्त्यभावः।**

एधीति। **भवेत्यस्याप्युपलक्षणम्। प्रत्यभिवादे शर्मादिप्रयोगो न नियतः, 'एचोऽप्रगृह्यस्य' (८।२।१०७) इति सूत्रे प्रत्यभिवादेऽन्तस्यैचः प्लुतविधानात्। 'आयुष्मानेधि अग्निभूता३ इ' इति भाष्ये तदुदाहरणाच्च। शर्मादिप्रयोगे तु तट्टेरेव प्लुतः; 'शर्मान्तं नाम ब्राह्मणस्य' इत्यादिस्मृत्या तस्य नामावयवत्वबोधनात्।**

प्रत्यभिवादो न। अत्रार्थे प्रमाणमाह—**अतएव** इति। सिद्धरूपेण अभिमुखीकृत्य बोधनस्य सम्बोधनपदार्थतया आयुष्मत्त्वस्य प्रत्यभिवादानन्तरमाशीर्वादरूपत्वेन विधेयतया सिद्धत्वाभावात् न आयुष्मान् इत्यत्र सम्बोधनविभक्तिः। 'शर्मान्तं नाम ब्राह्मणस्य' इत्यनुरोधात् ब्राह्मणस्य नाम्नोऽन्ते शर्मपदस्य प्रयोगः आवश्यक इति नाशङ्कनीयम्। 'एचोऽप्रगृह्यस्य' इति सूत्रे वृत्तिकृता प्रत्यभिवादे अन्त्यस्यैचः प्लुतो विहितः। स च प्लुतः शर्मान्ते नाम्नि सति अन्ते एचोऽभावाद् न प्राप्नोतीति वैयर्थ्यापत्त्या प्रत्यभिवादे शर्मान्तनाम्नः प्रयोगस्य अनियतत्वं कल्प्यते। तथा च तस्य सार्थक्यमिति। भाष्येऽपि अग्निभूता३ इ इत्युदाहरणस्य दर्शितत्वेन शर्मान्तप्रयोगस्यानियतत्वकल्पनात्। **शर्मान्तं नामेति**। तद्गुणसंविज्ञानो बहुव्रीहिः। तेन शर्मपदस्यापि नामावयवत्वं सिद्धम्। तस्य = शर्मादेः। 'प्रत्यभिवादेऽशूद्रे' इत्यनेन टेः प्लुतविधानात् शर्मान्तनाम्नः[1] प्रयोगे तट्टेरेव = प्रत्यभिवादवाक्यस्य टेरेव। अर्थात् शर्मपदघटकान्त्याकारस्य।

'न स्त्री अभिवादयते, पादोपसंग्रहणमेव करोति'—इति कश्चित्। अन्ये तु—'स्त्री अभिवादयतेऽपि, परं स्वनामगोत्रं न गृह्णाति, तथा च प्रत्यभिवादेऽपि नाम्नो ग्रहणाभावः'

में 'अशूद्रे' इसका सूत्र में कथन व्यर्थ होने से प्रत्यभिवाद का उक्तार्थ प्रमाणित होता है। अत एव भाष्यकार ने 'अशूद्रे' इसका प्रत्युदाहरण 'कुशली असि तुषजक' दिया है।

'अभिवादये' इसका 'प्रणामादि के द्वारा आशीर्वादादि के बोधक वचनों का उच्चारण करवाता हूँ'–ऐसा तात्पर्य है। आशीर्वचनात्मक 'आयुष्मान् एधि देवदत्त३' इस वाक्य से आयुष्मान् होने की कामना की गयी है। जिस रूप से सम्बोधन विवक्षित है उस रूप से उसकी सिद्धि पूर्व सम्बोधन से पहले होनी चाहिये। प्रकृत में आयुष्मत्त्व विधेय होने से सिद्ध नहीं है, किन्तु साध्य है। इसी कारण से 'आयुष्मान्' इस में सम्बोधन विभक्ति नहीं हुई।

शङ्का—'आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने' इस मनुवचन से 'भव' इसका प्रयोग करना चाहिए, 'एधि' इसका कथन युक्त नहीं है ?

समाधान = मनु-वचन में 'भव' यह 'एधि' इसका भी उपलक्षण है। अतः विरोध नहीं है ?

शङ्का—स्मृतियों में ब्राह्मणों का शर्मान्त नाम होने का नियम उपलब्ध है। अतः

---

१. **असौ नामाहमस्मीति स्वनाम परिकीर्तयेत्।**
आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने ॥ इति मनुः।

नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते । नेह—आयुष्मानेधि ।

स्त्रियां नेति । **स्त्रिया अपि नाम्नाऽभिवादप्रत्यभिवादे इत्यर्थस्य भाष्यसम्मतत्वादिति भावः ।**

नाम गोत्रं वेति । **अभिवादप्रत्यभिवादे नामगोत्राभ्यामेव स्मृतिषु प्रसिद्धे । तत्राधिकृतस्य पदस्येत्यस्य प्रत्यभिवादे इत्यनेन विशेषणात् प्रत्यासत्त्या प्रत्यभ्युद्यमानार्थवाचकस्यैव प्लुत इति भावः । तत्र नामशब्देन द्वादशेऽह्नि पित्रादिकृतं गृह्यते । अत एव 'आयुष्मान् भव दण्डिन्' इत्यादौ प्लुतो नेति स्पष्टं** भाष्ये ।

इति । तदसदिति ध्वनयितुमाह—**स्त्रिया इति ।** अस्या अपि अभिवादन-प्रत्यभिवादयोर्नामग्रहणं न प्रतिषिद्धम् । इदानीं तासां पादोपसंग्रहणेन अभिवादनं विशेषेण प्रचलति । **नामगोत्रं वेति ।** अत्र नामगोत्रं प्रसिद्धं ग्राह्यम् । 'असौ नामाहमस्मि' इति स्मृतौ नामपदं गोत्रस्याप्युपलक्षणम् । तत्र = सूत्रे अधिकृतस्य 'पदस्य' इति = सूत्रादनुवृत्तस्य पदस्य 'प्रत्यभिवादे' इत्यनेन विशेषणात् तदन्तविधिना 'पदान्त' इत्यर्थो लभ्यते । अभ्युद्यमानस्य[1] = प्रत्यभिवादस्यार्थस्य वाचको बोधकः तस्य, अर्थात् प्रत्यासत्त्या प्रत्यभिवादसम्बन्धिनो वाक्यस्य टित्वं नामगोत्रयोः सिद्धये वाक्यान्ते नामगोत्रयोः प्रयोगः कल्पनीय इति, तस्यैव च पदान्तत्वम्, अतो नापूर्वं 'नामगोत्रं वा यत्र वाक्यान्ते प्रयुज्यते तत्रैव प्लुतः इष्यते' इति वार्त्तिकमित्याशयः । 'द्वादशेऽहनि पिता नाम कुर्यात्' इति स्मृतिबोधितं नामात्र गृह्यते, ननु यथाकथञ्चिद् येन केनाऽपि सङ्केतितम् इति, एतस्य फलमाह—**अतएव इति ।**

पूर्वोक्त उदाहरणों में केवल देवदत्त का नामोच्चारण युक्त नहीं है ?

समाधान—'आयुष्मान् भव' इत्यादि पूर्वोक्त मनु के वचन से प्रत्यभिवादवाक्य में नाम का निर्देश आवश्यक नहीं है । अत एव प्रत्यभिवादवाक्य के अन्त्य एच् को 'एचोऽप्रगृह्यस्य' इस सूत्र से प्लुत का विधान सङ्गत है । अन्यथा शर्मा का नियत प्रयोग होने पर वाक्यान्त में एच् का रहना असम्भव होने से प्लुतविधान व्यर्थ हो जायगा । भाष्य में भी 'अग्निभूता३' इसमें शर्म शब्द का प्रयोग नहीं किया गया है । शर्मा आदि शब्दों के प्रयोग करने पर शर्म शब्द के टि को ही प्लुत होगा; क्योंकि 'शर्मान्तं नाम ब्राह्मणस्य' इससे अन्तशब्द चरमावयववाची होने से नाम का ही अन्त्यावयव शर्मा प्रतीत होता है ।

किसी ने स्त्रियों को नामादिनिर्देश के बिना ही चरणस्पर्शरूप प्रणाम करने का विधान माना है । यह प्रथा आज भी प्रचलित है । किन्तु ऐसा शास्त्रीय नियम नहीं है । भाष्यकार ने स्त्रियों के लिए भी अभिवादन में नामनिर्देश बताया है । अतएव 'स्त्रियां न' इस वार्तिक से प्लुत का निषेध चरितार्थ होता है । अभिवाद, प्रत्यभिवाद—दोनों में नामगोत्र के निर्देश का स्मृतियों में उल्लेख मिलता है । सूत्र में अनुवृत्त पद प्रत्यभिवाद में विशेषण होने से तदन्त का बोधक है । प्रत्यासत्तिन्याय से प्रत्यभिवाद वाक्य का जिसके लिये प्रयोग किया गया है, तद्वाचक को ही

---

१. अभ्युद्यमानस्य = कथ्यमानस्य ।

'भोराजन्यविशां वेति वाच्यम्' (वा०) । आयुष्मानेधि भो३ः । आयुष्मानेधीन्द्रवर्म३न् । आयुष्मानेधीन्द्रपालित३ ॥

९५. दूराद्धूते च । ८ । २ । ८४ ॥

भो राजन्य० (**का० वा०**) इति । **भोःशब्दस्य राजन्यवैश्यवाचकनाम्नश्च टेः प्लुत इत्यर्थः । भोःशब्दस्याप्राप्ते इतरयोस्तु नामत्वात् प्राप्ते विभाषेयम् ॥**

दूराद्धूते च (८।२।८४) ॥ **यावति देशे प्राकृतप्रयत्नोच्चारितं सम्बोद्ध्यमानो न शृणोति, किं त्वधिकं प्रयत्नमपेक्षते तावद् दूरम् । दूरादाह्वानञ्च दूराद् बोधनस्योपलक्षणम्, न तु सम्बोधनविभक्तिनियामकस्याभिमुखीकृत्य बोधनरूपस्य सम्बोनस्योपलक्षणम्; 'आगच्छतु भवान्देवदत्त' इत्येवमाह्वानस्यापि सम्भवात् । अत एवाऽऽकडार-**

विभाषेयमिति । उभयत्र विभाषा इहास्तीत्यर्थः । भोः-शब्दस्य प्लुतो न केनाऽपि प्राप्नोति । 'राजन्यविशाम्' इति पदं नानुपूर्वीबोधकं किन्तु एतयोर्नामबोधकम् । तथाच 'प्रत्यभिवादेऽशूद्रे' इत्यनेन तत्र नित्ये प्राप्ते इति, भोःशब्देऽप्राप्तस्य राजन्यविशोः नित्यं प्राप्ते, प्राप्ताप्राप्तयोः विकल्पनात् प्राप्ताप्राप्तविभाषा । उभयत्रविभाषापदेनापि इयं कथ्यते ।

दूराद्धूते च ॥ अत्र दूरत्वं न नियतमत आह—**यावति इति** । यावद्देशपर्यन्तं प्राकृतेन = स्वाभाविकेन, प्रयत्नेन उच्चारितं शब्दं बोध्यमानो जनो न शृणोति कर्णेन्द्रियमनःसमवधाने सत्यपि आकर्णने न क्षमः किन्तु ततोऽधिकस्य वक्तुः प्रयत्नस्य श्रवणे अपेक्षा, तावद्देशपर्यन्तं दूरत्वेन विवक्षितम् । हूतम् = आह्वानम् । दूरादाह्वानञ्च दूराद्बोधनमात्रस्योपलक्षणम् । आह्वानं स्यात् नवा किन्तु बोधनं भवेदिति । एवमेव अभिमुखीकृत्य बोधनरूपं सम्बोधनमपि न नियमेन विवक्षितम् । एतेन व्याख्यानेन आह्वानं संबोधनमात्रोपलक्षणमिति **मनोरमोक्तं** व्याख्यानमपि निरस्तम् । नियतं हि उपलक्षितं भवति, नानियतम् । सम्बोधनञ्च न नियतम् । तदाह—**आगच्छतु** इति । अत्राभिमुखीकृत्य बोधनाभावेऽपि आह्वानस्य सम्भवात् न सम्बोधनमाह्वानस्य नियतम् । 'देवदत्तः' इति न सम्बोधनान्तम् । अत्रार्थे भाष्यसम्मतिमाह—**अत एव** इति । बोधनमात्रस्योपलक्षणत्वेन व्याख्यानादेव ।

आकडार इति । यद्यपि 'आकडारादेका संज्ञा' इति सूत्रघटकम् 'आकडाराः' इति

प्लुत होगा । 'वाक्यस्य टेः' इसका अधिकार होने से वाक्यसम्बन्धी टि भी आवश्यक है । नाम-निर्देश गोत्र के निर्देश का उपलक्षण है । अतः जहाँ नाम गोत्र का उच्चारण है वहीं प्लुत होता है । इसी अर्थ का 'नामगोत्रं वा यत्र वाक्यान्ते' इत्यादि वचन से अनुवाद है । अपूर्व वचन नहीं है । ग्रन्थकार का यह आशय है । इस न्यायसिद्ध वचन में नाम शब्द से 'द्वादशेऽहनि पिता नाम कुर्यात्'=बारहवें दिन पिता पुत्र का नामकरण करे—इसके द्वारा पिता से सङ्केतित नाम का ही ग्रहण है । अतः नामान्तर, जो आजकल उपनाम से प्रसिद्ध है, उसका ग्रहण नहीं होता । अतः उसके टि को प्लुत इष्ट नहीं है ।

'भोराजन्यविशां वेति वाच्यम्' ॥ इससे 'भो' शब्द, राजन्य और वैश्यवाचक नाम के टि को प्लुत का विकल्प से विधान है । वार्तिक में राजन्य और विश् अपने स्वरूप के ग्राहक नहीं हैं ।

दूरात् सम्बोधने यद्वाक्यं तस्य टेः प्लुतः स्यात्। सक्तून् पिब देवदत्त३ ।।

सूत्रे नदी-गुरुसञ्ज्ञयोः समावेशे 'वात्सीबन्धुः' इत्यत्र 'गुरोः' (८।२।८६) इति प्लुतः, 'नदी बन्धुनि' (६।२।१०९) इति पूर्वपदान्तोदात्तत्वञ्च फलमुक्तं भाष्ये। अन्यथाऽत्र सम्बोधनाभावेन 'गुरोः' (८।२।८६) इत्यस्याप्राप्त्या तदसङ्गतिः स्पष्टैव।

उपलक्षणत्वादसत्यप्याह्वाने भवति, तदाह—सक्तूनित्यादि। अत्रापि 'दूराद्धूते' (८।२।८४) इत्येतदनुवृत्तस्य 'पदस्य' इत्यस्य विशेषणम्। तेन हूयमानार्थवाचिनः पदस्यैव टेः प्लुतः। तच्च रूढं यौगिकं वेत्यन्यदेतत् ।।

पदं तद्रूपेणैव प्रतीक ग्रहणमुचितम् ननु ह्रस्वाकारान्तस्य निर्देशेन, तथापि रेफान्तमनुकृत्य आगन्तुकेन अकारेण संयोज्य च तथोल्लेख इति युक्तमेव। अत्रत्ये भाष्ये—'नदीसंज्ञायाः गुरुसंज्ञायाश्च वात्सीबन्धुरित्यत्र वात्सीघटकेकारे एकस्मिन्नेव समावेशेन 'गुरोरनृतोः' इत्यादिना तस्य गुरुत्वात् प्लुतः, नदीसंज्ञकत्वाच्च 'नदी बन्धुनि' इति पूर्वपदोदात्तत्वञ्च सिद्धम्' इत्युक्तम्।' अन्यथा अभिमुखीकृत्य बोधनरूपसम्बोधनाभावेन प्लुतविधानस्य असांगत्यापत्तेः। आह्वानस्योपलक्षणत्वेन असत्यपि आह्वाने उदाहरति—सक्तून् इति। अत्रापि सूत्रे पदस्येत्यधिकारात् हूयमानार्थवाचिनः = बाध्यमानार्थवाचिनः टेः प्लुतो बोध्यः। अत्र नियामकाभावाद् अविशेषेण रूढं यौगिकञ्च पदं गृह्यते। तदाह—तच्च = पदञ्च। रूढम् = पित्रादिसङ्केतितम्, यौगिकम् = अवयवार्थप्रवृत्तिनिमित्तकं पाचकादिपदवत्। उभयविधमत्र गृह्यते ।।

किन्तु इनके वाचक नाम का ग्रहण है। भोः शब्द नामवाची नहीं है, अतः प्लुत की प्राप्ति नहीं है। राजन्य और विश् इनको नित्य प्राप्त है उसका विकल्प से विधान है। अतः प्राप्त अप्राप्त—दोनों स्थलों में विधान करने से उभयत्र विभाषा है।

दूराद्धूते च ।। इसमें जितनी दूर से स्वाभाविक प्रयत्न के द्वारा उच्चरित शब्द, सम्बोधित व्यक्ति से श्रूयमाण नहीं हो सकता उतनी ही दूरी सूत्र में विवक्षित है। दूर से आह्वान का दूर से बोध कराने मात्र में तात्पर्य है, सम्बोधन विभक्ति के नियामक को अभिमुख करके बोधन में नहीं है। 'आइये देवदत्त' इत्यर्थक 'आगच्छतु भवान् देवदत्तः' इस प्रकार अभिमुखीकरण के बिना भी आह्वान हो सकता है। इसलिए गुरु और नदी संज्ञा का एकत्र समावेश होने पर 'वात्सीबन्धुः' इसमें गुरुसंज्ञानिमित्तक प्लुत और नदीसंज्ञाप्रयुक्त पूर्वपद को अन्तोदात्त सिद्ध होता है—इस प्रकार की भाष्योक्ति सङ्गत हुई। अन्यथा 'वात्सीबन्धुः' इसमें सम्बोधन विभक्ति के अभाव से 'गुरोरनृतोः' इससे विहित प्लुत नहीं होगा; क्योंकि इसमें भी सम्बोधन अर्थ विवक्षित है।

अत्र इति। अनुवृत्त 'पद' शब्द का 'दूराद्धूते' यह विशेषण है। अतः हूयमान व्यक्तिवाचक जो पद तत्सम्बन्धी टि को प्लुत होता है। हूयमान बोधक पद, पित्रादिसंकेतित या वाचकादि पद के समान यौगिक—दोनों प्रकार का गृहीत होता है।

९६. हैहेप्रयोगे हैहयोः । ८ । २ । ८५ । **एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात् । हे३ राम । राम है३ ॥**

हैहेप्रयोगे (८ । २ । ८५) । हैहयोः **सम्बोधनद्योतकत्वेन केवलाभ्यामपि ताभ्यां सम्बोधनदर्शनेन च तयोरपि हूयमानार्थपदत्वाद् 'गुरोरनृतः' (८ । २ । ८६) इत्येव सिद्धे नियमार्थमिदमित्याह**—हैहयोरेवेति ।

हैहेप्रयोगे हैहयोरिति ॥

आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।
श्रेयस्कामो न गृह्णीयात् ज्येष्ठापत्यकलत्रयोः ॥

इति स्मृत्या नामग्रहणस्य निषेधविषये केवलाभ्यामपि हैहेशब्दाभ्यां सम्बोधनदर्शनेन हूयमानार्थवाचकत्वाद् 'गुरोरनृतोः' इत्यनेन प्लुते सिद्धे हैहेप्रयोगे हैहयोरेव प्लुतः इति नियमार्थं सूत्रमित्याशयेन परममूले हैहयोरेवेति व्याख्यातम् ।

ननु 'गुरोरनृतोः' इत्यस्य हूयमानार्थबोधकं वाक्यघटकं यत्पदं तत्सम्बन्धि ऋद्भिन्नानन्त्यगुरुत्वं तत्सम्बधि टित्वञ्च उद्देश्यतावच्छेदकं 'हैहे' इति सूत्रस्य हूयमानार्थबोधकवाक्यघटकं यद् है-हे-पदं तत्सम्बन्धिटित्वमुद्देश्यतावच्छेदकम् । तयोः सूत्रयोः उद्देश्यतावच्छेदकभेदात् एकस्मिन् अधिकरणे द्वयोरुद्देश्यतावच्छेदकयोरवृत्तित्वात् व्याप्यव्यापकभाव एव दुर्घटः । तथा सति व्यर्थशास्त्र 'हैहेप्रयोगे' इति तच्छास्त्रीया या उद्देश्यता तदवच्छेदकं व्याप्यभूतं यद्रूपं तद्रूपावच्छिन्ना उद्देश्यता, एवं व्यर्थशास्त्रीया या विधेयता तदवच्छेदकरूपावच्छिन्ना विधेयता न वैयर्थ्यसम्पादकस्य 'गुरोरनृतोः' इत्यस्य । एवं सत्येव नियामकत्वस्य सम्भवः । द्वयोः सूत्रयोः उद्देश्यतायाः भिन्नाधिकरणवृत्तित्वेन व्याप्यव्यापकभावाभावः । तथाच नियामकत्वं न स्यादिति चेन्न; आह्वानविषयवाक्यघटक ऋद्भिन्नानन्त्यगुरुत्वं तत्सम्बन्धि टित्वं चोद्देश्यतावच्छेदकं 'गुरोरनृतोः' इत्यस्य स्वीक्रियते । 'है हे' इति सूत्रीयोद्देश्यतावच्छेदकं यद् हूयमानार्थबोधकवाक्यघटकं यद् है हे पदं तत्सम्बन्धि टित्वं यत्र तत्र सर्वत्र गुरोरिति सूत्रीयोद्देश्यतावच्छेदकम् । क्वचित् तादृशवाक्यघटकऋद्भिन्नानन्त्य गुरुत्वम् क्वचिच्च तत्सम्बन्धिटित्वमिति व्यापकत्वम् अस्त्येव । शङ्कापक्षे हूयमानार्थबोधकं वाक्यघटकं यत्पदम् इति उद्देश्यतावच्छेदके विवरणात् हूयमानबोधकपदमात्रस्यैव संग्रहेण 'राम हे' इत्यत्र रामशब्देन संबोधनस्य द्योतितत्वेन हेशब्दस्यानर्थकत्वेन तत्र गुरोरिति न प्राप्नोति; तस्य हूयमानार्थकत्वाभावात् । एवम् यद् हूयमानार्थबोधकं पदं तत्सम्बन्धि ऋद्भिन्नस्य अनन्त्यगुरोः प्लुतः, 'हैहेप्रयोगे' इत्यनेन नु टेः इति एकत्र उद्देश्यता न—इत्याद्यूहनीयम् ।

हैहेप्रयोगे हैहयोः ॥ इसमें निर्दिष्ट है और हे—ये दोनों अकेले भी सम्बोधन के द्योतक होने से इनके प्रयोगमात्र से सम्बोधन की प्रतीति होती है । अतः हूयमानार्थवाची पद होने से 'गुरोरनृतोः' इसके द्वारा प्लुत की सिद्धि हो जाती है । पुनः 'हैहेप्रयोगे' इससे प्लुतविधान व्यर्थ होने से नियमार्थक है । इस आशय से 'हैहयोरेव' ऐसा लिखा है । सूत्र में 'प्रयोग' का ग्रहण अन्त्य में 'है हे' इसके न रहने पर भी प्लुत-सिद्धि के लिये है । अन्यथा 'हैहेऽन्ते' इस प्रकार के सूत्र से भी निर्वाह हो जाता ।

'हैहेऽन्ते' इत्येव सिद्धे प्रयोगग्रहणादनन्त्ययोरपि, तदाह—हे३ रामेति। केचित्तु एकं हैहेग्रहणमानन्त्यार्थम्। अन्यथा 'वाक्यस्य टेः' इत्यधिकारादन्त्ययोरेव तयोः स्यात्, तदाह—हे३ राम इति।

प्रयोग इति तु यत्र सम्बोधनोत्तरं तयोः प्रयोगस्तत्र तेनैवाभिमुख्यस्य द्योतितत्वेन द्योत्याभावादनर्थकयोरपि तयोः प्लुतार्थम्, तदाह—राम है३ इति। अन्यथाऽप्रयुक्तयोः प्लुतासम्भवात्तद्वैयर्थ्यं स्पष्टमेव।

'हैहयो'रिति तु तयोर्हूयमानार्थपदत्वाभावादप्राप्ते विध्यर्थम्। नियमे तु न मानम्, तेनात्र प्लुतसमावेशः। एतत् सर्वं भाष्यकैयटयोः स्पष्टमित्याहुः।

'हैहेऽन्ते' इति न्यासेनापि हैहयोः प्लुतसिद्धौ प्रयोगग्रहणाद् अनन्त्ययोरपि तयोः प्लुतसिद्ध्यर्थमित्याह—**हैहेऽन्ते** इति। स्वसिद्धान्तमाह—**केचित्तु** इति। **'हैहेप्रयोगे'** इति सूत्रे आद्यं है हे पदम् अनन्त्ययोः है हे इत्यनयोः प्लुतविधानार्थम्। यद्यनेन सूत्रेण प्लुतो न विधीयेत, तदा 'वाक्यस्य टेः' इत्यधिकारात् अन्त्यस्य टेः स्यात्, अनन्त्ययोः है हे इत्यनयोः न स्यात्। नच आद्येन 'है हे' इत्यनेनैव अनन्त्ययोस्तयोः प्लुतसिद्ध्या प्रयोगे हैहयोरिति योगे प्रयोगग्रहणस्य किं फलम्? इत्यत आह—**प्रयोग इति**। यत्र सम्बोधनपदोत्तरं तयोः = है हे इतिशब्दयोः प्रयोगः, तत्र तेनैवसंबोधनविभक्त्यन्तपदेनैव आभिमुख्यद्योतितत्वेन द्योत्यस्यार्थस्याभावाद् आनर्थक्यात् तयोः प्लुतविधानार्थं प्रयोगग्रहणम्।

अर्थात् 'राम है' 'राम हे' इत्यत्र नाम्नः रामशब्दस्यैव प्रतीतेः तस्यैव टेः प्लुतः प्राप्नोति। नामगोत्रयोरेव टेः प्लुतस्य विधानात् अत्र है हे इत्यनयोर्न प्राप्नोति। अतः प्रयोगग्रहणम्। तेन प्रयुक्तयोस्तयोः टेः प्लुतविधानम्। एवमर्थानङ्गीकारे अप्रयुक्तयोस्तयोः प्लुतासम्भवेन तदुपादानस्य वैयर्थ्यं स्यात्।

प्रयोगे हैहयोरिति विभक्तो योगस्तु पूर्वस्मिन् विभक्तयोगे पित्रादिसङ्केतितस्यैव नाम्नो ग्रहणेन हैहयोराभिमुख्यरूपसम्बोधनार्थद्योतकत्वेऽपि हूयमानार्थवाचकत्वाभावेन पूर्वसूत्राप्राप्तौ प्लुतविधानार्थः। अतो विधिसूत्रमिदम्। तेन = विध्यर्थकत्वेन। पूर्वसूत्रेण हूयमानार्थकपदस्य टेः प्लुतोऽपि समाविशति। एवकारसमर्थनं केनचित् कृतं

किसी का विचार इस प्रकार है—सूत्र में 'वाक्यस्य टेः' इसका अधिकार होने से है और हे इनको वाक्यान्त में रखने पर ही वाक्य का टि कहा जा सकता है। इस प्रकार सूत्र में आद्य है और हे का ग्रहण, अनन्त्य है—हे के प्लुतविधानार्थ होने से अनन्त्य के प्लुतार्थ प्रयोग-ग्रहण नहीं है। किन्तु सम्बोधन विभक्त्यन्त रामादिपदोत्तर है या हे का प्रयोग रहने पर सम्बोधन विभक्ति के द्वारा ही आभिमुख्य की प्रतीति हो जाने से उक्त पद का द्योत्य अर्थ भी नहीं है। अतएव इन अनर्थकों को प्लुतविधानार्थ प्रयोग-पद का उपादान है। इस आशय से 'राम है' इत्यादि उदाहरण परम-मूल में दिया है। अन्यथा अप्रयुक्त पद में प्लुत न होने से प्रयोगशब्दोपादान सार्थक नहीं होगा। द्वितीय 'है हे' इसका प्रयोजन हूयमानार्थ के द्योतक होने से तद्वाची नहीं है। अतः 'दूराद्धूते च' इससे है और हे इनको प्लुत की प्राप्ति न होने से अप्राप्त का प्रापक होने के कारण प्लुतविधानार्थ सूत्र है, नियमार्थक नहीं है। विधिसूत्र मानने से 'दूराद्धूते च' इससे विहित

९७. गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् । ८ । २ । ८६ । **दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्यानन्त्यस्यापि गुरोर्वा** प्लुतः स्यात् । दे३वदत्त । देवद३त्त । देवदत्त३ ।

यत्तु **अयं हूयमानार्थपदस्य टेः प्लुतस्य बाधकस्तक्रकौण्डिन्यन्यायादिति ? तन्न; 'शिव हे' इत्यादौ तस्याप्राप्तेस्तन्न्यायविषयाभावात् ॥**

गुरोर० (८ । २ । ८६) । 'दूराद्धूते' (८ । २ । ८४) इत्यनुवर्त्तते, तेन दूराद् **बोधन एव प्रवृत्तिः, तदाह**—दूराद्धूत इति । **दूरत्वञ्चात्राविवक्षितम्, तेन प्रत्यभिवादे 'भोराजन्य' (वा०) इत्यस्य विषयेऽप्यस्य प्रवृत्तिः, तद्विषयेऽप्युपलक्ष्यबोधनसत्त्वात् ।**

निराकरोति—**यत्तु इति** । तक्रकौण्डिन्यन्यायेन यथा तक्रदानेन दधिदानस्य निवृत्तिर्भवति, तथैवाऽत्रापि हैहयोः प्लुतविधानेन हूयमानार्थवाचकपदस्य टेः प्लुतो बाध्यते इति न प्लुतयोः समावेशः, तत्र दधिदानात् प्राप्तिस्थले क्वचिदपि तक्रदानं न सावकाशमतो निरवकाशत्वेन तक्रदानं बाधकम् । तथा च निरवकाशमूलकत्वादस्य न्यायस्य प्रकृते प्रवृत्तिर्न सम्भवति । 'शिव हे' इत्यादौ शिवपदस्य सम्बोधनार्थद्योतकत्वेन हेपदस्य आनर्थक्यात् हूयमानार्थपदस्य टेरभावात् पूर्वेण 'दूराद्धूते च' इत्यनेन प्लुतविधानस्याप्राप्तौ 'हैहेप्रयोगे' इत्यस्य चारितार्थ्येन तक्रन्यायविषयस्याभावात्तदप्राप्तेः ॥

'गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ॥ अत्र परममूले 'दूराद्धूते' इत्यनुवर्त्य दूराद् बोधने एवास्य प्रवृत्तिः स्वीकृता । शेखरकृन्मते तु दूरत्वमविवक्षितम् । तेन दूराद् बोधनाभावस्थले प्रत्यभिवादविषये 'भोराजन्यविशाम्' इति वार्त्तिकोदाहरणस्थलेऽपि अनन्त्यस्य गुरोरनेन प्लुतो विधीयते । ननु 'प्रत्यभिवादेऽशूद्रे' इति सूत्रमनुच्चार्य वार्त्तिकस्य 'भोराजन्य' इत्यस्य कथने का सङ्गतिरितिचेच्छृणु । एतत्सूत्रवार्त्तिकाभ्यामुभाभ्यां विकल्पेन प्लुतस्य विधानाद् विकल्पसाम्येन वार्त्तिकं पठितम् । 'प्रत्यभिवादे' इति सूत्रसहितवार्त्तिकपाठोऽयोगविभागाभिप्रायेण । अथवा 'प्रत्यभिवादे' इति वार्त्तिकस्य प्रवृत्तिविषयनिर्देशः । तद्विषयेऽपि = वार्त्तिकविषयेऽपि । उपलक्ष्य इति = उपलक्षयितुं शक्यस्य ।

हूयमानार्थ वाची के टि को और है या हे इनको एकवाक्य में प्लुत का प्रयोग हो सकता है । यह अर्थ भाष्य और कैयट से सम्मत है ।

शङ्का—तक्रकौण्डिन्यन्याय से इस सूत्र के द्वारा 'दूराद्धूते च' का बाध होने से प्लुत का समावेश नहीं सकता ?

समाधान—'शिव हे' यहां 'हैहेप्रयोगे' यह सूत्र चरितार्थ है । 'हे' शब्द द्योत्यार्थक भी न होने से अनर्थक है । अतः 'दूराद्धूते च' इसकी प्राप्ति नहीं है । उक्त न्याय की प्रवृत्ति निरवकाशस्थल में होती है ॥

'गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ॥ इसमें 'दूराद्धूते' इसकी अनुवृत्ति है । अतः दूर से बोधन रहने पर ही इसकी प्रवृत्ति है । ग्रन्थकार दूरत्व की अविवक्षा मान कर प्रत्यभिवाद एवं 'भोराजन्यविशाम्' इस वार्त्तिक के विषय में भी इस सूत्र की प्रवृत्ति मानते हैं । क्यों ? वहाँ भी आह्वान से उपलक्षित बोधन है ।

'गुरोः' किम् ? वकारात् परस्याकारस्य मा भूत् ।
'अनृतः' किम्? कृष्ण३ ।

सर्वप्लुतप्रकरणस्य तु न शेषः । तथा हि सति 'वाक्यस्य टेः' इत्यनेन सहैवास्याप्यधिकारत्वमेव कुर्यात् । एतत्त्रयविषयमेवेदमिति प्रकृतसूत्रे, 'अनुदात्तं प्रश्नान्त' (८ । २ । १००) इति सूत्रे च वृत्तौ स्पष्टम् ।

अपिशब्दो **यथाप्राप्तटिसमुच्चयार्थः । यदि तु गुरोः सन्निधानादन्त्यो गुरुरेव**

ननु गुरोरित्यनेन सर्वैः शास्त्रान्तरैः कृते प्लुतेऽपि अनन्त्यस्य गुरोः प्लुतः किन्न भवति ? इति निर्णेतुमाह–**सर्वेति** । कियद्भिः सूत्रैः कृते प्लुते अनेनापि अनन्त्यगुरोः प्लुतः न सर्वत्र प्लुते अनेन प्लुतः । यद्येवं नाभिव्यक्तं स्यात् तदा 'वाक्यस्य टेः उदात्तः' इत्यनेन सूत्रेण सहैव 'गुरोरनृतो' इति सूत्रस्यापि अधिकारत्वमेव कुर्यात् । **वृत्तौ** इति । 'प्रत्यभिवादेऽशूद्रे', 'दूराद्धूते च', 'हैहेप्रयोगे' एतत्सूत्रत्रयेण विहिते प्लुतेऽपि अनन्त्यस्य गुरोरित्यनेन विहितः प्लुतः समाविशति । 'अनुदात्तं प्रश्नान्त' इति सूत्रे वृत्तिग्रन्थे स्पष्टम् । तथाहि—अनुदात्तमित्यादिना लाघवात् अनुदात्तादिगुणमात्रं विधीयते, न प्लुतः । स च 'दूराद्धूते च' इत्यादिभिः । प्रकृतसूत्रे च 'प्रत्यभिवादे' 'दूराद्धूते च' इत्येवमादिना यः प्लुतो विहितः तस्यैवायं स्थानिविशेषे उच्यते इति वृत्तिः ।

अपिशब्दः प्रकृतस्य टेः समुच्चायकः, टेरधिकारात् स एव प्रकृतः । यदि तु अपिशब्देन अन्त्यो गुरुर्गृह्येत तदा अन्त्यलघौ अनन्त्यगुरौ वाक्ये अन्त्यस्य 'दूराद्धूते च,' अनन्त्यगुरौ च 'गुरोरनृतो' इत्यनेन प्लुते उभयोः समावेशः स्यात् । न च एकैकग्रहणेन पर्यायता उभयोः स्यादिति वाच्यम्; अस्मिन्नेव सूत्रे एकैकपदस्य करणात् गुरोरिति विहितानां प्लुतानामेव पर्यायतासम्पादने सामर्थ्यं तस्य, नान्यसूत्रेण विहितस्य प्लुतस्येति समावेशो दुर्वारः । अन्त्यस्य टेः अपिशब्देन ग्रहणे तु स गुरुर्वा, अगुरुर्वा—उभयत्र टेः प्लुतस्य विधानाद् एतत्सूत्रविहितानां पर्यायता भवत्येवेति न अन्त्यलघावपि प्लुतसमावेशः ।

शङ्का—अन्य सूत्रों द्वारा प्लुत का विधान होने पर अनन्त्य गुरु को इस सूत्र से प्लुत का विधान है, इस प्रकार क्या सभी सूत्रों के प्लुतस्थल में इससे प्लुत मानते हैं ?

समाधान—यदि सर्वत्र प्लुतस्थल में इसकी प्रवृत्ति इष्ट होती तो 'वाक्यस्य टेः' इसके साथ ही इस सूत्र का अधिकाररूप से पाठ किया गया होता । अतः 'प्रत्यभिवादे' 'दूराद्धूते च' तथा 'हैहेप्रयोगे' इनके विषय में ही इस सूत्र के द्वारा अनन्त्य गुरु को प्लुत का विधान है । किसी के मत में 'है हे' इसके स्थान में 'भोराजन्य' इसकी गणना है । वृत्ति-ग्रन्थ में स्पष्ट है[1] ।

अभिशब्दोपादान यथाप्राप्त टि के संग्रहार्थ है ।

यदि गुरुपद के सान्निध्य के कारण अन्त्य गुरु का अपिशब्द समुच्चायक होगा तो अन्त में लघुवर्ण और अनन्त्य गुरुवर्ण से युक्त वाक्य के अन्त को 'दूराद्धूते च' तथा अनन्त्य गुरु को 'गुरो-

---

१. प्रत्यभिवादे प्लुतो विहितः तस्यैवायं स्थानिविशेष उच्यते ।

एकैकग्रहणं पर्यायार्थम् ।

इह 'प्राचाम्' इति योगो विभज्यते । तेन सर्वः प्लुतो विकल्प्यते ॥

समुच्चीयेत, तदाऽन्त्यलघुमपि अनन्त्यगुरावेतस्य, अन्त्यलघौ 'दूराद्धूते च' इत्यादीनां दुर्वारत्वेन प्लुतसमावेशापत्तिः । एकैकग्रहणं त्वेतद्विहितानामेव पर्यायार्थं स्यात् । तेन यत्रान्त्योऽपि गुरुरनन्त्यगुरुद्वयं वा, तत्रैव पर्यायः स्यात् । व्याख्यानाच्चैतदर्थलाभः ।

अनन्त्यस्यापीति । **अपिनाऽन्त्यस्य गुरोरगुरोश्चेत्यर्थः ।**

पर्यायार्थमिति । **अन्यथा समावेशः स्यादिति** भावः । 'अनुदात्तं पदम्' (६।१।१५८) **इति तु त्रिपाद्यां न प्रवर्त्तत इति तत्रैव वक्ष्यते ।**

अन्त्यलघुमपि इति । 'न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इति न्यायस्वरूपम् । बहुव्रीहिसमासेन एकवृत्त्या अर्थबोधनिर्वाहे कर्मधारयात् मत्वर्थ-प्रत्ययो न; कार्ये वृत्तिद्वयकल्पने गौरवादिति न्यायतात्पर्यम् । 'अन्त्यं लघु यस्मिन्' इत्येवं बहुव्रीहिसमासेन निर्वाहे 'अन्त्यं च तल्लघु' इति कर्मधारयसमासानन्तरम् 'अन्त्यलघु अस्ति अस्मिन्' इति मतुप्प्रत्ययेन साधुत्वे वृत्तिद्वयकल्पनाप्रयुक्तगौरवाक्रान्तत्वेन तादृश-प्रयोगस्य नौचित्यात् इति नाशङ्कनीयम् । लाघवानुरोधेन प्रयोगे विवक्षिते न्यायोऽयं प्रवर्तते । लाघवानादरेण प्रयोगस्तु नास्य विषयः । अतएव 'असुब्वतः' इति भाष्यप्रयोगस्य सङ्गतिः । न सुप् यस्मिन् इति निर्वाहे मतुपोऽनुपयोगः स्यात् । अतः 'गौरीरमणरूपिणे' इति भूषणकृतः प्रयोगः सङ्गच्छते । अन्यथा 'गौरीरमणरूपाय' इति वक्तव्यं स्यात् । 'विष्णवे शिवरूपिणे' इत्यादयोऽपि सङ्गताः । तेन = अनन्त्यगुरोः समुच्चयेन । **अन्त्योऽपि** इति । अपिना अनन्त्यस्य संग्रहः । अन्त्यम् अनन्त्यम् उभयं गुरू अनन्त्यगुरुद्वयं वा तत्रैव पर्यायः स्यात् । न तु अनन्त्यगुरौ, अन्त्यलघौ इति भावः ।

ननु 'वाक्यस्य टेः प्लुत' इत्यधिकारात् उदात्ते प्लुते जाते अपरस्मिन् प्लुतेयस्मिन् पदे उदात्तः स्वरितो वा विधीयते तत्रैकमचं वर्जयित्वा शेषमनुदात्ताच्कं स्यात्—इत्यर्थकेन 'अनुदात्तम्' इति सूत्रेण अनुदात्तप्राप्त्या विरोधाद् उदात्तप्लुतस्य समावेशो दुर्लभः । अत आह—**अनुदात्तमिति ।** 'अनुदात्तम्' इति परिभाषासूत्रस्य उदात्तत्व-स्वरितत्वान्यतर-विधायकशास्त्रत्वस्य लिङ्गत्वेन त्रिपाद्या असिद्धत्वात् उदात्तत्वस्वरितत्वान्यतरविधायक-शास्त्रत्वप्रकारकज्ञानस्य दुर्लभत्वेन एतस्याः सापादिक्याः त्रिपाद्यामप्रवृत्त्या उदात्तप्लुत-द्वयश्रवणाभावाय सूत्रे एकैकग्रहणमावश्यकम् ।

रनृतो' इससे विहित प्लुतत्व का समावेश प्राप्त होगा । सूत्र में उपात्त एकैकशब्द से पर्यायता सिद्ध नहीं हो सकती; क्योंकि एकैकग्रहण 'गुरोरनृतो' इससे प्राप्त अनन्त्य गुरुद्वय की प्लुतता के पर्यायार्थ चरितार्थ है । अतः अन्त्य लघुवर्ण वाले वाक्य में प्राप्त प्लुत की पर्यायता का निर्णायक एकैकपद नहीं हो सकता । प्रकरण से टि का ही ग्रहण होने के कारण अपिशब्द औचित्यरूप व्याख्यान से प्राप्त टि का ही संग्राहक है ! अपि-शब्द से अन्त्य टि गुरुभूत हो, या तद्भिन्न–दोनों प्रकार का गृहीत होता है ।

शङ्का—'अनुदात्तं पदमेकवर्जम्' इस सूत्र के द्वारा जिस स्थल में उदात्त अथवा स्वरित विहित रहता है, उस स्थल में शेष भाग को अनुदात्तत्व का विधान होता है । इस प्रकार उदात्त

९८ अप्लुतवदुपस्थिते । ६ । १ । १२९ । **उपस्थितोऽनार्ष इतिशब्दः, तस्मिन् परे प्लुतोऽप्लुतवद् भवति, अप्लुतकार्यं यणादिकं करोति ।**

प्राचामिति **तु पक्षे सर्वेषां प्लुताभावार्थम् ।** विकल्पत इति । **सा च व्यवस्थितविभाषा । तेन 'अग्नीदग्नीन्विहर' इत्यादौ 'अग्नीत्प्रेषणे' (८ । २ । ९२) इति न । भाष्ये तु 'विभाषा पृष्ट' (८ । २ । ९३) इति सूत्रे विभाषेति योगविभागो दर्शितः । साऽपि व्यवस्थितविभाषेति** कैयटः**। अत एव 'ओश्रावये परस्येति वक्तव्यम्' इति वचनस्य 'अग्नीदग्नीन्' इत्यादौ प्लुतनिवृत्तये कृतस्य विभाषेति योगविभागेन प्रत्याख्यानं भाष्योक्तं सङ्गच्छते । एवञ्च भाष्यसम्मतैषा व्यवस्थितविभाषेत्याहुः ॥**

अप्लुतवदित्युक्त्या प्लुत इत्यध्याहारः, तदाह—प्लुतोऽप्लुतवदिति । प्लुत एव निषिद्ध्येतेति । **तत्स्थाने अप्लुतस्य विधानेन स एव निवर्त्तेतेत्यर्थः । प्रसज्यप्रतिषेधेन**

प्राचामित्यस्य योगविभागेन पक्षे सर्वेषां प्लुतानामभावबोधनेन सर्वोऽपि प्लुतो विकल्पेन भवतीति परममूलकारमतम् । व्यवस्थितविभाषाश्रयणाद् 'अग्नीदग्नीन् विहर' इत्यत्र न । भाष्यानुसारेण स्वमतमाह—**भाष्ये तु इति ।** अत्रत्यो मूलग्रन्थः 'अवङ् स्फोटायनस्य' इत्यत्र व्याख्यातः ॥

अप्लुतवदुपस्थिते ॥ अत्र स्वस्मिन् स्वसादृश्याभावात् प्लुतस्याध्याहारः । अप्लुतवदित्यत्र वत्करणाभावे अप्लुतस्य विधाने आदेशमात्रस्य स्थानिनिवर्तकत्वस्य दृष्टतया अत्रापि अप्लुतादेशेन प्लुतस्य निवृत्तिः प्राप्ता । एवञ्च प्रगृह्याश्रये प्रकृतिभावस्थले प्लुतस्य

प्लुत होने के अनन्तर शेष को अनुदात्त होने से दो उदात्त प्लुतों का समावेश प्राप्त न होने से 'एकैक' ग्रहण व्यर्थ है ?

समाधान—'अनुदात्तं पदमेकवर्जम्' इसकी त्रिपादी में प्रवृत्ति नहीं होती; क्योंकि उदात्त-स्वरितान्यतराच्त्वविधायक शास्त्रत्व इसका उपस्थापक लिङ्ग है । त्रिपादी शास्त्र इसकी दृष्टि में असिद्ध हो जाने से स्वोपस्थापक लिङ्गज्ञानाभाव के कारण प्रवृत्ति नहीं होती । अतः उदात्त प्लुतद्वय के निवारणार्थं एकैकग्रहण आवश्यक है । 'अनुदात्तम्' इस सूत्र के शेखर में विशेष विचार है ।

'प्राचाम्' इसमें योगविभाग के द्वारा सभी प्लुतविधायक सूत्रों में सम्बन्ध करने से प्लुतमात्र की पक्ष में अप्रवृत्ति सूचित होती है । व्यवस्थितविभाषा के आश्रयण से 'अग्नीत्प्रेषणे परस्य च' इसकी प्रवृत्ति 'अग्नीदग्नीन् विहर' इसमें नहीं होती ।

भाष्य में 'विभाषा पृष्ट' इस सूत्र के 'विभाषा' पद का योगविभाग किया है । इसके द्वारा प्लुत का विकल्प से विधान किया है । कैयट ने व्यवस्थितविभाषा के रूप में विभाषा पद की व्याख्या की है । अतएव 'अग्नीदग्नीन् विहर' इसमें प्लुतनिवृत्त्यर्थ आरब्ध 'ओश्रावयेपरस्य' इस वार्त्तिक के विभाषापद के योगविभाग द्वारा भाष्यकारकृत प्रत्याख्यान की सङ्गति होती है । अतः व्यवस्थितविभाषा भाष्यसम्मत है ॥

अप्लुतवदुपस्थिते ॥ अप्लुत को अप्लुतवद्भाव असम्भव और अनावश्यक होने से प्लुत का अध्याहार है । सूत्र में वत्करण का प्रयोजन इस प्रकार है—वत् निर्देश के अभाव में प्लुत

सुश्लोक३ इति, सुश्लोकेति ।

वत् किम् ? अप्लुत इत्युक्तेऽप्लुत एव विधीयेत, प्लुतश्च निषिध्येत । तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात् । अग्नी३ इति ॥

व्याख्यानं तु न युक्तम्; गौरवात् । किञ्च, तथा सति प्लुतप्रकरणे एव नोपस्थिते इति वदेत् । न च पर्युदासे 'अग्नी३ इति' इत्यादौ प्रगृह्याश्रयप्रकृतिभावं बाधित्वा परत्वादप्लुतवद्भावे दीर्घादिकं स्यादिति वाच्यम्; शब्दत इतिशब्दसापेक्षाप्लुतवद्भावापेक्षया वर्णमात्रापेक्षप्रकृतिभावस्यान्तरङ्गत्वात् ।

अप्लुतवदित्यस्य प्लुतकार्यं नेत्यर्थस्तु न शब्दमर्यादालभ्यः; प्लुतेऽप्लुतसादृश्यविधानस्यैव शब्दतो लाभात् ।

श्रवणं न स्यात् । परममूले सर्वमेतत् स्फुटम् । न च अप्लुतपदे प्रसज्यप्रतिषेधमाश्रित्य प्लुतो न भवतीति व्याख्याने जातोऽपि प्लुतो निवर्तेत, यथा जातापि प्रातिपदिकाद् विभक्तिर्हल्ङ्यादिना लोपेन निवर्तते इति वाच्यम्; नञ् क्रियायां न भवतीति रूपेण अन्वये प्लुतशब्देन सह अनन्वयात् समासो न स्यात् । असमर्थसमासकल्पने गौरवम् । 'भुक्तवन्तम्' इति न्यायविरोधश्च । अतः पर्युदासपरतयैव व्याख्यानमुचितम् ।

उपायान्तरमप्याह—**किञ्चेति** । उपस्थिते = अनार्षे इतिशब्दे परे प्लुतो न भवतीत्यर्थकम् 'उपस्थिते न' इति सूत्रं क्रियेत । न च 'अग्नी इति' इत्यत्र 'ईदूदेत्' इति प्रगृह्यसंज्ञायां तदाश्रयप्रकृतिभावं बाधित्वा परत्वाद् अप्लुतवद्भावे दीर्घादि कार्यं स्यादिति वाच्यम्; इति-शब्दसापेक्षस्य अप्लुतवद्भावस्य अपेक्षया इकारवर्णभावनिमित्तकस्य

को अप्लुत का विधान होने से प्लुत का निषेध सिद्ध होगा । क्योंकि आदेश का स्थानी की निवृत्ति करने का स्वभाव है । अतः प्लुत की निवृत्ति होने से गुणादि-सन्धिकार्य होगा । किन्तु वत्करण से अप्लुत के समान होने के कारण सन्धिकार्य के होने पर भी प्लुत का श्रवण होता है । वह नहीं होगा, इसके लिये वत्करण आवश्यक है । वत्करण के अभाव में 'अप्लुत' इसका प्रसज्यपरक व्याख्यान में नञ् का क्रिया के साथ अन्वय होने से प्लुत के साथ असमर्थ समास तथा 'भवति' इस क्रिया के अध्याहार में गौरव है । अतः पर्युदासपरक व्याख्यान ही उचित है ।

किञ्च इससे दूषणान्तर देते हैं । प्लुतप्रकरण के आरम्भ में ही 'उपस्थिते न' इसप्रकार के सूत्रन्यास करने से इष्ट की सिद्धि हो जाती, पुनः एतादृश निर्देश के वैयर्थ्य से भी उक्त व्याख्या युक्त नहीं है ।

शंका—पर्युदासपक्ष में 'अग्नी इति' इस प्रयोग में 'ईदूदेत्' इससे प्रगृह्यसंज्ञा होने पर भी प्राप्त प्रकृतिभाव का 'अप्लुतवत्' इससे परत्वमूलक बाध होगा । अतः प्लुतभिन्न प्लुतसदृश दीर्घादि कार्य का इसके द्वारा विधान प्राप्त होगा ?

समाधान—प्रकृतिभाव अज्मात्रनिमित्तक होने से अन्तरङ्ग है । 'अप्लुतवत्' इसका इति-शब्द निमित्त है । अतः बहिरङ्ग है । अन्तरङ्गपरिभाषा से बहिरङ्ग अप्लुतवद्भाव की असिद्धता होने से प्रगृह्याश्रय प्रकृतिभाव होता है । अप्लुतवद्भाव होने से प्लुत-श्रवण होता है ।

किसी ने 'अप्लुतवत्' इस का 'प्लुत कार्य का प्रतिषेध' ऐसा अर्थ किया है । किन्तु ऐसे

भाष्ये प्लुतकार्यप्रतिषेधार्थमित्युक्तिस्तु फलितार्थाभिप्रायेणैवेति बोद्धव्यम्। प्रगृह्याश्रये इति। प्लुते कृतेऽपि तस्यासिद्धत्वाद्दीर्घत्वबुद्धिवत् तद्गतं प्रगृह्यत्वमनुकार्ये सुलभम्। अनुकरणे तु 'प्रकृतिवदनुकरणम्' (प० भा०) इत्यतिदेशात्तत्त्वमिति भावः।

किं मया कर्त्तव्यमिति पृष्टे आह—चिनु ही३दमिति। 'विभाषा पृष्टप्रतिवचने

प्रकृतिभावस्य अन्तर्भूतनिमित्तकत्वेन अन्तरङ्गतया परापेक्षया अन्तरङ्गस्य बलवत्त्वेन पूर्वं प्रकृतिभावेन न दीर्घादिकार्यम्।

अप्लुतवद्भावेन अप्लुतसादृश्यं विधीयते, न तु प्लुतकार्यं प्रतिषिध्यते; निषेधरूपार्थस्य शब्दव्युत्पत्त्या लब्धुमशक्यत्वात्। 'प्लुतकार्यप्रतिषेधार्थः अप्लुवद्भावः' इति भाष्योक्तिस्तु अप्लुतसादृश्यविधानेन यत् फलितं तदभिप्रायेण, न तु सूत्रवाच्यार्थतात्पर्येण। **प्लुते कृतेऽपीति**। प्रगृह्यसंज्ञादृष्ट्या प्लुतस्य त्रैपादिकत्वेन असिद्धत्वात् पूर्वं प्रगृह्यसंज्ञायां तदनन्तरं प्लुते कृते इत्यर्थः। न च 'प्लुतप्रगृह्याः' इत्यत्र प्लुतग्रहणसामर्थ्यात् स्वरसन्धिषु प्लुतस्य सिद्धत्वज्ञापनेन कथं प्लुतस्यासिद्धत्वमिति वाच्यम्; प्लुतस्य स्वरसन्धिषु असिद्धत्वाभावबोधनेऽपि प्रगृह्यसंज्ञां प्रति तादृशकल्पनायाः असत्त्वात्। ततश्च 'अणोऽप्रगृह्यस्यानुनासिकः' इत्यनेन 'अग्नी इति' इत्यत्र अनुनासिके प्राप्ते प्रगृह्यसंज्ञादृष्ट्या जातस्य प्लुतस्यासिद्धत्वाद् दीर्घेकारबुद्ध्या पुनः प्रगृह्यसंज्ञायाम् 'अणोऽप्रगृह्यस्य' इत्यनेन अनुनासिको न भवति। तथा च अनुकार्यनिष्ठदीर्घत्वबुद्धिवत् अनुकार्यनिष्ठप्रगृह्यत्वमपि सुलभम्। अतः प्रगृह्यसंज्ञानिमित्तकः प्रकृतिभावः 'अग्नी३ इति' इत्यत्र भवति। वत्करणेन अप्लुतसादृश्यात् दीर्घादिकार्यमात्रं प्रवर्तते। प्लुतश्च न निषिध्यते। तथा च प्लुतस्य श्रवणं निराबाधम्। वत्करणाभावे तु प्लुतस्यैव निषेधप्रसङ्ग इति। अनुकरणे तु 'प्रकृतिवदनुकरणं भवति' इति परिभाषया तत्त्वम्=अनुकार्यगतं प्रगृह्यत्वम् अनुकरणे अतिदेशेन सिद्धम्।

अर्थ की शब्दशक्ति द्वारा सिद्धि न होने से यह अग्राह्य है। शब्दशक्ति से प्लुत में प्लुतसादृश्य का ही विधान प्रतीत होता है। भाष्य में अप्लुतसादृश्य के विधान द्वारा प्लुत कार्य की व्यावृत्ति फलित होती है। इसी अभिप्राय से प्लुत कार्य के निषेधार्थ 'अप्लुतवद्भाव' कहा है। **प्रगृह्याश्रय इति**। 'अग्नी इति' इसमें प्रगृह्यसंज्ञा और प्लुत होने के बाद 'अणोऽप्रगृह्यस्यानुनासिकः' इस सूत्र से प्राप्त अनुनासिक के वारणार्थ प्रगृह्य संज्ञा की अपेक्षा है; क्योंकि अनुनासिक प्रगृह्य से भिन्न को होता है। प्लुत के त्रिमात्र होने से द्विमात्र दीर्घ ईकारान्त न होने के कारण 'ईदूदेत्' इससे प्रगृह्य संज्ञा प्राप्त नहीं है। किन्तु प्रगृह्य संज्ञा की दृष्टि में प्लुत असिद्ध होने से दीर्घत्व की बुद्धि से जिस प्रकार प्रगृह्य संज्ञा होती है, उसी प्रकार प्रगृह्याश्रय प्रकृतिभाव की दृष्टि में प्लुत की असिद्धता हो जाने से अनुकार्य में प्रगृह्यत्व सुलभ है। अनुकरण में 'प्रकृतिवदनुकरणं भवति' इसके द्वारा प्रगृह्यत्वातिदेश सुकर है। 'अग्नी इति' इसमें प्लुत होने से 'ईदूदेत्' इससे प्रगृह्य संज्ञा की प्राप्ति न होने से प्रगृह्याश्रय प्रकृतिभाव का कथन युक्त नहीं है—इस शङ्का के परिहारार्थ ग्रन्थ का अवतरण है—यह भाव है॥

९९. ई३ चाक्रवर्मणस्य । ६ । १ । १३० । ई३कारः प्लुतोऽचि परेऽप्लुतवद्वा स्यात् । चिनु हि३ इति, चिनु हीति । चिनु हि३ इदम्, चिनु हीदम् । उभयत्रविभाषेयम् ।।

हेः' (८।२।९३) इति प्लुतः। इदंशब्दोऽत्र वाक्यान्तरस्थ इति हेरिकारस्य वाक्यटित्वम् ।

उभयत्रविभाषेयमिति । उपस्थिते प्राप्तेऽनुपस्थिते चाप्राप्ते इत्यर्थः । विभाष्यते विकल्प्यते इति विभाषा । 'गुरोश्च हलः' (३ । ३ । १०३) इत्यप्रत्यये टाप्; न वेति विभाषायामिति भाष्यप्रयोगात् । भाष्ये तु "किमर्थमिदमुच्यतेऽनुपस्थितार्थम्, तत्र ई ग्रहणेन नार्थः, अविशेषेण चाक्रवर्मणस्याप्लुतवदित्येव इदमपि सिद्धम्-वशा इयं वशेयम्"

ई३ चाक्रवर्मणस्य ।। किं मया चेतव्यमिति प्रश्नस्य नोत्तरवाक्यं चिनु ही३ इदमिति । तथा सति—इदंशब्दस्य पूर्ववाक्यस्थत्वेन वाक्यान्तरस्थत्वाभावात् हि-घटकेकारस्य टित्वानापत्तौ प्लुतानापत्तेः । अत इदमो वाक्यान्तरस्थत्वसम्पादनाय किं मया कर्तव्यम् ?—इत्यनेन कार्यविशेषस्य प्रश्ने, उत्तरम् 'चयनं कार्यं' चिनु हि, इदं वाक्यान्तरेण सम्बद्धम् । किं चेतव्यमिति प्रश्ने तु चयनं निश्चितम्, वस्तुविशेषोऽनिश्चितः—कस्य चयनमिति । तथा च इदमित्यनेन विशेषवस्तु निर्दिश्यते इति उत्तरवाक्ये वस्तुविशेषनिश्चायकतया इदम्पदस्य पूर्ववाक्यस्थत्वे तस्यैव टित्वं स्यात् इत्याशयेनाह—इदं शब्दोऽत्रेति ।

अवैदिके इति-शब्दे परे अप्लुतादित्यनेनाप्लुतवद्भावे प्राप्ते, वैदिके इति-शब्दे च अप्राप्ते अनेन विकल्पेन विधानात् उभयत्र विभाषा । 'विभाषा' शब्दोऽव्ययः—इति कस्यचिन्मतं खण्डयति—विभाष्यते इति ।

वस्तुतो नेयमुभयत्र विभाषेति वक्तुमुपक्रमते—भाष्ये इति । भाष्यकृता 'ई३ चाक्रवर्मणस्य' इति सूत्रे ई-ग्रहणं प्रत्याख्याय तन्मते 'वशा इयं वशेयम्' इत्यपि सिद्धं भवतीत्युक्तम् । तथा च अवैदिके इतिशब्दे परे सर्वत्र 'ई३ चाक्रवर्मणस्य' इत्यस्य प्राप्त्या

'ई३ चाक्रवर्मणस्य ।। इसका उदाहरण है—'मैं क्या करूँ ?' इस प्रकार प्रश्न करने पर किसी का उत्तर है—चिनु ही ३ इति । चिञ् धातु के लोट् लकार मध्यमपुरुष के एकवचन का रूप 'चिनु' है । इसके आगे 'हि' अव्यय है । 'अनन्त्यस्याऽपि प्रश्नाख्यानयोः' इससे प्लुत है । इदम् शब्द वाक्यान्तरघटक है । अतः वाक्यसम्बन्धी टि हि-घटक इकार के होने से उसको प्लुत हुआ । अनार्ष = अवैदिक इति शब्द के परवर्ती होने पर 'अप्लुतवद्' इससे प्राप्त अप्लुतवद्भाव का, इति शब्द से भिन्न के परवर्ती होने पर अप्राप्त अप्लुतवद्भाव का इसके द्वारा विकल्प होने से यह 'उभयत्र विभाषा' है । विभाषा पद अप्रत्यय और टाप् प्रत्यय से निष्पन्न है । अतः यह अव्यय नहीं है । भाष्यकार ने 'विभाषायाम्' इस प्रकार का प्रयोग किया है ।

नवीन मत में यहाँ उभयत्रविभाषा नहीं है । भाष्य में इसका उदाहरण वैदिक इति शब्द को परवर्ती मानकर दिया गया है । वहाँ 'अप्लुतवद्' इसकी प्राप्ति वैदिक इति-शब्द के कारण

---

१. 'चिञ् चयने' इत्यस्य लोटि मध्यमपुरुषैकवचने 'चिनु' इति रूपम् । हिरव्ययम् ।

इत्युक्तम्। तद्बलेनोपस्थिते पूर्वविप्रतिषेधेन ईग्रहणेऽपि नित्याप्लुतवद्भाव एवेष्टः। प्रत्याख्याने नित्याप्लुतवद्भावस्य येननाप्राप्तिन्यायेन वैकल्पिकतद्बोधिताभावांशबाधकत्वात्। 'उपस्थित इत्यस्य निवृत्त्या परविप्रतिषेधादुभयत्रविभाषेयम्' इति कैयटस्य प्रमादः।

मूलं तु इतिशब्दभिन्ने वैदिकेतिशब्दे चेत्येवम्परतया कथञ्चिद्व्याख्येयमित्यन्ये। उद्देश्यप्रतिनिर्देश्ययोरैक्यमापादयत् सर्वनामपर्यायेण तत्तल्लिङ्गभागितीयमिति निर्देशः॥

अनवकाशत्वात् येननाप्राप्तिन्यायेन 'अप्लुतवदुपस्थिते' इति 'ई३चाक्रवर्मणस्य' इति सूत्रस्य बाधकं प्रत्याख्यानपक्षे। तथा सति चिनु हि इत्यत्राऽपि नित्याप्लुतवद्भाव एव अपवादत्वाद् भवति। ईकारारम्भपक्षे तु 'सुश्लोकेति' इत्यादौ ईकाराभावाद् 'ई३ चाक्रवर्मणस्य' इत्यस्याप्राप्तिस्थले नित्याप्लुतवद्भावस्य चारितार्थ्येन अनवकाशत्वाभावात् परत्वेन 'ई३ चाक्रवर्मणस्य' इत्यस्य प्रवृत्तौ फलभेदः स्यात्। तस्माद् आरम्भप्रत्याख्यानयोः फलैक्याय आरम्भपक्षे पूर्वविप्रतिषेधेन नित्याप्लुतवद्भाव एव एष्टव्यः। तथा च अवेदिकेतिशब्दातिरिक्ते अस्य प्राप्त्या अप्राप्तविभाषात्वमेव।

परममूले उभयत्रविभाषापदस्य प्राप्ते अप्राप्ते च विभाषेति नायमर्थः, किन्तु इतिशब्दभिन्ने इदमादिशब्दे परे वैदिकेतिशब्दे च परे अनेन विभाषा अप्लुतवद्भावः—इत्येवम्परतया परममूलं नेयम्। ईदृशार्थस्य कथने उभयत्रविभाषापदस्य न प्रयोगः, किन्तु प्राप्ताप्राप्तविभाषास्थले एव—इत्यभिप्रायेण मूले यथाकथञ्चिदित्युक्तम्।

ननु इदं-शब्दस्योद्देश्यसमर्थकत्वेन उद्देश्यस्य सूत्रस्य नपुंसकत्वेन स्त्रीलिङ्गनिर्देशो नोचित इत्यत आह—**उद्देश्येति**। प्रतिनिर्देश्यम् = विधेयम्। उद्देश्यविधेययोरेकत्वं प्रतिपादयत् सर्वनामपदं पर्यायेण यथेच्छम् उद्देश्यस्य विधेयस्य वा अनुसारि लिङ्गं प्रयोक्त-

---

नहीं है। इसके अनन्तर ई पद का निराकरण किया। क्योंकि चाक्रवर्मण के मत में सभी प्लुतों को अप्लुतवद्भाव होता है। अत एव वशा इयं वशेयम् इसमें भी अप्लुतवद्भाव सिद्ध हुआ। आरम्भ और प्रत्याख्यानपक्ष में समान फल होना चाहिये। इसके अनुसार 'सुश्लोक इति' इत्यादि स्थलों में 'ई३ चाक्रवर्मणस्य' इसकी प्राप्ति होने से येन नाप्राप्तिन्याय के द्वारा 'अप्लुतवत्' इससे इसका बाध ई के प्रत्याख्यानपक्ष में अवश्य करना होगा। चिनु ही ३ इति इसमें भी अपवादत्वान् नित्य अप्लुतवद्भाव ही प्राप्त होगा। अतः आरम्भपक्ष में भी पूर्वविप्रतिषेध के द्वारा नित्याप्लुतवद्भाव बाधक होगा। अतः नित्याप्लुतवद्भाव ही इष्ट है। इस प्रकार अप्राप्त अप्लुतवद्भाव का विधायक होने से अप्राप्तविभाषा है, उभयत्रविभाषा नहीं।

इसके विपरीत 'उपस्थिते' इसकी अनुवृत्ति इस सूत्र में नहीं है। और परविप्रतिषेध है। अतः 'चिनु ही३ इति इसमें पूर्व सूत्र से प्राप्त नित्याप्लुतवद्भाव का 'ई३ चाक्रवर्मणस्य' इससे विकल्प होने से उभयत्रविभाषा है' इस आशय की कैयटोक्ति प्रामाणिक नहीं है। सिद्धान्तकौमुदी में उल्लिखित उभयत्रविभाषा का तात्पर्य यह है कि वैदिक इति-शब्द एवं इससे भिन्न दोनों प्रकार के अच् परवर्ती रहने पर इससे विकल्प होता है।

शङ्का—इदम् शब्द से सूत्र का परामर्श होने से तदनुसार 'इदम्' इसका निर्देश उचित होने के कारण 'इयमुभयत्रविभाषा' यह प्रयोग असङ्गत है?

समाधान—उद्देश्य और प्रतिनिर्देश्य अर्थात् विधेय इन दोनों के ऐक्य का प्रतिपादन

१००. ईदूदेद् द्विवचनं प्रगृह्यम् । १ । १ । ११ । **ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात् । हरी एतौ । विष्णू इमौ । गङ्गे अमू । पचेते इमौ ।**

'मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम' ।

इत्यत्र त्विवार्थे 'व'शब्दो 'वा'शब्दो वा बोध्यः ।

१०१. अदसो मात् । १ । १ । १२ । **अस्मात् परावीदूतौ प्रगृह्यौ स्तः । अमी ईशाः । रामकृष्णावमू आसाते ।**

'मात्' किम् ? अमुकेऽत्र । असति माद्ग्रहण एकारोऽप्यनुवर्तेत ॥

१०२. शे । १ । १ । १३ । **अयं प्रगृह्यः स्यात् । अस्मे इन्द्राबृहस्पती ॥**

विशेषणेन तदन्तविधिमाश्रित्याह—ईदूदेदन्तमिति । द्विवचनमिति । **संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिनिषेधादिति भावः ।**

एदन्तमिति व्याख्याने फलमाह—पचेते इति ॥

व्यम् । अत एव विधेयस्य लिङ्गमनुसरन् महाकविः स्त्रीलिङ्गं प्रायुङ्क्त—शैत्यं हि यत्सा प्रकृतिर्जलस्य (र० वं० ५–५४) । प्रकृतेऽपि विधेयलिङ्गं व्यवाहरत्; विभाषानुरोधात् ॥

ईदूदेद् द्विवचनं प्रगृह्यम् ॥ ईद् ऊद् एद् द्विवचने विशेषणम्, अतस्तदन्तविधिः । ईदन्तमूदन्तमेदन्तं द्विवचनम् । द्विवचनपदं प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषया प्रत्ययवाचकत्वेन तदन्तविधिपरं न, 'संज्ञाविधौ प्रत्ययग्रहणे न तदन्तग्रहणम्' इति परिभाषया तदन्तविधेः प्रतिषेधात्, तदाह—**संज्ञाविधाविति** । ननु ईकारेण ऊकारेण च विशेषणेन तदन्तविधेर्नोपयोगः, 'हरी विष्णू' इत्युभयत्र दीर्घेकारोकारयोः केवलयोर्द्विवचनरूपत्वेन तदन्तत्वसम्पादनाय व्यपदेशिवद्भावस्यापेक्षिततया प्रत्युत गौरवमेव स्यात्, अतः तदन्तविधिर्नावश्यक इत्यत आह—**एदन्तमिति** । 'पचेते' इत्यत्र एकारमात्रस्य द्विवचनत्वाभावात् एतदर्थम् एदन्तमित्यर्थस्तदन्तविधिना अवश्यं वाच्यः । तथा च ऐकरूप्याय ईकारोकारयोरपि तदन्तविधिः कृतः । व्यपदेशिवद्भावाच्च ईदन्तम् ऊदन्तश्च सम्पादनीयम् । एतेन एकारांशे द्वितीयोदाहरणविशेषार्थबोधनाय सफलम् । अन्यथा 'गङ्गे अमू' इत्येकेनोदाहरणेन निर्वाहे द्वितीयोदाहरणस्य कोऽवकाशः ! ॥

अदसो मात् ॥

शे ॥

करने वाला सर्वनाम दोनों के लिङ्गों में पर्याय से प्रयुक्त होता है । यहाँ विधेय विभाषापद के अनुसार स्त्रीलिङ्गनिर्देश भी उचित है ॥

ईदूदेद् द्विवचनं प्रगृह्यम् ॥ एतत्सूत्रघटक ईत्, ऊत् और एत् यह विशेष्यभूत द्विवचन का विशेषण है । अतः तदन्तविधि होने से ईदन्त ऊदन्त इत्यादि अर्थ का लाभ हुआ है । द्विवचन शब्द भी प्रत्ययवाचक होने से प्रत्ययग्रहणपरिभाषा के द्वारा प्राप्त तदन्तविधि का 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति' इसके द्वारा तदन्तविधि का प्रतिषेध हो जाता है ।

१०३. निपात एकाजनाङ् । १ । १ । १४ । **एकोऽज्निपात आङ्वर्जः प्रगृह्यः स्यात् । अ अवद्यम् । इ विस्मये । उ वितर्के । इ इन्द्रः । उ उमेशः ।**

'अनाङ्' इत्युक्तेरङिदाकारः प्रगृह्य एव । आ एवं नु मन्यसे । आ एवं किल तत् । ङित्तु न प्रगृह्यः । ईषदुष्णम् ओष्णम् ।

निपात एकाजनाङ् (१ । १ । १४) ॥ **निपात इति किम्? चकारात्र । प्रत्ययस्य शास्त्रकल्पितार्थवत्त्वात्, एकाजिति कर्मधारयो वर्त्तिपदार्थप्रधानत्वेनान्तरङ्गत्वाद्, 'ब्याहरति मृगः' इत्यादिनिर्देशाच्च । तेन प्रेदमित्यादौ न दोषः । तदाह—** एकोऽजिति ।

आङ्वर्ज इति । **पर्युदासस्यौचित्यात् । अत एवैकाजनाङिति नासूत्रि ।**

निपात एकाजनाङ् ॥ निपातग्रहणाभावे एकस्य अचो णलोऽकारस्य प्रगृह्यत्वमनेन स्यात् । तथा च 'चकार अत्र' इति प्रयोगे चकारघटकस्य तिपो णलादेशेन निष्पन्नाकारस्य प्रगृह्यत्वे 'अकः सवर्णे' इति दीर्घो न स्यात् । न च अर्थवद्ग्रहणपरिभाषाया वर्णग्रहणेऽपि प्रवृत्त्या अर्थवत एव एकस्याचो ग्रहणेनात्र प्रगृह्यसंज्ञाया न प्राप्तिरिति न दोषोऽत आह—**प्रत्ययस्येति** । अर्थवद्ग्रहणपरिभाषायां शास्त्रीयोऽपि अन्वयव्यतिरेकाभ्यां कल्पितोऽर्थो गृह्यते । यस्य सत्त्वे योऽर्थः प्रतीयते सोऽन्वयः, यस्याभावे योऽर्थो न प्रतीयते स व्यतिरेक इति । णलोऽकारस्य शास्त्रीयार्थस्य सद्भावात् नानर्थकत्वं तस्य ।

एकाजित्यत्र कर्मधारये आश्रीयमाणे अवयवार्थज्ञानसहकारेण समासार्थः समासशक्त्या ज्ञायते । बहुव्रीहिजन्यशाब्दबोधे तु समस्यमानपदार्थाद् अतिरिक्तस्य अन्यपदार्थस्याप्यपेक्षणात् बहिरङ्गत्वमिति बोधे तत्सामग्र्यां वान्तरङ्गत्वबहिरङ्गत्वचिन्तनम् । तदाह—**एकाजिति** । कर्मधारयस्वीकारादेव 'ब्याहरति मृगः' इति निर्देशस्योपपत्तिः । न हि वि एकम् अज्रूपम् । बहुव्रीहौ तु एकोऽच् इकारो यस्मिन् विशब्दे इति स्यादेव प्रगृह्यसंज्ञा । तदाह—**प्रेदमिति** । अत्रापि प्रशब्दस्य निपातस्य अज्घटितत्वेन अज्रूपत्वाभावात् अनाङिति पर्युदासः, न तु प्रसज्यप्रतिषेधः । अत्रार्थे सूत्रसम्मतिमाह—**अत एवेति** ।

एदन्तद्विवचन का उदाहरण 'पचेते' इसको दिया है । यहाँ एकाररूप द्विवचन नहीं है, किन्तु एकारान्त द्विवचन है । अतः तदन्तविधि होने से प्रगृह्यसंज्ञा होती है ॥

निपात एकाजनाङ् ॥ इसमें निपात पद का प्रयोजन 'चकार' इसमें णल्घटक अकार को प्रगृह्यसंज्ञा का वारण है । अन्यथा तिप् के स्थान में विहित णल् का शास्त्रबोधित अर्थ होने के कारण वर्णमात्र के भी अर्थवान् होने से प्रगृह्यसंज्ञा हो जायगी । 'एकाच्' इसमें एकश्चासौ अच् च—इस अर्थ में कर्मधारय समास है । बहुव्रीहि में अन्यपदार्थ की प्रधानता होने से बहिरङ्गता है । कर्मधारय में समासघटक पद के अर्थ की प्रधानता होती है । अतः अन्तरङ्ग होने से यहाँ कर्मधारय समास माना गया है । 'प्रेदम्' यहाँ एक अच् रूप निपात के न होने से प्रगृह्य संज्ञा नहीं हुई । बहुव्रीहि मानने पर 'प्र' इसमें एक अच् के होने से उक्त संज्ञा की आपत्ति हो जायगी । कर्मधारय समास में 'व्याहरति मृगः' इसमें 'व्या' का यण्निर्देश प्रमाण है । अन्यथा

वासुदेववाचकस्य अशब्दस्य आङा सहाव्ययीभावे आ आत् अमित्यादौ सत्यभिधाने स्वत आङ्भिन्नत्वेन पूर्वान्तवत्त्वेन निपातत्वेऽपि प्रगृह्यत्वन्न। पूर्वान्तवत्त्वेनाऽऽङ्त्वातिदेशेऽतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्यनिवृत्तेरतिदेशस्वभावसिद्धत्वात्।

'ओत्' इति सूत्रे 'आ उ ओ, इत्यत्र अनाङिति प्रतिषिद्धार्थोऽयमारम्भः' इति भाष्यं तु **पर्युदासेऽपि गम्यस्य प्रतिषेधस्य सत्त्वान्नानुपपन्नम्।**

अनाङिति पर्युदासादेव निपातैकाज्रूपत्वे लब्धे निपातैकाज्ग्रहणं स्पष्टार्थम्।

पर्युदासपक्षे दोषमाशङ्क्य समाधत्ते--**वासुदेवेति**। नच 'अकारः वासुदेवः स्यात्' इत्यनुसारेण वासुदेववाचकस्याकारस्य आङा सह 'आङ्मर्यादाभिविध्योः' इति समासे, 'अव्ययीभावश्च' इति नपुंसकत्वे', ह्रस्वो नपुंसके' इत्यनेन ह्रस्वे, सोरमादेशे अ अमित्यवस्थायां स्वतोऽङ्भिन्नत्वस्य अकारे सत्त्वेन पूर्वान्तवद्भावेन निपातत्वमादाय प्रगृह्यसंज्ञायाम् 'अमि पूर्वः' इत्यनेन पूर्वरूपं प्रकृतिभावेन प्रतिषिद्धं स्यात् इति अमिति रूपासिद्धिः।

अनाङित्यत्र प्रसज्यप्रतिषेधाश्रयणे तु स्थानिवद्भावेन आङ्त्वात् निषेधः सिध्यति। पर्युदासे तु स्वतः आङ्भिन्नत्वसत्त्वात् प्रगृह्यत्वं स्यादित्याशयः। तन्निराचष्टे—**पूर्वान्तवत्त्वेनेति**। पूर्वान्तवद्भावेन निपातत्वातिदेशाय आवश्यक इति आङ्त्वातिदेशोऽपि

वि उपसर्ग का आङ् के साथ यण् नहीं होगा। इसी आशय से 'एक अज् रूप जो निपात' इस प्रकार का अर्थ किया है।

'अनाङ्' इसमें पर्युदास है। प्रसज्यप्रतिषेध में नञ् का क्रिया के साथ अन्वय होने से असमर्थ समास की कल्पना करनी होगी। अतएव सूत्र में 'नाङ्' ऐसा पाठ नहीं है।

शंका—वासुदेववाची अशब्द का आङ् निपात के साथ 'आङ् मर्यादाभिविध्योः' इससे अव्ययीभाव समास होने पर 'अव्ययीभावश्च' इसके द्वारा नपुंसकत्व एवं 'ह्रस्वो नपुंसके' इस सूत्र से ह्रस्वविधान के अनन्तर 'अम्' इसकी सिद्धि होती है। यहाँ दीर्घ के अनन्तर आशब्द आङ् निपात से स्वतः भिन्न है, तथा पूर्वन्तवद्भाव से निपातत्व है। अतः प्रगृह्यसंज्ञा क्यों नहीं हुई ?

समाधान—निपातत्व के लिये पूर्वान्तवद्भाव के द्वारा आङ्त्वातिदेश होने पर अतिदिश्यमान धर्म से विरुद्ध स्ववृत्ति आङ्भिन्नत्व प्रयुक्त कार्य नहीं हो सकता। अतिदिश्यमान धर्म विरुद्ध स्वाश्रयप्रयुक्त कार्याभाव का निर्णय स्थानिवत्सूत्र में किया जा चुका है। अतः प्रगृह्यसंज्ञा नहीं हुई।

सत्यभिधाने इति। इसका तात्पर्य यह है दीर्घ और नपुंसक ह्रस्व दोनों की प्राप्ति में अपर निमित्तकत्व रूप अन्तरङ्गत्व नपुंसक ह्रस्वविधायक में होने से पहले होगा। बाद में दीर्घ होने पर आम् ऐसा रूप होगा, अम् ऐसा नहीं।

शंका—'ओत्' इस सूत्र के भाष्य में इसी सूत्र के प्रयोजन-प्रदर्शनप्रसङ्ग में 'प्रतिषिद्धार्थोऽयमारम्भः = प्रतिषिद्ध स्थल के लिये इसका आरम्भ है'—इस उक्ति के साथ विरोध है; क्योंकि प्रतिषेधकथन प्रसज्यप्रतिषेध का सूचक है। इस प्रकार पर्युदास से व्याख्यान युक्त नहीं है ?

समाधान—पर्युदासपक्ष में भी अनाङ्शब्द से आङ्भिन्न का ग्रहण होने से आङ् में प्रगृह्य का प्रतिषेध गम्य होता है। उसी गम्यमान निषेध के तात्पर्य से निषेध की भाष्योक्ति है। पर्युदासपक्ष में आङ्भिन्न आङ्सदृश का बोध होने से एकाच् रूपत्व से सादृश्य लिया जायगा। इस प्रकार एकाच् लब्ध हो जाता है। सूत्र में इसका उपादान स्पष्टार्थक है।

स्वाङ्गसमुदाये स्वाङ्गत्वाभाववदच्समुदायेऽच्त्वाभावाद् अच् इत्येवाच्समुदायग्रहणाभावे सिद्धे एकग्रहणमन्यत्र वर्णग्रहणे जातिग्रहणार्थम्। तेन घिप्सतीत्यादिसिद्धिरिति भाष्ये **स्पष्टम्।**

पूर्वान्तिवद्भावेन कृतेऽतिदिश्यमानो धर्मः आङ्त्वम्, तद्विरुद्धः[1] स्वाश्रयधर्मः आङ्भिन्नत्वं तन्निमित्तककार्याभावस्य अतिदेशस्वभावसिद्धत्वेन स्वाश्रयधर्मप्रयुक्तं प्रगृह्यत्वं न प्राप्नोतीति न पर्युदासपक्षेऽपि प्रगृह्यसंज्ञाप्रसक्तिस्तत्र। **सत्यभिधाने** इत्यस्यायं भावः– अपरनिमित्तकत्वेन अन्तरङ्गत्वात् पूर्वमेव नपुंसकह्रस्वे पश्चाद्दीर्घे अमित्येव रूपमिति बोधनाय।

ओदिति सूत्रे भाष्ये आ, उ—इत्यनयोरेकादेशे कृते 'ओ' इत्यत्र 'अन्तादिवच्च' इत्यनेनातिदेशे अनाङिति प्रतिषेधे प्राप्ते 'ओत्' इति सूत्रमारब्धमित्युक्तम्। पर्युदासस्वीकारे अनाङिति प्रतिषेधकथनासङ्गतिरिति नाशङ्कनीयम्। पर्युदासेऽपि आङ्भिन्नत्वकथनेन आङः प्रगृह्यत्वं नेति गम्यते इति गम्यमानं प्रतिषेधमादाय प्रतिषिद्धार्थोऽयमारम्भः–इत्युक्तं भाष्ये, इत्येतदाह—**ओदित्यादिनेति। अनाङिति।** पर्युदासस्य

शंका—स्वाङ्गसमुदाय जिस प्रकार स्वाङ्ग नहीं है, उसी प्रकार अच्समुदाय भी अच्त्व का पर्याप्त्या अधिकरण नहीं है। इसी कारण से अच् समुदाय को केवल अच्पदोपादान से ही प्रगृह्यसंज्ञा की व्यावृत्ति सिद्ध हो जाती, सूत्र में एकपदोपादान का क्या प्रयोजन है?

समाधान—एकग्रहण के सामर्थ्य से वर्णग्रहण में जातिग्रहण की कल्पना होती है। अर्थात् जिस शास्त्र में यादृश वर्णत्व व्याप्य जाति वाले वर्णो का ग्रहण है वहाँ तादृश वर्णत्व व्याप्य जातिवाले वर्णों से आरब्ध समुदाय में उस वर्णत्व जाति का आरोप होता है। दम्भधातु से सन् प्रत्यय करने से निष्पन्न 'धिप्सति' इसमें 'हलन्ताच्च' इसके द्वारा सन् के कित्त्व के लिये इस सूत्र को इक्समीप हल् से उत्तर झलादि सन् की अपेक्षा है! मकार और भकार दम्भधातु घटक वर्णों के रहने से हल् के अव्यवहित उत्तर सन् नहीं है; क्यों कि हल्द्वय में हल्त्व का अभाव है? ज्ञापन द्वारा वर्णत्वव्याप्य हल्त्वजात्यवच्छिन्न हल्द्वयारब्ध समुदाय में हल्त्वजाति का अतिदेश होने से हल् समुदाय हल् के ग्रहण से गृहीत होने के कारण कित्त्व की सिद्धि इस ज्ञापन का फल है। इसी प्रकार अच्समुदाय में अच्त्व का अतिदेश होने से समुदाय को प्राप्त प्रगृह्यसंज्ञवारणार्थ एक-ग्रहण आवश्यक है।

---

१. विरुद्धत्वं तदभाववत्ताविधया गृह्यते, न तु तदभावव्याप्यवत्ताविधया, यथा धूमस्य धूमाभावः तदभावविधया विरोधी; भावाभावयोर्विरोधात्। एवं वह्न्यभावोऽपि धूमस्य विरोधी परं तदभावव्याप्यवत्ताविधया। धूमाभावस्य अयःपिण्डेऽपि वृत्तित्वेन तत्र वह्न्यभावस्य अभावात् वह्न्यभावो धूमाभावव्याप्यः। तथा च व्याप्यसत्त्वे व्यापकसद्भावात् वह्न्यभावस्य व्याप्यरूपस्य सत्त्वे धूमाभावस्य निश्चयात् तत्र तदभावो धूमाभावः तद्व्याप्यो वह्न्यभावः तद्विधया धूमेन सह विरोधः। एवं च अधुरित्यादौ 'विभाषा घ्राधेट्' इति सूत्रेण लुगर्थं धेट्त्वमाश्रयणीयम्। तथा च तद्व्याप्यवत्तामुद्रया विरुद्धत्वे आदन्तत्वं स्वाश्रयवृत्तिधर्मोऽपि विरोधीति 'आतः' इति जुस् न स्यात्। तदभाववत्तामुद्रया तु धेट्त्वं धेट्त्वाभावस्य विरुद्धम्, नादन्तत्वस्य।

'ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्' ।।
अन्यत्र ङित्' इति विवेकः ।।

जातिग्रहणार्थमित्यस्योपात्तजात्याश्रयैकानेकव्यक्तिग्रहणार्थमित्यर्थः । तेन तित-उशब्दैकदेशस्य अउ इत्यस्यानुकरणे अउ अकरोदित्यत्र 'अनुकरणं चानिति' (१।४।६२) इति निपातत्वेऽपि प्रगृह्यत्वाभाव एकग्रहणफलं बोद्धव्यम् ।

ननु ङकारस्य क्वाप्यश्रवणेन ङिदङिद्विवेको दुर्ज्ञेय इत्यत आह—वाक्यस्मरणयोरिति । वाक्यशब्देन स्पार्थगतमनभिमतत्वम् । स्मरणम् = विस्मृतस्य स्मृतिविषयता । एवं किल तदिति । स्मृतार्थनिर्देशः ।।

तद्भिन्नस्य तत्सादृश्यग्राहित्वेन अनाङिति पर्युदासस्य आङ्भिन्नस्य तत्सदृशस्य सादृश्यञ्च एकाज्रूपनिपातत्वेन ग्रहणात् एकाज्रूपे निपाते लब्धे सूत्रे एकाच्, निपातः—इत्युभयोरुपादानं दीर्घत्वादिना सादृश्यग्रहणं मा भूदित्यर्थं स्फुटं बोधयितुमिति भावः ।

यथा स्वाङ्गस्य प्रत्येकपर्याप्तत्वेन स्वाङ्गसमुदायो न स्वाङ्गम्, तथैव अच्त्वस्य प्रत्येकपर्याप्तत्वात् अच्समुदायो नाच् । तथा च अजित्येतावत्कथनेनापि एकस्यैवाचो ग्रहणे अच्समुदायस्य व्यावृत्तौ सिद्धायां सूत्रे एकग्रहणसामर्थ्याद्वर्णग्रहणेयत्र यादृशवर्णत्वव्याप्यजात्यवच्छिन्नस्य ग्रहणं तत्र शास्त्रे जातिग्रहणम्, तादृशवर्णत्वव्याप्यजात्यवच्छिन्नारब्धसमुदाये तादृशजातेरतिदेशः इति कल्प्यते । तेन धिप्सतीत्यत्र 'हलन्ताच्च' इति कित्त्वं सिध्यति । तत्र दम्भधातोः सनि मकारभकाररूपहल्द्वयस्य सत्त्वेन हलन्तत्वविरहात् कित्त्वं न स्यात् । 'वर्णग्रहणे जातिग्रहणम्' इति स्वीकारे तु वर्णत्वव्याप्यहल्त्वजात्यवच्छिन्नस्य ग्रहणेन हल्त्वजात्यवच्छिन्नारब्धसमुदायस्य म् भ् इति ग्रहणेन दोषाभावात् । 'निपात एकाच्' इति सूत्रे तु एकग्रहणात् न जातिग्रहणम् । अत एव ज्ञापनोत्तरमेकग्रहणस्य चारितार्थ्यम् । एतत्फलितमेव अन्यत्रेति पदं मूले ज्ञापने दृश्यते ।

ज्ञापनांशे तु तस्य न प्रवेशः । एकग्रहणाद् अच्समुदायस्याच्पदेनाग्रहणे फलमाह—तेनेति । अ, उ—इत्येकदेशस्यानुकरणे अकरोदित्यनेन सम्बन्धे कृते एकस्याचोऽभावात् प्रगृह्यत्वं न ।

अनुकरणस्येतिपरकस्यैव सम्भवेन कथमिदमनितिपरमनुकरणमित्यत आह—अनुकरणमिति । 'अनुकरणञ्चानितिपरम्' इति सूत्रबलादेव ज्ञाप्यते यत् अनितिपरस्यापि अनुकरणस्य प्रयोगः । एतद्बोधनाय सूत्रोपन्यासः । अनेन गतिसंज्ञा भवति, न निपातसंज्ञा । निपासंज्ञा तु चादयन्तर्गणपाठात् । स्वार्थगतमिति । वाक्यार्थगतमित्यर्थः । आ

आङ् के ङकार का श्रवण प्रयोग में न होने से ङित् और अङित् का ज्ञान दुर्लभ है—अतः वाक्य और स्मरण अर्थ में अङित् है—यह लिखा है । पूर्व में इसकी मान्यता नहीं देते रहे अब इसकी मान्यता दे रहे हैं—इस आशय के वाक्यार्थ से पूर्वोक्तार्थ में अनभिमतत्व की प्रतीति स्पष्ट है । वही प्रकृत वाक्य शब्द से विवक्षित है । विस्मृत विषय में स्मृति की विषयता स्मरण शब्द का अर्थ है ।।

१०४. ओत् । १ । १ । १५ । **ओदन्तो निपातः प्रगृह्यः स्यात् । अहो ईशाः ॥**

'निपात' इत्यनुवृत्तम् 'ओत्' इत्यनेन विशेष्यत इत्याह—ओदन्त इति । निपातसंज्ञा चादिपदोपस्थितचादीनां सति सम्भवेऽर्थवतामेवेति सार्थकनिपातानां निपातपदेन तत्तदर्थविशिष्टानामेवोपस्थितिरिति ।

गौणमुख्यन्यायेन प्रकृतसूत्रस्थनिपातपदेन गौणार्थानां न ग्रहणमिति गोऽभवदित्यादौ च्व्यन्ते नास्य प्रवृत्तिः । एवञ्च कार्यकालपक्षेऽपि 'च्व्यन्ता निपाताः' इत्यस्या-

---

एवं नु मन्यसे । 'पूर्वमेवं नामंस्थाः, सम्प्रति एवं मन्यसे' इत्यर्थे पर्यवसन्ने पूर्वोक्तार्थस्यानभिमतत्वं स्फुटं प्रतीयते ॥

ओत् ॥ 'च्व्यन्ता निपाताः' इत्यनेन च्विप्रत्ययान्तस्यापि निपातत्वेन गोऽभवदित्यादावनेन प्रगृह्यसंज्ञा स्यादित्यत आह—**निपातेति** । चादीनां निपातसंज्ञा सति सम्भवे अर्थवतामेव भवतीति निपातपदेन उपस्थितानां तत्तदर्थविशिष्टानां चादीनां बोधे 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इति न्यायेन मुख्यार्थस्य ग्रहणात् च्व्यन्ते गौणार्थकेऽस्य सूत्रस्य न प्रवृत्तिरिति 'गोऽभवत्' इत्यादौ न प्रगृह्यसंज्ञा । अन्यत्र निपातग्रहणेन गौणस्यापि ग्रहणमिष्यते । अत एव 'ओतः च्व्यन्तस्य प्रतिषेधः' इति वार्त्तिके ओत इत्यस्यैव प्रतिषेध आरब्धो नान्यस्येत्याशयेन उक्तम्—**प्रकृतसूत्रस्थेति** । अस्मिन्नेव सूत्रे निपातपदेन गौणार्थानां न ग्रहणम्, अन्यत्र तु ग्रहणं भवत्येव । यद्यपि निपातपदेन चादीनामर्थवतामेवोपस्थितिरिति गौणमुख्यन्यायः चाद्यंशे उपतिष्ठताम्, च्व्यन्तांशे तु न विशिष्टरूपोपादानम्, अतोऽर्थद्ग्रहणपरिभाषाया नोपस्थितिः, तदनुपस्थितौ गौणमुख्यन्यायस्याऽप्यप्रवृत्तिः स्यात् । तथापि भाष्यानुरोधात् तथा व्याख्यातम् । वस्तुतः 'ओतः च्विप्रत्ययप्रतिषेधः' इति वार्त्तिकारम्भादेव प्रगृह्यसंज्ञा 'गोऽभवत्' इत्यादौ वारणीया । कार्यकालपक्षे 'च्व्यन्ताः निपाताः' इत्यस्य 'ओत्' इति सूत्रे उपस्थितिसामर्थ्यात् गौणेऽपि प्रवृत्तिरास्तामित्यत आह—**कार्यकालेति** । गौणमुख्यन्यायवशात् ओत्सूत्रे तस्यानुप-

---

ओत् ॥ इस सूत्र में अनुवृत्त 'निपात' पद विशेष्य है । उसमें ओत् के विशेषण होने से तदन्तविधि द्वारा ओदन्त इस अर्थ का लाभ हुआ । 'चादयोऽसत्त्वे' इससे विहित निपातसंज्ञा यथासम्भव विशेषणतया उपस्थित अर्थ के वाचक चादि को ही होगी । चादि पद से स्ववृत्ति की आनुपूर्वी तदवच्छिन्नविषयताप्रयोजकरूप विशिष्टोपादान होने के कारण उपस्थित अर्थवद्ग्रहण परिभाषा से अर्थवान् का ही ग्रहण होगा । अर्थ भी गौण और मुख्य में मुख्य का ही ग्रहण 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इस परिभाषा के द्वारा होगा । मुख्य अर्थ में प्रधानता ही परिभाषा का वीज है । इसीलिये 'अगौः गौः अभवत् गोऽभवत्' इसके च्व्यन्त होने से 'च्व्यन्ता निपाताः' इससे निपातसंज्ञा होने पर भी 'ओत्' इस सूत्र से प्रगृह्य संज्ञा नहीं हुई; क्योंकि यहाँ गोशब्द गौणार्थक है । कार्यकालपक्ष में 'ओत्' इसमें उपस्थित 'च्व्यन्ता निपाताः' इसके वैयर्थ्य की शङ्का से गौणार्थक निपात ग्रहण होगा—यह कथन युक्त नहीं; गौणमुख्यन्याय से उक्तसूत्र की 'ओत्' इस सूत्र में उपस्थिति नहीं होगी ।

१०५. सम्बुद्धौ शाकल्यस्येतावनार्षे । १ । १ । १६ । **सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिक इतौ परे । विष्णो इति, विष्ण इति, विष्णविति ।**

नुपस्थितिरेतत्परिभाषावशात् । अव्ययसंज्ञादौ तु नैतत्परिभाषाप्रवृत्तिः, अनित्यत्वात् । अत एवानर्थकेऽपि निपाते सा संज्ञा सिद्धयति ॥

अपो इतीत्यादौ प्रगृह्यत्वायाह—सम्बुद्धिनिमित्तक इति । **सम्बुद्धिपर इति व्याख्याने तु सोर्लुका लुप्तत्वेन तत्परत्वाभावान्न स्यात् । 'न लुमता' इति निषेधानित्यत्वं त्वगतिकगतिः ।**

स्थितिरेव । ओत्सूत्रविषयकवाक्योपप्लव एव नेति । अव्ययसंज्ञायाः गौणमुख्यन्यायस्यानित्यत्वादप्रवृत्तौ गौणेऽपि प्रवृत्तिरिष्टा । तदाह—**अव्ययेति** । अत एव अनर्थकेऽपि निपाते सा = अव्ययसंज्ञा सिद्धा ॥

सम्बुद्धौ शाकल्यस्येतावनार्षे ॥ तस्मिन्निति परिभाषाबलात् 'सम्बुद्धिपरे' इति व्याख्यानमुचितमत आह—**अपो** इति । अत्र सम्बोधनस्य लुका लुप्ततया प्रत्ययलक्षणाभावेन सम्बुद्धिपरत्वाभावात् प्रगृह्यसंज्ञा न स्यादतः सम्बुद्धिनिमित्तक ओकार इति व्याख्यातम् । पुनः शङ्कते—**न लुमतेतीति** । 'इकोऽचि विभक्तौ' इति सूत्रे अज्ग्रहणाभावे 'वारिभ्याम्' इत्यादौ हलादौ विभक्तावपि नुम् स्यात् । सत्यपि नुमि 'नलोपः' इति सूत्रेण नकारस्य लोपेन दोषाभावात्—इत्यभिधाय सम्बुद्धौ नुमि सति 'न ङिसम्बुद्धयोः' इति नलोपस्य निषेधात् नकारस्य श्रवणापत्तिः । अचि कृते तु अजादिविभक्तेरभावात् न नुम् । न च 'स्वमोर्नपुंसकात्' इत्यनेन लुकि सम्बुद्धिपरत्वाभावात् 'न ङिसम्बुद्धयोः' इत्यस्य न प्राप्तिः, प्रत्ययलक्षणन्तु 'न लुमता इति प्रतिषिद्धमिति वाच्यम्; अज्ग्रहण-

---

शंका—अनर्थक च तु वा ह इन की अव्ययसंज्ञा नहीं होगी; क्योंकि निपात पद से मुख्यार्थवाची का ग्रहण होगा, ये तो अनर्थक हैं ?

समाधान—लक्ष्यानुरोध से परिभाषा की अनित्यता के कारण अप्रवृत्ति होने से अनर्थक निपात की भी अव्ययसंज्ञा सिद्ध होती है ॥

सम्बुद्धौ शाकल्यस्येतावनार्षे ॥ एतत्सूत्रघटक 'सम्बुद्धौ' इस पद में निमित्तसप्तमी होने से 'तस्मिन्निति' परिभाषा को उपस्थिति नहीं हुई । औपश्लेषिकाधिकरण में सप्तमी मानने पर सम्बुद्धि से अव्यवहित पूर्वत्व की उपस्थिति उक्त परिभाषा के द्वारा होने से 'हे अपो' इसमें सम्बुद्धि का लुक् होने के कारण सम्बुद्धिपूर्वत्वाभाव है । अतः ओकार को प्रगृह्यसंज्ञा नहीं होगी । अतः निमित्तसप्तमी है । इस आशय से परममूल में 'सम्बुद्धिनिमित्तक ओकार' इस प्रकार का अर्थ किया है ।

शङ्का—प्रत्ययलक्षण द्वारा सम्बुद्धि-बुद्धि के होने के सम्बुद्धि से कारण अव्यवहित पूर्वत्व ओकार में सुलभ है । 'न लुमताङ्गस्य' इसके अनित्य होने से निषेधप्रवृत्ति नहीं होगी ?'

समाधान—अनित्य कल्पना से समाधान अगतिकगति है । उपायान्तर के अभाव में ऐसी कल्पना की जाती है ।

अनार्षे इति किम् ? ब्रह्मबन्धवित्यब्रवीत् ॥

१०६. उञः । १ । १ । १७ ।

इताविति किम् ? पटोऽत्र । अनार्षे किम् ? ब्रह्मबन्धवित्यब्रवीत् ।

संहिताया विवक्षायामप्यवादिरहितप्रयोगार्थमिदम् । तद्विवक्षा च वर्णोच्चारणे नियतेनार्धमात्राकालव्यवायेनोच्चारणेच्छा । तदधिकार्धमात्राकालव्यवायेनोच्चारणेच्छा च तदविवक्षेति बोद्धव्यम् ॥

उञः (१ । १ । १७) ॥ **अत्रोञ् निपात एव । उञ ऊँ इत्येकसूत्रत्वे तु** शाकल्य-

सामर्थ्यादेव कल्प्यते—न लुमताङ्गस्येति निषेधोऽनित्यः। तथा चास्याप्रवृत्तौ प्रत्ययलक्षणेन सम्बुद्धिपरत्वात् नलोपस्य निषेधे श्रवणं स्यादतोऽज्ग्रहणं तत्रावश्यकम् । तथा च न लुमतेति निषेधस्यानित्यत्वेनाप्रवृत्तौ प्रत्ययलक्षणेन सम्बुद्धिपरत्वस्य त्रपो इत्यत्रापि सौलभ्येन तथा किं न व्याख्यातम् ? समाधत्ते—**अगतिकेति ।** अगतिकस्येयं निषेधानित्यत्वरूपा गतिः । अस्य तु सम्बुद्धिनिमित्तकेति व्याख्यानरूपा गतिरस्ति, अतो निषेधानित्यत्वं नात्र ।

इतौ पदाभावे अन्यत्रापि सम्बुद्धिनिमित्तस्यौकारस्य प्रगृह्यसंज्ञा स्यात्, तथा सति हे पटो अत्रेत्यवस्थायां प्रगृह्यत्वे पूर्वरूपं न स्यात् । तदाह—**पटोऽत्रेति ।** संहिताया विवक्षास्थलेऽपि अवादिरहितप्रयोगस्य साधुत्वार्थं सूत्रमिदम् । तद्विवक्षा च = संहिताविवक्षा च । एकवर्णोच्चारणानन्तरमपरस्य वर्णस्योच्चारणे अर्धमात्राकालव्यवायो नियत इति नियतेन अर्धमात्राकालव्यवायेनोच्चारणेच्छा । अर्धमात्रातो न्यूनकालेन निर्दुष्टवर्णोच्चारणमेव न मन्यते ग्रन्थकारः । तथा च न्यूनकालोच्चारणे दोषदानं कथं युक्तमिति टिप्पणीकृदेव जानाति ! अर्धमात्राधिककालव्यवधानेनोच्चारणेच्छा संहिताया अविवक्षा ॥

उञः ॥ 'उञः' इत्यनेन किम् उञ् प्रत्याहारोऽथवा वेञ्धातोः सम्प्रसारणे कृते यद्रूपं तद् गृह्यते ? अत आह—**उञ निपात इति ।** निपातस्य तस्य ग्रहणम् । यदि उञ् प्रत्याहारो झभञ्सूत्रघटकञकारेण विवक्षितः स्यात् तदा चकारेण 'उच्' इति व्यवहरेत् ; चकारात् परेषां वर्णानां हलां पाठेन तेषां प्रगृह्यत्वे फलादर्शनात् । सम्प्रसारणस्यापि उञो ग्रहणं नेष्यते; 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषया प्रतिपदोक्तस्यैव ग्रहणात् ।

पटोऽत्र' इत्यादि में सूत्र की अप्रवृत्ति के लिये 'इतौ' इसका ग्रहण है । 'आर्ष इति' शब्द में इसकी अप्रवृत्ति के लिये 'अनार्षे' इसका उपादान है । यद्यपि संहिता की अविवक्षा में 'विष्णो इति' इस प्रकार का अवादेशरहित, तथा संहिता की विवक्षा रहने पर अवादेशघटित—दोनों प्रकार का प्रयोग उपपन्न हो जायगा, अतः सूत्रारम्भ आवश्यक नहीं है; तथापि संहिताविवक्षा में भी अवादिरहित प्रयोग की सिद्धि के लिये सूत्रारम्भ आवश्यक है । एक वर्ण के उच्चारणानन्तर दूसरे वर्ण के उच्चारण में अर्धमात्राकाल का व्यवधान नियत है । उतने काल से ही व्यवहित दूसरे वर्ण की उच्चारणेच्छा संहिताविवक्षा है । इससे अधिक कालव्यवधान में उच्चारणेच्छा संहिता की अविवक्षा है ॥

उञः ॥ इस विभक्त सूत्र में 'उञ्' पद से निपात का ग्रहण है । 'उञः ऊँ' इसको एक

ग्रहणाननुवृत्तौ ऊँ इतीत्येकमेव स्यात्; प्रगृह्यसंज्ञाप्रकरणेन प्रगृह्यत्वस्यादेशस्य च सह विधानात्। उ इति, वितीति च न स्यात्।

आदेशे प्रगृह्यत्वकार्यन्तु स्थानिवद्भावेन बोध्यम्। प्रगृह्यत्वस्य साक्षादुद्देश्य-सम्बन्धस्य क्लृप्ततया विधेयविशेषणत्वे मानाभावात्।

शाकल्यग्रहणानुवृत्तावपि प्रगृह्यत्वस्य ऊँआदेशस्य विकल्पे ऊँ इति, वितीति सिद्धयति; न तु उ इतीति। प्रगृह्यत्वविकल्पेन पक्षे तद्भावेऽपि अस्य तात्पर्यात्। एत-द्भावे निपात एकाजित्यस्याप्रवृत्तेः।

तदुक्तं भाष्ये योगविभागं प्रदर्श्य "किमर्थो योगविभागः? शाकल्य**मते ऊँ विभाषा**

'उञ ऊँ' इत्येकं सूत्रं भाष्यकृता विभज्य सूत्रद्वयं कृतं तस्य फलमाह—**इत्येकेति।** एकसूत्रसत्त्वे 'सम्बुद्धौ' इति सूत्रात् शाकल्यग्रहणस्यानुवृत्त्यभावे 'ऊँ' इतीत्येकमेव रूपं स्यात्। प्रगृह्यसंज्ञायाः प्रकरणे एतस्य सद्भावेन 'ऊँ' इत्यादेशेन सहैव प्रगृह्यसंज्ञाऽपि विधीयते, नतु आदेशस्य प्रगृह्यसंज्ञा। सर्वत्र उद्देश्ये एवान्वयस्य दर्शनेनात्रापि तत्रैव प्रगृह्यत्वान्वयस्यौचित्यात्। तथा च स्थानिवद्भावेन प्रगृह्यत्वस्य आदेशे सत्त्वात् प्रकृतिभावे 'ऊँ इति इत्येकं रूपं सिध्येत्, 'उ इति', 'विति' इति च न निष्पद्येत। **शाकल्येति।** यदि च शाकल्यग्रहणमनुवर्तेत, तदा आदेशस्य प्रगृह्यसंज्ञायाश्च विकल्पेन विधानात् 'ऊँ' इति वैकल्पिकत्वात् तयोरभावे यणि 'विति' इति रूपद्वयं स्यात्, 'उ इति' इति न स्यात्। न चास्य विकल्पपक्षे अप्रवृत्तावपि 'निपात एकाच्' इति सूत्रेण 'उ' इत्यस्य एकाज्निपातत्वात् प्रगृह्यसंज्ञायाम् 'उ इति' अस्य सिद्धिः स्यादत आह—**प्रगृह्यत्वेति।**

सूत्र स्वीकार करने पर उञ् के स्थान में प्रकरणवल से प्रगृह्यत्व और ऊँ आदेश का एक साथ ही विधान होने से 'ऊँ इति' इस प्रकार का एक रूप होगा। शाकल्य की अननुवृत्ति होने से सूत्र की प्रवृत्ति नित्य ही होगी। उञ् को प्रगृह्यसंज्ञा होने से स्थानिवृत्ति प्रगृह्यत्व का अतिदेश आदेश में स्थानिवद्भाव द्वारा मानकर प्रकृतिभाव होगा। ऊ इति, विति—इन दो रूपों की सिद्धि नहीं होगी।

परममूल में प्रगृह्यत्व से विशिष्ट ऊँ आदेश का विधान किया है। ग्रन्थकार इस के विप-रीत अर्थ का प्रतिपादन करते हैं। विधेय का साक्षात् उद्देश्य में अन्वय पूर्वसिद्ध है। उसके अनुसार प्रगृह्यसंज्ञा का उञ् के साथ ही अन्वय उचित है। एकसूत्र-पक्ष में शाकल्यपद की अनु-वृत्ति होने पर प्रगृह्यत्व और 'ऊँ' आदेश के अभावपक्ष में 'विति' इसकी सिद्धि होने पर भी 'उ इति' इस की उपपत्ति नहीं होगी; क्यों कि प्रगृह्यसंज्ञा और ऊँ—इन दोनों का सहविधान होने से पक्ष में दोनों का अभाव सिद्ध होगा। विकल्पविधि का भाव और अभाव दोनों में तात्पर्य होने के कारण अभावपक्ष में किसी अन्य सूत्र से भी प्रगृह्यसंज्ञा नहीं होगी। भाष्यसंदर्भ से इसको प्रमाणित करते हैं—**तदुक्तमिति।** योगविभाग का प्रयोजन-प्रश्न करने पर शाकल्याचार्य के मत में ऊँ आदेश विकल्प से होता है—ऊँ इति, पक्ष में उ इति; अन्य आचार्यों के मत में 'विति'—ऐसी भाष्योक्ति है। इससे योगविभाग का फल 'उ इति' इसकी सिद्धि प्रतीत होती है। 'उञः' इस विभक्त सूत्र से प्रगृह्यसंज्ञा उ इति, ऊँ आदेशपक्ष में—ऊँ इति; अन्य मत में आदेश और प्रगृह्य संज्ञा के अभाव होने से विति' इसकी सिद्धि हुई। इस आशय से योगविभाग

उञ इतौ वा प्रागुक्तम् । उ इति, विति ।।

यथा स्यात्—ऊँ इति, उ इति । अन्येषामाचार्याणां मतेन विति" इति । अनेन हि योगविभागस्य 'उ इति' रूपसिद्धिः फलमिति स्पष्टमेव लभ्यते । अतो योगविभागेन व्याचष्टे— उञ इति । **उञो वाचकं प्रगृह्यपदमित्यर्थः ।**

शाकल्यस्येतो प्रगृह्यमित्यनुवर्त्तते, तदाह—उञ इतौ वेत्यादि । **विकल्पाननुवृत्तौ हि निपात एकेत्येव सिद्धे इदं व्यर्थमेव स्यात् । एवञ्च प्राप्तविभाषेयम् । ऊँ इत्यत्र**

प्रगृह्यसंज्ञाया विकल्पेन विधानेन प्रगृह्यसंज्ञायाः पक्षेऽभावेऽपि तात्पर्यात् । तथा च एतदभावे 'निपात एकाच्' इत्यस्यापि प्रवृत्तेरनङ्गीकारात् । भाष्यञ्च मूले एव स्पष्टम् । तस्मात् योगविभागस्य 'उ इति' एतस्य सिद्धेः फलं बोध्यम् । योगविभागे कृते 'उञः' इति सूत्रेण प्रगृह्यत्वे 'उ इति', अभावपक्षे 'विति' इति रूपद्वयम् । अग्रिमेण योगेन 'ऊँ' अनेन 'ऊँ' इत्यादेशे 'ऊँ इति' इति रूपत्रयं निष्पन्नम् । 'उञः' षष्ठ्यन्ततया प्रगृह्यमित्यनेन सामानाधिकरण्यान्वयो न स्यादत उक्तम्—**वाचकमिति ।**

'उञः' इत्यस्मिन् योगे शाकल्यस्य, इतौ, प्रगृह्यमेतत् त्रयमनुवर्तते । शाकल्यपदानुवृत्त्या विकल्पो यदि न स्यात् तदा 'निपात एकाजनाङ्' इत्यनेनैव सिद्धे 'उञः' इत्यस्य वैयर्थ्यमेव स्यादित्याह—**विकल्पाननुवृत्ताविति ।** अत एव प्राप्तस्य विकल्पेन विधानात् प्राप्तविभाषेयम् ।

'ऊँ' इति द्वितीययोगे शाकल्यस्य प्रगृह्यसंज्ञायाश्चानुवृत्त्यभावे दोषमाह—**ऊँ इत्यत्रेति ।** यादृशार्थकं पूर्वत्रपदं तादृशार्थकमेव उत्तरत्रापि भवतीत्यर्थाधिकारे नियमात् प्रकृते तदनुरोधात् पूर्वसूत्रे उञोऽप्रगृह्यस्य ग्रहणात् ततोऽनुवर्तमानमिहापि

द्वारा व्याख्यान करते हैं—उञ इति । उञ् वाचक पद को प्रगृह्यसंज्ञा विकल्प से होती है । अग्रिम योग से शाकल्यमत में आदेश और प्रगृह्यसंज्ञा का विकल्प से विधान होता है । 'उञः इतौ वा' इत्यादि ग्रन्थ का यह तात्पर्य है ।

'निपात एकाजनाङ्' इससे नित्य प्राप्त प्रगृह्यसंज्ञा का 'उञः' इससे विकल्प प्रगृह्यसंज्ञा का विधान होता है । अतः यहाँ प्राप्तविभाषा है । यदि विकल्प की अनुवृत्ति नहीं होगी तो पूर्व सूत्र से नित्य प्रगृह्यसंज्ञा होने के कारण इस सूत्र का वैयर्थ्य हो जायगा । ऊँ इस योग में शाकल्य और प्रगृह्य पद का सम्बन्ध न रहने पर अर्थाधिकारानुरोध से प्रगृह्यत्वरहित उञ् की अनुवृत्ति होगी । इस प्रकार आदेशोत्तर यणादेश होने से 'विति' इस रूप की सिद्धि होने पर भी 'ऊँ इति' इसकी सिद्धि नहीं होगी । यणादेश के द्वारा स्थानी ऊँ का विनाश होने से ऊँ में दीर्घोच्चारण व्यर्थ हो जायगा; क्यों कि ह्रस्व और दीर्घ के यण् में कोई अन्तर नहीं है । दीर्घोच्चारण अथवा ऊँ आदेश के विधानसामर्थ्य से यण् के अभाव की कल्पना करने की अपेक्षा प्रगृह्य पद का सम्बन्ध करने में ही औचित्य है । शाकल्य पद का सम्बन्ध न करके केवल प्रगृह्य पद की अनुवृत्ति करने से अर्थाधिकाराश्रयण से अप्रगृह्य ऊञ् के स्थान में ऊँ आदेश होने पर 'ऊँ इति', 'उञः' इससे प्रगृह्यसंज्ञा होने पर 'उ इति'—इस प्रकार उक्त रूपद्वय की सिद्धि होने पर भी 'विति' इसकी सिद्धि नहीं होगी । इस आशय से 'उञः इतौ' इत्यादि का उल्लेख है ।।

१०७. ऊँ । १ । १ । १८ । उञ इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात् । ऊँ इति, विति ॥

शाकल्यप्रगृह्यपदयोरसम्बन्धे 'उञः' इत्यर्थाधिकारादप्रगृह्यस्यैवादेशे तस्य 'इको यण्' (६।१।७७) इति यणि उँ इतीत्यस्यासिद्धिः, दीर्घोच्चारणवैयर्थ्यापत्तिश्च । विकल्पमात्रसम्बन्धेऽपि ऊँ इतीत्यस्यासिद्धिरिति विधानसामर्थ्यात् प्रगृह्यपदसम्बन्धः ।

प्रगृह्यपदमात्रसम्बन्धेऽर्थाधिकारादप्रगृह्यस्य नित्ये ऊँआदेशे ऊँ इतीति, प्रगृह्यस्य उ इतीति सिद्धेऽपि, वितीति न सिद्धयेत्; तदाह—उञ इतौ दीर्घोऽनुनासिक इत्यादि । **अत्र विशिष्टस्य विधिरिति न वाक्यभेदः । न च प्रगृह्यत्वमादेशश्च** शाकल्य**मते इति तयोरेकप्रयोगे एव प्रवृत्तिः स्यादिति वाच्यम्; योगविभागसामर्थ्येन** शाकल्य**मते एव भावाभावकल्पनात् ।**

अप्रगृह्यस्यैव तस्य ग्रहणं वाच्यम् । तथा च तादृशस्योञः 'ऊँ' इत्यादेशेजाते 'ऊँ' इत्यस्य 'इको यणचि' इति यणि 'ऊँ इति' रूपं न स्यात् । यणि ह्रस्वदीर्घोकारयोः विशेषाभावेन ह्रस्वोच्चारणेलाघवात् कर्त्तव्ये दीर्घोच्चारणस्य वैयर्थ्यापत्तिश्चास्मिन् पक्षे स्यात् । विकल्पमात्रसम्बन्धेऽपि स दोषस्तदवस्थ एव यणादेशस्य दुर्वारत्वात् इति ऊँ इतीति रूपासिद्धिः । तस्मात् 'ऊँ' इत्यादेशविधानसामर्थ्यात् प्रगृह्यपदसम्बन्धोऽपि आवश्यकः ।

विकल्पपदसम्बन्धो मास्तु, अत आह—**प्रगृह्येति** । मात्रपदेन विकल्पव्यावृत्तिः, अत एवोक्तम्—**नित्ये इति** । तथा च पूर्वत्र अप्रगृह्यस्य 'उञो' ग्रहणेन अर्थाधिकारानुरोधात् सूत्रेऽस्मिन् अनुवृत्तौ अप्रगृह्यस्यैव तस्य 'ऊँ' इत्यादेशे प्रगृह्यत्वस्य स्थानिवद्भावेन प्रगृह्यत्वात् आदेश एव वा प्रगृह्यत्वविशिष्ट इति प्रकृतिभावे ऊँ इति, 'उञः' इति पूर्वयोगेन प्रगृह्यसंज्ञायाम् 'उ इति' इति रूपद्वयसिद्धावपि 'विति इति' न सिध्येत् । अतो विकल्पस्यापि सम्बन्धः । तथा च प्रगृह्यत्वाभावेऽप्यस्य व्यापारात् प्रगृह्यत्वाभावे वितीति सिद्धम्—इति सर्वं हृदि निधाय परममूले आह—**उञ इतावित्यादि** । दीर्घत्वेन अनुनासिकत्वेन प्रगृह्यत्वेन च विशिष्ट 'ऊँ' इत्यादेशो विहितोऽतो न वाक्यभेदसम्भावना; प्रगृह्यसंज्ञया सह ऊँ इत्यादेशस्य विधानेन द्वयोर्विधानेन वाक्यभेदः स्यात् । द्वयोर्विधानाय क्रियाद्वयस्यापेक्षणात् । 'एकतिङ् वाक्यम्' इति नियमात् वाक्यभेदो दुष्परिहरः ।

ऊँ ॥ इस सूत्र के द्वारा दीर्घ आदेश एवं अनुनासिक के पृथक् विधान से वाक्यभेद की आपत्ति होगी, अतः दीर्घत्व अनुनासिकत्व विशिष्ट आदेश का विधान है । इसमें वाक्यभेद का प्रसङ्ग नहीं है ।

शङ्का—शाकल्य-मत से दोनों का विधान होने से एक ही प्रयोग में दोनों का प्रवेश उचित है ?

समाधान—योगविभाग के सामर्थ्य से शाकल्य-मत में ही दोनों के भाव और अभाव की कल्पना होती है । ग्रन्थकार के मत में उञ् को प्रगृह्यसंज्ञा एवं ऊँ आदेश—इनका सहविधान उचित है । आदेश स्थानिवद्भाव के द्वारा प्रगृह्यत्वातिदेश से प्रकृतिभाव होता है । भाष्य में 'प्रगृह्यसंज्ञकस्य'—इस प्रकार का उल्लेख स्थानिवत्त्व के द्वारा लब्ध अर्थ के स्वरूप का कथनमात्र है । इसके युक्तत्वायुक्तत्व का विचार न्यायवेत्ता लोग करें ॥

१०८. मय उञो वो वा । ८ । ३ । ३३ । **मयः परस्य उञो वो वा**

वस्तुत उञनुवादेन संज्ञाऽऽदेशयोः सहविधानमेव न्याय्यम्। आदेशे स्थानिवद्भावात् प्रगृह्यकार्यम्। भाष्ये **'प्रगृह्यसंज्ञकश्च' इत्यपि स्थानिवद्भावलभ्यार्थस्वरूपकथनमिति न्यायविदो विचारयन्तु ॥**

मय उञो (८ । ३ । ३३) ॥ **व्याख्यानादत्र मय् प्रत्याहारः। अस्य त्रैपादिक-**

स्वमतमाह—**वस्तुत इति।** उञ्निपातमुद्दिश्य प्रगृह्यत्वस्य, ऊँ इत्यादेशस्य च सह विधानं युक्तम्। स्थानिवद्भावेन च प्रगृह्यत्वस्यातिदेशेन आदेशे न सन्धिकार्यम्। न च प्रगृह्यसंज्ञकश्चेति भाष्यं विरुध्येत। तेन भाष्येण प्रगृह्यत्वविशिष्टस्यादेशस्य विधानं प्रतीयते इति वाच्यम्; स्थानिवद्भावलभ्यार्थस्वरूपस्यैवानुवादकं भाष्यम्, न तु वाच्यार्थ-प्रतिपादकमिति न विरोधलेशः। प्रगृह्यसंज्ञया सह 'ऊँ' इत्यादेशस्य विधिः, अथवा प्रगृह्यसंज्ञाविशिष्टस्य 'ऊँ' इत्यादेशस्य विधानमिति न्यायविदो निर्णयन्तु।

टिप्पणीकारास्तु—'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यत्र यथा लोहितोष्णीषत्वविशिष्टऋत्विजां प्रचरणं विधीयते, तथैव अत्रापि विशिष्टस्य विधाने **शेखरकारस्य** तात्पर्यमित्यवधारयन्ति।

वस्तुतस्तु इत्यादिना प्रतिपादिते प्रगृह्यसंज्ञया सह 'ऊँ' इत्यादेशस्य विधाने तात्पर्यं **शेखरकृतां** प्रतीयते। प्रगृह्यत्वस्य क्लृप्तान्वयम् उद्देश्येऽन्वयं परित्यज्य अक्लृप्तान्वयस्य अपूर्वविधेयान्वयस्यानौचित्यादिति न्यायेन प्रगृह्यत्वस्य उद्देश्ये उञि एव अन्वयेन सह विधानस्यैवौचित्यादिति **भैरवमिश्राः। शेखरग्रन्थावलोकनेन** अत्रैव तात्पर्यं ग्रन्थस्य निरायासं प्रतिभाति ॥

मय उञो वो वा ॥ मयपदेन मय्-धातोर्ग्रहणं कुतो न? इत्याह—**व्याख्यानादिति।** मय्प्रत्याहारग्रहणे बहूनां लक्ष्याणां सिद्धिः, धातुग्रहणे तु अल्पस्य लक्ष्यस्येति बहूनां सिद्ध्यनुरोधरूपाद् व्याख्यानात् प्रत्याहारग्रहणम्।

मय उञो वो वा ॥ इस सूत्र में 'मय' पद प्रत्याहार का बोधक है, धातु का नहीं। प्रत्याहार के ग्रहण से अनेक लक्ष्यों की सिद्धि होती है। यही प्रकृत में व्याख्यान है॥ प्रगृह्यसंज्ञक उञ् को प्राप्त 'मय उञो वो वा' इस सूत्र का 'प्लुतप्रगृह्याः' इसके द्वारा बाध होने से प्रवृत्ति नहीं होगी? इसका उत्तर यह है—प्रकृतिभावसूत्र सापादिक होने से उसकी दृष्टि में त्रैपादिक 'मय उञो' यह सूत्र असिद्ध है, अतः इसका बाध नहीं हो सकता। किमु इति, किं विति—यहाँ 'उञः' इसके विकल्प होने से प्रगृह्यसंज्ञा के अभावपक्ष में 'इको यणचि' इससे यणादेश होने पर अनुस्वार होगा ही; क्यों कि यण् त्रैपादिक नहीं होने से असिद्ध नहीं है। 'किम्वुक्तम्' इसमें 'इति' शब्द के न रहने से 'उञः' इसकी प्रवृत्ति न होने से 'निपात एकाज्' से प्रगृह्यसंज्ञा होने पर प्रकृतिभाव के द्वारा यण् की व्यावृत्ति होने पर 'मय उञो' इससे वत्व होता है। यह वकारादेश त्रैपादिक शास्त्र से विहित होने से अनुस्वार की दृष्टि के कारण असिद्ध है। अतः यहाँ अनुस्वार

स्यादचि । किमु उक्तम्, किम्वुक्तम् । वस्यासिद्धत्वान्नानुस्वारः ॥

१०९. ईदूतौ च सप्तम्यर्थे । १ । १ । १९ । **सप्तम्यर्थे पर्यवसन्नमौदू-**

त्वेनासिद्धत्वान्न 'प्लुतप्रगृह्याः' (६ । १ । १२५) इत्यनेन बाधः । नानुस्वार इति । **किं वितीत्यादौ प्रगृह्यसञ्ज्ञाऽभावेऽस्यासिद्धत्वाद् 'इको यण्' (६ । १ । ७७) इति यणि अनुस्वारो भवत्येव ।**

ननु 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति न्यायेन गौरीशब्दस्य सप्तम्यर्थ-वृत्तित्वेऽपीकारस्य तत्त्वाभावो ? अत आह—ईदूदन्तमिति । **शब्दस्वरूपस्य विशेष्यत्वात्त-दन्तविधिरिति भावः ।** मामकी तनू इति । **प्रगृह्येषु इतिशब्दप्रयोगस्य पदकारैर्नियमि-तत्वात्पदपाठे प्रगृह्यत्वफलमत्र बोद्धयम् । ईदूतौ किम् ? अग्ना भवाति, सप्तम्या डादेशः ।**

किमु इति । अत्र प्रगृह्यत्वाभावपक्षे मय उञोऽस्य प्रवृत्त्या प्रगृह्यत्वपक्षे प्रकृति-भावेन बाधः स्यादत आह—**अस्येति ।** अत एव त्रैपादिके अस्य पाठः । प्रगृह्यसंज्ञाया अभावपक्षे 'मय उञो' इत्यस्यासिद्धत्वादयणादेशेऽनुस्वारो भवत्येव—**किं वितीति ॥**

ईदूतौ च सप्तम्यर्थे ॥ गौर्यामधिश्रित इत्यर्थं 'गौरी अधिश्रितः' इति प्रयोगे 'सुपां सुलुक्' इति सप्तम्या लुकि कृते 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति नियमेन लुप्तायाः सप्तमीविभक्तेरर्थं शिष्टो भागो गौरीशब्दो बोधयति । तथा च गौरीशब्दस्य सप्तम्यर्थे वर्तमानत्वेऽपि तद्घटकेकारमात्रस्य सप्तम्यर्थेऽवर्तमानत्वात् कथं प्रगृह्यसंज्ञा इत्यत आह—**शब्दस्वरूपस्येति ।** एतस्य विशेषणात्तदन्तविधौ ईदन्तमूदन्तं यत् शब्दस्वरूपं सप्तम्यर्थे वर्तमानमित्यर्थेन ईकारान्तस्योकारान्तस्य च सप्तम्यर्थे वृत्तित्वेन न दोषः । न च 'मामकी तनू' इत्यत्र सत्यपि प्रगृह्यत्वे अच्परत्वाभावात् प्रकृतिभावाप्राप्त्या फलभाव इत्यत आह—**प्रगृह्येषु इति ।** पदकाराः पदपाठे नियमेन प्रगृह्यस्थले इतिशब्दं संयोज्य

नहीं होगा । इसी तात्पर्य से परममूल में **वत्वस्यासिद्धत्वात्** कहा है ।

ईदूतौ च सप्तम्यर्थे ॥ शंका—इसका उदाहरण है—सोमो गौरी अधिश्रितः । यहाँ 'सुपां सुलुक्' इस सूत्र से सप्तमी के लुक् होने के कारण अवशिष्ट भाग ही लुप्त अर्थ का भी अभिधान करता है—एतदर्थक 'यः शिष्यते स लुप्यमानार्थाभिधायी' यह न्याय है । इस न्याय से गौरी पद सप्तम्यर्थ का बोधक होने पर भी गौरीघटक ईकारमात्र तदर्थ का बोधक नहीं है । अतः प्रगृह्यसंज्ञा प्राप्त नहीं है ?

समाधान—'ईदूती च' इसमें शब्दस्वरूप को विशेष्य और ईत् ऊत् को विशेषण मान-कर विशेषण में तदन्तविधि होने से 'सप्तम्यर्थ में वर्तमान 'ईदन्त, ऊदन्त'—इस प्रकार का अर्थ विवक्षित होने से उक्त दोष नहीं है । ईदन्त गौरी शब्द सप्तम्यर्थ में वर्तमान है । 'मामकी तनू' में अच् पर में न होने के कारण प्रगृह्य संज्ञा का फलरूप प्रकृतिभाव की अप्राप्ति है । अतः पदकारों के द्वारा 'मामकी इति' इस प्रकार पदपाठ करने पर प्रगृह्यसंज्ञा का फल समझना चाहिये ।

'अग्ना भवाति' इसमें 'सुपां सुलुक्' इसमें सप्तमी विभक्ति को डा आदेश होता है । यहाँ उक्त सूत्र के वारणार्थ 'ईदूतौ' इसका निवेश है । 'ईदूतौ' इसमें तपरकरण भिन्नकाल की व्यावृत्ति के लिये नहीं है, क्योंकि अणुदित् सूत्र में पठित अण्-पद से वर्णसमाम्नाय में पठित

दन्तं प्रगृह्यं स्यात्। सोमो गौरी अधिश्रितः। मामकी तनू इति। 'सुपां सुलुक्०' (सू० ३५६१) इति सप्तम्या लुक्।

तपरत्वमसन्देहाय। सप्तमीति किम्? धीती, मती; ह्रस्वान्ताभ्यां तृतीयैकवचनस्य पूर्वसवर्णे सवर्णदीर्घः।

पठति। तत्र पदपाठे प्रगृह्यसंज्ञायाः प्रकृतिभावः फलम्। दीर्घेकारोकारयोः अणुदित्सूत्रे अण्पदेन न स्वस्मिन् न स्वाङ्गे इति दिशा ग्रहणाभावेन सवर्णग्रहणाप्रसक्तौ सूत्रे तपरकरणं किमर्थम्? इत्याह—**असन्देहायेति।**

अर्थग्रहणस्य प्रयोजनान्तरं शङ्कते—**न चेति।** सूत्रे अर्थग्रहणाभावे ईदूदेदित्यत्रेव ईदन्ता ऊदन्ता या सप्तमी तस्याः प्रगृह्यत्वे ययी, पपीत्यादावेव परादिवद्भावेन सप्तम्या सह जातस्यैकादेशस्य दीर्घस्य सप्तम्यतिदेशात्, ईदन्तस्य च सत्त्वात् 'ईदूतौ च' इत्यनेन प्रगृह्यत्वं स्यात्। सप्तमीपदात् तु तदन्तविधिर्न; संज्ञाविधाविति प्रतिषेधात्। तथा च 'गौरी अधिश्रितः' इत्यादौ न स्यात्। तत्र सप्तम्याः लुकापहारात् इत्येतदर्थमर्थग्रहणमावश्यकमिति वाच्यम्; 'ईदूतौ सप्तमी प्रगृह्यम् अदसः एन्न द्विवचनम्' इति लघुभूतन्यासेन सिद्धे 'ईदूदेद्द्विवचनम्, अदसो मात्, ईदूतौ च सप्तम्यर्थे' इति गुरुन्यासकरणेन पूर्वप्रकरणापेक्षया वैजात्यबोधनेन ईदूदन्ता सप्तमीत्यर्थे ऊकारांशे उदाहरणासम्भवात् वैयर्थ्यापत्त्या च 'संज्ञाविधौ' इति परिभाषाया अनित्यत्वादप्रवृत्तौ तदन्तविधौ ईदन्तमूदन्तं यत्सप्तम्यन्तमित्यर्थे 'गौरी अधिश्रितः' इत्यादौ प्रत्ययलक्षणेन सप्तम्यन्ततया प्रगृह्यत्वे सिद्धे अर्थग्रहणं किमर्थम्, प्रत्यये परतः कार्ये न लुमतेति प्रतिषेधः। अत्र तु

श्रूयमाण वर्ण का ग्रहण होने से दीर्घ ईकार से सवर्ण ग्रहण प्रसक्त नहीं है। अतः तपर स्पष्टार्थक है। तपर न करने पर सन्धि होने से सन्देह होगा। 'धीती', 'मती' इसमें तृतीया के एकवचन का 'सुपा सुलुक्' इससे पूर्वसवर्ण होने के अन्तर 'अकः सवर्णे' इसके द्वारा दीर्घ होता है। यहाँ सूत्र-प्रवृत्ति की निवृत्ति के लिये सप्तमीपद का निवेश है यहाँ सप्तम्यर्थ नहीं है, किन्तु तृतीयार्थ है; अतः प्रगृह्यसंज्ञा नहीं हुई।

शङ्का—'ईदूदेद् द्विवचनम्' इसका जिस प्रकार ईदन्त ऊदन्त और एदन्त द्विवचन अर्थ माना गया है, उसी प्रकार 'ईदूतौ च' इसका भी अर्थग्रहण के अभावपक्ष में ईदन्त और ऊदन्त जो सप्तमी यह अर्थ होगा। सप्तमी प्रत्ययवाचक होने से प्रत्ययग्रहण परिभाषा से प्राप्त तदन्त विधि का 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति' इस परिभाषा के द्वारा निषेध हो जायगा। अतः ययी, पपी—यहाँ सवर्णदीर्घ के अनन्तर परादिवद्भाव से ईकार में सप्तमीत्व एवं व्यपदेशिवद्भाव से ईकारान्तत्व का अतिदेश होने से 'ईदूतौ च' इस सूत्र का यहाँ चारितार्थ्य है। 'गौरी अधिश्रितः' यहाँ सप्तमी का लुक् होने से ईदन्त सप्तमी का अभाव है। अतः यहाँ के लिये अर्थग्रहण आवश्यक है। सप्तम्यर्थ में 'यः शिष्यते' इस पूर्वोक्त नियम से गौरी शब्द की वृत्तिता होने से प्रगृह्यसंज्ञा सिद्ध हुई। इस प्रकार अर्थग्रहण का साफल्य होने से 'वृत्तावर्थान्तरोपसंक्रान्ते मा भूत्'—इस परम मूलोक्ति की असङ्गति है?

अर्थग्रहणं किम् ? वृत्तावर्थान्तरोपसंक्रान्ते मा भूत् । वाप्यामश्वो वाप्यश्वः ॥

अर्थग्रहणं किमिति । **न च तदभावे 'ईदूदेद्' इतिवदीदूदन्ता या सप्तमीत्यर्थापत्तिः । तथा च 'ययी' इत्यादावेव स्यात् एकादेशस्य परादिवद्भावेन सप्तमीत्वात्, न तु 'गौरी' इत्यादाविति, तत्सिद्धयर्थं तदावश्यकमिति वाच्यम्; 'ईदूतौ सप्तमी प्रगृह्यम्' 'अदसः' 'एच्च द्विवचनम्'—इत्येव सिद्धे, गुरुभूतन्यासकरणेन तत्प्रकरणापेक्षया वैजात्यबोधना-दूकारांशेऽसम्भवाच्च 'सञ्ज्ञाविधौ' (प०) इति तदन्तग्रहणनिषेधाप्रवृत्त्या ईदूदन्तं सप्तम्यन्तमित्यर्थेनेष्टसिद्धेरिति ग्रन्थः । 'ययी' इत्यादेरनभिधानमेवेति परे ।**

वृत्ताविति । **अर्थग्रहणसामर्थ्यात् सप्तम्यर्थमात्रे पर्यवसन्नमित्यर्थेनात्र तत्सं-**

सप्तम्यन्तस्य कार्यमिति न तस्यावसरः ? इत्याशयेन पृच्छति—**अर्थग्रहणं किमिति** परममूले ।

सप्तम्यर्थमात्रे इति । प्रकृत्यर्थविशिष्टसप्तम्यर्थमात्रे पर्यवसन्नमित्यर्थोऽर्थग्रहण-सामर्थ्यात् कल्प्यते । तथा च 'वाप्यश्वः' इत्यत्र सप्तमीविभक्तेः प्रकृतेरर्थेन सप्तम्याश्चार्थेन विशिष्टोत्तरपदार्थे एकार्थीभाववशात् पर्यवसन्नो वापीशब्द इति न प्रगृह्यसंज्ञा । वापी-निष्ठाधिकरणतानिरूपिताधेयतावान् इत्येतावत्पर्यन्तस्य बोधनात् सप्तम्यर्थमात्रवृत्तित्वं नास्य आधेयत्वस्याधिकस्य भानात् मूले सप्तम्यर्थमात्रवृत्तित्वस्य प्रकृत्यर्थविशिष्टसप्तम्यर्थ-मात्रवृत्तित्वे तात्पर्यमवधेयम् । एतावत्पर्यन्तं तात्पर्यं विना तादृशं वचनमेवासम्भवि । नहि सर्वोऽप्यर्थो वचसैव प्रतिपाद्य इति राजाज्ञास्ति । तस्मात् चिन्ता मानवधर्मतया भवितुमर्हति, किन्तु नात्र ग्रन्थकारोऽपराध्नोति ! 'संज्ञायाम्' इति सूत्रेण समासे जहत्स्वार्थायां वृत्तौ समुदायार्थ एव, नावयवानामर्थाः—इति सप्तम्यर्थे पूर्वपदस्य वापी-शब्दस्यावृत्तित्वात् प्रगृह्यत्वं न । यदा तु अजहत्स्वार्था वृत्तिरिति पक्षः 'सुप्सुपा' इति समासः, तदा तु सप्तम्यर्थवृत्तित्वेन प्राप्ता प्रगृह्यसंज्ञा अर्थान्तरोपसंक्रान्ते न भवतीत्यनेनैव वारणीया । एतदर्थज्ञापनायैव सूत्रे अर्थग्रहणं कृतम् ।

समाधान—मूल में निर्दिष्ट लघु न्यास के द्वारा लक्ष्यसिद्धि हो जाने से गुरुभूत सूत्रत्रय के न्यास से पूर्व प्रकरण की अपेक्षा इस प्रकरण में वैलक्षण्य की कल्पना होती है, एवं ऊकारांश में ऊदन्त रूप सप्तमी का उदाहरण भी उपलब्ध नहीं है । इन कारणों से 'संज्ञाविधौ' इस परिभाषा की, अनित्य होने के कारण, प्रवृत्ति न होने से तदन्तविधि सप्तमी से हो जायगी । तथा च सप्त-म्यन्त ईदन्त ऊदन्त को प्रगृह्यसंज्ञा का विधान इस सूत्र से होगा । अतः 'गौरी अधिश्रितः' में भी सप्तम्यन्त ईदन्त होने से प्रगृह्यसंज्ञा सिद्ध होता है । 'अर्थग्रहण अर्थान्तर के लिए है' यह कथन उचित है । 'ययी, ययी' इनके अनभिधानपक्ष में ईदन्त सप्तमी का भी उदाहरण असम्भव है ।

वृत्ताविति । उक्त रीति से अर्थग्रहण व्यर्थ है । अतः अर्थग्रहण के सामर्थ्य से सप्तम्यर्थमात्र वृत्ति ईदन्त ऊदन्त को प्रगृह्यसञ्ज्ञा का विधान होता है । 'वाप्यामश्वः' इस अर्थ में समस्त 'वाप्यश्वः' इसमें 'वापी' शब्द वापीनिष्ठ जो अधिकरणता उससे निरूपित जो आधेयता तादृश आधेयतावान्—इस अर्थ का बोधक है । सप्तम्यर्थं अधिकरणामात्रबोधक नहीं है । अतः

सृष्टाऽऽधेयार्थेऽपि वृत्तेर्न दोषः। 'संज्ञायाम्' इति समासे जहत्स्वार्थायां वृत्तौ पूर्वपदस्याऽऽनर्थक्येऽपि 'सुप्सुपा' इति समासे अजहत्स्वार्थायां प्रसक्तदोषस्योक्तरीत्यैव वारणमिति भावः। 'गौरी अधिश्रितः' इत्यत्राधिश्रयणक्रियायामेव गौरीपदबोध्याधिकरणत्वान्वय इति गौर्यधिकरणके लक्षणायां मानाभाव इति न तत्र दोषः।

वाप्यामश्व इति। **'सुप्सुपा' इति समासः, 'संज्ञायाम्' (२।१।४४) इति वा। ननु संज्ञायामिति समासे वाक्येन संज्ञाऽनवगमान्नित्यसमासत्वेन विग्रहोऽनुचित**

ननु विरुद्धविभक्तिरहितस्याभेदान्वयस्य औत्सर्गिकत्वेन 'गौरी अधिश्रितः' इत्यत्र गौरीपदस्य गौर्यधिकरणके लक्षणायाम् अभेदान्वयात् गौर्यधिकरणकाभिन्नाश्रयणकर्ता इत्येवं बोधात् आधेयेन अधिश्रितपदार्थेन सप्तम्यर्थोऽधिकरणमसंसृष्टं न, किन्तु संसृष्टमेव। अत एव द्वयोरभेदः। अधिकरणमात्राभिधाने अभेदान्वयः कथं स्यात्? तथा च तत्रापि प्रकृत्यर्थविशिष्टसप्तम्यर्थमात्रे वृत्तित्वविरहात् कथं प्रगृह्यसंज्ञा? इत्यत आह—**गौरी अधिश्रित इति।** कारकस्य क्रियायां साकाङ्क्षत्वेन तत्रैवान्वयस्यौचित्येन गुणभूताश्रयणक्रियायां निरूपकतया गौरीपदार्थस्य गौर्यधिकरणत्वस्यान्वयेन वाक्यार्थबोधोपपत्तौ लक्षणाया आश्रयणे प्रमाणाभावादित्याह—**लक्षणायां मानाभाव** इति।

'वाप्यश्वः' इत्यत्र 'सुप् सुपा' इत्यनेन 'संज्ञायाम्' इत्यनेन वा समासः, द्वयोर्विशेषं वक्तुमुपक्रमते—**ननु इति।** 'संज्ञायाम्' सूत्रे विभाषाधिकारेण विकल्पसमासविधाने पक्षे समासरहितं वाक्यमात्रं किं न प्रयुज्यते? अत्रोच्यते—यथा संज्ञावगमः समस्तपदेन जायते, न तथा विग्रहवाक्यात् प्रतीयते; अतोऽयं नित्यसमाससदृश उच्यते। एवञ्च

'वापी' शब्द को प्रगृह्यसंज्ञा नहीं हुई। इसमें 'संज्ञायाम्' इस सूत्र से नित्य समास एवं जहत्स्वार्था वृत्ति के कारण अवटावार्थ नहीं है। किन्तु समुदाय का अर्थ है। इस प्रकार 'वापी' शब्द के निरर्थक होने से उसकी सप्तम्यर्थ में भी वृत्तिता नहीं है। अधिकार्थवृत्तिता की सम्भावना कैसे हो सकती है! इसलिये अजहत्स्वार्था वृत्ति पक्ष में 'सुप् सुपा' इसके द्वारा समास होने पर सम्भावित दोष के निवारणार्थ अर्थग्रहण की कल्पना है। इस कल्पना से सप्तम्यर्थमात्रवृत्ति के ग्रहण से उक्त दोष नहीं है। यह तात्पर्य है।

शंका—गौरी शब्दार्थ का भेद-सम्बन्ध से अधिश्रयण-क्रिया में अन्वय सम्भव नहीं है; क्योंकि अधिश्रयण क्तप्रत्ययार्थ कर्ता में विशेषण है। दूसरा कारण विरुद्ध विभक्ति से रहित का भेदान्वय नहीं होता। अतः अभेदान्वय के लिये 'गौरी' पद की गौर्यधिकरणक में लक्षणा होने से गौरी पद की सप्तम्यर्थमात्र में वृत्तिता नहीं है। किन्तु अधिश्रयणरूप आधेय पर्यन्त में है। अतः यहाँ प्रगृह्यसंज्ञा अर्थग्रहणसामर्थ्य से लब्ध अर्थ के अनुसार नहीं होगी?

समाधान—'कारक का क्रिया में अन्वय होता है' इस नियम के अनुसार गुणभूत क्रिया में भी वापीनिष्ठ अधिकरणता का अन्वय होने से लक्षणा आवश्यक नहीं है। अतः सप्तम्यर्थमात्रवृत्तिता 'गौरी' शब्द में अक्षत होने से कोई दोष नहीं है। 'वाप्यश्वः' इसमें 'सुप् सुपा' अथवा 'संज्ञायाम्' इस सूत्र से समास होता है।

शंका—'संज्ञायाम्' इससे समास के लिये इसको संज्ञावाची मानना होगा। संज्ञावाची

११०. अणोऽप्रगृह्यस्यानुनासिकः । ८ । ४ । ५७ । **अप्रगृह्यस्याणो-**

इति चेत् ? न; तेषु समाससमानार्थकवाक्याभावेन नित्यसमाससदृशत्वेऽपि नित्यसमासत्वाभावात्, विभाषाधिकारबाधे मानाभावात् । नित्यसमासे हि वृत्तिघटकपदानां पृथक् प्रयोगाभाव एव । अत्र तु पृथक्प्रयोगेऽपि तद्बोद्धचविशिष्टार्थाऽप्रतीतिमात्रमित्याहुः ॥

अणोऽप्रगृह्यस्य (८ । ४ । ५७) ॥ **अण इति किम् ? कर्तृं, हर्तृं । अत्राण् पूर्वेणैव;**

'वाप्यामश्वः' इति विग्रहप्रदर्शनं समाससमानार्थबोधकतया नोचितम् । परं पृथक् पृथक् प्रयोगमात्रेण विग्रहप्रदर्शनं नानुचितम् । महाविभाषासम्बन्धस्य वारयितुमशक्यतया पक्षे समासाभावं को वारयेत् ! 'सुप् सुपा' इत्यत्र तु नास्ति विभाषापदसम्बन्धः । विभाषाधिकारात् पूर्वमेव 'सुप् सुपा' इति पाठात् । तथा च तत्समासस्य नित्यत्वात् समासाभावस्य पक्षे कथैव वृथेति तत्र विग्रहवाक्यं सर्वथा न भवतीत्यनयोर्विशेषः । अत्र विग्रहवाक्यं नैव भवति । संज्ञायामिति समासस्थले समाससमानार्थकं विग्रहवाक्यं मा भूत्, परं पृथक् पृथक् पदानामत्र प्रयोगकरणे बाधकाभावात् । एवञ्च संज्ञायामिति समासे 'वाप्यामश्वः' इति पृथक् प्रयोगो युक्त एव ।

टिप्पणीकारस्तु सप्तम्यर्थमात्रे पर्यवसन्नत्वमित्थं परिष्करोति—सप्तम्यर्थविशिष्टत्वम् । वै० स्वशक्तिपर्याप्त्यधिकरणत्वम्, स्वानुयोगिनिरूपितशक्त्यनधिकरणत्वम्, स्वप्रतियोगिनिरूपितशक्तिपर्याप्त्यधिकरणत्वम्—एतत्त्रितयसम्बन्धेन । 'वाप्यश्वः' इत्यादौ स्वं सप्तम्यर्थ आधाराधेयभावः तन्निरूपितायाः शक्तेः पर्याप्त्या अधिकरणत्वं वापीशब्दस्य; स्वं सप्तम्यर्थः पूर्वोक्तः सम्बन्धः, तदनुयोगी अश्वः, तन्निरूपितशक्तेः पर्याप्त्या अधिकरणत्वमेव एकार्थीभाववादिनां मते समासघटके वापीशब्दे, न तु अनधिकरणत्वं स्वप्रतियोगिसम्बन्धस्य प्रतियोगिवापीनिरूपितशक्तेः पर्याप्त्या अधिकरणत्वस्य चेत्येवं प्रथमतृतीययोः सम्बन्धयोः सत्त्वेऽपि द्वितीयसम्बन्धघटकाधिकरणत्वसत्त्वेन अनधिकरणत्वस्याभावेन नास्य सप्तम्यर्थमात्रवृत्तित्वम् ॥

अणोऽप्रगृह्यस्यानुनासिकः ॥ अत्र सूत्रे अण्प्रत्याहारः पूर्वेण णकारेण । तेन कर्तृं, हर्तृं—इत्यत्र नानुनासिकः । व्याख्यानमेवात्र शरणम् । प्रगृह्यस्य फलमच्येव सद्भावात्

में विग्रहवाक्य से संज्ञारूपार्थ की प्रतीति न होने से इसको नित्यसमास माना है । अतः यहाँ विग्रह प्रदर्शन अयुक्त है ?

समाधान—विभाषाधिकार में 'संज्ञायाम्' इसका पाठ होने से समास का विधान वैकल्पिक होगा । विग्रहवाक्य के द्वारा समासयुक्त संज्ञावाची पद के अर्थ का बोध न होने मात्र से नित्यसमास के सदृश होने पर भी नित्य समास नहीं है । विभाषाधिकार से प्राप्त वैकल्पिकत्व के बाध में कोई प्रमाण नहीं है । जिन पदों का नित्य समास होता है उन नित्यसमासघटक पदों का पृथक् प्रयोग नहीं होता । यहाँ नित्यसमाससदृश में पृथक् प्रयोग होने पर भी समास से बोध्य अर्थ की प्रतीतिमात्र नहीं होती । प्रयोग पृथक् भी किया जाता है । अतः विग्रहप्रदर्शन युक्त है ॥

अणोऽप्रगृह्यस्यानुनासिकः ॥ एतत्सूत्रघटक अण्पद के उपादान से कर्तृं, हर्तृं इत्यादि

ऽवसानेऽनुनासिको वा स्यात् । दधिँ, दधि ।

व्याख्यानात् । 'आगच्छतमग्नी' इत्यादौ प्लुतस्यासिद्धत्वात्ततः प्रागेव यथोद्देशत्वात् प्रगृह्यत्वे जाते पश्चात् प्लुते तस्याप्यनुनासिकप्रतिबन्धार्थं पुनः सञ्ज्ञेति नानुनासिकः । सञ्ज्ञायाः कार्यार्थत्वात् पुनः प्रवृत्तौ कार्यमेव बीजम् । स्थानिवत्त्वन्तु न; प्लुतस्थान्याल्वृत्तिधर्मत्वेनाल्विधित्वात् । पूर्वसवर्णे कृते द्विवचनत्वन्तु परादिवद्भावेन । तेन ताद्रूप्यानतिदेशेऽप्येतद्धर्मातिदेशाङ्गीकरात् । अत एव 'रामौ' इत्यादौ परादिवद्भावेन सुप्त्वात् पदत्वं साधितम्; 'अन्तादिवच्च' (६।१।८५) इत्यत्र भाष्ये इति स्पष्टमाकरे ॥

चकारेण प्रत्याहारे व्यवहर्तव्ये परेण णकारेण प्रत्याहारद्वारा हलां संग्रहस्य निष्फलत्वापत्तिरूपाद् व्याख्यानात् ।

'आगच्छतमग्नी' इत्यत्र 'भविष्यति किञ्चिदनेन प्रयोजनम्' इति ज्ञानमात्रेण सन्तुष्यन् यथाश्रुतं गृह्णाति । तदपेक्षो यथोद्देशपक्षः—इत्यस्मिन् पक्षे प्लुतस्य त्रैपादिकत्वेन असिद्धत्वात् पूर्वं प्रगृह्यसंज्ञायां ततः प्लुते 'अणोऽप्रगृह्यस्य' इत्यनेन प्राप्तस्यानुनासिकस्य वारणाय पुनः प्रगृह्यसंज्ञा भवति । संज्ञायाः कार्यार्थत्वात् कार्यमेव संज्ञायाः पुनः प्रवृत्तौ प्रमाणम् । लक्ष्ये लक्षणन्यायः संज्ञाविषये न प्रवर्तते । न च स्थानिवद्भावेन पूर्वजातप्रगृह्यत्वस्य प्लुते ईकारे आश्रयणात् न पुनः प्रगृह्यसंज्ञायाः करणस्य उपयोग इति वाच्यम्; प्लुतस्थान्यल्वृत्तिधर्मत्वेन अल्त्वव्याप्यो धर्मः अच्त्वम्, तदवच्छिन्ना स्थानिता अज्निष्ठा, तन्निरूपिता आदेशता प्लुते, तदाश्रयः प्लुतः, तद्धर्मिक आरोपः 'प्लुतः प्रगृह्यत्ववान् भवतु' तत्र प्रकारीभूतो धर्मः प्रगृह्यत्वम्, तत्र स्थानिवद्भावस्य अनल्विधाविति निषेधात् । 'अग्नी' इत्य द्विवचनत्वं तु पूर्वसवर्णदीर्घे कृते परादिवद्भावेन बोध्यम् । न चाल्वृत्तिधर्मस्य द्विवचनत्वस्यातिदेशो न वक्तुं शक्यः, अताद्रूप्यातिदेशात् ताद्रूप्यं वर्णवृत्तिर्धर्मः तस्य नातिदेश इति वाच्यम्; वर्णमात्रवृत्तिधर्मघटितधर्मस्य अतिदेशः प्रतिषिध्यते । द्विवचनत्वं तु न वर्णमात्रवृत्तिर्धर्मः; भ्यामादौ अनेकवर्णेषु अपि दर्शनात् । अत एव 'रामौ' इत्यादौ परादिवद्भावेन सुप्त्वमादाय पदत्वसिद्धिः । तेन = वर्णमात्रवृत्तिधर्मानतिदेशेऽपि वर्णवृत्तिधर्मातिदेशेन । आकरे = कैयटादौ ॥

स्थल में अनुनासिक नहीं हुआ; क्योंकि 'अप्रगृह्य' इसमें पर्युदास होने से प्रगृह्य से भिन्न एवं उसके सदृश अर्थ का बोध होगा । सादृश्य अच्त्व रूप से लिया जायगा । इस प्रकार हल्रूप अण् में प्रवृत्ति न होने से अण्ग्रहण सन्देहनिवृत्त्यर्थ होगा । ऐसी अवस्था में सूत्र का स्वरूप 'अचोऽप्रगृह्यस्य' इस प्रकार करना था, ऐसा नहीं किया—एतद्रूप व्याख्यान इस सूत्र में अण्प्रत्याहार पूर्व णकार से गृहीत होने में प्रमाण है । अतः उक्त प्रयोगों के मकार को अण् के अन्तर्गत न होने से प्रगृह्यसंज्ञा नहीं हुई ।

'आगच्छत अग्नी' इसमें प्लुत की असिद्धता होने से प्रगृह्यसंज्ञा पहले ही होती है; क्योंकि 'कोई प्रयोजन होगा'—इस सम्भावनामात्र से यथोद्देशपक्ष में संज्ञा होती है, तदनन्तर प्लुत होता है, इसके बाद प्राप्त अनुनासिक की व्यावृत्ति के लिए प्लुत की असिद्धता हो जाने से द्विमात्रत्वबुद्धि के कारण पुनः प्रगृह्यसंज्ञा होती है । अतः अप्रगृह्य अण् न होने से अनुनासिक

अप्रगृह्यस्य किम् ? अग्नी ॥

॥ इत्यच्सन्धिप्रकरणम् ॥

अच्सन्धिरिति । **'सिद्धमनच्त्वाद्' इति वार्त्तिकप्रयोगेण, 'अल्पाच्तरम्' (२ । २ । ३४) इति सौत्रप्रयोगेण, 'कथमनच्त्वम्' इति भाष्यप्रयोगेण च वृत्तिघटकाच्पदे पदान्तकार्यस्य, तत्सन्निधानेन श्चुत्वस्य चाभावो बोध्यते इति** केचित् ॥

इति स्वरसन्धिः ॥

●

अच्सन्धिरिति । अत्र कुत्वं श्चुत्वं च वारयति—**सिद्धमिति** । मूले प्रदर्शितभाष्य-प्रयोगात् वृत्तिघटकाच्पदे पदान्तकार्यस्य, अच्पदसमभिव्याहारे श्चुत्वस्य चाभावो बोध्यः । तेन कुत्वम्, चकारयोगे सन्धिघटकसकारस्य श्चुत्वं च न । **अच्पदे** इति । अच्पदं प्रत्याहारमात्रस्योपलक्षणम् । तेन 'अणुदित्', 'इको यणचि' इत्यादौ ङमुटोऽभावेनेष्टसिद्धिरिति वदन्ति । केचित्तु संज्ञाभङ्गभयात् कुतः श्चुत्वेनेत्याहुः ।

॥ पूर्णोऽच्सन्धिः ॥

●

नहीं होता । संज्ञा का विधान कार्यार्थ है । अतः पुनः पुनः संज्ञा की प्रवृत्ति में कोई बाधा नहीं है । स्थानिवद्भाव के द्वारा प्रगृह्यत्वातिदेश नहीं हो सकता, क्योंकि अल्मात्रवृत्ति धर्म होने से 'अनल्विधौ' इससे उसका प्रतिषेध हो जायगा । 'अग्नी' इसमें 'सुपां सुलुक्' इससे पूर्वसवर्णदीर्घ होने पर परादिवद्भाव से द्विवचनत्व माना जायगा । द्विवचनत्व म्यामादिवृत्ति भी होने से वर्ण-मात्रवृत्तिधर्म नहीं है । अतः इसका अतिदेश ताद्रूप्यातिदेश नहीं है । अतएव 'रामौ' इसमें परादिवद्भाव से सुप्त्वातिदेश किया है । कैयट के द्वारा इसका स्पष्टीकरण किया गया है । ताद्रूप्यानतिदेश का टिप्पणी में वर्णमात्रवृत्तिधर्मघटित धर्मानतिदेश अर्थ किया है ।

शङ्का—'अच्सन्धिः' इसमें 'चोः कुः' इसके द्वारा चकार को कुत्व होना चाहिये ?

समाधान—'अनच्त्वात्' इस वार्त्तिक-प्रयोग, 'अल्पाच्तरम्' इस सौत्र-प्रयोग, 'कथमनच्त्वम्' इस भाष्य-प्रयोग से वृत्तिघटक अच् पद में पदान्तप्रयुक्त कार्य एवं तत्सन्नियोग से प्राप्त श्चुत्वकार्य का अभाव बोधित होता है । 'वृत्तिघटक' इसको अच् में विशेषण देने से 'अचोऽक्षु' इसमें कुत्व की व्यावृत्ति नहीं हुई; क्योंकि अच् वृत्तिघटक नहीं है । अच् पद प्रत्याहारमात्र का उपलक्षण है । अत एव 'अणुदित्', 'इको यणचि' इत्यादि में ङमुडागम भी नहीं हुआ । 'आलुच् तदसहने' यहां चकार वृत्तिघटक नहीं है । फिर भी कुत्व नहीं किया । एतदर्थं सौत्रत्वाश्रयण करना होगा । इसी प्रकार आर्ष प्रयोगों की उपपत्ति हो जाने से वृत्तिघटक प्रत्याहार में कार्याभाव की कल्पना निष्प्रमाण है । इस की सूचना **केचित्** शब्द से की गयी है ॥

॥ स्वरसन्धिप्रकरण सम्पूर्ण ॥

●

अथ हल्सन्धिप्रकरणम्

१११. स्तोः श्चुना श्चुः । ८ । ४ । ४० । सकारतवर्गयोः शकार-

स्तोः श्चुना श्चुः (८ । ४ । ४०) । स् इति, श् इति च लुप्तविभक्तिके भिन्ने पदे । योगे इति । **संयोगे इति तदर्थः । तेन 'चितम्' इत्यादौ न दोषः । अत्र 'पदस्य' (८ । १ । १६) इत्यधिकृतमपि सम्बद्धचते; 'शात्' (८ । ४ । ४४) इति ज्ञापकात् ।**

स्तोः श्चुना श्चुः ॥ सकारस्य तुना सह शकारस्य चुना सह इतरेतरयोगद्वन्द्वे द्विवचनेन निर्देशः स्यात् । समाहारद्वन्द्वे एकवचनस्योपपत्तावपि समाहारे नपुंसकमित्यनुरोधेन नपुंसकत्वापत्तिः । तथा च इकोऽचीत्यादिना स्तोरित्यत्र नुमापत्तौ 'स्तुनः' इति निर्देश आपद्येत, अत आह—**स् इतीति** । तदेकरूपत्वाय 'श् चु' इत्यपि पृथक् पदमाश्रितम्; इह समाहारेऽपि रूपे विशेषाभावात् । सह-शब्दार्थः सहचारः । एकस्मिन् प्रयोगे तयोरेव स्थितिरूपः, नान्यस्य मध्येऽवस्थानम्, तदाह—**योग इति** । संयोग इत्यर्थः । अत एव 'चितम्' इत्यत्र चकारतकारयोः संयोगाभावात् न श्चुत्वम् ।

'पदस्य' इत्यतोऽधिकारप्राप्तं पदमिह नानुवर्तते । तथा सति पदान्तयोः सकारतवर्गयोः श्चुत्वं प्राप्नोतीति 'विश्नः', 'प्रश्नः' इत्यादौ पदान्तत्वाभावादेव श्चुत्वाप्राप्त्या तद्वारणाय कृतस्य 'शात्' इत्यस्य वैयर्थ्यं स्यात् । तेन हि शकारात् परस्य तवर्गस्य श्चुत्वं प्रतिषिध्यते । यदि च यथासंख्यानुरोधात् सकारस्य शकारयोगे तवर्गस्य चवर्गयोगे श्चुत्वं विवक्षितं स्यात्, तदा शकारस्य तवर्गेण संयोगे 'विश्नः', 'प्रश्नः' इत्यादौ तदप्राप्त्या तन्निषेधाय आरभ्यमाणस्य तस्य वैयर्थ्यं स्यात् । तस्मात् निमित्तेन = श्चुना सह कार्यिणः = स्थानिनः स्तोः यथासंख्येन सम्बन्धो न । इत्याशयेनाह—**शादिति ज्ञापकादिति ।**

स्तोः श्चुना श्चुः ॥ इस सूत्र में स् और श्—ये दोनों पृथक् पृथक् पद हैं, इनसे उत्पन्न विभक्तियों का 'हल्ङ्याभ्यः' इस सूत्र से लोप हो जाता है । 'योग' का अर्थ है संयोग । जिस प्रकार 'सत्यभामा' को 'भामा' पद से पुकारते हैं उसी प्रकार संयोग का ही योग शब्द से अभिधान है । इसीसे 'चितम्' इसमें चकार तकार के रहने पर भी मध्य में इकार के कारण इन वर्णों का संयोग नहीं है; क्योंकि अव्यवहित हलों का ही संयोग होता है । अतः श्चुत्व नहीं हुआ ।

इस सूत्र में पदाधिकार का सम्बन्ध नहीं है । इसका सम्बन्ध होने पर 'विश्नः,' 'प्रश्नः' इत्यादि स्थलों में शकार-नकार का संयोग पदान्त नहीं है । अतः श्चुत्व प्राप्त न होने से उसके निषेध के लिये 'शात्' यह सूत्र निरर्थक हो जायगा । इसके सामर्थ्य से यह सिद्ध होता है कि यहाँ पद की अनुवृत्ति नहीं है । पदानुवृत्ति न होने से 'याच्ञा' शब्द में श्चुत्व की सिद्धि होती है । याच् धातु से 'यजयाच' इत्यादि सूत्र से नङ् प्रत्यय होने से सिद्ध उन प्रयोगों का नकार संयोगान्त पद नहीं है ।

शंका—स्थानी और निमित्त में 'यथासंख्य' सूत्र के बल पर सकार को शकार के योग में, तवर्ग को चवर्ग के योग में ही श्चुत्व होना चाहिये ?

समाधान—ऐसा मानने पर, शकार और सकार के योग में ही श्चुत्व की प्राप्ति होने से

चवर्गाभ्यां योगे शकारचवर्गौ स्तः । हरिश्शेते । रामश्चिनोति । सच्चित् । शार्ङ्गिञ्जयः ।

तेन 'याच्ञा' सिद्धा । शात्परस्य स्तोः श्चुत्वनिषेधकात् 'शात्' इति लिङ्गादेव निमित्त-कार्यिणोर्यथासंख्यं न । एवमुत्तरसूत्रेऽपि 'तोः षि' (८ । ४ । ४३) इति ज्ञापकान्न तत् । शकारचवर्गौ स्त **इति । यथासंख्यमिति शेषः ।** हरिश्शेते इति **। 'वा शरि' (८ । ४ । ३६) इति विसर्गाभावे शः ।** सच्चिदिति **। चुत्वस्यासिद्धत्वाज्जश्त्वेन दत्वे तस्य चुत्वेन जकारे चर्त्वमिति बोद्धव्यम् । तयोरत्रालेखस्तु वैचित्र्यार्थः ॥**

तेनेति । पदस्येत्यस्यासम्बन्धेन । **याच्ञा सिद्धेति** । 'प्रकृतिवदनुकरणम्' इत्यनेन अतिदेशात् स्त्रीत्वमनुकरणे मत्वा सिद्धेति ।

एवमिति । ष्टुना ष्टुरित्यत्रापि स्थानिनो निमित्ते ष्टुना सह यथासंख्यं नास्ति । तवर्गस्य षकारे परे ष्टुत्वनिषेधकस्य 'तोः षि' इति सूत्रस्य आरम्भसामर्थ्यात् । यथासंख्यमन्वये तु तवर्गस्य टवर्गे एव ष्टुत्वं प्राप्तम्, तथा च षकारे प्राप्तिरेव नेति तन्निषेधारम्भस्य वैयर्थ्यं स्पष्टमेव । **शकारेति** । स्थान्यादेशयोः यथासंख्यमन्वयोऽस्त्येव, अत एव सकारस्य शकारः, तकारस्य चकार इत्यादिना सम्बन्धो नियतः । अन्यथा सकारस्य चकारः, तकारस्य शकारोऽपि सम्भाव्येत । स्थानेऽन्तरतमपरिभाषयाऽपि निर्वाहे स्पष्टार्थं **यथासंख्यमित्युक्तम्** । अनेन 'च छ ज झ ञ त थ द ध न' इत्येवं रूपेण क्रमेण पाठोऽनादिसिद्ध इति निश्चीयते ।

वैचित्र्यार्थं इति । सच्चिदित्यत्र जश्त्वचर्त्वयोः प्रवृत्तिं विनाऽपि उक्तप्रयोगसिद्धिरिह वैचित्र्यम् ।

'शात्' इस सूत्र से श्चुत्व का 'विश्नः', 'प्रश्नः' इत्यादि के लिए किया गया निषेध व्यर्थ हो जायगा । अतः स्थानी और निमित्त में यथासंख्य नहीं है ।

इसी प्रकार 'ष्टुना ष्टुः' इस सूत्र में भी समझना चाहिये । इस सूत्र में भी स्थानी और निमित्त में यथासंख्य नहीं है । इसमें 'तोः षि' यह सूत्र प्रमाण है । 'सन् षष्ठः' इत्यादि स्थल में ष्टुत्वनिषेध उसका प्रयोजन है । वहाँ यथासंख्य से अन्वय मानने पर ष्टुत्व की प्राप्ति होने से 'तोः षि' इसका वैयर्थ्य स्पष्ट है । अतः इसके सामर्थ्य के लिये यथासंख्य नहीं माना जाता । विधेय श्चु का क्रम से ही विधान होने से वहाँ यथासंख्य विवक्षित है । 'वा शरि' इससे विसर्ग न होने पर 'विसर्जनीयस्य सः' इस सूत्र से 'हरिश्शेते' इसके विसर्ग को सकार हो जाता है ।

सच्चित् में श्चुत्व की असिद्धता होने से पहले जश्त्व होता है, तदनन्तर श्चुत्व द्वारा दकार को जकार होने पर 'खरि च' इस सूत्र से चर्त्व (चकार) होता है—ऐसी प्रक्रिया है । जश्त्व-चर्त्व-विधायक सूत्रों का यहाँ अनुल्लेख वैचित्र्य-ज्ञापन के लिए है । जश्त्व-चर्त्व के विना भी श्चुत्व के द्वारा इसकी सिद्धि ही वैचित्र्य है । 'विश्नः' इसकी सिद्धि—'विच्छ' धातु से नङ् प्रत्यय, 'च्छ्वोः शूड्' इस सूत्र से चकार छकार के स्थान में ऊठ् विधान करने से होती है । नङ् के ङित् होने से गुण नहीं होता । इसी प्रकार 'प्रश्नः' की भी सिद्धि होती है । इसमें 'ग्रहिज्या' सूत्र से प्राप्त सम्प्रसारण का 'प्रश्ने चासन्नकाले' इसमें प्रश्न-निर्देश से नहीं हुआ ।

११२. शात् । ८ । ४ । ४४ । **शात्परस्य तवर्गस्य चुत्वं न स्यात् । विश्नः । प्रश्नः ।**

११३. ष्टुना ष्टुः । ८ । ४ ।४१ । **स्तोः ष्टुना योगे ष्टुः स्यात् । रामष्षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्ढौकसे ।**

११४. न पदान्ताट्टोरनाम् । ८ । ४ । ४२ । **'अनाम्' इति लुप्तषष्ठीकं पदम । पदान्ताट्टवर्गात् परस्यानामः स्तोः ष्टुर्न स्यात् । षट् सन्तः । षट् ते ।**

'पदान्तात्' किम् ? ईट्टे । 'टोः' किम् ? सर्पिष्टमम् ।

विश्न इति । **'यजयाचयतविच्छप्रच्छरक्षो नङ्' (३ । ३ । ९०) इति नङि 'च्छ्वोः' (६ । ४ । १९) इति शादेशे ङित्त्वाद् गुणाभावः । 'प्रश्ने चासन्नकाले' (३ । २ । ११७) इति निर्देशात् सम्प्रसारणाभावः ॥**

न पदान्ताद् (८ । ४ । ४२) । **'पदाट्टो' इत्येव सिद्धेऽन्तग्रहणं स्पष्टार्थम् ।**

टोः किमिति । **षकारस्यापि पदान्ते जश्त्वविधानात् प्रश्नः । 'ह्रस्वात्तादौ' (८ । ३ । १०१) इति षत्वस्याऽसिद्धत्वाज्जश्त्वाभाव इत्युत्तरम् ।**

सम्प्रसारणेति । 'ग्रहिज्यावयि' इति सूत्रेण प्राप्तस्य सम्प्रसारणस्य 'प्रश्ने चासन्नकाले' इति सूत्रे 'प्रश्नः' इति निर्देशात् अभावः कल्प्यते ॥

न पदान्ताट्टोरनाम् ॥ पदात् टोरिति । टोरित्यस्य पदविशेषणत्वेन तदन्तविधौ टवर्गान्तात् पदादित्यर्थेनैव निर्वाहे अन्तग्रहणं स्पष्टार्थम् । नन्वन्तग्रहणाभावे पदत्वेनोद्देश्यत्वस्य सत्त्वात् 'समर्थः पदविधिः' इति परिभाषोपस्थितिः स्यात्, तद्वारणायान्तग्रहणमिति वाच्यम्; पदसंज्ञायाः प्रयोजको यः प्रत्ययः तस्य प्रत्ययस्य 'उत्पत्तेः प्रयोजिका या संज्ञा तद्विधायकशास्त्रस्य उद्देश्यतावच्छेदकं यद् रूपं तद्रूपावच्छिन्नसम्पादकविधेरेव पदविधित्वाभ्युपगमात् । यथा—पदसंज्ञायाः प्रयोजकः प्रत्ययः सुप्प्रत्ययः, तदुत्पत्तिप्रयोजिका संज्ञा प्रातिपदिकसंज्ञा, तद्विधायकं शास्त्रं 'कृत्तद्धितसमासाश्च' इति शास्त्रम्, तदीयोद्देश्यतावच्छेदकं रूपं समासस्थले समासत्वरूपम्, तद्रूपसमासत्वावच्छिन्नसमासविधायकविधीनां पदविधित्वम्, तत्रास्याः परिभाषाया उपस्थितिः । अत्र न तथा इति न दोषः ।

असिद्धत्वादिति । सर्पिस्शब्दात् तमप्-प्रत्यये जश्त्वापवादत्वात् पूर्वं रुत्वे विसर्गे ततः सत्वे 'ह्रस्वात्तादौ' इति षकारे प्राप्तस्य जश्त्वस्य दृष्ट्या विसर्गसत्वषत्वानामसिद्धया

शंका—'न पदान्ताट्टोरनाम्' इस प्रकार की सूत्ररचना न कर 'न पदाट्टोरनाम्' ऐसा सूत्र करना उचित था; क्योंकि अनुवृत्त पद शब्द को, 'टेः' इसमें विशेषण करने से तदन्तविधि के द्वारा पदान्तपरक हो जाने से सूत्र में अन्तग्रहण व्यर्थ है ?

समाधान—स्पष्ट अर्थ का ज्ञान कराने के लिए ही अन्त-ग्रहण है ।

शङ्का—पदान्त षकार के जश्त्व हो जाने से 'त्विट् तिष्ठति' ऐसे स्थलों में भी ष्टुत्व का निषेध इष्ट है । इस प्रकार 'टोः' इसके अभाव में षकार से परवर्ती तवर्ग को ष्टुत्व-निषेध प्राप्त

अनाम्नवतिनगरीणामिति वाच्यम् (वा०) षण्णवतिः । षण्णगर्यः ।

११५. तोः षि । ८ । ४ । ४३ । **तवर्गस्य षकारे परे न ष्टुत्वम् । सन्षष्ठः । 'झलां जशोऽन्ते' । (सू० ८४) । वागीशः । चिद्रूपम् ।**

११६. यरोऽनुनासिकेऽनुनासिको वा । ८ । ४ । ४५ । **यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात् । एतन्मुरारिः, एतद्मुरारिः ।**

स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे चरितार्थो विधिरयं रेफे न प्रवर्तते ।

षण्णवतिरिति । **षडधिका नवतिरिति विग्रहः । षण्णगर्य इति पृथक्पदे ॥**

यरोऽनु० (८ । ४ । ४५) । **पदान्तस्येति किम् ? वेद्मि, बध्नाति ।** स्पर्शे चरितार्थ इति । **उपलक्षणमिदं वलयोरपि प्रवृत्ते ।** एतच्च जातिपक्षे स्पष्टमेव । **व्यक्तिपक्षेऽपि तादृशव्यक्तौ चरितार्थस्य एतद्व्यक्तिविषयतयोपप्लव एव नेति बोद्धव्यम् । स्पष्टञ्चेदम् 'इको यणचि'** (६ । १ । ७७) इत्यत्र कैयटे ।

जश्त्वं न । **पृथगिति** । 'दिक्संख्ये संज्ञायाम्' इति नियमवशात् संज्ञायामेव संख्यावाचकस्य कर्मधारयसमासाभ्युपगमात् पृथक् पृथक् पदमेव न्याय्यम् ॥

यरोऽनुनासिकेऽनुनासिको वा ॥ वलयोरपीति । वृक्षवँ नेता, कमलँ नमनमित्यादौ वलयोरपि अनुनासिकयोः सम्भवात् परममूले स्पर्शे चरितार्थ इति वलयोरप्युपलक्षणम् । **व्यक्तिपक्षे** इति । ननु अस्मिन् पक्षे प्रतिलक्ष्यं लक्षणस्य उपप्लवो भवतीति नियमेन चतुर्मुख इत्यस्य कृते कल्प्यमानं सूत्रं रेफे अचरितार्थं सामर्थ्यात् प्रवर्तेत इति नाशङ्कनीयम् । स्थानप्रयत्नाभ्यामन्तरतमे 'एतन्मुरारिः' इत्यादौ स्पर्शे चरितार्थस्यास्य सूत्रस्य रेफविषयकः सूत्रोपप्लव एव न स्यात् ।

जातिपक्षे तु लक्ष्यभेदात् लक्षणस्य भेदो नाश्रीयते इति तत्र रेफविषयकः पृथग् वाक्योपप्लव एव नेति न तत्पक्षे सूत्रवैयर्थ्यात् प्रवृत्तिरनिवार्या स्यात् ।

स्पष्टमिति । क्वचित् सूत्रोदाहरणे चरितार्थस्य वर्णान्तरोदाहरणान्तरव्यक्तौ चारितार्थ्यं नावश्यकमिति कैयटाशयः ।

होने की आशङ्का नहीं है; क्योंकि षकार को जश्त्व द्वारा टवर्ग होने से 'टोः' ग्रहण करने पर भी निषेध प्राप्त ही होगा । अतः 'टोः' इसके उपादान का प्रयोग नहीं है ?

समाधान—'सर्पिष्टमम्' इसकी सिद्धि सर्पिस् के उत्तर तमप् और 'ह्रस्वात्तादौ तद्धिते' इससे षत्व होने से होती है । जश् ष्टुत्व की दृष्टि में षत्व की असिद्धता से जश्त्व नहीं होता । रुत्व जश्त्व का अपवाद होने से बाधक होगा । रुत्व के अनन्तर झल् न रहने से जश्त्व नहीं हो सकता । रु को विसर्ग होने के अनन्तर सत्व होता है । 'ह्रस्वात्तादौ' इस सूत्र से मूर्धन्य षकार से परवर्ती तवर्ग को ष्टुत्व-निषेध की व्यावृत्ति के लिये 'टोः' ग्रहण है । टवर्ग से उत्तर तवर्ग नहीं है, अतः निषेध-प्रवृत्ति नहीं हुई । अन्यथा षकारोत्तर तवर्ग होने से निषेध हो जायगा ।

षण्णवतिः । षड् अधिका नवतिः—इस प्रकार मध्यमपदलोपी समास है । षट् च नवतिश्च इस प्रकार समाहारद्वन्द्व में नपुंसक तथा इतरेतरयोग में द्विवचन हो जाने से यहाँ द्वन्द्व समास नहीं है ।

परे तु स्थानेऽन्तरतमसूत्रे सप्तम्यन्तपाठस्य भाष्यकृता दूषितत्वेनैतद्युक्तेरुक्ति-सम्भव एव न । तस्मात् 'अनुस्वारस्य' (८ । ४ । ५८) इति सूत्रात् सवर्णग्रहणमपकृष्य

मतान्तरमाह—**परे त्विति।**

'स्थानेऽन्तरतम उरण् रपरः' इत्येवं संहितापाठे सप्तम्यन्तपाठः 'स्थानेऽन्तरतमे' इत्येवंरूपः (सन्धिविच्छेदे) कल्पयितुं शक्यते। तथा प्रथमान्तपाठः 'स्थानेऽन्तरतमः' इत्येवंरूपोऽपि । तत्र सप्तम्यन्तपाठे तु 'अन्तरतमे स्थानिनि आदेशः' इत्यर्थे अनन्तरतमानां स्थानिनां व्यावृत्तौ 'सुधी उपास्यः' इत्यत्र यण् न स्यात्; मात्राद्वयन्यूनकालिकत्वरूपान्त-

---

षण्णगर्यः। षट् नगर्यः—ये दोनों असमस्त (पृथक्) पद हैं। संख्यावाचक का कर्मधारय समास 'दिक्संख्ये संज्ञायाम्' इसके अनुसार संज्ञा में ही होता है। 'यरोऽनुनासिकेऽनुनासिको वा' इसमें पदान्त के निवेश का प्रयोजन 'वेद्मि' में दकार को अनुनासिक की व्यावृत्ति है। दकार पद के अन्त में न होने से अनुनासिक नहीं होता। पदान्त के विना भी पर को अनुनासिक-विधान करने पर उक्त रूप में भी अनुनासिक की आपत्ति हो जायगी। इसी प्रकार 'बध्नाति' इसमें धकार को अनुनासिक की व्यावृत्ति इसका प्रयोजन है।

चतुर्मुखः। इसमें रेफ को प्राप्त अनुनासिक की व्यावृत्ति का उपाय लिखते हैं—**स्पर्शे इति**। 'स्थानेन्तरम उरण् रपरः' इसप्रकार सप्तम्यन्तपाठपक्ष में 'अन्तरतमे स्थानिनि' अर्थात् अन्तरतम स्थानी को आदेश होने से अनन्तरतम = असदृशतम स्थानी की व्यावृत्ति होगी।

इस प्रकार स्पर्श अर्थात् कादि से मपर्यन्त 'एतन्मुरारिः' इत्यादि स्थल में स्थान-प्रयत्नोभय आन्तरतम्य में 'यरोऽनुनासिके' सूत्र चरितार्थ है। अतः केवल स्थानकृत = मूर्धस्थान-मात्र से अनन्तरतम स्थानी रेफ में अनुनासिक की प्रवृत्ति नहीं होगी। यह सिद्धान्तकौमुदी का भाव है। यहाँ 'स्पर्श में चरितार्थ जो विधि' ऐसा परममूल में लिखा गया है। उसके उपलक्षण होने से वकार, लकार का भी संग्रह होता है। व ल के अतिरिक्त यकार का भी संग्रह समझना चाहिये। 'दध्याँश्चिनोषि' 'मध्वाँश्चिनोषि' 'कमल् आँश्चिनोषि' यहाँ आत् के नकार को 'नश्छव्य-प्रशान्' सूत्र से रुत्व होने पर 'अत्रानुनासिकः पूर्वस्य तु वा' इससे आकार को अनुनासिक होता है। उस अनुनासिक के परवर्ती होने से सानुनासिक यकार वकार लकार क्रम से 'यरोऽनुनासिके' इस सूत्र से होते हैं। यकार वकारादि का स्पर्श के अन्तर्गत न होने से स्पर्श में चरितार्थकथन से इनका संग्रह नहीं होगा। अतः अन्य के संग्रहार्थ स्पर्श शब्द व ल का भी उपलक्षण है।

शंका—जातिपक्ष में लक्ष्य के भेद से लक्षण (सूत्र) की आवृत्ति न होने के कारण किसी लक्ष्य में सूत्र के चरितार्थ होने से सूत्र के वैयर्थ्य का भ्रम नहीं रहता। किन्तु व्यक्तिपक्ष में लक्ष्यभेद से सूत्र की पृथक् पृथक् कल्पना मानी गयी है। इसके अनुसार 'चतुर्मुखः' के लिए कल्प्यमान सूत्र का चारितार्थ्य नहीं है। अतः सामर्थ्य से यहाँ भी इसकी आवृत्ति होनी चाहिये ?

समाधान—उभयविध आन्तरतम्य में चरितार्थ सूत्र की ('चतुर्मुखः' इस अनिष्ट स्थल के लिए 'यरोऽनुनासिके' इस सूत्र की) पृथक् कल्पना ही नहीं होगी—ऐसा तात्पर्य है। कैयट ने भी इस अर्थ का स्पष्टीकरण किया है।

परे तु इति। 'परे तु' से स्वमतप्रदर्शन किया गया है।

परः सवर्णोऽनुनासिको भवतीत्यर्थान्न दोषः। तदुक्तं भाष्ये—"रेफेऽनुनासिकपरसवर्णत्वयोः प्रतिषेधो वक्तव्यः ? न वक्तव्यः; रेफोष्मणां सवर्णा न सन्ति" इति।

र्येण ह्रस्वेकारस्य यणि सूत्रस्य चारितार्थ्यात्। एवमेवास्मिन् पक्षे स्थानप्रयत्नाभ्यामन्तरतमे स्थानिनि अनुनासिकः स्यात्, अनन्तरतमस्य स्थानिनो रेफस्य व्यावृत्तिः प्राप्नोति—इत्याशयेन परममूले उक्तम्—**रेफे न प्रवर्तते** इति। परं पूर्वोक्तरीत्या 'सुध्युपास्यः' इत्यत्र यणोऽसिद्धया सप्तम्यन्तपाठस्य निरस्तत्वात् प्रथमान्तपाठस्यैव स्वीकृततया 'चतुर्मुखः' इत्यत्र दोषो दुरुद्धर एव। तथा हि—'अन्तरतम आदेशो भवति' इति प्रथमान्तपाठेऽर्थः। तेन आदेशानां मध्ये अन्तरतम आदेशः। यस्तु अनन्तरतम आदेशः स व्यावर्त्यते। स्थानिनोऽन्तरतमस्यानन्तरतमस्य च प्रथमान्तपाठे संग्रहेण रेफस्य अनन्तरतमत्वेऽपि व्यावृत्तेरसम्भवात् प्राप्यमाणानामादेशानां मध्ये अन्यापेक्षया योऽन्तरतमः स भविष्यतीति परममूलोक्तपरिहारो न युक्तः। किन्तु 'अनुस्वारस्य ययि' इति सूत्रात् सवर्णपदमपकृष्य 'परः सवर्णोऽनुनासिको भवति' इत्यर्थस्य स्वीकारेण 'रेफोष्मणां सवर्णा न सन्ति' इति भाष्यात् रेफस्य सवर्णाभावादेव अनुनासिकस्यात्राप्राप्तेः।

स्ववृत्तित्व, स्वदलभिन्नदलीयस्थानित्वाभिमतेतरयावत्स्थान्यवृत्तित्व, स्वदलभिन्नदलीयवृत्तित्व-एतत् त्रितयसम्बन्धेन आदेशविशिष्टधर्मवत्त्वरूपमान्तर्यं सप्तम्यन्तपाठे स्वीकृतम्। 'एतन्मुरारिः' इत्यत्र दन्तस्थानजन्यत्वे लक्षणसमन्वयाभावात् आन्तरतम्यं न स्यात्। तथा हि—स्वमादेशो नकारः, तद्वृत्तित्वं दन्तस्थानजन्यत्वे अस्ति; परं द्वितीयसम्बन्धे स्वम् आदेशः, तद्दलभिन्नं दलं स्थानिदलं यर् इति, तदीयस्थानित्वेन अभिमतो

शंका—सप्तम्यन्त पाठ के स्वीकार करने पर ह्रस्व इकार के स्थान में यण् का विधान चरितार्थ दीर्घ ई को यण् नहीं होगा। इस दोष के कारण सप्तम्यन्त पाठ को दूषित कर भाष्यकार ने प्रथमान्त पाठ की ही मान्यता दी है। इस पक्ष में 'अन्तरतमः' इसका प्रथमान्त आदेश के साथ अन्वय होगा, स्थानी में नहीं। इसप्रकार अनन्तरतम आदेश की व्यावृत्ति होगी, अनन्तरतम स्थानी की नहीं। अतः दोनों प्रकार का स्थानी लिया जायगा; परन्तु आदेश प्राप्यमाणों के मध्य में सदृशतम ही लिया जायगा। अत एव प्राप्यमाण आदेशों में ईकार का अन्तरतम वकारादि की अपेक्षा यकार ही है, इसलिए वही होता है। इसी प्रकार 'चतुर्मुखः' इसमें रेफ की स्थानिता व्यावृत्त नहीं होगी। इसके स्थान में सदृशतम होने से असदृशतम प्राप्यमाणों के बीच में आदेश ही व्यावृत्त होने से अन्यादेश की अपेक्षा जो अन्तरतम समझा जायगा उसकी प्रवृत्ति होगी। अतः दोष दुर्निवार है ?

समाधान—'अनुस्वारस्य ययि परसवर्णः' इस सूत्र से एकदेश में स्वरितत्वप्रतिज्ञा के बल से केवल सवर्ण पद की अनुवृत्ति होने से सवर्ण अनुनासिक होगा। रेफ का सवर्ण अनुनासिक कोई नहीं होता। यही अर्थ भाष्य में कहा गया है। अनुनासिकत्व एवं परसवर्णत्व का रेफ में प्रतिषेध करना चाहिये। इसके बाद लिखा है कि प्रतिषेध अनावश्यक है। रेफ और ऊष्मा (= श ष स ह) का कोई भी सवर्ण नहीं। इसप्रकार 'चतुर्मुखः' में सवर्ण अनुनासिक का विधान करने से रेफ को सवर्ण अनुनासिक नहीं हो सकता।

चतुर्मुखः । 'प्रत्यये भाषायां नित्यम्' । (वा०) तन्मात्रम् । चिन्मयम् ।
कथं तर्हि 'मदोदग्राः ककुद्मन्तः' इति ? यवादिगणे दकारनिपातनात् ।

चिन्मयमिति । **स्वार्थिकः 'तत्प्रकृतवचने' (५ । ४ । २१) इति मयट् । तत्र तदिति वाक्यभेदेन क्वचित्प्राचुर्यरूपप्रकृतवचनाभावेऽपि मयडर्थम् । अत एव 'चिन्मयं ब्रह्म' इति सामानाधिकरण्यम् । 'चिन्मात्रम्' इति क्वाचित्कोऽपपाठः, मात्रचः प्रत्ययस्यात्रोपपत्त्यभावात् । मयूरव्यंसकादिष्वेवार्थमात्रशब्देनात्र समासस्य वक्ष्यमाणत्वात् ।** निपातनादिति । **यवादिगणे 'ककुद्मान्' इति प्रकृतिप्रत्ययसमुदायः पठ्यते इति मतेनेदम् ।**

यो दकारः तदितरे यावन्तः स्थानिनः, तत्रावृत्तित्वं दन्तस्थानजन्यत्वस्य नास्ति; यत्घटके धकारतकारादावपि तस्य सत्त्वात् । अतः घोषप्रयत्नवत्त्वविशिष्टाल्पप्राणप्रयत्नवत्त्वविशिष्टस्पृष्टप्रयत्नवत्त्वविशिष्टदन्तस्थानजन्यत्वस्यान्तर्यस्य तत्र विवक्षितत्वेनादोषात् । तकारस्य घोषप्रयत्नत्वाभावेन धकारस्य अल्पप्राणत्वाभावान्न संग्रहः । अन्यत् स्पष्टम् ।

चिन्मयमिति । प्राचुर्येण प्रस्तुतं = प्रकृतम्, तस्य वचने मयट् विधीयते । तथा च तत्प्रकृतवचने मयडित्यनेन स्वार्थिको मयट् प्रत्ययः कथम् ? इत्यत आह—**तत्रेति** । तत्र = सूत्रे । **तदिति** प्रथमान्तं पृथक् पदम् । वाक्यभेदं कल्पयित्वा तदित्यनेन स्वार्थे मयटो विधानान्न दोषः । अत एव = अत्यन्तस्वार्थिकस्य मयटोऽङ्गीकारादेव । 'आयामस्तु प्रमाणं स्यात्' इति परिभाषितप्रमाणग्रहणेन परिच्छेदकमात्रस्य ग्रहणेऽपि चिच्छब्दस्य परिच्छेदकवाचित्वाभावेन मात्रचः प्रत्ययस्यानुपपत्तिरित्युक्तम्—**प्रत्ययस्योपपत्त्यभावात्** इति । तस्मात् एवार्थकमात्रशब्दस्य मयूरव्यंसकादित्वात् समासो भवतीति मन्तव्यम् । एवञ्च 'प्रत्यये भाषायाम्' इति वार्त्तिकस्य नेदमुदाहरणं सम्भवति; मात्रशब्दस्य प्रत्ययत्वाभावेन तदप्राप्तेः । अतो वार्तिकोदाहरणतयाऽस्य पाठोऽपपाठः ।

'मदोदग्राः ककुद्मन्तः' (र० वं० ४,२२) इत्यत्र 'यरोऽनुनासिके' इत्यादिना अनुनासिकः कथं न ? इत्यत आह—**यवादिगणे इति** । 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः'

चिन्मयम् । इसमें चिदेव चिन्मयम् इसप्रकार स्वार्थ में ही मयट् प्रत्यय होता है ।

शंका—'तत् प्रकृतवचने मयट्' इस सूत्र से प्रकृतवचन = प्राचुर्य अर्थ में मयट् का विधान होने से स्वार्थ में मयट् नहीं हो सकता ?

समाधान—सूत्र में पठित तत् का पृथक् वाक्यार्थबोध होता है । मयट् प्रथमान्त से अर्थात् स्वार्थ में होता है, यह अर्थ है । अतः स्वार्थिक मयट् होने से 'चिन्मयं ब्रह्म' इस प्रकार सामानाधिकरण्य अभेद से व्यवहार सिद्ध होता है । 'चिन्मात्रम्' ऐसा पाठ यदि कहीं उपलब्ध होता है तो वह पाठ अशुद्ध है; क्योंकि चित् शब्द से मात्रच्प्रत्ययविधायक कोई वचन नहीं है । 'मयूरव्यंसकादयश्च' सूत्र के गण में पठित 'चिन्मात्रम्' यह मात्रच्-प्रत्ययान्त नहीं है । किन्तु 'मात्रं कार्त्स्न्येऽवधारणे' इस कोश के अनुसार मात्रशब्द के साथ समास के लिये पाठ किया गया है । 'चिन्मात्रम्' इसमें अवधारणार्थक 'मात्र' शब्द है, प्रत्ययरूप नहीं ।

शङ्का—निपातनात् इति ।—यवादि गण में ककुद् प्रकृतिमात्र का पाठ होने से अनु-

११७. तोर्लि । ८ । ४ । ६० । **तवर्गस्य लकारे परे परसवर्णः स्यात् । तल्लयः । विद्वाँल्लिखति । नकारस्यानुनासिको लकारः ।**

११८. उदः स्थास्तम्भोः पूर्वस्य । ८ । ४ । ६१ । **उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात् । 'आदेः परस्य' (सू० ४४) । उत्थानम् । उत्तम्भनम् । अत्राघोषस्य महाप्राणस्य सस्य तादृश एव थकारः । तस्य 'झरो**

उदः स्था० (८ । ४ । ६१) ॥ 'तस्मादित्युरस्य' (१ । १ । ६७) **इति परिभाषालभ्यमर्थमाह**—उदः परयोरिति । अत्राघोषस्येति । **समनियतत्वेनान्यतमाग्रहणे बाधकाभावेन श्वासविवारयोस्त्यागेऽपि न न्यूनतेति बोद्धव्यम्** । थस्यासिद्धत्वादिति । **त्रिपाद्यां परत्वादिति भावः ।**

इति वत्वविधायकसूत्रे 'अयवादिभ्यः' इति पदेन यवादिगणपठितानां वत्वाभावो बोध्यते । तथा च यवादिगणे 'ककुद्' इत्येवं पाठेन 'झयः' इति प्राप्तं वत्वं न । यद्यत्र अनुनासिकः स्यात्तदा नान्तस्य झयन्तत्वाभावादेव वत्वाप्राप्तौ वत्वव्यावृत्तये यवादिगणे तस्य पाठो व्यर्थः सन् अनुनासिकत्वाभावं गमयतीति । न च कृतेऽपि अनुनासिके तस्यासिद्धत्वात् झयन्तत्वमस्त्येवेति वाच्यम्; तथा सति 'ककुन्' इत्येव पठेत्, तत्सामर्थ्यात् नानुनासिकः—इत्यादि **तत्त्वबोधिन्याम्** ।

शेखरकारस्तु 'ककुद्मान् इति पाठं मत्वा परिहरति । अत्रानुनासिकस्याकृतत्वात् तदभावो निश्चीयते ॥

उदः स्थास्तम्भोः पूर्वस्य ॥ 'खरो विवाराः श्वासा अघोषाश्च' इति नियमेन खर्प्रत्याहारान्तर्गतवर्णस्य एतेषां त्रयाणां प्रयत्नानां सत्त्वेन अघोषस्यैवोपादानात् न्यूनत्वमायातीत्यत आह—**समनियतेति** । त्रयाणां मध्ये एकस्याप्युपादाने क्वचिदपि अतिप्रसङ्गो न भवति । यत्र तु तेषामनियतत्वेनातिप्रसङ्गसम्भावना, तत्र अन्यतरस्योपादाने न्यूनता । सर्वमुपादेयम् । एते तु न तथा; एकेनापि उपात्तेन अतिप्रसङ्गाभावात् ।

त्रिपाद्यामिति । 'उत्थानम्' इत्यत्र सकारस्य 'उदः स्थास्तम्भोः' इति पूर्वसवर्णे

नासिक पर में न रहने से अनुनासिक की वहाँ प्राप्ति न होने के कारण अनुनासिकत्वाभाव की कल्पना निपातन से नहीं हो सकती ?

समाधान—'ककुद्मान्' ऐसा पाठ मानकर समाधान किया गया है ॥

'उदः स्थास्तम्भोः पूर्वस्य ॥ इस सूत्र में **'उदः'** इसके पञ्चम्यन्त होने से 'तस्मादित्युत्तरस्य' इस परिभाषासूत्र की उपस्थिति द्वारा लब्ध अर्थ का निर्देश करते हैं—**उदः परयोरिति** ।

शंका—परम मूल में उत्थानम्, उत्तम्भनम् इत्यादि में अघोष महाप्राण प्रयत्न के सादृश्य से सकार को पूर्वसवर्ण थकार होता है,—ऐसा लिखा है । खर् का विवार श्वास और अघोष प्रयत्न कहा गया है । विवार और श्वास प्रयत्नों का निर्देश न करने से न्यूनता है ?

समाधान—विवार श्वास और अघोष—इन तीनों प्रयत्नों का एकत्र नैयत्य होने से एक का कथन और अन्य की अनुक्ति दोषयुक्त नहीं है; क्योंकि एक के निर्देश से भी अव्याप्ति-अतिव्याप्ति की शङ्का नहीं होती, अतः न्यूनता नहीं ।

झरि (सू० ७१) इति पाक्षिको लोपः । लोपाभावपक्षे तु थकारस्यैव श्रवणम्, न तु 'खरि च' (सू० १२१) इति चर्त्वम्; चर्त्वं प्रति थकारस्यासिद्धत्वात् ॥

'हलो यमाम्' (८ । ४ । ६४) इति सूत्रोक्तभाष्यसम्मताष्टाध्यायीपाठे तु थस्यासिद्धत्वाभावेन चर्त्वं भवत्येव। अत एव "उत्पूर्वस्कन्दे रोग उपसंख्यानम्, उत्कन्दो रोगः" इति भाष्यं सङ्गच्छते । मूलन्तु प्राचामनुरोधेनेति परे। न चेदं सूत्रं व्यर्थम्, 'झलो झलि' (८ । २ ।२६) इत्यनेन सस्य लोपे उत्थानस्य सिद्धेरिति वाच्यम्; झलादौ प्रत्यये तेन लोप इत्यर्थस्याऽनेन ज्ञापनात् । 'उदस्थात्' इत्यत्र तु निर्दिश्यमानपरिभाषया निर्दिश्यमानादेरेव स्थानित्वान्न दोषः ॥

थकारे जाते 'झरो झरि' इति लोपाभावपक्षे थकारद्वयस्य श्रवणम् । न च खरि चेति चर्त्वेन थकारस्य तकारः स्यादिति नाशङ्क्यम्; 'खरि च' इत्यस्य पूर्वत्रैपादिकत्वेन एतद्दृष्ट्या परस्य त्रैपादिकस्य 'उदः स्थास्तम्भोः' इति सूत्रस्यासिद्धत्वेन थकाराभावान्न चर्त्वम् । 'हलो यमाम्' इति सूत्रस्थभाष्योक्तरीत्या सूत्राणां पाठपक्षे तु थकारादेशस्य परत्रिपादीस्थत्वाभावेन चर्त्वेन तकारे थकारद्वयस्य श्रवणं न भवति । प्रमाणान्तरमुपन्यस्यति—**अत एवेति** । 'उत्कन्दो रोगः' इत्यत्र तकारद्वयश्रवणम् । **उत्पूर्वेति** । उत्पूर्वकस्य स्कन्दधातोः पूर्वसवर्णस्य विधायकमिदं वार्तिकम् । **न चेदमिति** । 'उदः स्था' इति सूत्रं व्यर्थम्, उत्थानमित्यादौ 'झलो झलि' इति सूत्रेण सकारस्य लोपे तस्य सिद्धेरिति वाच्यम्; 'उदः स्थास्तम्भोः' इति सूत्रारम्भसामर्थ्यात् झलादौ प्रत्यये परे एव 'झलो झलि' इत्यस्य प्रवृत्तिरिति ज्ञापनात् । प्रकृते स्थाधातुघटके सकारे परे लोपाप्राप्त्या सूत्रस्य चारितार्थ्यात् ।

ननु 'उदस्थात्' इत्यत्र 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषया अड्विशिष्टस्य अस्थाशब्दस्य स्थाशब्देन ग्रहणात् पूर्वसवर्णः कुतो नेत्याह—**निर्दिश्यमानेति** । निर्दिश्यमानस्य आदेशा भवन्ति । षष्ठीप्रकृत्या यस्य कस्यचित् सहायतां विना प्राथमिकी उपस्थितिः स एव निर्दिश्यमानः । प्रकृते यदागमपरिभाषायाः साहाय्येन षष्ठीप्रकृतया स्थापदेन अकारविशिष्टस्य अस्थाशब्दस्य उपस्थितिरिति नास्य प्राथमिकी उपस्थितिः । यस्य तु प्रथममुपस्थितिः स्थापदेन, तस्य 'स्था' इत्यस्य उदः परत्वाभावः इति न पूर्वसवर्णः । नहि स्थास्तम्भयोरादेः पूर्वसवर्णो विहितो येन यदागमपरिभाषया अस्थेत्यस्य स्थाशब्देन ग्रहणात् तदादेरुदः परस्य सत्त्वात् पूर्वसवर्णः स्यात्; किन्तु निर्दिश्यमानयोस्तयोरादेरित्यर्थेन विशिष्टस्य निर्दिश्यमानत्वाभावात् स्थामात्रस्य निर्दिश्यमानत्वेन तदादेः सकारस्य उदः परत्वाभाव इत्याशयः ।

स्थानित्वादिति । 'आदेः परस्य' इत्यनेन आदेरेव स्थानित्वबोधनादिति भावः ।

'उदः स्था' सूत्र से पूर्वसवर्ण थकार होने के अनन्तर 'झरो झरि सवर्णे' इससे प्राप्त लोप के अभावपक्ष में 'खरि च' इस सूत्र से चर्त्व नहीं होता; क्योंकि चर्त्व की दृष्टि में पर त्रिपादी 'उदः स्थास्तम्भोः' इससे विहित थकार असिद्ध हो जाता है ।

शंका—थकार के असिद्ध होने पर भी सकारबुद्धि से ही चर्त्व हो जाना चाहिए ?

समाधान—थकार के चर्त्वापवाद होने से पुनः चर्त्व नहीं होता ।

११९. झयो होऽन्यतरस्याम् । ८ । ४ । ६२ । **झयः परस्य हस्य पूर्वसवर्णो वा स्यात् । घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य**

'झयः' इति पञ्चमीत्याह—झयः परस्येति । **पूर्वस्येत्यनुवर्त्तते** । घोषवत इति ।

टिप्पणीकृतः—उदःस्थेति सूत्रे स्थास्तम्भशब्दयोर्विशिष्टरूपोपादानसत्त्वेन अर्थवद्ग्रहणपरिभाषोपस्थित्या आगमसमभिव्याहारे आगमविशिष्टस्यैवार्थवत्त्वमिति नियमेन उदस्थादित्यत्र स्थाशब्दमात्रे स्थापदप्रयोज्यार्थवत्स्थाशब्दत्वावच्छिन्नशाब्दबोधीयविषयताया अभावेन अकारविशिष्टे अस्था इत्यत्रैव अर्थवत्त्वं वक्तव्यम् । एवं षष्ठीप्रकृतिः स्था, तज्जन्यो यः शाब्दबोधः, तदीयविषयताया आश्रयता अस्थाशब्दे, तथा षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयताश्रयः अस्था, तत्समभिव्याहृतो वर्णः कश्चित् तेनाघटितत्वमपि तत्रेति निर्दिश्यमानत्वमपि सुलभमिति कुतो न पूर्वसवर्णः ? इति चेन्न; यदागमपरिभाषा लक्षणां ग्राहयति । तथा च सूत्रस्थं स्थापदं स्थाविशिष्टे लाक्षणिकम् । वै० स्वघटितत्व, स्वविशिष्टाघटितत्वोभयसम्बन्धेन । स्वविशिष्टे वैशिष्ट्यञ्च—स्वाघटकत्व, स्वनिष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रयाघटकत्वोभयसम्बन्धेन । स्वेन स्थाशब्देन घटितं स्था इति स्वविशिष्टोऽन्यो वर्णस्तेनाघटितमपि । तद्घटकवैशिष्ट्येन विशिष्टोऽकारो न । तथा हि—स्थाशब्दस्य अघटको यद्यपि अकारः, तथापि स्वं = स्थापदं तन्निष्ठोद्देश्यतानिरूपितावयवत्वाच्छिन्नविधेयताश्रयोऽकारः, तद्घटकोऽपि अन्यो वर्णः—इति स्वविशिष्टोऽन्यो वर्णः, तेनाघटितम् अस्थाशब्दः इति तत्र स्थाशब्दस्य लक्षणा । तथा च लक्षणायां मुख्यार्थबाधस्यापेक्षिततया स्थापदजन्यशाब्दबोधीयप्रकारताख्यविषयतायाः स्थाशब्दे एव सत्त्वेन निर्दिश्यमानलक्षणे समभिव्याहृतवर्णाघटितत्वनिवेशस्य प्रागुक्ततया षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयताश्रयः स्था, तत्समभिव्याहृतो वर्णोऽकारः, तेन घटितत्वेन अघटितत्वविरहात् न निर्दिश्यमानत्वमङ्विशिष्टस्य—इति वदन्ति ।

घोषवत इति । एकस्यापि उपादानेन निर्वाहे समनियतानां त्रयाणां कथनं व्यापक-

'हलो यमां यमि लोपः' इस सूत्र में वर्णित भाष्यानुसारी अष्टाध्यायी-पाठ के पक्ष में थकार परत्रिपादी शास्त्र से विहित न होने से चर्त्व होता ही है । अतएव 'उदः स्था' इस सूत्र के भाष्य में उत्-पूर्वक स्कन्द के पूर्वसवर्ण का विधान कर 'उत्कन्दो रोगः' इसमें चर्त्व से निष्पन्न दो तकारों से घटित प्रयोग किया है । इससे प्रमाणित होता है कि यहाँ चर्त्व होता है । परममूल में चर्त्वाभाव-कथन प्राचीनों के अनुसार है—ऐसा सिद्धान्त **शेखरकार** का है ।

शङ्का—'उत्थानम्' की सिद्धि 'झलो झलि' एतत्सूत्रस्थानघटक सकार का लोप करने से भी हो जायगी । अतः 'उदः स्था' इस सूत्र की आवश्यकता नहीं है ?

समाधान—झलादि प्रत्यय परवर्त्ती होने पर 'झलो झलि' इसकी प्रवृत्ति होती है । यहाँ झलादि प्रत्यय न होने से लोप नहीं होगा । अतः सूत्र का आरम्भ है । 'उदः स्था' इस सूत्र में निर्दिश्यमान परिभाषा की उपस्थिति होने से निर्दिश्यमान के आदि को ही थकार होता है । अतः 'उदस्थात्' इसमें पूर्वसवर्ण नहीं होता । निर्दिश्यमान 'स्था' का आदि उद् से अव्यवहितोत्तर नहीं है ॥

'झयो होऽन्यतरस्याम् ॥ इसके 'झयः' में पञ्चमी विभक्ति है । अतः 'तस्मात्' इस

तादृशो वर्गचतुर्थ एवादेशः । वाग्घरिः, वाग्हरिः ॥

१२०. शश्छोऽटि । ८ । ४ । ६३ । **पदान्ताज्झयः परस्य शस्य छो वा स्यादटि । दस्य चुत्वेन जकारे कृते ॥**

१२१. खरि च । ८ । ४ । ५५ । **खरि झलां चरः स्युः । इति जकारस्य चकारः । तच्छिवः, तच्शिवः ।**

'छत्वममीति वाच्यम्' (वा०) । तच्छ्लोकेन, तच्श्लोकेन । अमि किम् ? वाक् श्च्योतति ॥

१२२. मोऽनुस्वारः । ८ । ३ । २३ । **मान्तस्य पदस्यानुस्वारः स्याद्धलि । 'अलोऽन्त्यस्य' (सू० ४२) हरिं वन्दे ।**

समनियतत्वेऽपि विनिगमनाविरहात् स्वरूपप्रतिपादनाय च त्रितयग्रहणम् ॥

झय इति । **पदान्तादित्यपि बोध्यम् । तेन 'विरप्शम्' इत्यादौ छत्वं न ।** जकारे **इति । छत्वमिति शेषः; पूर्वोक्तभाष्यसम्मताष्टाध्यायीपाठे चर्त्वस्य छत्वं प्रत्यसिद्धत्वात् ॥**

मोऽनुस्वारः (८ । ३ । २३) ॥ **पदस्येत्यधिकृतं 'म' इत्यनेन विशेष्यत इत्याह—** मान्तस्येति । **'हलि सर्वेषाम्'** (८ । ३ । २२) **इत्यतो हलीत्यनुवर्त्तते । हलि किम् ? रामामाश्रय ॥**

दृष्ट्या अन्यतमस्य कस्य ग्रहणमित्यत्र नियामकाभावात् तस्य स्वरूपावगमाय च ।

हलि किमिति । केचित्तु हल् इति अज्रहितस्योपलक्षणं तेनावसानेऽपि अनुस्वारः संगच्छते । अतएव अचि प्रत्युदाहरणं दत्तम्, नतु 'रामम्' इति ।

परिभाषा के द्वारा पर का लाभ होता है । इसी तात्पर्य से 'झयः परस्य' इस प्रकार का उल्लेख है । 'पूर्वस्य' इसकी अनुवृत्ति से पूर्वसवर्ण का लाभ होता है । अन्यथा हकार का कोई सवर्ण न होने से हकार को हकार ही सवर्ण प्राप्त होने से इस सूत्र का वैयर्थ्य हो जायगा । 'घोषवतः' इत्यादि से त्रितयोपादान समनियत होने के कारण आवश्यक न होने पर भी किसका त्याग और किसका ग्रहण किया जाय ?—इसमें अन्यतर साधक कोई प्रमाण न होने से तथा तीनों इसके प्रयत्न हैं, इसकी जानकारी के लिए भी तीनों प्रयत्नों का उपादान है ॥

शश्छोऽटि ॥ इस सूत्र में पदान्त की अनुवृत्ति होने से 'विरप्शम्' यहाँ छत्व नहीं होता । वि पूर्वक रप् धातु से औणादिक श प्रत्यय करने पर उक्त प्रयोग की सिद्धि होती है । 'तच्छिवः' इसमें छत्व के प्रति पूर्वोक्त अष्टाध्यायी-पाठ के पक्ष में चर्त्व असिद्ध हो जाने से छत्व होता है । इसके बाद चर्त्व होता है ॥

मोऽनुस्वारः ॥ इसमें अधिकार-लब्ध पद शब्द में मकार के विशेषण होने से तदन्तविधि होती है । अतः मान्तपद ऐसा अर्थ किया गया है । 'हलि सर्वेषाम्' इस सूत्र से हलि इस पद की अनुवृत्ति है । अतएव 'रामम् आश्रय' यहाँ अनुस्वार नहीं हुआ । किसी ने 'अचि न' ऐसा मानकर विराम में भी अनुस्वार का प्रयोग साधु माना है । वर्तमान समय में ऐसा परिवर्तन अपेक्षित है ॥

पदस्य इति किम् ? गम्यते ॥

१२३. नश्चापदान्तस्य झलि । ८ । ३ । २४ । **नस्य मस्य चापदान्तस्य झल्यनुस्वारः । यशांसि । आक्रंस्यते । झलि किम् ? मन्यते ॥**

१२४. अनुस्वारस्य यथि परसवर्णः । ८ । ४ । ५८ । **स्पष्टम् । अङ्कितः । अञ्चितः । कुण्ठितः । शान्तः । गुम्फितः ॥**

'कुर्वन्ति' इत्यत्र णत्वे प्राप्ते तस्यासिद्धत्वादनुस्वारे परसवर्णे च कृते तस्यासिद्धत्वान्न णत्वम् ॥

नश्चाप० (८ । ३ । २४) ॥ **चेन मोऽनुकृष्यते । अपदान्तस्य किम् ? राजन्पाहि ।** यशांसीति । **यशश्शब्दाद् जसः शौ 'नपुंसकस्य' (७ । १ । ७२) इति नुमि 'सान्तमहतः' (६ । ४ । १०) इति दीर्घः ।** आक्रंस्यत इति । **क्रमेर्लृट्, 'आङ उद्गमने' (१ । ३ । ४०) इति तङ्, स्यः ॥**

अनुस्वारस्य (८ । ४ । ५८) ॥ **परेति लुप्तषष्ठीकं पृथक्पदम् । अत एव 'उदः स्था' (८ । ४ । ६१) इत्यादौ सवर्णग्रहणानुवृत्तिः, 'यरोऽनुनासिके' (८ । ४ । ४५) इत्यत्र तदपकर्षश्च सिद्धः ।**

यथीति स्पष्टार्थम् । 'दंशनम्' इत्यादौ तु न दोषः, शकारसवर्णाऽप्रसिद्धेः; प्रयत्नभेदेनाज्झलोः सावर्ण्याभावात् । अचि अनुस्वाराभावात् ॥

परेति । 'परस्य सवर्णः' इत्येवं समासो न । तथा सति 'यरोऽनुनासिके' इत्यत्र सवर्णमात्रस्यापकर्षः 'उदः स्था' इत्यत्र तदनुवृत्तिश्च न स्याताम्, पदार्थैकदेशस्यान्वयविरहात् । सूत्रे ययीति ग्रहणस्य न किञ्चित्फलम् । अचि हल्परत्वाभावादनुस्वार एव दुर्लभः । शषसरित्यादीनां सवर्णा एवाप्रसिद्धाः । न च दीर्घैकारादीनां शकारादिभिः सह 'नाज्झलौ' इति निषेधाप्राप्त्या सावर्ण्यं प्रसिद्धमित्यत आह—**प्रयत्नेति** । ऊष्मणां स्वराणाञ्च विवृतेषद्विवृतप्रयत्नभेदमाश्रित्य 'नाज्झलौ' इति प्रत्याख्यानस्य भाष्यकृता कृतत्वेन यथोत्तरं मुनीनां प्रामाण्यात् प्रयत्नभेदेनास्मिन् मते सावर्ण्यं वारणीयम् । तथा च ययीति स्पष्टार्थम् । **शकारेति** । 'यरोऽनुनासिके' इति सूत्रात् 'अनुनासिके' इत्यस्यानुवृत्त्या शकारसवर्णानुनासिकस्याप्रसिद्धेरिति तात्पर्यात् ॥

'नश्चापदान्तस्य झलि ॥ इस सूत्र में चकार से मकार का अनुकर्षण है । अपदान्त न कहने पर 'राजन् पाहि' इसके पदान्त नकार को भी अनुस्वार प्राप्त होगा, अतः अपदान्त कहना आवश्यक है । 'यशांसि' इसमें नुम् के नकार को अपदान्त होने से अनुस्वार होता है । 'आक्रंस्यते' इसकी सिद्धि आङ्पूर्वक क्रम धातु से लृट् लकार 'आङ् उद्गमने' इससे आत्मनेपद तथा 'स्यतासी लृलुटोः' इससे स्य प्रत्यय होने से होती है ॥

अनुस्वारस्य ययि परसवर्णः ॥ एतत्सूत्रघटक 'पर' शब्द से आई हुई षष्ठी विभक्ति लुप्त है । अतएव सवर्णमात्र की अनुवृत्ति 'उदः स्थास्तम्भोः' इस सूत्र में होती है । इसी प्रकार 'यरोऽनुनासिके' इस सूत्र में सवर्णमात्र का अपकर्ष सिद्ध होता है । सूत्र में 'ययि' पद स्पष्टार्थक है ।

१२५. वा पदान्तस्य । ८ । ४ । ५९ । **पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात् । त्वङ्करोषि, त्वं करोषि । सँय्यन्ता, संयन्ता । सँव्वत्सरः, संवत्सरः । यँल्लोकम्, यंलोकम् । अत्रानुस्वारस्य पक्षेऽनुनासिका यवलाः ॥**

१२६. मो राजि समः क्वौ । ८ । ३ । २५ । **क्विबन्ते राजतौ परे समो मस्य म एव स्यात् । सम्राट् ॥**

मो राजि (८ । ३ । २५) ॥ **नेति सिद्धे म इत्युक्तिः 'हे मपरे' (८ । ३ । २६) इत्येतद्विषये 'प्रशाम् ह्मलयति' इत्यादौ 'मो नो धातोः' (८ । २ । ६४) इति नत्वबाधनार्था । निषेधस्त्वनन्तरत्वादनुस्वारस्यैव स्यात् । ध्वनितञ्चेदम् 'एतदोऽन्' (५ । ३ । ५), अमो मश्' (७ । १ । ४०) इति सूत्रयोर्भाष्ये ॥**

मो राजि समः क्वौ ॥ ननु 'न राजि समः क्वौ' इत्येवं न्यासं विधाय अनुस्वारस्य निषेधेनापि सम्राडित्यस्य सिद्धौ मकारविधानं व्यर्थम् ? अत आह—**नेति सिद्धे** इति । नेत्युक्तौ अनन्तरस्येति न्यायेन अनुस्वारस्यैवानन्तरस्य निषेधे 'मो नो धातोः' इति प्राप्तस्य नत्वस्य निषेधो न स्यात् । तथा च उत्तरसूत्रे 'हे मपरे वा' इत्यत्र नेत्यनुवृत्त्या 'प्रशाम् ह्मलयति' इत्यत्र अनुस्वारमात्रस्य निषेधेऽपि 'मो नो धातोः' इत्यस्य निषेधाभावान्नत्वस्य दुर्वारतापत्तेः । **ध्वनितमिति** । तत्र सूत्रे 'मो राजि' इत्यनुस्वारादिबाधनार्थमित्युक्तम् । आदिपदोपादानं 'हे मपरे वा' इति सूत्रेण विहिते मकारे नत्वमपि न भवतीति बोधनार्थम् । अन्यथा 'मो राजि' इत्यस्य विषये मकारादेशस्य अनुस्वारव्यावृत्तिमात्रप्रयोजनत्वेन आदिपदोपादानस्य वैफल्यापत्तेः । **भाष्ये इति** । जात्यभिप्रायेण एकवचनम्; द्वयोः सूत्रयोः भाष्यद्वयस्य सत्त्वात् ॥

प्रवेश न रहने पर अच् और शल् इन दोनों के परवर्ती रहने पर भी परसवर्ण की प्राप्ति नहीं है; क्योंकि 'दंशनम्' इसमें शकार का कोई सवर्ण ही नहीं है। ईषद्विवृत और विवृत प्रयत्न के मानने पर प्रयत्नभेद से अच् और शकार का सावर्ण्य नहीं है। अच् में भी दोष नहीं है, यहाँ परवर्त्ती अच् के रहने पर अनुस्वार ही दुर्लभ है; क्योंकि अनुस्वार का विधान हल् परवर्ती रहने पर ही किया गया है।

मो राजि समः क्वौ ॥ शङ्का—इस सूत्र के स्थान में 'न राजि समः क्वौ' ऐसा सूत्र लाघव से क्यों नहीं किया ? म के स्थान पर न का पाठ करने पर भी अनुस्वार का निषेध होने पर भी सम्राट् इसकी सिद्धि हो सकती है ?

समाधान— 'हे मपरे वा' इस अग्रिम सूत्र में 'न' की अनुवृत्ति होने से निषेध का बोध होगा। इस प्रकार 'किम् ह्मलयति' इसमें अनन्तर ही विधि और प्रतिषेध का बोधक 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इस न्याय से स्वसमीपस्थ अनुस्वार का ही निषेध होगा। 'मो नो धातोः' इस सूत्र के द्वारा प्राप्त नत्व का प्रतिषेध दूरस्थ होने से नहीं होगा। अतः मकार को मकार का विधान है। ऐसा करने पर अनुस्वार एवं नत्व—दोनों ही नहीं हुए।

१२७. हे मपरे वा । ८ । ३ । २६ । **मपरे हकारे परे मस्य म एव स्याद्वा । 'ह्मल् ह्मल् चलने' । किम् ह्मलयति, किं ह्मलयति ।**

यवलपरे यवला वेति वक्तव्यम् (वा०) ॥

१२८. यथासंख्यमनुदेशः समानाम् । १ । ३ । १० । **समसम्बन्धी**

हे मपरे वा (८ । ३ । २६) । **मपरे इति बहुव्रीहिः, न तु तत्पुरुषः, असम्भवात् । 'मोऽनुस्वारः' (८ । ३ । २३) इत्यतो 'म' इत्यनुवर्त्तते ।**

यथासंख्य० (१ । ३ । १०) । **सम्यक् ख्यानं संख्या = क्रमवैशिष्ट्येन ज्ञानम्; 'यत्सांख्यैः प्राप्यते स्थानम्' इत्यत्र संख्या-शब्दस्य ज्ञानार्थताया दृष्टत्वात् । तामनतिक्रम्य यथासंख्यम् । अनुदेशः = पश्चाद्भववाक्यार्थबोधकालिकः सम्बन्धः । साम्यम्— संख्यया, योग्यत्वाद्, व्याख्यानाच्च । एवञ्च समसङ्ख्यानां येन क्रमेण पदज्ञानम्, पदादुपस्थितिर्वा, तेनैव क्रमेण वाक्यार्थबोधविषयः सम्बन्धस्तेषामित्यर्थः । फलितमाह— समसम्बन्धीति ।**

हे मपरे वा ॥ 'मः परो यस्मात्' इति बहुव्रीहिः, न तु 'मात्परः' इति तत्पुरुषः; असम्भवात्, तदाह—**मपर इति ॥**

यथासंख्यमनुदेशः समानाम् ॥ यथासंख्यपदार्थमाह—**सम्यगिति** । संख्या = क्रमेण ज्ञानम् । संख्यामनतिक्रम्य यथासंख्यम् । अव्ययीभावसमासः । 'यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते' (गी० ५. अ० ५ श्लो.) इति गीतावचने संख्याशब्दस्य ज्ञानवाचितायाः दृष्टत्वात् । **पश्चादिति** । पदज्ञानाद्यनन्तरं जायमानो वाक्यार्थबोधकालिकः सम्बन्धः । साम्यम् = समानता च न येन केनापि रूपेण, किन्तु उपस्थितत्वात्, योग्यतया, संख्यया च गृह्यते । शब्दार्थमाह—**एवञ्चेति** । येन क्रमेण पदज्ञानं यथा 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इत्यनेन नन्द्यादिभ्यो ल्युः, ग्रह्यादिभ्यो णिनिः, पचादिभ्योऽच्प्रत्ययो

हे मपरे वा ॥ 'मपर' शब्द में 'मात् परः'—इस प्रकार पञ्चमीसमास नहीं है । किन्तु 'मः परो यस्मात्'—इस विग्रह में बहुव्रीहिसमास है । मकार से परवर्ती हकार के न मिलने से पञ्चमीसमास का त्याग है । 'मोऽनुस्वारः' इस सूत्र से म की अनुवृत्ति है ॥

यथासंख्यमनुदेशः समानाम् ॥ इस सूत्र में संख्या शब्द लौकिक अथवा शास्त्रीय संख्या का बोधक नहीं है, किन्तु सम्यक् ज्ञान का वाची है । अर्थात् क्रम से ज्ञान । 'यत् सांख्यैः प्राप्यते स्थानं तद् योगैरपि गम्यते (गीता अ० ५, श्लो० ५) इस वचन में संख्या का ज्ञान अर्थ माना गया है । तां संख्यां = क्रमवैशिष्ट्येन ज्ञानम् अनतिक्रम्य यथासंख्यम्—इस प्रकार यथासंख्य का अर्थ है । अनुदेशपद का 'पश्चात् उत्पन्न वाक्यार्थबोध के समय का सम्बन्ध' अर्थ है । 'समानाम्' इस पद से विवक्षित साम्य संख्या के द्वारा ही लिया जाता है । उद्देश्य और विधेय की समता, योग्यता संख्या से ही हो सकती है । ऐसे व्याख्यान से भी यही अर्थ निर्णीत हुआ है । इस प्रकार समान संख्या वालों का सम्बन्ध जिस क्रम से पद का ज्ञान या पदार्थ की उपस्थिति होती है, उसी क्रम से उनका सम्बन्ध शाब्दबोध का विषय होता है । यह समुदाय का अर्थ है । इसी का फलितार्थ परम मूल में 'समसम्बन्धी' ऐसा लिखा गया है ।

यद्यपि स्थानाख्यलौकिकप्रमाणादेव सिद्धम्, तथापि 'परस्मैपदानाम्' (३।४।८२) 'एचोऽयवायावः' (६।१।७८) इत्यादौ शब्दतः सूत्रान्तरस्थक्रममादाय सम्बन्ध-

यथासंख्यं भवति। तथा येन क्रमेण पदार्थोपस्थितिः, यथा 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यत्र परस्मैपदशब्देन 'तिप्तस्झि' इत्यादिसूत्रे क्रमेण निर्दिष्टानां तिबादीनामुपस्थित्या तेनैव क्रमेण णलादय आदेशा यथासंख्येन भवन्ति। एतेन येन क्रमेण पदज्ञानम्, पदादुपस्थितिर्वा, तेनैव क्रमेण वाक्यार्थबोधविषयीभूतः सम्बन्धो ज्ञेय इति फलितम्।

स्थानाख्येति। स्थानञ्चात्र क्रमो विवक्षितः। एवञ्च 'शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय' इत्यत्र यथा क्रमिकान्वयो लोके दृष्टः (नहि शत्रोः रञ्जयपदबोध्यक्रियया अन्वयो विवक्षितः, एवमेव अन्यासामपि क्रियाणां व्युत्क्रमेण अन्वय उदाहार्यः) तथैवात्रापि शास्त्रे क्रमेणान्वये सिद्धे यथासख्यमिति सूत्रं नावश्यकम्? इति शङ्का समाधत्ते—**तथापीति।** 'परस्मैपदानाम्' इति सूत्रे उद्देश्यवाचकपदेन 'परस्मैपदानाम्' इत्यनेन न क्रमेण स्थानिनां शब्दतः उपादानं किन्तु परस्मैपदेनोपस्थापिततिप्तसझीत्यादिरूपोपस्थित्या अर्थतः, न तु शब्दस्वरूपतः शत्रुं मित्रमित्यादिवन्निर्देशः। तथा च स्थानाख्येन = क्रमाख्येण लौकिकप्रमाणेन तत्रैव क्रमेणान्वयबोधो यत्र उद्देश्यविधेययोः शब्दद्वारा साक्षादभिधानम्। यत्र तु तत्पदादुपस्थितिद्वारा क्रमो गम्यते तत्र नास्य विषयतेति 'एचोऽयवायावः', परस्मैपदानामित्यादौ न निर्वाहः, सरूपेण क्रमवतां तेषां निर्देशाभावात्; एवमेव 'आद्यन्तौ टकितौ' इत्यत्र टकित्समुदायत्वावच्छिन्ने आद्यन्तसमुदायत्वावच्छिन्नस्य अन्वयं मत्वा द्वन्द्वे कृते पश्चात् आदिपदार्थस्य टित्वावच्छिन्ने अन्तपदार्थस्य कित्वावच्छिन्ने पदार्थैकदेशत्वेन अन्वयो न स्यात्। आरब्धे तु यथासंख्यसूत्रे एतदारम्भसामर्थ्यात् एकदेशान्वयस्यापि स्वीकारात् क्रमेणान्वयः सिद्धः। अत उपस्थितिद्वारा यत्र उद्देश्यस्य बोधः, यत्र वा कृते समासे तदेकदेशस्य यथासंख्यमन्वयो विवक्षितः—इत्येतदुभयविधस्थले

शङ्का—'शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जय' इसमें जिस प्रकार स्थान[1]रूप लोक प्रमाण से क्रमिक अन्वयबोध होता है। अर्थात् शत्रुम् इसका जय के साथ, मित्रम् इसका रञ्जय के साथ विपत्तिम् इसका भञ्जय के साथ क्रमिक अन्वयबोध होता है; उसी प्रकार शास्त्र में भी क्रमिक अन्वयबोध होजाने से यथासंख्य सूत्र का आरम्भ व्यर्थ है?

समाधान—जिन दनों का क्रमिक अन्वय इष्ट है उनका उसी स्थल में क्रम से शब्दतः उपादान होने पर ही स्थानाख्य प्रमाण से क्रम से अन्वय होता है। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' (३।४।८२) और 'एचोऽयवायावः' इन सूत्रों में निर्दिष्ट परस्मैपद तथा एच् पद का क्रम 'तिप् तस् झि' एवं 'एओङ्' इत्यादि सूत्रों में प्रतिपादित है। अतः 'शत्रुं मित्रम्' इसके समान यहां क्रमिकान्वयबोध प्राप्त नहीं है। एवं 'आद्यन्तौ टकितौ' में आद्यन्त समुदाय की टकित् समुदाय में अन्वयविवक्षा करने से द्वन्द्व की साधुता होती है। अन्यथा पूर्व में ही क्रमिक

१. स्थानम् = क्रमः। 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्' इति मीमांसासूत्रे स्थान-शब्देन क्रमस्यैव बोधात्।

बोधार्थम्, 'आद्यन्तौ टकितौ' (१।१।४६) इत्यादौ समासनिर्देशे साहित्ये द्वन्द्वविधानादप्राप्तक्रमान्वयबोधनार्थञ्चेदम्। एवञ्च तत्र यथासंख्येनान्वयबोधकवाक्यकल्पना; एतत्प्रामाण्यात्, ततश्च बोध इति बोध्यम्। अत्र 'स्वरितेन' (१।३।११) इत्यपकृष्यते इति 'ख्यत्यात्' (६।१।११२) इत्यादौ नातिप्रसङ्गः। तत्र प्रतिपत्तिकालिकमेव संख्यासाम्यमेतच्छास्त्रप्रवृत्त्युपयोगीति 'ञमङणनम्' (मा० सू० ७) इति सूत्रे भाष्ये स्पष्टम्।

अस्य सूत्रस्य प्रयोजनम्। **साहित्ये इति**। समुदाये इत्यर्थः। यद्यपि समासाद् उपस्थितिरेकैव, तथापि यथासंख्यसूत्रबलात् समस्यमानयोः पृथक् क्रमो गृह्यते।

ननु 'ख्यत्यात्परस्य' इत्यत्र 'ख्य', 'त्य'–इत्येतयोः 'ङसि', 'ङस्'—इत्येताभ्यां समसंख्यासाम्यात् यथासंख्यमन्वये ख्यशब्दात् परस्याः पञ्चम्या एकवचनस्य त्यशब्दात् षष्ठ्या एकवचनस्यैव उत्वं स्यान्नतु उभाभ्यां परस्य उभयविभक्त्येकवचनस्येत्यत आह—**स्वरितेनेति**। तथा च स्वरितत्ववति यथासंख्यमिति प्रवर्तते। कुत्र च स्वरितत्वम्, कुत्र च न? इति व्याख्यानतो निर्णयम्। प्रतिपत्तिकालिकमेव = प्राथमिकवाक्यार्थबोधकालिकम्। तेन 'स्यतासी लृलुटोः' इत्यत्र लृपदेन लृङ्लृटोरुभयार्थबोधनेऽपि न क्षतिः। अन्यथा लृशब्दस्य उभयार्थबोधकत्वेन लृलुटोरित्यनेन त्रयाणां ग्रहणम्, 'स्यतासी' इत्यनेन तु द्वयोरिति संख्यासाम्याभावात् यथासंख्यं न स्यात्। केचित्तु 'धर्मेणापि साम्ये यथासंख्यं भवति। तथा च लृत्वं लृटि लृङि चोभयत्रेति तद्गतो लृत्वधर्म एक एवेति संख्यासाम्यं सूपपादम्' इत्याहुः।

भाष्ये इति। तत्र हि मकारो न कर्त्तव्यः। 'मकारेण ये प्रत्याहाराः ते ञमञ्-सूत्र-

---

अन्वय करने से सहविवक्षा के अभाव से द्वन्द्व नहीं होगा। एकधर्मावच्छिन्न की एकधर्मावच्छिन्न में एक सम्बन्ध से अन्वयविवक्षा ही सहविवक्षा है। अतः समासोत्तर क्रम से अन्वयार्थ के लिये भी यथासंख्यसूत्र का आरम्भ है। क्योंकि 'अजाविधनौ देवदत्तयज्ञदत्तौ, न जाने कस्याजा? कस्य अविः?' इस भाष्य से समासोत्तर यत्नविशेष के विना क्रमिकान्वयबोध न होने का संकेत प्राप्त होता है। यथासंख्य सूत्र के आरम्भसामर्थ्य से इन स्थलों में क्रमिक अन्वयबोध होता है। यह तात्पर्य है।

शंका—सूत्रारम्भ में 'ख्यत्यात् परस्य' इस सूत्र का क्रम से अन्वयबोध होने के कारण ख्य शब्द से परवर्ती ङसि और त्य शब्द से परवर्ती ङस् को उत्व प्राप्त होने से षष्ठी में 'सख्युः' रूप की असिद्धि, एवं पञ्चमी में 'पत्युः' की असिद्धि हो जायगी?

समाधान—'स्वरितेनाधिकारः' इस सूत्र से 'स्वरितेन' इस पद का यहाँ अपकर्ष करने से स्वरितत्वप्रतिज्ञा रहने पर ही यथासंख्य की प्रवृत्ति होती है। 'ख्यत्यात्' इस सूत्र में स्वरितत्वप्रतिज्ञा न होने से यथासंख्यसूत्र से क्रमिकान्वय का लाभ नहीं हुआ।

शङ्का—लक्ष्यसंस्कार के समय 'लृ' पद से लृङ् और लृट्–दोनों का ग्रहण किया गया है। इस प्रकार स्य और तास् इनके साथ संख्या के द्वारा साम्य न होने से यथासंख्यसूत्र की अप्रवृत्ति हो जायगी?

समाधान—सूत्र के वाक्यार्थबोधप्रसङ्गकाल का संख्यासाम्य लिया जाता है। अतः पूर्वकाल में साम्य होने से उक्त दोष नहीं है।

विधिर्यथासंख्यं स्यात् । कियँ ह्यः, किं ह्यः । किलँ ह्वलयति, किं ह्वलयति । किवँ ह्वलयति, किं ह्वलयति । किं लँ ह्लादयति, किं ह्लादयति ॥

१२९. नपरे नः । ८ । ३ । २७ । **नपरे हकारे परे मस्य नः स्याद्वा । किन्ँ ह्नुते, किं ह्नुते ॥**

घटकञकारेणैव सन्तु' इति कथयित्वा एवं सति 'ङमो ह्रस्वादचि' इत्यनेन ङ ञ इत्युक्तौ झभेत्यनयोरपि ङमुट् स्यात्, पदान्ते झकारभकारयोरभावान्न दोषः। एवं तर्हि त्रय आगमिनः, पञ्च ङमुटः—इति यथासंख्यं न प्राप्नोति? इत्याशङ्क्य प्रतिपत्तिकालिकं संख्यासाम्यमादाय समाहितम्। लक्ष्ये पदान्तयोः झकारभकारयोरभावेऽपि प्राथमिकबोधे पञ्च आगमिनः, पञ्च च आगमा इति साम्यमादाय यथासंख्यं भवतीति उक्तम्। तेनायमर्थो भाष्यसम्मतः।

टिप्पणीकारास्तु—तुल्यसंख्यप्रतियोगिकः तुल्यसंख्यकानुयोगिक आकाङ्क्षाभाष्यसम्बन्धः अव्यवहितोत्तरत्वादिरूपः संख्याकर्मकातिक्रमणकर्तृत्वाभाववान्। सङ्ख्याकर्मकातिक्रमणकर्तृत्वाभावश्च स्वप्रतियोगिवृत्त्यपेक्षाबुद्धिविशेषविषयतासजातीयापेक्षाबुद्धिविशेषविषयतावदनुयोगिकत्वम्। तथा च 'समूलाकृतजीवेषु हन्कृञ्ग्रहः' इत्यत्र समूलपूर्वकात् हन्-धातोः, अकृतपूर्वकात् कृञ्-धातोः, जीवपूर्वकात् ग्रह्-धातोः णमुलप्रत्ययो भवति, न तु समूलपूर्वकात् कृञ्धातोः, अकृतपूर्वकात् हन्धातोः—इत्येवं व्युत्क्रमेणापि णमुल्। तत्र समूलप्रतियोगिको हननुयोगिकः आकाङ्क्षाभाष्यः सम्बन्धोऽव्यवहितोत्तरत्वरूपः स्वम् अव्यवहितोत्तरत्वादिसम्बन्धः तस्य प्रतियोगी समूल इति, तद्वृत्तिर्या अपेक्षाबुद्धिविशेषस्य विशेष्यता सा समूल इत्येकः, एतदेकविशिष्टः हन् इत्येकः—इतीमौ द्वौ इत्याकारिकापेक्षाबुद्धिविशेषस्य विषयता तत्सजातीयापेक्षाबुद्धिविशेषविषयता हन्निष्ठा, तादृशविषयतावान् हन्, स एवानुयोगी अव्यवहितोत्तरत्वसम्बन्धस्य इति तदनुयोगिकत्वं तत्र सम्बन्धे। विषयतायां साजात्यञ्च—स्वनिरूपकापेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतावच्छेदकसंख्यात्वव्याप्यजात्यवच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वम्, स्ववृत्तिस्वनिरूपकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वविशिष्टत्वावच्छिन्नधर्मितात्व, स्ववृत्ति, स्वनिरूपकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वानवच्छिन्नधर्मितात्व—इत्येतदन्यतरवत्त्वमित्युभयधर्माभ्याम्।

हन्निष्ठापेक्षाबुद्धिविशेषविषयतायां समूलवृत्त्यपेक्षाबुद्धिविशेषविषयतानिरूपिक या अपेक्षाबुद्धिः तन्निष्ठा या जनकता तन्निरूपिता या जन्यता तदवच्छेदिका या संख्यात्वव्याप्या जातिः द्वित्वत्वजातिः, तादृशद्वित्वत्वजात्यवच्छिन्ना हन्वृत्तित्वनिष्ठजन्यता तन्निरूपितजनकता या अवच्छेदकत्वस्य, तथा समूलवृत्त्यपेक्षाबुद्धिविशेषविषयतावृत्ति यत्

'ञमङणनम्' इस सूत्र के भाष्य में 'ञमङणनम्' इसमें अन्तिम मकार अनावश्यक है। मकार से निर्मित प्रत्याहार 'झभञ्' इसके ञकार से माना जायगा। 'ङमो ह्रस्वादचि' इसके 'ङम्' को हटाकर 'ङञ्' का निर्देश होगा। ऐसा मानने पर झकार और भकार का, पदान्त में न होने से, जिनका आगम करना है उनकी संख्या तीन है और आगम की संख्या पांच है—इस प्रकार

१३०. ङ्णोः कुक् टुक् शरि । ८ । ३ । २८ । **ङकारणकारयोः कुक्-टुकावागमौ वा स्तः शरि । कुक्टुकोरसिद्धत्वाज्जश्त्वं न ।**

एते यवला निरनुनासिका एव; विधीयमानत्वेन सवर्णाग्राहकत्वात्, जातिग्रहण-प्राप्तस्येव गुणाभेदकत्वप्राप्तस्यापि 'अप्रत्ययः' इत्यनेन निषेधाच्च । एवं 'मय उञः' (८ । ३ । ३३) इत्यत्रापि । अत एव मतोर्मस्य नानुनासिको वकारः । अन्यथा 'तद्वानासाम्' (४ । ४ । १२५) इत्यादौ नित्यानुनासिकापत्त्या तन्निर्देशासङ्गत्यापत्तिरित्याहुः ॥

सम्बन्धनिरूपकापेक्षाबुद्धीयैकस्वनिष्ठैकप्रकारतानिरूपितैकत्वानवच्छिन्नधर्मितात्वम्, तस्य च सत्त्वात् लक्षणसमन्वयः । हनित्येतद् एकविशिष्टः, कृञ् इत्येकः—इत्येवमपेक्षाबुद्धेः सत्त्वेन एकत्वावच्छिन्नप्रकारतानिरूपिता एकत्वावच्छिन्ना धर्मिता कृञ्निष्ठापेक्षाबुद्धिविषयत्वाव-च्छिन्ना विषयतारूपा सावच्छिन्ना धर्मिता भवितुमर्हति, न तु हन्वृत्त्यपेक्षाबुद्धिविशेष-विषयता तस्याः ।

परममूलासङ्गतिं ध्वनयन्नाह—**एते** इति । 'वा पदान्तस्य' इत्यनेन विधीयमानः परसवर्णः आन्तरतम्यात् संय्यन्ता, संवत्सर इत्यादौ सानुनासिका यवला भवन्ति इत्युक्तम्, तन्न;व्यक्तिपक्षे एषां विधीयमानत्वेन अणुदित्यसूत्रे अप्रत्यये इत्युक्ततया सवर्णग्रहणाप्रसक्त्या सानुनासिकस्य ग्रहणाभावात् । 'गुणा अभेदकाः' इति पक्षेण प्राप्तस्यापि सवर्णग्रहणस्य निषेधकत्वाद् अप्रत्यय इत्यंशस्य । अत एव जातिपक्षाश्रयणेनापि न सानुनासिकस्य यकारा-देर्ग्रहणसम्भवः; अप्रत्यय इत्यंशस्य तस्यापि निषेधकत्वात् । अत एव = सर्वस्यापि निषेध-कत्वादेव । 'तद्वानासाम्' इति सूत्रे सूत्रकृता मतुपो मकारस्य 'झयः' इति सूत्रेण विधीयमानो वकारो नानुनासिकः कृतः; विधीयमानत्वेन सवर्णस्याग्राहकत्वात् । अन्यथा सानुनासिके वकारे प्रत्यये भाषायामिति वचनेन नित्यमनुनासिकः स्यात् ।

नित्यानुनासिकेति । नित्यानुनासिकशब्देन प्रत्यये भाषायामित्यस्य ग्रहणम् । केचित्तु 'झयः' इति वत्वस्य तत्पदेन ग्रहणं कुर्वन्ति । परत्र पक्षे नित्यपदोपादानस्य स्वारस्यं न प्रतिभाति ।

वैषम्य होने से क्रमिकान्वय नहीं होगा । इसका बोधकाल की संख्यासमता मानकर समाधान किया । इससे प्रतीत होता है कि संख्यासाम्य विधिबोध के समय होना अपेक्षित है ।

संय्यन्ता इत्यादि स्थलों में अनुस्वार को परसवर्ण निरनुनासिक ही यकारादि होता है; क्योंकि विधेय में सवर्णग्रहण न होने से अनुनासिक यकारादि का ग्रहण सम्भव नहीं है । जातिपक्ष से प्राप्त ग्रहण के समान ही गुण अभेदक है । इस पक्ष से प्राप्त सवर्ण का 'अणुदित्' सूत्रघटक 'अप्रत्ययः' इस अंश में निषेध होता है । 'मय उञो वो वा' इस सूत्र से विधीयमान वकार भी निरनुनासिक ही होता है, विधीयमान सवर्ण का ग्राहक नहीं होता । इसीलिए 'झयः' इससे विधीयमान वकार अनुनासिक नहीं हुआ । अतएव 'तद्वानासाम्'—इसमें सूत्रकार ने सानु-नासिक वकार का निर्देश नहीं किया । अन्यथा निरनुनासिक व के निर्देश की असङ्गति हो जायगी ॥

चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् (वा०)। प्राङ्ख्षष्ठः, प्राङ्क्षष्ठः, प्राङ् षष्ठः। सुगण्ठ्षष्ठः, सुगण्ट्षष्ठः, सुगण्षष्ठः ॥

चयो द्वितीया इति। 'नादिन्याक्रोशे' (८।४।४८) इत्यत्र भाष्ये इदम्। एतत्सामर्थ्यादितत्कृतद्वितीयस्य न चर्त्वम्।

'ऊष्मोदयं प्रथमं स्पर्शमेके द्वितीयमाहुरपदान्तभाजम्'।

इति प्रातिशाख्येऽपदान्तभाजमिति चर्त्वासिद्धत्वलब्धार्थानुवादः; पदान्ते जश्त्वप्रवृत्त्या चयोऽलाभात्। अत्र तु कृते न जश्त्वप्राप्तिः; अस्यासिद्धत्वात्। 'अफ्सरा' 'वथ्सा' इति भाष्योदाहृते छान्दसत्वाच्चर्त्वस्यासिद्धत्वं न। एवञ्च प्रातिशाख्येऽपदान्तभाजमित्युत्सर्गः। यद्वा तयोरव्युत्पन्नत्वम्, न त्वप्पूर्वात्सर्त्तेरसिर्वेदेः सो वेत्यन्यत्र विस्तरः॥

चयो द्वितीया इति। ऊष्मणाम् उदयो यस्मात् तम् ऊष्मोदयम्। ऊष्मपरकं प्रथमं स्पर्शात्मकं कचटतपेत्येवं रूपम्, अपदान्तभाजं पदान्तभिन्नं द्वितीयं वर्णमाहुरिति प्रातिशाख्येन अपदान्तस्य चयो द्वितीयवर्णस्य स्थानिता लभ्यते। तथा च 'प्राङ्क्षष्ठः' इत्यत्र पदान्तत्वात् ककारस्य कथमादेश ? इत्यतः आह—**चर्त्वासिद्धत्वेति।** पदान्ते सर्वत्र लिट्सु इत्यादौ जश्त्वे कृते चयोऽभावात् चर्त्वोत्तरमेव 'चयो द्वितीया' इत्यस्य प्रवृत्तिर्वाच्या। सा च न सम्भवति, वार्त्तिकदृष्ट्या चर्त्वस्यासिद्धत्वात् पदान्ते तदप्राप्तेरित्याशयेन अपदान्तभाजमित्युक्तं प्रातिशाख्ये। तथा च चर्त्वासिद्धत्वेन पदान्ते वार्त्तिकाप्रवृत्तिः फलिता, तत्फलितार्थस्यैवानुवादोऽपदान्तभाजमित्यनेन। अत्र तु चर्त्वं विनैव ककारस्य चयो लाभात् पदान्तेऽपि वार्त्तिकप्रवृत्तौ बाधकाभावात्। चर्त्वासिद्धत्वाभावस्य प्रातिशाख्यघटकापदान्तभाजमित्यनेन अभिमतस्य इह सत्त्वात्।

चयो द्वितीया शरि पौष्करसादेरिति वाच्यम्॥ यह वार्त्तिक 'नादिन्याक्रोशे पुत्रस्य' इस सूत्र के भाष्य में स्पष्ट है। इस वार्त्तिक के सामर्थ्य से वार्त्तिक द्वारा विहित द्वितीय अक्षर को चर्त्व नहीं होता।

शंका—ऊष्मोदयम्=ऊष्मा शषसह इनका उदय प्रादुर्भाव जहाँ से होता है वह ऊष्मोदय है। 'कपय्' सूत्र के 'अनन्तर शषसर् हल्' सूत्र होने से ऊष्मोदय चय्-प्रत्याहारस्थ वर्ण है। ऊष्मणाम् उदयः—इस प्रकार परत्वरूप से ऊष्मा के रहने पर स्पर्श=कादि से मपर्यन्त के प्रथम अक्षर के स्थान में द्वितीय अक्षर का प्रयोग होना चाहिए, यदि स्पर्श का प्रथम वर्ण पदान्त न हो। इस आशय के 'ऊष्मोदयप्रथमम्' इत्यादि प्रातिशाख्य के अनुसार पदान्त चय् को द्वितीय अक्षर नहीं होना चाहिए। अतः 'प्राङ्क् षष्ठः' इसमें द्वितीय अक्षर नहीं होगा ?

समाधान—'अपदान्तभाजम्' द्वितीय अक्षर के विधान में निमित्तरूप से सन्निविष्ट नहीं है; किन्तु चर्त्व के असिद्ध होने से जो लब्ध अर्थ है उसी का प्रातिशाख्य में अनुवाद है। वार्त्तिक की दृष्टि में चर्त्व के होने से पदान्त में जश्त्व के द्वारा निष्पन्न अक्षर स्पर्श का प्रथम अक्षर अर्थात् चय् न होने से स्वतः 'चयो द्वितीया' इसकी प्राप्ति नहीं होगी। चर्त्व करने से ही चय् मिल सकता था। परन्तु चर्त्व के असिद्ध होने से चय् का होना सम्भव नहीं है। प्राङ्ख्षष्ठः यहाँ 'कुक्' होने के कारण चर्त्व के विना भी प्रथम अक्षर होने से द्वितीय अक्षर के होने में बाधा नहीं है। यहाँ कुक् के असिद्ध होने से जश्त्व की सम्भावना नहीं है—यह भाव है।

१३१. डः सि धुट् । ८ । ३ । २९ । डात्परस्य सस्य धुड् वा स्यात् । षट्त्सन्तः, षट्सन्तः ॥

डः सि धुट् (८ । ३ । २९) ॥ 'सि' इति सप्तमी षष्ठ्यर्थे; व्याख्यानात्, तदाह—सस्येति । पदस्येत्यनुवर्त्तमानस्य वैयधिकरण्येनान्वयात् पदावयवस्य सस्येत्यर्थः । षट्त्सन्त इति । धुटि धस्य चर्त्वे लक्ष्यभेदात् पुनर्डस्य चर्त्वम् ॥

अत्र तु = द्वितीये अक्षरे कृते तु । अस्य = चयो द्वितीया इत्यस्य । असिद्धत्वान्न जश्त्वम् । भाष्ये पदान्तेऽपि क्वचिद् दृश्यमानो द्वितीयवर्णः छान्दसत्वात् चर्त्वासिद्धत्वाभावेन साधनीयः । एवञ्च अपदान्तस्यैव चयो द्वितीयवर्णस्य स्थानितेति नियमो न । अथवा अव्युत्पत्तिपक्षमाश्रित्य समाधेयम् । अत्र पक्षे प्रकृतिप्रत्ययविभागाभावेन अपदान्तत्वमस्त्येवेति न कश्चिद्दोषः ॥

डः सि धुट् ॥ सकाराव्यवहितपूर्ववर्तिनो डकाराद् अव्यवहितोत्तरस्य धुडागम इत्यर्थेन तस्मिन्निति परिभाषासहकृतेन सस्य धुडागमः फलति । तथा च सीति सप्तम्याः षष्ठ्यर्थे पर्यवसानमित्याशयेन आह—**सीति सप्तमीति** । सस्येति परममूलानुरोधेनापि तथा व्याख्यानमुचितम् । एतेन टिप्पणीकृतां चिन्त्योक्तिः चिन्तनीया । **लक्ष्यभेदादिति** । **लक्ष्यत्वम्**— स्वीयप्राथमिकप्रवृत्तावुद्देश्यतावच्छेदकत्वेनाश्रीयमाणो यावान् शब्दसमुदायः तद्घटको यः तद्घटकमात्रोद्देश्यकविकारघटकातिरिक्तः, तद्घटकोद्देश्यकागमघटकाति-

---

शंका—'अप्सु सरति' इस विग्रह में अप्-पूर्वक सृधातु से 'सर्तेरप्पूर्वादसिः' इस उणादि सूत्र से अस् प्रत्यय होने से निष्पन्न 'अफ्सराः' शब्द में, एवं वद् धातु से स प्रत्यय द्वारा निष्पन्न 'वथ्सा' शब्द में द्वितीय अक्षर नहीं होना चाहिए; क्योंकि चर्त्व असिद्ध होने से जश्त्व निष्पन्न चय् नहीं है ?

समाधान—उक्त भाष्यप्रयोग छान्दस होने से छन्द में सभी सूत्र विकल्प से विधायक माने गये हैं । अतः चर्त्वासिद्धि न होने से द्वितीय अक्षर की निष्पत्ति में कोई बाधा नहीं है । इस प्रकार 'अपदान्तभाजम्' यह सार्वत्रिक नहीं है । 'अफ्सराः' 'वथ्सा'—ये अव्युत्पन्न प्रातिपदिक हैं । इनकी पूर्वोक्त व्युत्पत्ति नहीं है । अतः चर्त्व के असिद्ध होने की शङ्का नहीं है । और जश्त्व भी नहीं होता; क्योंकि पकार अपदान्त है । विशेष **निरुक्तभाष्य** में स्पष्ट है ॥

डः सि धुट् ॥ इस सूत्र में 'सि' इसमें षष्ठी के अर्थ में सप्तमी है । पञ्चमी और सप्तमी दोनों का निर्देश होने पर पञ्चमीनिर्देश बलवान् होता है; क्योंकि 'तस्मात्' यह सूत्र 'तस्मिन्निति' इससे परवर्ती है । अतः 'तस्मिन्निति' के अप्रवृत्तिरूप व्याख्यान से सप्तमी को षष्ठ्यर्थ मानकर 'सस्य' ऐसा व्याख्यान किया गया है । किसीने षष्ठ्यंशरहित 'तस्मिन्निति' इस सूत्र की उपस्थिति भी मान कर सूत्रार्थ माना है । यह आपातरमणीय के अतिरिक्त कुछ नहीं है । 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इस परिभाषा के रहते, 'तस्मिन्निति' इसकी उपस्थिति नहीं हो सकती । अनुवर्तमान 'पदस्य' इसका वैयधिकरण्य=अवयवावयविरूप से सकार के साथ अन्वय होने से 'पदावयव सकार'—इस प्रकार के अर्थ का लाभ हुआ ।

षट्त्सन्तः । यहाँ षड् इसके डकार से परे सकार को धुडागम होने के अनन्तर धकार को

१३२. नश्च । ८ । ३ । ३० । **नकारान्तात् सस्य धुड् वा स्यात् । सन्त्सः, सन्सः ॥**

१३३. शि तुक् । ८ । ३ । ३१ । **नस्य पदान्तस्य शे परे तुग्वा स्यात् । 'शश्छोऽटि' (सू० १२०) इति छत्वविकल्पः । पक्षे 'झरो झरि' (सू० ७१) इति चलोपः । सञ्छम्भुः, सञ्च्छम्भुः, सञ्च्शम्भुः, सञ्शम्भुः ॥**

ञछौ ञचछा ञचशा ञशाविति चतुष्टयम् ।
रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥

नश्च (८ । ३ । ३०) ॥ नकारान्तादिति । **पदस्येत्यनुवृत्तं पञ्चम्या विपरिणम्यत इति भावः । वैयधिकरण्येनैवान्वय इति ङमुट्सूत्रस्थभाष्यस्वरसः ॥**

नस्य पदान्तस्येति । **अपदान्तनकारेऽनुस्वारप्रवृत्त्या फलितार्थप्रदर्शनमिदम् । नान्तस्य पदस्येत्युचितम् ।**

चतुष्टयमिति । **वक्ष्यमाणविकल्पैरिति भावः । तेन तुकश्चुत्वे छत्वस्यासिद्धत्वात् 'चयो द्वितीया' (का० वा०) इति पक्षे चस्य छत्वेन छकारछकारछकारशकारघटितरूपद्वयाधिक्ये ञशानुस्वारविसर्गाणां द्वित्वविकल्पेनाऽऽधिक्येऽपि न क्षतिः ॥**

रिक्तश्च, तदघटितत्वे सति स्वीयप्राथमिकप्रवृत्त्युत्तरकालिकप्राप्तिभिन्नप्राप्तिविषयावटितत्वम् । तदभावादिति भावः । यथा 'षटत् सन्तः' इत्यत्र 'खरि च' इति लक्ष्यभेदात् पुनः प्रवर्तते । एवं 'खरि च' इति तदीयप्राथमिकप्रवृत्तौ उद्देश्यतावच्छेदकत्वेन आश्रीयमाणो यावान् 'षट्त् स' इति शब्दसमुदायः तद्घटको यः डकारः, स तद्घटका ये वर्णा तन्मात्रोद्देश्यकविकारातिरिक्तः, एवं तद्घटकोद्देश्यकागमरूपी यो धुट् तद्घटकातिरिक्तोऽपि डकारः, एवम्भूतेन डकारेण अघटिता स्वीयप्राथमिकप्रवृत्तिर्धकारे, तदुत्तरकालिकी प्रवृत्तिः डकारे, तद्भिन्नप्राप्तेः विषयत्वं धकारे, तद्घटितत्वं धकारस्येति तल्लक्ष्यत्वं धकारे तदभावात् टकारे पुनः चर्त्वं प्रवर्तते ॥

नश्च ॥ भाष्यस्वरस इति । 'ङमो ह्रस्वादचि' इति सूत्रे पदावयवङमः इति वैयधिकरण्येन व्याख्यानात् अत्रापि वैयधिकरण्यान्वय एव उचितः । सामानाधिकरण्येन अन्वयानुरोधे तु नान्तस्य पदस्येत्येवं व्याख्यातुमुचितम्; पदस्य विशेष्यतयाऽन्यत्र व्यवहृतत्वात् ॥

'खरि च' इससे चर्त्व तकार होता है। पहले चर्त्वशास्त्र का लक्ष्य ध् स था, दूसरी बार ड् द् हुआ, अतः लक्ष्यभेद होने से 'लक्ष्ये लक्षणं सकृदेव प्रवर्तते' इसकी प्रवृत्ति नहीं हुई। इसलिए 'खरि च' इसकी पुनः प्रवृत्ति होने से डकार को चर्त्व से टकार हो जाता है ॥

नश्च ॥ इस सूत्र में अनुवृत्त 'पदस्य' इसका पञ्चम्यन्त 'नः' के साथ सामानाधिकरण्य से अन्वय के लिए पञ्चम्यन्त से विपरिणाम है। एवं तदन्तविधि द्वारा सिद्ध 'नकारान्तात्' इसका उल्लेख किया है। जैसे 'ङमो ह्रस्वादचि' इसमें भाष्यानुरोध से 'पदावयव 'ङम्'—इस प्रकार वैयधिकरण्यान्वय होता है। उसी प्रकार यहाँ भी अन्वय करना उचित है ॥

शि तुक् ॥ इस सूत्र में 'नस्य पदान्तस्य' ऐसा परममूलोक्त अर्थ, अपदान्त नकार को

१३४. ङमो ह्रस्वादचि ङमुण्नित्यम् । ८ । ३ । ३२ । ह्रस्वात् परो यो ङम् तदन्तं यत्पदं तस्मात् परस्याचो नित्यं ङमुडागमः स्यात् । प्रत्यङ्ङात्मा । सुगण्णीशः । सन्नच्युतः ॥

ङमो (८ । ३ । ३२) ॥ **पदस्येत्यनुवृत्तं सामानाधिकरण्यानुरोधात्पञ्चम्या विपरिणम्यते** इत्याह—तदन्तं यत्पदं तस्मादिति । तत्र ङन् **स्वयं ह्रस्वादिति विशेषणसम्बन्धमनुभूय पदविशेषणत्वेन तदन्तपर इति** भावः । 'ङमः' **इति पञ्चमीबलादचीति सप्तमी षष्ठ्यर्थे, तदाह्**–अच इति । सप्तमीनिर्देशस्तु लाघवार्थः; **'ङम उत्तरस्याचः' इति 'तस्मिन्' (१ । १ । ६६) इति सूत्रस्थभाष्यात्** ।

ङमो ह्रस्वादचि ङमुण् नित्यम् ॥ पदस्येति अधिकारलब्धं षष्ठ्यन्तं ङम इत्यनेन पञ्चम्यन्तेन अभेदेन अन्वयलाभाय पञ्चम्या विपरिणम्य व्याख्यातम्, तदाह्—**तस्मात्** इति । ङम्पदार्थो विशेषणतया ह्रस्वादिति पञ्चम्यर्थेन सह अन्वयस्यानन्तरं पदे विशेषणत्वेन ङम्शब्दात् तदन्तविधौ ह्रस्वात्परो यो ङम् तदन्तं (ङमन्तं) यत्पदमित्यर्थो लभ्यते । 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति परिभाषया 'ङमः' इत्यस्य पञ्चम्यन्तत्वेन तस्मादित्युत्तरस्येत्युपस्थित्या अव्यवहितोत्तरत्वलाभेन तदुत्तरस्याचीत्यस्य च षष्ठीप्रकल्पकत्वपक्षे षष्ठ्यन्तत्वेन प्रकल्पनात्, अथवा षष्ठ्यर्थे सप्तमीत्यनुसारेण अच इत्यर्थः । सूत्रकृतैव किं न अचीत्यस्य षष्ठ्यन्ततया निर्देशः कृतः ? इत्याह्—**लाघवार्थ इति** । अजादौ पदे इत्यर्थलाभार्थश्चेत्यग्रे वक्ष्यते । **अनिति इति** । अन् धातोर्लटि रूपम् । अत्र नान्तस्य पदत्वाभावात् ङमुडागमो न ।

'नश्चापदान्तस्य' इस सूत्र से अनुस्वार हो जाने से पदान्त में ही नकार की उपलब्धि होने के कारण फलित होता है । पद के सर्वत्र विशेष्य होने से नकार में तदन्तविधि द्वारा 'नान्तस्य पदस्य'—इस प्रकार का व्याख्यान उचित है । वक्ष्यमाण विकल्पों से चार रूपों की सिद्धि बतायी गयी है । इससे यह नहीं समझना चाहिए कि चार ही रूपों के भेद हैं । और भी इसके रूपभेद हैं । तुक् को श्चुत्व होने पर छकार को असिद्ध कर 'चयो द्वितीयाः' इससे चकार को छकार होगा, उस छकार को द्वित्व होने से द्विछकारघटित रूप एवं 'शश्छोऽटि' इसके विकल्पपक्ष में छकार-शकारघटित रूप होने से रूपद्वय की अधिकता जकार, ञकार, अनुस्वार तथा विसर्ग के विकल्पेन द्वित्व करने से रूपों की संख्या में आधिक्य होने पर भी परममूलोक्त चतुष्टयरूप-भेद की असङ्गति नहीं हुई; क्योंकि वक्ष्यमाण सूत्रों के द्वारा रूपभेद की संख्या चार ही होती है ॥

ङमो ह्रस्वादचि ङमुण्नित्यम् ॥ इस सूत्र में अनुवृत्त 'पदस्य' सामानाधिकरण्य = अभेद से अन्वयानुरोध के कारण पञ्चम्यन्त से विपरिणाम किया गया है । इसी के अनुसार 'तदन्तं यत्पदम्' इस प्रकार का उल्लेख परममूल में किया गया है । ह्रस्व के साथ ङम् का अन्वय पूर्व में ही होता है । उसके अनन्तर ङम् पद में विशेषण होकर तदन्तविधि का लाभ करता है । 'ङमः' इसके पञ्चम्यन्त होने से पञ्चमीनिर्देश को बलवान् मानकर षष्ठी के अर्थ में सप्तमी है । इसीलिए परममूल में 'अचः' लिखा है ।

शङ्का—यहाँ सप्तमीनिर्देश न कर षष्ठ्यन्त का प्रयोग क्यों नहीं किया ?

ङमन्तं यत्पदमिति किम् ? 'अनिति' ङमुण्मा भूदिति। भाष्ये तु विभक्तिव्यत्ययकल्पने गौरवात्पदावयवङमः परस्येति वैयधिकरण्यमेवोक्तम्। 'दण्डिना' इत्यत्र ङमुडभावो मण्डूकप्लुत्या 'उञि च पदे' (८।३।२१) इत्यतः 'पदे' इत्यनुवर्त्याजादेः पदस्य ङमुडित्यर्थेन बोद्धचः। पदस्येत्यस्याऽऽवृत्त्या सम्बन्धेऽपि विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्वे एव तदादिविधिप्रवृत्त्या तदलाभः स्यात्। एतदर्थमेवाचीति सप्तमीनिर्देशः।

स्वसिद्धान्तमाह—**भाष्ये तु इति।** न च वैयधिकरण्येन पदान्तावयवङसः परस्याचः इत्येवं सूत्रार्थसत्त्वे दण्डिना इत्यत्र ङमुट् स्यात्, नकारस्य दण्डिनेति पदावयवत्वात् ह्रस्वात् इकारात् परत्वाच्च। मूलोक्तार्थे तु न प्राप्तिः; ञमन्तस्य दण्डिन् इत्यस्य पदत्वाभावात्। वैयधिकरण्येनान्वये तु दण्डिना इति समग्रं पदं तदवयवत्वान्नकारस्य ङमुडागमः प्राप्नोति इति वाच्यम्; 'उञि च पदे' इत्यतः पदे इत्यस्यानुवर्तनेन 'यस्मिन् विधिस्तदादावल्ग्रहणे' इति परिभाषया 'अचि', 'पदे' इत्यनयोः सप्तम्यन्तत्वेन तदादेरुपस्थित्या अजादौ पदे इत्यर्थेन 'दण्डिना' इत्यत्र आविभक्तिमात्रस्य पदत्वाभावात् न ङमुट्। 'पदस्य' इत्यावर्त्य एकस्य अचीत्येतदसम्बन्धे 'दण्डिना' इत्यत्र ङमुटो वारणसम्भवात् अनुवृत्तिकल्पनायाः गुरुभूततया अनावश्यकत्वादिति न शङ्कनीयम्; विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्वे एव यस्मिन् विधिरिति परिभाषया तदादेरुपस्थित्या प्रकृते पदस्य आवर्तमानस्य षष्ठ्यन्ततया अचीति विशेषणस्य सप्तम्यन्तत्वेऽपि तदादेरित्यर्थालाभेन उक्तदोषस्य तादवस्थ्यात्। अत एव सूत्रे सप्तमीनिर्देशः। अन्यथा 'अचः' इत्येवं निर्देशे तदादेर्बोधो न स्यात्; उभयोः सप्तम्यन्तत्वाभावात्। उभयोः सप्तम्यन्तत्वे एव उक्तपरिभाषायाः मवृत्तिमात्रमत्र 'आर्धधातुकस्येड्वलादेः' इत्यत्र आदिग्रहणम्। अन्यथा वलीति निर्देशेन तदादिबोधात् सूत्रे आदिग्रहणस्य वैयर्थ्यं स्यात्। उभयोः सप्तम्यन्तत्वे प्रवृत्तौ तु आर्धधातुकस्य षष्ठ्यन्ततया निर्देशात् न परिभाषया निर्वाह इति आदिग्रहणं कृतम्।

समाधान—षष्ठीनिर्देश करने पर सन्धि द्वारा 'अचः' इसकी अपेक्षा 'अचि' इसमें एक मात्र का लाघव है। अतः गुरुनिर्देश के भय से षष्ठ्यन्त निर्देश नहीं किया। ङम् से उत्तर अच् को ङमुट् का विधान भाष्य से प्रमाणित होता है। 'ङमन्त को पद होना चाहिए'—इसके मानने से 'अनिति' इत्यादि स्थलों में ङमुडागम नहीं हुआ; क्योंकि अन् धातुमात्र पदसंज्ञक नहीं है।

महाभाष्य में 'षष्ठ्यन्तपदस्य' इसको पञ्चम्यन्त रूप से परिणाम करने में गौरव होने के कारण 'पदावयव जो ङम्' इस प्रकार वैयधिकरण्य से अन्वय कहा है।

शंका—इस प्रकार के अर्थ में 'दण्डिना' यहाँ भी पदावयव इकार के उत्तर आ को ङमुट् होना चाहिए ? परममूलोक्त अर्थ में ङमन्त दण्डिन् यह पद नहीं है ?

समाधान—'उञि च पदे' इस सूत्र से 'पदे' इसकी मण्डूकप्लुति से अनुवृत्ति है। 'अचि' इसका सम्बन्ध होने से 'यस्मिन् विधिस्तदादवल्ग्रहणे' इस परिभाषा से तदादिविधि होने पर अजादौ पदे = अजादि पद में ङमुट् का विधान है, दण्डिना इसका आ पद नहीं है। विभक्ति मात्र की पद संज्ञा नहीं होती।

शंका—'पदस्य' इस अनुवृत्त की आवृत्ति करने से, एवं सप्तम्यन्ततया विपरिणाम करने

ङमन्तं यत्पदमित्यर्थेऽपि 'परमदण्डिनौ' इत्यादावेतद्वारणाय 'पदे' इत्यनुवृत्तिरावश्यक्येव; अन्तर्वर्तिविभक्त्या दण्डिन्नित्यस्य पदत्वात्। 'उत्तरपदत्वे च' इति प्रत्यय-

मूलोक्तार्थे स्वीकृतेऽपि 'परमदण्डिनौ' इत्यत्र प्रत्ययलक्षणेन अन्तर्वर्तिविभक्त्या दण्डिन् इत्यस्य पदत्वेन ङमन्तं पदं दण्डिनिति, तस्मात्परस्याचः औ इत्यस्य ङमुट् स्यात्। तदर्थं 'पदे' इत्यावश्यकम्। तथा च औ इत्यस्य विभक्तिमात्रस्य पदत्वाभावान्न ङमुट्। न च 'उत्तरपदत्वे चापदादिविधौ प्रतिषेधः' इति प्रतिषेधात् प्रत्ययलक्षणं न सम्भवतीति वाच्यम्; एतस्य वचनस्य यत्रोत्तरपदस्य किञ्चित् कार्यं प्रत्ययलक्षणेन कर्तव्यं तत्रैव प्रवृत्तिः। अत एव माषकुम्भवापेन इत्यत्र प्रत्ययलक्षणेन विभक्तिमाश्रित्य कुम्भस्य पदत्वात् 'पदव्यवायेऽपि' इति सूत्रेण पदव्यवधाने णत्वनिषेधः सिध्यति। 'उत्तरपदत्वे च' इति निषेधो न प्रवर्तते; कुम्भस्य पदत्वप्रयुक्तकार्यस्याभावात्। कार्यं तु वापेनेत्यत्र, न तु कुम्भेत्यस्येति न दोषः। एवञ्च कार्यित्वनिवेशेन 'परमदण्डिनौ' इत्यत्र 'दण्डिन्' इत्यस्य न ङमुडागमप्रसङ्गः, अपि तु 'औ' इत्यस्य। तच्च नोत्तरपदमिति उक्तवार्त्तिकाप्रवृत्तेः।

ननु उत्तरपदं मध्यमपदत्वानाक्रान्तं विवक्षितम्। अन्यथा 'पूर्वदण्डिप्रियः' इत्यत्र दण्डिन् इत्यत्र पदसंज्ञाप्रयुक्ते नलोपे कार्ये अनेन वार्त्तिकेन प्रत्ययलक्षणप्रतिषेधात् पदत्वाभावात् नलोपो न स्यात्। तथा च प्रकृते माषकुम्भवापेनेत्यत्र कुम्भपदस्य मध्यमपदत्वेन आक्रान्ततया अनाक्रान्तत्वविरहात् निषेधाप्रवृत्त्या कार्यित्वनिवेशो विफल इति चेन्न; यद्वृत्त्यारम्भकसुब्निमित्तिका पदसंज्ञा चिकीर्षिता तद्वृत्तिविशिष्टत्वं मध्यमपदत्वम्। वै० च—स्वघटकत्व, स्वघटकार्थवदव्यवहितपूर्वत्व, स्वघटकार्थवदव्यवहितोत्तरत्व—एतत्त्रितयसम्बन्धेन। 'पूर्वदण्डिप्रिय': इत्यत्र पूर्वः दण्डी प्रियो यस्येति विग्रहे बहुव्रीहिसमासः। तत्र पूर्व सु दण्डिन् सु प्रिय सु इत्यवस्थायामेतद्वृत्त्यारम्भिका या सुविभक्तिः तन्निमित्तिका या पदसंज्ञा चिकीर्षिता तद्वृत्तिविशिष्टत्वं दण्डिन् इत्यस्य, तथा हि—स्वं समासरूपा वृत्तिः, तद्घटकत्वं दण्डिन् इत्यस्य, स्वघटकः अर्थवान् प्रियः, तदव्यवहितपूर्वत्वं दण्डिन् इत्यस्येति सम्बन्धत्रयेण विशिष्टत्वात् मध्यमपदत्वाक्रान्तत्वमेतस्येति न

मात्र से 'अजादि पद—इस अर्थ का लाभ सिद्ध है। 'पदे' शब्द की अनुवृत्ति द्वारा समाधान अनावश्यक है ?

समाधान—विशेषण और विशेष्य दोनों के सप्तम्यन्त से निर्देश रहने पर ही उक्त परिभाषा से तदादि का बोध होता है। इस प्रकार षष्ठ्यन्त 'पदस्य' की आवृत्ति द्वारा उपस्थित पद का सप्तम्यन्त से निर्देश न होने से तदादि की उपस्थिति नहीं होगी। अतः 'पदे' इसकी अनुवृत्ति आवश्यक है। इसीलिए सूत्र में 'अचि' इस प्रकार सप्तमी का निर्देश किया है।

शंका—'ङमन्त पद'—ऐसा अर्थ करने पर 'दण्डिना' इसमें ङमन्त पद न होने से ङमुट् की प्राप्ति नहीं है। आपके अर्थ में ङमुट् की व्यावृत्ति के लिए 'पदे' की मण्डूकप्लुति से अनुवृत्ति करनी पड़ती है। अतः वैयधिकरण्य से अन्वय गौरवग्रस्त है ?

समाधान—'परमदण्डिनौ' इस प्रयोग की 'परमश्चासौ दण्डी' इस विग्रह में कर्मधारय समास से निष्पत्ति होती है। इसमें प्रत्ययलक्षण द्वारा दण्डिन् सुविभक्त्यन्त होने से पद संज्ञक है। अतः नान्त और पद भी परमदण्डिन्-घटक दण्डिन् है। यहाँ ङमुट् के व्यावृत्त्यर्थ

लक्षणनिषेधस्तु न, माषकुम्भवापेनेत्यादौ 'पदव्यवायेऽपि' (८ । ४ । ३८) इति निषेध-सिद्धये तस्य यत्रोत्तरपदस्य कार्यित्वं तत्रैव प्रवृत्तेः । 'तेन निषेधेन सिद्धम्' इत्येतत्सूत्रस्थ भाष्योक्तिस्त्वेकदेशिन इति दिक् ।

प्रत्ययलक्षणप्रतिषेधः । **'माषकुम्भवापेन'** इति । अत्र तु वृत्तिद्वयम् । माषाणां कुम्भः, तस्य वाप इति । एवञ्च माष आम् कुम्भ सु इत्येतद्वृत्तेरारम्भिका या सुप् विभक्तिः तद्घटकोऽर्थवान् नैतादृशः यस्मादव्यवहितपूर्वत्वं कुम्भस्य स्यात् । स्वघटकत्वं, स्वघटकोऽर्थवान् माषः तदव्यवहितोत्तरत्वस्य सत्त्वेऽपि त्रिषु सम्बन्धेषु एकस्याभावात् मध्यमपदत्वाक्रान्तत्वमस्य नास्तीति निषेधाप्रवृत्तये कार्यित्वनिवेश आवश्यकः । तथा च वार्त्तिकाप्रवृत्त्या प्रत्ययलक्षणेन पदत्वसत्त्वात् 'पदव्यवायेऽपि' इति णत्वनिषेधः सिद्धः ।

न च 'पदव्यवायेऽपि' इति सूत्रे 'पदे व्यवायः' इति सप्तमीसमास आश्रितो भाष्ये, तथा च 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति परिभाषया माषकुम्भं वपतीति विग्रहेण निष्पन्नस्य मासकुम्भवापशब्दस्य सुबुत्पत्तेः प्रागेव वापशब्देन समासे वापशब्दस्य सुबन्तत्वविरहेण पदत्वाभावात् पदे परतो व्यवधानाभावात् निषेधो न प्राप्नोति । 'पदस्य व्यवाये' इत्येवं षष्ठीसमासेन व्याख्याने कुम्भरूपपदस्य व्यवधानात् णत्वनिषेधः प्राप्नोतीति प्रसक्तं फलभेदं वारयितुम्, तथा क्षीरं पिबतीति क्षीरपः तस्य कुम्भ क्षीरपकुम्भः' इत्यत्र पकारोत्तरविभक्तेः प्रागेव समासे पशब्दस्य सुबन्तत्वाभावेन पदत्वाभावात् पदस्य व्यवधानं नास्ति, अतः णत्वनिषेधो न स्यात् । सप्तमीसमासपक्षे तु कुम्भ-शब्दस्य सुबुत्पत्त्यनन्तरं समासेन पदत्वात् निषेधः प्राप्नोतीति फलभेदः । तद्वारणाय च सूत्रे पदपदं पदत्वयोग्योपलक्षणमित्यवश्यं वक्तव्यम् । एवं सति कुम्भस्य पदत्वाभावेऽपि

'पदे' ग्रहण की अनुवृत्ति सामानाधिकरण्य से अन्वय में भी आवश्यक होने से वैयधिकरण्य से अन्वय में गौरव नहीं है ।

शंका—'उत्तरपदत्वे चापदादिविधौ प्रतिषेधः' 'उत्तरपद को पदसंज्ञा के विधान में प्रत्ययलक्षण नहीं होता; किन्तु पदादि के विधि में यह प्रतिषेध नहीं होता'—यह उक्त वार्त्तिक का अर्थ है । प्रकृत में दण्डिन् के पदत्वविधानकाल में प्रत्ययलक्षण का 'उत्तरपदत्वे' इसके द्वारा प्रतिषेध होने से सुबन्तत्वाभाव के कारण पदसंज्ञा नहीं होगी । अतः ङमन्त पद न होने से ङमुट् नहीं होगा ?

समाधान—'माषकुम्भवापेन' इसमें माषघटक षकार के उत्तर कुम्भरूप पद का व्यवधान होने से वापेन एतद्घटक नकार को प्राप्त णत्व का 'पदव्यवायेऽपि' इससे निषेध हो जाता है । कुम्भ की पदसंज्ञा कर्त्तव्य में 'उत्तरपदत्वे' इससे प्रत्ययलक्षण का प्रतिषेध हो जाने से पदसंज्ञा नहीं होगी । अतः णत्व का निषेध नहीं होगा । इस कारण, कार्यित्व का वार्त्तिक के अर्थ में प्रवेश है । अर्थात् उत्तरपद को पदत्वप्रयुक्त कार्य करने में प्रत्ययलक्षण का प्रतिषेध होता है । माषस्य कुम्भः—इस समास का कुम्भरूपी उत्तरपद को पदसंज्ञाप्रयुक्त कार्य नहीं करना है । कार्य तो णत्वनिषेध है, जो कि कुम्भ में नहीं, प्रत्युत 'वापेन' इसमें करना है । अतः 'उत्तरपदत्वे' इसकी प्राप्ति न होने से णत्वनिषेध सिद्ध होता है । प्रकृत में 'परमदण्डिना' यहाँ उत्तरपद-

१३५. समः सुटि । ८ ३ । ५ । **समो रुः स्यात् सुटि । 'अलोऽन्त्यस्य' (सू ०४२) ॥**

१३६ अत्रानुनासिकः पूर्वस्य तु वा । ८ । ३ । २ । **अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात् ॥**

'इको यणचि' (६ । १ । ७७) इति सौत्रो निर्देशः ॥

रुप्रकरणे इति । **अत एव 'समः सुटि' (८ । ३ । ५) इत्यादौ प्रश्लेषेण स-विधानमिति** भाष्ये **उक्तम् । रोः पूर्वस्येत्युपलक्षणं रुप्रकरणविधेयस्य । एवमुत्तरत्र रोः**

पदत्वयोग्यतायाः सत्त्वेन पदव्यवधानात् णत्वनिषेधः सिद्ध एवेति कार्यित्वनिवेशो विफल इति वाच्यम्; परमाट्तिरित्यादौ दोषवारणाय कार्यित्वनिवेशस्य आवश्यकत्वात् । तथाहि अटतीति अट्, परमश्चासौ अट् च परमाट्, एतस्मादाचारे क्विपि धातुसंज्ञायां क्तिचि परमाट्तिरिति सिध्यति । अत्र 'ष्टुना ष्टुः' इति प्राप्तस्य ष्टुत्वस्य 'न पदान्ताट्टोरनाम्' इत्यनेन प्रतिषेधार्थं टकारस्य पदान्तत्वं प्रत्ययलक्षणेन एष्टव्यम् । कार्यित्वनिवेशाभावे 'उत्तरपदत्वे च' इति प्रतिषेधात् पदत्वस्य दौर्लभ्यात् 'न पदान्तात्' इति ष्टुत्वनिषेधो न स्यात् । कार्यित्वनिवेशे तु पदत्वप्रयुक्तकार्यस्य ष्टुत्वनिषेधरूपस्य टकारे अभावात् वार्त्तिकस्याप्रवृत्त्या पदत्वात् ष्टुत्वनिषेधः सिद्धः । परमश्चासौ अट् चेति विग्रहे परम सु अट् सु एतद्वृत्त्यारम्भकसुब्निमित्तिका पदसंज्ञा इष्टा, तद्वृत्तिघटकत्वमट्पदे यद्यप्यस्ति, तथापि स्वघटकाऽर्थवान् यः तदव्यवहितपूर्वत्वं तत्र नास्ति; तिशब्दात्पूर्वत्वस्य सत्त्वेऽपि तस्य तिशब्दस्य तद्वृत्तिघटकत्वाभावात् । इत्येवमग्रेऽपि ऊह्यम् ।

सौत्रो निर्देश इति । न च संहिताया अविवक्षया न ङमुडिति वाच्यम्; एवं सति 'इको यण्' इत्यत्र 'हशि च' इत्युत्वमपि न स्यात् । पदभेदेन संहिताया विविक्षाऽविवक्षे न युक्ते, संहितयैव सूत्राणां पाठस्य सर्वैरभ्युपगतत्वात् ।

अत्रानुनासिकः पूर्वस्य तु वा ॥ अत्रेति । अनेन रोरेव न ग्रहणम्, किन्तु रुप्रकरणस्य ग्रहणम्; सर्वनाम्ना प्रकरणस्यैव परामर्शात् ।

अत्रार्थे प्रमाणमाह—अत एवेति । रुप्रकरणस्य ग्रहणादेव । 'समः सुटि' इति सवि-

---

दण्डिन् को पदत्वप्रयुक्त कार्य नहीं करना है, किन्तु 'औ' इसको करना हैं । यों, वार्त्तिक से प्रतिषेध न होने से पदसंज्ञा हो जायगी । अतः 'पदे' इसकी अनुवृत्ति दोनों प्रकार के अर्थो में आवश्यक है । 'परमदण्डिनौ' इसमें 'उत्तरपदत्वे' इस वार्त्तिक द्वारा निषेध होने से ङमुट् की प्राप्ति नहीं होती । अतः उक्त प्रयोग की सिद्धि हो जाती है । इस प्रकार का कथन एकदेशी भाष्य का है । इसलिए एकदेशी भाष्य से विरोध अनादरणीय है । 'इको यणचि' इस सूत्र में ङुट् का का आगमन होना चाहिए, किन्तु सूत्र में वैसा प्रयोग न करने से ङमुट् नहीं होता । सूत्र छन्द के समान होते है । छन्द में सभी विधियाँ विकल्प से प्रयुक्त होती है ॥

अत्रानुनासिकः पूर्वस्य तु वा ॥ इसमें निर्दिष्ट 'अत्र 'शब्द का 'रुप्रकरण में' इस प्रकार का अर्थ है । अतः एव 'समः सुटि' इस सूत्र में प्रश्लेष के द्वारा सत्वविधानपक्ष में भी अनुनासिक सिद्ध होता है ।' अत्र' पद से यदि 'विधि में' ऐसा अर्थ किया जायगा तो सकारादेशपक्ष

१३७. अनुनासिकात् परोऽनुस्वारः । ८ । ३ । ४ । अनुनासिकं

पूर्वस्मादित्यपि । अयमधिकारः । तेनोत्तरसूत्रविषये एवास्य प्रवृत्तिः, न तु 'मतुवसोः' (८ । ३ । १) इत्यत्र, तत्सूत्रस्थवार्त्तिकयोश्च । अत्रेति तु—रुप्रकरण एवास्य सम्बन्धः, न त्वग्रे 'ढो ढे लोपः' (८ । ३ । १३) इत्यादावित्यर्थसूचनार्थं स्पष्टार्थमेव । तुशब्दः परस्य नित्यं रुत्वं पूर्वस्य वाऽनुनासिक इति विशेषद्योतनार्थः 'पूर्वस्य' इत्यस्य च रुस्थानिनः पूर्वस्येत्यर्थो बोद्धव्यः ॥

अनुनासिकात्पर इति ॥ अत्रानुनासिकादिति ल्यब्लोपे पञ्चमी, व्याख्यानात् ।

धानपक्षेऽपि अनुनासिकः सिद्धः । परममूले रोः पूर्वस्येति रुप्रकरणविधेयमात्रस्य उपलक्षणम् । रुप्रकरणविधेयाव्यवहितपूर्वस्येत्यर्थः । उत्तरत्रेति । अनुनासिकात्परः इत्यत्र । पूर्वस्मादित्यपीति । अत्रापि 'अनुनासिकात् परः' इति सूत्रे रोः पूर्वस्मादित्यपि रुप्रकरणविधेयाव्यवहितपूर्वस्योपलक्षणं बोध्यम् ।

अयमिति । अत्रानुनासिक इति । अधिकार इति । तथा च उत्तरसूत्रेण विहिते कार्ये एव ततः पूर्वमनुनासिकः, नतु एतत्सूत्रात् पूर्वसूत्रेण विहितकार्यात्पूर्वम् । अतएव 'मतुवसो रु सम्बुद्धौ' इति सूत्रविषये, तथा 'वन उपसंख्यानम्' 'विभाषा भवद्भगवदघवतामोच्चावस्य' इति तत्सूत्रस्थवार्त्तिकयोश्च विषये 'अत्रानुनासिकः' इत्यस्य प्रवृत्तिर्न । अस्य विधिसूत्रत्वे तु रुप्रकरणे अस्य प्रवृत्त्या तेष्वपि प्रवृत्तिर्दुर्वारा स्यात्; तेषामपि रुप्रकरणस्थत्वात् । अधिकारत्वे तु न दोषः; उत्तरसूत्रेष्वेव अधिकारस्य सम्बन्धात् । अत्रेति तु इति । रुप्रकरण एवास्याधिकारो नाग्रे इति स्पष्टं बोधयितुं सूत्रे 'अत्र' पदम् ॥

अनुनासिकात् परोऽनुस्वारः ॥ ल्यब्लोपे इति । दिग्योगलक्षणा पञ्चमी तु न, 'अनु-

---

में अनुनासिक नहीं होगा । अतः 'अत्र' शब्द का रुप्रकरण अर्थ है । रुप्रकरण में ही सकार का विधान है । इस प्रकार भाष्योक्त सकार विधानपक्ष में भी अनुनासिक होता है । परममूल में 'रोः पूर्वस्य' इस प्रकार का कथन उपलक्षण है । रुप्रकरण के अन्य कार्यों से पूर्व को भी अनुनासिक होता है । 'अनुनासिकात् परः' इसमें भी 'रोः पूर्वस्मात्' यह रुप्रकरण विधेय से पूर्वमात्र का उपलक्षण है । 'अत्रानुनासिकः' यह अधिकारसूत्र है । अतः इस सूत्र के उत्तरसूत्रों में ही अधिकारसूत्र उपस्थित होता है । स्व से पूर्ववर्ती 'मतुवसोः रुः सम्बुद्धौ' इसके लक्ष्य एवं 'वन उपसंख्यानम्' 'विभाषा भवद्भगवदघवतामोच्चावस्य' इन दोनों वार्तिकों के लक्ष्य में रु से पूर्व को अनुनासिक नहीं हुआ । रुप्रकरणबोधक अत्र शब्द का उपादान रुप्रकरणपर्यन्त ही अधिकार है । इसके अग्रिम 'ढो ढे लोपः' इत्यादि सूत्रों में इसके ज्ञान के लिए नहीं किया गया है । पर को रुत्व नित्य होता है । उससे पूर्व को अनुनासिक विकल्प से होता है । इस प्रकार के वैशिष्ट्य की सूचनार्थ 'तु' शब्द का उपादान है । रु के विधेय होने से निष्पन्न अभी नहीं है । अतः उसको अवधिरूप से निर्देशयुक्त नहीं है । अतः 'रोःपूर्वस्य' इसका तात्पर्य 'रुस्थानिनः पूर्वस्य' (रु के स्थानी के पूर्व) ऐसा समझना चाहिए ॥

'अनुनासिकात् परोऽनुस्वारः ॥ इसमें अनुनासिकात् इसमें 'ल्यब्लोपे कर्मण्यधिकरणे च'

विहाय रोः पूर्वस्मात् परोऽनुस्वारागमः स्यात् । खरवसानयोर्विसर्जनीयः (सू० ७६) ॥

१३८. विसर्जनीयस्य सः । ८ । ३ । ३४ । **खरि विसर्जनीयस्य सः स्यात् । एतदपवादेन 'वा शरि' (सू०१५१) इति पाक्षिके विसर्गे प्राप्ते ।**

संपुंकानां सो वक्तव्यः (वा०) । सँस्कर्ता । संस्कर्ता ।

अयमागमोऽनवयव एव, अवयवत्वे मानाभावात् ।

खरीति । **विसर्गाक्षिप्तस्याप्यवसानस्य न सम्बन्धो व्याख्यानात् ।** सो वक्तव्य इति । **'समः सुटि' (८ । ३ । ५) इत्यादिसूत्रत्रये स इत्युपसंख्याय 'समः सुटि' (८ । ३ । ५) इत्यत्र सकारं प्रश्लिष्य वा एतैः सकार एव विधेय इत्यर्थः । एवञ्चास्यासिद्धत्वाद् रुत्वाभावेन विसर्गाभावे तत्तद्विधीनामप्राप्तिरेवेति** भावः । **स्पष्टं चेदं** भाष्ये । **विसर्गस्यानेन सत्वविधाने तु गौरवं स्फुटम् ।**

स्वारपरोऽनुनासिकः पूर्वस्य तु वा' इति न्यासेन सिद्धे 'अनुनासिकात् पर' इत्युक्तेर्नैष्फल्यापत्तेरित्येवंरूपाद् व्याख्यानात् ॥

विसर्जनीयस्य सः ॥ खरि अवसाने च विसर्गस्य लाभात् ताभ्यां विना विसर्गानुपपत्त्या आक्षेपात् खर इव अवसानस्यापि लाभे तस्मिन्नपि 'विसर्जनीयस्य' इत्यनेन सत्वं कुतो न इत्याह—**विसर्गेति । व्याख्याना**दिति । लक्ष्यानुरोधादित्यर्थः । 'प्रत्ययः' इत्यादि सूत्रे सविसर्गस्य निर्देशाच्च ।

संपुंकानां सो वक्तव्य इति । सुटीत्यादीति । आदिपदेन 'पुमः खय्यम्परे', 'कानाम्रेडिते' इति सूत्रद्वयस्य ग्रहणम् । भाष्येति । समः सुटीति सूत्रे समो मकारस्य रुत्वे विसर्गे च कृते 'वाशरि'इति विसर्गस्य विसर्गे प्राप्ते 'संपुंकानाम्'इति वार्त्तिकेन सत्वमित्येषा प्रक्रिया गौरवान्नाङ्गीक्रियते, किन्तु वार्त्तिकेन मकारस्यैव सत्वं विधीयते प्रक्रियालाघवाय, तदाह—**विसर्गस्येति ।** एतेन वार्त्तिकारम्भस्य वैफल्यं सूच्यते । 'समः सुटि' इत्यनेन सत्वविधानेन रुत्वदृष्ट्या सत्वस्यासिद्धत्वात् रुत्वाभावेन 'वा शरि' 'कुप्वोः ≍क≍पौ च'इत्या दिसूत्राणामप्राप्त्या तद्वारणाय वार्त्तिकारम्भो नावश्यकः । सत्वस्यापि रुप्रकरणस्थत्वेन अनुस्वारः, अनुनासिकश्च सिध्यतः ।

इससे ल्यबन्तार्थ के योग में पञ्चमी है, दिग्योग में नहीं । अन्यथा 'अनुस्वारपरोऽनुनासिकः पूर्वस्य तु वा' इस प्रकार का सूत्रन्यास करना था । एतद्रूप व्याख्यान से ल्यब्लोप में पञ्चमी का निर्णय होता है ।

अनुस्वार आगम होने पर भी अवयव नहीं है, क्योंकि कुक् टुक् के समान कोई भी आगमचिह्न नहीं है । 'पर' शब्द भी यहाँ समीपवाची है, अवयववाची नहीं ॥

विसर्जनीयस्य सः ॥ इसमें 'विसर्जनीयस्य' पद से खर-मात्र का आक्षेप है । अवसान का आक्षेप नहीं है । यद्यपि दोनों ही विसर्ग के निमित्त हैं, तथापि 'प्रत्ययः' इत्यादि सूत्रों में सत्व नहीं किया है । अतः यह निर्देश ही उक्तार्थ में प्रमाण है ।

संपुंकानां सो वक्तव्यः ॥ इस वार्त्तिक से सत्त्व का विधान होता है । 'वा शरि' इस

'समो वा लोपमके' इति भाष्यम् । लोपस्यापि रुप्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेकसकारं रूपद्वयम् । द्विसकारं तूक्तमेव ।

लोपस्यापीति । यत्तु—

उपधारञ्जनं कुर्यान्नमो रुकरणे सति ।
लोपे प्रकृतिभावे वा नोपधारञ्जनं मतम् ॥

उपधारञ्जनम् = अनुनासिकानुस्वारागमरूपम् । नमोः = नकारमकारयोः । प्रकृतिभावोदाहरणम्—'नॄन्पाहि' इति ।

यत्तु प्रातिशाख्यत्वात्तच्छाखामात्रविषयमिति भावः । अत एव भाष्ये—'समादिषु सत्वं वक्तव्यम्' इत्युक्तम् । रुत्वपक्षे चानुनासिकाद्यापत्तिर्दोषत्वेन नोक्ता ।

समो वा लोपमिति । लोपपक्षेऽपि लोपस्यापि रुप्रकरणस्थत्वात् अनुस्वारानुनासिकौ । **प्रकृतिभावे वा इति ।** प्रकृतिभावो नात्र शास्त्रीयः, किन्तु स्वाभाविकी अवस्थितिः । चार्थे वा-शब्दः प्रयुक्तः ।

सूत्र द्वारा संस्कर्ता इसमें सत्व को बाध कर विसर्ग का ही विधान पक्ष में प्राप्त है । इसके बाध के लिए उक्त वार्तिक का आरम्भ है । शेखरकार इस प्रक्रिया में गौरव समझ कर 'समः सुटि' 'पुमः खय्यम्परे' तथा 'कानाम्रेडिते'—इन तीनों सूत्रों से रुत्व-विधान के स्थान में सत्व का ही विधान मानते हैं । सकार-विधान के लिए सूत्र में स का निर्देश कर उन दोनों सूत्रों में अनुवृत्ति के द्वारा सकार-विधान का लाभ होगा । अथवा 'समः सुटि' इसमें सकारप्रश्लेष के द्वारा उक्तार्थ का लाभ होगा । अतः सूत्रों से सत्वविधान करने से वार्तिकारम्भ अनावश्यक है । इनसे विधीयमान सत्व के रुत्व की दृष्टि से असिद्ध होने के कारण रुत्व की अप्रवृत्ति होने से विसर्ग की भी, रेफाभाव होने से, अप्रवृत्ति होगी । विसर्ग के न होने से 'वा शरि' इसकी प्रवृत्ति भी दुर्लभ है । इस प्रक्रिया में लाघव है । विसर्ग के स्थान में सत्व करने की प्रक्रिया में गौरव है ।

'समो वा लोपमेके' इस भाष्यवचन से सम् के मकार का लोप होने पर भी लोप का रुप्रकरण में पाठ होने से अनुनासिक और अनुस्वार—दोनों ही होते हैं । इसका प्रातिशाख्य के साथ विरोध किसी ने दिखाया है । उसका अनुवाद करने के अनन्तर खण्डन करने का उपक्रम करते हैं—**यत्तु** इति ।

शङ्का—नकार और मकार को रुत्व करने पर अनुनासिक और अनुस्वार होता है । लोप और प्रकृतिभाव (=स्वरूप से अवस्थान) में अनुनासिक और अनुस्वार नहीं होता । प्रातिशाख्य का यह अर्थ है । इस प्रकार मलोपपक्ष में अनुनासिक और अनुस्वार नहीं होंगे ?

समाधान—इस प्रातिशाख्य के अनुसार ऋक्शाखामात्र में ही व्यवस्था होती है, अन्यत्र नहीं होती, क्योंकि यह उसी शाखा का प्रातिशाख्य है ।

प्रातिशाख्य के अनुसार व्यवस्था सार्वत्रिक नहीं है । इसीलिए भाष्यकार ने सम् आदि में सत्वविधानपक्ष में अनुनासिक और अनुस्वार आगम का अभाव और रुविधानपक्ष में अनुनासिकादि की आपत्ति प्रदर्शित नहीं की ।

शंका—'समो वा लोपमेके' इससे मकार-लोप होने पर 'अनचि च' से सकार को द्वित्व करने से द्विसकाररूप की सिद्धि हो जाने से 'समः सुटि' इस सूत्र का आरम्भ व्यर्थ है ?

तत्र 'अनचि च' (सू० ४८) इति सकारस्य द्वित्वपक्षे त्रिसकार-मपि रूपद्वयम् ।

अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामकारोपरि शर्षु च पाठ-

ननु लोपपक्षे एव द्वित्वेन द्विसकारस्य सिद्धत्वात् 'समः सुटि' इति व्यर्थम् ? इत्यत आह—त्रिसकारकमपीति । 'स्कोः' (८ । २ । २९) इति लोपस्तु न; अस्यासिद्धत्वात् । पुनर्द्वित्वेन त्रिसकारस्य सिद्धिरिति तु न युक्तम्; 'लक्ष्ये लक्षणस्य' इति न्यायात् । एतेन 'समः सुटि' (८ । ३ । ५) इत्यत्र वेति पाठेनैव पक्षे मोऽनुस्वारेण सिद्धे 'अनुनासिकात्परः' (८ । ३ । ४) इति व्यर्थमित्यपास्तम् ।

ननु रुप्रकरणे अनुस्वारानुनासिकागमौ यदि भवेतां तदा प्रातिशाख्येन विरोधः । लोपे प्रकृतिभावे च उपधारञ्जनस्य तत्र प्रतिषेधश्रवणात् । रुत्वविधावित्यर्थे तु न विरोधो रुत्वे सत्येव तयोर्विधानादिति चेन्न; प्रतिशाखं भवमिति प्रातिशाख्यसमाख्याबलात् ऋक्

समाधान—त्रिसकारकमपीति । मकार को रु करने पर द्वित्व के द्वारा तीन सकार वाला रूप भी होता है । लोपपक्ष में द्वित्व से द्विसकार का श्रवण होगा । अतः सूत्रारम्भ है ।

शंका—रुत्वविधानपक्ष में भी त्रिसकारक रूप नहीं होगा; क्यों कि 'स्कोः संयोगाद्यो-रन्ते च' इस सूत्र से संयोगादि सकार का लोप हो जाने से द्विसकारक ही रूप होगा ?

समाधान—'स्कोः संयोगाद्योः' इसकी दृष्टि में 'समः सुटि' यह सूत्र असिद्ध है । अतः सत्व की असिद्धि से लोप नहीं होगा ।

शङ्का—फिर भी रुत्व-पक्ष के समान ही लोपपक्ष में भी त्रिसकारक रूप की सिद्धि 'अनचि च' से पुनः द्वित्व करने से हो जायगी, अतः 'समः सुटि' इसका अनारम्भ ही उचित है ?

समाधान—'लक्ष्ये लक्षणं सकृदेव प्रवर्तते' इस न्याय से पुनः सकार को ही द्वित्व नहीं हो सकता । अतः त्रिसकारक रूप की सिद्धि के लिए सूत्रारम्भ सार्थक है ।

'समः सुटि वा' ऐसा सूत्र का न्यास करने से रुत्वाभावपक्ष में 'मोऽनुस्वारः' इस सूत्र से अनुस्वार हो जायगा, 'अनुनासिकात् परः' इस सूत्र की आवश्यकता नहीं है—यह कहना अयुक्त है; अनुस्वारपक्ष में त्रिसकारक रूप की सिद्धि नहीं होगी । 'समः सुटि' इससे रुत्वपक्ष में न होने से द्विसकारक ही रूप होगा । अनुस्वारपक्ष में भी त्रिसकारक रूप इष्ट है । अतः उक्त न्यास अयुक्त है ।

शङ्का—'संस्कर्ता' इसमें सकार को द्वित्व होने पर कोई वैशिष्ट्य नहीं है; क्योंकि हल् वर्ण के अनन्तर एक या अनेक हल् वर्णों के उच्चारण में विशेष का अभाव है । अतः द्वित्व से कोई अन्तर नहीं पड़ता ?

समाधान—इसके स्वीकार करने पर 'शरः खयः' इस वार्तिक का आरम्भ ही व्यर्थ हो जायगा । खय् से परवर्ती शर् या शर् से परवर्ती खर् को इस वार्तिक से द्वित्व होता है । अतः वार्तिकारम्भ से यह सिद्ध होता है कि एक और अनेक व्यञ्जनों के उच्चारण में विशेष[1] है ।

१. **हिन्दी वाले विशेषता शब्द का प्रयोग किया करते हैं, यह उनकी भूल है । 'विशेष' का ही अर्थ 'भेद' है । पुनः भाववाचक प्रत्यय करने की क्या आवश्यकता ?**

स्योपसंख्यातत्वेननानुस्वारस्याप्यच्त्वात् । अनुनासिकवतां त्रयाणां 'शरः खयः' (वा०) इति कद्वित्वे षट् ।

अनुस्वारवतामनुस्वारस्यापि द्वित्वे द्वादश । एषामष्टादशानां तकारस्य द्वित्वे वचनान्तरेण पुनर्द्वित्वे चैकतं द्वितं त्रितमिति चतुःपञ्चाशत् । अणोऽनुनासिकत्वेऽष्टोत्तरं शतम् ॥

ननु व्यञ्जनात्परस्यैकस्यानेकस्य वोच्चारणे विशेषाभावोऽत आह—अनुनासिकवतामिति । तत्रोच्चारणे विशेषाभावकल्पने इदं वचनं व्यर्थमेव स्यादिति भावः ।

हयवरट्-सूत्रभाष्योक्ते शर्षूपसंख्याने फलमाह–अनुस्वारवतामिति । अपिना कस्य सङ्ग्रहः, लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तेः ? आह—वचनान्तरेणेति । 'यणो मयः' (वा०) इत्यनेन । एकस्यैव शास्त्रस्य पुनः प्रवृत्तौ हि स न्याय इति भावः ।

सम्बन्धितच्छाखापरमिदम् । व्याकरणशास्त्रं तु सर्वसाधारणम् । तस्मात् प्रातिशाख्योक्तनियमः तच्छाखाविषयः । तथा च अत्रेत्यस्य रुप्रकरणे इत्येवार्थः । अतएव = तस्य तच्छाखामात्रविषयकत्वादेव । समग्र एतत् प्रातिशाख्यनियमः तच्छाखामात्रविषयः । यद्येवमिष्टं न स्यात्, तदा समादिषु सत्वविधानं कथं भाष्यकृतां संगच्छेत ! सत्वे अनुस्वारादीनामप्रवृत्तिप्रसङ्गात् । रुत्वपक्षे च अनुनासिकस्य आपत्तिरपि नोक्ता भाष्यकृता । अन्यथा सत्त्वविधानस्य अनुनासिकाभावरूपं कथनीयं स्यात् । एतेन = त्रिसकारकरूपासिद्धिदोषेण ।

ननु व्यञ्जनात् परस्य एकस्यानेकस्य वा व्यञ्जनस्य उच्चारणे विशेषाभावात् पुनर्द्वित्वकल्पनं नोचितमत आह—**इदं वचनमिति** । 'शरः खयः' इति वचनवैयर्थ्यापत्त्या अनेकस्य व्यञ्जनस्योच्चारणे विशेषोऽस्त्येव इति स्वीकारात् ॥

'हयवरट्' इस सूत्र के भाष्य में अयोगवाह, अनुस्वार, विसर्ग, जिह्वामूलीय, उपध्मानीय और यम का अट् और शर् प्रत्याहार में पाठ किया है। उनमें से 'शर्' प्रत्याहार में अयोगवाह के पाठ का फल प्रदर्शन **अनुनासिकवताम्**—इत्यादि से करते हैं। शर् प्रत्याहार में अनुस्वार का पाठ रहने से 'अनचि च' सूत्र से अनुस्वार को द्वित्व सिद्ध होता है। अनुस्वार शर्प्रत्याहारान्तर्गत होने से यर् प्रत्याहार में भी गृहीत होता है। यदि एक और अनेक व्यञ्जनों के उच्चारण में कोई विशेष नही है तो शर् प्रत्याहार के अन्तर्गत अयोगवाह का पाठ क्यों किया ?—यह शङ्का अनुत्तरित रह जाती है। परम मूल में 'अपि' शब्द ककार द्वित्व का संग्राहक है। लक्ष्ये लक्षण न्याय से 'अनचि च' इस सूत्र के द्वारा तकार के द्वित्व की प्राप्ति न होने से 'यणो मयो द्वे वाच्ये' इससे द्वित्व किया गया है। वचनभेद से एक ही द्वित्वकार्य हो सकता है। एक से ही दुबारा कार्य नही हो सकता। उक्त न्याय का यही तात्पर्य है।

'संस्कर्त्ता'—इसमें तीन तकार का रूप कहा गया है। 'अचो रहाभ्यां द्वे' इस सूत्र से तकार को 'यणो मयो द्वे वाच्ये' इस वार्तिक से भी तकार को द्वित्व की प्राप्ति है। 'अनचि च' इस सूत्र में 'यणो मयो द्वे वाच्ये' इस वार्तिक का पाठ होने से वार्तिक परत्रिपादी है। अतः 'अचो रहाभ्यां' इस सूत्र की दृष्टि में असिद्ध होने से इसकी प्रवृत्ति पूर्व में होती है। इस सूत्र

१३९. पुमः खय्यम्परे । ८ । ३ । ६ । अम्परे खयि पुम्शब्दस्य रुः स्यात् । व्युत्पत्तिपक्षे 'अप्रत्ययस्य' (सू० १५५) इति षत्वपर्युदासात् ≍क≍पयोः प्राप्तौ, अव्युत्पत्तिपक्षे तु षत्वप्राप्तौ 'संपुंकानाम्' (वा०) इति सः । पुँस्कोकिलः, पुंस्कोकिलः । पुँस्पुत्रः, पुंस्पुत्रः ।

पूर्वत्रासिद्धत्वेन पूर्वद्वित्वस्य पूर्वप्रवृत्त्या तेन द्वितीयस्य साधुत्वे बोधिते तदनन्तरं परद्वित्वप्रवृत्त्या तयोर्मध्ये पुनरन्यस्य साधुत्वं बोध्यते इति त्रितस्य निर्वाहो बोद्धचः । 'अनचि च' (८ । ४ । ४७) इत्यत्र 'यणो मयः' (वा०) इत्यस्योपसंख्यानात् 'अचो रहाभ्याम्' (८ । ४ । ४६) इत्यतस्तस्य परत्वं बोद्धचम् ॥

पुमः खय्यम् (८ । ३ । ६)। अम्पर इति बहुव्रीहिः । ≍क≍ पयोरिति । कुप्वोः' (८ । ३ । ३७) इति सूत्रविधेययोरित्यर्थः । 'इदुदुपधस्य' (८ । ३ । ४१) इति सूत्रेऽप्रत्ययस्येत्यस्य प्रत्ययावयवभिन्नस्येत्यर्थादिति भावः । अव्युत्पत्तीति । तत्पक्षे प्रकृति-प्रत्ययविभागाभावादिति भावः । षत्वेति । इदमनुनासिकपक्षे । अनुस्वारपक्षे तु 'कुप्वोः'

पुमः खय्यम्परे ॥ **अम्पर** इति । अम् परो यस्मात् इति बहुव्रीहिः । **अप्रत्ययस्येति** । अत्र प्रत्ययपदं प्रत्ययावयवे लाक्षणिकम् । तथा च प्रत्ययावयवसम्बन्धिभिन्नस्य विसर्ग-स्येत्यर्थोऽप्रत्ययस्येत्यस्यार्थो लभ्यते । अतएव 'कविभिः कृतम्' इत्यत्र विसर्गस्य प्रत्ययस्य भिसोऽवयवस्य सकारस्य सम्बन्धिनो विसर्गस्य न षत्वम् । संस्कर्तेत्यत्र अनुस्वारे अव्यु-त्पत्तिपक्षे 'इदुपधस्य' इति षत्वं न प्राप्नोति, अनुस्वारस्य अयगोवाहान्तर्गततया अचि पाठात् तेन व्यववधानात् उकारोपधत्वाभावेन षत्वाप्राप्त्या 'कुप्वोः≍क≍पौ च' इत्यस्य प्रवृत्तिर्वाच्या—**अनुस्वारपक्षे इति** । एवञ्च मूले—**षत्वप्राप्तौ** इत्यस्य षत्वस्यापि प्राप्तौ इत्यर्थो वक्तव्यः ॥

द्वारा दूसरे तकार के साधुत्व का बोधन होता है। इसके अनन्तर 'यणो मयो' इसके द्वारा उन दोनों तकारों के मध्य अन्य तीसरे तकार के साधुत्व का प्रतिपादन होता है। इस प्रकार तकारत्रय के साधुत्व का निर्वाह होता है ॥

पुमः खय्यम्परे ॥ इस सूत्र के 'अम्परे' शब्द में 'अम् परो यस्मात्' इस विग्रह में बहु-व्रीहि समास है। 'पुञ्' धातु से 'डुनसुन्' प्रत्यय के द्वारा निष्पन्न पुंस् शब्द के सकार को 'इदुदुपधस्य चाप्रत्ययस्य' सूत्र की प्राप्ति नही है; क्योंकि सकार प्रत्ययसम्बन्धी है। इस सूत्र से प्रत्ययसम्बन्धी से भिन्न सकार को सत्व होता है। अतः 'कुत्वोः ≍ क ≍ पौ च' इस सूत्र से प्राप्त विधेयों को बाधकर 'संपुंकानाम्' इस वार्तिक से सत्व होता है। अव्युत्पत्तिपक्ष में प्रकृतिप्रत्यय का विभाजन न होने से प्रत्ययसम्बन्धी से भिन्न मानकर षत्व की प्राप्ति हो सकती है। यद्यपि 'कुप्वोः' इस सूत्र की दृष्टि में षत्व असिद्ध होने से 'कुप्वोः' इसकी प्रवृत्ति है, तथापि षत्व की प्राप्ति तो है। बाधित होना यह एक भिन्न विषय है।

शेखरकार का कथन है कि अनुनासिकपक्ष में 'इदुदुपधस्य च' की प्राप्ति अव्युत्पत्ति-पक्ष में हो सकती है; किन्तु अनुस्वारपक्ष में अनुस्वार से व्यवधान होने के कारण उकार उपधा में नही है, अतः षत्व प्राप्त नही होगा। ऐसी अवस्था में 'कुप्वोः' इसके बाध के लिए 'संपुंकानां' इसका आरम्भ है।

अम्परे किम् ? पुंक्षीरम् ।

खयि किम् ? पुंदासः । ख्याञादेशे न (वा०) । पुंख्यानम् ॥

१४०. नश्छव्यप्रशान् । ८ । ३ । ७ । **अम्परे छवि नकारान्तस्य पदस्य रुः स्यात् । न तु प्रशान्शब्दस्य । विसर्गः, सत्वम्, श्चुत्वम् । शार्ङ्गिंश्छिन्धि, शार्ङ्गिंश्छिन्धिः । चक्रिंस्त्रायस्व, चक्रिस्त्रायस्व ।**

पदस्य किम् ? हन्ति । 'अम्परे' किम् ? सन्त्सरुः खड्गमुष्टिः ।

अप्रशान् किम् ? प्रशान्तनोति ॥

१४१. नॄन् पे । ८ । ३ । १० । **'नॄन्' इत्यस्य रुः स्याद्वा पकारे परे ।**

(८ । ३ । ३७) **इत्यस्यैव प्राप्तिः, अनुस्वारव्यवधानेनोदुपधत्वाभावात्** । पुंक्षीरमिति । **क्षरधातोरुपधाया ईत्वेऽच्प्रत्यये क्षीरमिति भावः ॥**

नश्छव्य० (८ । ३ । ७) ॥ **'अप्रशान्' इति षष्ठ्यर्थे प्रथमा ॥**

नॄन् पे (८ । ३ । १०) ॥ **नॄनिति द्वितीयान्तानुकरणम्, षष्ठ्याः सौत्रो लुक् । नलोपस्तु सौत्रत्वान्न । एवं 'कान्' (८ । ३ । १२) इत्यत्रापि ॥**

नॄन् पे ॥ द्वितीयाविभक्त्यन्तस्य 'नॄन्' इत्यनुकरणम् । तस्य प्रातिपदिकत्वात् षष्ठी, तस्याः सौत्रत्वाल्लुकि पदान्तत्वात् नकारलोपः प्राप्तः । अत आह—**सौत्रत्वान्नेति ।**

अम्परक खय इसका प्रयोजन है—पुंक्षीरम् । 'क्षर' धातु से अच् प्रत्यय, ईत्व करने पर क्षीर शब्द की सिद्धि होती है । यहाँ खय् अम्परक नहीं है । क्, ष्—दोनों के मिलने से क्ष होता है । सकार के अम्प्रत्याहार में न होने से अम्परक खय् नहीं है । अतः 'पुमः खय्यम्परे' इस सूत्र की प्रवृत्ति नहीं हुई । घस् धातु से ईरन् प्रत्यय और किद्वद्भाव होने पर 'गमहनजनखन' सूत्र से उपधाभूत अकार का लोप होता है । इसके अनन्तर घकार को चर्त्व होने से ककार निष्पन्न होता है । ककार षकार के सम्मेलन से 'क्षीरम्' इस प्रकार की व्युत्पत्ति स्वीकार करने पर 'पुमः खय्यम्' इस सूत्र की दृष्टि में चर्त्व की असिद्धता होने से घकार की स्थिति मानी जायगी । घकार खय्-प्रत्याहारान्तर्गत न होने के कारण 'पुमः खय्यम्' प्रवृत्ति न होने से उक्त प्रयोग अम्परकत्व विशेषण देने का प्रयोजन नहीं हो सकता । अतः व्युत्पत्तिकार का निर्देश मूल में किया गया । यह ग्रन्थ का आशय है ॥

नश्छव्यप्रशान् ॥ प्रशान् के नकार को रुत्व इष्ट नहीं है । इस विवक्षित अर्थ के लिए 'प्रशान्' शब्द से षष्ठी विभक्ति का प्रयोग उचित है । अतः यहाँ षष्ठी के अर्थ में प्रथमा का निर्देश है ॥

नॄन् पे ॥ 'नॄन्' यह द्वितीयान्त का अनुकरण है । अनुकार्यानुकरण के भेद पक्ष में षष्ठी विभक्ति से निर्देश करना था । किन्तु सौत्रत्वात् विभक्ति का लुक् हो जाता है । सौत्रत्व के कारण ही नलोप भी नहीं हुआ ॥

१४२. कुप्वोः ≍क≍पौ च । ८ । ३ । ३७ । **कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः । चाद्विसर्गः ।**

येन नाप्राप्तिन्यायेन 'विसर्जनीयस्य सः' (सू०१३८) इत्यस्यापवा-

---

चाद्विसर्ग इति । 'शर्परे' (८ । ३ । ३५) **इति सूत्रात्तदनुकर्षश्च नेति भावः ।**

येन नेति । **'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधकः' इति न्यायेनेत्यर्थः । येन नेत्यादेर्यत्कर्तृकाऽवश्यप्राप्तावित्यर्थः; नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधसत्त्वात् । 'प्राप्त'**

कुप्वोः≍क≍पौ च ॥ न्यायाकारं स्फुटीकरोति–**येनेति ।** प्राप्त इत्यत्र भावे क्तः । 'येन' इत्यत्र कर्तरि तृतीया[1] । **दार्ढ्येति ।** व्यापकत्वबोधनमेव दार्ढ्यम् ।

बाधकत्वे चतुर्विधं बीजम्–तथाहि तदप्राप्तियोग्ये अचारितार्थ्यम्, तदप्राप्तियोग्येऽचारितार्थ्ये सति कृते चारितार्थ्यम्, तदप्राप्तियोग्येऽचारितार्थ्ये सति कृते अचारितार्थ्यम्, तदप्राप्तियोग्ये अचारितार्थ्ये सति अपवादशास्त्रप्रवृत्त्युत्तरमुत्सर्गशास्त्रप्रवृत्तौ अपवाद शास्त्र-प्रणयनवैयर्थ्यसम्भावना चेति ।

तत्राद्यं यथा–सम्बुद्धौ चेत्यस्य 'हल्ङ्याब्भ्यः' इति सूत्राप्राप्तिस्थले अचारितार्थ्यम्, अतः सुलोपस्य पूर्वमप्रवृत्तिलक्षणबाधेन एत्वे ततः 'एङ्ह्रस्वात्' इत्यनेन सुलोपे 'हे रमे' इत्यस्य सिद्धिः । सम्बुद्धौ चेत्येतत्प्रवृत्तियोग्यलक्ष्यघटकातिरिक्तत्वेन हल्ङ्यादिसूत्रीय-सुपदार्थे सङ्कोचात् न हल्ङ्यादिसूत्रप्रवृत्तिः ।

द्वितीयबाधबीजस्योदाहरणम् सर्वेषामिति । अत्र 'आमि सर्वनाम्नः सुट्' इत्यस्य नुट्प्राप्तिस्थले अचरितार्थस्य नुटि कृते यदागमपरिभाषया सुटः प्राप्त्या चारितार्थ्यात्

कानाम्रेडिते ॥ इस सूत्र में भी 'कान्' द्वितीयान्त का अनुकरण षष्ठी लुक् एवं नलोपा-भाव का पूर्वसूत्र के समान अनुसन्धान करना चाहिए ॥

'कुप्वोः≍क≍पौ च ॥ सूत्र में चकार से 'शर्परे विसर्जनीयः' इस सूत्र के विसर्जनीय पद का अनुकर्षण होता है ।

'येन नाप्राप्ते' इस न्याय के 'प्राप्त' पद की निष्पत्ति भाव में प्रपूर्वक आप् धातु से क्त प्रत्यय करने से होती है । 'यत्कर्तृक अवश्य प्राप्ति रहने पर जिस सूत्र का आरम्भ हैं वह आर-भ्यमाण सूत्र अवश्यप्राप्त सूत्र का बाधक होता है' न्याय का यह अर्थ है । आरब्ध सूत्र के अप्राप्ति-स्थल में आरभ्यमाण सूत्र का अचारितार्थ्य ही बाधकता का बीज है । 'विसर्जनीयस्य सः' इस सूत्र की अवश्य प्राप्ति रहने पर ही 'कुप्वोः' इसकी प्राप्ति है । अतः 'विसर्जनीयस्य सः' इसका यह अपवाद है । 'शर्परे विसर्जनीयः' इसका अपवाद से बाध नहीं होता, क्योंकि 'शर्परे' इसका अप्राप्तिस्थल जहाँ शर्परक खर् नहीं है, वहाँ चरितार्थ है । 'न अप्राप्ते' इसमें नञ्-द्वय से अर्थ किया है । न अप्राप्ते अर्थात् प्राप्ते ऐसा क्यों नहीं लिखा ? नञ्-द्वय से प्राप्ति को बाध न करने से प्राप्त में दृढ़ता आती है । इसीलिए नञ्-द्वय द्वारा बोध कराया गया ।

---

१. **'अवश्यं-शब्दस्य पर्यायवाची अवश्यशब्दोऽपि । आवश्यकाधमर्ण्ययोर्णिनिरिति निर्देशोऽसङ्गतः स्यात् । अवश्यशब्दात् 'धन्वयोपधात् वुञिति वुञि स साधुः । वुञ् च योपधत्वे एव स्यात् न तस्य मान्तत्वे ।**

वोऽयम्, न तु 'शर्परे विसर्जनीयः' (सू० १५०) इत्यस्य । तेन 'वासः क्षौमम्' इत्यादौ विसर्ग एव । नॄँ꞉पाहि, नॄ꞉पाहि, नॄँःपाहि, नॄंःपाहि, नॄन्पाहि ।

इति भावे क्तः । तदप्राप्तियोग्यविषयेऽचारितार्थ्यं हि बाधकत्वे बीजम् । तदुक्तं 'शर्पूर्वाः' (७ । ४ । ६१) इति सूत्रे भाष्ये—'शर्पूर्वा इत्येतद्धलादिःशेषस्य बाधकम्' ।

द्वितीयेन बाधबीजेन सुटा नुटो बाधः । एतदेव तक्रकौण्डिन्यन्यायस्वरूपम् ।

तृतीयबाधबीजोदाहरणं यथा—'ङेराम् नद्याम्नीभ्यः' इत्यस्य 'याडापः' इति सूत्राप्राप्तिस्थले अचरितार्थस्य कृते याटि निर्दिश्यमानस्य ङेः याटा व्यवधानादप्राप्त्या अचारितार्थ्येन 'याडापः' इत्यस्य बाधः ।

चतुर्थबाधबीजोदाहरणम्–'अतोऽम्' इत्यस्य 'स्वमोर्नपुंसकात्' इति सूत्राप्राप्तिस्थले अचरितार्थस्य अमादेशोत्तरं लुकि अमादेशवैयर्थ्येन लुको बाधः । विस्तरस्तु **परिभाषेन्दुशेखरटीकायां भूतौ** द्रष्टव्यः ।

बाध्यत्वे बीजम् बाधकत्वेन जिघृक्षितशास्त्रीयोद्देश्यदलीयविषयताविशिष्टान्यतमवद् विषयताप्रयोजकवदघटितत्वम् । वै० स्वव्यापकतावच्छेदकत्व, स्वव्यापकतावच्छेदकवैशिष्ट्याभाववत्त्वोभयसम्बन्धेन । अत्र वै० स्वव्यापकत्व, स्वव्याप्यत्वाभाववत्त्व, स्वाश्रयव्यधिकरणविषयतावृत्तित्व—एतत्त्रितयसम्बन्धेन ।

बाधकत्वेन विवक्षितं शास्त्रम्—'अकः सवर्णे दीर्घः' इति, तदीयोद्देश्यदले प्रविष्टा सवर्णाच्निरूपिता व्यवहितपूर्वत्वविशिष्टाक्पदवत्वावच्छिन्ना अक्पदनिष्ठा उद्देश्यताख्या विषयता, तद्विशिष्टा अच्निरूपिता व्यवहितपूर्वत्वविशिष्टेक्त्वावच्छिन्ना इको यणचीति शास्त्रीयोद्देश्यता, अच्निरूपिताव्यवहित-पूर्वत्वविशिष्टा अवर्णत्वावच्छिन्नोद्देश्यतैतदन्यतरत्ववद् अन्यतरविषयता, तत् प्रयोजकपदम् इक् पदम्, अकारपदञ्च, तद्घटितं शास्त्रम् इको यणचि, आद्गुण इति, तयोर्द्वयो अकःसवर्ण इत्यनेन बाधः । द्वितीयसम्बन्धवै० स्वव्यापकत्व-स्वव्याप्यत्वाभाववत्त्वयोः विषयतायाः सत्त्वेऽपि स्वाश्रयव्यधिकरणविषयता नास्ति; बाध्यबाधकयोरुभयोरपि समानाश्रयत्वात् । तथा च वैशिष्ट्याभावात् लक्षणसमन्वयः ।

'विसर्जनीयस्य सः' इत्यस्य यथा कुप्वोरिति बाधकं तथैव 'शर्परे विसर्जनीयः' इत्यस्यापि किन्न भवति ? इत्याशङ्कायामाह—**तदप्राप्तियोग्ये इति** । कुप्वोरिति सूत्रस्य 'शर्परे विसर्जनीयः' इति सूत्राप्राप्तिस्थले चारितार्थ्यात् तस्याप्राप्तिस्थलेऽचारितार्थ्यरूपबाधबीजाभावात् न्यायेन न बाधशङ्का ।

अत्रैव भाष्यस्य सम्मतिमाह—**तदुक्तमिति** । स्पर्धधातोर्लिटि 'पस्पर्धे' इत्यत्र

'शर्पूर्वाः खयः' इस सूत्र के भाष्य द्वारा उक्त न्याय के बाधकता बीज का प्रामाण्य सिद्ध किया गया है । वहाँ भाष्य का यह आशय है—'शर्पूर्वाः खयः' इस सूत्र से 'हलादिः शेषः' इसका बाध होगा । दोनों सूत्रों का विषय भिन्न-भिन्न है । एक से आदि हल् का शेष होता है; दूसरे से शर्पूर्वक रहने पर खय् (आदिभूत नहीं) का शेष होता है । अतः विषयभेद में बाध्य-

१४३. कानाम्रेडिते । ८ । ३ । १२ । **कान्नकारस्य रुः स्यादाम्रेडिते परे । 'संपुंकानाम्' (वा०) इति सः ।**

'ननु विषयभेदे कथं बाधकत्वम् । इदं तावदयं प्रष्टव्यः, यदि तन्नोच्येत किमिह स्यात्, हलादिः शेषश्चेत् ? नाप्राप्ते तस्मिन्नारम्भादिदं तद्बाधकं भविष्यति' इति । 'अजादेर्द्वितीयस्य' (६ । १ । २) इति सूत्रे भाष्येऽपि **स्फुटमेतत् ।**

न तु शर्परे इति । **न चास्य विसर्गस्य ⌣क⌣पौ दुर्वारौ, किं चास्यैव तौ स्याताम्,**

'हलादिः शेषः' इत्यनेन आदेर्हलः सकारशेषः प्राप्तः 'शर्पूर्वाः खयः' इत्यनेन शर्पूर्वकस्य खयः पकारस्य शेषेण बाधितो भवति । 'हलादिः शेषः' इत्यनेन आदेः, अनेन तु खयः— इति विषयभेदेन कथं परस्परं बाध्यबाधकभावः ? इत्याशङ्कायामाह—**इदं तावदिति । नाप्राप्ते** तस्मिन् = अवश्यं प्राप्ते 'हलादिः शेषः' इति सूत्रे, अस्यारम्भात् 'शर्पूर्वाः' इति **बाधकं भविष्यतीति** । 'अजादेर्द्वितीयस्य' इति सूत्रेऽपि अयमेवार्थः स्फुटः । तत्रापि प्रथमैकाचः 'हलादिः शेषः' इत्यस्य विषयः, द्वितीयैकाचः 'अजादेः' इत्यस्य विषयः-इति विषयभेदात् कथं बाध्यबाधकभावः ? इत्याशङ्क्य तदप्राप्तियोग्येऽचारितार्थ्यात् बाधकत्वं प्रतिपादितम् ।

ननु येननाप्राप्तिन्यायेन ⌣कः ⌣पौ तदपवादौ मा भूताम्, शर्परे 'विसर्जनीयः' इति दृष्ट्या कुप्वोरित्यस्यासिद्धत्वात् पूर्वं विसर्गे पश्चात् 'कुप्वोः' इति सूत्रेण वासः क्षौम-

---

बाधक भाव अनुपपन्न है । इसके समाधान में कहा—'शर्पूर्वाः खयः' इस सूत्र के अभाव में क्या होता ? हलादिशेष होता । 'हलादिः शेषः' की अवश्य प्राप्ति में शपूर्वाः खयः का आरम्भ है, अतः बाधक होगा । इससे उक्त न्याय से बाधकता प्रमाणित होती है ।

'अजादेर्द्वितीयस्य' इस सूत्र के भाष्य में भी इसका स्पष्टीकरण है । वहाँ प्रथम एकाच् के द्वित्व के अनन्तर 'अजादेर्द्वितीयस्य' यह द्वितीय एकाच् को द्वित्व करने से चरितार्थ होने पर भी तदप्राप्तियोग्य में अचारितार्थ्य के कारण 'अजादेः' इससे 'एकाचो द्वे' इसका बाध किया गया । इसी आशय से 'न तु शर्परे विसर्जनीयः' इत्यस्य (अपवादः इति शेषः)—ऐसा परममूल में लिखा है ।

शङ्का—यदि 'शर्परे' इसका अपवाद 'कुप्वोः' सूत्र को नहीं माना जायगा तो इससे विसर्ग होने पर 'वासः क्षौमम्' इत्यादि स्थल में 'कुप्वोः' इसकी प्राप्ति होगी । इस प्रकार 'खरवसानयोः' और 'शर्परे' इन दोनों से विहित विसर्ग को ⌣क⌣प होना चाहिये । तथा शब्दाधिकार में 'शर्परे' इस सूत्र से अनुवृत्त 'विसर्जनीय' पद इसी से विहित विसर्जनीय का ग्रहण होने से यहाँ जिह्वामूलीय और उपध्मानीय होंगे, खरवसानयोः' इससे विहित विसर्ग को नहीं । इसी का प्रतिपादन 'किञ्च' इससे किया है । 'खरवसानयोः' इसके द्वारा विहित विसर्ग को सत्व होगा । 'वृक्षस्तत्र' यह इसका उदाहरण है । सत्व की दृष्टि में 'कुप्वोः' यह सूत्र असिद्ध है । अतः सत्व से इसका बाध होता है ?

समाधान—'शर्परे' इस सूत्र की 'कुप्वोः' में अनुवृत्ति है । ⌣क⌣प के अपवादस्वरूप विसर्ग को विसर्ग हो—ऐसा अर्थ करने से उक्त आपत्ति का परिहार करना चाहिये ।

यद्वा—

१४४. कस्कादिषु च ८ । ३ । ४८ । एष्विण उत्तरस्य विसर्गस्य षः स्यात् । ≍क≍पयोरपवादः । अन्यस्य तु सः । काँस्कान्, कांस्कान् । कस्कः । कौतस्कुतः । सर्पिष्कुण्डिका । धनुष्कपालम् । आकृतिगणोऽयम् ॥

'खरवसानयोः' (८ । ३ । १५) इति विहितस्य तु एतयोरसिद्धत्वात् वात्सत्वमेव स्यादिति वाच्यम्; 'शर्परे' (८ । ३ । ३५) इति सूत्रं 'कुप्वोः' (८ । ३ । ३७) इत्यत्रानुवर्त्य शर्परयोः कुप्वोः ≍क≍ पयोरपवादो विसर्गस्थ विसर्ग इति वाक्यभेदेन व्याख्यानेनादोषात् । स्पष्टञ्चेदं भाष्ये ।

वार्त्तिके कान्ग्रहणं शक्यमकर्तुमित्याह—यद्वेति । एवं सम्ग्रहणमपि त्यक्तुं शक्यम् । पुम्ग्रहणं त्वावश्यकमेव; अनुनासिकपक्षे इणः परत्वेन षत्वापत्तेः । एष्विण इति । गणे कृतसत्वषत्वानामेव पाठादिति भावः । ≍क≍ पयोरपवाद इति । तद्विहितविसर्गस्यापीत्यपि बोद्धव्यम् । कांस्कानिति । वीप्सायां द्वित्वम् ॥

मित्यत्र ≍ क ≍ पौ किं न स्यातामित्याशङ्क्ते—न चास्येति । 'कुप्वोः' इति सूत्रे शर्परे इति सम्पूर्णं सूत्रमनुवर्त्य वाक्यभेदं कृत्वा शर्परयोः कुप्वोः विसर्गस्य विसर्ग एव नान्यत् किञ्चित् । तेन 'कुप्वो' इति न प्रवर्तते, तेन विसर्गे कृते इति भावः । न च 'शर्परे न' इत्येवं न्यासेनापि सत्वनिषेधसिद्धौ विसर्गस्थितिः स्यादेव, पुनः विसर्गस्य विसर्गविधानाय विसर्जनीयपदोपादानं व्यर्थं तदेव विसर्जनीय एव नान्यदित्यर्थकं भविष्यति—इति वाक्यभेदेन समाधानमनावश्यकमिति वाच्यम्; तथा सति बाध्यसामान्यचिन्तापक्षेण सर्वस्य निषेधेन बाधे द्वित्वस्यापि बाधापत्तेः । अतो नान्यत् कार्यमित्यस्य वक्तुमशक्यत्वात् वाक्यभेदेनैव समाधानं युक्तम् । कस्कादिगणे संस्कृतशब्दं पठित्वा संपुंकानामिति वार्त्तिकसंग्रहणमपि प्रत्याख्येयम् ।

पुं-ग्रहणं तु वार्त्तिके आवश्यकम् । अन्यथा पुंस्काम्यतीत्यादौ सर्वत्र इणः परत्वेन षत्वापत्तेः । तथा च एतदर्थं वार्त्तिकारम्भस्य आवश्यकत्वे संस्कृतशब्दस्य कस्कादिगणे पाठकरणेन संग्रहणस्य प्रत्याख्याने किं लाघवमिति चिन्तनीयम् ।

'अतः कृकमि' इत्यत एव इणोऽनुवृत्तेर्विच्छेदात् कथमिदमुक्तम्—इणः परस्य तु षः इति? अत आह—गणे इति । द्विर्वचनमिति । 'नित्यवीप्सयोः' इति द्वित्वम् ।

'संपुंकानाम्' वार्त्तिक में 'कान्' इसका उपादान करने की आवश्यकता नहीं है । कस्कादिगण में पाठ होने से 'कस्कादिषु च' इससे सत्व की सिद्धि हो जायगी । इस अभिप्राय से परमूल में यद्वा शब्द से पक्षान्तर का कथन है ।

इसी प्रकार कस्कादि मानकर संस्कर्ता इसमें भी सत्व सिद्ध होने से वार्तिक में सम् ग्रहण भी नहीं करना चाहिए । 'पुंस्कोकिलः' इसमें इण् से परवर्ती सकार का विधान है । अतः अनुनासिकपक्ष में मूर्धन्य षकार प्राप्त होगा । क्योंकि इण् से उत्तर विधीयमान आदेश से घटित प्रयोग का मूर्धन्य षकार से युक्त तथा तादृश से भिन्न दन्त्य सकार से घटित शब्दों का कस्कादिगण में पाठ किया गया है, अतः 'पुंस्कोकिल' इसका षकारघटित पाठ की कस्कादि गण में कल्पना होने से षकारघटित प्रयोग प्राप्त होगा । अतः वार्त्तिक में पुम् ग्रहण आवश्यक है,

१४५. संहितायाम् । ६ । १ । ७२ । **इत्यधिकृत्य ॥**

१४६. छे च । ६ । १ । ७३ । **ह्रस्वस्य छे परे तुगागमः स्यात् संहितायाम् । चुत्वस्यासिद्धत्वाज्जश्त्वेन दः । ततश्चर्त्वस्यासिद्धत्वात् पूर्वं चुत्वेन जः, तस्य चर्त्वेन चः । चुत्वस्यासिद्धत्वात् 'चोः कुः' (सू० ३७८) इति कुत्वं न । स्वच्छाया । शिवच्छाया ॥**

संहितायाम् (६ । १ । ७६) ॥ **संहिता च स्वारसिकार्धमात्राकालव्यवायेनोच्चारणम् । ततोऽधिकार्धमात्राकालेनोच्चारणे एतदधिकारोक्तकार्यव्यावृत्तये** इदम् । तदधिककालव्यवाये तु न साधुत्वम्; नापि बोध इष्यते इति वृद्धा इति, तेषां शास्त्रविषयतैव नेति भावः ॥

छे च (६ । १ । ७६) ॥ 'छे' इत्यकार उच्चारणार्थः, तेन 'आच्छिन्नम्' इत्यत्र तुक् । 'ह्रस्वस्य पिति' (६ । १ । ७१) इत्यतो ह्रस्वस्येति, तुगिति च वर्त्तते । जश्त्वेनेति । स्वशब्दे उपपदे छ्यतेः के स्वच्छशब्दो निर्मले रूढः । एवं नञ्पूर्वाच्छादयतेर्डे अच्छशब्द इति पदान्तत्वं बोद्धयम् । स्पष्टञ्चेवममरटिप्पणे ॥

'इको यणचि' इत्यतः प्रागेव संहिताधिकारे वक्तव्ये सूत्रक्रममनुरुध्य अत्राह—**संहितायामिति । स्वारसिकेति** । एकवर्णोच्चारणानन्तरमपरवर्णोच्चारणे यावान् कालविलम्बः स्वाभाविकः स एव स्वारसिकार्धमात्राकालः । **ततोऽधिकेति** । स्वारसिकार्धमात्राकालव्यवायाद् योऽधिकोऽर्धमात्राकालव्यवाय इत्यर्थः । **तदधिकेति** । स्वारसिकार्धमात्राकालव्यवायाद् योऽधिकोऽर्धमात्राकालः तदधिक इत्यर्थः ॥

छे च ॥ तुकि छकारमात्रं निमित्तं न तु अकारविशिष्टश्छकारः । तथा सति 'छिन्नम्' इत्यत्र ह्रस्वात् परत्वे तुग् न स्यात्, तदाह—**छे इति । अमरटिप्पणे इति** । श्री

क्योंकि 'कस्कादिषु च' से उसकी सिद्धि नहीं हो सकती । 'कुप्वोः' इससे विहित विसर्ग का भी 'कस्कादिषु च'' यह सूत्र अपवाद होने से बाधक है । 'कांस्कान्' में वीप्सा होने से 'नित्यवीप्सयोः'' इस सूत्र से द्वित्व है । 'संहितायाम्'' सूत्र में 'संहिता' शब्द का 'स्वाभाविक अर्धमात्राकाल के व्यवधान से उच्चारण' अर्थ है । एक वर्ण के उच्चारणानन्तर दूसरे वर्ण का उच्चारण करने में अर्धमात्राकाल का व्यवधान निश्चित है । इससे अधिक काल के व्यवधान से उच्चारण करने पर संहिता नहीं होती । इन असंहितास्थलों में कार्यों की व्यावृत्ति संहिताधिकार का फल है । अधिक काल के व्यवधान में उच्चरित शब्द की साधुता ही नहीं है । और उस प्रकार के शब्दों से शाब्दबोध भी नहीं होता—यह वृद्धों का कथन है । ऐसा उच्चारण रहने पर शास्त्रप्रवृत्तियोग्य विषयता ही नहीं है ॥

छे च ॥ इस सूत्र में 'छे' इस पद का अकार उच्चारण मात्र प्रयोजन के लिए है । छकारमात्र तुक् का निमित्त है । अकारान्त छनिमित्त नहीं है, अतएव 'अच्छिन्नम्' यहाँ पर भी तुक् सिद्ध होता है । अन्यथा छरूप आनुपूर्वी के अभाव में तुक् प्राप्ति नहीं होगी । 'ह्रस्वस्य पिति कृति तुक्' इससे 'ह्रस्वस्य' और 'तुक्' इन दोनों की अनुवृत्ति इस सूत्र में है ।

'स्वच्छाया' इसमें तुक् होने के अनन्तर श्चुत्व की असिद्धता कर जश्त्व के द्वारा द,

१४७. आङ्माङोश्च । ६ । १ । ७४ । एतयोश्छे परे तुक् स्यात् । 'पदान्ताद्वा' (सू० १४९) इति विकल्पापवादः । आच्छादयति । माच्छिदत् ।।

१४८. दीर्घात् । ६ । १ । ७५ । दीर्घाच्छे परे तुक्स्यात् । दीर्घस्यायं तुक्, न तु छस्य; 'विभाषा सेनासुराच्छाया' (सू० ८२८) इति ज्ञापकात् । चेच्छिद्यते ।।

आङ्माङोश्च (६ । १ । ७४) । **आङ्साहचर्यान्माङ्व्ययमेव ।**

दीर्घस्यायमिति । **वक्ष्यमाणज्ञापकाद् व्याख्यानाद्वा दीर्घादिति षष्ठ्यर्थे पञ्चमीति भावः । एओङ्-सूत्रभाष्ये ध्वनितमेतत् ।** चेच्छिद्यते इति । **तुको हलादिःशेषस्तु न, अभ्याससञ्ज्ञाप्रवृत्तिकाले स्थानिद्वारा साक्षाद्वा सन्निहितानां हलामेव तेन निवृत्तेः । अत एव 'नुगतो' (७ । ४ । ८५) इत्यादि चरितार्थम् ।**

भट्टोजिदीक्षितपुत्रेण शब्दरत्नकृतो हरिदीक्षितस्य पित्रा श्रीभानुजिदीक्षितेन रचिते टिप्पणे ।

दीर्घात् ।। वक्ष्यमाणेति । 'सेनासुराच्छायाशालानिशानाम्' इति सूत्रे च्छायेति निर्देशरूपाद् ज्ञापकात् दीर्घस्य तुग्, नतु छकारस्य । अन्यथा छकारस्य तुगागमे तकारस्य खर्त्वात् 'खरि च' इति चर्त्वापत्त्या छकारो न श्रूयेत इति । **ध्वनितमिति ।** 'एओङ्' सूत्रे भाष्ये 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते' इति पक्षे 'आलूय' इत्यत्र 'ह्रस्वस्य' इति तुकमामाशङ्क्य 'छे च' इत्यनेनैव दीर्घस्थलेऽपि तुकः सिद्धया पदान्तादेवेत्यस्य वैयर्थ्यात् ज्ञापकम् । न दीर्घावयवस्य ह्रस्वत्वप्रयुक्तस्तुक् । तेन दीर्घस्यैव तुक् भवतीति ध्वन्यते ।

तदनन्तर श्चुत्व से जकार; इसके अनन्तर चर्त्व से चकार होता है—यह प्रक्रिया है । 'स्व' उपपद 'छो' धातु से क प्रत्यय से निष्पन्न 'स्वच्छ' शब्द है ।

निर्मल अर्थ में इसकी रूढि है । तुक् स्वशब्द का अन्त्यावयव है । अतः पदान्त होने से जश्त्व होता है । इसी प्रकार नञ्पूर्वक 'छो' धातु से क प्रत्यय से अच्छशब्द निर्मित होता है । दोनों उदाहरणों में तुक् पदान्त है । अतः जश्त्व होता है । इसकी सिद्धिप्रक्रिया अमरकोश की सुधा टीका में स्पष्ट है ।।

आङ्माङोश्च ।। इस सूत्र में माङ् शब्द आङ् साहचर्य के कारण अव्ययरूप ही गृहीत होता है । 'माङ् माने' इसमें निर्दिष्ट मा धातु से क्विप् प्रत्यय द्वारा निष्पन्न मा का 'छन्दः' पद के साथ समभिव्याहार करने पर 'माच्छन्दः' यहाँ नित्य तुक् नहीं हुआ ।।

दीर्घात् ।। इसमें षष्ठी के अर्थ में पञ्चमी है । अतः तुगागम दीर्घ को होता है । दीर्घ से उत्तर छ को नहीं । उक्तार्थ में 'सेनासुराच्छाया' इस सूत्र का निर्देश प्रमाण है, अन्यथा छकार को तुक् होने पर चर्त्व के द्वारा दो चकार का, अथवा छकार के अनन्तर चकार का श्रवण होना उचित होता । परन्तु ऐसा सूत्र में निर्देश नहीं है । अतः दीर्घ को तुक् होना प्रमाणित होता है । यहाँ ज्ञापक से 'निर्देश' का तात्पर्य से है । यदि 'सेनासुराच्छाया' इस सूत्र में 'पदान्ताद्वा' इससे तुक् हुआ है तो 'दीर्घात्' इसके अर्थ का निर्णायक उक्त निर्देश नहीं हो सकता ।

प्रमाणान्तर का उपन्यास है—**व्याख्यानादिति** । 'ए ओ ङ्' इस सूत्र का भाष्यव्याख्यान प्रमाण है । वर्णग्रहण से वर्णैकदेश का भी ग्रहण मानने पर 'आलूय' इसमें दीर्घ ऊकार का अंशभूत

१९४. पदान्ताद्वा ६ । १ । ७६ । दीर्घात् पदान्ताच्छे परे तुग्वा स्यात् । लक्ष्मीच्छाया, लक्ष्मीछाया ॥

॥ इति हल्सन्धिप्रकरणम् ॥

दीर्घात्पदान्तादिति । पदान्तस्य दीर्घस्येत्यर्थः । योगविभागोऽनयोः 'एओङ्' (मा० सू० ३) इति सूत्रे भाष्ये स्पष्टः । दीर्घान्तस्य पदस्येत्यर्थेन सिद्धेऽन्तग्रहणं पदान्तविधित्वमस्य, न पदविधित्वमिति बोधनद्वारा समर्थपरिभाषानुपस्थित्यर्थम् । तेनासामर्थ्येऽप्यस्य प्रवृत्तिरिति समर्थसूत्रे कैयटः ॥

॥ इति हल्सन्धिप्रकरणम् ॥

योगविभाग इति । "यर्त्तार्हि योगविभागं करोति । इतरथा 'दीर्घात् पदान्ताद् वा' इत्येव ब्रूयात्" इत्युक्तम् । समर्थेति । विभक्ति प्राग्भागस्यानुकरणमिदम् । तेनेति । 'तिष्ठतु कुमारीच्छत्रं मैत्रस्य' इत्यादौ असमर्थेऽपि तुक् सिद्धम् ॥ इति हल्सन्धिः ॥

ह्रस्व उकार को 'ह्रस्वस्य पिति' इस सूत्र से तुगागम की शङ्का का "यदि दीर्घावयव को ह्रस्व मानकर तुक् होगा तो 'छे च' इसी से दीर्घ में भी तुक् सिद्ध हो जाने से 'दीर्घात् यह सूत्र 'दीर्घावयव ह्रस्व को तुक् नहीं होता'—इस प्रकार का ज्ञापन करता है"—इत्यादि भाष्य से स्पष्ट समाधान हो जाता है कि दीर्घ को ही तुक् होता है।

अभिनवचन्द्रिकाकार की उक्ति तो 'तस्मिन्' 'तस्मात्' इन दोनों परिभाषा की प्रवृत्ति गौरवग्रस्त और भाष्यसमर्थित न होने से चिन्तनीय है। तदुक्त अर्थ किसी ने नहीं माना है।

शङ्का—'चेच्छिद्यते' में तुगागमानन्तर 'हलादिः शेषः' से उसकी निवृत्ति होनी चाहिए ?

समाधान—अभ्याससंज्ञाप्रवृत्ति के समय साक्षात् यथा 'पपाच' इसमें पच् पच् इसका हल् च् स्थानी द्वारा का उदाहरण 'चकार' इसमें 'उरत्' इससे रपरसहित अकार के होने से स्थानी द्वारा सन्निहित रेफ हल् की निवृत्ति होनी है। तुक् आगम है। अतः स्थानी द्वारा या साक्षात् सन्निहित नहीं होने से 'हलादिः शेषः' इस सूत्र से तुक् की निवृत्ति नहीं हुई। इसीलिए 'नुगतो' से विहित नुक् चरितार्थ होता है। अन्यथा 'जङ्गम्यते' इत्यादि स्थल में नुगागम की 'हलादिः शेषः' सूत्र द्वारा निवृत्ति हो जाने से तुगागम-विधान व्यर्थ हो जायगा ॥

पदान्ताद्वा ॥ इस सूत्र में अनुवृत्त 'दीर्घात्' और निर्दिष्ट 'पदान्तात्' दोनों का षष्ठ्यन्त रूप से विपरिणाम कर 'पदान्तस्य दीर्घस्य'—ऐसा समझना चाहिए। एं ओङ् सूत्र के भाष्य में इन दोनों सूत्रों का योगविभाग स्पष्ट रूप से निर्दिष्ट है।

शङ्का—दीर्घशब्द को पद का विशेषण मानने से तदन्त का लाभ हो जाता है। एवञ्च दीर्घान्त पद को तुक् विधान का लाभ हो जाने से 'पदान्तात्' में अन्तग्रहण व्यर्थ है।

समाधान—अन्तपदोपादान से यह विधि पदान्तोद्देश्यक है, पदोद्देश्यक नहीं। इसका स्पष्ट बोधन होता है। अन्त-पदोपादान न करने पर पदोद्देश्यक विधि की सम्भावना से 'समर्थः पदविधिः' इस सूत्र के समर्थ में ही प्रवृत्ति का नियन्त्रण होने से 'तिष्ठतु कुमारीच्छत्रं चैत्रस्य' इसमें तुक् नहीं होगा, क्योंकि 'कुमारी' इसका 'तिष्ठतु' और 'छत्र' का 'चैत्र' के साथ अन्वय होने से सामर्थ्य नहीं है। यह विषय 'समर्थ' सूत्र के कैयट में स्पष्ट है॥ ॥ इति हल्सन्धिः ॥

अथ विसर्गसन्धिप्रकरणम्

'विसर्जनीयस्य सः' (सू०१३८)। विष्णुस्त्राता ॥

१५०. शर्परे विसर्जनीयः । ८ । ३ । ३५ । **शर्परे खरि विसर्जनीयस्य विसर्जनीयः, न त्वन्यत् । कः त्सरुः । घनाघनः क्षोभणः । इह यथायथं सत्वं जिह्वामूलीयश्च न ॥**

१५१. वा शरि । ८ । ३ । ३६ । **शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात् । हरिः शेते, हरिश्शेते ।**

'खर्परे शरि वा विसर्गलोपो वक्तव्यः' (वा०) । राम स्थाता, रामः स्थाता । हरि स्फुरति, हरिः स्फुरति । पक्षे विसर्ग सत्वे च त्रैरूप्यम् । 'कुप्वोः ≍क≍ पौ च' (सू० १४२) । क≍ करोति, कः करोति । क≍खनति, कः खनति । क≍ पचति, कः पचति । क≍ फलति, कः फलति ॥

विसर्जनीयस्य सः (८ । ३ । ३४) ॥ **प्राग्व्याख्यातमपि विसर्जनीयपदानुवृत्तिप्रदर्शनाय स्मारितम् ॥**

'शर्परे' इति बहुव्रीहिः । विशेष्यश्चावध्यवधिमतोः साजात्याद्विसर्जनीयाक्षिप्तः खरेव । विसर्गस्य विसर्गविधौ फलमाह—न त्वन्यदिति । **अन्यदेव विवृणोति**—इहेति ॥

त्रैरूप्यमिति । **विकल्पद्वयसामर्थ्यादिति भावः ॥**

पुनरुक्ततां परिजिहीर्षुराह—**प्रागिति** । 'शर्परे' इत्यत्र शर्परो यस्मादिति बहुव्रीहिर्नतु कर्मधारयः, परग्रहणसामर्थ्यात् । अन्यथा शरीत्येव ब्रूयात् । **विशेष्येति** । बहुव्रीहिणा अन्यपदार्थस्य लाभात् खरेव शर्परत्वेन विशेष्यः । यथा अवधिमान् भावरूपस्तथैव अवधिरपि भावरूप एव ग्राह्यः । तथा च वर्णानामभावरूपस्यावसानस्य विसर्जनीयपदाक्षिप्तस्याऽपि विशेष्यतया नान्वयः; तस्य अभावरूपत्वात् अवधिमतः शरो भावरूपत्वात् । अतः शर्परत्वेन खर एव विवक्षणात् । तदाह—**खरीति** ।

विसर्जनीयस्य सः ॥ इस सूत्र का व्याख्यान पूर्व प्रकरण में किया जा चुका है । यहाँ पुनः व्याख्या 'शर्परे विसर्जनीयः' इसमें विसर्जनीय पद की अनुवृत्ति प्रदर्शन के लिए की गयी है । 'शर्परे' इस पद में 'शर्परो यस्मात्' इस विग्रह में बहुव्रीहि समास है । पञ्चम्यर्थ में बहुव्रीहि होने से यत् पदार्थ खर् विशेष है । परत्वविशिष्ट शर् विशेषण है । अवधिमान् (जिसकी अवधि कही जाती है) शर् है । अतः अवधि भी वर्णात्मक ही होनी चाहिये । 'अवसान' अभावरूप है । इसलिए उसको अवधि नहीं कहा गया । इसी कारण से सूत्र का 'शर्परक खर्'—ऐसा अर्थ किया गया, अवसान को शर् की अवधि नहीं कही गयी । विसर्ग को विसर्ग करने का प्रयोजन कार्यान्तर की व्यावृत्ति है । इसीलिए 'कुप्वोः' इसको प्रवृत्ति नहीं हुई । 'इह' इत्यादि से परममूल में इसी अर्थ का विवरण है । दो विकल्प से रूपत्रय होता है ।

१५२. सोऽपदादौ । ८ । ३ । ३८ । **विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः परयोः ।**

'पाशकल्पककाम्येष्विति वाच्यम्' (वा०) । पयस्पाशम् । यशस्कल्पम् । यशस्कम् । यशस्काम्यति ।

'अनव्ययस्येति वाच्यम्' (वा०) । प्रातः कल्पम् ।

'काम्ये रोरेवेति वाच्यम्' (वा०) । नेह—गीः काम्यति ॥

सोऽपदादौ (८ । ३ । ३८) अपदाद्योरिति । **सूत्रे सौत्रत्वादेकवचनम् ।**

अनव्ययस्येति । **अत्राव्ययीभावातिरिक्ताव्ययस्यैव ग्रहणम्; व्याख्यानात् । तेन 'उपपयस्काम्यति' इत्यादौ सत्वसिद्धिरिति स्पष्टम् 'अव्ययीभावश्च' (१ । १ । ४१) इत्यत्र भाष्ये ।** गीः काम्यतीति । **'वाः काम्यति' इत्यस्याप्युपलक्षणमिदम् ॥**

सोऽपदादौ । सूत्रे इति । तथा च सूत्रे एकवचनान्तप्रयोगस्य साधुत्वेऽपि अन्यत्र विशेष्यानुरोधाद् द्विवचनान्तमेव युक्तम्, अतः परममूले अपदाद्योरित्युक्तम् । **अत्रेति ।** अव्ययीभावसमासस्यापि अव्ययसंज्ञा उक्तेति तस्यापि अव्ययपदेन ग्रहणं प्राप्तम्, परं व्याख्यानाद् अव्ययीभावस्यात्र वार्त्तिके अव्ययपदेन न ग्रहणम् । व्याख्यानञ्च अव्ययीभावस्याव्ययत्वे प्रयोजनत्वेन लुङ्मुखस्वरोपचाराः—इत्येव परिगणितं भाष्यकृता इत्येतन्मूलकम् । 'खित्यनव्ययस्य' इत्यनेन अनव्ययस्य मुमोर्विधानात् 'उपकुम्भंमन्यः' इत्यत्राव्ययीभावस्याव्ययत्वात् मुमागमो न स्यादतः परिगणनं कृतम् । परिगणने उपचारशब्देन विसर्गस्थानिकः सकारो गृह्यते । तेन 'उपपयःकार' इत्यत्र 'अतः कृकमिकंस' इत्यनेन सत्वं न ।

वस्तुतस्तु अत्रानुत्तरपदस्थत्वाभावादेव सत्वाप्राप्तौ उपचारग्रहणं परिगणने नावश्यकम् ।

'काम्ये रोरेवेति' वार्त्तिकस्य प्रयोजनं यथा गीः काम्यति, तथैव वाः काम्यतीत्यपि बोध्यम् । वार्-शब्दो जलवाची । आकारोपधस्याप्युपलक्षणं परममूलोक्तं गीः काम्यतीति । 'इणः षः' इत्यत्रापि एष नियमः आश्रित इति तत्सूत्रे एव सोदाहरणं वक्ष्यते **शेखरे ।** 'इणः षः' इति सूत्रार्थमग्रे प्रदर्शयिष्यमाणस्यात एव तदर्थमजानतश्छात्रस्य कृते 'इणः षः' इत्यस्य उदाहरणं प्रागेव प्रदर्शितमिति न कथमपि बुद्धिमुपारोहति । तस्मात् तदुदाहरणं सोऽपदादावित्यस्यैव—इत्याशयेन उपलक्षणतया व्याख्यानं युक्तमेव । ग्रन्थसम्मेलकयुक्तिसम्भवे तदनुगमस्यैवौचित्यात् ॥

सोऽपदादौ ॥ एतत्सूत्रघटक अपदादि कवर्ग और पवर्ग में विशेषण होने से 'अपदाद्योः'—ऐसा निर्देश होने से एकवचनान्त भी साधु है । 'अनव्ययस्य' इस वार्तिक से अव्ययसम्बन्धी विसर्ग सत्व का निषेध किया है । परन्तु अव्ययीभावसमास भी अव्यय है । इसके विसर्ग को सत्व इष्ट होने से एतद् अतिरिक्त अव्यय का वार्तिक में ग्रहण है । अव्ययीभाव को अव्ययसंज्ञा करने का प्रयोजन लुक् मुख स्वर और उपचार—ये ही भाष्यकार ने लिखे हैं । सत्वव्यावृत्तिप्रयोजन नहीं दिया । एतद्रूप व्याख्यान उक्तार्थ में प्रमाण है । अव्ययीभाव का अव्यय में यहाँ नहीं होने का फल 'उपपयस्काम्यति' इसमें सत्व की सिद्धि है । 'गीः ! काम्यति' 'वाः काम्यति' का भी

१५३. इणः षः । ८ । ३ । ३९ । इणः परस्य विसर्गस्य षकारः स्यात् पूर्वविषये । सर्पिष्पाशम् । सर्पिष्कल्पम् । सर्पिष्कम् । सर्पिष्काम्यति ॥

इणः षः (८।३।३९)। **'इदुदुपधस्य' (८।३।४१) इत्यस्यासिद्धत्वात् 'सर्पिष्पाशम्' इत्यादौ सत्वनिवृत्त्यर्थं, 'गीष्पाशम्', दोष्कल्पम्' इत्याद्यर्थञ्चेदम् ।**

अत्रानव्ययस्येति, अपदादाविति, काम्ये इति च सम्बद्धचते । तेनोच्चैःकल्पम्, दोः पश्य, गीः काम्यतीत्यादौ षत्वं न । अत एवात्र प्रकरणे सर्वत्र सत्वमेव विधेयमिण उत्तरस्य विसर्गस्थानिकसस्यानेन षत्वमिति भाष्योक्तपक्षान्तरं सङ्गच्छते ।

विसर्जनीयस्थानिकेत्युक्त्या 'पुँस्पुत्रः' इत्यादौ न दोषः । तत्र हि मस्थानिकः सः । अत्र विसर्जनीयस्येत्यनुवृत्त्यैतदर्थलाभः । अनव्ययस्येत्यादि त्वत्र पक्षेऽत्र न सम्बद्धचते ।

इणः षः ॥ ''सोऽपदादौ'' इत्येतद्दृष्ट्या इदुदुपधस्येति परत्रैपादिकत्वेनासिद्धत्वात् प्राप्तसत्वस्य व्यावृत्त्यर्थं गीष्पाशम्; दोष्कल्पमित्यादौ ह्रस्वेकारोकारोपधत्वाभावात् तस्याप्राप्तौ षत्वविधानार्थं सूत्रमिदम् । **अत एवेति ।** एषु षत्वस्य अनिष्टत्वादेव । अन्यथा भाष्यकृत्पक्षान्तरे 'उच्चैः कल्पम्' 'गीः काम्यति' इत्यादौ 'सोऽपदादौ' इत्यनेन सत्वाभावेन 'इणः षः' इत्यस्याप्राप्त्या षत्वाभावस्यैव लाभः । 'इणः षः' इत्यस्य स्वातन्त्र्येण षत्वविधानपक्षे अनव्यय, काम्ये, रोरेवेत्यादि त्रयाणामत्रासम्बन्धे षत्वस्य लाभ इति फलभेद आपद्येत । अतोऽपि तेषां त्रयाणां सम्बन्धेन षत्वाभाव एव एष्टव्यः । **स इति ।** सकार इत्यर्थः । **अत्र पक्षे इति ।** भाष्योक्तपक्षान्तरे अत्रेति । 'इणः षः' इति सूत्रे । तेन

उपलक्षण है । 'आपः स्त्री भूम्नि वार्वारि' (१-९-३) इस अमरकोश के प्रमाण से वार् शब्द जलवाची है ॥

इणः षः ॥ **शंका**— इस सूत्र के न रहने पर भी 'इदुपधस्य चाप्रत्ययस्य' इससे सर्पिष्पाशम् इत्यादि स्थल में षत्व की सिद्धि हो जाने से सूत्रारम्भ व्यर्थ है ?

समाधान—'सोऽपदादौ' की दृष्टि में 'इदुदुपधस्य' यह सूत्र असिद्ध है । अतः 'सोऽपदादौ' से प्राप्त सत्व की व्यावृत्ति के लिए इस सूत्र का आरम्भ षत्वविधानार्थ सार्थक है । एवं 'गीष्पाशं, दोष्कल्पम्' यहाँ ह्रस्व इकार उपधा में न होने से 'इदुदुपधस्य' की प्राप्ति भी नहीं है । अतः सत्व की प्राप्ति के वारणार्थ भी इसकी आवश्यकता है ।

इस सूत्र में 'अनव्ययस्य', 'अपदादौ' तथा 'काम्ये रोरेवेति वाच्यम्' इन तीनों का सम्बन्ध है । अतएव उच्चैः कल्पम्, दोः पश्य, गीः काम्यति—इत्यादि स्थलों में षत्व नहीं होता ।

अतएव = उक्त तीनों के सम्बन्ध स्वीकार करने से ही, भाष्योक्त पक्षान्तर की सङ्गति होती है । इस उपप्रकरण में सत्व का विधान है । इण् से परवर्ती विसर्गस्थानिक सकार को इस सूत्र के द्वारा षकार का विधान है । ऐसा पक्षान्तर का स्वरूप है । यदि प्रथम पक्ष में उक्त तीनों का सम्बन्ध नहीं होता तो स्वतन्त्र रूप से षत्वविधानपक्ष में अव्ययादि में पदादि का भी ग्रहण होने से विसर्ग को षत्व प्राप्त होता है । पक्षान्तर में 'सोऽपदादौ' इसकी प्राप्ति अव्यय पदादिविधि, एवं काम्य में रु सम्बन्धी रेफ के नियम से सकार न होने कारण 'इणः षः' इस सूत्र से षत्व भी नहीं होगा । इस प्रकार दोनों पक्षों में फलभेद है । प्रथम पक्ष में उक्त तीनों का सम्बन्ध

१५४. **नमस्पुरसोर्गत्योः । ८ । ३ । ४० । गतिसंज्ञयोरनयोर्विसर्गस्य सः कुप्वोः परयोः । नमस्करोति ।**

तेन 'द्विष्कृतम्' 'दुष्काम्यति' इत्यादौ षत्वसिद्धिः । गीः काम्यतीत्यादौ सकाराभावादेव न दोषः ।

'अपदादौ' इति च न सम्बद्धयते । तेन 'दुष्करोति' इति षत्वसिद्धिः । परन्त्वयं पक्षोऽसङ्गतः; उत्तरसत्वस्यासिद्धत्वेन 'निष्कृतम्' इत्यादौ षत्वासिद्धेः । 'प्रकरणे प्रकरणमसिद्धं न योगे योगः' इति पक्षस्तु नास्त्येव; ज्ञापकासम्भवादिति 'उपसर्गादसमासेऽपि' (८ । ४ । १४) इत्यत्र निरूपयिष्यामः ।

विसर्जनीयस्यैव षत्वमिति मूलोक्तपक्षे तु सकारषकारयोः स्वरितत्वेऽपि यथायोगं सम्बन्धो मण्डूकप्लुत्येत्यन्यत्र विस्तरः ॥

नमस्पुर० (८ । ३ । ४०) । **इत उत्तरमपदादाविति न सम्बद्धयते; व्याख्यानात् ।**

द्विष्कृतमित्यत्र 'द्विस्त्रिः' इति सत्वे दुष्काम्यतीत्यत्र 'इदुदुपधस्य' इति सत्वे अनेन षत्वं सिध्यति । वस्तुतस्तु भाष्योक्तं पक्षान्तरं न युक्तम्; सत्वस्यासिद्धत्वेन निष्कृतमित्यादौ षत्वानापत्तेः । न च प्रकरणदृष्ट्या प्रकरणमसिद्धं भवति, न तु सूत्रापेक्षया तत्प्रकरणस्थमेव सूत्रान्तरमिति वाच्यम्; अत्रार्थे मानाभावात् ।

यत्तु **टिप्पणीकृत्** न्यासान्तरेण शेखरग्रन्थं खण्डयितुं प्रार्वातिषि, तत्तु 'नानपेक्षित-

---

आवश्यक है । विसर्ग के स्थान में निष्पन्न सकार को इस सूत्र से सत्व मानने से 'पुंस्पुत्रः' में षत्व नहीं हुआ; क्योंकि मकार के स्थान में यहाँ सत्व होता है । इस प्रकार के अर्थ का लाभ विसर्जनीय पद की अनुवृत्ति द्वारा होता है ।

दूसरे पक्ष में अर्थात् सकार को षत्वविधानपक्ष में उक्त तीनों का सम्बन्ध नहीं है । इसीलिए 'दुष्करोति' 'दुष्काम्यति' में 'द्विस्त्रिश्चतुः' इस सूत्र के द्वारा विहित सकार को इससे षत्व सिद्ध होता है; क्योंकि अपदादि का सम्बन्ध नहीं है ।

किन्तु भाष्योक्त दूसरा पक्ष युक्तियुक्त नहीं है । 'निष्कृतम्' इसमें 'इदुदुपदस्य' इस सूत्र से विहित सत्व के 'इणः षः' इसकी दृष्टि में असिद्ध होने से सकार के अभाव में मूर्धन्य षकार न होने के कारण उक्त प्रयोग की असिद्धि हो जायगी ।

शङ्का—यदि ऐसा कहें कि सूत्र की दृष्टि में सूत्र असिद्ध नहीं होता; किन्तु प्रकरण की दृष्टि में प्रकरण की असिद्धता होती है, अतः उक्त दोनों उदाहरण षत्वप्रकरण के हैं, इसलिए इदुदुपधस्य यह असिद्ध नहीं होगा ?

समाधान—प्रकरण की दृष्टि में प्रकरण असिद्ध होता है—यह नियम प्रमाणाभाव से अग्राह्य है । विशेष विवेचन 'उपसर्गादसमासेऽपि णोपदेशस्य' इस सूत्र के व्याख्यानस्थल में किया जायगा । यद्यपि दोनों के विधेय सत्व और षत्व में भेद है, फिर भी कवर्ग और पवर्ग की निमित्तता में समानता है । अतः दोनों सूत्र एक प्रकरण के हैं ।

'विसर्ग को षत्व होता है'—इस मूलोक्त पक्ष में स और ष इन दोनों में स्वरितत्व की प्रतिज्ञा है । लक्ष्यानुसार मण्डूकप्लुति से दोनों का उत्तरसूत्रों में सम्बन्ध होगा ॥

'नमस्पुरसोर्गत्योः ।। इसमें तथा इसके आगे के सूत्रों में 'अपदादौ' का सम्बन्ध नहीं है ।

साक्षात्प्रभृतित्वात्कृञो योगे विभाषया गतिसंज्ञा । तदभावे—नमः करोति ।

'पुरोऽव्ययम्' (सू० ७६८) इति नित्यं गतिसंज्ञा । पुरस्करोति । अगतित्वान्नेह—पूः, पुरौ, पुरः प्रवेष्टव्याः ॥

१५५. इदुदुपधस्य चाप्रत्ययस्य । ८ । ३ । ४१ । **इकारोकारोपधस्याप्रत्ययस्य विसर्गस्य षः स्यात् कुप्वोः । निष्प्रत्यूहम् । आविष्कृतम् । दुष्कृतम् ।**

साक्षात्प्रभृतित्वादिति । **ऊर्यादित्वाद् गतित्वम् । स्वरादिपठितस्य तु गतित्वाभावः, तेन साक्षात्प्रभृतिषु च्व्यर्थवचनेऽपि न क्षतिरित्यन्ये ॥**

इदुदुपधस्य चाप्रत्ययस्य (८ । ३ । ४१) । अप्रत्ययस्येति पर्युदासो लाघवात् । तत्र प्रत्ययपदं तत्सम्बन्धिपरम्, तेन प्रत्ययसम्बन्धिभिन्नस्येत्यर्थः । अत एव 'कविभिः कृतम्' इत्यादौ न षत्वम् । स्पष्टञ्चेदं भाष्ये इत्यन्यत्र विस्तरः ।

मुच्यते' इति **मल्लिनाथेनैव** दूषितम् । यथास्थितपाठमाश्रित्य प्रवृत्तो ग्रन्थो नान्यथाकारं प्रकल्प्य दूषणीयतां भजते । अन्यथा बहुत्र बहूपप्लवः स्यात् ॥

इदुदुपधस्य चाप्रत्ययस्य ॥ अप्रत्ययस्य इति । अत्र प्रसज्यप्रतिषेधस्वीकारे असमर्थसमासो वाक्यभेदादिश्च कल्पनीयौ स्यातान्? अत आह—**पर्युदास** इति । अत्रेति । पर्युदासे । वायुः करोतीत्यादौ व्यपदेशिवद्भावेन सोः सकारस्य प्रत्ययसम्बन्धित्वमुपपादनीयम् ।

यद्यपि मूल में इसके उत्तर 'अपदादि' की अनुवृत्ति नहीं होती—ऐसा प्रतिपादन किया है, तथापि 'इतः आरभ्य' इसका उपलक्षण मानना चाहिए। इससे लक्ष्यमूलक व्याख्यान ही प्रमाण है। 'नमस्करोति' इसमें 'साक्षात्प्रभृतीनि च' इस सूत्र से गतिसंज्ञा च्व्यर्थ न होने से प्राप्त नहीं है। इससे गतिसंज्ञा च्वि के अर्थ में ही 'च्व्यर्थ इति वाच्यम्' इस वार्तिक के अनुसार होती है। अतः इसको ऊर्यादिगणपठित मान कर 'ऊर्यादिच्विडाचश्च' इससे गतिसंज्ञा होने से 'नमस्पुरसोर्गत्योः' इस सूत्र से सत्व होता है।

शङ्का—साक्षात्प्रभृतिगण में पाठ होने से विकल्प से गतिसंज्ञा होती है। तथा च पक्ष में गति के अभाव से सत्व न होने पर 'कुप्वोः' सूत्र की प्रवृत्ति होती है। यदि 'ऊर्यादि' इससे नित्य गतिसंज्ञा होगी तो पाक्षिक 'नमः करोति'—यह प्रयोग सिद्ध नहीं होगा।

समाधान—'नमः' इसको क्रिया का सम्बन्ध रहने पर द्योतक और क्रिया का सम्बन्ध न रहने पर 'शिवाय नमः' इत्यादि स्थल में वाचक माना जाता है। अतः वाचक 'नमः' जिसका स्वरादि गण में पाठ है, उसको गतिसंज्ञा क्रियायोगाभाव से नहीं होती। इससे 'नमः करोति' इत्यादि की सिद्धि हो जायगी। अतः ऊर्यादित्वात् गतिसंज्ञा है।

यह मत **शेखरकार** का है। 'नमः करोति' इसमें वाचक नमः इसका प्रयोग है। वाचक नमः इसको ऊर्यादि मान कर गति संज्ञा नहीं होती। किन्तु द्योतक नमः को संज्ञा का विधान है। अथवा 'नमः करोति' यह प्रयोग असाधु है। अतः नित्य गतिसंज्ञा होने पर कोई क्षति नहीं है। ऐसा **विषमीकार** का कहना है ॥

इदुदुपधस्य चाप्रत्ययस्य ॥ इस सूत्र में अप्रत्ययस्य (प्रत्यय सम्बन्धि से भिन्न) पर्युदास के द्वारा लाघवमूलक व्याख्यान उचित है।

अप्रत्ययस्य किम् ? अग्निः करोति । वायुः करोति ।

'एकादेशशास्त्रनिमित्तकस्य न षत्वम् । कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात्' (वा०) । तेनेह न—मातुः कृपा ।

'मुहुसः प्रतिषेधः' (वा०) । मुहुःकामा ॥

एकादेशशास्त्रेति । **एकादेशशास्त्रसम्पन्नरेफस्थानिकत्वेन विसर्जनीयस्यैकादेशशास्त्रनिमित्तकत्वं बोद्धव्यम्।** स्पष्टं चेदमत्र सूत्रे, 'उरण् रपरः' (१।१।५१) इति सूत्रे च भाष्ये इत्यन्यत्र विस्तरः ।

प्रत्ययभिन्नसम्बन्धिन इति तु **नार्थः**, 'अग्निः करोति' इत्यादावपि **प्रत्ययभिन्न समुदायसम्बन्धित्वेन षत्वापत्तेः । तपरकरणं किम् ? गीः करोति । उपधाग्रहणं व्यर्थम्; 'उपधाग्रहणं न करिष्यते, इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः'** इति **हयवरट्-सूत्रभाष्योक्तेः** ।

स्पष्टञ्चेदमिति । प्रत्ययलोपसूत्रे 'प्रत्ययस्य लुक्' इति सूत्रात् प्रत्ययस्येत्यस्यानुवृत्त्या सिद्धे आद्यप्रत्ययग्रहणं 'प्रत्ययावयवेऽपि प्रत्ययत्वस्य व्यवहारः' इति ज्ञापयति । तथा च प्रत्ययावयवोऽपि प्रत्यय एवेत्येतन्मूलकमेव प्रत्ययसम्बन्धिपरत्वेन व्याख्यानम् ।

स्पष्टञ्चेदमत्र सूत्रे इति । "इह कस्मान्न भवति–पितुः करोति, अप्रत्ययस्येति षत्वं प्राप्नोति ? अप्रत्ययविसर्जनीयस्येत्युच्यते, प्रत्ययविसर्जनीयश्चायम्, लुप्यतेऽत्र प्रत्ययविसर्जनीयः, 'रात्सस्य' इति" इत्युक्तम् । अधिकं **शब्दरत्नेऽवधेयम्** ।

प्रत्ययभिन्नार्थकाप्रत्ययपदस्य तत्सम्बन्धिनि लक्षणा न, तथासति अग्निः करोतीत्यत्रापि प्रत्ययभिन्नत्वात् समुदायस्य सम्बन्धिनो विसर्गस्य षत्वापत्तेस्तदाह—**प्रत्ययभिन्नेति** । 'इदुदुपधस्य' इत्यत्र तपरकरणेन दीर्घेकारोपधे गीः करोति इत्यादौ न षत्वम् । 'इदुद्भ्यां परस्य विसर्गस्य' इत्येवमर्थाभ्युपगमेऽपि निर्वाहे सूत्रे उपधाग्रहणं नावश्यकम् ।

प्रत्यय पद की प्रत्ययसम्बन्धी में लक्षणा है । अतः 'कविभिः कृतम्' में षत्व नहीं हुआ । अन्यथा विसर्ग प्रत्ययावयव के स्थान में होने से प्रत्ययरूप नहीं है । अतः षत्व की आपत्ति हो जाती है । प्रत्ययसम्बन्धी से भिन्न कहने पर विसर्ग प्रत्ययसम्बन्धी होने से 'इदुदुपधस्य इसकी प्रवृत्ति नहीं हुई । यह भाष्य में स्पष्ट है ।

'मातुः कृपा' इसमें विसर्ग को प्राप्त षत्व की व्यावृत्ति के लिए एकादेशशास्त्रनिमित्तक विसर्ग को षत्व नहीं होता—इस प्रकार का ज्ञापन है । इसका एकादेशशास्त्र से सम्पन्न जो रेफ उसके स्थान में विसर्ग होने से विसर्ग को परम्परा से एकादेशशास्त्रनिमित्तक कहा गया ! इसी सूत्र के भाष्य में—'पितुः करोति' इसमें षत्व क्यों नहीं होता ? अप्रत्यय बिसर्ग नहीं है, किन्तु बिसर्ग प्रत्यय है । इसके अनन्तर प्रत्यय का 'रात्सस्य' इससे लोप हो जाने से यहाँ का विसर्ग प्रत्यय भिन्न है"—इत्यादि स्पष्ट है ।

'प्रत्यय से भिन्न सम्बन्धी विसर्ग'—ऐसा अर्थ विवक्षित नहीं है । अन्यथा 'अग्निः करोति' इसमें प्रत्ययभिन्न अग्नि तत्सम्बन्धी विसर्ग के होने से षत्वापत्ति हो जायगी । तपरकरण से

१५६. तिरसोऽन्यतरस्याम् । ८ । ३ । ४२ । **तिरसः सो वा स्यात् कुप्वोः । तिरस्कर्ता, तिरः कर्ता ॥**

१५७. द्विस्त्रिश्चतुरिति कृत्वोऽर्थे । ८ । ३ । ४३ । **कृत्वोऽर्थे वर्तमानानामेषां विसर्गस्य षकारो वा स्यात् कुप्वोः । द्विष्करोति, द्विः करोति इत्यादि ।**

तिरसोऽन्यतरस्याम् (८ । ३ । ४२) । **अत्र गतिग्रहणं नानुवर्त्तते; पराभवे तिरस्कारशब्दप्रयोगात् । अन्तर्धाविव तिरसो गतित्वात् ॥**

द्विस्त्रि० (८ । ३ । ४३) । **'कृत्वोऽर्थे' इति न विसर्गविशेषणं चतुःशब्देऽसम्भवात्, किन्तु द्विरादीनामित्याह**—वर्तमानानामेषामिति । **'इसुसोः' (८ । ३ । ४४) इति सूत्रवक्ष्यमाणरीत्या 'सुचः' इति सूत्रयितुमुचितम्, सुजन्तान्तस्य पदस्येत्यर्थात् ।**

अयोगवाहानामविशेषेण पाठः कर्त्तव्यः । एतत् फलं विसर्जनीयसन्निधानेऽपि उपधासंज्ञासिद्धिः । तत इदुदुपधस्य विसर्गस्य षत्वं सिद्धं भवतीत्यभिधाय तत्फलखण्डनाय 'उपधाग्रहणमेव न करिष्यते'—इत्यादिप्रसङ्गे तदुक्तम् ।

तिरसोऽन्यतरस्याम् ॥ अत्र सूत्रे गतिग्रहणानुवृत्तौ पराभवार्थके तिरस्कारशब्दे सत्व न स्यात् । "तिरोऽन्तर्द्धौ" इति सूत्रेण अन्तर्धाविव गतिसंज्ञायाः विधानात्, इष्यते चोभयत्र सत्वम् । 'परिभावः तिरस्क्रिया" (अ० को० १-७-२२) इति कोशात् परिभवोऽनादरोऽप्यस्यार्थः प्रसिद्धः ॥

द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ॥ 'कृत्वोऽर्थे' इत्यस्य विसर्गविशेषणत्वे 'चतुष्करोति' इत्यत्र षत्वं न स्यात् । 'द्वित्रिचतुर्भ्यः सुच्' इत्यनेन सुचि चतुर्स् इत्यवस्थायां 'रात्सस्य' इत्यनेन सकारलोपे चतुरो रेफस्य विसर्गस्थानित्वेन कृत्वोऽर्थसम्बन्धिविसर्गस्य चतुःशब्दे

ह्रस्वेकार, ह्रस्वोकार के उपधा में रहने पर इसकी प्रवृत्ति होती है । अतः इससे 'गीः करोति' में षत्व नहीं हुआ । इकार और उकार से परवर्ती विसर्ग को षत्व का विधान स्वीकृत कर उपधा ग्रहण का 'हयवरट्' सूत्र के भाष्य में प्रत्याख्यान किया गया है ॥

तिरसोऽन्यतरस्याम् ॥ यहाँ गति पद की अनुवृत्ति नहीं है । अतः पराभव अर्थ में प्रयुक्त तरस्कार शब्द सत्वघटित साधु होता है । गतिग्रहणानुवृत्ति-पक्ष में 'तिरोऽन्तर्धौ' इस सूत्र से, तरोधान अर्थ में ही तिरस् को गतिसंज्ञा का विधान है । तिरस्कार में गतिसंज्ञा के न होने से सत्व नहीं होगा ॥

द्विस्त्रिश्चतुरिति ॥ एतत्सूत्रघटक कृत्वोर्थ विसर्ग में विशेषण होने से 'कृत्वोऽर्थसम्बन्धी विसर्ग'—इसप्रकार का अर्थ होगा । 'चतुष्करोति' इसमें चतुर् शब्द के रेफसम्बन्धी विसर्ग होने से षत्व नहीं होगा । चतुर् शब्द में कृत्वोऽर्थसम्बन्धी विसर्ग कहीं भी न मिलने से असम्भव हो जायगा । इसलिए 'कृत्वोऽर्थ में विद्यमान द्वित्रिचतुर्'—इस प्रकार का अर्थ किया गया ।

लाघवात् 'द्विस्त्रिश्चतुरिति कृत्वोऽर्थे' इसके स्थान पर 'सुचः' ऐसा सूत्र करना चाहिए । प्रत्यय ग्रहणे इस परिभाषा से तदादि–विशेष्यक तदन्तविधि से सुजन्त तदादि का लाभ होगा । पद को

कृत्वोऽर्थे किम् ? चतुष्कपालः ॥

चतुष्कपाल इति । **'इदुदुपधस्य'** (८ । ३ । ४१) **इति नित्यं षः, चतुःशब्दोऽव्युत्पन्न इति अप्रत्ययस्येति पर्युदासो न । अत एव 'चतुष्पाद्भ्यो ढञ्'** (४ । १ । १३५) **इत्यादिनिर्देशाः सङ्गच्छन्ते । 'चतुष्पञ्चाशत्'** इत्यत्रापि षत्वं भवत्येव ।

न चेदुदुपधस्य सस्य यो विसर्ग इति हयवरट्-सूत्रभाष्योक्तेः कथमत्र षत्वमिति **वाच्यम्; विसर्गस्य** पाठाभावेनोपधात्वासम्भवात्तत्स्थानिनिमित्तमुपधात्वं **ग्राह्यमिति** भाष्यतात्पर्यात् । अत एव **'समः सुटि'** (८ । ३ । ५) इति सूत्रे भाष्ये **'सम्पुङ्कानाम्'** (वा०) इत्यनेन **रुविधिरेवास्त्वित्याशङ्क्य 'पुंस्कामा'** इत्यत्र **षत्वापादनं सङ्गच्छते ।**

असम्भवात्, तथा च द्वित्रिचतुरित्यस्य विशेषणं तदाह—**कृत्वोऽर्थं इति । वक्ष्यमाणेति ।** न च प्रत्ययग्रहणपरिभाषया तदन्तलाभे सुजन्तस्येत्येवमर्थाभ्युपगमे परद्विष्करोतीत्यादौ सूत्रप्रवृत्तिर्न स्यात् परमसहितस्य तस्य तदादितदन्तत्वविरहादिति वाच्यम्, 'वनो र च' इत्यादाविव पदं विशेष्यमादाय पुनस्तदन्तविधौ सुजन्तान्तेत्यर्थलाभेन दोषाभावात् । इदुदुपधस्य सस्य यो विसर्ग इत्यर्थे चतुष्कपाल इत्यादौ षत्वं न प्राप्नोति; तत्र विसर्गस्य रेफस्थानिकत्वादित्यत आह—**विसर्गस्येति** । सपदं विसर्गस्थानिनः उपलक्षकम् । तद्द्वारा उपधात्वं बोध्यम् । एवंविधव्याख्याने प्रमाणमाह—**अत एवेति** । पुंस्कामेत्यत्र इदुदुपधस्येत्यनेन षत्वापादनं भाष्यकृतां संगच्छते । अन्यथा मकारस्थानिकत्वेन विसर्गस्य षत्वापादानासङ्गतिः स्यात् ।

विशेष्य मानकर पुनः तदन्तविधि होने से सुजन्तान्त पद इस प्रकार के अर्थ से 'द्विष्करोति', 'परमद्विष्करोति' इत्यादि की सिद्धि हो जायगी । अत पूर्वोक्त न्यास युक्त है । विशेष्यान्तर के रहने पर भी तदादि शब्दस्वरूप को विशेष्य मानकर लक्ष्यानुरोध से तदन्तविधि होती है । इसका निरूपण आगे करेंगे ।

परममूल कृत्वोऽर्थग्रहण का फल में **चतुष्कपालः** दिया है । यहाँ 'इदुदुपधस्य च' इससे षत्व होता है ।

शङ्का—'चतेरुरन्' इस औणादिक सूत्र से चत् धातु से उरन् प्रत्यय के द्वारा चतुर् शब्द की सिद्धि होती है । इस प्रत्ययसम्बन्धी विसर्ग के होने से षत्व नहीं होना चाहिए ?

समाधान—चतुः शब्द अव्युत्पन्न प्रातिपदिक होने से अप्रत्यय पर्युदास की प्रवृत्ति नहीं हुई । इसमें 'चतुष्पाद्भ्यो ढञ्' यह निर्देश प्रमाण है । अन्यथा षत्व से निर्देश अनुपपन्न हो जायगा । 'चतुष्पञ्चाशत्' इसमें षत्व होता ही है ।

शंका—'हयवरट्' इस सूत्र के भाष्य में इकारोपध, उकारोपध जो सकार तत्सम्बन्धी विसर्ग को षत्व का विधान किया है । ऐसी अवस्था में चतुष्कपालः इसका विसर्ग रेफ के स्थान में होने से सकारस्थानिक नहीं है, अतः षत्व प्राप्त नहीं है ?

समाधान—इकारोप धत्व उकारोपधत्व विसर्ग के विशेषण स्वीकार करने पर विसर्ग का अल् प्रत्याहार में पाठ न होने से 'अलोन्त्यात् पूर्व उपधा' इस सूत्र से उपधासंज्ञा नहीं होगी । अतः विसर्ग का उपधात्व स्वस्थानी के द्वारा ग्रहण करना चाहिए—इस अर्थ में भाष्य का तात्पर्य है । स्थानी, सकार ही विवक्षित नहीं है ।

न च कृत्वोऽर्थे विद्यमानस्य पदस्येदुदुपधस्य यो विसर्ग इत्यर्थान्न 'पञ्चकृत्वः करोति' इत्यादौ दोषोः, नापि 'चतुष्करोति' इत्यादावव्याप्तिरिति द्विस्त्रिश्चतुरिति व्यर्थमिति वाच्यम्; कृत्वोऽर्थे इत्यस्यासिद्धत्वेन चतुःशब्दे 'इदुदुपधस्य' (८ । ३ । ४१) इति नित्यषत्वापत्तेः । 'प्रकरणे प्रकरणमसिद्धम्' इति पक्षस्तु 'उपसर्गादसमासेऽपि' (८ । ४ । १४) इति सूत्रे कैयटे, 'पूर्वपदात्' (८ । १ । १३) इति सूत्रे भाष्ये च दूषित एव । 'उपसर्गात्' (८ । ३ । १०३) इति सूत्रे चोपपादयिष्यते । किञ्च पूर्वत्रेति पूर्वशब्देन प्रकरणग्रहणेऽव्यवहितप्रकरणे एव त्रिपाद्यसिद्धत्वं स्यात्, न सम्पूर्णसपादसप्ताध्याय्याम् । किञ्चास्याधिकारत्वात्प्रतिसूत्रमुपस्थित्या प्रतियोगमसिद्धत्वं दुर्वारमित्यन्यत्र विस्तरः ॥

कृत्वोऽर्थे इत्यस्येति । यथान्यासे चतुग्रहणसामर्थ्येन 'इदुदुपधस्य' इति सूत्रं बाधित्वा द्विस्त्रिश्चतुरिति सूत्रम् प्रवर्तते । अस्मिन् न्यासे तु चतुश्शब्दस्य सूत्रे स्वरूपेणोपादानाभावेन द्विष्करोतीत्यादौ सूत्रस्य चारितार्थ्येन तत्र विसर्गस्य प्रत्ययसम्बन्धित्वेन 'इदुदुपधस्य' इत्यस्याप्राप्त्या चतुष्करोतीत्यत्र नित्यषत्वदृष्ट्या द्विस्त्रिरित्यस्यासिद्धत्वेन नित्यषत्वापत्तेरिति भावः ।

सूत्रे कैयटे इति । 'प्रकरणे प्रकरणमसिद्धम्' इति पक्षस्तु 'उपसर्गादसमासेऽपि' इति सूत्रे कैयटे, 'पूर्वपदात्' इति सूत्रे भाष्ये च दूषित एव ॥

अतः 'संपुंकानाम्' इस वार्त्तिक से मकार के रुत्वविधानपक्ष में 'पुंस्कामा' इसमें भाष्योक्त षत्वापादन संगत होता है । अन्यथा सकारस्थानिक विसर्ग न होने से षत्वापादन सङ्गत कैसे होगा !

शङ्का—इस सूत्र में 'कृत्वोऽर्थे' इतना ही करना चाहिए । 'पदस्य' एवं 'इदुदुपधस्य' इनकी अनुवृत्ति है । 'कृत्वोऽर्थे' में विद्यमान जो इकारोकारोपध विसर्ग, उसको षत्व होता है—इस प्रकार अर्थ करने से 'पञ्चकृत्वः करोति' इसमें इकारोकारोपधत्व के विरह से ही षत्व की व्यावृत्ति सिद्ध है । इसी प्रकार द्विष्करोति, चतुष्करोति इत्यादि में इस सूत्र की प्रवृत्ति होने से अव्याप्ति भी नहीं है । अतः 'द्विस्त्रिचतुर्' का उपादान व्यर्थ है ?

समाधान—'चतुष्करोति' इसमें 'इदुदुपधस्य' की दृष्टि में 'कृत्वोऽर्थे' इसकी असिद्धता होने से नित्य षत्व होगा । विकल्प षत्व की इष्टसिद्धि नहीं होगी । द्विष्करोति, त्रिष्करोति में सुच् प्रत्यय होने से विसर्ग प्रत्ययसम्बन्धी है, अतः 'इदुदुपधस्य'की प्राप्ति न होने के कारण 'कृत्वोऽर्थे' के चरितार्थ होने से अपवाद नहीं होगा ।

'प्रकरणे प्रकरणम् असिद्धम्'—यह वचन स्वीकार्य नहीं है, क्योंकि 'उपसर्गात्' इस सूत्र के कैयट एवं 'पूर्वपदात् संज्ञायामगः' इस सूत्र के भाष्य में उक्त वचन का खण्डन किया है । प्रकरण की दृष्टि में प्रकरण की असिद्धता मानने से अव्यवहित पूर्व त्रिपादी प्रकरण का 'पूर्वत्रासिद्धम्' इसमें पूर्वशब्द से ग्रहण होने से प्रकरणान्तरस्थ त्रिपादी एवं समग्र सपाद सप्ताध्यायी की दृष्टि में इसकी असिद्धता नहीं होगी ।

और भी दोष हैं । 'पूर्वत्रासिद्धम्' यह अधिकारसूत्र है । प्रतिसूत्र में इसकी उपस्थिति होने से 'इदं पूर्वत्रासिद्धम्' इस प्रकार प्रत्येक सूत्र की असिद्धता होगी ॥

१५८. इसुसोः सामर्थ्ये । ८ । ३ । ४४ । **एतयोर्विसर्गस्य षः स्याद्वा कुप्वोः । सर्पिष्करोति, सर्पिः करोति । धनुष्करोति, धनुः करोति ।**

इसुसोः (८ । ३ । ४४) । **अत्रेसुसोः प्रातिपदिकावयवयोर्ग्रहणम् । तेन 'पेचुः काष्ठैः', 'सख्युः पाकः', 'कविभिः कृतम्' इत्यादौ षत्वं न; 'नित्यं समासे' (८ । ३ । ४५) इति सूत्रोदाहरणे समासविषये तयोरेव सम्भवेनार्थाधिकारानुरोधात्, साहचर्याच्च । इसुसन्तपदावयवविसर्गस्येत्यर्थः; पदस्येत्यधिकारात् ।**

न च प्रत्ययग्रहणपरिभाषया 'परमसर्पिष्करोति' इत्यादौ षत्वानापत्तिरवयवस्येसुसन्तत्वेऽपि 'उत्तरपदत्वे च' इति निषेधेनापदत्वादिति वाच्यम्; अनुत्तरपदस्थस्येति

इसुसोः सामर्थ्ये ॥ "नित्यं समासे" इति सूत्रे समासपदोपादानेन सुप्तिङ्भिन्नयोः प्रातिपदिकावयवयोरेव इसुसोः सम्भवेन अर्थाधिकारबलात् उभयत्र सूत्रे इसुसोः समानरूपत्वस्य युक्तत्वात् प्रातिपदिकावयवोरेव तयोर्ग्रहणम् । एवमुत्तरसूत्रे सुप्तिङ्भिन्नयोरेव तयोः सम्भवेन तत्साहचर्याच्च तादृशयोरेव इसुसोर्ग्रहणमिहापीत्याह—**अत्र सूत्रे** इति ।

न च प्रत्ययग्रहणपरिभाषया तदादेरुपस्थित्या यस्मात् प्रत्ययो विधीयते तदादि-तदन्तस्यैव इसन्तोसन्तपदेन ग्रहणात् परमसर्पिष्करोतीत्यादौ यद् इसन्तं तदादि सर्पिः तत्पदेन उत्तरपदस्य पदत्वे कर्तव्ये 'उत्तरपदत्वे चापदादिविधौ' इति वार्त्तिकेन प्रत्यय-लक्षणस्य प्रतिषेधात् यद्धि पदं परमसर्पिः तद् इसन्तं तदादिनेति न प्राप्नोतीति वाच्यम्; तदादिशब्दरूपं विशेष्यमादाय तदन्तविध्युत्तरं पदं विशेष्यमादाय पुनस्तदन्तविधौ इसुसन्तान्तपदस्येत्यर्थेन इसन्तं सर्पिः, तदन्तं पदं परमसर्पिरिति षत्वं सिद्धम् । अन्यथा 'नित्यं समासे' इति 'अनुत्तरपदस्थस्य' इत्यनेन उत्तरपदस्थस्य प्रतिषेधो व्यर्थः स्यात् । तत्र उक्तरीत्या इसन्तस्योसन्तस्य च पदत्वाभावात् विशिष्टस्य (पदद्वयात्मकस्य) च इसन्तत्वमुसन्तत्वं वा नास्तीति स्वतः उत्तरपदस्थे सूत्राप्रवृत्त्या तत्र वारणाय अनुत्तर-पदस्थस्येति व्यर्थं ज्ञापयति—सत्यपि विशेष्यान्तरे शब्दरूपं विशेष्यमादाय तदन्तविधिः । अतएव 'वनो र च' इत्यत्र वन्नन्तादित्यर्थलाभः इत्याशयेनाह—**अनुत्तरपदस्थस्येति ।**

इसुसोः सामर्थ्ये ॥ इस सूत्र में इस् उस् प्रातिपदिकावयव ही गृहीत होता है । इसीलिए 'सख्युः पाकः' इत्यादि मूलोक्त उदाहरणों में षत्व नहीं हुआ । इसमें युक्तिप्रदर्शन करते हैं— 'नित्यं समासेऽनुत्तरपदस्थस्य' इस सूत्र में इस् तथा उस् की अनुवृत्ति इस सूत्र से है । 'नित्यं समासे' इस सूत्र के उदाहरणस्वरूप समस्त सर्पिष्कुण्डिका आदि में इस् उस् प्रातिपदिकावयव ही मिलता है । क्योंकि समास में विभक्ति का लुक् हो जाने से इस् उस् विभक्तिस्थ नहीं है ।

अर्थाधिकारानुरोध से यहाँ भी प्रातिपदिकावयव का ही ग्रहण होगा । पूर्व तथा उत्तर सूत्र में अनुवृत्तियोग्य पद का समान अर्थ होता है, और परस्पर साहचर्य से भी उक्तार्थ का लाभ होता है । इस् के साहचर्य से तिङ् का अनवयव उस् लिया जायगा । और उस् के साहचर्य से सुप् का अनवयव इस् लिया जाता है । इस प्रकार प्रातिपदिकावयव इस् उस् का ही ग्रहण सिद्ध होता है । 'पदस्य' इसका अधिकार होने से इसन्त उसन्त पदावयव के विसर्ग को षत्व का विधान है ।

निषेधेन क्वचिदुपात्तविशेष्यसत्त्वेपि शब्दरूपं विशेष्यमादाय तदन्तविधिज्ञापनेन शब्दरूपं विशेष्यमादाय प्रत्ययग्रहणपरिभाषया लब्धतदन्तार्थकस्य पदविशेषणतया इसुसन्तान्तस्येत्यर्थेनादोषात्। अत एव 'वनो र च' (४।१।७) इत्यादौ न दोषः। 'ब्राह्मणस्य 'सर्पिष्करोति' इत्यादौ सापेक्षत्वेनासामर्थ्यं नाशङ्क्यम्; तस्यैकार्थीभावसामर्थ्यविषयत्वात्।

'अधात्वभिहितं समानाधिकरणमसमर्थवत्' इत्युक्तेः 'सर्पिः कालकम्' इत्यादौ न षत्वम्। अधात्वभिहितमित्युक्तेः 'सर्पिष्पीयते' इत्यत्र षत्वसिद्धिः। धातुसहचरितप्रत्ययाभिहितार्थेन समानाधिकरणमसमर्थवन्नेति तदर्थः।

अत्र सूत्रे सामर्थ्यं व्यपेक्षारूपम्। तच्च यत्किञ्चित्पदविशिष्टत्वम्। वै० स्वघटितत्व, स्वप्रयोज्यविषयतानिरूपितविषयताप्रयोजकपदघटितत्व, स्वप्रयोज्यविषयतानिरूपितत्वाभाववविषयताप्रयोजकपदाघटितत्व, स्वनिष्ठशक्तिग्रहप्रयोज्यशक्तिग्रहविषयीभूतशक्तिपर्याप्त्यधिकरणत्व—इत्येतच्चतुष्टयसम्बन्धेन।

यथा ब्राह्मणस्य सर्पिष्करोतीत्यत्र व्यपेक्षारूपं सामर्थ्यं ब्राह्मणपदघटितत्वम् ब्राह्मणपदप्रयोज्यविषयतानिरूपिता या सर्पिःपदप्रयोज्या विषयता, तत्प्रयोजकं पदं सर्पिः पदं, तेन घटितत्वमपि स्वप्रयोज्यविषयतानिरूपितत्वाभाववद्विषयता पटादिविषयता तत् प्रयोजकं पदं पटपदम्, तेनाघटितत्वम्, स्वनिष्ठा या ब्राह्मणनिष्ठाशक्तिः तज्ज्ञानप्रयोज्या या शक्तिः तज्ज्ञानविषयीभूता या शक्तिः, तस्याः पर्याप्त्यनधिकरणत्वमपि वाक्यस्य तस्य। एकार्थीभावलक्षणं **टिप्पण्यां** प्रदर्शितं सरलं न व्याख्यानान्तरमपेक्षते। तथा च 'सापेक्षमसमर्थवत्' इति नियमः समासस्थले, न तु व्यस्तप्रयोगे। प्रकृते समासाभावात् नैव तद् वचनं प्रवर्तते।

नन्वेवमधात्वभिहितमित्यस्यापि समासविषयकत्वेन सर्पिः कालकमित्यत्र[1] विकल्प षत्वापत्तिरत आह—**अधात्विति**। अस्य वचनस्य समासव्याससाधारण्यात् असमस्तस्थलेऽपि असामर्थ्यप्रत्यायकत्वेन सामर्थ्याभावेन षत्वाप्राप्तेः। अधात्वभिहितमित्यस्य धातुप्रकृतिकप्रत्ययभिन्नाभिहितं सामानाधिकरण्यमसमर्थवदित्यर्थः। तेन 'सर्पिष्पीयते' इत्यत्र षत्वं सिध्यति। अत्र धातुना न कर्मत्वमभिहितम्, किन्तु प्रत्ययेन। अत उक्तं—**धातुसहचरितेति**। प्रसज्यप्रतिषेधेन व्याख्यानं फलितार्थप्रदर्शनं न तु तथा इष्टम्। पर्युदासेन व्याख्याने लाघवम्, तच्च प्रदर्शितम्।

शंका—इस् उस् के प्रत्यय होने से 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्' इस परिभाषा के बल से जिससे इस् उस् का विधान होता है उस तदादि तदन्त के ग्रहण होने से 'परमसर्पिष्करोति' इसमें षत्व नहीं होगा; क्योंकि सर्पिः इसन्त तदादि है। परमसर्पिः तदादि तदन्त नहीं है। यद्यपि सर्पिः इसन्त तदादि है; किन्तु 'उत्तरपदत्वे च' इससे प्रत्ययलक्षण का प्रतिषेध होने से पदत्व नहीं है?

समाधान—तदादिविशेष्यक तदन्तविधि के अनन्तर पदविशेष्यक पुनः तदन्तविधि होने से इसन्तान्त उसन्तान्त पद—ऐसा अर्थ करने से 'परमसर्पिः' इसन्तान्त पद होने से षत्व हो जायगा। विशेष्यान्तर पद के रहने पर भी तदादिविशेष्यक तदन्तविधि होती है। अतएव 'वनो र च'

---

१. 'जङ्गुलः कालकः पिप्लुः' (२।६।४९), इत्यमरः देहगतकृष्णवर्णचिह्नस्य कसुनेति ख्यातस्य नाम।

सामर्थ्यमिह व्यपेक्षा ।

सामर्थ्ये किम् ? तिष्ठतु सर्पिः, पिब त्वमुदकम् ।।

यदा तु सर्पिरादिकमव्युत्पन्नं प्रातिपदिकं पाणिनेरुणादिष्वव्युत्पत्तिपक्ष एवेति 'आयनेयीनी०' (७।१।२) इति सूत्रे भाष्ये स्पष्टमुक्तेः। तत्र हि 'शङ्कः' इत्यादावादेशानाशङ्कय 'उणादीनां प्रतिषेधो वक्तव्यः' 'प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेः सिद्धम्' 'अयामन्ताल्वाय्येत्न्विष्णुषु' इति सूत्रं व्याकरणान्तररीत्यैव, 'सर्वनामस्थानम्' इति महासञ्ज्ञावत् ।

अत एव भाष्ये—**'उणादयोऽव्युत्पन्नानि' इत्येवोक्तम्, न तु 'अनेकार्था अपि धातवः इतिवदव्युत्पन्नानि' इत्युक्तम्, तदा 'इदुदुपधस्य' (८।३।४१) इति नित्ये षत्वे प्राप्तेऽनेन विकल्प इति प्रत्ययग्रहणाभावात्तत्परिभाषानुपस्थितेः 'परमसर्पिष्करोति' इत्यादौ षत्वविकल्पः सिद्धः; 'नित्यं समासे' (८।३।४५) इति सूत्रमनुत्तरपदस्थस्येति प्रतिषेधार्थम् । नित्यग्रहणं तु न कर्त्तव्यमेव; समासे नित्यषत्वस्य 'इदुदुपधस्य' (८।३।४१) इत्येव सिद्धेः। 'सर्पिषा' इत्यादौ षत्वं त्वत्र पक्षे 'क्वचिदन्यदेव' इत्यर्थकाद् बहुलग्रहणादिति स्पष्टं भाष्ये ।**

व्यपेक्षेति । **व्याख्यानात् । एकार्थीभावसामर्थ्यग्रहणे 'परमसर्पिः कुण्डिका' इत्यादौ समासे विकल्पापत्तिः । अनुत्तरपदस्थस्येति निषेधादुत्तरसूत्रस्य न प्रवृत्तिरिति भावः ।**

नन्वनेनैव सिद्धे कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठो व्यर्थः ? इत्यत आह—

ते पदप्रयोज्या या कर्मत्वनिष्ठा विशेष्यता तन्निरूपिता अभेदसम्बन्धावच्छिन्ना या सर्पिःपदप्रयोज्या प्रकारता तादृशप्रकारताप्रयोजकत्वस्य सर्पिःपदे सत्त्वेऽपि तद्विशेष्यताया धातुप्रकृतिकप्रत्ययप्रयोज्यत्वेन प्रयोज्यत्वाभावस्याभावेन नासामर्थ्यमिति ध्येयम् ।

'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इति पक्षाश्रयणे इदुदुपधस्येति नित्ये षत्वे प्राप्ते अनेन षत्वं विकल्प्यते। परमसर्पिष्करोतीत्यादेरपि द्वितीयतदन्तविधिं विनैव सिद्धिः; इसुसोः प्रत्ययत्वाभावेन प्रत्ययग्रहणपरिभाषया तदादेरित्यस्यानुपस्थित्या सर्पिषः इव परमसर्पिषोऽपि इसन्तत्वात् विकल्पषत्वस्य सिद्धेः। 'नित्यं समासे' इति सूत्रे नित्यग्रहणं न कर्तव्यम्; समासे उत्तरपदस्थस्य षत्वनिषेधार्थं तत् सूत्रम्, न तु समासे षत्वविधानार्थम्: तत्र इदुदुपधस्येति सूत्रेणैव नित्यषत्वस्य सिद्धेः। अव्युत्पत्तिपक्षे विसर्गस्य प्रत्ययसम्बन्धिभिन्नत्वं स्पष्टमेव । इत्येतत् सर्वमवधाय आह—**यदा तु इति ।**

नन्वनेनैवेति । 'नित्यं समासे' इत्यनेनैव । एतेन = तत्र चारितार्थ्येन । **आनयेति ।**

इसका वन्नन्तान्त ऐसा अर्थ माना गया है । इसीलिए 'अतिधीवरी' में भी इसकी प्रवृत्ति होती है ।

शंका—'ब्राह्मणस्य सर्पिष्करोति' यहाँ सर्पिः ब्राह्मण में सापेक्ष है, सापेक्ष असमर्थ माना जाता है, अतः सामर्थ्याभाव के कारण इस सूत्र से षत्व नहीं होगी ?

समाधान—एकार्थीभाव[1] रूप सामर्थ्य में सापेक्ष को असमर्थ माना जाता है । इस सूत्र में व्यपेक्षारूप[2] सामर्थ्य का ग्रहण है । अतः सापेक्ष रहने पर भी व्यपेक्षारूप सामर्थ्य के होने से षत्व होता है ।

---

१. विशेष्यविशेषणभाव से रहित एकार्थ की उपस्थिति का जनक एकार्थीभाव कहलाता है ।

२. पृथक् पृथक् अर्थ बोधक पदों का आकांक्षावशात् जो परस्पर सम्बन्ध है वह 'व्यपेक्षा' है ।

१५९. नित्यं समासेऽनुत्तरपदस्थस्य । ८ । ३ । ४५ । इसुसो-र्विसर्गस्यानुत्तरपदस्थस्य समासे नित्यं षः स्यात् कुप्वोः परयोः । सर्पिष्कुण्डिका ।

'धातुभिन्न से अभिहित समानाधिकरण असमर्थ के समान है'—इस न्याय से 'सर्पिः कालकम्' यहाँ सामर्थ्याभाव के कारण षत्व नहीं होता । धातुसहचरित प्रत्यय से अभिहित सामानाधिकरण्य में यह नियम नहीं है । अतः सर्पिष्पीयते इसमें षत्व सिद्ध होता है; क्योंकि धातुविहित 'ते' प्रत्यय के अर्थ आश्रय के साथ सर्पिःपदार्थ का अभेदसामानाधिकरण्य है । धातुविहित प्रत्यय के अर्थ के साथ सामानाधिकरण्य असामर्थ्य का प्रयोजक नहीं होता ।

यदि महर्षि पाणिनि के मतानुसार 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' (यह पक्ष 'आयेनेयीनिनी' इत्यादि सूत्र के भाष्य से समर्थित है,) इस पक्ष में 'इदुदुपधस्य' इससे प्राप्त नित्य षत्व का बाध कर इस सूत्र के द्वारा विकल्प से विधान है । 'आयनेयीनिनी' इस सूत्र का भाष्य इस प्रकार है-—

शम् से ख प्रत्यय होने से निष्पन्न शङ्ख शब्द में ख को इनादेश की शङ्का का 'प्रातिपदिकविज्ञानाच्च' इससे समाधान किया । 'उणादि अव्युत्पन्नप्रातिपदिक है'—इसके द्वारा उत्तर दिया ।

'अयामन्ताल्वाय्येत्विल्निष्णुषु' आम् अन्त आलु आदि प्रत्ययों का निर्देश अव्युत्पत्तिपक्ष में उपपन्न नहीं होगा ?—ऐसी शङ्का नहीं करना चाहिए । 'सर्वनामस्थान' आदि संज्ञाओं के समान उक्त सूत्र की रचना व्याकरणान्तर की दृष्टि से की गयी है । अतएव भाष्य में 'अनेकार्था अपि धातवः'—इसके समान 'अव्युत्पन्नान्यपि' इस प्रकार 'अपि'शब्दघटित पाठ नहीं किया । प्रत्युत 'अव्युत्पन्नानि'—ऐसा परिभाषा का स्वरूप निर्दिष्ट किया । इससे यह भी सुविधा मिली कि प्रत्ययग्रहणपरिभाषा की प्रत्ययग्रहण के न होने पर अनुपस्थिति होती है । अतः इसन्त सर्पिः और परमसर्पिः दोनों के होने पर विकल्प से षत्वसिद्धि अनायास हो जाती है ।

शंका—'नित्यं समासे' इस सूत्र के विना भी सर्पिष्कुण्डिका इत्यादि स्थलों में 'इदुदुपधस्य' से नित्य षत्व की सिद्धि हो जाने से इसका आरम्भ व्यर्थ है ?

समाधान—'सर्पिष्कुण्डिका' इसके समान 'परमसर्पिः कुण्डिका' इसमें नित्य षत्व प्राप्त है । उसके बाध के लिए 'नित्यं समासे' सूत्र का आरम्भ है । सूत्र में नित्यपदोपादान स्पष्टार्थक है । समास में नित्य षत्व 'इदुदुपधस्य च' इसी सूत्र से सिद्ध है । अव्युत्पत्तिपक्ष में सर्पिषा, धनुषा आदि में आदेश अथवा प्रत्यय के अवयव सकार के न होने से षत्व नहीं होगा । 'क्वचिदन्यदेव' इस प्रकार बाहुलक के स्वभाव से षत्व होता है ।

इस सूत्र में सामर्थ्य व्यपेक्षारूप है । एकार्थीभावरूप सामर्थ्य के ग्रहण करने से 'परमसर्पिष्कुण्डिका' इसमें विकल्प से षत्व हो जायगा । 'अनुत्तरपदस्थस्य' इसके कारण 'नित्यं समासे' इसकी प्राप्ति नहीं होगी । 'नित्यं समासे' इसी से 'सर्पिष्कुण्डिका' शब्द में नित्य षत्व सिद्ध होने से कस्कादिगण में इसके पाठ की क्या आवश्यकता है ?

इसका समाधान कस्कादिषु इत्यादि से परम मूल में किया है ।

अनुत्तरपदस्थस्य इति किम् ? परमसर्पिः कुण्डिका । कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थो व्यपेक्षायां नित्यार्थश्च ॥

१६०. अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य । ८ । ३ । ४६ । **अकारादुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः**

कस्कादिष्विति । **एतेन तत्सामर्थ्यादुत्तरपदस्थस्यापि षत्वमित्यपास्तम् ।**

व्यपेक्षाविरहेऽपीति । **'आनय सर्पिः, कुण्डिका तिष्ठति' इत्यादौ ।** व्यपेक्षायामिति । **'इदं सर्पिष्कुण्डिकायाः' इत्यत्र । प्रत्ययभिन्नविसर्गस्येत्यर्थम् 'इदुदुपधस्य' (८ । ३ । ४१) इत्यत्र व्याचक्षाणानां व्याख्यादर्शकृतां मतेऽव्यपेक्षायां तेन सिद्धेरिति भावः ।**

एतेन 'कस्कादिपाठस्याव्यपेक्षायां चारितार्थ्येन व्यपेक्षायां तस्यासिद्धत्वाद्विकल्प एवोचितः' इत्यपास्तम् । 'प्रत्ययसम्बन्धिभिन्नविसर्गस्य' इत्यर्थे तु तदप्राप्तिरेवेति व्यपेक्षायां विकल्प एवेति बोद्धव्यम् ॥

अतः कृकमि (८ । ३ । ४६) ॥ **कृशब्देन तदादिग्रहणम्; समासाक्षिप्तोत्तरपदस्य**

सर्पिष आनयनक्रियया सह कर्मतया अन्वयः, कुण्डिकायाश्च स्थितिक्रियया—इति सर्पिषः, कुण्डिकायाश्च परस्परमन्वयाभावेन व्यपेक्षारूपसामर्थ्यं नास्ति । एतेन = तत्राचारितार्थ्येन । तस्य = कस्कादिषु चेत्यस्य । तस्माद् इसुसोः सामर्थ्ये इत्यनेन विकल्पषत्वसिद्धिः ॥

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य इति ॥ समासेन उत्तरपदस्याक्षेपात् तस्मिन् विशेष्ये सति धातुग्रहणे तदादिविधिरिति नियमेन तदाद्युपस्थितौ करोत्यादौ उत्तरपदे इत्यर्थो लब्धः । धातुग्रहणे तदादिविधिरत्र मानं 'विष्वग्देवयोः' इति सूत्रस्थम् अप्रत्ययग्रहणम् । विष्वगञ्चनमित्यत्र अद्र्यादेशवारणाय सूत्रे अविद्यमानप्रत्ययान्ते

'आनय सर्पिः कुण्डिका तिष्ठतु' यहाँ असमास का व्यपेक्षाविरह में भी षत्व के विधानार्थ कस्कादिगण में 'सर्पिष्कुण्डिका' शब्द का पाठ है । इस प्रयोजन के प्रदर्शन से 'अनुत्तरपदस्थ विसर्ग के सत्वविधानार्थ कस्कादिगण में इसका पाठ किया गया है'—ऐसी व्याख्या करनेवाले निरस्त हो गये । 'इदं सर्पिष्कुण्डिकायाः'—यहाँ व्यपेक्षा में नित्यसत्वार्थ गण में पाठ है । व्युत्पत्तिपक्ष में व्यपेक्षारहित स्थल में प्रत्ययसम्बन्धी विसर्ग होने से षत्व की प्राप्ति नहीं है । अतः प्रत्ययरूप विसर्ग से भिन्न—इस प्रकार सामानाधिकरण्य से अन्वय करने वाले **व्याख्यादर्श** के मत में नित्य षत्व की सिद्धि का उल्लेख है ।

इससे कस्कादिपाठ व्यपेक्षारहित में चरितार्थ है । व्यपेक्षा में 'इसुसोः सामर्थ्ये' इसकी दृष्टि में 'कस्कादिषु च' यह सूत्र असिद्ध होने से विकल्प से ही षत्व होता है—यह विचार प्रकट करनेवाले परास्त हैं । 'व्यपेक्षाविरह में भी प्रत्ययभिन्न विसर्ग'—इस मत में 'इदुदुपधस्य' इससे षत्व हो जायगा । अतः पाठ व्यर्थ है । 'प्रत्ययसम्बन्धी से भिन्न विसर्ग' इस अर्थ में 'इदुदुपधस्य' इसकी प्राप्ति नहीं है; क्योंकि प्रत्ययावयव विसर्ग है, अतः विकल्प से षत्व की प्राप्ति है ॥

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ॥ इस सूत्र के 'कृ' शब्द में 'यस्मिन् विधिः' इससे तदादि का बोध होता है । विशेष्यवाचक सप्तम्यन्त-आक्षिप्त उत्तरपद है । समास की इसमें अनुवृत्ति है । उत्तरपद के विना समास सम्भव नहीं है । अतः समास से उत्तरपद का आक्षेप है— यह भाव है ।

स्यात् करोत्यादिषु परेषु, न तूत्तरपदस्थस्य। अयस्कारः। अयस्कामः। अयस्कंसः। अयस्कुम्भः। अयस्पात्रम्। अयःसंहिता कुशा अयस्कुशा। अयस्कर्णी।

अतः किम्? गोःकारः। अनव्ययस्य किम्? स्वःकामः। समासे किम्? यशःकरोति। अनुत्तरपदस्थस्य किम्? परमयशःकारः॥

१६१. अधःशिरसी पदे। ८। ३। ४७। **एतयोर्विसर्गस्य सादेशः स्यात् पदशब्दे परे। अधस्पदम्। शिरस्पदम्।**

समास इत्येव। अधः पदम्। शिरः पदम्।

अनुत्तरपदस्थस्येत्येव। परमशिरः पदम्। कस्कादिषु च। भास्करः॥

॥ इति विसर्गसन्धिप्रकरणम् ॥

विशेष्यत्वात् 'विष्वग्देवयोः' (६। ३। ९२) इति सूत्रे वप्रत्ययग्रहणेन धातोर्विशेषणत्वे तदादिविधिज्ञापनात्। 'अयस्कुम्भी' इत्यादौ लिङ्गविशिष्टपरिभाषया सत्वं बोद्धयम्॥

भास्कर इति। **तपरकरणात् 'अतः कमि' (८। ३। ४६) इत्यस्याप्राप्तिः॥**

॥ इति विसर्गसन्धिः ॥

अञ्चतौ परे तदादेशो विहितः। यदि च तदादिविधिर्न भवेत् तदा यद्धि अञ्चधातुरूपं तन्नोत्तरपदम्, यच्चोत्तरपदम्—अञ्चनमिति तन्न अञ्च्धातुरूपम्; अञ्च्धातूत्तरपदे तस्य आदेशस्य विधानेन तत्राप्राप्तेः। तदादिविधौ ज्ञापिते तु अञ्चेत्यादौ उत्तरपदे इत्यर्थलाभेन विष्वगञ्चनमित्यत्रापि उत्तरपदस्य अञ्चनस्य अञ्चधात्वादिघटितत्वात् प्राप्तस्य अद्र्यादेशस्य वारणाय अश्रूयमाणप्रत्ययार्थकमप्रत्ययपदं सूत्रे चरितार्थम्। ल्युट्प्रत्ययस्य श्रूयमाणत्वेन अश्रूयमाणप्रत्ययत्वाभावान्न तत्र सूत्रप्रवृत्तिरिति तत् सिद्धम्।

ननु सूत्रे कुम्भपदेन कुम्भरूपस्यैव ग्रहणात् अयस्कुम्भीत्यत्र कुम्भोत्तरपदत्वाभावात् कथं सत्वम्? अत आह—**अयस्कुम्भी** इति। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया कुम्भपदेन कुम्भीपदस्यापि ग्रहणात् तत्रापि सत्वं सिद्धम्॥

॥ इति विसर्गसन्धिः ॥

'विश्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' इसके प्रत्ययग्रहण से धातु के विशेषण रहने पर तदादिविधि का ज्ञापन होता है।

'अयस्कुम्भी' इसमें 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इस परिभाषा से कुम्भ के ग्रहण से कुम्भी का ग्रहण होने से सत्व सिद्ध होता है। 'भास्करः' इसमें इससे सत्व नहीं होता है; क्योंकि 'अतः' इसमें तपर किया गया है। इस कारण दीर्घ से परवर्ती विसर्ग को सत्व नहीं होता। इस प्रकार इन प्रयोगों की सिद्धिप्रक्रिया जाननी चाहिए॥

॥ इति विसर्गसन्धिः ॥

अथ स्वादिसन्धिप्रकरणम्

'स्वौजसमौट्०' (सू० १८३) इति सुप्रत्यये 'शिवस् + अर्च्यः' इति स्थिते ।

१६२. ससजुषो रुः । ८ । २ । ६६ । **पदान्तस्य सस्य 'सजुष्-शब्दस्य च रुः स्यात् । जश्त्वापवादः ॥**

यत्तु **स्वौजसित्यत्र रुरेव पाठ्यः; सर्वत्र सुग्रहणे रुग्रहणमेवास्त्विति, तन्न; 'यशोऽत्र' इत्यादौ रोरसिद्धत्वादुत्वानापत्तेः, 'अतो रोः' (६ । १ । ११३) इत्यस्य प्रथमैकवचने चारितार्थ्यात्** । तद् ध्वनयन्नाह—स्वौजसेति । **पदस्येत्यनुवृत्तं ससजूभ्यां विशेष्यते, तेन तदन्तविधिः । आदेशस्तु 'अलोऽन्त्यस्य' इत्यन्त्यस्य । तत्फलितमाह**—पदान्तस्येत्यादिना । **'सजूः' इत्यत्र व्यपदेशिवद्भावेन सिद्धिः । 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' (प० भा०), 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न' (प० भा०) इति परिभाषाद्वयं प्रत्ययविधि-**

स्वौजसित्यत्र प्रक्रियालाघवाय रुः पठ्यतां यत्र कुत्रापि सुशब्देन व्यवहार इष्टः, तत्र सर्वत्र रुशब्देन व्यवह्रियताम् ? इत्याशङ्कां निषेधति—**तन्नेति** । यशोऽत्रेत्यादौ उत्व-दृष्ट्या रुत्वस्यासिद्धत्वेन उत्वानापत्तेः । रामोऽत्रेत्यादौ उत्वस्य चारितार्थ्येन सामर्थ्यात् सिद्धत्वस्य कल्पयितुमशक्यत्वात् । न च राम र् इत्यवस्थायां विसर्गस्यासिद्धत्वेन 'सुपि च' इत्यनेन दीर्घापत्तिरेव कुतो दर्शिता इति वाच्यम्; 'सुपि च' इत्यत्र अपि चेति पाठेन प्रथमाद्वितीयाविभक्त्योस्तस्याप्राप्तेरित्याशयात् ।

स्वौजसमौट् ॥ **शंका**—इस सूत्र में 'सु' के स्थान में 'रु' का पाठ करना चाहिये । इस प्रकार रु का विधान करने से सकार को रुत्व न करने पर लाघव होगा । इसी प्रकार जहाँ भी 'सु' से व्यवहार होता है वहाँ 'रु' से व्यवहार करना चाहिए ?

समाधान—ऐसा करने पर 'यशोऽत्र' में 'यशस्' के सकार को होने वाला रुत्व, उत्व की दृष्टि में असिद्ध हो जाने उत्व नहीं होगा । 'अतो रोरप्लुतात्' यह सूत्र 'रामोऽत्र' में चरितार्थ है; क्योंकि यहाँ रुत्व के विना ही रेफ है । अतः 'सु' के स्थान में रु का पाठ करना उचित नहीं । इस बात को व्यक्त करने के लिए परम मूल में लिखा है—**स्वौजसेति** ॥

ससजुषो रुः ॥ इस सूत्र में 'अनुवृत्तपदस्य' इसको विशेष्य तथा सकार एवं सजूःशब्द को विशेषण मानकर तदन्तविधि होने से 'सान्त तथा सजुःशब्दान्त जो पद'—इस प्रकार का अर्थ होता है । 'अलोऽन्त्यस्य' इस सूत्र से पद के अन्त्य को रुत्व का विधान करने से 'पदान्तस्य सस्य' यह अर्थ फलित होता है ।

शंका—'सजुःशब्दान्त पद' ऐसा अर्थ मानने पर केवल सजुःशब्दान्त न होने से रुत्व नहीं होगा ?

समाधान—व्यपदेशिवद्भाव से 'सजुः' को भी सजुः शब्दान्त मानकर रुत्व हो जायगा ।

शंका—आनुपूर्वीबोधक प्रातिपदिक में व्यपदेशिवद्भाव नहीं होता । इसी अभिप्राय से 'ग्रहणवता प्रातिपदिकेन' इत्यादि परिभाषा है ?

समाधान—यह परिभाषा प्रत्यय का विधान करने में प्रवृत्त होती है । वहाँ तो रुत्व-विधान करना है । 'असमासे निष्कादिभ्यः' इस सूत्र के भाष्य में यह स्पष्ट है । रुत्वविधायक

१६३. अतो रोरप्लुतादप्लुते । ६ । १ । ११३ । **अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति । 'भोभगोअघो' (सू० १६७) इति प्राप्तस्य यत्वस्यापवादः । उत्वं प्रति रुत्वस्यासिद्धत्वं तु न भवति, रुत्वमनूद्योत्वविधेः सामर्थ्यात् ॥**

१६४. प्रथमयोः पूर्वसवर्णः । ६ । १ । १०२ । **अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् । इति प्राप्ते ।**

विषयमिति 'असमासे निष्कादिभ्यः' (५ । १ । २०) इत्यत्र भाष्ये **स्पष्टम् । इदञ्जश्त्वापवादः । 'श्रेयान्' इत्यादौ रुत्वस्यासिद्धत्वात् संयोगान्तलोप एवेति दिक् ॥**

यत्वस्यापवाद इति । **यदीदं न स्यात्तर्हि यत्वं प्राप्नोतीत्येतावता । कृते त्वस्मिन् यत्वस्यासिद्धत्वादुत्वगुणयोर्यत्वाप्राप्तिरेवेति** भावः ॥

प्रथमयोः (६ । १ । १२०) । **व्याख्यानात् प्रथमयोरित्यनेन प्रथमाद्वितीयारूपसुब्विभक्त्योर्ग्रहणम् । तदाह**—प्रथमाद्वितीययोरिति । **पूर्वग्रहणं किम् ? 'अग्नी'** इत्यत्र

भाष्ये स्पष्टमिति । असमासे उत्वदृष्ट्या यत्वस्य परत्रिपादीस्थत्वेन असिद्धत्वात् पूर्वमुत्वे गुणे च कृते यत्वाप्राप्त्या 'येन नाप्राप्ते' इति न्यायस्यात्र विषय एव नेति यत्वापवादत्वकथनं कथं संगच्छते ? इत्यत आह—**यदीदमिति** ॥

प्रथमयोः पूर्वसवर्णः ॥ प्रथमा च प्रथमा चेत्येवमेकशेषः । तत्र एकः प्रथमाशब्दः प्रथमाविभक्तिपरः, द्वितीयो द्वितीयाविभक्तौ लाक्षणिकः । **व्याख्यानादिति** । प्रथमयोरिति न यस्य कस्यचिद् ग्रहणम्, किन्तु 'वा सुपि' इत्यतः सुप्-पदानुवृत्तेः सुब्विभक्त्योरेव ग्रहणम् । तत्रापि एकवचनस्यैव न ग्रहणम्, अचीत्यधिकारात् "तस्माच्छसो नः पुंसि" इत्यत्र तच्छब्देन पूर्वसवर्णदीर्घस्य परामर्शात् 'दीर्घाज्जसि च' इति प्रतिषेधाच्च, व्याख्यानात् प्रथमाद्वितीययोर्ग्रहणं वाच्यम् ।

सूत्र जश्त्व का 'येन नाप्राप्ति' न्याय से अपवाद है । श्रेयान्' में संयोगान्त लोप की दृष्टि में रुत्व असिद्ध होने से रुत्व नहीं हुआ ॥

यत्वस्यापवाद इति । 'भो भगो' इस सूत्र से विहित यत्त्व का 'अतो रोरप्लुताद्' यह सूत्र अपवाद है ।

शंका—उत्वशास्त्र की दृष्टि से यत्वविधायक सूत्र असिद्ध होने से पहले उत्व को गुण होजाने पर यकारादेश की प्राप्ति न होने से अपवादकथन युक्तिसंगत नहीं है ?

समाधान—यदि उत्वविधायक शास्त्र नहीं रहता तो यत्व होजाता—इस अभिप्राय से उत्सर्गापवादभाव है । जिस प्रकार द्वन्द्वापवाद एकशेष माना जाता है । वहाँ भी यही गति है । यदि एकशेष न होता तो द्वन्द्व हो जाता । एक शेष के बाद द्वन्द्व की प्राप्ति नहीं है । येन नाप्राप्ति न्याय का विषय वहाँ भी नहीं हैं ॥

प्रथमयोः ।। भाष्यकार के व्याख्यान से 'प्रथमयोः' इस पद से प्रथमा और द्वितीया रूप सुप्-विभक्तियों का ग्रहण है । पूर्वसवर्ण में पूर्वग्रहण का प्रयोजन 'अग्नी' इसमें परसवर्ण की व्यावृत्ति है । अन्यथा औकार का सवर्ण भी हो जाता ।

१६५. नादिचि । ६ । १ । १०४ । **अवर्णादिचि परे न पूर्वसवर्ण-दीर्घः । 'आद्गुणः' (सू० ६९) । 'एङः पदान्तादति' (सू० ८६) । शिवोऽर्च्यः ।**

पक्षे परसवर्णो मा भूदिति । दीर्घग्रहणं तु त्रिमात्रस्य स्थानिनस्त्रिमात्रो मा भूदिति ।

टिप्पणीकारस्तु यादृशसंख्याविशिष्टनिरूपितं प्रथमत्वं वक्तव्यं तत्संख्याविशिष्टत्वम् । वै० स्वजनकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितधर्मितानाश्रयत्व, स्वप्रयोजकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितधर्मितावच्छेदकताश्रयत्व – एतदुभयसम्बन्धेन प्रकृते सप्तत्वसंख्याविशिष्टविभक्तिसमुदायनिरूपितं प्रथमत्वं विवक्षितम् । तादृशसप्तत्वसंख्यायाः जनिका अपेक्षाबुद्धिः—इमाः षट् एतद्विशिष्टा इयमेका इति (इमाः सप्त) तदीयैकत्वनिष्ठा या प्रकारता तन्निरूपिता या धर्मिता तदाश्रयत्वमेव सप्तम्याम् अनाश्रयत्वं प्रथमाद्वितीययोः । तथैव स्वप्रयोजिका या अपेक्षाबुद्धिः—इमे द्वे, इमाः चतस्रः एतद्विशिष्टेयमेका इति (इमाः सप्त) तदीयैकत्वनिष्ठप्रकारतानिरूपिता या धर्मिता तदवच्छेदकताया आश्रयत्वमपि प्रथमाद्वितीययोभयसमुदाये इत्येवं लक्षणं योजनीयम् ।

'पूर्वो दीर्घ' इत्येवमुच्यमाने गौर्यादौ दीर्घे रामान् इत्यादौ अदीर्घस्थले पूर्वस्या एव व्यक्तेर्विधानसम्भवात् पूर्वजातीय इत्यर्थस्य लाभेन पूर्वजातीयदीर्घसिद्धौ सवर्णग्रहणं

दीर्घग्रहण का प्रयोजन है—त्रिमात्र स्थानी को त्रिमात्र आदेश की व्यावृत्ति । अन्यथा आन्तरतम्य से त्रिमात्र आदेश हो जायगा । पूर्व के अदीर्घ होने से तत्स्वरूप दीर्घ कैसे हो सकता है ! अतः तत्सजातीय ही दीर्घ आदेश लब्ध हो जाने से सवर्णग्रहण स्पष्टार्थक है । यद्यपि 'बहुश्रेयसीन्' इत्यादि स्थल में दीर्घ भी पूर्वसवर्ण दीर्घ का स्थानी होने से 'प्रथमयोः' यह सूत्र चरितार्थ है, तथापि 'दीर्घाज्जसि च', 'नादिचि' इन सूत्रों से दीर्घस्थल में निषेध होने से शास्त्र के स्वरूप ही उदाहरण अवशिष्ट रहने से अल्पविषयता हो जायगी । अतः तत्सजातीय अर्थ होने से इसकी व्यापक विषयता अक्षुण्ण बनी रहेगी—यह आशय है ।

शंका—तौ सत् इति । 'शिवोऽर्च्यः' यहाँ 'शिव + उ + अर्च्यः' इस अवस्था में 'आद् गुणः' इस सूत्र से प्राप्त गुण को बाधकर 'प्रथमयोः' इत्यादि सूत्र से पूर्वसवर्ण दीर्घ प्राप्त होता है । 'नादिचि' इस सूत्र के द्वारा उसका निषेध हो जाने पर पुनः गुण नही होना चाहिए; क्योंकि 'जिसका अवसर भ्रष्ट हो जाता है उसका अवसर भ्रष्ट ही रहता है'—इस अर्थ में भ्रष्टावसर न्याय' है, उसके द्वारा गुण नहीं होगा ?

समाधान—व्याकरणशास्त्र में भ्रष्टावसरन्याय की प्रवृत्ति नही होती । अन्यथा 'तौ' इस प्रयोग में 'त्यदादीनामः' इस सूत्र से अत्व एवं 'अतो गुणे' इस सूत्र से पररूप होने के बाद 'वृद्धिरेचि' इससे प्राप्त वृद्धि का 'नादिचि' इस सूत्र के द्वारा प्रतिषेध होने पर पूर्वप्राप्त वृद्धि भ्रष्टावसरन्याय से होने के कारण 'तौ सत्' इस सूत्र में 'तौ' इसका निर्देश असङ्गत हो जायगा । अतः इस शास्त्र में भ्रष्टावसर न्याय का अवसर नहीं है ।

शंका—देवदत्तहन्तृहतन्याय की प्रवृत्ति क्यों नहीं हुई ? उसका स्वरूप इस प्रकार है—देवदत्त के हन्ता के मारने पर भी देवदत्त जीवित नहीं हो सकता । इस न्याय से यहाँ वृद्धि के

अतः इति तपरः किम् ? देवा अत्र । अति इति तपरः किम् ? श्व आगन्ता । अप्लुतात् किम् ? एहि सुस्रोत३ अत्र स्नाहि । प्लुतस्यासिद्धत्वादतः परोऽयम् ।

सवर्णग्रहणं तु स्पष्टार्थम् । पूर्वस्याऽदीर्घत्वात् पूर्वजातीय इत्यर्थेनेष्टसिद्धेरिति स्पष्टं भाष्ये । आद्गुण इति । 'तौ सत्' (३ । २ । १२७) इति निर्देशेन भ्रष्टावसरन्यायस्यात्र शास्त्रेऽनाश्रयणादिति भावः ।

देवदत्तहन्तृहतन्यायस्य तु नात्र प्रवृत्तिः । देवदत्तहन्तृहनने हि न देवदत्तोज्जीवनम्, देवदत्तहननप्रसक्तहनने त्वस्त्येव देवदत्तजीवनम्, प्रकृते, तु न हननस्थानीया वृद्धिहन्तुः पूर्वसवर्णदीर्घस्य लक्ष्ये प्रवृत्तिः, किन्तु हननोद्यमसजातीयं प्रसक्तिमात्रम्, प्रसक्तस्य निषेधे बाध्योज्जीवने न बाधकमिति । स्पष्टं चेदं 'स्वादिषु' (१ । ४ । १७) इति सूत्रे कैयटे।

सुस्रोत इति । सुस्रोतस्-शब्दः कस्यचित्सञ्ज्ञा । सम्बुद्धौ 'दूराद्धूते च' (८ । २ ।

स्पष्टार्थमित्याह—**पूर्वस्येति** । दीर्घस्थले 'दीर्घाज्जसि च' इति निषेधेन दीर्घो न भवति ।

शिव उ अर्च्यं इति स्थिते "आद्गुणः" इति प्राप्तं गुणं बाधित्वा प्रथमयोरिति पूर्वसवर्णदीर्घः प्राप्तः, तस्य 'नादिचि' इति प्रतिषेधात् बाधके निवृत्ते 'आद्गुणः' इत्यनेन गुणे–शिवोऽर्च्यः । न च यस्यावसरो भ्रष्टः स भ्रष्ट एवेति भ्रष्टावसरन्यायेन पुनः 'आद्गुणः' इत्यस्य प्रवृत्तिर्न स्यात् इति वाच्यम्; 'तौ सत्' इत्यत्र वृद्धेः पूर्वसवर्णदीर्घेण बाधे प्राप्ते नादिचीति प्रतिषिद्धे पुनर्वृद्धिसूत्रप्रवृत्त्या यथा वृद्धिस्तथाऽत्रापि गुणस्य प्रवृत्तिः । तस्मात् 'तौ सत्' इति निर्देशेन भ्रष्टावसरन्यायस्य नात्र शास्त्रे आश्रयणम् ।

यदि उद्देश्यतावच्छेदकाक्रान्तिरेव अवसरः, तदा उद्देश्यतावच्छेदकाक्रान्तौ अवसरः, न तु तदभावे । अवसरभ्रष्टत्वे उद्देश्यतावच्छेदकतैव नास्तीति स्वतः सूत्रं न प्राप्नोतीति न भ्रष्टावसरन्यायस्यात्र शास्त्रे अवसर इति 'तौ सत्' इत्येन निर्देशेन बोध्यते– इति शेखराशयः । एवं हन्तुर्हनने उज्जीवनं हतस्य न भवति, यदि तु हन्तुमुद्यतं पुरुषमेव कश्चित् हन्यात् तदा तु स जीवत्येव इति देवदत्तहन्तृहतन्यायस्य नात्र विषयः ।

सुस्रोत अत्र स्नाहीति । अत्र 'दूराद्धूते च' इत्यनेन प्लुते अप्लुताकारात्परत्वाभावेन विसर्गस्य उत्वं न । न च उत्वस्य सापादिकत्वेन तदृष्ट्या प्लुतस्य त्रैपादिकस्यासिद्धत्वात् अप्लत एव अकार इति तस्मात् परस्य उत्वं प्राप्नोत्येवेति वाच्यम्, भेदस्य प्रतियोगि-

---

हनन करने वाले पूर्वसवर्ण दीर्घ का 'नादिचि' सूत्र द्वारा हनन होने पर भी वृद्धि का उज्जीवन न होने से वृद्धि नहीं होगी ?

समाधान—जिस प्रकार देवदत्त को मारने के लिए उद्यत व्यक्ति के मारने से देवदत्त का जीवन बच जाता है, उसी प्रकार यहाँ भी वृद्धि के हनन के लिए उद्यत पूर्वसवर्ण दीर्घ का 'नादिचि' सूत्र के द्वारा निषेधरूप वध होने पर वृद्धि के उज्जीवन में किसी प्रकार का विवाद नहीं है । इस लिए वृद्धि होती है । 'तौ' में वृद्धि है, 'शिवोऽर्च्यः' में गुण है । और प्रक्रिया समान ही है ।

सुस्रोत इति । 'सुस्रोतस्' किसी का नाम है । सम्बोधन में 'दूराद्धूते च' इस सूत्र से प्लुत होता है ।

'अप्लुतात्' इति विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वम् । तपरकरणस्य तु न; सामर्थ्ये दीर्घनिवृत्त्या चरितार्थत्वात् ।

८४) **इति प्लुतः** । तत्सामर्थ्यादिति । **प्रतियोगित्वेन तदाश्रयणसामर्थ्यादित्यर्थः, आश्रयात्-**

त्वेन प्लुतस्य आश्रयणसामर्थ्यात् प्लुतस्य नासिद्धत्वमिति कल्प्यते । अन्यथा सर्वत्र प्लुताकारस्थले प्लुतस्यासिद्धत्वेन उत्वदृष्ट्या अप्लुताकारस्यैव सत्त्वेन भेदप्रतियोगितया प्लुतस्योपादानवैयर्थ्यं स्यात् । न चैवमपि अप्लुतग्रहणसामर्थ्येन तस्यासिद्धत्वाभावकल्पने प्लुताकारात् परस्य ह्रस्वाकारात् परत्वाभावेन 'अतो रोरप्लुतादप्लुते' इत्यत्र तपरनिर्देशेन अतः परत्वाभावादेवाप्राप्तौ अप्लुतग्रहणस्य ज्ञापनोत्तरं फलाभावेन स्वांशे चारितार्थ्याभावः स्यादिति वाच्यम्; अप्लुतादिति पञ्चम्यन्तपदप्रयोज्या या प्लुतभिन्नत्वच्छिन्ना विषयता तादृशविषयतासाधकमसिद्धत्वं नेत्यर्थः कल्प्यते । तथा च 'अतः' इति पञ्चम्यन्तपदप्रयोज्या या एकमात्रिकत्वविशिष्टत्वावच्छिन्नविषयता तादृशविषयता साधकस्य असिद्धत्वस्य निवारणाभावात् असिद्धत्वेन ह्रस्वाकारात् परत्वस्य सद्भावात् उत्वस्य व्यावृत्तयेऽप्लुतादिति ज्ञापनोत्तरं स्वांशे चरितार्थम् । एवमेव अप्लुते इत्यत्रापि शङ्कासमाधाने योजनीये । तत्रापि अप्लुते इति सप्तम्यन्तपदप्रयोज्या या प्लुतभिन्नत्वावच्छिन्ना विषयता तादृशविषयतासाधकमसिद्धत्वं नेत्यर्थः । इत्याशयेनाह—**प्रतियोगित्वेनेति** ।

अप्लुतात्, अप्लुते इत्युभयत्र प्रतियोगितया प्लुतस्य आश्रयणसामर्थ्यात् 'पूर्वत्रासिद्धम्' इत्यनेन प्राप्तासिद्धत्वमेव बाध्यते, न तु अन्तरङ्गपरिभाषया बोध्यस्य असिद्धत्वस्य

आश्रयात् सिद्धम् । प्लुत के आश्रयण-सामर्थ्य से 'अतो रोः' इस सूत्र की दृष्टि में प्लुत असिद्ध नहीं होता—इस भाष्य के अनुसार अप्लुत पद से 'प्लुतभिन्न' इस सूत्र में प्रतियोगितया प्लुत का आश्रयण किया गया है । तत्सामर्थ्य से प्लुत की असिद्धता नहीं होती, ऐसी कल्पना करनी चाहिए । अप्लुत में प्लुत विशेषण है, अतः तादृश कल्पना होती है—यह कहना ठीक नहीं ।

यद्यपि अप्लुत में प्लुत के आश्रयण-सामर्थ्य से प्लुत की असिद्धता के अभावज्ञापन के अनन्तर अप्लुत के ग्रहण की व्यर्थता बनी हुई है । कारण, इसके ग्रहण न करने पर प्लुताकार से पर या प्लुत अकार से पूर्व अकार को 'अतः' और 'अति' इसमें तपरनिर्देश होने से उत्व का प्रसङ्ग ही नहीं है । अतः 'अप्लुतात्' 'अप्लुते'—इस दोनों पदों का ज्ञापनोत्तर चारितार्थ्य नहीं है । तथापि 'अप्लुतात्' और 'अप्लुते'—इन पञ्चम्यन्त तथा सप्तम्यन्त पदों से प्रयोज्य जो प्लुतभिन्नत्वावच्छिन्नविषयता तादृशविषयता के साधक असिद्धत्व का निषेध किया गया है । 'अतः' और 'अति'—इन पदों से प्रयोज्य एकमात्रिकत्वविशिष्टप्रकारत्वावच्छिन्नविषयता के साधक असिद्धत्व की व्यावृत्ति न होने से उत्व की दृष्टि में प्लुत असिद्ध हो जाने के कारण प्लुतस्थल में भी उत्व होजायगा । 'अप्लुतात्', 'अप्लुते' इसके ग्रहण करने पर उत्त्व की असिद्धता न होने से प्लुतभिन्न से परे, या प्लुतभिन्न से पूर्व अकार न होने से उन प्रयोगों में उत्व नहीं होता । इस प्रकार उनकी स्वांश में चरितार्थता सुस्पष्ट है ।

अप्लुते इति किम् ? तिष्ठतु पय अ३ग्निदत्त । 'गुरोरनृतः' (सू० ९७) इति प्लुतः ।।

१६६. हशि च । ६ । १ । ११४ । **अप्लुतादतः परस्य रोरुः स्याद्धशि । शिवो वन्द्यः ।**

सिद्ध इति भाष्योक्तेः । **पयस्यटति, पयो ददातीत्यर्थे 'आगच्छ हे पयो३ट्' 'आगच्छ हे पयो३द' इत्यादावेकपदस्थवर्णद्वयसापेक्षमन्तरङ्गमुत्वं प्रति वाक्यसम्पादकपदान्तरसापेक्षप्लुतस्यासिद्धत्वादुत्वे प्लुतसिद्धिः । अन्यथा प्लुतस्योत्वदृष्ट्या सिद्धत्वात् परत्वात् प्लुते आद्येऽप्लुतपरत्वाभावादन्त्येऽप्लुतात् परत्वाभावादुत्वं न स्यात् ।**

बाधो मानाभावात् इत्याशयेनाह—**पयस्यटतीति** । पयोऽट् इत्यत्र क्विप्, पयोद इत्यत्र 'अतोऽनुपसर्गे कः' इत्यनेन कप्रत्ययः । एकपदस्य वर्णद्वयनिमित्तकत्वेन उत्वस्यान्तरङ्गता, वाक्यसम्पादकत्वेन आगच्छेति पदान्तरसापेक्षत्वेन प्लुतस्य बहिरङ्गता इति असिद्धमिति परिभाषया उत्वदृष्ट्या प्लुतस्य बहिरङ्गस्यासिद्धत्वेन उत्वं भवत्येव । तेन पयोऽट्, पयोद इत्यस्य सिद्धिः । अन्यथा आश्रयणसामर्थ्येन असिद्धत्वमात्रबाधने त्रिपाद्यामन्तरङ्गपरि-

---

ज्ञापन के द्वारा उपस्थित 'पूर्वत्रासिद्धम्' सूत्र के 'पूर्व' शब्द से उत्वविधायक सूत्र का ग्रहण न होने से प्लुत की असिद्धि नहीं होती; किन्तु 'असिद्धं बहिरङ्गमन्तरङ्गे' इस परिभाषा द्वारा उत्वविधायक सूत्र की दृष्टि में प्लुत की असिद्धता प्राप्त है, वहाँ असिद्धता हो जाती है । इसीलिये 'पयोऽट्' और पयोद—इनमें 'आगच्छ' आदि क्रिया के रहने पर ही 'एकतिङ् वाक्यम्' इसके अनुसार वाक्य होने से पदान्तरप्रयुक्त वाक्य की अपेक्षा रखने वाला प्लुत बहिरङ्ग है । तदपेक्षया एक पद के वर्णद्वय की अपेक्षा करने वाला उत्वविधायक सूत्र अन्तरङ्ग है । अतः उत्वशास्त्र की दृष्टि में प्लुत के असिद्ध हो जाने से यहाँ उत्व की प्रवृति के निराबाध होने से पयोट्, पयोद—इन प्रयोगों की सिद्धि होती है । यदि प्लुत असिद्ध न होता तो यहाँ भी उत्व नहीं होता । अतः परिभाषा के विषय में उक्त ज्ञापन नहीं है ।

हे पयोट्, हे पयोद—इस प्रकार 'हे' शब्द से युक्त पाठ ठीक नहीं है । 'हैहेप्रयोगे हैहयोः' इस सूत्र के अनुसार 'हे' का प्रयोग रहने पर इसको प्लुत हो जायगा । 'पयोट्' इसमें अट् के अकार को 'दूराद्धूते च' इससे प्लुत होता है । अतः रु से अप्लुत अकार पर में नहीं है । इसलिये 'अतो रोः' इस सूत्र से उत्व नहीं होगा । 'पयोद' इसमें 'गुरोरनृतः' इससे अनन्त्य य के अकार को प्लुत होने से 'हशि च' इस सूत्र से अप्लुत अकार से परे रु नहीं है, अतः उत्व नहीं होगा—यह भाव है ।

'वाह ऊठ्' सूत्र से ज्ञापित होने के कारण अन्तरङ्गपरिभाषा सापादिक है । इसकी दृष्टि में बहिरङ्गभूत प्लुत त्रैपादिक होने से, असिद्ध होने पर भी, अन्तरङ्ग शास्त्र के प्रति बहिङ्गासिद्धत्व का प्रतिपादन किया जा सकता है । संसार को मिथ्या समझने वाले व्यक्ति जैसे दूसरे के लिए संसार के मिथ्यात्व का प्रतिपादन कर सकते हैं, अपने लिये नहीं; उसी प्रकार अन्तरङ्ग के प्रति बहिरङ्ग का असिद्धत्वप्रतिपादन परिभाषा की दृष्टि में अविद्यमान के लिए भी किया जा सकता है । परिभाषा की प्रवृत्ति का प्रयोजक अन्तरङ्गशास्त्रत्व है । परिभाषा-

परिभाषादृष्ट्या बहिरङ्गासिद्धत्वेऽपि न क्षतिः । स्वदृष्ट्याऽसिद्धस्यापि परं प्रत्यसिद्धत्वप्रतिपादनसम्भवात्, स्वदृष्ट्याऽविद्यमानस्य परं प्रत्यविद्यमानत्वप्रतिपादनवत् । अन्तरङ्गस्यासिद्धत्वे तु प्रतिपाद्याभावे इव कं प्रत्यसिद्धत्वं प्रतिपाद्येत !

तत्राद्ये 'वाक्यस्य टेः' (८ । २ । ८२) इत्यट्शब्दाकारः प्लुतः, अन्त्ये रेफदकारसंयोगपरत्वेनाकारस्य गुरुत्वात् 'गुरोः' (८ । २ । ८६) इति प्लुतः । आश्रयेण तु येननाप्राप्तिन्यायेन प्रत्यक्षत्वेन च पूर्वत्रासिद्धत्वमेव बाध्यते, न त्विदम् । 'सुस्रोतः' इत्यादौ त्वेकवाक्यमात्रसापेक्षत्वात् प्लुतोऽन्तरङ्गः, भिन्नवाक्यस्थाकारसापेक्षत्वादुत्वं बहिरङ्गमिति स्पष्टं भाष्ये ॥

भाषाया अप्रवृत्तेः कथमत्र प्रवृत्तिः ? अत आह—**परिभाषेति** । परिभाषायाः प्रवृत्तिलिङ्गम् अन्तरङ्गशास्त्रत्वम् । अन्तरङ्गे असिद्धे परिभाषा कुत्रोपस्थाय बहिरङ्गस्यासिद्धत्वं बोधयेत् ! बहिरङ्गस्य परिभाषादृष्ट्या असिद्धत्वे तु परं प्रति असिद्धत्वं प्रतिपादयितुं शक्यते । यथा स्वदृष्ट्या अविद्यमानस्यापि परं प्रति अविद्यमानत्वप्रतिपादनं भवति तद्वत् । एकवाक्यमात्रसापेक्षत्वात् प्लुतोऽन्तरङ्गः, भिन्नवाक्यगतस्य अकारस्य अपेक्षणात् उत्वस्य बहिरङ्गत्वम्, एहि सुस्रोत, अत्र स्नाहि इत्यत्र ॥

दृष्टि से अन्तरङ्गशास्त्र असिद्ध है । ऐसी दशा में परिभाषा का उपस्थितिप्रयोजक अन्तरङ्गशास्त्ररूप लिङ्ग न होने से जिस प्रकार प्रतिपाद्य (श्रोता) के न रहने पर प्रतिपादन असम्भव है, उसी प्रकार यहाँ भी असिद्धत्व का बोधन किसके प्रति होगा !

तत्रेति । उन दोनों उदाहरणों में प्रथम 'पयोऽट्' वाक्य के टि-रूप अट्-वटक अकार को प्लुत हुआ है । द्वितीय उदाहरण 'पयोद' में अनन्त्य गुरु 'यो' के ओकार को 'गुरोरनृतः' से प्लुत होता है ।

शंका—प्लुत के आश्रयण सामर्थ्य से यथा 'पूर्वत्रासिद्धम्' इससे बोधित का बाध होता है, तथैव 'असिद्धं बहिरङ्गमन्तरङ्गे' इस पभिाषा द्वारा बोधित असिद्धत्व का बाध क्या नहीं होता ?

समाधान—जहाँ जहाँ प्लुत होने से 'अप्लुत' तथा 'अप्लुते' इन पदों से प्लुतभिन्न अर्थ की उपस्थिति द्वारा उत्त्व को व्यावृत्ति प्राप्त होती है वहाँ वहाँ उत्त्व की दृष्टि में प्लुत की असिद्धता 'पूर्वत्रासिद्धम्' द्वारा हो जाने के कारण प्लुत भिन्न होने से अप्लुत का व्यावर्त्य स्थल न होने से प्रतियोगित्वेन प्लुत के आश्रयणसामर्थ्य द्वारा 'येन नाप्राप्ति' न्याय के बल से एवं साक्षात् सूत्रकार से उच्चरित होने के कारण 'पूर्वत्रासिद्धम्' इसी की असिद्धता का बाधज्ञापन के द्वारा होता है, आनुमानिक परिभाषा के द्वारा प्राप्त असिद्धत्व का नहीं । परिभाषा से भी प्लुत की असिद्धता प्राप्त नहीं है, वहाँ 'अप्लुतात्', 'अप्लुते'—इन दोनों के व्यावर्त्य होने से 'येन नाप्राप्ति' न्याय का विषय नहीं है ।

उदाहरणस्वरूप 'एहि सुस्रोत३ अत्र स्नाहि', यहाँ 'सुस्रोतः' तक एक वाक्य है, 'अत्र' से दूसरा वाक्य है । इस प्रकार प्लुत का निमित्तवाक्य एक ही है । उत्व के लिए दोनों वाक्यों के वर्णों की आवश्यकता है । अतः अन्तरङ्गपरिभाषा से प्लुत की असिद्धता के अप्राप्ति-स्थल में अप्लुत का व्यावर्त्य मिलने से 'येन नाप्राप्ति' न्यायमूलक असिद्धत्व का एतत्प्रयुक्त बाध नहीं होता ।

'रोः' इत्युकारानुबन्धग्रहणान्नेह—प्रातरत्र । प्रातर्गच्छ ।

देवास् + इह इति स्थिते । रुत्वम् ॥

१६७. भोभगोअघोअपूर्वस्य योऽशि । ८ । ३ । १७ । **एतत्पूर्वस्य रोर्यादेशः स्यादशि परे। असन्धिः सौत्रः । 'लोपः शाकल्यस्य' (सू० ६७) । देवा इह, देवायिह ।**

उकारानुबन्धेति । **उकारेत्सञ्ज्ञकरेफस्येत्यर्थ इति भावः। तेन 'देवरुहि' इत्यादौ न दोषः ॥**

भोभगो (८ । ३ । १७) **'रोः सुपि' (८ । ३ । १६) इत्यतो रोरिति वर्त्तते; न तु 'रो रि' (८ । ३ । १४) इत्यतो र इति; 'प्रातरत्र' इत्यादावतिप्रसङ्गात् । अशब्दान्तद्वन्द्वेन पूर्वशब्दस्य बहुव्रीहिमभिप्रेत्याह**—एतत्पूर्वस्येति ।

नन्वेवं पूर्वरूपापत्तिरत आह—असन्धिरिति । **भगोऽघोशब्दौकारयोरकाराभ्यां प्राप्तपूर्वरूपात्मकसन्धिकार्याभाव इत्यर्थः। इदं प्राचामनुरोधेन । वस्तुतः सूत्रे रान्तानामेवानुकरणमसन्धिर्न्याय्य एवेति बोद्धव्यम् ॥**

भोभगोअघो अपूर्वस्य योऽशि ॥ प्रातरत्रेत्यत्र यत्ववारणाय रोर्यादेशो विधीयते, न तु रेफमात्रस्य, तदाह—**रोः सुपीति ।** भोश्च भगोश्च अघोश्चाकारश्चेत्येव द्वन्द्वे कृते भो भगो अघो अकाराः ते पूर्वे यस्मात् तस्येत्येवं बहुव्रीहौ तस्य साधुत्वम् । सौत्रत्वात् पूर्वरूपात्मकः सन्धिर्न । अथवा एते सान्ता निपाता इति सन्धेः प्राप्तिरेव नेति । सूत्रे अश्ग्रहणाभावे देवाः सन्ति अत्रापि यादेशापत्तिः । न च यत्वस्यासिद्धत्वात् विसर्गे रोरभावात् यत्वाप्राप्तौ अश्ग्रहणं व्यर्थ मिति वाच्यम्; स्थानिवद्भावेन विसर्गेरुत्वधर्मानियनाद् यत्वस्य प्राप्तः दुर्वारत्वात् । विसर्गे रेफस्य स्थानितायाः सत्त्वेन तस्य अल्मात्रवृत्तित्वेन स्थानिवद्भावस्य निषेधः प्राप्नोतीति तु नाशङ्कनीयम्; रोरिति ससुदायस्य आश्रयणात् । रुत्वं च रेफे

उकारानुबन्धेति । 'उकारः अनुबन्धः इत् यस्य'—इस प्रकार बहुव्रीहि समास है । इत्संज्ञक उकार वाले रेफ को उत्व होता है । इसीलिए 'देव रुहि' यहाँ रु धातु के रु को 'हि' के पर में रहने पर उत्व नहीं हुआ; क्योंकि यहाँ रु इत्संज्ञक उकार वाला नहीं है ॥

भोभगोअघोअपूर्वस्य योऽशि ॥ 'रोः सुपि' इस सूत्र से रु की अनुवृत्ति होती है, 'रो रि' इससे र् की अनुवृत्ति नहीं होती । यदि र् की अनुवृत्ति होगी तो 'प्रातरत्र' में भी रेफ को यत्व हो जायगा । रु को यत्वविधान करने पर यहाँ रु होने से यत्व नहीं हुआ । 'भो भगो अघो अ' एतत्पर्यन्त द्वन्द्व समास करने के बाद 'भो भगो अघो आः'—एते पूर्वे यस्य' इस प्रकार बहुव्रीहि समास है, इस आशय से लिखते हैं—एतत्पूर्वस्येति । 'भगो' के ओकार का 'अघो' के अकार के साथ एवं अघो के ओकार का अकार के साथ पूर्वरूपसन्धि सौत्र के कारण नहीं हुई ।

सौत्रत्वात् सन्धि के अभाव का कथन प्राचीनों के अनुरोध से है । वस्तुतः भोस् भगोस् अघोस्—इस प्रकार सान्त के अनुकरण का सूत्र में निर्देश किया गया है । अतः पूर्वरूप की प्राप्ति ही न होने से असन्धि युक्त ही है ।

अशि किम् ? देवाः सन्ति । यद्यपीह यत्वस्यासिद्धत्वाद्विसर्गो लभ्यते; तथापि विसर्गस्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात् । न ह्ययमल्विधिः । 'रोः' इति समुदायरूपाश्रयणात् ।

न ह्ययमिति । **इदमर्वाचामनुसारेण** । भाष्ये तु **रेफस्य विसर्गस्थानित्वेन तद्वृत्तिरुत्वाश्रयमपीदमल्विधिरेव, स्थान्यल्वृत्तिधर्माश्रयत्वात् । 'अग्रहीत्' इत्यत्र च दीर्घे लोपे च इट्त्वेनैव निवेश इति विशेषः । अतः 'पयःसु' इत्यादौ दोषः ।** तत्र हि 'रोः सुपि' उकारे च वर्तते, अत अल्मात्रवृत्तिधर्मो नेति प्राचामाशयः । तदाह–**नह्ययमल्विधिरिति** ।

नवीनास्तु विसर्गस्य स्थानितां रेफमात्रे मन्यन्ते; भाष्येऽपि तथैव स्वीकारात् । तथा च विसर्गस्थानिरूपाल्मात्रवृत्तिधर्मनिमित्तकत्वाद् यत्नविधौ निषेधेन स्थानिवद्भावाप्रसक्त्या यत्वाप्राप्तेः । अग्रहीदित्यत्र तु 'ग्रहोऽलिटि दीर्घः' इति दीर्घविधौ इटः स्थानित्वेन उपादानात् स्थान्याकाङ्क्षायाः शक्त्या 'अचश्च' इत्यस्याः परिभाषाया अनुपस्थित्या सूत्रोपात्तधर्मस्य स्थानितावच्छेदकतया इट्त्वस्य अल्मात्रवृत्तिधर्मत्वाभावेन स्थानिवद्भावस्य निषेधासम्भवात् सिचो लोपः सिद्धः ।

'धिन्वन्ति' इत्यादिसिद्धये अनल्विधावित्यस्य अल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपिताऽऽदेशताश्रयधर्मिकारोपप्रकारीभूतधर्मेण साक्षादवच्छिन्नोद्देश्यताके विधौ स्थानिवन्नेत्यर्थः स्वीकृतः । तथा च अल्त्वव्याप्यरेफत्वावच्छिन्नस्थानितानिरूपिता या विसर्गनिष्ठा आदेशता, तद्धर्मिकः विसर्गधार्मिकः आरोपः 'विसर्गो रुत्ववान् भवतु' तादृशारोपप्रकारीभूतो धर्मः रुत्वम्, तेन रुत्वेन साक्षादवच्छिन्ना उद्देश्यता रोर्यादेश इत्यर्थक- 'भो भगो' इति सूत्रस्य, तस्मिन् कर्त्तव्ये न स्थानिवत् । अग्रहीदित्यत्र तु इटः 'ग्रहोऽलिटि' इत्यस्य दीर्घस्थानिता इटो दीर्घ इत्यर्थेन इट्त्वेन । इट्त्वं च नाल्त्वव्याप्यो धर्मः । अतएवोक्तं भाष्ये—'विशिष्टं ह्येषोऽनलमाश्रयते इटं नाम' इति । एवञ्च अल्त्वव्याप्यधर्मावच्छिन्ना स्थानिता नास्ति, अतो निषेधाप्रवृत्तेः स्थानिवद्भावप्रवृत्त्या इट्त्वसत्त्वात् सिचो लोपः सिध्यतीति भावः । इदमेव भाष्ये 'तु' इत्यादिना ग्रन्थेऽभिहितम् ।

स्वमते अश्ग्रहणस्य प्रयोजनमाह—**पयःसु इति** । 'रोः सुपि' इत्यस्य सप्तमीबहु-

---

इदमर्वाचामिति । 'देवाः सन्ति' में विसर्ग होने पर रु न होने के कारण 'भो भगो' से यत्व की प्राप्ति नहीं होती, अतः स्थानिवद्भाव नहीं होगा । 'अनल्विधौ' इससे प्रतिषेध हो जाने से स्थानिवद्भाव से रुत्व नहीं हो सकता । इसका समाधान **'नहि अयम्'** इत्यादि से परम मूल में किया गया है । अर्थात् र् और उ में रहनेवाला रुत्वधर्म अल्मात्रवृत्ति नहीं, किन्तु दोनों में रहने के कारण अनल्वृत्ति है, अतः निषेधप्राप्ति न होने से स्थानिवद्भाव द्वारा प्राप्त यत्व की व्यावृत्ति के लिए 'भो भगो' इस सूत्र में अश्ग्रहण आवश्यक है ।

भाष्ये तु इति । वस्तुतः अश् ग्रहण का प्रयोजन यहाँ नहीं है । रेफमात्र का विसर्गस्थानितया उपादान होने से विसर्ग की स्थानिता रेफत्वावच्छिन्न है । अल्त्वव्याप्यधर्म रेफत्व, तदवच्छिन्न स्थानिता रेफ की, तन्निरूपिता आदेशता विसर्ग में; तद्धर्मिक आरोप 'विसर्गः रुत्ववाद् भवतु' इत्याकारक है, इस आरोप में प्रकारीभूत धर्म है रुत्व, तादृशरुत्वावच्छिन्नोद्देश्यताक कार्य है यत्व, इसके करने के लिए स्थानिवद्भाव नहीं होगा । अतः 'देवाः सन्ति'

(८ । ३ । १६) इति विसर्गः । नियमशास्त्राणि च विधायकान्येव वाच्यवृत्त्या । आर्थिकार्थमदाय तु निषेधकानीति । तत्रापि रो रेफस्य विसर्ग इत्यर्थे त्वश्ग्रहणं व्यर्थमित्युक्तम् ।

नन्वेवं 'हे राम' इत्यादौ सम्बुद्ध्यवयवस्य हलः सस्य लोपे तद्वृत्तिसुप्त्वस्याल्-

---

वचने रोरेव विसर्गो नान्यस्येत्येवं नियमेन रुत्वावच्छिन्नस्थानितायाः अल्मात्रवृत्तिधर्मावच्छिन्नत्वाभावेन अनल्विधावित्यस्याप्रवृत्त्या स्थानिवद्भावेन प्राप्तस्य यत्वस्य वारणाय अश्ग्रहणं सूत्रे आवश्यकम् । ननु नियमशास्त्राणां निषेधमुखेन प्रवृत्तौ गीर्षु, पूर्षु इत्यादौ विसर्गव्यावृत्तौ तात्पर्यं न तु पयःसु, यशःसु इत्यादौ विसर्गविधाने; विसर्गस्य 'खरवसानयोः' इत्यनेनैव सिद्धत्वात् । तथा च अल्विधाविति निषेधः प्राप्नोत्येवेत्यत आह—**नियमशास्त्राणीति** । नियमशास्त्राणि विधायकानि, निषेधस्तु फलितार्थः ।

इसका प्रत्युदाहरण नहीं है । किन्तु 'पयःसु' देना चाहिए । यहाँ 'रोः सुपि' इस सूत्र से विसर्ग है । इसमें स्थानितया रु का उपादान होने से अल्त्वव्याप्यधर्म रुत्व नहीं है । इसलिये अल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपिता आदेशता भी नही हुई । अतः निषेध की प्राप्ति न होने से स्थानिवद्भाव से रुत्वधर्म के अतिदेश द्वारा यत्व की प्राप्ति होती है । तन्निवारणार्थ यहाँ अश्ग्रहण किया गया है ।

'अग्रहीत्' । यहाँ जिस प्रकार इकार के स्थान में दीर्घ होने पर भी 'ग्रहोऽलिटि दीर्घः' इस सूत्र में 'इटो दीर्घः' ऐसा अर्थ होने के कारण इट्त्वावच्छिन्ना स्थानिता है । सूत्रोपात्त धर्म ही स्थानिता का अवच्छेदक होता है ।

अतः स्थानिवद्भाव से इट्त्वधर्मातिदेश होने से 'इट ईटि' से अग्रहीत् में सकार का लोप सिद्ध होता है । इसी आशय से भाष्य में 'विशिष्टो ह्येषोऽनलमाश्रयते इटं नाम'—ऐसा लिखा है । उसी प्रकार यहाँ भी 'रोः सुपि' इस सूत्र में स्थानित्वेन रुत्व का उपादान होने से स्थानिता का अवच्छेदक रुत्व है । अतएव अल्त्वव्याप्य धर्म से अवच्छिन्न स्थानिता के यहाँ भी न होने से निषेध की प्राप्ति नहीं है । नियमशास्त्रों द्वारा उन उन कार्यों का विधान होता है । अन्य स्थलों में उन कार्यों की व्यावृत्ति अर्थतः लब्ध होती है । सप्तमीबहुवचन में विसर्ग का विधान 'रोः सुपि' सूत्र से होगा । रु-सम्बन्धी रेफ को ही विसर्ग होने से 'चतुर्षु' इसमें अर्थतः विसर्ग की व्यावृत्ति फलित होती है । 'रोः सुपि' यह सूत्र नियमार्थक है । 'खरवसानयोः' इस सूत्र से पयःसु' इसमें विसर्ग सिद्ध होने से सूत्र व्यर्थ है । अतः 'सप्तमीबहुवचने रोरेव विसर्गो नान्यस्य' इस प्रकार का नियम करता है ।

विधायकान्येव । इसमें एव शब्द अपि के अर्थ में है । निषेधमुखेन प्रवृत्तिपक्ष में निषेधक होते हैं । 'अस्यैव वेदाङ्गत्वम्' इसमें एव अप्यर्थक है । अन्यथा पाणिनिव्याकरण से पूर्व में वेद की पञ्चाङ्गतापत्ति हो जायगी । उसी प्रकार यहाँ भी एव-शब्द अप्यर्थ में है । यदि वहाँ भी 'रो रि इस सूत्र से रेफ पद की अनुवृत्ति कर रु के रेफ को विसर्ग हो'—ऐसा व्याख्यान 'रोः सुपि' इस सूत्र का माना जायगा तो अश् ग्रहण की आवश्यकता नहीं है । यहाँ भी 'अनल्विधौ' की प्रवृत्ति होने से स्थानिवद्भाव नहीं होगा ।

शंका—नन्वेवमिति । इस प्रकार अल्विधित्व के स्वीकार करने पर 'हे राम' इत्यादि

धर्मत्वेन स्थानिवत्त्वाभावे पदत्वासिद्धिरिति चेत् ? न; आनुमानिकादेशस्य रामेत्यस्य स्थानिवद्भावेन सुबन्तत्वस्य तत्प्रयुक्तकार्यस्य वा लाभेन तत्सिद्धेः ।

प्रत्ययलक्षणेनापि न प्रत्ययवृत्तिधर्मलाभः; लक्षणपदोपादानेन प्रत्ययनिमित्तककार्यस्य तन्निमित्तकव्यवहारस्य वाऽतिदेशात् ।

एवं 'दीर्घाहो निदाघः' इत्यादौ हल्ङ्यादिलोपे उक्तरीत्या स्थानिनि जायमानस्यासुपीति रत्वनिषेधस्यादेशे दीर्घाहन्-शब्देऽतिदेशेन प्रवृत्त्या न रेफ इति दिक् ।

प्रत्ययलक्षणेति । प्रत्ययनिमित्तके कार्ये प्रत्ययलक्षणं भवति । अत्र तु सुबन्तस्य पदसंज्ञायां सुप् न निमित्तम्, किन्तु पदसंज्ञाया उद्देश्यमिति न प्रत्ययलक्षणसूत्रप्रवृत्तिः । आनुमानिकस्थान्यादेशभावेनैव निर्वाहो बोध्यः ।

चादीनामाकृतिगणत्वेन तत्र गणे भोस् भगोस् अघोस् इति सान्तान् अन्तर्भाव्य निपातसंज्ञकान् विधाय 'विभाषाभवद्भगवदघवतामोच्चावस्य' इति वार्तिकं प्रत्याख्यातम् ।

स्थलों में सम्बुद्धि के अवयव हल्रूप सकार का लोप होने पर सत्वावच्छिन्न स्थानितानिरूपित जो आदेशताश्रय लोप, तद्धर्मिक आरोपप्रकारीभूत सकारवृत्ति सुप्त्व धर्म के होने से, स्थानिवद्भाव का निषेध होगा । अतः सुबन्त का अभाव होने से पदसंज्ञा नहीं होगी । इसी कारण 'तिङ्ङतिङः' इस सूत्र से निघात नहीं होगा ?

समाधान—स्थानिवद्भाव की प्रवृत्ति श्रौत और आनुमानिक दोनों प्रकार के स्थान्यादेशभाव में होती है । प्रकृत में 'राम सु' इसके स्थान में 'राम' ऐसे आनुमानिक आदेश की कल्पना करने से समुदायत्वावच्छिन्न स्थानिता के होने से अल्त्वव्याप्यधर्मावच्छिन्न स्थानिता नहीं है, अतः स्थानिवृत्ति सुबन्तत्व का अतिदेश होने से पदसंज्ञा सिद्ध हो जायगी । विशेषणतया अलाश्रयण होने से स्थानिवद्भाव नहीं होगा । इसलिए लिखते हैं—**तत्प्रयुक्तकार्यस्य** । अर्थात् कार्यातिदेश मानने से सुबन्तत्व प्रयुक्त पदसंज्ञारूप कार्य का अतिदेश होने से **तत्सिद्धेः** = पदत्व की सिद्धि होती है ।

शंका—'प्रत्ययलोपे' इस सूत्र से प्रत्ययलक्षण के द्वारा पदत्व की सिद्धि हो जायगी । स्थानिवद्भाव के लिए आनुमानिक स्थान्यादेश की कल्पना व्यर्थ है ?

समाधान—प्रत्ययलक्षण में 'लक्षण' शब्द निमित्त अर्थ में है । अतः प्रत्ययनिमित्तक कार्य या प्रत्ययनिमित्तक व्यवहार का अतिदेश होता है । यहाँ पदसंज्ञा में सुप् निमित्त नहीं है । अपि तु सुप्-सहित की पदसंज्ञा होती है । इसलिए प्रत्ययलक्षण की सम्भावना नहीं है ।

इसीप्रकार 'दीर्घाहो निदाघः' में भी 'हल्ङ्याब्भ्यः' इस सूत्र में लोप की स्थानिता सकारमात्र में होने से अल्त्वव्याप्यधर्मावच्छिन्न स्थानिता होने के कारण स्थानिवद्भाव से प्राप्त सुप्त्वातिदेश न होने से 'रोऽसुपि' इस सूत्र से सुब्भिन्न होने के कारण रेफादेश होने पर 'हशि च' से उत्व नहीं होगा । अतः यहाँ भी आनुमानिक स्थान्यादेशभाव की कल्पना करने से 'दीर्घाहन् सु' के स्थान में दीर्घाहन् आदेश होने से अल्त्वव्याप्यधर्मावच्छिन्न स्थानिता नहीं हुई । इसलिए 'अनल्विधौ' इससे निषेध की प्राप्ति होने से स्थानिवद्भाव से सुप्त्वातिदेश होने के कारण सुप्परत्व होने से 'रोऽसुपि' इससे रेफादेश नहीं हुआ ।

भोस्, भगोस्, अघोस्, इति सकारान्ता निपाताः। तेषां रोर्यत्वे कृते।

१६८. व्योर्लघुप्रयत्नतरः शाकटायनस्य। ८। ३। १८। **पदान्त-**

तेषां रोरिति। **इदञ्च निपातानाख्याय 'विभाषा भवद्' (वा०) इति वार्तिकं प्रत्याचक्षाणस्य** वृत्तिकृतो **मतेन।**

परे तु तेषामपि रोरित्यर्थः। अपिना 'विभाषा भवद्भगवदघवतामोच्चावस्य' इति वार्तिकनिष्पन्नसङ्ग्रहः। एषामन्त्यस्य रुः स्यादवस्य चोकारः सम्बुद्धाविति तदर्थः। अवग्रहणसामर्थ्यात् 'अलोऽन्त्यस्य' (१। १। ५२) इति नेति बोद्धव्यम्। वार्त्तिकनिष्पन्नानां त्रयाणां भोस्शब्दनिपातस्य चावश्यकत्वमन्यत्र स्पष्टमित्याहुः॥

व्योर्लघु० (८। ३। १८)॥ **यद्यपि वर्णसमाम्नाये यस्य प्राथम्यात् य्वोरित्युचितम्; तथापि 'लोपो व्योः' (६। १। ६६) इति लोपवारणाय सौत्रत्वमाश्रयणीयं स्यात्, अतो व्योरित्युक्तम्। लघुतरः प्रयत्नो यस्योच्चारणे स लघुप्रयत्नतरः। अन्यपदार्थसम्बन्धोत्तरं वर्तिपदार्थप्रकर्षविवक्षया साधुः।**

अनेन भवदादीनामन्त्यस्य तकारस्य रुत्वम्, अवस्य च ओत्वं सम्बुद्धौ विधीयते। तेन भोर् भगोर् अघोर् इति सिद्धम्। उभयस्यापि सूत्रेऽस्मिन् ग्रहणं बोध्यम्। अत आह— **तेषामपीति। अन्यत्रेति। शब्दरत्ने॥**

व्योर्लघुप्रयत्नतरः शाकटायनस्य॥ 'लघुतरः' इति आन्तरतम्याद् वस्य वः यस्य यः। **वर्तिपदार्थेति।** समासघटकप्रयत्नपदार्थे लघुतरत्वविवक्षा। यथा 'त्यदादीनामः'

तेषां रोरिति। भोस् भगोस् अघोस्—इन निपातों को मानकर 'विभाषाभवद्भगवदघवतामोच्चावस्य' इस वार्तिक के प्रत्याख्याता वृत्तिकार के मत में 'भोस् भगोस् तथा अघोस् सम्बन्धी रु को'—ऐसा व्याख्यान है। अन्य लोगों का मत है कि इनके भी रु को ऐसा समझना चाहिए। इस प्रकार के अर्थ से 'विभाषा भवद्' इस वार्तिक से निष्पादित भोर् भगोर् तथा अघोर् का भी संग्रह होता है। 'इनके अवयव को रु तथा अब को ओकार आदेश होता है'—यह उक्त वार्तिक का अर्थ है। 'अलोऽन्त्यस्य' इस सूत्र द्वारा अन्त्य को ओकारादेश नहीं होता; क्योंकि सूत्र में अल् का साक्षात् स्थानी के रूप में निर्देश किया गया है। वार्तिकनिष्पन्न व निपात दोनों प्रकार से भो भगो अघो इनका स्वीकार करना आवश्यक है। यह अन्यत्र स्पष्ट है॥

'व्योर्लघुप्रयत्नतरः' इति॥ शंका—वर्णसमाम्नाय में यकार का पाठ पहले होने से यकार का निर्देश प्रथम करना उचित था?

समाधान—यकार का पहले निर्देश करने पर 'लोपो व्योर्वलि' इस सूत्र से यकार के लोप की सम्भावना को सौत्र मानकर उसका निराकरण करने का प्रयास करना होगा। अतः विपरीत क्रम से निर्देश किया गया। अब लोप की आशंका नहीं है, क्योंकि वल् आगे नहीं है। जिसके उच्चारण में लघुतर प्रयत्न होता है, उसको 'लघुप्रयत्नतर' शब्द से कहा जाता है। लघु शब्द का प्रयत्न के साथ अन्य पदार्थ में बहुव्रीहि समास करने के बाद लघु में प्रकर्ष की विवक्षा में तरप्-प्रत्ययसमुदायोत्तर यहाँ किया गया है। अन्य पदार्थ से सम्बन्ध के अनन्तर वर्तिपदार्थ = समस्यमानपदार्थ में प्रकर्ष की विवक्षा इस सूत्रनिर्देश के बल पर ही मानी जाती

योर्वकारयकारयोर्लघूच्चारणौ वयौ वा स्तोऽशि परे। यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं जायते स लघूच्चारणः॥

१६९. ओतो गार्ग्यस्य। ८। ३। २०। **ओकारात् परस्य पदान्त-**

प्रयत्ने लघुतरत्वं चैषां शैथिल्यजनकत्वमेव। लघूच्चारणाविति। लघुतरोच्चारणावित्यर्थः। **सूत्रे सौत्रत्वादेकवचनम्। वकारोदाहरणम् 'असावादित्यः' इति वृत्तिः॥**

ओतो (८। ३। २०)॥ **'व्योः' इत्यत्र यकारसाहचर्याद्वकारोऽपि धात्वनवयव एव। अत्राप्यर्थाधिकारात्तथैव। तेन 'स्मृतोवच्युत' इत्यादौ न दोषः, तदाह—**

इत्यत्र त्यदादिपदे बहुव्रीहिसमासोत्तरं समासघटके त्यदादिशब्दे अकारस्यान्वयः। **वृत्तिः** इति। अत्रारुचिबीजं रोरित्यनुवर्त्य रोः स्थाने जायमानयोरेव तादृशौ यकारवकारौ आदेशौ, तेनात्र न प्राप्तिरिति॥

ओतो गार्ग्यस्य॥ 'व्योर्लघु' इति सूत्रे ओकारात् परस्य पदान्तस्य धात्ववयवस्य यकारस्यासम्भवात् तत्साहचर्येण वकारोऽपि धात्वनवयव एव गृह्यते। तथैव 'ओतो गार्ग्यस्य' इत्यत्रापि अर्थाधिकारानुरोधेन ततोऽनुवृत्तस्य वकारस्य धात्वनवयवस्यैव ग्रहणात् स्मृतः उः शम्भुर्येन स स्मृतोः, स्मृतां वाति गच्छति इति स्मृतोवाः, तमाचष्टे णिचि टिलोपे 'स्मृतोव अच्युत' इत्यत्र न वकारलोपः, वकारस्य धात्ववयवत्वात्। **तदाहेति।**

है। अन्यथा समास के बाद पदार्थैकदेशवर्तिपदार्थ में प्रकर्षविवक्षा नहीं हो सकती। इसी प्रकार 'सूक्ष्मवस्त्रतर' शब्द की साधुता भी समझनी चाहिए। अन्यथा सूक्ष्मतरवस्त्र इस प्रकार का प्रयोग होना चाहिए था। इनके उच्चारण में जिह्वाग्रादिक का शैथिल्य-जनकत्व ही प्रयत्न में लघुतरत्व है। 'लघूच्चारणौ' इसका लघुतरोच्चारण में तात्पर्य है।

'लघुप्रयत्नतरः' इसमें एकवचन का निर्देश सूत्र में होने के कारण असाधु नहीं है। वकार-यकार के अनुसार द्विवचननिर्देश करना उचित था। वकार का उदाहरण वृत्तिकार ने 'असावादित्यः' दिया है। असौ + आदित्यः इस दशा में 'एचोऽयवायावः' इस सूत्र से आव् आदेश होने पर वकार इस सूत्र के द्वारा लघुप्रयत्नतर माना जाता है। यहाँ अरुचि का कारण यह है— 'रोः' की अनुवृत्ति होने से रु-स्थानिक यकार वकार को ही 'व्योर्लघु' इस सूत्र से आदेश होन के कारण उक्त प्रयोग में रु-स्थानिक नहीं है। यद्यपि रु-स्थानिक वकार कहीं भी होनें से सूत्रोदाहरण ही असम्भव हो जायगा, तथापि वकारग्रहण 'लोपः शाकल्यस्य' इस सूत्र में अनु- के लिए किया गया है। अतएव उत्तरार्थ है॥

ओतो गार्ग्यस्य॥ व्योर्लघुप्रयत्नतरः'' इस सूत्र में यकार धातु का अनवयव ही लिया जाता है। उसके साहचर्य से वकार भी धात्वनवयव ही लिया जायगा। अतः यादृशार्थक पूर्वसूत्र में पद है तादृशार्थक ही उस पद की उत्तर सूत्र में अनुवृत्ति होती है। एतत्तात्पर्यबोधक अर्थाधिकार के अनुरोध से ''ओतो गार्ग्यस्य'' इस सूत्र में भी धातु के अनवयव वकार का ही ग्रहण होने से स्मृतः उः शम्भुर्येनासौ स्मृतोः—यहाँ 'ओतो णित्' इससे णिद्वद्भाव, 'अचो ञ्णिति' से वृद्धि होने पर इसकी सिद्धि होती है। 'स्मृतां वाति' इस विग्रह में णिच्, टिलोप, विच् करने पर स्मृतोव अच्युत यहाँ 'ओतो गार्ग्यस्य' सूत्र की प्रवृत्ति नहीं होती, क्योंकि वकार धात्ववयव है।

स्यालघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात्। गार्ग्यग्रहणं पूजार्थम्। भो अच्युत। लघुप्रयत्नपक्षे—भोयच्युत।

पदान्तस्य किम्? तोयम्॥

यस्येति। **तादृश-वस्यासम्भवादिति भावः। भोभगो इति तु नानुवर्त्तते; विच्छेदात्। तद्ध्वनयन्वक्ष्यति**–पदान्तस्य किम्? तोयम्' **इति। इदं लघुप्रयत्नयोर्न; गार्ग्यश्रुतेः। तदाह—**अलघुप्रयत्नस्येति। पूजार्थमिति। **व्याख्यानादिति भावः। तादृशश्च भोसादिपूर्वक एवेत्याशयेनाह—भो** अच्युतेति।

भाष्यानुसारिणस्तु—**भो इत्याद्यनुवृत्तेः 'स्मृतोत्' इत्यादौ न दोषः, तस्यानभिधानाच्च। 'अपूर्वस्य' इति तु ओत इत्यनेन विरोधान्न सम्बध्यते। 'लोपः शाकल्यस्य' (८।३।१९) इत्येव 'भोभगो' इत्याद्यनुवृत्या सिद्धे नित्यत्वार्थमिदमित्याहुः॥**

तदभिप्रेत्याह इत्यर्थः। एवञ्च यकारमात्रांशे स्वरितत्वबलात् तन्मात्रमनुवर्तते इति तात्पर्यमत उक्तम्–**यस्येति। तादृशेति। ओकारात्परस्य पदान्तस्य धात्वनवयवस्य वकारस्येत्यर्थः। विच्छेदादिति।** 'लोपः शाकल्यस्य' इत्यत्रास्य अनुवृत्तेः विच्छेदात्। तत्र हि शाकल्यस्येत्यस्य सत्त्वेन शाकल्यमते लोपविधानाद् भोसादिस्थले तु गार्ग्यादिमतेऽपि लोपस्य भो गच्छेत्यादौ दृष्टत्वेन अनुवृत्तौ विरोधात् तत्र तेषां नानुवृत्तिरिति।

'लोपः शाकल्यस्य' इत्यत्र 'भो भगो अघो' इति त्रयाणामनुवर्तनेन विकल्पेन लोपे सिद्धे नित्यलोपार्थं सूत्रम्। अत्र गार्ग्यग्रहणं पूजार्थं न तु विकल्पार्थमिति, तदाह–**व्याख्यानादिति।** भाष्ये व्याख्यानमित्थम्—"किमर्थमिदमुच्यते, न लोपः शाकल्यस्येत्येव सिद्धम्। ओकाराल्लोपवचनं नित्यार्थम्"। इत्यादिरूपाद् व्याख्यानात्॥

यस्येति। ओकार से परे पदान्त धात्वनवयव वकार के असम्भव होने से यकारमात्र का ही उल्लेख है। इस सूत्र में 'भो भगो अघो' इसकी अनुवृत्ति नहीं होती, क्योंकि 'लोपः शाकल्यस्य' में इन पदों का अनुवृत्ति-विच्छेद होने से अग्रिम सूत्र में भी इनकी अनुवृत्ति नहीं होती है। इसी तात्पर्य से परम मूल में पदान्तग्रहण का प्रयोजन दिया है—तोयम्। अन्यथा "भो भगो" आदि पूर्वक न होने के कारण सूत्र की प्राप्ति वारित हो ही जाती, 'पदान्त' इसके प्रत्युदाहरण के रूप में 'तोयम्' का निर्देश असङ्गत हो जायगा।

लघुप्रयत्न यकार वकार को 'ओतो गार्ग्यस्य' इस सूत्र में लोप नहीं होता; क्योंकि लघुप्रयत्न शाकटायन मत में है, गार्ग्य के मत में नहीं। 'ओतो गार्ग्यस्य' इस सूत्र से नित्य ही लोप का विधान है। अन्यथा विकल्प से 'लोपः शाकल्य' से ही लोप सिद्ध हो जाने से इसका वैयर्थ्य हो जाता। गार्ग्यग्रहण विकल्पार्थक नहीं है, किन्तु पूजार्थक है। इसमें भाष्यकार का व्याख्यान ही प्रमाण है। ऐसा अलघुप्रयत्न यकार भो भगो आदि पूर्वक ही मिलेगा। अतः इस आशय से लिखते हैं—**भो अच्युत इति।**

भाष्यानुयायियों के मत में इस सूत्र में भी 'भो भगो' इत्यादि की अनुवृत्ति होने से इनके ओकार से परे य-लोपविधान के कारण 'स्मृतोव् अच्युत' इसमें लोप का प्रसङ्ग नहीं है। वस्तुतः "न पदान्ताः हलोऽणः सन्ति"—इस भाष्य में ऐसे प्रयोगों का अनभिधान है।

१७०. उञि च पदे । ८ । ३ । २१ । अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोप उञि परे । स उ एकाग्निः ।

पदे किम् ? तन्त्रयुतम् । वेञः सम्प्रसारणे रूपम् । यदि तु प्रतिपदोक्तो निपात उञिति ग्रहीष्यते, तर्ह्युत्तरार्थं पदग्रहणम् ॥

उञि च पदे (८ । ३ । २१) ॥ भोइत्यादिपूर्वस्य पूर्वेण सिद्धेराह—अवर्णपूर्वयोरिति । **एतदपि नित्यमेव । अत्रापि गार्ग्यग्रहणानुवृत्त्याऽलघुप्रयत्नस्यैव लोपः । एतेन भोइत्यादिपूर्वे लघुप्रयत्नलोपार्थमत्रापि तदनुवृत्तिरित्यपास्तम् । वकारोदाहरणन्तु 'असा उ एकाग्निः' इति** वृत्तिः । उत्तरार्थमिति । **'ङमो ह्रस्वादचि' (८ । ३ । ३२) इत्यर्थमित्यर्थः । एतत्तत्रैव निरूपितम् ।**

'हलि सर्वेषाम्' इत्यादौ तु न सम्बध्यते; व्यवहिते ङम इत्यत्रैव प्रयोजनकथनपरभाष्यप्रामाण्यात् । अत एव 'लिट्त्सु' इत्यादौ धुडादयः । अन्यथा सादौ पदे इत्यर्थान्न स्युः । अत एव 'माभ्याम्' इत्यादौ 'हलि सर्वेषाम्' इति लोपसिद्धिरिति दिक् ॥

उञि च पदे ॥ 'परमदण्डिनौ' इत्यादौ ङमुटो वारणाय तत्र सूत्रे पदे-ग्रहणानुवृत्तिः कृता । औविभक्तेः अजादिपदत्वाभावात् नुट् न विस्तरेण तस्मिन् सूत्रे प्रतिपादितम् । 'ङः सि धुट'इत्यादौ तु पदे इति नानुवर्तते । भाष्ये 'ङमो ह्रस्वादचि' इति सूत्रे एव तदनुवृत्तेः फलोपन्यासात् 'लिट्त्सु' इत्यादौ धुड् सिध्यति । अन्यथा 'सादौ पदे' इत्यर्थे तत्र न स्यात् । अतएव च मासस्य स्थाने 'पद्दन्नोमास्' इत्यादिना मासादेशे 'हलि सर्वेषाम्' इति लोपः सिध्यति । अन्यथा पदेग्रहणानुवृत्या हलादौ पदे इत्यर्थापत्त्या भ्यामः पदत्वाभावात् सकारस्य लोपो न स्यात् । तथा च माभ्यामिति रूपासिद्धया पदे-ग्रहणानुवृत्तिस्तत्र न कार्येति ॥

इस सूत्र का अवर्णपूर्वक ऐसा अर्थ नहीं है । ओकारान्त के साथ विरोध होने के कारण 'भो भगो' इस सूत्र के 'अपूर्वस्य' का सम्बन्ध नहीं है । लोपः शाकल्यस्य' इस सूत्र में 'भो भगो' सम्पूर्ण सूत्र की अनुवृत्ति करने से भो भगो आदि पूर्वक विकल्प से यकार लोप सिद्ध हो जाता । नित्य लोप विधान के लिए सूत्र का आरम्भ है ।

उञि च पदे ॥ भो भगो तथा अघो पूर्वक यकार का लोप "ओतो गार्ग्यस्य" इस सूत्र से सिद्ध होने से अवर्णपूर्वक यकार वकार के लोप के लिए इस सूत्र का आरम्भ है । इस आशय से परममूल में 'अवर्णपूर्वयोः' इस प्रकार का उल्लेख है । यह सूत्र भी नित्यलोप का विधायक है । इसमें भी गार्ग्य पद की अनुवृत्ति होने से अलघुप्रयत्न का ही लोप होता है ।

'भो' इत्यादि पूर्व में रहने पर लघुप्रयत्न यकार और वकार के लोप के लिए 'भो भगो' आदि की अनुवृत्ति आवश्यक है । 'ओतो गार्ग्यस्य' इस सूत्र से लघुप्रयत्न का लोप नहीं हो सकता; क्योंकि गार्ग्य के मत में लधुप्रयत्न होता ही नहीं । यह कथन यहाँ भी गार्ग्य की अनुवृत्ति होने से असङ्गत समझना चाहिए । वकार के लोप का उदाहरण है—'असा उ एकाग्निः' इसमें 'असौ उ' इस अवस्था में आव् आदेश होने पर वकार का लोप होता है । इस सूत्र में 'पदे' का प्रयोजन 'ङमो ह्रस्वादचि' इस सूत्र में अनुवृत्ति द्वारा 'अजादौ पदे' इस अर्थ का

१७१. हलि सर्वेषाम् । ८ । ३ । २२ । **भोभगोअघोअपूर्वस्य लघ्व-लघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन । भो देवाः । भो लक्ष्मि । भो विद्वद्वृन्द । भगो नमस्ते । अघो याहि । देवा नम्याः । देवा यान्ति ।**

'हलि' किम् ? देवायिह, देवा इह ॥

हलि सर्वेषाम् (८ । ३ । २२) । 'भोभगो' इत्याद्यनुवर्त्तते । तत्रोकारात् परस्य लघुच्चारणस्यैवानेन लोपः । अलघूच्चारणस्य तु 'ओत्' (८ । ३ । २०) इत्येव सिद्धम् । अपूर्वे तूभयोरपि । न चापूर्वालघुप्रत्ने अस्यासिद्धत्वात् 'लोपः शाकल्यस्य' (८ । ३ ।१९) इति प्राप्नोतीति वाच्यम्; लघुप्रयत्नस्यैवानेन लोपे 'व्योः' (८ । ३ । १८) इति सूत्रेऽचीति करणेन हलि विधानाभावेनैव सिद्धावस्य सूत्रस्य वैयर्थ्यापत्त्या तद्बाधात् ।

न चालघुप्रयत्नयोरेव लोपः स्यात्, व्योरित्यर्थाधिकारादिति वाच्यम्; ऋषि-मात्रग्रहणार्थस्य सर्वेषामित्यस्य वैयर्थ्यापत्तेः, विकल्पस्य विच्छिन्नत्वेन नित्यत्वसिद्धेः । अत्र च यकार एवानुवर्त्तते, न वकारः । वृत्तौ तथैवोक्तेः, फलाभावात् 'अव्यपरे' इत्यादि-निर्देशाच्च । अन्यथा तत्र सौत्रत्वाद्याश्रयणीयं स्यात्, तदाह—लघ्वलघूच्चारणस्येति ।

हलि सर्वेषाम् ॥ उभयोरपीति । लघ्वलघूच्चारणयोरपि । विकल्पस्य = शाकल्य-पदप्रतिपाद्यस्य । **फलाभावादिति ।** 'न पदान्ता हलोऽणः सन्ति' इति भाष्यात् वृक्षवादे-रनभिधानात् । अस्मिन् सूत्रे वकारानुवृत्तौ 'अव्यपरे' इति निर्देशोऽसङ्गतः स्यात्; यकारस्य हल्त्वेन तस्मिन् परे वलोपप्रसङ्गात् ॥

लाभ है । 'हलि सर्वेषाम्'' इस सूत्र में 'पदे' ग्रहण की अनुवृत्ति नही है; क्योंकि भाष्यकार ने व्यवहित 'ङमो ह्रस्वादचि' इसी सूत्र में इसकी अनुवृत्ति का फल-निर्देश किया है । उसके अनुसार अव्यवहित में उसकी अनुवृत्ति का फल नहीं है । इसीलिए अपदादि सकार को भी 'लिट्त्सु' में धुट् का आगम 'डः सि धुट्' इस सूत्र से सिद्ध होता है ।

अन्यथा सादि पद में ऐसा अर्थ होने पर वहां सुमात्र पद न होने से सादि पद न होने के कारण धुट् नहीं होगा । अतएव मास शब्द को 'पद्दन्नोमास्' इस सूत्र से मास् आदेश होने पर रुत्व यत्व होने के बाद 'हलि सर्वेषाम्' इस सूत्र से यकार का लोप सिद्ध होता है । अन्यथा हलादि पद ऐसा अर्थ होने पर भ्याम् मात्र पद नहीं हैं । अतः य का लोप नहीं होगा ।

हलि सर्वेषाम् ॥ इसमें 'भो भगो' इत्यादि की अनुवृत्ति है । ओकार से परे लघूच्चारण का ही लोप होता है । अलघूच्चारण का 'ओतो गार्ग्यस्य' इस सूत्र से लोप होता है । अवर्ण पूर्व में रहने पर लघूच्चारण तथा अलघूच्चारण दोनों प्रकार के यकार का लोप इससे इष्ट है ॥

शंका—अवर्णपूर्वक अलघुप्रयत्न में इसको असिद्ध कर 'लोपः' सूत्र से लोप प्राप्त होगा ?

समाधान—'हलि सर्वेषाम्' इस सूत्र से लघुप्रयत्न का ही लोप मानने पर 'व्यर्लघु' इस सूत्र में 'अचि' ऐसा पाठ कर देने से हल् में लघुप्रयत्न का विधान न होने से निर्वाह हो जाता; 'हलि सर्वेषाम्' इस सूत्र की क्या आवश्यकता थी ! अतः आरम्भसामर्थ्य से यह सूत्र ''लोपः शाकल्यस्य'' का बाधक है । यों, दोनों प्रकार के यकार वकार का लोप इष्ट है ।

१७२. रोऽसुपि । ८ । २ । ६९ । **अह्नो रेफादेशः स्यान्न तु सुपि । रोरपवादः । अहरहः । अहर्गणः ।**

न तु सुपीति । **पर्युदासे हि सुप्सदृशे प्रत्यये एव स्यात् । एवञ्च 'अहर्भाति' इत्यत्र न स्यात् । यदि तु सुब्भिन्ने शब्दे स्यात्, 'दीर्घाहो निदाघः' इत्यत्रापि स्यात् । सुबन्ते-त्यर्थस्तु न, 'उत्तमैकाभ्याम्' इत्यादिनिर्देशैः सप्तमीनिर्दिष्टे प्रत्यये तदन्तविध्यभाव-ज्ञापनात् । लक्ष्यानुरोधेन क्वचित्प्रत्ययग्रहणे शब्दस्वरूपस्य विशेषणताया एवाश्रयणाच्च ।**

रोऽसुपि ॥ सुपि परे रेफादेशो नेत्येवं प्रसज्यप्रतिषेध आश्रीयते, न तु पर्युदासः । तदाश्रयणे सुब्भिन्ने सुप्सदृशे सादृश्यञ्च प्रत्ययत्वेन ग्रहणे प्रत्यये सत्येव रेफादेशः स्यात् । तथा च अहर्गण इत्यत्र गणशब्दे परे रेफादेशो न प्राप्नुयात् ।

ननु सुपः प्रत्ययत्वेन तदादिविशेष्यकतदन्तविधौ सुबन्ते इत्यर्थः कुतो न ?—इति नाशङ्कनीयम् । 'सुपि च' इत्यत्रापि तथा सति तदन्तविधौ सुबन्ते परे दीर्घविधानात् उत्तमैकाभ्यामिति निर्देशासङ्गतिः स्यात्; भ्यामः सुप्त्वेऽपि सुबन्तत्वाभावेन दीर्घा-प्रसक्तेः । तत्सामर्थ्यात् सप्तमीनिर्दिष्टे प्रत्यये तदन्तविधेरभावस्य ज्ञापनेन दोषाभावात् । अथवा क्वचित् प्रत्ययग्रहणे तदादिशब्दस्वरूपस्य विशेषणत्वेन च प्रत्ययस्य विशेष्यत्वेन कल्प्यते । एतन्मूलकमेव 'प्रत्ययग्रहणे चापञ्चम्याः' इति पठ्यते । यत्र पञ्चम्यन्तात्परः प्रत्ययः कार्यान्तरविधानाय परिगृह्यते तत्र तदादिविशेष्यकः तदन्तविधिर्नेत्यर्थः । अतएव 'रदाभ्यां निष्ठातो' इत्यादौ न तदन्तविधिः । अन्यथा रदाभ्यां परस्य निष्ठान्तस्य यस्तकार इत्यर्थे दृषत्तीर्णेत्यादौ धातुतकारस्य ततः पूर्वतकारस्य च नत्वापत्तेः—इत्यादि सर्वं हृदि निधाय आह—**लक्ष्यानुरोधेनेति ।**

शंका—'व्योर्लघु' इस सूत्र में वकार और और यकार अलघुप्रयत्न लिये गये हैं ? अर्थाधिकारानुरोध से उसकी अनुवृत्ति होने पर यहाँ भी अलघुप्रयत्न ही लिया जायगा ।

समाधान—'सर्वेषाम्' इस पद से ऋषिमात्र का संग्रह होता है । अलघुप्रयत्नमात्र के लोप होने पर सकलऋषिसंग्राहक 'सर्वेषाम्' पद की व्यर्थता हो जायगी । अतः लघुप्रयत्न, अलघुप्रयत्न—दोनों का लोप होने पर ही उसकी सार्थकता सिद्ध होती है ।

नित्यत्व के लिए 'सर्वेषाम्' यह पद नहीं है; क्योंकि 'ओतो गार्ग्यस्य' तथा 'उञि च पदे' इन दोनों सूत्रों में शाकल्य पद की अनुवृत्ति न होने से विकल्प अर्थ का विच्छेद हो गया है । इस सूत्र में यकारमात्र की अनुवृत्ति है, वकार की नहीं । **वृत्तिकार** ने ऐसा ही लिखा है । वकार की अनुवृत्ति में कोई फल नहीं है । 'नान्तः पादमव्यपरे' इस सूत्र में वकार का लोप यकार के उत्तर रहने पर नहीं किया । इससे यह निश्चित होता है कि वकार लोप हल् रहने पर नहीं होता । अन्यथा सौत्रत्वात् लोप की व्यावृत्ति में गौरव होगा ॥

रोऽसुपि ।। 'असुपि' इसमें पर्युदास नहीं है, किन्तु प्रसज्यप्रतिषेध है । पर्युदास सदृश का ग्राहक माना गया है । इसलिए 'सुब्भिन्न सुप् के सदृश'—ऐसा अर्थ होने से सादृश्य का प्रत्ययत्वरूप से ग्रहण करने पर 'अहर्भाति' यहाँ सुप् प्रत्यय न रहने से रेफादेश की प्राप्ति नहीं होगी । शब्दत्वरूप से सादृश्य मानने पर 'दीर्घाहो निदाघः' में भी रेफादेश होना चाहिए ।

असुपि किम् ? अहोभ्याम् । अत्र 'अहन्' (सू० ४४३) इति रुत्वम् । रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् (वा०) । अहोरूपम् । गतमहो रात्रिरेषा ।

अत एव 'रदाभ्यां निष्ठा' (८ । २ । ४२) इत्यादौ न दोषः । अहरहरिति । 'नित्यवीप्सयोः' (८ । १ । ४) इति द्वित्वम् । 'न लुमता' (१ । १ । ६३) इति निषेधात् सुप्परत्वाभावः ।

गतमहो रात्रिरिति । केचित्तु भाष्ये आतिदेशिकस्याहोरात्रस्यैवोदाहरणात्, 'न लोपः प्रतिपदिकान्तस्य' (८ । २ । ७) इति सूत्रे 'न हि रूपरात्ररथन्तरेषु रो रे वा-

---

केचित्तु इति । 'रूपरात्रिरथन्तरेषु' इत्येवं वार्त्तिकपाठे "गतम् अहो रात्रिरेषा" अत्र रात्रिशब्दे परे अहन् इत्येतद्घटकनकारस्य रुत्वं वार्त्तिकेन क्रियते । अन्यथा 'रोऽसुपि' इति रेफादेशे उत्वं न स्यात् । अहोरात्रमित्यत्र हलन्तस्य रात्रशब्दस्य एकदेश-विकृतन्यायेन रात्रिशब्दत्वातिदेशात् तत्रापि रुत्वं सिध्यति—इति परममूले उक्तम् । केचित्—'न लोपः' इति सूत्रे रूपरात्र इत्येवं पाठस्य भाष्ये दर्शनात् अहोरात्रमत्र एकदेश-विकृतन्यायं विनैव रुत्वं सिद्धम् । गतमहोरात्रिरितीदृशानां प्रयोगाणामनभिधानं बोध्यम्—इति वदन्ति ।

शंका—सुप् यह प्रत्यय है । अतः प्रत्ययग्रहणपरिभाषा से तदन्तविधि होने के कारण 'सुबन्त के सदृश'—ऐसा अर्थ होने से 'अहर्भाति' इसमें रेफादेश होगा । 'दीर्घाहो निदाघः' यहाँ 'निदाघः' सुबन्त से भिन्न न होने से रेफादेश नहीं होगा । यों पर्युदासपक्ष में दोष नहीं है ?

समाधान—'सुपि च' इस सूत्र में सुप् प्रत्यय होने से तदादि तदन्त की उपस्थिति होने के कारण 'सुबन्त तदादि के पर में रहने पर अकारान्त अङ्ग को दीर्घ होता है'—इस प्रकार का अर्थ होगा । 'उत्तमैकाभ्याम्' इसमें 'भ्याम्' सुबन्त तदादि न होने से दीर्घादेश के अभाव के कारण सूत्र में दीर्घनिर्देश असङ्गत हो जायगा । अतः उसके सामर्थ्य से सप्तम्यन्त प्रत्ययवाचक पद में तदन्त-विधि का अभाव बोधित होता है । इस कारण 'सुबन्त'—ऐसा अर्थ नहीं हो सकता ।

लक्ष्यानुरोध से विशेषणविशेष्यभाव के विपर्यास की कल्पना करने मात्र से भी तदन्त-विधि का सुप् में अभाव हो जाने से ज्ञापन की आवश्यकता नहीं है । सुप् को विशेष्य और शब्द-स्वरूप को विशेषण करने पर सुप् विशेषण नहीं है । अतः तदन्त का बोधक नहीं होगा । इसी प्रकार 'रदाभ्यां' इस सूत्र में तदन्तविधि के द्वारा 'निष्ठान्त तदादि' ऐसा अर्थ नहीं हुआ । अन्यथा 'दृषत्तीर्णा' इसमें धातु-तकार को नकार हो जायगा । इसी तात्पर्य से 'प्रत्ययग्रहणे चा-पञ्चम्याः' यह परिभाषा है । पञ्चम्यन्त से पर कार्यान्तर के विधान के लिए जहाँ प्रत्यय का उपादान है वहाँ तदन्तविधि नहीं होती—यह परिभाषा का अर्थ है । (परिभाषेन्दुशेखर में विस्तृत निरूपण देखिये) ।

शंका—'अहरहः' इसमें 'नित्यवीप्सयोः' इस सूत्र से द्वित्व होता है । प्रत्ययलक्षण से स विभक्ति जो लुप् से लुप्त है उसका अतिदेश होने के कारण सुप्परत्व होने से रेफादेश नहीं होगा ?

समाधान—'न लुमता' में प्रत्ययलक्षणप्रतिषेध हो जाने से सुप्परत्वाभाव स्पष्ट है ।

गतमहो इति । 'रूपरात्रिरथन्तरेषु' इस वार्तिक से अहन् के नकार को रुत्व होने से

एकदेशविकृतस्यानन्यत्वाद्—अहोरात्रः । अहोरथन्तरम् ।

अह्रादीनां पत्यादिषु वा रेफः (वा०) । विसर्गापवादः । अहर्पतिः । गीर्पतिः । धूर्पतिः । पक्षे विसर्गोपध्मानीयौ ॥

१७३. रो रि । ८ । ३ । १४ । **रेफस्य रेफे परे लोपः स्यात् ॥**

१७४. ढ्रलोपे पूर्वस्य दीर्घोऽणः । ६ । ३ । १११ । **ढ-रेफौ लोपयतीति**

विशेषोऽस्ति' इत्यत्र प्रायेण रात्रेति पाठाच्चेदृशानामनभिधानमेवेत्याहुः ।

अनन्यत्वादिति । **रात्रिशब्दान्तात् समासादचि समासान्ते 'यस्येति च' (६ । ४ । १४८) इति लोपेऽपि रात्रिशब्दत्वाक्षतेरिति भावः । अनुवादे रेफविशिष्टस्योपादानाद्रेफस्य रेफविधानं व्यर्थमत आह्**—विसर्गापवाद इति ॥

ढ्रलोपे पूर्वस्य ॥ **नायं तत्पुरुषः; अनीयरि, 'चचार' इत्यादौ च दोषापत्तेः । नापि बहुव्रीहिर्व्यधिकरणत्वात् । अतो णिजन्तात्कर्मण्युपपदसमास** इत्याह्—ढरेफावित्यादि ।

प्रायेणेति । अनेन पाठान्तरमपीति सूच्यते । अतएव मतमिदं न समीचीनमिति केचिदिति पदेन द्योतितम् । समासान्तप्रत्ययस्य विकारत्वेन कथमेकदेशविकृतन्यायप्राप्तिरत आह—**रात्रिशब्दत्वेति** । समाहारद्वन्द्वात् हलन्तरात्रशब्दे इत्यर्थः । अक परिमाणे = परिच्छिन्नपरिमाणे एकदेशविकृतन्यायस्याप्रवृत्तेः स्थानिवद्भावेन रात्रिशब्दत्वं रात्रशब्दे अतिदेष्टव्यम् ॥

ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥ नायमिति । ढ्रयोर्लोप इति तत्पुरुषे समासे 'ढकाररेफयो-

---

उत्व हो गया । 'अहोरात्रः' इसमें एकदेशविकृतन्याय से रात्र् हलन्त में रात्रिशब्दाति देश मानकर रुत्व होता है; क्योंकि वार्तिक में 'रात्रि' शब्द का पाठ है ।

केचित्तु इति । उक्त वार्तिक में रात्र ऐसा ही पाठ है । इसलिए अहोरात्र इसमें एकदेशविकृतन्याय से अतिदेश के विना ही रुत्व सिद्ध है । 'गतमहोरात्रिरेषा' इस प्रयोग का अनभिधान है । भाष्य में 'अहोरात्र' को ही उदाहरण रूप में दिया है । 'नलोपः' इस सूत्र में 'नहि रूपरात्ररथन्तरेषु, रोरेवाविशेषोऽस्ति' यहाँ 'रात्र' ऐसा पाठ देखने से उक्त कल्पना ही उचित है ।

अनन्य इति । 'रात्र्' इसमें रात्रिशब्दत्व की क्षति नहीं है । अहरादि सभी रेफान्त होने से रेफ को रेफविधान व्यर्थ है । इसलिए विसर्ग के बाध के लिए रेफ को रेफ का विधान किया गया है । इसी आशय से विसर्गापवाद इसको कहा है ॥

ढ्रलोपे पूर्वस्य ॥ 'ढ्रयोर्लोपः' इस प्रकार तत्पुरुष मानने पर 'पचनीयम्' यहाँ पच् धातु से अनीयर् प्रत्यय करने पर रेफ की इत्संज्ञा तथा लोप होने से दीर्घ हो जायगा । एवं 'चचार' में चर के अभ्यास रेफ के लोप होने के कारण ढ्रलोपे' सूत्र से दीर्घ होना चाहिए । इन दोषों से बचाने के लिए 'ढ्रयोर्लोपो यस्मिन्' इस प्रकार बहुव्रीहि समास स्वीकार करने पर समानाधिकरणों (प्रथमान्तों) को बहुव्रीहि होता है, व्यधिकरण को बहुव्रीहि नहीं हो सकेगा । इसलिए "ढ्रौ लोपयति" इस प्रकार णिजन्त लुप् धातु से 'कर्मण्यण्' इससे अण् प्रत्यय एवं "उपपदमतिङ्" इस से उपपदसमास करने पर उक्त रूप की सिद्धि होती है ।

तथा, तस्मिन्न वर्णेऽर्थाड्ढकाररेफात्मके परे पूर्वस्याणो दीर्घः स्यात्। पुना रमते। हरी रम्यः। शम्भू राजते।

अणः किम् ? तृढः। वृढः। 'तृहू हिंसायाम्'। 'वृहू उद्यमने'। पूर्वग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्यैव दीर्घार्थम्। अजर्घाः। लीढः।

भाष्ये तु **व्यधिकरणबहुव्रीहिरेव दर्शितः। न च 'अजर्घाः' इत्यादौ 'सिपि धातोः** (८।२।७४) इति **रुत्वस्य, 'लीढः'** इत्यादौ **ढत्वादीनाम्, 'पितू राज्यम्' इत्यादौ संयोगान्तलोपस्यासिद्धत्वात् कथं दीर्घ इति वाच्यम्; ढग्रहणेन लण्सूत्रे 'अजर्घाः' इति भाष्योदाहरणेन च तत्तच्छास्त्रैकवाक्यतापन्नपूर्वत्रासिद्धमितिसूत्रास्थापूर्वग्रहणेनैतत्सूत्राग्रहणबोधनात्।**

अणः किमिति। **अच इत्येव सिद्धमिति प्रश्नः। 'तृंहू' इति पाठे 'नकारजावनुस्वारपञ्चमौ' इति वृद्धोक्तेः 'अनिदिताम्'** (६। ४। २४) **इति नलोपे 'तृढः' इति रूपम्। अत्राण् पूर्वेणैव; व्याख्यानात्।**

लोपे सति 'अणो दीर्घः' इत्यर्थापत्त्या पचनीयमित्यादौ अनीयरि प्रत्यये कृते, एवं 'चचार' इत्यत्र रेफस्य अभ्यासस्य लोपे दीर्घः स्यात्, उभयत्र रेफस्य लोपात्। नापि ढ्रयोर्लोपो यस्मादिति बहुव्रीहिः; प्रथमान्तानां बहुव्रीहेः मुख्यतया व्यधिकरणस्य तस्यानुचितत्वात्; अतो ढ्रौ लोपयतीति 'कर्मण्यण्' इति सूत्रेण अणि प्रत्यये 'उपपदमतिङ्' इत्यनेन समासे तस्य सिद्धिः।

"सप्तमीविशेषणे" इत्यनेन सप्तम्यन्तस्य बहुव्रीहेः पूर्वनिपातविधानेन व्यधिकरणबहुव्रीहेरपि साधुत्वमिति व्यधिकरणबहुव्रीहिः भाष्ये दर्शितः।

लीढ इति। "ढो ढे लोपः" इत्यस्यासिद्धत्वेन ढलोप एव दीर्घदृष्ट्या न जातः। एवं पितुरत्र संयोगान्तलोपस्यासिद्धत्वेन मध्ये सकारेण व्यवधानात् पितूराज्यमित्यत्र रेफपरकत्वाभावात् दीर्घः कथमिति शङ्कितम्। रेफग्रहणस्य पुनारमते इत्यादौ चारितार्थ्यात् ढग्रहणमात्रस्य वैयर्थ्यापत्त्या अजर्घाभाष्योदाहरणाच्च 'सिपि धातो रुर्वा' 'ढो ढे लोपः' इत्यादौ उपस्थितेन पूर्वत्रासिद्धमिति सूत्रघटकपूर्वशब्देन 'ढ्रलोपे' इति सूत्रस्य ग्रहणाभावस्य बोधनात्। तथा च एतत्सूत्रदृष्ट्या तेषामसिद्धत्वाभावेन पूर्वोक्तदोषानवतारादित्याह–**ढग्रहणेनेति।**

अच इत्येवेति। '-अचश्च' इति परिभाषासूत्रबलादिह अच इत्यस्य उपस्थित्यां अच इत्यर्थलाभात् अण्ग्रहणं व्यर्थम्। **नकारजेति।**

नकारजावनुस्वारपञ्चमौ झलि धातुषु।
सकारजः शकारश्चे षाट्टवर्गस्तवर्गजः॥

भाष्य में व्यधिकरणबहुव्रीहि स्वीकार किया है। "सप्तमीविशेषणे बहुव्रीहौ" इस सूत्र से सप्तम्यन्त का पूर्वनिपात बहुव्रीहि में बोधित किया है। सप्तम्यन्त के साथ व्यधिकरण होने के कारण बहुव्रीहि समास प्राप्त ही नहीं है। पुनः पूर्वनिपातविधान का सार्थक्य कैसे हो सकता है ! अतः इससे यह कल्पना सहज में की जाती है कि व्यधिकरण बहुव्रीहि भी होता है।

मनस + रथः—इत्यत्र रुत्वे कृते 'हशि च' (सू० १६६) इत्युत्वे 'रो रि' (सू० १७३) इति लोपे च प्राप्ते—

१७५. विप्रतिषेधे परं कार्यम् । १ । ४ । २ ।

विप्रतिषेधे परं कार्यम् ॥ विप्रतिपूर्वात् कर्मव्यतिहारे वर्त्तमानात् सेधतेर्घञि परस्परविरोधार्थो विप्रतिषेधशब्दः,तत्र नित्यस्यावश्यकतयाऽन्तरङ्गस्य ज्ञापकादिनाऽपवादस्य

इति सम्पूर्णं वचनं शब्दरत्ने उद्धृतम् । तृढ इत्यत्र दीर्घव्यावृत्तये अण्-ग्रहणम् । अचि तु इहापि दीर्घः स्यात् । अण् चात्र पूर्वेण णकारेण । तत्र ऋकारस्य पाठाभावेनाण्त्वाभावः । **व्याख्यानादिति** । यदि परेण णकारेण सूत्रेऽस्मिन् अण्प्रत्याहारः स्यात् तदा हलि दीर्घविधाने फलाभावात् अत्र एव परिशेषात् दीर्घे 'अचश्च' इति परिभाषयैव अचो लाभे अण्ग्रहणस्य वैयर्थ्यात् व्याख्यानात् पूर्वेण अण्प्रत्याहारो गृह्यते इति भावः ॥

विप्रतिषेधे परं कार्यम् ॥ विप्रतिपूर्वकात् षिध गत्यामित्यतो भावे घञि कृते परस्परविरोधार्थो विप्रतिषेधशब्दः निष्पद्यते । कृते अकृते च उभयप्राप्तेः सत्त्वेन अवश्यं नित्यस्य शास्त्रस्य जायमानत्वेन अनित्यसूत्रापेक्षया प्राबल्यात् अन्तरङ्गस्य बहिरङ्गापेक्षया प्राबल्यस्य लोकन्यायेन शास्त्रेण च बोधितत्वेन प्राबल्यात् अपवादस्य शास्त्रस्य च वैयर्थ्यदिवं उत्सर्गशास्त्रस्य बाधकत्वात् एतद्विषयातिरिक्तोऽस्य सूत्रस्य विषय इत्याह—**नित्यस्येति** ।

शंका—अजर्घा[1] इसमें 'सिपि धातो रुर्वा' इस सूत्र से विहित रुत्व, लीढः[2] इसमें ढत्व 'पितूराज्यम्' इसमें "ढ्रलोपे" इस सूत्र की दृष्टि में संयोगान्त लोप के असिद्ध हो जाने से दीर्घ नहीं होगा; क्योंकि असिद्ध होने से ढकार तथा रेफ का लोप हुआ ही नहीं है ।

समाधान—इस सूत्र में ढकारोपपादनसामर्थ्य से 'अजर्घा' इस भाष्योदाहरण से तत्तत्सूत्र के साथ एकवाक्यतापन्न "पूर्वत्रासिद्धम्" इस सूत्र के पूर्व शब्द से ढ्रलोपसूत्र का ग्रहण नहीं होता । अतः इसकी दृष्टि में उन सूत्रों की असिद्धता न होने से दीर्घ हो जायगा ।

शंका—'अचश्च' इस परिभाषा ये दीर्घविधि में 'अचः' की उपस्थिति हो ही, जायगी, सूत्र में अण्-ग्रहण व्यर्थ है ?

समाधान—तृंह ऐसा धातुपाठ होने पर तृंह इसमें अनुस्वार नकार के स्थान में हुआ है । जैसा कि लिखा है—"नकारजावनुस्वारपञ्चमौ झलि धातुषु" । इसलिए क्त प्रत्यय करने पर 'अनिदिताम्' इससे नकार का लोप होने से निष्पन्न 'तृढः' इसमें दीर्घ की व्यावृत्ति के लिए अण्-ग्रहण किया गया है । अण् यहां पूर्व णकार से लिया गया है, पर णकार से नहीं । इसमें प्रमाण 'लण्' सूत्र का भाष्यव्याख्यान है ॥

विप्रतिषेधे परं कार्यम् ॥ क्रिया के विनिमय अर्थ में वर्तमान विप्रतिपूर्वक षिध धातु से

---

१. गुर्वेर्यलोपे लिङि सेरिलोपे हल्ङ्यादिलोपे रपरे गुणे च ।
भष्भावजश्त्वे च रु रेफ लोपे ढ्रलोपदीर्घे च भवेदजर्घाः ॥

२. लिहेर्हढत्वे च तकार धत्वे ष्टुत्वेन ढत्वे ढपरे ढलोपे ।
किल्त्वाद् गुणाभाव इकारसत्त्वे ढ्रलोपदीर्घेण भवेच्च लीढः ॥

तुल्यबलविरोधे सति परं कार्यं स्यात् ।

वचनप्रामाण्याद् बाधकत्वे स्थिते तद्भिन्नोऽस्य विषय इत्याह—तुल्यबलेति । द्वयोः शास्त्रयोः क्वचिल्लब्धावकाशयोरेकत्र प्रयोगे युगपदसम्भवि स्वकार्यसमर्पणञ्च सः । तत्र प्रायेणैकस्य कार्यद्वययोगकृतेऽसम्भवे एतस्य प्रवृत्तिः । यथा 'वृक्षेभ्यः' इति । तत्र हि दीर्घैत्वयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्तानन्तर्यासम्भवः । क्वचित् केवलासम्भवेऽपि, यथा 'शिष्टात्' इत्यादौ । अत्र हि तातङ्शाभावयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्तानन्तर्यासम्भवः ।

यद्यपि तातङादेस्थानिवत्त्वेनास्त्येव तत्, तथाप्यतिदेश आदेशप्रवृत्त्युत्तरमेव, नतु तत्प्रवृत्तिकाले इति युगपदसम्भवोऽस्त्येवेति परत्वात्तातङि सकृद्गतिन्यायेन न शादेशः ।

स्पष्टञ्चेदं सर्वं प्रकृतसूत्रे 'इको गुणवृद्धी' (१।१।३) 'अदसो मात्' (१।१।१२) इत्यादावाकरे ।

तुल्यबलविरोधपदार्थमाह—**द्वयोरिति । युगपदसम्भवि इति ।** सर्वशास्त्रेण स्वविधेयघटिते साधुत्वमन्यत्र चासाधुत्वं वोध्यते । अतः युगपत् तस्यैव साधुत्वमसाधुत्वञ्च कथं सम्भवेदिति असम्भवः । स्वकार्यसमर्पणम् = स्वविधेयबोधनम् । स्वस्वनिमित्तेति ।

यत्किञ्चिदङ्गाव्यवहितोत्तरत्वविशिष्टयोस्तु द्वयोः स्थाने यत्किञ्चिदङ्गाव्यवहितोत्तरत्वविशिष्टस्तातङ् भवतीत्यर्थः । तुह्योस्तातङावित्यस्य ह्यव्यवहितपूर्वत्वविशिष्टशासः स्थाने ह्यव्यवहितपूर्वत्वविशिष्टः शो भवतीत्यर्थः 'शा हौ' इत्यस्य वक्तव्यः । तथा च शिष्टात् इत्यादौ शातातङादेशयोर्युगपत्प्रवृत्तौ शादेशे ह्यव्यवहितपूर्वत्वस्य तातङादेशे च यत्किञ्चिदङ्गाव्यवहितोत्तरत्वस्य चाभावात् निमित्तानन्तर्यासम्भवः ।

यद्यपीति । तातङादेः स्थानिवद्भावेन स्थानिवृत्तिधर्मातिदेशेन स्वस्वनिमित्तानन्तर्यं सम्भवति, तथापि आदेशप्रवृत्त्युत्तरमेव स्थानिवद्भावेनातिदेशो न तु आदेशप्रवृत्तिकाले । तथा च आदेशप्रवृत्तिसमये निमित्तानन्तर्यस्य सम्भवो नास्त्येव । तथा च आदेशसमये स्वस्वनिमित्तानन्तर्यमादाय विप्रतिषेधसूत्रं प्रवर्तते । विप्रतिषेधसूत्रे, असम्भवे इत्यादिना उक्तोऽर्थः, 'इको गुणवृद्धी' इति सूत्रे यद्यपीत्यादिना प्रतिपादितोऽर्थः "अदसो मात्" इत्यत्र भाष्ये स्पष्टीकृतः ।

भाव अर्थ में घञ् प्रत्यय होने से निष्पन्न विप्रतिषेध शब्द का परस्पर विरोध अर्थ है । तत्र = मिथः विरोध के विषय में नित्यशास्त्र की प्रवृत्ति परशास्त्र की प्रवृत्ति के पूर्व और अनन्तर—दोनों ही दशा में अवश्य प्राप्त होने से इसका अभाव अक्लृप्त होने के कारण जिसका पक्ष में अभाव निश्चित है, ऐसे परशास्त्र का बाध होना उचित है । अतः पर का नित्यशास्त्र से बाध होता है । दोनों की अपेक्षा अन्तरङ्गशास्त्र की बाधकता ज्ञापन द्वारा सिद्ध होने से अन्तरङ्ग बलवान् है । सर्वापेक्षया अपवादशास्त्र बलवान् होता है; क्योंकि उनके बाध के बिना वचन की चरितार्थता न होने से वैयर्थ्य प्राप्त होता है । अतः इनसे अतिरिक्त स्थलों में विप्रतिषेधसूत्र से पूर्वशास्त्र की अपेक्षा परशास्त्र के बलवत्त्व का बन्धन होता है । इसी आशय से तुल्यबलविरोध में ऐसा लिखा गया । अधिक बलशाली के बाध्यबाधकभाव की व्यवस्था 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इसके अनुसार होती है ।

तुल्यबलेति—किसी लक्ष्य में सावकाश पूर्व और परशास्त्र का एक ही लक्ष्य में असम्भव

तत्र युगपदुभयोः कार्ययोरसम्भवात् पर्यायेण तृजादिवच्छास्त्रद्वयप्रसङ्गे नियमार्थमिदम्, परमेवेति। तेन 'तिसृणाम्' इत्यत्र यौगपद्यासंभवेन परत्वात्तिस्रादेशे पुनः स्थानिवत्त्वेन त्रयादेशो न। तत्पठ्यते—'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति।

तत्र युगपदिति। परिभाषेन्दुशेखरे मूले एव स्पष्टम्। **पर्यायेणेति**। असति बाधके उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयः। बाधके सति तु उद्देश्यतावच्छेदकसामानाधिकरण्येन। तथा च असति बाधके उद्देश्यतावच्छेदकव्यापकत्वं विधेये विधेयसंसर्गे वा भासते। तथा च 'ण्वुल्-तृचौ' इत्यादौ धातुत्वव्यापकत्वस्य ण्वुल्त्वादिना ण्वुलादौ बाधात् ण्वुलाद्यन्यतमत्वेन व्यापकत्वं वाच्यम्। न च ण्वुल्भिन्नत्वे सति तृज्भिन्नत्वे सति तिबादिभिन्नभिन्नत्वम्; कदाचित् तिबादिभिन्नत्वे सति ण्वुल्भिन्नत्वे सति तृज्भिन्नभिन्नत्वमित्येवं विशेष्यविशेषणव्यत्यासेन अन्यतमत्वस्य गौरवग्रस्तत्वेन तेन रूपेण व्यापकत्वं दुर्घटमिति वाच्यम्; यादृशसंख्याविशिष्टानामन्यतमत्वं वाच्यं तत्संख्याका ये तद्भेदाः तादृशभेदात्यन्ताभाववत्त्वं तदन्यतमत्वमित्यदोषात्। यथा एकत्व-द्वित्व-त्रित्व-संख्या-

कार्य का समर्पण तुल्यबलविरोध है। विरोध रहने पर एक ही स्थान में प्रायः कार्यद्वय का योग असम्भव होने पर इस सूत्र की प्रवृत्ति होती है। जैसे वृक्षेभ्यः। यहाँ पर एक ही अकार को दीर्घ और एत्व दोनों कार्यों का होना सम्भव नहीं है। क्योंकि दीर्घ का निमित्त सुप् है, उससे अव्यवहित पूर्व आ नहीं है, मध्य में एकार से व्यवधान है; यदि एकार पहले है और दीर्घ आ बाद में है तो बहुवचन से अव्यवहित पूर्व ए नहीं है। इस प्रकार अपने अपने निमित्त का अव्यवहितपूर्वत्व आदेश में नहीं होगा। कहीं एक को कार्य-द्वय के योग न होने पर भी केवल असम्भव में बाध्यबाधकभाव होता है। 'शिष्टात्' इस प्रयोग में शास् धातु से लोट् और हि होने पर 'तुह्योः' इस सूत्र से हि को तातङ् आदेश प्राप्त होता है और शास् को 'शा हौ' इससे शास् के स्थान में शा आदेश प्राप्त होता है। यहाँ एक को कार्यद्वय का योग न होने पर भी स्व स्व निमित्त के आनन्तर्य का असम्भव है। 'शा' आदेश के अनन्तर यत्किंचित् अङ्ग से अव्यवहितोत्तरत्वविशिष्ट 'हि' नहीं है। क्योंकि शास् की अङ्गसंज्ञा है, शा की नहीं। इसी प्रकार तातङ्-आदेशोत्तर हि-निरूपित व्यवहितपूर्वत्वविशिष्ट शास् धातु नहीं है। इस प्रकार निमित्तानन्तर्यासम्भव है।

शंका—तातङ् हि आदेश प्रवृत्ति के उत्तर स्थानिवद्भाव से हित्वातिदेश शास्त्वातिदेश आदि के हो जाने से स्व स्व निमित्त के आनन्तर्य का असम्भव कहाँ है ?

समाधान—आदेश के प्रवृत्त्युत्तर ही अतिदेशशास्त्र की प्रवृत्ति हो सकती है। आदेश-प्रवृत्ति के समानकाल में अतिदेश की प्रवृत्ति न होने से उस काल में स्वनिमित्त के आनन्तर्य का असम्भव स्पष्ट ही है। अतः परस्पर विरोध होने पर "सकृद्गतौ यद् बाधितं तद् बाधितमेव" इस न्याय से पुनः शा आदेश की प्रवृत्ति नहीं होगी।

सकृद्गतिन्याय में मूल का उल्लेख करते हैं—**तत्र युगपद् इति**। एक ही काल में उक्त रीति से दोनों सूत्रों की प्रवृत्ति असम्भव होने पर क्रम से "ण्वुल्-तृचौ" इस सूत्र द्वारा जिस प्रकार धातु से पर्याय से ण्वुल् और तृच् प्रत्यय का विधान होता है, उसी प्रकार कभी पूर्वशास्त्र कभी परशास्त्र से विधान प्राप्त होने पर विप्रतिषेध सूत्र नियमार्थक है। परशास्त्र की ही प्रवृत्ति

यद्वा, यथा तुल्यबलयोरेकः प्रेष्यो भवति; स तयोः पर्यायेण कार्यं करोति, यदा तमुभौ युगपत्प्रेषयतो नानादिक्षु च कार्ये भवतस्तदोभयोर्न करोति, यौगपद्यासम्भवात्; तथा शास्त्रयोर्लक्ष्यप्रेष्ययोः क्वचिल्लक्ष्ये यौगपद्यासम्भवादप्रतिपत्तौ प्राप्तायामिदं 'परं भवति'—इति विध्यर्थम्। तत्र कृते यदि पूर्वस्यापि निमित्तमस्ति तदा तदपि भवत्येव। तत्पठ्यते—'पुनः प्रसङ्गविज्ञानात्सिद्धम्' इति। यथा 'भिन्धि' इत्यत्र परत्वात्तातङि पुनर्धिर्भवति।

अत्र तातङ्-धिभावयोर्युगपदेकस्थानिसम्बन्धस्याङ्गरूपानिमित्तानन्तर्यस्य वा न सम्भव इति भाष्ये स्पष्टम्।

विशिष्टानां ण्वुल्-तृच्-तिङामन्यतमत्वं विवक्षितम्, तत्र तत्संख्याकाः एकत्व-द्वित्व-त्रित्व-संख्याका ये भेदाः घटादौ तस्यात्यन्ताभावः। पूर्वोक्तेषु **त्रिषु इति।** यादृशविधेयेतरो यः तादृशोद्देश्यतावच्छेदकावच्छिन्नोद्देश्यतानिरूपितविधेयताश्रयः, तदनधिकरणं तत्तदुद्देश्यतावच्छेदकाधिकरणं तद्वृत्त्यन्ताभावाप्रतियोगित्वं तदुद्देश्यतावच्छेदकव्यापकत्वं तस्मिन् विधेये। यथा 'ण्वुल्-तृचौ' इत्यादौ ण्वुल्त्वावच्छिन्ने धातुत्वावच्छिन्नव्यापकत्वं वक्तव्यम्, तत्र ण्वुल्त्वावच्छिन्नातिरिक्तः, धातुत्वावच्छिन्नोद्देश्यतानिरूपितविधेयताश्रयो यस्तृजादिः तस्यानधिकरणं यद्धातुत्वाधिकरणं सद् धातुत्वाधिकरणं कारक इति तद्वृत्त्यन्ताभावप्रतियोगित्वं ण्वुलीति समन्वयो लक्षणस्येति टिप्पणीकृतः। इतोऽधिकंत त्रैवानुसन्धेयम्।

होती है, पूर्व की नहीं। इस प्रकार नियमार्थक मानने से तिसृणाम् इसमें 'त्रेस्त्रयः' इस सूत्र का युगपद् कार्यद्वयासम्भव होने से परत्व के कारण तिसृ आदेश से बाध होने पर स्थानिवद्भाव से त्रित्वातिदेश होने पर भी पुनः त्रयादेश नहीं हुआ। यही मूल हैं उक्त परिभाषा में। सकृत् = एक बार। गतौ का प्राप्तौ यह अर्थ है, प्राप्त्यभिन्न विप्रतिषेध में।

लोकदृष्टान्त के द्वारा 'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इस न्याय की सिद्धि का प्रकार लिखते हैं—**यद्वा इति।** समान प्रभावशाली दो व्यक्ति का एक ही आदेशपालक दोनों का कार्य क्रम से सम्पन्न करता है। कदाचित् एक ही काल में उन दोनों व्यक्तियों के द्वारा उस आदेशपालक को विभिन्न दिशाओं में भिन्न-भिन्न कार्य करने के निमित्त प्रेषण करने पर वह व्यक्ति उन दोनों का कार्य नहीं करता; क्योंकि एक काल में दोनों के कार्यों का करना सम्भव नहीं है। लक्ष्य ही प्रेष्य हैं जिनके ऐसे पूर्व और पर शास्त्र किसी लक्ष्य में युगपत् कार्यासम्भव की अप्रवृत्ति प्राप्त होने पर विप्रतिषेधसूत्र परशास्त्र के प्रवर्तन द्वारा विधायक है।

इस प्रकार परशास्त्र की प्रवृत्ति हो तो उसकी प्रवृत्ति भी होती है। एतन्मूलक ही उक्त परिभाषा पढ़ी गई है। उदाहरण के रूप में भिन्धि यह है। यहाँ धि आदेश को बाध कर पहले पर होने से तातङादेश होता है। उसके अनन्तर स्थानिवद्भाव से 'हुझल्भ्यो हेर्धिः' इस सूत्र से धि आदेश होता है। यहाँ तातङ् और धि आदेश का एक काल में एक स्थानी में सम्बन्ध संभव नहीं है। एवं यत्किञ्चिद् अङ्गाव्यवहितोत्तरत्वविशिष्ट तातङ् तथा यत्किञ्चिदङ्गाव्यवहितोत्तरत्वविशिष्ट धिरूप निमित्त का आनन्तर्य सम्भव नहीं है।

शंका—कार्यों की प्रयोगरूप एक ही देश में उपस्थिति होने से समान देशस्थ हो जाने के कारण इनमें पूर्वापरभाव नहीं हो सकता?

कार्ये परत्वञ्च परशास्त्रविहितत्वम् । कार्यकालपक्षेऽप्यष्टाध्यायीपाठपरत्वमेव नियामकम् । अत एव 'ङमो ह्रस्वात्' (८।३।३२) इत्यादौ त्रिपादीस्थे कार्यकालपक्षे एव परिभाषयोः प्रवृत्त्या एकदेशस्थत्वेऽपि परत्वात् 'तस्मादित्युत्तरस्य' (१।१।६७) इत्यनेनैव व्यवस्थेति सङ्गच्छते । त्रिपादीस्थेन शास्त्रेण विरुद्धपरिभाषाद्वयमध्ये परैव काल्यते आकृष्यते न पूर्वेति तत्त्वम् ।

संज्ञानां तु कार्यकालपक्षे प्रदेश एव वाक्यार्थेनत द्बोधोत्तरमेव विरोधप्रतिसन्धानं कार्यज्ञानञ्चेति तत्रत्यपरत्वमेवैतत्सूत्रप्रवृत्तौ बीजम् । अत एव 'कार्यकालपक्षेऽयादिभ्यः परैव प्रगृह्यसञ्ज्ञा' इति 'अदसो मात्' (१।१।१२) इति सूत्रे भाष्ये उक्तम् । परिभाषाणां तु तत्पक्षे तद्देशत्वेऽपि स्वस्वदेशेऽर्थबोधोऽस्त्येवेति तासां पाठकृतमेव तत् एतत्सूत्रप्रवृत्तौ नियामकमिति बोद्धव्यम् ।

ननु कार्यस्य प्रयोगरूपे एकस्मिन् देशे सत्त्वेन कथं परत्वम् ? अत आह—**कार्ये परत्वमिति ।** न च विप्रतिषेधसूत्रस्य सापादिकत्वेन एतद्दृष्ट्या त्रैपादिकस्यासिद्धत्वेन कथं प्रवृत्तिरिति वाच्यम्; अस्य परिभाषात्वेन कार्यकालपक्षाभ्युपगमेनादोषात् । न चैवं कार्यकालपक्षे 'ङमो ह्रस्वादचि' इत्यादौ उपस्थित्या एकदेशस्थत्वेन पूर्वापरभावो न स्यादत आह—**अष्टाध्यायीति ।** अष्टाध्यायीपाठकृते परत्वमाश्रित्य व्यवस्थापनीयत्वात् । अत्र प्रमाणमाह—**अत एवेति ।** अष्टाध्यायीपाठकृतपरत्वाश्रयणादेव—अचीत्यादौ इति । आदिना "ङः सि धुट्" इत्यादेः संग्रहः ।

वाक्यार्थेनेति । संज्ञाशास्त्राणान्तु कार्यकालपक्षे प्रदेशदेशे एव अप्रामाण्यज्ञानानास्कन्दितलक्ष्यधर्मिकसाधुत्वप्रकारकबोधोपयोगिवाक्यार्थबोधेन । तस्मात् प्रदेशस्थपरत्वमेव तत्र विप्रतिषेधसूत्रप्रवृत्तौ बीजम् । **अत एव इति ।** यत्र उक्तवाक्यार्थबोधो जायते स एव शास्त्रस्य देश इति स्वीकारादेव । प्रगृह्यसंज्ञाया अयादिभ्यः पूर्वं पाठेऽपि प्रदेशसूत्रस्य 'प्लुतप्रगृह्याः' इत्यस्य परत्वेन तत्र एकवाक्यतया अन्वयेन प्रगृह्यसंज्ञाया अपि अयादिभ्यः परत्वं भाष्ये उक्तम् । परिभाषाणान्तु स्वदेशेऽपि वाक्यार्थबोधात् तद्देशकृतमेव परत्वं गृह्यते इति भावः ।

समाधान—कार्य में परत्व परशास्त्र से विहित होने के कारण है । अतः एकदेशस्थ होने पर भी क्षति नहीं है ।

'यथोद्देशपक्ष में ही परिभाषाओं का पौर्वापर्य होता है, कार्यकाल पक्ष में नहीं—इस प्रदीप का खण्डन करते हैं—**कार्यकालपक्षे इति ।** ऐसा ज्योत्स्नाकार का मत है । कार्यकालपक्ष में अपि शब्द से यथोद्देश पक्ष में भी परिभाषाओं का अष्टाध्यायीपाठकृत पौर्वापर्य ही लिया जाता है । इसलिए 'ङमो ह्रस्वादचि' इस त्रिपादी सूत्र में तस्मिन् एवं तस्मात् इन दोनों परिभाषाओं की उपस्थिति होने पर दोनों की समानदेशस्थता रहने पर भी पर होने के कारण 'तस्मात्' इस परिभाषा से 'तस्मिन्' इसका बाध सिद्ध होता है, अन्यथा कार्यकाल में दोनों एक ही सूत्र में उपस्थित होने से समानदेशस्य हो जाने के कारण परत्वमूलक बाध्यबाधक भाव नहीं होगा । त्रिपादीस्थ शास्त्र विरुद्धार्थोपस्थापक परिभाषाओं के मध्य में पर परिभाषा का ही कार्य के लिए काल्यते = आकर्षण करता है, पूर्वशास्त्र का नहीं—यह तात्पर्य है ।

यद्यपीयं परिभाषा, तथापि कार्यग्रहणेन कार्यमात्रग्रहणात् 'तस्मिन्' (१।१।६६) इति, 'तस्मात्' (१।१।६७) इति परिभाषयोरपि व्यवस्थापिका। कार्यकाल-पक्षेऽपि नैषा इक्परिभाषादिवद् विध्येकवाक्यतयाऽङ्गत्वात् स्वकार्यनिष्पादिका, किन्तु वाक्यभेदेनैव कार्यं व्यवस्थापयति। यथा 'वृक्षेभ्यः' इत्यत्रैत्वदीर्घत्वयोः प्राप्तयोः परमेत्वं प्रवर्तयति। एवम् 'असिद्धं बहिरङ्गम्' (प०) इत्यादयोऽपीति 'खरवसानयोः' (८।३।१५) इत्यत्र कैयटे **स्पष्टम्**।

यद्यपीति। विप्रतिषेधसूत्रस्य परिभाषात्वेन 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्' इति न्यायेन तस्मिन्, तस्मादित्यनयोः परिभाषयोर्विषये प्रवृत्तिर्न स्यादित्याह—**तथापीति**। सूत्रेऽस्मिन् कार्यग्रहणेन कार्यमात्रं गृह्यते। तथा च परिभाषयोरपि एकतर-प्रवृत्तेर्व्यवस्थापिका। कार्यग्रहणं सूत्रे कार्यमात्रबोधनाय उपात्तमिति भावः। कार्ययोः विरोधज्ञानोत्तरमेव विप्रतिषेधसूत्रस्य प्रवृत्त्या विरोधप्रतिसन्धानञ्च वाक्यार्थबोधोत्तर-मेवेति न 'इको गुणवृद्धी' इत्यादिवत् पदैकवाक्यतया विप्रतिषेधसूत्रस्यान्वयः, किन्तु वाक्यभेदेन, इत्याह—**कार्यकालेति**।

एवमिति। एतद्वाक्यभेदेनैव व्यवस्थापकास्ते न्याया इत्यर्थः। तत्रापि अन्त-

---

परिभाषाओं से संज्ञाशास्त्र के भेद-प्रतिपादनार्थ लिखते हैं—**संज्ञानामिति**। कार्यकाल पक्ष में संज्ञा विधायक शास्त्रों का प्रदेश देश=विधिदेश में ही वाक्यार्थ बोध हो जाने से वाक्यार्थ ज्ञान के अनन्तर ही विरोध का तथा कार्य का ज्ञान हो जाता है। इसीलिए तत्रत्य= विधिदेश का परत्व ही संज्ञाशास्त्रों की प्रवृत्ति का कारण है। (अष्टाध्यायीपाठकृत परत्व नहीं)। इसीलिए 'अदसो मात्' इस सूत्र के भाष्य में अयादि आदेश से प्रगृह्यसंज्ञा पर है—इस प्रकार का उल्लेख है। अष्टाध्यायीपाठकृत परत्व का आश्रयण करने पर अयादेश के ही पर होने से भाष्य की असङ्गति हो जायगी। परिभाषाओं में संज्ञाशास्त्र की अपेक्षा वैलक्षण्य है। परिभाषाओं का कार्यकालपक्ष में विधिदेशस्थ होने पर भी इनका अपने-अपने देशों में वाक्यार्थबोध होता ही है। अतः इनका अष्टाध्यायीपाठकृत परत्व ही परशास्त्र की प्रवृत्ति का नियामक है।

शङ्का—'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्'—अप्रधानों का परस्पर सम्बन्ध परार्थ होने से अन्य के लिए होने से नहीं होता है, यह न्याय है। 'विप्रतिषेधे' यह सूत्र भी परि-भाषासूत्र है, अतएव परार्थ है। 'तस्मिन्' और 'तस्मात्' ये दोनों भी परिभाषा हैं। इनकी व्यवस्था में विप्रतिषेध इस सूत्र की प्रवृत्ति नहीं होगी। अप्रधान का अप्रधान के साथ सम्बन्ध नहीं होता ?

समाधान—सूत्र में कार्य शब्द का उपादान होने से कार्यमात्र का ग्रहण है। अन्यथा 'विप्रतिषेधे परम्' ऐसा ही सूत्र करना था। अतः प्रधान अप्रधान कार्य का इसमें विचार नहीं है। यों, इन परिभाषाओं की व्यवस्था में इस सूत्र की प्रवृत्ति होती है।

कार्यकाल और यथोद्देश—इन दोनों पक्षों में 'इको गुणवृद्धी', 'सार्वधातुकार्धधातुकयोः'— इन दोनों की पदैकवाक्यता से अन्वय होता है, उस प्रकार विप्रतिषेधसूत्र की दोनों पक्षों में विधिसूत्र के साथ पदैकवाक्यता नहीं है, किन्तु पृथक् वाक्यार्थबोध द्वारा कार्यनिष्पादन करता है।

इति लोपे प्राप्ते। 'पूर्वत्रासिद्धम्' (सू० १२) इति 'रो रि' (सू० १७३) इत्यस्यासिद्धत्वादुत्वमेव । मनोरथः ॥

एवञ्च 'विप्रतिषेधे' (१।४।२) इत्येषा यथोद्देशैवेति स्थितम् । त्रिपाद्यां कार्यकालपक्षेऽप्यप्रवृत्तेः, पूर्वदृष्ट्या परावस्थानाभावादित्यन्यत्र विस्तरः ।

इति लोपे इति । **उत्वं नित्यमिति** तु न, 'भोभगो' (८।३।१७) इति सूत्रोक्तरीत्या

रङ्गत्वज्ञानार्थं प्राग् वाक्यार्थज्ञानस्यापेक्षणात् । एवं सति यत् फलितं तदाह-**एवञ्चेति** । तथैव कार्यव्यवस्थापकत्वे च । **यथोद्देशा इति** । परोक्षा क्रिया इतिवत् यथोद्देशमस्त्यस्याः इति अर्शआदित्वाद् अचि कृते साधुः—यथोद्देशा । यथोद्देशस्वीकारादेव कार्यकालेऽपि त्रिपाद्यामस्या अप्रवृत्तेः । अष्टाध्यायीपाठस्य ग्रहणेन एतद्दृष्ट्या त्रैपादिकानामसिद्धत्वात् । **पक्षेऽपि इति** । अपिना यथोद्देशपक्षस्य समुच्चयः । विप्रतिषेधसूत्रेण सापादिकानां मध्ये पूर्वशास्त्रापेक्षया परस्य बलवत्त्वं बोध्यते, न तु सापादिकत्रैपादिकयोः, त्रैपादिकयोर्वेति निष्कर्षो बोध्यः । न च 'रो रि' इति लोपापेक्षया उत्वं नित्यम् । तथाहि अकृतेऽपि रेफस्य लोपे कृतेऽपि स्थानिवद्भावेन रुत्वातिदेशात् उत्वं प्राप्नोतीत्याह—**उत्वमिति** । रो रीत्यत्र रेफस्य लोपविधानेन रेफत्वावच्छिन्ना स्थानिता अल्त्वव्याप्यधर्मावच्छिन्ना, तन्निरूपिता आदेशता लोपे, तद्धर्मिकः आरोपः 'लोपः रुत्ववान् भवतु' इत्याकारकः तादृशारोपप्रकारीभूतो धर्मः रुत्वम्, तेन साक्षादवच्छिन्नोद्देश्यताके कार्ये उत्वे कर्त्तव्ये स्थानिवद्भावस्य अनल्विधाविति प्रतिषेधात् न उत्वस्य नित्यत्वम् । **स्थानिवत्त्वेनेति** । रोः स्थाने

जिस प्रकार 'वृक्षेभ्यः' में एत्व और दीर्घत्व की प्राप्ति होने पर एत्वशास्त्र को प्रवृत्त कराता है ।

प्रसङ्ग से परिभाषान्तर के विषय में भी लिखते हैं—**एवमिति** । अन्तरङ्गपरिभाषा भी अन्तरङ्ग बहिरङ्ग शास्त्रीय वाक्यार्थबोध के अनन्तर वाक्यभेद से अन्तरङ्ग की दृष्टि में बहिरङ्ग के असिद्धत्व की व्यवस्था करती है, पदैकवाक्यता से नहीं । क्योंकि वाक्यार्थबोध के अनन्तर ही अन्तरङ्गत्व तद्विरोधी बहिरङ्गत्व का ज्ञान होगा । विप्रतिषेधसूत्र में यथोद्देश पक्ष ही है । कार्यकालपक्ष में त्रिपादी में प्रवृत्ति नहीं होती; क्योंकि पूर्व की दृष्टि में पर की स्थिति नहीं है ।

'मनस् + रथः' यहाँ पर रुत्व होने के अनन्तर पर होने से 'हशि च' इस सूत्र को बाध कर इससे रेफ का लोप प्राप्त होने पर 'पूर्वत्रासिद्धम्' इस सूत्र के द्वारा सापादिक उत्व की दृष्टि में रेफलोप त्रैपादिक होने से असिद्ध होने के कारण उत्व गुण होने से 'मनोरथः' सिद्ध होता है ।

शंका—उत्वविधि रेफ के रहने पर और लोप होने पर भी स्थानिवद्भाव द्वारा अतिदेश होने से उत्व प्राप्त है । अतः कृताकृतप्रसङ्गित्वरूप नित्यत्व के बल पर उत्व लोप का बाधक होगा ?

समाधान—'रो रि' इस सूत्र की स्थानिता रेफत्वावच्छिन्न होने से अल्त्वव्याप्यधर्मावच्छिन्न स्थानिता हो गई । 'अनल्विधौ' इससे 'भो भगो' इस सूत्र में प्रतिपादित रीति से निषेध होने से अतिदेश नहीं होगा । अतएव लोपोत्तर उत्व की प्राप्ति नहीं है ।

दूसरा समाधान भी है—स्थान को प्रसङ्ग कहते हैं । प्रसङ्ग उच्चारणरूप है । अतिदेश से तद्धर्म की बुद्धि होने पर भी उच्चारणरूप प्रसङ्ग न रहने से लोप के अनन्तर उत्व की प्राप्ति नहीं है ॥

१७६. एतत्तदोः सुलोपोऽकोरनञ्समासे हलि । ६ । १ । १३२ ।
अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि, न तु नञ्समासे । एष विष्णुः । स शम्भुः ॥

लोपस्याऽल्विधित्वात् स्थानिवत्त्वेन तद्धर्मातिदेशेऽपि उच्चारणप्रसङ्गरूपस्थानषष्ठ्यर्थाभावेन लोपे तदप्राप्तेश्च ।

एतत्तदोः (६।१।१३२) । **अनुकार्यस्वरूपभङ्गभिया कोशे इवैकशेषाभावः । एतत्तदोरनन्तर इत्यर्थः । तेन 'परमस ददाति' इत्यादौ न दोषः । गौणे तु न दोषः; तत्र**

उत्वस्य विधानेन स्थानिवद्भावेन कस्यचिद् धर्मस्यातिदेशेऽपि उच्चारणप्रसङ्गरूपस्थानस्य अतिदेशेन लब्धुमशक्यतया उत्वस्याप्राप्तेश्च । रोः उच्चारणप्रसङ्गे उत्वमुच्चारणीयम्, दर्भाणां स्थाने शरैः प्रस्तरितव्यमित्यत्र प्रसङ्गो नोच्चारणमिति व्याकरणेऽपि प्रसङ्गो नोच्चारणमिति कस्यापि कल्पना न युक्ता; शास्त्रभेदेन अर्थानां भेदात् ॥

एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ॥ 'त्यदीदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते' इति वार्त्तिकेन एतत्तदोरित्यनयोरेकशेषः कथं नेति शङ्कायामाह-**अनुकार्येति ।**

प्रकृतिवदनुकरणं भवतीति परिभाषया अनुकरणस्यापि अनुकार्यातिदेशे एकशेषप्राप्तेः सत्त्वात् अनुकार्यस्वरूपभङ्गभिया परिभाषाया अनित्यत्वाश्रयणान्न दोषः ।

एतत्तदोर्विहितस्य सोर्लोपे परमसः इत्यत्र लोपो न स्यात् । न हि अत्र सुः एतच्छब्देन तच्छब्देन वा विहितः, किन्तु परमतच्छब्देन । अत एतत्तदोरनन्तरस्य सोर्लोप

एतत्तदोः ॥ शंका—'त्यदादीनां मिथः सहोक्तौ' इस वार्त्तिक से यहाँ एकशेष क्यों नहीं हुआ ?

समाधान—अनुकार्य और अनुकरण की समान आनुपूर्वी होने का नियम है । एकशेष होने पर अनुकार्य से अनुकरण के स्वरूप का भेद हो जायगा, अतः एकशेष नहीं हुआ । 'प्रकृतिवदनुकरणं भवति' इसके अनुसार अनुकरण भी स्वीय त्यदाद्यर्थवाचक होने से एकशेष की व्यावृत्ति का शेखरोक्त प्रकार उचित ही है । टिप्पणीकार की चिन्ता अनावश्यक है । कोश में निर्दिष्ट पदों का एकशेष स्वरूपभङ्ग के भय से नहीं किया है, उसी प्रकार यहाँ भी समझना चाहिए ।

'सहविवक्षा के अभाव से कोश में एकशेष नही है'—यह कहना सम्भव नही है, क्योंकि ये समानार्थक हैं । इस प्रकार एक क्रिया में अन्वय होने से सहविवक्षा है । पञ्चमी के न होने के कारण अनन्तर अर्थ विवक्षित है । अनन्तर का 'अव्यवहितोत्तर अनन्तर' ऐसा अर्थ है । इसीलिए 'परमस ददाति' यहाँ परमतत् शब्द से विहित सु भी तत् शब्द के अव्यवहित उत्तर समीप है । अतः लोप होता है । 'रामः स ददाति' यहाँ रामपदोत्तर सु का लोप नहीं हुआ । 'अतितत्' इत्यादि गौण स्थल में इसकी प्रवृत्ति न होने पर भी 'त्यदादीनामः' इस सूत्र से अत्व न होने से हल्ङ्यादि सूत्र से सुलोप इष्ट ही है । सूत्र में सु पद से प्रथमा के एकवचन का ही ग्रहण है, सप्तमीबहुवचन का नहीं । 'सोऽचि लोपे' इस सूत्र में प्रथमैकवचन का ही ग्रहण सम्भव होने से यहां भी अनुनासिकोकारविशिष्ट सकार का ही ग्रहण है ।

अकोः किम् ? एषको रुद्रः । अनञ्समासे किम् ? असः शिवः । हलि किम् ? एषोऽत्र ॥

१७७. सोऽचि लोपे चेत् पादपूरणम् । ६ । १ । १३४ । 'सस' **इत्ये-**

स्यदाद्यत्वाभावेन हल्ङ्यादिलोपस्य दुर्वारत्वात् । सु इति प्रथमैकवचनमेव; व्याख्यानात् ।

अनञ्समासे किमिति । **तस्य पूर्वपदार्थप्रधानत्वादुपसर्जनत्वात्त्यदाद्यत्वाभावेन हल्ङ्यादिलोपो दुर्वार इति प्रश्नः । उत्तरपदार्थप्रधानः स इत्युत्तरम् ॥**

सोऽचि लोपे (६ । १ । १३४) ॥ **ससिति प्रथमान्तस्य लुप्तषष्ठीकमनुकरणम् ।**

इत्येवार्थः । न चैवमर्थाभ्युपगमे गौणेऽपि सुलोपप्रसङ्ग इति वाच्यम्; इष्टत्वात् । गौणत्वेन त्यदाद्यत्वाभावे 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपप्राप्तेः । न च तथापि परमः स ददाति इत्यत्र अनन्तरत्वं पूर्वापरसाधारणं भवतीति तच्छब्दात् पूर्वस्यापि सोरनन्तरत्वात् लोपापत्तिरिति वाच्यम्; परस्यैव अनन्तरस्य ग्रहणेन अदोषात् । परम एषः इत्यत्र एतच्छब्दे सर्वत्र पूर्वस्य सोर्यदिशे लोपेनापहारात् तत्र उत्तरस्यैव सोर्लोपः, तत्साहचर्येण तच्छब्देऽपि ततः अनन्तरस्य परस्यैव ग्रहणं न पूर्वस्येति दोषाभावात् ।

सुरत्र प्रथमैकवचनमेव, न तु सप्तमीबहुवचनमपि, तदाह—**व्याख्यानादिति ।** व्याख्यानञ्च सोऽचिलोपे इत्युत्तरसूत्रे प्रथमैकवचनस्यैव ग्रहणसम्भवात्, इहापि तादृशस्यैव ग्रहणं युक्तम् । सोऽचीत्यत्र सस् इति लुप्तषष्ठ्यन्तस्य प्रथमान्तस्यानुकरणम् । तादृशञ्च रूपं सप्तम्यन्तस्य नेति पूर्वत्रापि प्रथमैकवचनमेव ग्राह्यमिति भावः ।

अनञ्समासे इत्यस्य ग्रहणाभावेऽपि नञ्समासे नञर्थस्य भेदस्य प्राधान्यात् तस्मिन् भेदे तच्छब्दस्य विशेषणत्वेन उपसर्जनत्वेन 'त्यदादीनामः' इत्यस्याप्राप्तौ 'हल्ङ्याब्भ्यः' इत्यादिना लोपस्य दुर्वारतया किमत्र तद्ग्रहणाग्रहणेनेति शङ्कते—**तस्येति ।** 'उत्तरपदार्थप्रधानस्तत्पुरुषः' इति नियमात् नञ्समासोऽप्युत्तरपदार्थप्रधानः । आरोपितब्राह्मणत्ववान् अब्राह्मण इत्यस्यार्थः । तथा च अनुपसर्जनत्वात् अत्वे 'असः शिवः' अत्रापि लोपः स्यात् तद्वारणाय अनञ्समासे इत्युक्तिः सफला ॥

सोऽचि लोपे चेत् पादपूरणम् ॥ लुप्तषष्ठीकमिति । सौत्रत्वात् षष्ठ्या लुक् । तच्छदस्य अत्वे पररूपे "तदोः सः" इति सत्त्वे सुविभक्त्यन्तस्य सस् इत्यस्यानुकरणं सूत्रे । तस्य रुत्वे उत्वे च सोऽचीति निर्देशः । सामान्यतो यस्य कस्य सस् इत्यस्य ग्रहणे तु कंसः इत्यत्रापि सुलोपः स्यात् । तत्रापि सस् इत्यस्य सत्त्वादतः तच्छब्दस्य तश्य

शंका—नञ् समास में पूर्वपद के अर्थ की प्रधानता होने से उत्तरपदार्थ पूर्व पदार्थ = नञर्थनिष्ठ विशेष्यतानिरूपितप्रकारताप्रयोजकत्वरूप उपसर्जन होने से सुलोप की प्राप्ति नहीं है । अतः वहाँ सुलोप के वारणार्थ अनञ् समास ग्रहण व्यर्थ है ?

समाधान—नञ् समास में उत्तरपदार्थ की प्रधानता होने से उपसर्जनत्व नहीं है । अतः प्राप्त सुलोप के वारणार्थ 'अनञ्समासे' इसकी आवश्यकता है ॥

सोऽचि लोपे ॥ सस् के अनन्तर उत्पन्न षष्ठी विभक्ति का सौत्र मानकर लुक् करने से 'अचि' का सम्बन्ध करने पर उत्व गुण के द्वारा 'सोऽचि' इसकी निष्पत्ति होती है । बारह अक्षरों

तस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत । सेमामविड्ढि प्रभृतिम् ।

इह 'ऋक्पाद एव गृह्यते' इति वामनः । 'अविशेषाच्छ्लोकपादोऽपि' इत्यपरे । सैष दाशरथी रामः ।

लोपे चेत् इति किम् ? स इत्क्षेति । स एवमुक्त्वा ॥

'सत्येव' इत्यवधारणं तु 'स्यश्छन्दसि बहुलम्' (सू० ३५२६) इति पूर्वसूत्राद् बहुलग्रहणानुवृत्त्या लभ्यते ।

सेमामविड्ढीति । द्वादशाक्षरपादा जगतीच्छन्दः । स एवमुक्त्वेति । लोपेऽत्र पादापूर्तेर्न लोप इति भावः । अवधारणन्त्विति । वृद्धैर्व्याख्यातमवधारणन्त्वित्यर्थः ।

ग्रहणम् । तत्र मानम् अर्थवद्ग्रहणे नानर्थकस्येति परिभाषया अर्थवत एव ससः ग्रहणात् । पूर्वस्मिन् सूत्रे तादृशस्यैव ग्रहणाच्च । सेमामविड्ढि प्रभृतिमित्येतावत्पर्यन्तं-पाद इति भ्रमवारणाय आह—द्वादशेति । 'ईशिषे' इत्यन्तं यावत् जगतीच्छन्दः । श्लोकस्यापि पादपूर्त्तौ सूत्रमेतत् प्रवर्तते । अतएव सैष दाशरथी राम इति सङ्गच्छते ।

लोपे सत्येव यत्र पादपूर्त्तिर्जायते तत्रैव लोपोऽनेन । तथा च 'स एवमुक्त्वा' इत्यत्र लोपे 'सैवमुक्त्वा' इति रूपसम्पत्तौ पादस्य पूर्तिर्न स्यात्, अतोऽत्र लोपो न भवति । किन्तु-'भो भगो' इत्यादिना यत्वे लोपे च तत् सिध्यति ।

वृद्धैरिति । 'लोपे सत्येव पादः पूर्येत' इत्यवधारणपरत्वेन वृद्धैर्व्याख्यातमपि प्रमाणान्तरानुपलब्धेः बहुलग्रहणानुवृत्त्या तदुपपादनीयम् ।

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति' ॥ इति ।

तदनुसारं क्वचित् सोऽचि 'लोपे' इत्यस्याप्रवृत्त्या स एवमुक्त्वा इत्यादावस्याप्रवृत्तेर्न दोषः । तथा च बहुलग्रहणानुवृत्तिमूलकमेव अवधारणपरकं व्याख्यानमिति परममूलाशयः ।

से जगती छन्द बनता है । 'स एवमुक्त्वा' इस श्लोक में एतत्तदोः इस सूत्र से स का लोप होने पर एव के एकार के साथ वृद्धि होने से सैवमु इस प्रकार एक वर्ण की न्यूनता से छन्द के पाद की पूर्त्ति नहीं होगी । अतः यहां इससे लोप नहीं हुआ । किन्तु 'भो भगो' इस सूत्र से यकार, 'लोपः शाकल्यस्य' इस सूत्र से यकार का लोप होने के अनन्तर वृद्धि यलोप की असिद्धि हो जाने से नहीं होती ।

अवधारणमिति—वृद्ध जनों के द्वारा 'लोप होने पर ही पाद की पूर्त्ति होने पर लोप होता है'—ऐसा व्याख्यान किया गया है । इस व्याख्यान में प्रमाणान्तर के न होने से बहुल-पदानुवृत्ति है । बहुल-ग्रहण से 'क्वचिदप्रवृत्तिः' इसके आधार पर कहीं सूत्र की प्रवृत्ति नहीं हुई । अतः लक्ष्यानुरोध से प्रवृत्ति तथा अप्रवृत्ति की व्यवस्था बाहुलक मानकर हो जाने से लोप होने पर ही पादपूर्त्ति हो—ऐसा अवधारणापरक व्याख्यान आवश्यक नहीं है ।

तेनेह न—सोऽहमाजन्मशुद्धानाम् (र० वं० १।५) ॥

बहुलेत्यादि । **गमकान्तराभावादिति भावः । एवञ्च तदनुवृत्त्यैव क्वचिदप्रवृत्तौ सिद्धायामवधारणपरतया व्याख्यानं व्यर्थमिति भावः । सर्वमेतदवधारणन्त्विति तुना सूचितमित्यलम् ॥**

वस्तुतस्तु अवधारणेन व्याख्यानं नावश्यकम् । यत्र लोपो नेष्यते तत्र बाहुलकाद् अप्रवृत्तिः स्यात् । बाहुलकादेव साक्षाद् अप्रवृत्तिसम्भवे बाहुलकद्वाराऽवधारणकल्पनया तद्वारणे गौरवमिति तात्पर्यमिति सर्वेष्टसिद्धिः ॥

॥ **इति स्वादिसन्धिः** ॥ पञ्चसन्धिप्रकरणं सम्पूर्णतामगात् ॥

अवधारणन्तु । इसमें तु शब्द से उक्त विषय की सूचना दी गयी है । इतना विवेचन पर्याप्त है ।

॥ इस प्रकार स्वादिसन्धि सम्पूर्ण हुई ॥ और पञ्चसन्धि भी पूर्ण हो गयी ॥

उत्पत्ति-स्थिति-संहार-कारणं जगतो मतम् ।
शिवं शिवकरं भक्त्या-नमामि क्षेमहेतवे ॥ १ ॥
लोकवेदनभोनेत्रे (२०४३) गङ्गादशहरोत्सवे ।
पूर्णा काश्यां शिवस्याङ्घ्रौ व्याख्येयं **राधिकाह्वया** ॥ २ ॥
'माधुसूदन व्याख्यायाः'[1] गीतायाः, शावरस्य च ।
न्यायपुष्पाञ्जलेष्टीकां रचयामास यः सुधीः ॥ ३ ॥
ख्यातो मे जनको महामहवता सूपाधिनालङ्कृतो,
जिह्वाग्रे सरसा सदा विलसिता शास्त्रार्णवोद्भासिनी ।
वाणी यस्य विपक्षपक्षदलने दक्षा जयश्रीः पुरः,
सोऽयं सार्थं **'कृपालुयुग्' 'हरिहरः'**[2] कृत्याऽनया प्रीयताम् ॥ ४ ॥
गङ्गोत्तुङ्गतरङ्गभङ्गजखिदा नीलाम्बुधाराधरा,
कालिन्दी, भयतोऽपगान्तरजला यस्मिन् स्थले सङ्गता ।
दूरे दक्षिणतोऽब्जयोजनमिते यत् 'पण्डितानां पुरम्,
तस्मिन् ब्राह्मणमात्रशुभ्रनिलये ग्रामेऽभवन्मे जनिः ॥ ५ ॥
श्रीमद्रामनिरञ्जनाभिधमहाविद्यालये पाटने,
श्रेष्ठिश्रीलमुरारकाञ्चितमहावीरादिभी रक्षिते ।
प्राचार्यस्य महत् पदं बहुतिथं निर्वाह्य कालोचितम्,
संस्कृतभाष्यमथानुवादमकरोत् **श्रीब्रह्मदत्तो** मुदे ॥ ६ ॥

॥ विद्यावाचस्पति आचार्य ब्रह्मदत्त द्विवेदी कृत 'राधिका' नामक संस्कृत हिन्दी टीका पूर्ण हुई ॥

१. गीता की मधुसूदनी व्याख्या, शावरभाष्य की कल्पलिका 'न्यायकुसुमाञ्जलि' की संस्कृत टीका एवं वृहदारण्यक्त वार्तिक सार का भाषानुवाद आपकी प्रकाशित कृतियां हैं :
२. महामहोपाध्याम पं० हरिहरकृपालु द्विवेदी ।

S. N. SARKAR